PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 51, 3

Commentaires sur le Mahābhāṣya de Patañjali
et le Pradīpa de Kaiyaṭa

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

III

Adhyāya 1 Pāda 1 Āhnika 8-9

Edition par M. S. NARASIMHACHARYA

Ouvrage publié avec l'aide de l'Unesco sur la recommandation du Conseil international de la Philosophie et des Sciences Humaines

INSTITUT FRANÇAIS D'INDOLOGIE
PONDICHÉRY
1976

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE No. 51, 3

Commentaires sur le Mahābhāṣya de Patañjali
et le Pradīpa de Kaiyaṭa

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

III

Adhyāya 1 Pāda 1 Āhnika 8-9

Edition par M. S. NARASIMHACHARYA

Ouvrage publié avec l'aide de l'Unesco sur la recommandation du Conseil international de la Philosophie et des Sciences Humaines

INSTITUT FRANÇAIS D'INDOLOGIE
PONDICHÉRY
1976

Imprimerie de Sri Aurobindo Ashram
Pondichéry, Inde

MAHĀBHĀṢYA PRADĪPA VYĀKHYĀNĀNI

महाभाष्यप्रदीपव्याख्यानानि

(प्रथमाध्याये प्रथमपादे ८–९ आह्निके)

प्रथमाध्यायस्य प्रथमे पादेऽष्टममाह्निकम्

स्थानिवदादेशोऽनल्विधौ. १. १. ५६

[१, ३९८–४०१]

(**लघुविवरणम्**) वतिनिर्देशः किं वत्यर्थप्राप्त्यर्थः, उत स्थान्यादेशभावनिवृत्त्यर्थः। नाद्य इत्याह — **विनापीति**। द्वितीयेऽपि किं स्थानिन [1]आदेशरूपप्राप्तिनिवृत्त्यर्थः, आहोस्वित् आदेशस्य स्थानिरूपप्राप्तिनिवृत्तये। नाद्यः, [2]तत्तदादेशविधायकैरेव शास्त्रे स्थानिन [3]आदेशरूपप्राप्तौ सिद्धायामनेनापि तत्प्रतिपादन[4]वैयर्थ्यात् स्थानिन [5]आदेशरूपप्राप्तिनिवृत्त्यर्थत्वायोगात्। न द्वितीय इत्याह — **न चेति**। **वा लिटीति विकल्पारम्भादिति**। ननु 'स्थान्यादेशः' इति सूत्रेण [6]'चक्षिङः ख्याञ्' इत्यनेन च सर्वत्र ख्याञो विकल्पप्राप्तौ लिट्येव विकल्पविधानेन नियमार्थं [7]'वा लिटि' इति सूत्रं स्यादिति कथमयं विकल्पो वचनद्वयप्रामाण्याद्विकल्पो न भवतीत्यस्यार्थस्य ज्ञापकः। उच्यते, ज्ञापकविकल्पप्रदर्शनमेतत्। "विभाषा लुङ्लृङोः' इत्यत्र विभाषाग्रहणं ज्ञापकं विकल्पो न भवतीति। यदि हि स्याद् विभाषाग्रहणमनर्थकं स्यात्, वचनद्वयेन विकल्पस्य सिद्धत्वात्। ननु संज्ञाधिकार इत्यनुपपन्नम्, संज्ञाशब्दानुच्चारणे स्वरितलिङ्गस्यासङ्क्तुमशक्यत्वेन शास्त्रीयाधिकारासंभवादित्यत आह — **संज्ञेति**। वधेरेवेत्यनुपपन्नम्, [9]'स्वे पुषः' इति स्वपर्यायेषूपपदेषु णमुल्विधानेऽपि यथा स्वशब्देऽप्युपपदे णमुल्विधीयते, एवं वधेरात्मनेपदविधानेऽपि हन्तेरपि भविष्यतीत्यत आह — **संज्ञा हीति**। कथं तर्हि संज्ञाप्रस्तावेऽपि विनापि वतिना [10]'बहुगण' इत्यत्रातिदेशपक्ष उपन्यस्त इत्यत आह — **बह्विति**। **अन्वर्थेति**। संख्यायतेऽनयेत्येवम्। **न हि [क्त्वः] कित्संज्ञेति**। ननु [11]'मृडमृद' इति क्त्वः कित्संज्ञा विहितैव। सत्यम्, यदि सा [12]'न क्त्वा सेट्' इति प्रतिषिध्येत तर्हि [13]'मृडमृद' इति व्यर्थमेव स्यात्। वचनद्वयप्रामाण्याद्विकल्पोऽस्तीति चेत्, हन्त तर्हि [14]'मृडमृद' इत्यत्र वाग्रहणमेव कुर्यात्। अपि च [15]'निष्ठाशीङ' इति कित्त्वप्रतिषेधो ज्ञापक एव। न हि शीङादिभ्यः परस्या निष्ठायाः कित्संज्ञा प्राप्ता, या प्रतिषिध्येत। शास्त्रादीत्यादिशब्देन निमित्तरूपतादात्म्यव्यपदेशा गृह्यन्ते। ननु [16]'एरुः' इत्यादिः [17]कथमानुमानिकादेशः, यावतेकारस्योकारः प्रत्यक्ष एवेति, तत्राह — **अत्र हीति**। नन्वत्रापि प्रत्यक्षस्यैव स्थानिवद्-

---

[1] आदेशरूपापत्ति — ड, ढ.
[2] तत्तदादेशस्य विधायकैरेव — ड; तत्तदादेशादिविधायकैरेव — ण.
[3] आदेशरूपापत्तौ — ड, ढ.
[4] वैयर्थ्यं स्यात्, स्थानिनः — ढ.
[5] आदेशरूपापत्ति — ड, ढ.
[6] पा. सू. २. ४. ५४.
[7] पा. सू. २. ४. ५५.
[8] पा. सू. २. ४. ५०.
[9] पा. सू. ३. ४. ४०.
[10] पा. सू. १. १. २३.
[11] पा. सू. १. २. ७.
[12] पा. सू. १. २. १८.
[13] पा. सू. १. २. ७.
[14] पा. सू. १. २. ७.
[15] पा. सू. १. २. १९.
[16] पा. सू. ३. ४. ८६.
[17] कथमानुमानिकः, यावता — ण.

भावोऽस्तु, नेत्याह — **न चेति**। पदत्वसिद्धया च 'देवदत्तः पचतु' इत्यादौ निघातादिसिद्धिः। 'सर्वविभक्त्यन्तः' [1]इत्यनुपपन्नम्, सप्तम्यन्तत्वेनैव श्रवणात् सर्वविभक्त्यन्तत्वविरोधादित्यत आह — **सर्वेति**। नन्वल् चासौ विधिश्चेत्यल्विधिरित्यपि विज्ञायमानेऽस्तेर्भ्वादेशे भवितेत्यादौ गुणे कर्तव्ये स्थानिवत्त्वनिषेधादङ्गसंज्ञाया अभावात् [2]'सार्वधातुकार्धधातुकयोः' इति गुणो न स्यादित्यत आह — **बहुत्वेति**। तत्र हेतुः — **न हीति**। द्वितीयाचतुर्थ्योरसंभवः, प्रथमाविभक्तौ दोष इति भावः। ननु सकृच्छ्रुतेऽनल्विधिशब्दे कथं सर्वविभक्त्यन्तः समासः, अत आह — **तत्रेति**। 'प्रातिपदिक-निर्देशोऽयम्' इत्यनुपपन्नम्, [3]'न केवला प्रकृतिः प्रयोक्तव्या' इति नियमात्, अत आह — [4]**अत्रेति**। ननु प्रथमान्तेऽनल्शब्द उपादीयमाने आदेश 'इत्यनेन [5]'सामानाधिकरण्यादनलात्मकादेशः स्थानि-वदिति स्यात्। तत्कथमनल्विधौ स्थानिवद्भावो लभ्यते। **उच्यते**, [6]'अदो जग्धिर्ल्यप्ति किति' इत्यत्र 'ति किति' इत्येव सिद्धे ल्यब्ग्रहणात्। अन्यथा ल्यपोऽनलात्मकादेशत्वात् स्थानिवद्भावा-देव ल्यप्यपि जग्ध्यादेशस्य सिद्धत्वाल्ल्यब्ग्रहणमनर्थकं स्यात्। उत्तरपदलोपेऽविज्ञायमाने को दोष इत्यत आह — **अनलिति**। **इष्ट इति**। यजे रूपम्। [7]'हशि च' इत्यत्र विशेष्यानुपस्थानात् तदादिविध्यभावादलः प्राधान्यमिति भावः। **अलाश्राय इति स्यादिति**। पचाद्यचः कर्मण्यणप-वाद इति भावः। शब्दनित्यत्वं परिहरति — **अलेति**॥

[१, ३९८–४०१]

[**विवरणम्**] वतिनिर्देशः किं वत्यर्थलाभाय, आहोस्वित् स्थानिन आदेशरूपतापत्तिप्रति-पादकत्वमस्य सूत्रस्य मा भूदिति, उतादेशस्य स्थानिरूपप्राप्तिबोधकत्वमस्य सूत्रस्य मा भूदिति। नाद्य इत्याह — **विनेति**। न द्वितीयः, [8]'अन्यतः प्रसक्तेः। न हि प्रसिद्धस्थानिनां प्रसिद्धादेशा अनेनापि विधेयाः, वैयर्थ्यात्। नापि तृतीयः, वैयर्थ्य[9]'प्रसक्तेरेवेत्याह — **न चेति**। **वा लिटीति**। ननु [10]'चक्षिङः ख्याञ्' इत्यनेन स्थान्यादेश इत्यनेन च सर्वत्रार्धधातुके ख्याञो विकल्पप्राप्तौ लिट्येवेति नियमार्थं तत् सूत्रं स्यादिति कथमनेन वचनद्वयप्रामाण्याद् विकल्पो न भवतीति ज्ञाप्यते। उच्यते, [11]'ज्ञापनादिगियमुपन्यस्ता, [12]'विभाषा लुङ्लृङोः' इति तु विभाषाग्रहणं विकल्पाभावस्य ज्ञापकं द्रष्टव्यम्। नन्वधिकारो नाम स्वरितलिङ्गासङ्गेनानुवृत्तिः। न च सा [13]'सूत्रेऽनुच्चारितस्य संभवतीत्यत आह — **संज्ञाप्रस्ताव इति**। **प्रस्तावः** प्रकरणं, बुद्धौ संनिधिरिति यावत्। **तच्चेति**। संज्ञिप्रत्यायनार्थत्वात् संज्ञाया इति भावः। ननु [14]'हनः' इत्युक्तौ कथं वधेरेवेत्यत आह — **संज्ञा हीति**। ननु संज्ञाप्रस्तावे यदि वतिमन्तरेणातिदेशो न गम्यते, कथं तर्हि [15]'बहुगण' इत्यत्रातिदेशपक्ष उपन्यस्त इत्यत आह — **बह्विति**। [16]'तत्रैवैतदुपपादितमिति भावः। **न त्विति**।

---

[1] इति भाष्यमनुप — ण.
[2] पा. सू. ७. ३. ८४.
[3] महाभाष्यम् १. २. ६४.
[4] तत्रेति — ण.
[5] सामानाधिकरण्यमित्यनलात्मकादेशः — ण.
[6] पा. सू. २. ४. ३६.
[7] पा. सू. ६. १. ११४.
[8] अप्रसक्तेः — च, छ, ट.
[9] प्रसक्तेरेवेत्यत आह — च, छ.
[10] पा. सू. २. ४. ५४.
[11] ज्ञापनादिगिय — च, छ.
[12] पा. सू. २. ४. ५०.
[13] सूत्रानुच्चारितस्य — ट.
[14] पा. सू. १. ३. २८.
[15] पा. सू. १. १. २३.
[16] तत्रैवेदमुप — ञ; तत्रैव तदुप — ट.

तत्रासत्त्वे स्थानिवदित्यतिदेशो न संभवतीति भावः। **न हीति**। किद्ग्रहणमनुवर्तमानं संज्ञापरं चेत् संज्ञैव प्रतिषेध्या। न च सा क्त्वो विहितेत्यर्थः। ननु विहितैव [1]'मृडमृद' इत्यनेन। सत्यम्, सा यदि प्रतिषिध्येत, [2]'मृडमृद' इति वचनमनर्थकं स्यात्। न च विहित-प्रतिषिद्धत्वाद्विकल्पः, तथा सति [3]'मृड' इत्यत्रैव वाग्रहणं कर्तव्यं स्यात्। संज्ञानिषेधे च निष्ठायाः कित्संज्ञा शीङादिभ्यः परस्यास्तु न केनचिद्विहितेति [4]"निष्ठा शीङ' इति [5]'प्रतिषेधोऽसंबद्धः स्यात्। तस्मात् किदिति तद्वदतिदेशः। तत्साहचर्यात् ङिदित्यपि। यदि च ङिदिति संज्ञा स्यात् ततः कृत्रिमत्वात् [6]'ग्रहिज्यावयि' इत्यत्र ङिति चेति [7]ङित्संज्ञा गृह्येत। तथा च "न वशः' इति संप्रसारणप्रतिषेधोऽसंगत एव स्यादित्यपि द्रष्टव्यम्। **किकिनाविति**। अन्यथा लाघवाय 'किकिन् लिटः' इति ब्रूयादिति दर्शनीयम्। 'स्थाने भवति' इति भाष्ये स्थानशब्दप्रयोगात् स्थानशब्दानुवृत्त्यादेशो लभ्यत इति भ्रमः स्यात्, तं व्युदस्यति — **स्थानीति**। [8]नन्वादेशलब्धौ 'कः' इति प्रश्नानुपपत्तिरित्यत आह — **द्विविध इति**। **अत्र होति**। एतच्चोपपादयिष्यत इति भावः। नन्वत्र प्रत्यक्षस्यैव स्थानिवद्भावोऽस्त्वित्यत आह — **न चेति**। पदत्वसिद्ध्या 'देवदत्तः पचतु' इत्यत्र निघातः पदस्येत्यधिकृत्य विधीयमानः प्रयोजनम्। 'पचतु ते ओदनम्' इत्यादौ पदादित्यधिकृत्य क्रियमाणस्तेमयादिश्च। ननु सर्वविभक्त्यन्त इत्यत्रान्तशब्दः समीपवचनो [10]वा स्यात्, अवयववचनो वा। [11]नोभयथापि, समासादुत्पन्नस्य सप्तम्येकवचनमात्रस्य सर्वविभक्तित्वाभावात् समासार्थविभक्तेर्लुग्भाजो विधिशब्दादुत्पन्नायाः समासावयवत्वेऽपि पूर्ववत् सर्वविभक्तित्वाभावादेवेत्यत आह — **सर्वेति**। ननु सर्वविभक्त्यन्ते समासेऽलात्मकविधावपि स्थानिवत्त्वनिषेधः स्यात्। तथा च [12]'चिचयिथ' इत्यादौ स्थानिवद्भावाश्रयार्धधातुकत्वनिबन्धनगुणोऽपि न स्यादित्यत आह — **बहुत्वेति**। द्वितीयाचतुर्थीभ्यां हि सूत्रे नालो निर्देशः, प्रथमायां तु दोष इति भावः। ननु सकृत् कृते समासे कथमल्पदस्यानेकविभक्त्यन्तताप्यत आह — [13]**तत्रेति**। विधिशब्देन कर्मसाधनेन कार्यमभिधीयते। तथा चाल्संबन्धिनि कार्ये स्थानिवत्त्वाभाव इति सर्वेष्टसिद्धिरिति भावः। [14]प्रौढिवादेन पक्षान्तरमाह — **अथवेति**। अलो विधिरल्विधिः, अल्शब्दात्परो विधिशब्दः, अल्विधिशब्द इति यावत्। तेन च तद्वाच्यार्थो लक्ष्यत इति कैयटोक्तार्थलाभः। **इष्ट इति**। यजे रूपम्। दिवि कामोऽस्येति बहुव्रीहिः। [15]'दिव उत्' इत्युत्वम्। **उपदेशात्** सकारस्य विसर्जनीयग्रहणेन ग्रहणादिति भावः। अनल् [16]इत्युक्तावादेश इति संबन्धादल् आदेशो न स्थानिवदित्यर्थः स्यादिति प्रातिपदिकनिर्देशोऽयमित्युक्तं भाष्ये। तदयुक्तम्, [17]'न केवला प्रकृतिः प्रयोक्तव्या' इति नियमादित्यत आह — **अत्रेति**। **यथा भाव इतीति**। सप्तम्यर्थो विवक्षित एव। अत एतन्न चोदनीयम् — तत्रापि तर्हि प्रथमान्त एव निर्दिश्यतामिति। अविवक्षाप्रयोजनं

---

[1] पा. सू. १. २. ७.
[2] पा. सू. १. २. ७.
[3] पा. सू. १. २. ७.
[4] पा. सू. १. २. १९.
[5] प्रतिषेधो निषिद्धः — ञ.
[6] पा. सू. ६. १. १६.
[7] ङित्संज्ञा स्यात्। तथा च — ञ.
[8] पा. सू. ६. १. २०.
[9] नन्वादेशोपलब्धौ — ट.
[10] वा तदवयव — ञ.
[11] 'न' इति नास्ति — ञ.
[12] विवयिथ — ञ.
[13] अत्रेति — च, छ, ट.
[14] प्रौढवादेन — च, छ.
[15] पा. सू. ६. १. १३१.
[16] इत्युक्तावादेशसंबन्धात् — ञ.
[17] महाभाष्यम् १. २. ६४.

'पाकौ', [1]'पाकाः, भूतिः' इत्यादौ प्रत्ययोत्पत्तिरिति भावः। **स्वातन्त्र्येणेति**। प्राधान्येनेत्यर्थः। प्रधानाप्रधानसंभवे प्रधानग्रहणस्य न्याय्यत्वादिति भावः। **क इष्ट इति**। तत्र विशेष्यस्यासंनिधानान्नास्ति तदादिविधिरिति भावः। नन्वादेश इत्यनेन [2]वैयधिकरण्ये एतदेवं स्यात्, असति विधिग्रहणे 'अनल्' इत्येवोच्यमाने आदेश इत्यनेन [3]सामानाधिकरण्यसंभवादनलात्मक आदेशः स्थानिवदिति स्यात्। ततश्च ल्यपोऽनलात्मकादेशत्वात् 'प्रपठ्य' इत्यादाविट् स्यात्। विशेषानतिदेशादिडभावे 'प्रतिदीव्य' इत्यादौ गुणनिषेधोऽपि न स्यात्। [4]"कुण्डानि' इत्यादौ च शिश्योः शकारस्यानुबन्धत्वेनादेशानन्तर्भावादलमात्रमादेश इति स्थानिवद्भावाभावादसति सुप्त्वे पदत्वं न स्यात्। तथोत्तमपुरुषैकवचने इटष्टेरेत्वे तस्य स्थानिवत्त्वाभावात् पूर्ववत् पदत्वं न स्यात्। उच्यते, 'अनल्' इति नादेश[5]समानाधिकरणम्, [6]"अदो जग्धिर्ल्यप्ति किति' इति ल्यब्ग्रहणात्। अन्यथा [7]ल्यबादेशस्यानलात्मकत्वात् स्थानिवत्त्वात् 'ति किति' इत्येव सिद्धत्वात् ल्यब्ग्रहणमनर्थकं स्यात्। तस्मात् साधूक्तम् — अनलित्युच्यमान इत्यादि। **एवं हीति**। कर्मण्यणा पचाद्यचो बाधनादिति भावः। उत्तरपदलोपे शब्दानित्यत्वं स्यात्, अत आह — **अलाश्रयत्वादिति**। **विधिरेवेति**। विधिमात्रमेवेत्यर्थः। सकलविधिपरिग्रहार्थाद् विधिशब्दात् प्रधानन्यायो बाध्यत इति गुणभूतालिधावपि प्रतिषेधः प्रवर्तत इति समुदायार्थः॥

[१, ३९८--४०१]

(उद्द्योतनम्) [8]'वत्यर्थलाभाय वत्करणमावश्यकमिति प्रश्नायोगमाशङ्क्याह — **विनापीति**। तत्र दृष्टान्तमाह — **यथेति**। आदेशस्य स्थानिरूपत्वबोधकत्वमस्य सूत्रस्य मा भूदित्येतदर्थं वत्करणमिति शङ्कां निरस्यति — **न चेति**। **वा लिटीति**। [9]'लिट्यन्यतरस्याम्' इति घस्लृविकल्पसूत्रमर्थतः पठितम्, न तु ख्याञ्विकल्पसूत्रम्। तेन [10]'चक्षिङः ख्याञ्' इत्यनेन सर्वत्रार्धधातुके विकल्पसिद्धौ लिट्येव विकल्प इति नियमार्थं तत् सूत्रं स्यादिति वचनद्वयप्रामाण्याद् विकल्पो न [11]भवतीत्यस्य न ज्ञापकं स्यादिति शङ्का निरस्ता। एतेन [12]"ज्ञापकदिगियम्, [13]'विभाषा लुङ्लृङोः' इति तु ज्ञापकम्" इति प्राचां व्याख्या चिन्त्या। नन्वधिकारो नाम स्वरितलिङ्गेनानुवृत्तिः। न चात्र संज्ञायास्तत्संभवः[14], अत आह — **प्रस्ताव इति**। प्रकरणं, बुद्धौ संनिधिरिति यावत्। **तच्चेति**। यत्र स्थान्युच्चारणेन कार्यं क्रियते तत्र तत्प्रत्यायितादेशस्य कार्यं भवतीत्यर्थः। 'हनः' इत्युक्तौ कथं वधेरेव, अत आह — **संज्ञा हीति**। ननु संज्ञाधिकारे यदि [15]वतिमन्तरेणातिदेशो न गम्यते तर्हि [16]'बहुगण' इत्यत्र कथमतिदेश उक्तः, अत आह — **बह्विति**। तत्र टिघुभादिवदेकाक्षरसंज्ञां

---

[1] 'पाकाः' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — च, छ, ञ, ट.
[2] सामानाधिकरण्ये — च.
[3] सामानाधिकरण्यासंभवात् — च, छ.
[4] काण्डानि — च, छ.
[5] सामानाधिकरण्यम् — च, छ.
[6] पा. सू. २. ४. ३६.
[7] ल्यब्रूपस्यादेशस्येत्यर्थः।
[8] वत्यर्थमादाय — आ.
[9] पा. सू. २.४. ४०.
[10] पा. सू. २. ४. ५४. विवरणग्रन्थानुवादेन निरासः — चक्षिङ इत्यादिना।
[11] भविष्यतीत्यस्य — म, आ.
[12] 'ज्ञापकदिगियम्' इत्यादि 'इति तु ज्ञापकम्' इत्यन्तं विवरणानुवादः।
[13] पा. सू. २. ४. ५०.
[14] संज्ञाशब्दस्य सूत्रेऽनुच्चारितत्वादिति भावः।
[15] वदित्यन्तरेण — म.
[16] पा. सू. १. १. २३.

विहाय 'संख्या' इति महासंज्ञाकरणमन्वर्थत्वलाभाय। तथा च प्रसिद्धार्थसंख्याग्रहणसामर्थ्याद् वत्यर्थ-लाभ इत्युक्तम्। न चात्र तादृशं वत्यर्थज्ञापकमस्तीति संज्ञानिवृत्तये वत्करणमावश्यकमिति भावः। **न त्विति**। [1]'तत्सत्त्वे मुख्यसत्त्वादतिदेशो न भवतीति भावः। **न हीति**। किद्ग्रहणमनुवर्तमानं संज्ञापरं चेत् संज्ञा प्रतिषेध्या, न च सा क्त्वो विहितेत्यर्थः। न च [2]'मृडमृद' इत्यत्र सा विहिता, तस्या निषेधे तद्विधानवैयर्थ्यात्। विधिप्रतिषेधाभ्यां विकल्पाङ्गीकारे च [3]'मृड' इत्यत्रैव वाग्रहणं [4]लाववात् कुर्यात्। संज्ञानिषेधपक्षे [5]"निष्ठा शीङ' इति निषेधोऽसंबद्धः, निष्ठायाः कित्संज्ञाया अविधानात्। तस्मात् किद्वदित्यतिदेशः। तत्साहचर्यात् ङिद्वदित्यप्यतिदेशः। [6]'ग्रहिज्या' इत्यत्र ङिति चेति ङिद्ग्रहणेन संज्ञापक्षे तत्संज्ञाग्रहणं स्यात्। तच्च न संभवति, गाङादिभ्यः परस्यैव प्रत्ययस्य संज्ञाविधानात्। न च तत्र कृत्रिमस्य बाधादकृत्रिमस्य ङितो ग्रहणमिति वाच्यम्, तथा सति [7]'क्ङिति च' इत्यादौ कृत्रिमस्यैव ग्रहणप्रसङ्गादिति भावः। **किकिनाविति**। अन्यथा [8]'लाघवाय 'किकिनौ लिटः' इत्येव ब्रूयादिति भावः। 'यः स्थाने' इति भाष्यदर्शनात् 'स्थाने' इत्यनुवृत्त्यादेशलाभ इति भ्रमं निराह — **स्थानीति**। नन्वादेश इति निश्चयात् 'कः' इति प्रश्नानुपपत्तिः, अत आह — **द्विविध इति**। **अत्र हीति**। एकदेशविकारे नित्यत्वानुपपत्तेरेवं वक्ष्यत इत्यर्थः। **इति भाव इति**। 'क इदानीम्' इति सिद्धान्तवाक्यस्य गूढो भाव इत्यर्थः। एवं च 'यः स्थाने भवति' इत्यादिना आशयमविद्वानाक्षेप्ता वैयर्थ्यमापादयति, [9]'इदं तर्हि' इत्यादिना सिद्धान्ती स्वाशयमुद्घाटयतीति भाष्ययोजना ज्ञेया। ननु [10]'एरुः' इत्यत्रापि प्रत्यक्षादेशस्यैव स्थानिवद्भावोऽस्तु, अत आह — **एरुरिति**। आनुमानिकस्य तु प्रयोजनमस्तीत्याह — **तिशब्देति**। ननु समासादुत्पन्नसप्तम्येकवचनस्य सर्वविभक्तित्वाभावात् 'सर्वविभक्त्यन्तः समासः' इत्ययुक्तम्, 'अलो विधिः' इत्यादिनोक्तविभक्तीनां समासादुत्पन्नत्वाभावेन [11]व्याख्यानासंगतिश्च, अत आह — **सर्वेति**। यदि सर्वविभक्त्यन्तत्वं तदालात्मकविधेरपि स्थानिवद्भावप्रतिषेधः स्यात्, तथा च 'चकार' इत्यादौ तिबादेशस्य णलः स्थानिवत्त्वाभावात् पदत्वं न स्यात्, अत आह — **बहुत्वेति**। [12]**न हीति**। द्वितीयाचतुर्थ्योरसंभवः, प्रथमायां तु दोष इति भावः। ननु समासे सकृच्छ्रुतस्याल्पदस्य कथमनेकविभक्त्यन्तत्वम्, अत आह — **तत्रेति**। विधिशब्देन [13]कर्मसाधनेन कार्यमभिधीयते, तथा चाल्संबन्धिनि कार्ये स्थानिवत्त्वाभाव इति सर्वेष्टसिद्धिरिति भावः। **अथवेति**। अल्विधिशब्देन लक्षणयाल्विधिशब्द उच्यते। तेन च तद्वाच्योऽर्थो लक्ष्यत इत्यर्थः। [14]अल्विधिशब्दवाच्यत्वं च सर्वविभक्त्यन्तसमासार्थस्यास्तीतीष्टसिद्धिः। एतदपेक्षयोक्तषष्ठीसमास एव श्रेयानिति ज्ञेयम्। **विशिष्टेति**। तच्छब्दवाच्ये समास[15]विशेषानाश्रयणादित्यर्थः। ननु 'अनल्' इत्येवोच्यताम्, किं विधिशब्देन, अत आह — **सतीति**। **एतद्वस्तु** अलः, अलि, इत्याद्यर्थलाभ इत्यर्थः।

---

[1] वत्सत्त्वे — अ.
[2] पा. सू. १. २. ७.
[3] पा. सू. १. २. ७.
[4] 'लाघवात्' इति नास्ति — ऋ.
[5] पा. सू. १. २. १९.
[6] पा. सू. ६. १. १६.
[7] पा. सू. १. १. ५.
[8] यद्यप्यत्र मात्रालाघवं नास्ति, तथापि पदलाघवं प्रतिपत्तिलाघवं च विवक्षितमिति ज्ञेयम्।
[9] एवं तर्हि — अ, इ, ऋ.
[10] पा. सू. ३. ४. ८६.
[11] व्याख्यानासंगतेश्च — म, इ, ऋ.
[12] 'न हीति' इति नास्ति — ऋ.
[13] कार्यसाधनेन — आ, म.
[14] अत्राल्विधि — अ.
[15] विशेषणाश्रयणादित्यर्थः — अ.

द्यौरिति। [1]'दिव औत्' [2]'पथिमथ्यृभुक्षामात्' [3]'त्यदादीनामः' इति। अत्र स्थानिवत्त्वनिषेधात् [4]'हल्ङ्याब्भ्यः' इति सुलोपो न। **इष्ट इति**। यजे रूपम्। दिवि कामोऽस्येति द्युकामः, [5]'दिव उत्' इत्युकारस्य लोपो न भवतीत्यर्थः। ननूत्वविधानसामर्थ्यादेवात्र लोपो न भविष्यति, अत आह — **उत्वं त्विति**। **उपदेशात्** विसर्जनीयग्रहणेन ग्रहणात् [6]'अड्व्यवाये' इति णत्वं प्रसक्तम्, 'अनल्विधौ' इत्युक्तेर्न भविष्यतीत्यर्थः। विसर्जनीयजिह्वामूलीयोपध्मानीयानु[7]नासिकानुस्वारयमा **अयोगवाहाः**। 'अनल्' इत्युक्ते आदेशस्याक्षेपादल् आदेशो न स्थानिवदित्येतावन्मात्रं लभ्यते नार्थान्तरमिति 'प्रातिपदिक' इत्युक्तम्, तदयुक्तम्, तन्मात्रस्य प्रयोगायोगात्, अत आह — **'अत्रेति**। **यथेति**। [9]'तस्य भावः' इत्यत्र लिङ्गसंख्ये न विवक्ष्येते, 'तत्त्वं तत्त्वे तत्त्वानि' इति दर्शनात्। भाव इति सप्तम्यन्तं वा। तत्र सप्तम्यर्थो विवक्षित एव। अन्यथा तत्रापि प्रथमाप्रसङ्गात्। अविवक्षाप्रयोजनं पाकौ, पाकाः, भूतिरित्यादिसिद्धिः। **स्वातन्त्र्येण** प्राधान्येन। प्रधानाप्रधानसंभवे प्रधानग्रहणस्य न्याय्यत्वादिति भावः। **क इष्ट इति**। तत्र [10]'हशि' इत्यलः प्राधान्येनाश्रयणात्, विशेष्यासंनिधानेन तदादिविधेस्तत्राभावादित्यर्थः। ननु [11]'अनल्' इत्युक्ते आदेशेन सामानाधिकरण्यादलात्मको [12]विधिर्न स्थानिवदित्यर्थः स्यात्। तत्रोक्तदोष इति चेन्न, [13]'अदो जग्धिर्ल्यप् ति किति' इति ल्यब्ग्रहणेनादेशसामानाधिकरण्याभावनिश्चयात्। अन्यथा [14]ल्यबादेशस्यानेकाल्त्वेन स्थानिवत्त्वात् 'ति किति' इत्येव सिद्धेर्ल्यब्ग्रहणं व्यर्थं स्यात्। **अलाश्राय इति**। कर्मण्यणा पचाद्यचो बाधादित्यर्थः। उत्तरपदलोपे शब्दानित्यत्वं स्यात्, अत आह — **अलाश्रयत्वादिति**। **विधिरेव** विधिमात्रमेव। सकलविधिग्रहणार्थाद्विधिशब्दात् प्रधानन्यायबाधेन गुणभूतालविधावपि प्रतिषेधसिद्धिरिति समुदायतात्पर्यम्॥

[१, ३९८–४०१]

(रत्नप्रकाशः) सूत्रप्रयोजनं [15]विचारयति — **वत्करणं किमर्थमिति**। एतेन 'विनापि [16]वतिमतिदेशलाभः, यथा ङित्किदिति भावः' इति निरस्तम्। ङित्कित्स्थले कथंचित् प्रौढ्या व्याख्यानपरिभाषावलम्बनेन वतिना विनातिदेशपरतया व्याख्यानेऽपि तद्रीत्या [17]विशेषसमर्पकपदनिराकरणायोगात्। तथा निराकरणे तस्यान्योत्तराभावेन सर्वस्यास्य शास्त्रस्यान्यथात्वापत्तेश्च। यदप्युक्तं तेनैव "न च स्थान्यादेश इत्युच्यमाने स्थानिरूपमादेशः प्रतिपद्यत इति कल्पनाश्रयितुं युक्ता, [18]'अस्तेर्भूः' इत्यादेशविधानवैयर्थ्यप्रसङ्गात्" इति। तदपि न, वत्करणे सत्येवोत्तरसूत्र इव कार्यविशेषं प्रति रूपातिदेशप्रसक्तिसंभवेन तत्र व्याख्यानस्यैव शरणीकरणीयत्वेन च तस्य वत्करणाभाव-

---

[1] पा. सू. ७. १. ८४.
[2] पा. सू. ७. १. ८५.
[3] पा. सू. ७. २. १०२.
[4] पा.सू. ६. १. ६८.
[5] पा. सू. ६. १. १३१.
[6] पा. सू. ८. ४. २.
[7] नासिक्यानुस्वार — अ, इ.
[8] तत्रेति — अ, इ, ऋ.
[9] पा. सू. ५. १. ११९.
[10] पा. सू. ६. १. ११४.
[11] अलीत्युक्तेः — अ; अलित्युक्ते — म, इ.
[12] आदेश इत्यर्थः।
[13] पा. सू. २. ४. ३६.
[14] ल्यब्रूपादेशस्येत्यर्थः।
[15] 'विचारयितुं पदकृत्यं विचारयति' इति युक्तं भाति।
[16] अर्थानुवादोऽयम्।
[17] विशेषणसमर्पक — ब.
[18] पा. सू. २. ४. ५२.

पक्षे उट्टङ्कनानौचित्यात्। यदप्युक्तं तेनैव "न च वचनद्वयप्रामाण्याद्विकल्पः, [1]'वा लिटि' इति विकल्पारम्भात्" इति। तदपि न, तस्य लिट्येव स इति नियमार्थत्वसंभवात्। सिद्धं वत्करणं विहाय ज्ञापकानुसरणे [2]स्वगृहपायसभिक्षाटनीयदोषापत्तेश्च। **संज्ञाधिकारोऽयमिति**। **संज्ञायां** संज्ञासंज्ञित्वबोधन एव [3]'वृद्धिरादैच्' इत्यादेरिव **अधिकारः** सामर्थ्यं यस्य •सोऽयमित्यर्थः। एतेन 'संज्ञाप्रस्ताव इत्यर्थः' इति निरस्तम्। तत्र मानाभावात्। न हि प्रस्तुतमस्ति, येन तद्युज्येत। **तत्र को दोष इति**। वत्करणे सत्यप्यादेशे स्थानिसंज्ञया भवितव्यमेव, अन्यथा हन्तेर्विधीयमानमात्मनेपदं वधेर्न स्यादिति भावः। **वधेरेवेति**। [4]"स्वं रूपम्' इत्यस्य शब्दशास्त्रकृतसंज्ञाविषयेऽप्रवर्तनादिति भावः। एतेन 'संज्ञा हि प्रदेशेषु संज्ञिप्रत्यायनार्था संज्ञिनं प्रत्याय्य निवर्तते, न तु स्वतः कार्यं प्रतिपद्यत इति भावः' इति निरस्तम्। संज्ञा स्वतः कार्यं प्रतिपद्यत इति मन्दबुद्धिनाप्यनापाद्यत्वेन तन्निरासाभिप्रायकत्वेऽत्यन्तमौर्ख्यापत्तेः। यदप्युक्तं तेनैव "[5]'बहुगण' इत्यत्र तु संख्येत्यन्वर्थताश्रयणाल्लोकिकार्थग्रहणाद्विनापि वतिनातिदेशपक्ष उपन्यस्तः" इति। तदपि न, अन्वर्थसंज्ञाबलेन कृत्रिमाकृत्रिमन्यायं बाधित्वैकादीनामपि ग्रहणं भवतीत्येव तत्रोपपादितत्वेन तदवलम्बनेनातिदेशपक्षोपन्यासोक्तेर्मिथ्याप्रलापत्वात्। [6]'एषब्रह्मदत्तन्यायेनैव तत्रातिदेशपक्षस्योपपादितत्वात्। अगतिकगतिभूततादृशव्याख्यानावलम्बनेन विशेषावधारकपदप्रत्याख्यानानौचित्यस्य बहुशो दर्शितत्वाच्च। यदप्युक्तं तेनैव "[7]'किकिनौ लिट् च' इत्यत्र तु संज्ञाप्रकरणाभावात् तद्वदतिदेशः" इति। तदपि न, "तस्य परमाम्रेडितम्' इत्यादौ संज्ञाप्रकरणाभावेऽपि संज्ञाविधिदर्शनात्। परिभाषाद्यसंकीर्णतयैकत्राभिमतानां सर्वासां संज्ञानामनिर्दिशितत्वेन संज्ञाप्रकरणाभावोक्तेर्व्यर्थत्वाच्च। वत्करणे सति दोषो न भवति, कुत इत्यत आह — **स्थानिकार्यमिति**। साक्षात् परम्परया वा क्रियतेऽस्मिन् शास्त्रे यन्नाम संज्ञापरपर्यायं तत् कार्यशब्देनाभिमतम्। [9]तदेव ह्यादेशः स्थानिवल्लिबधावर्तमानां संज्ञां लभत इत्येकवाक्यता सूत्रस्य संभवति। तत्र विधीयते संज्ञानेनेति विधिः प्रवृत्तिनिमित्तम्। [10]अल्समुदायावृत्तितयाल्मात्रवृत्तिर्विधिरल्विधिः। यस्याः संज्ञायास्तादृशो धर्मः शक्यतावच्छेदकः सा तत्र स्वशक्यतावच्छेदकतासंबन्धेन प्रवर्तत इति तदन्यस्याः सुप्तिङादिसंज्ञाया अतिदेशः सिध्यतीति। तथा च स्थान्यविरोधेनैवादेशेन हन्संज्ञा लब्धेति [11]'आङो यमहनः' इत्यात्मनेपदं वधेरिव हन्तेरपि भवतीति वत्करणाभावे प्रसक्तो दोषोऽत्र नेति भावः। एतेन 'अनेन कार्यातिदेशोऽयमिति दर्शयति। शास्त्राद्यतिदेशापेक्षया कार्यातिदेशस्य प्राधान्यात्, इतरेषां कार्यार्थत्वादिति भावः' इति निरस्तम्। शास्त्रव्यपदेशतादात्म्यानामिव संज्ञाया अप्यागमादेशप्रत्ययरूपकार्यार्थत्वेन तामपि विहायागमादेरेवातिदेशे क्रियमाणे रामायेत्यादौ [12]'सुपि च' इति दीर्घस्य, पपतुरित्यादौ [13]'आतो लोप इटि च' इत्यालोपस्य चाभावप्रसङ्गात्। तदर्थम् 'आदेशः स्थानिवत् कार्यं लभते प्रवर्तयति च' इति व्याख्याने वाक्यभेददोषप्रसङ्गात्। स्थानिनोस्तत्र तत्कार्यप्रवर्तकत्वाभावेन तस्यातिदेष्टुमशक्यत्वाच्च। किं च कार्यातिदेशपक्षे 'अनल्विधौ' इति सप्तम्यन्तमनन्वितं

---

[1] पा. सू. २. ४. ५५.
[2] 'स्वगृहे पायसं त्यक्त्वा भिक्षामटति दुर्मतिः' इति न्यायः।
[3] पा. सू. १. १. १.
[4] पा. सू. १. १. ६८.
[5] पा. सू. १. १. २३.
[6] अयं न्यायो महाभाष्ये १. १. २३. सूत्रे उक्तः।
[7] पा. सू. ३. २. १७१.
[8] पा. सू. ८. १. २.
[9] तदेव — ब.
[10] अल्समुदायवृत्तितया — ब.
[11] पा. सू. १. ३. २८.
[12] पा. सू. ७. ३. १०२.
[13] पा. सू. ६. ४. ६४.

स्यात्, कार्यातिदेशानुकूलतया 'अनल्विधिम्' इति द्वितीयान्तस्यैवोचितत्वात्। तथा निर्देशे हि न विद्यतेऽलेव निमित्तं यस्य सोऽनल्, स विधिरनल्विधिरिति कार्यशब्दाध्याहारमन्तरेणैवातिदेश उपपद्यते। किं च 'अनल्विधौ' इति सप्तम्यन्ते विद्यमाने कार्यातिदेशश्चेदाश्रीयते तदा आदेशः स्थानिवत् कार्यं लभतेऽल्विधिभिन्ने विषये सतीत्यर्थापत्त्या अतिदिश्यमानकार्यस्याल्विधिभिन्नत्वं न लभ्येत, विषयतयाश्रितस्यैव विधेस्तद्विशेष्यत्वात्। तथा च 'अनल्विधौ' इत्यस्य भाष्यकृत्प्रभृतिभिर्निदर्शितानां प्रयोजनानामसिद्धिः स्यात्। तस्मादेतच्छास्त्रप्रसिद्धादेशागमप्रत्ययात्मकस्यैव कार्यस्यात्र स्वीकारेऽत्यन्तदुष्टमिदं सूत्रं संपद्यत इत्यस्मदुक्तसंज्ञातिदेशपक्ष एव स्थितः। यत्तु कैश्चिदुक्तम् 'संज्ञाया अपि कार्यत्वात् कार्यातिदेश आश्रीयमाणे संज्ञाप्यतिदिश्यत एव' इति। तदपि न, नित्यस्य वस्तुनोऽतिदेष्टुमशक्यत्वेन कार्यस्यैवातिदेश्यतया निमित्तव्यपदेशतादात्म्यशास्त्रकार्यरूपभेदेनातिदेशस्य षड्विधत्वाश्रयणानौचित्यापत्तेः। कार्यत्वाविशेषेण क्वचिद्रूपस्याप्यतिदेशापत्तेः। तथा च 'नायकः, पावकः' इत्यादौ [1]'वान्तादेशे कर्तव्येऽकादेशस्य वुरूपापत्त्या तस्याप्रवृत्त्या 'नै अकः, पौ अकः' इत्यादि रूपं प्रसज्येतेत्यलं प्रसक्तानुप्रसक्तेन। प्रकृतमनुसरामः। **गुरुवद्गुरुपुत्र इति**। तत्र यद्यपि क्रियातिदिश्यते न संज्ञा, तथाप्यतिदेशांशे स दृष्टान्तः, न त्वतिदेश्यांश इति न वैषम्यम्। **आदेशग्रहणं किमर्थमिति**। 'स्थाने' इत्यस्यानुवृत्त्यैव [2]'अलोऽन्त्यस्य' इत्यादाविवादेशलाभ इति भावः। प्रष्टुराशयं तन्मुखादेवावगन्तुं पृच्छति — **स्थानिवदिति**। उत्तरमाह — **यः स्थान इति**। एतेन "स्थानिशब्दस्य संबन्धिशब्दत्वादादेशो लभ्यत एव। यथा 'पितृवदधीते' इत्युक्ते पुत्र इति गम्यत इति भावः" इति निरस्तम्। आदेशशब्दस्य लौकिकस्योपदेशपरत्वेन शास्त्रे चात्र स्थानिशब्दसमभिव्याहारेण कथंचिद् विधेयविशेषपरत्वेऽपि संबन्धिशब्दत्वे मानाभावात्। स्थानिशब्दोऽपि न संबन्धिशब्दः, प्रसङ्गिशब्दवत्। न हि 'प्रसङ्गि' इत्युक्ते कस्येति नित्यमाकाङ्क्षा भवति। ननु स्थानीत्युक्ते कस्येत्याकाङ्क्षा जायत इति चेन्न, दृढतरवासनावशाद्वैयाकरणानां तथाकाङ्क्षायामपि तावता तस्य संबन्धिशब्दत्वासिद्धेः। वस्तुतस्तु वैयाकरणानामपि तथाकाङ्क्षा न भवति, [3]'युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः' इत्यत्र तददर्शनात्। तत्र हि स्थानिशब्दोऽप्रयुज्यमानपरः, इहापि तयैवेति तत्र संबन्धिशब्दत्वं न भवति, अत्र भवतीत्यत्र [न] किंचिद्विनिगमकमस्ति। यदप्युक्तं तेनैव "द्विविध आदेशः, प्रत्यक्षः [4]'अस्तेर्भूः' इत्यादिः, आनुमानिकश्च [5]'एरुः' इत्यादिः। अत्र हीकारेणेकारान्तः स्थान्यनुमीयते, उकारेणोकारान्त आदेशः। ततस्तेस्तुरिति संपद्यते। तत्र प्रत्यक्षस्यैव ग्रहणं स्यान्नानुमानिकस्येति भावः" इति। तदपि न, प्रक्रियादशायामागमागमिभावस्यादेशादेशिभावस्य चावश्याश्रयणीयत्वेनानुमानिकादेशस्याप्रसिद्धेः। तुष्यतु वा स आनुमानिकेनादेशेन, कुत एतत् — प्रत्यक्षस्यैवादेशस्यादेशशब्देन ग्रहणं स्यात्, नानुमानिकस्येति। न हि काचित् परिभाषास्ति 'प्रत्यक्षग्रहणे नानुमानिकस्य' इति। न वा लोकेऽनुमीयमानो वह्न्यादिर्वह्न्यादिशब्दैर्नाभिधीयत इति दृष्टम्। **आदेशमात्रमिति**। पदसंज्ञादौ निमित्तत्वादिनाश्रीयमाणोऽनाश्रीयमाणश्चेत्यर्थः। भाष्यकार एवैतद्विस्तरेणास्मिन्नेव सूत्रेऽग्रे प्रतिपादयिष्यति। एतेन "प्रत्यक्षमानुमानिकं चेत्यर्थः। [6]'एरुः' इत्यत्र प्रत्यक्षमुकारस्यादेशत्वमिकारस्य स्थानित्वम्। न च किंचिदिकारस्य कार्यमस्ति, यदुकारेऽतिदिश्येत। तिशब्दकार्यं तु तुशब्दस्यातिदिश्यत इति पदत्वसिद्धिः" इति निरस्तम्। आदेशद्वैविध्यस्य प्रागेव निरस्तत्वात्। 'प्रत्यक्षमुकारस्यादेशत्वम्'

---

[1] यान्तादेशस्याप्युपलक्षणमिदं बोध्यम्।
[2] पा. सू. १. १. ५२.
[3] पा. सू. १. ४. १०५.
[4] पा. सू. २. ४. ५२.
[5] पा. सू. ३. ४. ८६.
[6] पा. सू. ३. ४. ८६.

इत्यस्य आनुमानिकश्च "एरुः' इत्यादिरित्यनेन स्वोक्तेन सह विरोधात्। पदत्वशब्देन पदसंज्ञाया एवोक्तत्वेन तस्या अतिदेश इति कार्यातिदेशवादिना वक्तुमयुक्तत्वाच्च। **विधिग्रहणं किमर्थमिति**। 'अनलि' इत्युक्तेऽप्यल्समुदायभिन्नेऽल्येवावर्तमानां संज्ञां लभत इत्यर्थलाभादिति भावः। यद्यपि विधिशब्दोऽत्र कर्मसाधनो न भवति, तथापि तत्संभवमात्रेण प्रसक्तं प्रयोजनमभ्युपगम्य दूषयितुं निदर्शयति — **सर्वविभक्त्यन्त इति**। सर्वशब्दोऽभिमतसाकल्यपरः, यथा ब्राह्मणाः सर्वे आगताः, अतः परं पूजा कर्तव्येत्यादौ। एतेन 'बहुत्वप्रतिपादनपरं चैतत्। न ह्यत्र सप्त विभक्तयः संभवन्ति' इति निरस्तम्। सर्वा विभक्तयोऽन्ते येषां तानि पदानि सर्वविभक्त्यन्तानि, तान्यवयवा येषां सन्ति ते समासाः सर्वविभक्त्यन्ताः। अर्शआदित्वान्मत्वर्थीयोऽच्। जातावेकवचनम् 'अल्विधौ'[1] इतीति सूचयितुमेकवचनान्तनिर्देशः। एतेन 'संबन्धमात्रे षष्ठ्युपादानेऽनेकविभक्त्यन्तर्भावात् फलतः सर्वविभक्त्यन्तता भवति। अथवा — अल्विधिशब्दवाच्योऽल्विधिरिति विशिष्टप्रवृत्तिनिमित्तानाश्रयणात्[2] सर्वविभक्त्यन्तत्वमस्ति' इति निरस्तम्। ऋजुमार्गेण यथाश्रुतं सिध्यतोऽर्थस्य वक्रेण साधनायोगात्। **अलः परस्येति**। [3]'पञ्चमी' इति योगविभागात् समास इति भावः। तेन 'द्यौः, पन्थाः' इत्यत्र हल्ङ्यादिलोपो न भवति। **अलो विधिरिति**। तेन 'द्युकामः' इत्यत्र [4]'लोपो व्योः' इति वलोपो न भवति। उत्वं तु 'विमलद्यु, द्युयानम्' इत्यादौ सावकाशम्। **अलि विधिरिति**। तेन 'क इष्टः' इत्यत्र [5]'हशि च' इत्युत्वं न भवति। **अला विधिरिति**। तेन 'महोरस्केन' इत्यत्र [6]'अड्व्यवाये' इति णत्वं न भवति। तदेवं विधिशब्दस्य कर्मसाधनकिप्रत्ययान्तताश्रयेण मन्दबुद्ध्यभिमतप्रयोजनं निदर्श्य [7]यक्षानुरूपबलिन्यायेन तत् साधयितुं प्रतिजानीते — **नैतदस्तीति**। **प्रातिपदिकनिर्देशोऽयमिति**। 'अनलिति' इति शेषः। हल्ङ्यादिलोपे जातेऽवशिष्टं प्रातिपदिकमेव भवतीत्याशयेनैवमुक्तम्, न तु विभक्त्यन्ततां विनैव प्रातिपदिकं निर्देष्टुं शक्यत इति, "न केवला प्रकृतिः प्रयोक्तव्या' इति निषेधात्। **अर्थतन्त्रा इति**। अर्थाधीना इत्यर्थः। **न कांचित् प्राधान्येनेति**। प्रथमामेवाश्रयन्तीति भावः। **यां यां विभक्तिमिति**। यं यं विभक्त्यर्थमित्यर्थः। इष्टामिति शेषः। **सा साश्रयितव्येति**। स स आश्रयितव्य इत्यर्थः। यद्यपि शब्दव्यवहारेऽयं प्रकारो लोके न प्रसिद्धः, तथापि सर्वविभक्त्यन्तसमासविज्ञानार्थं विधिग्रहणमिति वदन्तं प्रति तादृशमेवोत्तरं दातुमुचितमित्येवमुक्तमिति न दोषः। विधिग्रहणं विना 'अनलि' इत्येव वक्तुं युक्तमिति प्रष्टुराशयः प्रागेवोक्तः, तत्रैवोत्तरमिदमाह — **इदमिति**। 'अनलि' इत्युच्यमाने ह्यल्मात्रस्य याः संज्ञा अच्हल्संप्रसारणगुरुलघुह्रस्वदीर्घप्रभृतयस्ता एव निषिध्येरन्, न तु वर्णसमुदायसाधारणा वलादिवलन्तनान्ताजन्तहलन्तादय इति तासामप्यतिदेशो मा भूदिति विधिग्रहणं कृतम्। विधिग्रहणे तु वल्त्वादिरूपवर्णमात्रवृत्तिधर्मद्वारा वलादित्वादिरूपं वलादिशब्दप्रवृत्तिनिमित्तमलाश्रयविधिरूपमेवेति तत्र वर्तमानानां वलादिसंज्ञानामप्यतिदेशनिषेधः सिध्यतीति भावः। ननु वलादिशब्दा यौगिका न तु संज्ञा इति कथं तेषामतिदेश इति चेन्न, समासेऽपि शक्तेराश्रयेण सर्वेषां सर्वार्थाभिधानसामर्थ्येन च वाचकः संज्ञेति पर्यायताश्रयणात्। **उत्तरपदलोप इति**। शाकपार्थिवादित्वाश्रयणेनेति भावः। **अलमाश्रयत इति**। फलितार्थकथनपरमेतत्, विग्रहप्रदर्शनपरत्वे कर्मण्यण्प्रसङ्गात्। विग्रहस्तु गङ्गाया धर इतिवत् अल आश्रय

---

[1] पा. सू. ३. ४. ८६.
[2] निमित्ताश्रयणात् — ब.
[3] पा. सू. २. १. ३७.
[4] पा. सू. ६. १. ६६.
[5] पा. सू. ६. १. ११४.
[6] पा. सू. ८. ४. २.
[7] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[8] महाभाष्यम्. १. २. ६४.

इति ज्ञेयः। तत्र धरशब्दवदजन्त[1] आश्रयशब्दः। विधिग्रहणाभावे किं स्यादित्यत आह — **यत्रेति**। **प्राधान्येनेति**। यस्यां संज्ञायां वाच्यत्वेनेत्यर्थः। **तत्रैवेति**। तस्या एवेत्यर्थः। **किं प्रयोजनमिति**। वलादिसंज्ञानिषेधस्येति शेषः॥

[१, ३९८–४०१]

(नारायणीयम्)

"यन्मात्राः प्रचुरानन्दा यल्लेशा ज्ञानसंपदः।
स ममानामयं कुर्यान्माधवो मधुकण्टकः॥"

नन्वसति वत्करणे कथं तदर्थलाभः। परत्र परशब्दप्रयोगात्, अग्निर्माणवकवदित्याह — **विनेति**। नन्वस्तु, अर्थात्प्रकरणाद्धि लोके तथा, शास्त्रे कथमित्यत्राह — **यथेति**। ननु तादूप्यापत्तिप्रतिपादकं वचनमिदं वतावसति स्यात्, अतिदेशकल्पनायां स्थानिशब्दस्य गौणत्वप्रसङ्गादिति शङ्कते — **न चेति**। यद्यपि [2]'यच्छब्दयोगः प्राथम्यम्' इत्यादिन्यायात् [3]प्रथमनिर्दिष्टस्य स्थानिन उद्देश्यत्वमुचितम्, अथापि स्थानिन आदेशरूपापत्तेर्वचनान्तरसिद्धत्वादित्थं वचनव्यक्तिराश्रिता। किं [4]नित्यमादेशस्य स्थानिरूपापत्तिर्विधेया, उत विकल्पेन। नाद्य इत्युक्त्वा द्वितीयं निरस्यति — — **न चेति**। **विकल्पारम्भादिति**। चक्षिङः ख्याञ्वचनात् ख्याञश्च स्थानिरूपापत्तिवचनात् ख्याञ्विकल्पः सिद्ध एवेति तद्विकल्पवचनमत्र स्थानिरूपताविधानाभावं ज्ञापयति। न च सर्वत्र द्वैरूप्यप्रसङ्गे लिटयेव द्वैरूप्यं [5]नियम्यत इति वाच्यम्, नियमाद्विधेर्बलीयस्त्वात्, ईदृशे च विषये विधिज्यायस्त्वन्यायस्य ग्रन्थकारेणासकृदुक्तत्वात्। [6]अथवेदमुपलक्षणम् — यदयं [7]'विभाषा लुङ्लृङोः' इत्यत्र विभाषाग्रहणं करोति तज्ज्ञापकं विकल्पाभावस्य। संज्ञाधिकारस्य वृद्धिसूत्रे प्रत्याख्यातत्वात् कथमिह तदनुवाद इत्याशङ्क्य न शास्त्रीयोऽधिकारो विवक्षितः, किं तु [8]'प्रकरणमात्रम्। येन च न्यायेन तत्र तत् प्रत्याख्यातम् 'इदं खल्वपि' इत्यादिना, स चेहास्ति, सामानाधिकरण्यादेकविभक्तित्वाच्चेत्यभिसंधायाह — **प्रस्ताव इति**। ननु संज्ञाकरणे व्यपदेशमात्रं भवति, तद्वतिदेशे त्वन्यकार्यमन्यस्य प्राप्यत इत्याशङ्क्य सति व्यपदेशे तत्प्रयुक्तकार्यलाभादभिन्नं फलमनयोरिति प्रष्टुरभिप्राय इत्याह — **आदेश इति**। कार्यशब्देन स्थानिकार्यमभिधीयते। **तच्चेति**। नन्वादेशस्य स्थानिसंज्ञा चेत् स्थानिरूपोच्चारणेन यत्कार्यं तदादेशस्य भवेत्, यथा [9]'आङो यमहनः' इति। यत्तु धात्वादिशब्दोच्चारणेन विधीयते न तदादेशस्य स्यात्। न हि तत्र संज्ञोच्चारिता, येन संज्ञिनः कार्यं स्यात्। अत्राहुः — 'स्थानी' इत्यनेन स्थानिबोधकशब्दमात्रं विवक्षितम्। ततश्च धात्वादिशब्दा अप्यादेशस्य संज्ञा इति। [10]'आङो यमहनः' इति दूषणमप्युपलक्षणम्, 'धातोः' इत्यादिकार्यमपि भवत्यादीनामेव स्यात्, नास्त्यादीनामित्यपि द्रष्टव्यमिति। नन्वत्र पक्षे न केवलमस्त्यादीनां धातुत्वादिनिबन्धनकार्याभावप्रसङ्गः, किंतु पच्यादेरपि, धात्वादिशब्दस्यादेशसंज्ञात्वात्। नैष दोषः, आदेशसंज्ञात्वेऽपि पच्यादिसंज्ञात्वस्यानपायात्। यद्येवमस्त्यादिसंज्ञात्वमप्यनपेतम्। एवं

---

[1] पचाद्यच्प्रत्ययान्त इत्यर्थः।
[2] श्लोकवार्तिकम् अनुमानम् १०९.
[3] प्रथमानिर्दिष्टस्य — क.
[4] नित्यादेशस्य — ति.
[5] नियमत इति — क.
[6] 'अथवा' इत्यादि 'विकल्पाभावस्य' इत्यन्तं नास्ति — ति.
[7] पा. सू. २. ४. ५०.
[8] प्रकारमात्रम् — क.
[9] पा. सू. १. ३. २८.
[10] पा. सू. १. ३. २८.

तर्हि न दूषणोपलक्षणं भाष्यम्, धात्वादिशब्दोच्चारणे सर्वेषां कार्यसिद्धेः। अत एव 'संज्ञा हि' इति टीकायां [1]संज्ञायामेव कार्याप्राप्तिरुक्ता। [2]नन्वाकरस्थमपि नास्ति दूषणम्। स्थानिबोधको हि शब्दो हन्तिरेव, [3]'स्वं रूपम्' इति वचनात्। स चादेशसंज्ञा चेत् स्थानिसंज्ञात्वमपि [4]तस्यानपगतमिति। अत्रोच्यते — संज्ञायास्तावन्न भाव्यं कार्यान्वयेन। संज्ञा च हन् इति [5]भवत्याकरस्थं दूषणम्। ननु संज्ञायाः स्वरूपेण [6]कार्यानन्वयेऽपि संज्ञिरूपतया तदन्वयो भविष्यति। एवं तर्हि स्थानिबोधकः संज्ञेति किमनेन कल्पनेन क्लिष्टेन। स्थान्येव तु संज्ञा, धात्वादिव्यपदेशप्रयुक्तं च कार्यं न सिध्यतीति दूषणमस्त्येव। दूषणान्तराभिधानात्त्विदमुपेक्षितमिति द्रष्टव्यम्। अविशेषादुभयोरस्त्वित्यत आह — **संज्ञा हीति**। न च स्वरूपमपि संज्ञयेवेति कार्यप्रतिपत्तिः, स्वरूप[7]बोधकतां विच्छिद्यादेशबोधकताविधानात्। एवं ह्यत्र वचनव्यक्तिः — शास्त्रे स्वरूपं शब्दस्य प्रत्याय्यम्, स्थानिनां त्वादेश इति। शब्दसंज्ञात्वाच्च स्वरूपाप्रतिपत्तिः। न चैवं स्थानिबोधकशब्दानामादेशसंज्ञात्वेऽपीत्थं परिहारः संभवतीति वाच्यम्, तत्र किं स्थानिबोधकानां यथाप्राप्तबोध्यापहारेणादेशो बोध्यः, उत तदनपहारेण। आद्ये धात्वादिशब्दस्य पच्यादिबोधकत्वाप्रसङ्गः। अन्त्ये स्वरूपमपि बोध्यमिति कुतोऽयं परिहारः। अस्तु वा सोऽपि पक्षः। अस्थिरत्वात्तु न प्रयत्नतः [8]परीक्षामहे। यद्यस्मिन् संज्ञाप्रकरणे विनापि वत्यादियत्नेन न सिध्यत्यनामता कथं बह्वादिसूत्रेणातिदेशोऽपि वर्णितः, तत्राह — **बह्विति**। 'वत्करणे' इत्यादिभाष्यं व्याचष्टे — **वत्करणात्त्विति**। प्रसिद्धानुवादफलमाह — **न त्विति**। यद्दृष्टान्तमवष्टभ्य वतेराक्षेपणं कृतमादौ, तत्र [9]'विना लिङ्गाद् वतिना वाञ्छितार्थं इत्याह — **ङिदिति**। प्रकरणाल्लिङ्गं प्रबलम्। **न हीति**। कित्करणं हि तत्र प्रकृतार्थम्। यदि च तत्र प्रकरणे ङित्कित्संज्ञाविधिस्तदा कित्संज्ञाया [10]अविधानादसंबद्धो[11] निषेधः स्यात्। कित्पदस्य तु कित्कार्यपरत्वे क्त्वः कित्कार्यं प्राप्तं तत्प्रतिषिध्यत इत्यतिदेश एव ङित्किदिति।

"यत्र नैतादृशं लिङ्गं लिड्वद्भावविधौ कथम्।

तत्र [12]लभ्योऽतिदेशः स्यादिति शङ्कामवद्यति' — **किकिनाविति**। 'सामानाधिकरण्यं हि दृष्टं लोके द्वयोरपि। विशेषहेत्वभावेन [13]लक्ष्यादास्थेयमास्थितम्।' इति

"वाक्यप्रमेयमावेद्य पदवेद्यप्रपञ्चनम्।

प्रतिज्ञातार्थहेतूक्तिपूर्वकं क्रियतेऽधुना" — **अनेनेति**। आदेशग्रहणाभावे कथं तदर्थलाभः, तत्राह — **स्थानीति**। संबन्धिशब्दन्यायमजानतश्चोद्यमेतन्नेत्याह — **द्विविध इति**। संबन्धिशब्दन्यायादादेशः स्थानिवद्भावे प्रत्यक्ष एव, नानुमानिक इत्यक्षरार्थः। व्याप्तिन्यायमभिप्रेत्य 'यः' इत्युक्तम्। इतरेण तु व्याप्तिन्यायानाश्रयेण व्याप्त्यर्थमादेशग्रहणमित्युक्तम्। अनाश्रयणे कारणमाह — **प्रत्यक्षमिति**।

---

[1] भावप्रधानो निर्देशः, संज्ञात्व एवेत्यर्थः।
[2] नन्वाकारस्थमपि — क.
[3] पा. सू. १. १. ६८.
[4] तस्यानवगतमिति — क.
[5] भवत्याकारस्थं — क; भवत्याकरस्थदूषणम् — ति.
[6] कार्यान्वयेऽपि — क.
[7] बोधकताया विच्छिद्यादेश — ति.
[8] परीक्षयामहे — क, ति.
[9] वतिना विना लिङ्गात् वाञ्छितार्थ इत्यन्वयः।
[10] क्त्वाप्रत्ययस्येत्याशयः।
[11] असंबन्धः — क.
[12] लभ्योऽवकाशः स्यादिति — क.
[13] लक्ष्यादास्थेयमर्थितम् — ति.

"युगपद्बुद्ध्युपारूढविषयेऽयं प्रवर्तते ।
[1]न्यायोऽन्तरङ्गे प्रत्यक्षे न तु पूर्वमुपस्थिते ॥
किं च — पदादुपात्ते व्याप्त्यादिचिन्ता न त्वार्थिकेऽपि वा ।
आनुमानिक आदेशे त्वतिदेशफलं वदन् ।
प्रत्यक्षे तदभावं च ब्रवीत्यस्यार्थसिद्धये"। **एरुरिति** । यदि हि प्रत्यक्षादेशस्यापि स्थानिवद्भावेन पदत्वादिसिद्धिः, न स्यादस्यादेशग्रहणस्य प्रयोजनम् । अतस्तदभावः कीर्त्यते । समासस्य च सप्तम्यन्तत्वात् सर्वविभक्त्यन्तत्वाभावात् तस्य विधिग्रहणप्रयोजनाभावात् 'अलः परस्य विधिः' इत्यादिभाष्यायोगाच्च व्याचष्टे — **सर्वेति** । टीकायां सर्वविभक्त्यन्तशब्दस्त्रिपदबहुव्रीहिः, सर्वविभक्तिशब्दस्य कर्मधारयस्यान्तशब्देन बहुव्रीहिर्वा । न तु सर्वश्चासौ विभक्त्यन्तश्चेति समासः, कर्मधारयान्मत्वर्थीयाभावापत्तेः । सर्वविभक्त्यन्तत्वमवयवधर्मः समास उपचर्यत इत्यपि समासान्तरे व्याख्यानम् । **न हीति** । प्रथमाद्वितीयाचतुर्थीनामसंभवात् । केचित्तु प्रथमायाः संभवोऽस्ति, भवितव्यमिति गुणविधेरलात्मकत्वात् । यदि चास्मिन् विधौ स्थानिवत्त्वनिषेधः स्यादङ्गताभावाद् गुणोऽस्त्यादेशस्य न स्यात् । तस्माद् द्वितीयाचतुर्थ्योरसंभवात् प्रथमायां [2]दोषप्रसङ्गात् परिशिष्टा विभक्तयः [3]सर्वशब्देन विवक्षिता इत्याहुः । तदसत्, स्यान्यल्विधौ प्रतिषेधात् । [4]किमत्राल्शब्द एकदेशे, उतालिविधिशब्दे । नाद्यः, विभिन्नविभक्तित्वात् । नान्त्यः, बहुवंचनप्रसङ्गादित्याह — **तत्रेति** । **अथवेति** । नन्वत्रापि पक्षे संबन्धसामान्यबोधकषष्ठ्यन्तस्य समासः स्वीक्रियते न वा । आद्ये पूर्वस्मादभेदः । अन्त्ये तु किंविभक्त्यन्तस्य समास इति वाच्यम् । उच्यते, अल्विधिशब्द इह नार्थपरः, अपि त्वनुकरणम्, विधिग्रहणसामर्थ्यात् । ततश्चाल्विधि[5]शब्दानुक्रियमाणमल्विधिशब्दस्वरूपमात्रं सर्वविभक्त्यन्तमित्यनुकरणस्य सर्वविभक्त्यन्ततोक्तिः । अनुक्रियमाणशब्दस्वरूपस्य च निषेधनिमित्तत्वायोगात् तत्प्रतिपाद्यप्रतीतिः । यद्वा, 'विधिग्रहणसामर्थ्यादावृत्तिः स्यादथापि वा । तन्त्रं वेतीह टीकार्थः कथं नानार्थतान्यथा ॥" असत्यपि विधिशब्दे प्रातिपदिकमात्रनिर्देशे तदर्थस्य सकलविभक्तिसाधारण्यात् सिध्यत्यभिमतमित्यत्राह — **सति चेति** । केवलप्रातिपदिकस्य प्रयोगानर्हत्वाद्विभक्तिरुच्चारणीया । [6]न चोच्चारितार्थाविवक्षायामस्ति कारणमित्यर्थः । [7]'न केवला' इति समयात् केवलप्रातिपदिकप्रयोगाभावात् कथं 'प्रातिपदिकनिर्देशोऽयम्' इत्युक्तमित्याशङ्क्य विभक्त्यर्थाविवक्षामात्रेण प्रातिपदिकनिर्देशत्वोक्तिः, न त्वविभक्तित्वेनेत्याह — **अनलिति** । भाष्ये **अर्थतन्त्रा इति** । स्वार्थमात्रप्रधानाः । विभक्तिशब्देन तदर्थ उच्यते । ननु कथं पुनस्तेनैव च नाम निर्देशः क्रियते, तच्चातन्त्रं स्यात् । तत्कार्यं च भवांस्तद्द्वेषी चेत्यत आह — **यथेति** । नान्तरीयकत्वाद्धान्यार्थिनः पलालाद्युपादानवद् विभक्त्युत्पादानमतन्त्रमित्यर्थः । ननूत्तरपदलोपज्ञानार्थविधिग्रहणाभावेऽपि विशेषानुपादानात् प्रधानतयोपसर्जनतया [8]वालो निमित्तत्वे निषेधो लप्स्यत इत्याशङ्क्याह — **अनलिति** । [9]यत्र वल्युपसर्जनत्वं लभ्यं तत्र तस्य कार्यनिमित्तत्वं नास्ति, तदुपसृष्टप्रत्ययस्य निमित्तत्वात् । [10]सत्यपि च निमित्तत्वे उत्तरपदलोपेऽपि नेष्टसिद्धिरित्याशङ्क्य सामर्थ्यादुपसर्जनतया [11]निमित्तभावेऽपि निषेध इत्यभिसंधायाह

---

[1] व्याप्तिन्याय इत्यर्थः ।
[2] दोषाभावात् प्रसङ्गात् — क.
[3] सर्वादेशेन — क.
[4] 'किमत्रेत्यल्शब्दे' इत्युचितं भाति ।
[5] शब्दादनुक्रियमाणम् — क.
[6] नचोच्चारितार्थविवक्षायाम् — क.
[7] महाभाष्यम् १. २. ६४.
[8] वा लोपनिमित्तत्वे — क.
[9] यत्र ह्युपसर्जनत्वं हलस्तत्र तस्य — ति.
[10] सत्यपि चानित्यत्वे यत्र लोपेऽपीष्टसिद्धिः — क.
[11] निमित्ताभावेऽपि — क.

— **उत्तरेति** । किमित्यर्थप्रदर्शनमात्रम्, विग्रह एव तु कस्मान्नेत्यंत्राह — **एवं हीति**। [1]"अकारादनुपपदात् कर्मोपपदो भवति विप्रतिषेधेन' इति पचाद्यचं बाधित्वाणः प्रसङ्गः। कथं तर्हि विग्रहः, तत्राह — **तस्मादिति**। अल् आश्रयोऽस्येत्यलाश्रयः। उत्तरपद[2]लोपस्यासौत्रत्वादाह — **अलिति** ॥

[१, ४१०–४०६]

(**लघुविवरणम्**) किम [3]आक्षेपार्थतां दर्शयति — **तत्स्थानेति**। पृथक्त्वेऽपि तत्स्थानापत्त्या तद्धर्मलाभो दृष्ट इत्यत आह — **स्थानिस्वरूपेति**। [4]"स्वं रूपं शब्दस्य' इति वचनादिति भावः। यदि तत्स्थानापत्त्या तद्धर्मलाभो लोकेऽपि वचनसाध्यः, तर्हि इहापि स्थानिवत्सूत्रं [5]कर्तव्यमित्यत आह — **लोके हीति**। 'उपाध्यायस्य' [6]इत्यनुपपन्नम्, संबन्ध्यन्तरानुपादाने षष्ठ्ययोगात्। न च शिष्य एव संबन्ध्यन्तरम्, व्यभिचाराभावेनोपाध्यायस्य शिष्यविशेषणत्वायोगात्, अत आह — **प्रसङ्गेति**। **व्यभिचाराभावादिति**। यद्यपि शिष्य इत्युक्ते आचार्यशिष्ये व्यभिचारोऽस्त्येव। अस्ति चाचार्योपाध्याययोर्भेदः, सकल्पं सरहस्यं च वेदमध्यापयन्नाचार्य इत्युच्यते, वेदैकदेशमङ्गानि वा वृत्त्यर्थमध्यापयन् 'उपाध्यायः', तथाप्युपेत्याधीयतेऽस्मादिति व्युत्पत्त्या आचार्योऽप्युपाध्याय इत्युच्यत इत्यभिप्रेत्यैतदुक्तम्। आचार्यशिष्यव्युदासे च मन्दं प्रयोजनम्। 'प्रतिषेधं वक्ष्यामि' [7]इत्यनुपपन्नम्, न हि प्रतिषेधाभिधानं समग्रसूत्रारम्भे हेतुः, अनल्विधावित्येव वक्तुं शक्यत्वादित्यत आह — **न हीति**। भाष्यस्थयोगपदं [8]वृत्तानुक्रमणपूर्वकं व्याचष्टे — **एवमिति**। भाष्ये असत्यपीति छेदः। अल्विधौ प्रतिषेध इत्यस्य विशेषणं चैतत्। स्थानित्वप्रयोजकं यद्रूपं तन्मात्रमादेशेऽतिदिश्यते, अव्यभिचारि च स्थानित्वप्रयोजकम्, वलादित्वं च व्यभिचारि, अतो न तदतिदिश्यते। तथा च प्रपठ्येत्यादौ स्वतो न वलादित्वम्, नाप्यतिदेशत इतीण् न भविष्यतीत्याह — **प्रपठ्येति**। लोकेऽपि सामान्यातिदेशे विशेषः कस्मान्नातिदिश्यते, अत आह — **सामान्यशब्देति**। 'सिचो लोपो न प्राप्नोति' इति भाष्यमनुपपन्नम्, दीर्घविधानात् प्रागेव सिज्लोपसंभवात्, अत आह — **दीर्घे कृत इति**। दीर्घे कर्तव्ये सिज्लोपोऽसिद्ध इति भावः। ननु दीर्घविधौ स्थानित्वप्रयोजकमिट्त्वम्, तथा च तस्मिन्नतिदिष्टे इडाश्रयो लोपो भविष्यतीत्यत आह — **दीर्घविधाविति**। नन्वच एव स्थानित्वे 'ग्रहणम्' इत्यादावपि दीर्घप्रसङ्ग इत्यत आह — **इट्त्विति**। नन्वजन्तराणां व्यावर्तकत्वेनेडवश्यमुपजीव्यश्चेन्नियमफलाया अच्परिभाषाया अनुपस्थानादिट्त्वस्यैव [9]स्थानित्वप्रयोजकत्वात् तदतिदेशेन सिज्लोपो भविष्यतीत्यतो नात्र [10]विशेषातिदेशे दोष इत्यत उदाहरणान्तरमाह — **तथेति**। **अकितोऽपीति**। [11]'रलोऽव्युपधात्' इति कित्वप्रतिषेधादिति भावः। इष्टोऽपि विशेषातिदेशः कथं लभ्यत इत्यत आह — **तस्मादिति**। ननु

---

[1] का. वा. ३. २. १ — ६.
[2] लोपस्य सौत्रत्वादाह — क.
[3] आक्षेपार्थत्वं — ड.
[4] पा. सू. १. १. ६८.
[5] 'कर्तव्यम्' इत्यस्यानन्तरं 'स्यात्' इत्यधिकम् — ण.
[6] इति भाष्यमनुपपन्नम् — ण.
[7] इति भाष्यमनुपपन्नम् — ण.
[8] वृत्तानद्रवण — ड, ण; वृत्त्यानुद्रवण — ढ.
[9] स्थानिवत्त्वप्रयोजकत्वं तदतिदेशेन — ड, ढ.
[10] विशेषातिदेशे — ड, ढ.
[11] पा. सू. १. २. २६.

[१, ४०१–४०६]

यद्यनल्विधावित्युच्यते तदेत्संज्ञककारङकार[1]प्रत्ययाश्रयत्वेन [2]'ङिङति च' इति [3]प्रतिषेधस्याल्विधित्वात् तत्र कर्तव्ये स्थानिवद्भावाभावात् प्रदीव्येति गुणप्रतिषेधो न स्यात्, अत आह — **अनुबन्धेति**। स्थानिन्यल्याश्रीयमाणे प्रतिषेध इति स्थापयिष्यत इति हृदयम्। अग्रहीदित्यत्र विशेषानतिदेशेऽपि न दोष [4]इत्याह — **ग्रहोऽलिटीति**। आनुदेशिकं नाम वलादित्वं नास्तीत्यत आह — **अतिदेश एवेति**। **प्रयोजनम्** प्रयोजकम्॥

(विवरणम्) तद्धर्मलाभात् [5]तत्कर्मलाभात्, तत्कार्यप्राप्तिदर्शनादित्यर्थः। ननु पृथक्त्वमङ्गीकृत्यैव तत्स्थानापत्त्या तद्धर्मलाभेऽभिहिते 'स्थान्यादेशपृथक्त्वात्' इति [6]हेतुर्विरुद्ध इत्यत आह — **स्वरूपेति**। [7]'स्वं रूपं शब्दस्य' इति वचनान्नात्र तत्स्थानापत्त्या तत्कार्यलाभ इति भावः। ननु भाष्योदाहृते दृष्टान्ते न तत्स्थानापत्त्या तद्धर्मलाभः प्रतीयत इत्यत [8]आह — **प्रसङ्गेति**। कुत एतदित्यत आह — **न त्विति**। यद्यप्याचार्यं व्यावर्तयितुमुपाध्यायस्येति विशेषणं संभवति। अस्ति चाचार्योपाध्याययोर्भेदः, उपनीय वेदमध्यापयन्नाचार्यः, वेदैकदेशमङ्गानि वा वृत्त्यर्थमध्यापयंस्तूपाध्यायः, तथाप्युपेत्याधीयतेऽस्मादिति केवलयौगिकमुपाध्यायशब्दमाश्रित्यैतदुक्तमित्यविरोधः। आचार्यव्यावर्तने च मन्दं प्रयोजनम्। **अप्रदर्शितविषयः**, अप्रदर्शितप्रतिषेध्य इत्यर्थः। भाष्ये 'असत्यपि' इति छेदः। 'अल्विधौ प्रतिषेधे' इत्यस्य विशेषणं चैतत्। वार्तिके च 'अविशेषणे' इति छेदः, लक्ष्ये विशेषणाभाव इति च तस्यार्थः। अविशेषण इत्यभिधानसामर्थ्यसिद्धं भाष्ये 'विशेषण आश्रीयमाणे' इत्युक्तम्। **अविवक्षितत्वात्** विवक्षाकारणयत्नविशेषविषयीकृतत्वाभावादित्यर्थः। सूत्रे [10]हि यस्य यद्रूपमुपात्तं तस्य ततोऽन्यरूपसद्भावे उपात्तरूपविवक्षा प्रयत्न[11]विशेषेण व्याप्ता, यथा [12]'सेऽसिचि' इति 'से' इत्युपादाने, यथा वा [13]'सनि मीमा' इत्यत्र [14]'सः स्यार्धधातुके' इत्यतः 'सि' इत्यनुवृत्त्या। [15]'क्त्वो ल्यप्' इत्यत्र तु प्रयत्नविशेषो व्यावर्तमान उपात्तवलादिविवक्षामपि व्यावर्तयतीति हृदि निधायोपात्तस्वरूपाद्रूपान्तरं दर्शयति — **तथा हीति**। तत्र दृष्टान्तत्वेन 'आकारान्तोऽपि' इत्याद्युक्तम्। **ईकारान्तोऽपि** [16]'स्नात्व्यादयश्च' इति वचनात्। **यगन्तोऽपि** [17]'क्त्वो यक्' इति वचनात्। **मान्तोऽपि** [18]'इष्ट्वीनमिति' [इति] वचनादित्यर्थः।

---

[1] अत्र बहुव्रीहिर्ज्ञेयः।
[2] पा. सू. १. १. ५.
[3] प्रतिषेधस्यानल्विधित्वात् — ण.
[4] इत्यत आह — ड, ढ, ण.
[5] 'तत्कर्मलाभात्' इति नास्ति — ज, ट.
[6] हेतुर्विरुध्यत इत्यत आह — ज.
[7] पा. सू. १. १. ६८.
[8] 'आह' इत्यस्यानन्तरं **लोके हीति**। उपाध्यायस्येति भाष्यमनुपपन्नम्, संबन्ध्यन्तरानुपादानेन षष्ठ्ययोगात्। न च शिष्य एव संबन्ध्यन्तरम्, व्यभिचाराभावेनोपाध्यायस्य शिष्यविशेषणत्वायोगात्, अत आह' इत्यधिकम् — ज.
[9] तुशब्दो नास्ति — छ, ज, ट.
[10] हिशब्दो नास्ति — च, छ.
[11] विशेषव्याप्ता — ज.
[12] पा. सू. ७. २. ५७.
[13] पा. सू. ७. ४. ५४.
[14] पा. सू. ७. ४. ४९.
[15] पा. सू. ७. १. ३७.
[16] पा. सू. ७. १. ४९.
[17] पा. सू. ७. १. ४७.
[18] पा. सू. ७. १. ४८.

न त्विति। [1]स्थानिमात्राप्रतिबद्धत्वादित्यर्थः। **अशब्दार्थत्वादिति**। शब्दार्थस्य तेन [2]विनानुपपत्त्यभावाच्चेत्यपि द्रष्टव्यम्। यत्र हि शब्दार्थस्य येन विनानुपपत्तिस्तत्राशाब्दस्याप्यतिदेशो भवत्येवेत्याह — **यत्रेति**। ननु 'अग्रह् इस् ईत्' इति स्थिते कस्मादस्यामवस्थायां सिज्लोपो न भवतीत्यत आह — [3]**दीर्घ इति**। [4]"ग्रहोऽलिटि' इति दीर्घे कर्तव्ये सिज्लोपस्यासिद्धत्वादिति भावः। ननु दीर्घं प्रतीटः स्थानित्वाद् दीर्घे कृतेऽपि स्थानिवद्भावात् सिज्लोपो भविष्यतीत्यत आह — **दीर्घेति**। नन्वच एव स्थानित्वे 'ग्रहणम्' इत्यादावपि दीर्घप्रसङ्ग इत्यत आह — **इट् त्विति**। नन्विड्रूपाचः स्थानित्वे इटोऽपि विशेषणत्वेन स्थानित्वमिति कस्मान्न स्थानिवत्त्वमित्यत उदाहरणान्तरमाह — **तथेति**। **अकितोऽपीति**। [5]"न क्त्वा सेट्' इति कित्त्वप्रतिषेधादिति भावः। ननु 'अनल्विधौ' इत्युच्यमानेऽपि कथं विशेषकार्यातिदेश इत्यत आह — **तस्मादिति**। ननु यद्यनल्विधावित्युच्यते तदेतसंज्ञककारङकारकप्रत्ययाश्रयत्वेन [6]"क्ङिति च' इति प्रतिषेधस्याल्विधित्वात् तस्मिन् कर्तव्ये स्थानिवद्भावाभावाद् गुणनिषेधो न स्यादित्यत आह — **अनुबन्धेति**। प्राथम्याद् विधेयसमर्पकत्वेन प्राधान्याच्च स्थानिवदित्यनेनालो विशेषणात् स्यान्यलाश्रये प्रतिषेध इति भावः। 'अग्रहीत्' इत्यत्र विशेषानतिदेशेऽपि न दोष इत्याह — **ग्रहोऽलिटीति**। आश्रयशब्दस्य भावसाधनत्वे वार्तिकविवरणसमये 'सति वलादित्वे' इत्यभिधानमसंगतं स्यादित्यत आह — **आश्रीयत इति**। **इडागमस्येति**। [7]"रुदादिभ्यः' इत्यत्र वलादेरित्यनुवर्तत इति भावः। **स्थानिकार्यमिति**। सार्वधातुकत्वाभावादिति भावः। **प्रयोजनम्** प्रयोजको **यस्य** वलादित्वस्येत्यर्थः। ननु सार्वधातुकसंज्ञाया अल्विधित्वाभावात् किमुच्यते तत्र 'अनल्विधाविति प्रतिषेधः प्राप्नोति' इत्यत आह — **इडागमार्थमिति** ॥

[१, ४०१–४०६]

(उद्द्योतनम्) तत्स्थानेति। उपाध्यायप्रसङ्गे शिष्यस्याग्रपूजादिवदिति भावः। ननु पृथक्त्वमङ्गीकृत्यैव स्थानापत्त्या धर्मलाभेऽभिहिते 'पृथक्त्वात्' इति हेतुर्विरुद्धः, अत आह — **स्थानिस्वरूपेति**। "स्वं रूपम्' इति वचनान्न लौकिको न्यायोऽत्रेत्यर्थः। लोकेऽपि वचनसापेक्षतां वारयति — **लोके हीति**। ननु भाष्योदाहृते तत्स्थानापत्त्या तद्धर्मलाभो न प्रतीयते, अत आह — **प्रसङ्गेति**। कुत एतत्, अत आह — **न त्विति**। यद्यप्याचार्यव्यावर्तनाय विशेषणत्वं संभवति, 'उपनीय वेदाध्यापक आचार्यः, वृत्त्यर्थं वेदतदङ्गाध्यापक उपाध्यायः' इति तयोर्भेदात्। तथाप्युपेत्याधीयते यस्मादिति केवलयोगाश्रयेणैतदुक्तम्। आचार्यव्यावर्तनस्य मन्दप्रयोजनत्वात्। **विषयः** प्रतिषेध्यः। वार्तिके **अविशेषणे** प्रदीव्येत्यादौ वलादित्वरूपविशेषणाभाव इत्यर्थः। भाष्ये 'असत्यपि' इति 'अल्विधौ प्रतिषेधे' इति वार्तिकस्य विशेषणमध्याहृतम्। अविशेषण इत्यस्य तात्पर्यमाह — भाष्ये **विशेषण इति**। इड्विधौ वलादित्वविशेषणे आश्रीयमाणे लक्ष्ये तस्मिन्

---

[1] क्त्वामात्राप्रतिबद्धत्वादित्यर्थः — ज.

[2] विनाप्यनुप — ट.

[3] **दीर्घे कृत इति**। दीर्घे कर्तव्ये सिज्लोपोऽसिद्ध इति भावः। ननु दीर्घविधौ स्थानित्वप्रयोजकमिष्टम् [मिट्त्वम् ?], तथा च तस्मिन्नतिदिष्टे इडाश्रयो लोपो भविष्यतीत्यत आह — दीर्घेति — ज.

[4] पा. सू. ७. २. ३७.

[5] पा. सू. १. २. १८.

[6] पा. सू. १. १. ५.

[7] पा. सू. ७. २. ७६.

[8] पा. सू. १. १. ६८.

विशेषणेऽसतीत्यन्वयः। 'सामान्यातिदेशे' इत्यस्य तात्पर्यमाह — **तच्चेति**। वस्तुस्थित्या [१]"क्त्वः' इति वलादेरेवोच्चारणेन। अविवक्षितत्वमुपपादयति — **तथा हीति**। 'देवित्वा' इत्यस्य प्रेण समासे इट्सहितस्यापि ल्यबादेश इष्यते 'प्रदीव्य' इति। [२]"दत्त्वा' इत्यत्र वलादेरपि भवति 'प्रदाय' इति। तथा च स्थानिनि वलादित्वं न विवक्षितमित्यर्थः। ईकारान्तोऽपीत्याद्यनेकरूपत्वप्रदर्शनार्थमुक्तम्। [३]"स्नात्व्यादयश्च' [४]"क्त्वो यक्' [५]"इष्ट्वीनमिति च' इतीकारान्तत्वादिविधयः। **न त्विति**। स्थानिमात्राप्रतिबद्धत्वादित्यर्थः। **अशब्दार्थत्वादिति**। शब्दार्थस्य तेन विनानुपपत्त्यभावाच्चेत्यपि [६]ज्ञेयम्। **यत्रेति**। 'माठरवदस्मिन् वर्तितव्यम्' इत्यादिवदित्यर्थः। ननु दीर्घात् पूर्वमेव सिज्लोपः किं न स्यात्, अत आह — **दीर्घे कृत इति**। [७]"ग्रहोऽलिटि दीर्घः' इति दीर्घे कर्तव्ये सिज्लोपस्यासिद्धत्वादिति भावः। 'यद्येवम्' इति भाष्यतात्पर्यमाह — **दीर्घविधाविति**। तर्हि 'ग्रहणम्' इत्यादावपि दीर्घः स्यात्, अत आह — **इट् त्विति**। **इट्कार्यम्** "इट ईटि' इति सिज्लोपरूपम्। इड्रूपस्याचः [९]स्थानित्वे इटोऽपि स्थानित्वमस्तीति स्थानिवद्भावः स्यादेवेत्युदाहरणान्तरमाह — **तथेति**। **अकितोऽपीति**। [१०]"न क्त्वा सेट्' इति कित्त्वनिषेधादिति भावः। 'अनल्विधौ' इति भाष्यं विशेषकार्यातिदेशप्रतिपादनपरतया व्याचष्टे — **तस्मादिति**। नन्वेवं 'प्रदीव्य' इत्यत्र गुणनिषेधो न स्यात्, [११]"क्ङिति निषेधस्य [१२]"ककारङकाराश्रयत्वेन 'अनल्विधौ' इति स्थानिवत्त्वप्रतिषेधात्, अत आह — **अनुबन्धेति**। स्थानिनालो विशेषणात् स्थान्यलाश्रितकार्ये प्रतिषेध इति भावः। **समुदायेति**। इडिति विहितस्वरूपं तत्र गृह्यते, न त्वल्मात्रमित्यर्थः। 'अग्रहीत्' इत्यत्र विशेषानतिदेशेऽपि दोषो नेत्याह — **ग्रह इति**। **इट एवेति**। तथा च स्थानिवद्भावेन [१३]"सिज्लोपसिद्धिरिति भावः। आश्रयशब्दस्य भावसाधनत्वे 'सति वलादित्वे' इति भाष्यासंगतिमाशङ्क्याह — **आश्रीयत इति**। **इड्विधौ** [१४]"आश्रीयत इत्यनुषङ्गः। 'प्रतिषेधस्तु' इत्यादेस्तात्पर्यमाह — **तत्रेति**। **इडागमस्येति**। [१५]"रुदादिभ्यः' इत्यत्र वलादेरित्यनुवर्तनादित्यर्थः। **स्थानीति**। सार्वधातुकत्वाभावादित्यर्थः। **प्रयोजनं** प्रयोजको यस्य वलादित्वस्येत्यर्थः। 'इतरेण भावः' इत्यस्यार्थमाह — **तत्रेति**। **सार्वधातुकत्वम्** आश्रित्येत्यनुषङ्गः। सार्वधातुकसंज्ञाया अल्विधित्वाभावात् तत्र 'अनल्विधौ' इति कथं प्रतिषेधः, अत आह — **इडागमार्थमिति**॥

[१, ४०१–४०६]

(**रत्नप्रकाशः**) तदेवं पदकृत्यं विचार्येदानीं सूत्रप्रयोजनं विचारयति — **किमर्थं पुनरिति**। **इदमुच्यत इति**। सूत्रं क्रियत इत्यर्थः। **स्थान्यादेशपृथक्त्वादिति**। स्थान्यादेशस्वरूपयोर्भेदादित्यर्थः। **वधेर्न स्यादिति**। हन्शब्देन तस्यानुपादानादिति भावः। **उपाध्यायस्येति**। प्रसङ्ग

---

[१] पा. सू. ७. २. ७६.
[२] 'दत्त्वा' इत्यादि 'प्रदायेति' इत्यन्तं नास्ति — अ.
[३] पा. सू. ७. १. ४९.
[४] पा. सू. ७. १. ४७. 'क्त्वो यक्' इत्यस्यानन्तरम् 'इति' इत्यधिकम् — आ, ऋ.
[५] पा. सू. ७. १. ४८.
[६] विज्ञेयम् — अ.
[७] पा. सू. ७. २. ३७.
[८] पा. सू. ८. २. २८.
[९] स्थानित्वे दीर्घ इतीटोऽपि — ऋ.
[१०] पा. सू. १. २. १८.
[११] क्ङितीति निषेधस्य — ऋ.
[१२] ककाराश्रयत्वेन — म.
[१३] 'सिज्लोप' इति नास्ति — अ, म.
[१४] आश्रय इत्यनुषङ्गः — म, आ, इ, ऋ.
[१५] पा. सू. ७. २. ७६.

इति शेषः। **पुरुषारम्भ इति**। पुरुषकृतः संकेत इत्यर्थः। **स्वरूपविधिरिति**। [1]'स्वं रूपं शब्दस्याशब्दसंज्ञा' इति सूत्रमित्यर्थः। एतेनैतद् भाष्यं विस्मृत्य [2]'स्वं रूपम्' इति सूत्रं सर्वथा प्रत्याख्यातमेवेति मन्यमाना निरस्ताः। **एवं तर्हीति**। लोकदृष्टान्तेन न सिध्यति चेत् तर्हीत्यर्थः। [3]**विभक्तौ कार्यमिति**। विभक्तिनिमित्तकं कार्यमित्यर्थः। **आदेशो भवतीति**। संज्ञा-विशेषयुक्त इति शेषः। **प्रतिषेधं वक्ष्यामीति**। तथा चाप्रदर्शितविषयः प्रतिषेधो न शक्यः कर्तुमिति 'स्थानिवदादेशः' इत्यप्यपेक्षितमिति भावः। **एतदपि नास्तीति**। इदमपि सूत्रस्य प्रयोजनं न भवतीत्यर्थः। नन्वनादेशग्रहणाज्ज्ञापकात् स्थानिसामान्यसंज्ञैवादेशे ज्ञापनीया, ज्ञापकस्य सजातीयापेक्षत्वात्। आदेशे हलादित्वस्य स्वत एव सत्त्वेन सामान्यसंज्ञातिदेशज्ञापनमात्रेणैवा-नादेशग्रहणस्य चारितार्थ्याच्च। तथा च ल्यबादेशे क्त्वारूपस्थानिसामान्यगतक्त्वाकृत्प्रत्ययसंज्ञा एव ज्ञापकवशात् सिद्धाः, न तु क्त्वाविशेषगतकित्तादिसंज्ञे इति तत्र ल्यब्ग्रहणस्यावश्यकत्वात् तस्या-ल्विधौ स्थानिवत्त्वनिषेधज्ञापकत्वं न युज्यत इति प्रतिषेधार्थमिदं सूत्रमारभ्यमेवेति चेन्न, आरब्धेऽपि सूत्रे 'सामान्यातिदेशे विशेषानतिदेशः' इति न्यायेन विशेषातिदेशस्य दुर्लभत्वादित्या-शयेनाह — **अल्विधौ प्रतिषेध इति**। अपेक्षिताध्याहारेण वार्तिकं व्याचष्टे — **अल्विधाविति**। [4]'असत्यपि' इति पूर्वान्वयि। 'अविशेषणे' इति वार्तिकगतं पदमसमर्थसमासरूपमुपपादयितुं 'विशेषणे समाश्रीयमाणे' इत्यध्याहृतम्। **अप्राप्तिर्विधेरिति**। इडादेरिति शेषः। विशेषणासत्त्वमेव कुतोऽध्यवसितमित्याशयेन पृच्छति — **किं कारणमिति**। अनुपलब्धिरेव तत्र मानमित्याशयेनो-त्तरमाह — **तस्यादर्शनादिति**। तदेवं शङ्कित्वा प्रतिबन्द्यां दत्तायां सिद्धान्ती स्वाशयमाह — **ननु चेति**। एवमर्थशब्दं व्याचष्टे — **अन्यस्येति**। [5]अप्रधानमप्यलमाश्रयतो विधौ वर्तमानसंज्ञाया निषेधलाभाय कृतेन विधिग्रहणेन विशेषसंज्ञातिदेशोऽप्युन्नीयत इति भावः। शङ्कित्वा तदाशयम-बुद्ध्वा दृष्टान्तेन विशेषातिदेशाभावं साधयितुमाह — **सत्यमिति**। विशेषातिदेशः साधित एवेति तदविदुषा साधितं विशेषातिदेशाभावमपरिहृत्य तदभिमतं ज्ञापकाश्रयेण सूत्रप्रयोजनसाधनमुप-क्षिपति — **यद्येवमिति**। यदि ज्ञापकेनेष्टसिद्धिं मन्यस इत्यर्थः। **सिचो लोपो न प्राप्नोतीति**। हलादौ विभक्तौ परतः पूर्वयोर्युष्मदस्मदोर्विधीयमानमात्वं विभक्त्यादेशेऽपि हलादौ प्रसक्तमिति क्रियमाणमनादेशग्रहणम् 'आदेशः स्थानिवत् संज्ञां लभते पूर्वस्य कार्ये कर्तव्ये' इति विधिविशेषं प्रत्येवादेशे स्थानिसंज्ञां ज्ञापयेत्, ज्ञापकस्य सजातीयापेक्षत्वात्। तथा चेडादेशस्य दीर्घस्य ततः परस्य सिचो लोपे कर्तव्ये इट्संज्ञाभावात् तल्लोपो न स्यादिति भावः। आरब्धे तु सूत्रे नायं दोषः, नान्यश्चेत्याशयेनाह — **अनल्विधाविति**। सूत्रोपलक्षणमेतत्। सति हि सूत्रे कार्यविशेष-मनपेक्ष्यैवादेशे स्थानिसामान्यविशेषसंज्ञा अतिदिश्यन्त इति प्रदीव्येत्यादौ ल्यबादेशेऽल्विधौ वर्त-मानाया वलादिसंज्ञायाः प्रतिषेधः, 'अग्रहीत्' इत्यत्रेडादेशेऽल्विधाववर्तमानाया इट्संज्ञाया अति-देशश्च सिध्यतीति भावः। **विशिष्टं ह्येषोऽलमिति**। **एषः** विधिः प्रवृत्तिनिमित्तं वल्त्वरूपं **विशिष्टमलम्** अल्विशेषमित्यर्थः। **विशिष्टं ह्येषोऽनलमिति**। **एषः** इट्त्वविधिः, **विशिष्टमनलम्** अनल्विशेषमित्यर्थः। इट्संज्ञा हि इकारटकारसमुदायस्य भवति। यत्तु कैयटेनोक्तम् 'अनुबन्ध-कार्येष्वनल्विधाविति प्रतिषेधो न प्रवर्तते, स्थानिन्यनुबन्धस्यासंनिधानात्। असन्त एवानु-बन्धाः कार्यविशेषका इति सिद्धान्तात्' इति तन्न, [6]'हलः श्नः शानज्झौ' इति शानचः शित्करणा-

---

[1] पा. सू. १. १. ६८.
[2] पा. सू. १. १. ६८.
[3] विभक्तिकार्यमिति — ब.
[4] सत्यपीति — ब.
[5] अप्रधानमप्यलमाश्रयता विधौ — ब.
[6] पा. सू. ३. १. ८३.

नर्थक्यापत्तेः। ननु सामान्यविशेषसंज्ञातिदेशार्थं सूत्रं चेदाश्रीयते तर्हि विध्यंशो निर्दुष्टश्चेदपि निषेधांशोऽतिव्याप्तिदुष्ट एवेत्याशयेनाह — **यदि तर्हीति**। 'विशेषश्च' इत्यस्यानन्तरं तर्हिशब्द-[1]योगोऽभिमतार्थलाभाय ज्ञेयः। **सत्याश्रये विधिरिष्ट इति**। स न सिध्यतीति शेषः। **प्रतिषेधस्तु प्राप्नोतीति**। 'आदेशः स्थानिवत् संज्ञां लभते न त्वल्विधौ कर्तव्ये' इति सूत्रार्थं मन्यमानस्योक्तिरियम्। 'आदेशः स्थानिवदल्विधाववर्तमानां संज्ञां लभते' इत्येव सूत्रार्थ इत्याशयेन समाधत्ते — **न वेति**। **आनुदेशिकस्य** आतिदेशिकस्य। **वलादित्वस्य** वलादिसंज्ञायाः। इदानीं शङ्किता सिद्धान्त्यभिमतं सूत्रार्थमबुद्ध्वा स्वाभिमतमेव सूत्रार्थमवलम्ब्य शङ्कते — [2]**नैतद्विवदामह इति**॥

[१, ४०१–४०६]

(नारायणीयम्) वक्ष्यमाणस्य लिङ्गस्य [3]वार्तिकासंमतेर्न तद्वार्तिकोत्थापनप्रश्ने निमित्तमिति चिन्तयन् [4]न्यायं निमित्तमाहात्र — **तत्स्थानेति**। [5]स चोपरि वचनाद् भाष्यकारेण निरस्यते। वार्तिकेन च 'पृथक्त्वात्' इति हेतूक्त्या हेतुरूपं विभजते — **स्थानिस्वरूपेति**। उपाध्याये हि क्रियमाणं पूजादिकं नोपाध्यायस्वरूपाश्रयम्, किं तु याजनादिक्रियाप्रयुक्तम्। तच्च याजनादिकं शिष्यः करोतीति तस्मिन्नप्युचितमुपाध्यायकार्यम्। इह तु [6]नास्त्यर्थाश्रयमात्मनेपदादिविधानम्, येनादेशस्यापि तदर्थत्वात् तत् स्यात्। किं तु स्वरूपाश्रयम्। तच्च स्वरूपमादेशस्य नास्तीति न स्यात् स्थानिकार्यं विना वचनेन। 'पृथक्त्वात्' इति [7]हेतुभावमजानानस्य चोद्यमित्याह — **लोक इति**। अन्यत्वमात्रं तत्कार्यलाभे हेतुत्वेनोक्तम्। न च तद्युज्यते, अन्यत्वेऽपि च लोके तत्स्थानापत्त्या तत्कार्यलाभदर्शनात्। न च तदपि वाचनिकम्, लोके तादृशवचनाभावेऽपि तद्दर्शनादित्यर्थः। तत्स्थानापत्तेरप्रयोजकत्वम्, उपाध्यायप्रसङ्ग आगतस्य याजनाद्यसमर्थस्यापि विशिष्टपूजाप्रसङ्गात्। किं तु तत्कार्यकारिता तत्र प्रयोजिका। इह तु तदर्थाभिधानलक्षणस्थानिकार्यकारित्वेऽप्यादेशस्य रूपाश्रयत्वाच्छास्त्रीय[8]कार्यासिद्धिरिति हेत्वभिप्रायो 'यद्यपि' इति ग्रन्थोक्तः। समग्रसूत्रस्येदं प्रयोजनं कथमित्यत्राह — **न हीति**। [9]लिङ्गापरितोषादारम्भाङ्गीकारो न भवति, किं त्वबुधबोधनार्थं यद्यारम्भः स्वीक्रियत इत्येषोऽर्थ इत्याह — **एवमिति**। आपाततोऽल्विधिप्रतिषेधस्याप्राप्तिर्वार्तिकेनोद्भाव्यत इति भाति। तद्वयवच्छेदेन वार्तिकप्रतिपाद्यमाह — **अनलिति**। भाष्ये **असत्यपीति**। अत्र छेदः। प्रतिषेधाभावेऽपि विधिनिमित्तविशेषणाभावाद्विधेरप्राप्तिरित्युक्तम्। विशेषणासत्त्वे च प्रमाणं विशेषणादर्शनमुक्तम्। तत्र शास्त्रीयं विशेषणं दर्शनीयं शङ्कित्वा न्यायतस्तस्याप्यभावः प्रतिपादितः। तत्र न्यायप्रवृत्तिमिहोपपादयितुं [10]वार्तिकोक्तामप्राप्तिप्रतिज्ञामनुवादयति — **प्रपठ्येति**। प्रतिज्ञातार्थे हेतुं [11]प्रच्छन्नमाकरग्रन्थार्थावबोधनासमर्थं शिष्यं प्रत्याह — **इड्विधाविति**। तच्चेह नास्तीति शेषः। ननु स्वतोऽसत्त्वेऽपि स्थानिवद्भावात् सत्त्वम्, अत आह — **न स्वत इति**।

---

[1] योगेऽभिमतार्थ — ब.
[2] नैव तद्विवदामह इति — ब.
[3] वार्तिकसंमतेः — क.
[4] यावन्निमित्तमाह — क.
[5] न्यायश्चेत्यर्थः।
[6] नास्त्यर्थाश्रयं तव्यदादिविधानम् — क.
[7] हेत्वभावमजानानस्य — क, ति.
[8] कार्यस्यासिद्धिरिति — ति.
[9] लिङ्गादपरितोषात् — क.
[10] वार्तिकोक्तां प्राप्ति — क.
[11] पृच्छन्तं — ति.

तत्र हेतुः — **न त्विति**। विशेषानतिदेशादित्यर्थः। किं तर्ह्यतिदेश्यम्, अत आह — **तत्रेति**। ननु विशेषानतिदेशे विशेषस्याशब्दार्थत्वं कारणम्, स्थानिशब्दस्य तु वलादिः क्त्वाप्रत्ययोऽर्थ इति स्यात् तस्यातिदेशः, अत आह — **तच्चेति**। स्थानिशब्दस्य वलादिक्त्वार्थत्वं किं स्थानिनस्तद्विशेषाश्रयणात् उताव्यभिचारेण तस्यैव स्थानित्वात्। नाद्यः, [1]'क्त्वो ल्यप्' इति स्थानिनि वलादित्व-[2]विशेषणस्य शब्दादनाश्रयणात्। न द्वितीय इत्याह — **क्त्वो ल्यबिति**। **स्थानिन्यनाश्रितमिति**। ननु सूत्रनिर्दिष्टे संनिहितं कथमनाश्रितमित्यत आह — **अविवक्षितत्वादिति**। अविवक्षामुपपादयति — **तथा हीति**। हेतुरहितदृष्टान्तस्यासाधकत्वात् तमाह — **सामान्येति**। वार्तिकस्थविशेषण-कृत्यमाह — **यत्रेति**। दीर्घात् प्रागेव सिज्लोपसिद्धिमाशङ्क्याह — **ग्रह इति**। दीर्घे सिज्लोप-स्यासिद्धत्वमिति भावः। नन्विट इति षष्ठीनिर्देशात् तस्यैव स्थानित्वम्, अतश्चाशब्दार्थत्वेनानति-देशशङ्का कथमित्यत्राह — **दीर्घेति**। दीर्घविधौ निर्दिष्टस्थानिकतयाच्परिभाषानुपस्थानमितीट एव स्थानित्वमिति न न्यायस्यातिव्याप्तिरित्यत आह — **तथेति**। अल्विधौ निषेधेऽभिमतसिद्धिरित्यु-क्तम् 'अनल्विधाविति पुनः' इत्यत्र। तत्र निषेधप्रवृत्त्यास्यानतिप्रसक्तावपि न्यायातिप्रसक्तेः कः समाधिः, अत आह — **तस्मादिति**। न्यायानतिप्रसक्तिज्ञापनेऽपि निषेधातिप्रसक्तेरेव प्रतिदीव्येति गुणनिषेधासिद्धिरिति शङ्कां पराकरोति — **अनुबन्धेति**। इट्पदस्य प्रयोग[3]समवायीकारावेदकत्वात् कथमनलाश्रयत्वम्, अत आह — **इट इति**।

"वस्तुतोऽलो [4]निमित्तत्वं न तच्छब्देन वेद्यते।
यत्र शब्दात्तदाभासस्तत्रैवैष निषेधकः॥"

[5]इह विशेषातिदेशज्ञापनस्य 'प्रतिदीव्य' इत्यादिकमेव फलम्, न 'अग्रहीत्' इति 'तथा' इति ग्रन्थ-द्योतितम्। तदिदानीं [6]प्रकरणत्वात् स्पष्टयति — **ग्रह इति**।

'इत्थं प्रस्तुते नेदमन्वितं स्यात् ततोऽन्यथा।
व्याख्यायते ननु विधौ दीर्घस्य स्थानिता ह्यचः॥
ततः स्थानिनमाश्रित्य भवँल्लोपोऽल्विधिर्भवेत्।
इति शङ्कां पराकर्तुमेष ग्रन्थ उदीरितः॥
इति केचिद्वदन्त्यत्र तदयुक्तमिडात्मना।
अचोऽपि स्थानिनो लोप आश्रितत्वादनल्विधेः॥
अन्ये त्वचश्चेत् स्थानित्वं कथं लोप इडाश्रये।
अस्य स्याद् ग्रहणं तत्र तस्मादिट्स्थानितोच्यते॥
इत्याहुस्तदतिस्थूलं विशेषस्यातिदेशनात्।
अच्स्थानिता चेदिट्त्वस्य तद्विशेषत्वमेव न॥
न ह्यलोऽनल् विशेषः स्यादित्याहुरपरे पुनः।
इटोऽपि वस्तुदृष्ट्याल्त्वात् तद् दूष्यमितरे पुनः॥
एष इत्यक्षरस्यार्थो वर्ण्यते द्विप्रकारतः।
इत्याहुस्तत्तुच्छतरं दीर्घस्यानल्विधित्वतः॥
साध्याभावात् प्रपञ्चोऽपि न चेष्टो लाघवादरात्॥

---

[1] पा. सू. ७. १. ३७.
[2] विशेषस्य — ति.
[3] समधिकारावेदकत्वात् — क, ति.
[4] निमित्तत्वेन तच्छब्देन — क.
[5] इड्विशेषातिदेश — क.
[6] करणत्वात् — क.

'यदि तर्हि' इति भाष्यस्यायमर्थः — विशेषातिदेशज्ञापनाय चेदल्विधिग्रहणमावश्यकं तदास्य निषेधस्यातिव्याप्तिरिति। 'आश्रये' [1]इत्यस्य वलादित्व इति व्याख्यानं कृतम्। तत्कथम्, अक्षरानारूढत्वात्, अत आह — **आश्रीयत इति**। 'प्रतिषेधस्तु' इति वार्तिकशेषं व्याचष्टे — **तत्रेति**। **प्रयोजनं** प्रयोजकम्। वलादित्वमात्रेण [2]कथमिड्भावः, सार्वधातुकत्वस्याप्यपेक्षितत्वात्, अत आह — **स्वाश्रयमिति**। सार्वधातुकत्वस्य संज्ञारूपत्वात् कथं निषेधप्राप्तिः, तत्राह — **इडिति**॥

[१, ४०६–४०८]

(लघुविवरणम्) ननु पूर्वोक्तं दोषमपरिहृत्य विचारान्तरारम्भोऽयुक्त[3] [4]इत्यत आह — **इदानीमिति**। विचारबीजं दर्शयति — **किं प्रत्यासत्तिरिति**। **अतिदिष्टम**तिदेशश्चेत् सप्तमीनिर्देशोऽनुपपन्नः, बहुवचनं च व्यर्थम्, समासनिर्देशोऽप्ययुक्त इत्यतो व्याचष्टे — [5]**आदिष्टा एवेति**। **लैंगवायन इति**। अत्र [6]स्थानिवद्भावाभावे ओर्गुणो न स्यात्। 'किं पुनरत्र ज्यायः' इति भाष्यमनुपपन्नम्, पक्षद्वयस्यापि दुष्टत्वेन प्रशस्यत्वमेव नास्ति, कुतः पुनस्तद्विषयः प्रकर्ष इत्यत आह — **न्यायेति**। 'गुरुवद् गुरुपुत्रे' इति दृष्टान्तोऽनुपपन्नः, गुरौ गुरुपुत्रे न तत्र किंचिदतिदिश्यते, इह तु सार्वधातुकत्वमतिदेष्टव्यम्, तत्राह — **अरुदितामित्यत्रेति**। 'तपरकरणात् सिद्धम्' इति भाष्यमनुपपन्नम्, उकारेण भाव्यमानेनापि सवर्णग्रहणाद् दीर्घनिवृत्तये तपरकरणसंभवाच्छास्त्रान्तरेण प्राप्तगुणनिवर्तकत्वायोगात्, तत्राह — **अकारस्येति**। **न्याय्य इति**। [7]'स्थानेऽन्तरतमः' इति परिभाषयेति भावः॥

[१, ४०६–४०८]

(विवरणम्) चोदितं दोषमपरिहृत्य विचारान्तरारम्भोऽनुपपन्न इत्यत आह — **इदानीमिति**। [8]'आदेशिनीति न क्रियायोगनिमित्त इत्याह — **आदेश इति**। 'स्थान्यल्' इत्यनेन 'अलि' इत्यनेनादेशिनीति [9]व्यधिकरणसप्तमीति सूचयन् विचारबीजं दर्शयति — **किमिति**। प्रतिषेधस्य प्रतिषेध्यसाकाङ्क्षत्वात् प्रतिषेध्यसमर्पकं स्थानिवदिति प्रत्यासन्नमनल्विधावित्यस्येति भावः। **स्थानिवद्भावादिति**। ततश्चात उपधात्वाभावादिति भावः। अतिदेशो **ऽतिदिष्टं** चेत् षष्ठ्या भवितव्यम्, सुप्तिङ्कृत्स्विति च सप्तमीनिर्देशो न्याय्य इत्यत आह — [10]**आदिष्टा इति**। सुप्तिङ्कृतामतिदिष्टा इति च षष्ठीसमासः। तेषामादेशेष्वित्यर्थः। **स्थानिवद्भावादिति**। भसंज्ञानिमित्ते तद्धिते ओर्गुणो विधीयत इति तद्धितत्वं मृग्यत इति भावः। ननु दुष्टत्वं पक्षद्वयस्यापि, पक्षान्तरगतदोषस्य पक्षान्तरेऽभावेन प्रशस्यत्वेऽपि पक्षद्वयस्य [11]प्रकर्षासंभवादातिशायिकोऽनुपपन्न

---

[1] 'इत्यस्य' इत्यनन्तरं चकारोऽधिकः — ति.
[2] कथमिडभावः — क.
[3] न युक्तः — ण.
[4] इत्याह — ड.
[5] प्रदीपे 'आदिष्ट एवातिदिष्टः' इत्यत्र 'आदिष्टा एवातिदिष्टाः' इति पाठोऽभिमतोऽत्र॥ आदिष्ट एवेति — ण.
[6] स्थानिवद्भावाभावादोर्गुणः — ड, ढ.
[7] पा. सू. १. १. ५०.
[8] आदिशतीति न — ञ, ट.
[9] सप्तमी व्यधिकरणेति — च, छ.
[10] 'आदिष्ट एवातिदिष्टः' इति प्रदीपस्थाने 'आदिष्टा एवातिदिष्टाः' इति पाठोऽभिमत इति भाति।
[11] प्रकृष्टत्वासंभवात् — च, छ.

इत्यत आह — **न्यायेति**। **तच्छेषः** अतिदेशशेष इत्यर्थः। **तद्द्वारके** अतिदेशद्वारक इत्यर्थः। कार्य इति व्यपदेशस्याप्युपलक्षणम्। तेनालाश्रयं कार्यमलाश्रयो व्यपदेशो वा स्थानिवद्भावेन न भवतीत्युक्तं भवति। प्रकृते च यो व्यपदेशोऽलाश्रयो नासौ स्थानिवद्भावेन, यश्च स्थानिवद्भावेन नासावलाश्रय इत्याह — **अरुदितामित्यत्र त्विति**। **तदेवेति**। न च तदलाश्रयमिति शेषः। एतदुक्तं भवति — [1]'कार्यकालं संज्ञापरिभाषम्' इत्यस्मिन् पक्षे इड्विधिकाल एव सार्वधातुकसंज्ञा स्थानिवद्भावेन। इट् चाल्विधिरिति स्यादपि निषेधः। यथोद्देशपक्षे तु नेड्विधानकाल एव स्थानिवद्भावेन सार्वधातुकसंज्ञा, किं तु प्रागेवानपेक्षित [कार्य] विशेषा सार्वधातुकसंज्ञा प्रवर्तत इत्यल्विधिकार्यविशेषार्थत्वस्याबुद्धिस्थत्वान्नास्ति 'अनल्विधौ' इति निषेध इति। विशेषांशे दृष्टान्तो न त्वतिदेशस्य [2]सर्वात्मनानपेक्षण इत्याह — **यथेति**। भाव्यमानेनोकारेण सवर्णग्रहणेऽपि स्थानेऽन्तरतमपरिभाषया मात्रिकस्य मात्रिक एवेत्याह — **अकारस्येति**। **क्वुन्प्रत्ययः** औणादिक इति शेषः॥

[१, ४०६-४०८]

(उद्द्योतनम्) शङ्कितं दोषमपरिहृत्य विचारान्तरारम्भोऽयुक्तः, अत आह — **इदानीमिति**। [3]**अत्र** अरुदितामित्यादौ, प्रवर्तत इडित्यर्थः। 'आदेशिनि' इति ताच्छील्यणिन्यन्तं न भवतीत्याह — **आदेश इति**। भाष्ये 'आदेशिन्यलि' इति [4]व्यधिकरणे सप्तम्याविति सूचयति — **स्थान्यलाश्रय इति**। संशयबीजमाह — **किमिति**। प्रतिषेधस्य [5]प्रतिषेध्यसापेक्षत्वात् प्रतिषेध्यं स्थानिवदिति प्रत्यासन्नमिति भावः। [6]'बहुलं संज्ञा' इत्यादिवार्तिकं [7]'चक्षिङः ख्याञ्' इति सूत्रस्थम्। [8]'वधस्यादन्तत्वात् कथं वृद्धिः, अत आह — **स चेति**। **स्थानिवद्भावादिति**। [9]'अचः परस्मिन्' इत्यनेन। ततश्चात उपधात्वाभावादिति भावः। नन्वतिदिष्टशब्देनातिदेशविषयोक्तौ सुप्संज्ञादेरतिदिष्टस्य न किंचित् तत्स्थानिकं कार्यमित्युपसंख्यानवैयर्थ्यम्, अत आह — [10]**आदिष्ट एवेति**। तथा च सुप्तिङ्कृतामादेशेष्वित्यर्थः। **स्थानिवद्भावादिति**। भसंज्ञानिमित्ते तद्धिते परे ओर्गुणो विधीयते। अन्यथा 'मृदु' इत्यादावपि गुणप्रसङ्गादिति भावः। पक्षद्वयस्यापि पक्षान्तरदोषस्य पक्षान्तरेऽभावेन प्रशस्तत्वेऽपि पक्षद्वयस्यापि [11]प्रकर्षासंभवेनातिशायनिकोऽनुपपन्नः, अत आह — **न्यायेति**। उभयोर्न्यायोपपन्नत्वाभावादेकस्य तद्युक्तस्य प्रकर्षो युक्त इत्यर्थः। व्याप्तिन्यायेऽपि सति प्रत्यासत्तेरेव ग्रहे किं नियामकम्, अत आह — **यत्कार्यमिति**। **तच्छेषः** [12]अतिदेशशेषः। [13]**तद्द्वारकः** अतिदेशद्वारकः। **कार्य इति**। व्यपदेशेऽपि। [14]तेनालाश्रयं कार्यमलाश्रयो व्यपदेशो वा स्थानिवद्भावेन न भवतीत्युक्तं भवति। एवं च प्रतिषेध्यसमर्पकत्वेनो-

---

[1] परिभाषा ३.
[2] सर्वात्मनानपेक्षणादित्याह — ञ.
[3] तत्र — अ, इ, ऋ.
[4] व्यधिकरणसप्तम्याविति — अ.
[5] प्रतिषेध्यापेक्षत्वात् — म, आ, ऋ.
[6] का. वा. २. ४. ५४ — ११, १२.
[7] पा. सू. २. ४. ५४.
[8] वधधातोरित्यर्थः।
[9] पा. सू. १. १. ५७.
[10] आदेशा एवेति — अ, इ, ऋ.
[11] प्रकर्षसंभवेनाति — अ, ऋ.
[12] अतिदेशे शेषः — अ.
[13] 'तद्द्वारके' इति सप्तम्यन्तत्वेन व्याख्यातमुद्योते।
[14] तेनालाश्रयकार्यं — अ.

पस्थित[1]स्थान्येवाल्विशेषणं युक्तमिति प्रत्यासत्तिन्यायग्रहे हेतुरुक्तः। यद्वा, [2]अरुदितामित्यादौ निषेधाप्रवृत्त्यर्थं निषेध्यस्वरूपं 'यत्कार्यम्' इत्यादिना दर्शितम्। प्रकृते च यो व्यपदेशोऽलाश्रयः, नासौ स्थानिवद्भावेन। [3]यश्च स्थानिवद्भावेन नासावलाश्रय इतीट्सिद्धिरित्याह — **अरुदितामिति। तदेवेति।** [4]न च तदलाश्रयमिति भावः। एतेन 'सार्वधातुकत्वस्यापीडर्थत्वात् तस्य चालाश्रयत्वान्निषेधः स्यादेव' इति यदुक्तम्, तन्निरस्तम्। यदंशेऽतिदेशापेक्षा तस्यालाश्रयत्वे निषेधस्योक्तत्वात्। तेन कार्यकालपक्षे इड्विधिसमय एव संज्ञाप्रवर्तनात् संज्ञाया अपि निषेधः स्यादिति शङ्कानवकाश इति ज्ञेयम्। [4]विशेषांशे दृष्टान्तः, न तु सर्वथातिदेशानपेक्षायामित्याह — **गुरुपुत्र इति।** भाष्ये **अस्तु तर्हीति।** यदि 'आदेशिनि' इति पक्ष [5]एव न्यायोपेतस्तर्हि स एव सिद्धान्तोऽस्त्वित्यर्थः। भाष्ये **तपरेति।** [6]'अत उत् सार्वधातुके'इत्यत्र। भाव्यमानस्य सवर्णग्राहकत्वेऽपि तपरत्वं विनापि ह्रस्वस्य ह्रस्व एव [7]भविष्यतीत्याह — **अकारस्येति।** औणादिकमेवाह — [8]**हनो वधेति॥**

[१, ४०६–४०८]

(**रत्नप्रकाशः**) उक्तयोः सूत्रार्थयोर्मध्ये को वा निर्दुष्ट इति विज्ञातुं मध्यस्थः पृच्छति — **किं पुनरिति। आदेशिनि** स्थानिनीत्यर्थः। सिद्धान्त्यभिमतसूत्रार्थाभिप्रायकमिदम्। 'अविशेषेण' इति तु पूर्वपक्ष्यभिमतसूत्रार्थाभिप्रायकम्। एतेन 'किं प्रत्यासत्तिराश्रीयते अथ व्याप्तिरिति भावः' इति निरस्तम्। स्थान्यादेशयोरुभयोरपि प्रत्यासन्नत्वेन व्याप्तेरपि तन्मात्रविषयत्वेन ताभ्यां विकल्पानौचित्यात्। **स्थानिवद्भावादङ्गसंज्ञेति।** एतेनेदं सूत्रं कार्यातिदेशपरमिति वदन्तो भ्रान्ता इति स्पष्टमेव सुहृदाम्। **वधक इति।** हन्तेर्ण्वुल्। [9]'बहुलं तणि' 'अन्नवधकगात्रविचक्षणाजिराद्यर्थम्' इति वधादेशः। स हलन्त इत्युपधावृद्धिप्रसङ्ग इति मन्यते। **सुप्तिङ्कृदतिदिष्टेष्विति।** सुप्तिङाद्यादिष्टेष्वित्यर्थः। तदादेशेष्विति यावत्। यत्तु 'तच्च तद्धितादेशोपलक्षणम् — लैगवायन इत्यत्र हि स्वाश्रयमजादित्वं स्थानिवद्भावात् तद्धितत्वम्' इति कैयटेनोक्तम्, तन्न, फकारमात्रस्य तत्रायन्नादेशस्य कृतत्वेन तस्य स्थानिवद्भावेन तद्धितसंज्ञाया अतिदेष्टुमशक्यत्वात्। तदतिदेशे प्रयोजनाभावाच्च। **किं पुनरत्र ज्याय इति।** को वा पक्षः समीचीन इति भावः। **आदेशिनीति।** यथा 'गुरुवद् गुरुपुत्रे वर्तितव्यमन्यत्रोच्छिष्टभोजनात्' इत्युक्ते 'उच्छिष्टभोजनादन्यत्र' इत्यतिदिश्यमानक्रियाविशेषणम्, उच्छिष्टभोजनव्यतिरिक्ता या या क्रिया गुरुविषये [10]निर्वर्तिता सा सा तत्पुत्रे [11]निर्वर्तनीयेति गम्यते, तथात्र 'अल्विधौ' इत्यतिदिश्यमानक्रियाविशेषणमेवाश्रयितुं युक्तमिति भावः। एतेन "प्रत्यासत्त्येति भावः। यत्कार्यमादेशः स्वतो न प्रतिपद्यते तस्य तत्र स्यादतिदेशाकाङ्क्षा। तच्छेषश्च प्रतिषेधस्तद्द्वारक एवाल्कार्ये युक्तः। 'अरुदिताम्' इत्यत्र त्वादेशस्य स्वतो बलादित्वान्न तत्रातिदेशाकाङ्क्षा। सार्वधातुकत्वं [12]त्वस्य

---

[1] स्थानिनोऽल्विशेषणत्वं युक्तमिति — म.
[2] अरुदितमित्यादौ — अ.
[3] यच्च — अ, म.
[4] विशेषांशदृष्टान्तः — अ, आ, ऋ.
[5] एवकारो नास्ति — अ.
[6] पा. सू. ६. ४. ११०.
[7] भविष्यतीत्यत आह — ऋ.
[8] हनो वध इति — अ, म, इ, ऋ.
[9] का. वा. २. ४. ५४. — ११, १२.
[10] निर्वर्तिता — ब.
[11] निवर्तनीयेति — ब.
[12] 'तस्य' इति प्रदीपार्थानुवादः।

स्वतो नास्तीति तदेवातिदेशेन [1]प्रार्थ्यते। यथा गुरुपुत्रो गुरुत्वे सति नातिदेशमपेक्षते तथा वलादित्वं प्रत्यादेशस्य नास्त्यतिदेशापेक्षेत्येतावता दृष्टान्तः। सार्वधातुकत्वं प्रत्यस्त्येवातिदेशापेक्षा" इति निरस्तम्। प्रत्यासत्तेः प्रागेव निरस्तत्वात्। लक्ष्याकाङ्क्षानुरोधेनैव लक्षणं प्रवर्तयितव्यं न तु लक्षणानुसारेण लक्ष्यं ज्ञेयमिति तदुपपादनग्रन्थादापन्नत्वेनैवमेव सर्वत्र वक्तुं शक्यत इति समस्तशास्त्रविचारस्यानर्थक्यापाताच्च। **तपरनिर्देशादिति**। [2]'अत उत् सार्वधातुके' इति सूत्रे उदिति विधेयसमर्पकगततया तपरकरणमतत्कालव्यावृत्तिरूपप्रयोजनमलभमानं सद् वचनान्तरप्राप्तमतत्कालं व्यावर्तयिष्यतीति भावः। इदं समाधानं [3]यक्षानुरूपबलिन्यायेन ज्ञेयम्। अङ्गवृत्तासिद्धपरिभाषाभ्यां तत्र गुणाभावे सिद्धेऽपि तदज्ञात्वा गुणमापादितवन्तं प्रति तादृशस्यैव समाधानस्योचितत्वात्। अत एवायं न्यायोऽन्यैरपि संगृहीतः 'यक्षानुरूपो बलिरित्याचार्याः प्रतिपेदिरे' इति। नन्वेतत्समाधानेऽनुपपत्तिः का, ययेदमन्यपरतया नीयत इति चेत् शृणु, [4]"तपरस्तत्कालस्य' इति सूत्रेण हि 'तपरोऽण् तत्कालस्यैव सवर्णस्य संज्ञा' इत्येतावद् बोधितम्। तद्यत्र नेष्टं न संभवति वा तत्रोच्चारणार्थमेव तपरकरणमित्यौत्सर्गिकम्। तच्च भाष्य एव तत्र तत्र स्पष्टम्। [5]"दिव उत्' इति तपरकरणं तु 'भाव्यमानोऽप्युकारः सवर्णान् गृह्णाति' इति ज्ञापनार्थमित्यपि भाष्य एवास्ति। एवं सति ह्युच्चारणार्थमेव तत्र 'उत्' इति तपरकरणं संपद्यते। यथा [6]"ऋदोरप्' [7]"ईदूदेत्' [8]"दिव औत्' इत्यादौ। किं च तपरकरणस्यानर्थक्यमात्रेण वचनान्तरप्राप्ततत्कालवारणे युक्तिः कापि नास्ति। केनचिद्वचर्थेन यत्किंचित्साधने एकेनैवानर्थकेन सर्वाभिमतसाधनोपपत्तावनर्थक[9]पदमात्रमेव नोच्चारणीयमिति महता यत्नेन शास्त्रकरणानर्थक्यापत्तेः। किं चैवं [10]"ऋदोरप्' इत्यादावपि किंचित् कल्पनीयं स्यात्। अपि च [11]"अत उत् सार्वधातुके' इत्यत्र 'उत्' इति तपरकरणसार्थक्याय वचनान्तरप्राप्तगुणनिवृत्तिकल्पने 'अतः' इति तपरकरणसार्थक्याय उप्रत्यये परे करोतेर्वृद्धिरपि भवतीति कल्पनीयं स्यात्। तत्कल्पनापेक्षयैतत्कल्पना क्षोदक्षमेत्यन्यदेतत्। तत्तुल्यकल्पनायां तु [12]"ऋत उत्' इति तपरकरणात् 'धातू रथः' इत्यादौ [13]"ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घो न स्यात्। किं च [14]"अत आदेः' इत्यत्र तपरकरणात् 'आछि आयामे' इत्यस्याभ्यासस्य [15]ह्रस्वाभावे 'आनाञ्छ' इत्यादिरूपं न स्यात्। तथा [16]"उरत्' इत्यत्र तपरकरणात् 'आनृजे' इत्यादौ [17]"अत आदेः' इति दीर्घो न स्यादिति। एतेन 'अकारस्य ह्युकारो मात्रिक एव न्याय्य इति शास्त्रान्तरेणापि प्राप्तस्य भिन्नकालस्य निवृत्त्यर्थं तपरत्वमित्यर्थः' इति निरस्तम्। **पिबिरदन्त इति**। अङ्गवृत्तपरिभाषयापि गुणाभावोऽत्र सिध्यति। **नायं ण्वुलिति**। नायं ण्वुलन्त इत्यर्थः। **अन्योऽयमकशब्द इति**। 'यदन्तो वधकः' इत्यध्याहारेण

---

[1] प्रदीपे 'प्राप्यते' इत्यत्र 'प्रार्थ्यते' इति पाठ आश्रितः।
[2] पा सू. ६. ४. ११०.
[3] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[4] पा. सू. १. १. ७०.
[5] पा. सू. ६. १. १३१.
[6] पा. सू. ३. ३. ५७.
[7] पा. सू. १. १. ११.
[8] पा. सू. ७. १. ८४.
[9] पदमात्रमेवोच्चारणीयमिति — ब.
[10] पा. सू. ३. ३. ५७.
[11] पा. सू. ६. ४. ११०.
[12] पा. सू. ६. १. १११.
[13] पा. सू. ६. ३. १११.
[14] पा. सू. ७. ४. ७०.
[15] तेन तपरकरणेन स्वाभाविकह्रस्वपरिग्रहात् तादृशह्रस्वाभावेनात्र तेन दीर्घाभावान्नुड् न स्यादिति भावः।
[16] पा. सू. ७. ४. ६६.
[17] पा. सू. ७. ४. ७०.

वाक्यार्थो ज्ञेयः। तत्र [1]'हनो वध च' इति क्वुन्प्रत्ययस्याकादेशो ज्ञेयः। **रुचक इति**। रुचक इत्यत्रेत्यर्थः॥

[१, ४०६–४०८]

(**नारायणीयम्**) प्रस्तुतदोषमपरिहृत्य विचारान्तरप्रवर्तनमनुपपन्नम्, अत आह — **इदानीमिति**। प्रत्यासत्त्या स्थान्यलि समाश्रीयमाणे निषेधस्य [2]ज्ञातुं शक्यत्वाद् विचारप्रवृत्तिरसंगतेत्यत्राह — **किमिति**। **लैगवायन इति**। भवन् ओर्गुणोऽचमादेशगतमपेक्षते। ननूभयोरपि [3]दुष्टत्वात् प्रशस्यत्वाभावात् तद्विषयप्रकर्षः कथमित्यत्राह — **न्यायेति**। 'तथाहि' इति ग्रन्थसूचितं न्यायमाह — **प्रत्यासत्त्येति**। व्याप्तिन्यायः कथं नेत्याशङ्क्याह — **यदिति**।

"निषेधप्राप्तियोग्यत्वे व्याप्तिन्यायो भवेदिह।
तदेव विधिशेषत्वान्निषेधस्य न विद्यते॥
[4]न त्वाकाङ्क्षाविरोधोऽत्र विद्यते सार्वधातुकम्।
यतो नैष ततस्तस्मादिति शङ्कांशभेदतः।
पराकृता तु दृष्टान्तवैषम्यं चांशसाम्यतः।
निरस्तं [5]'सर्वसाम्यस्य नियतिर्नैव तत्र हि॥"

भाव्यमानस्याप्युकारस्य सवर्णग्राहकत्वादूकारनिवृत्त्यर्थं तपरत्वमिति कथं कालान्तरप्राप्तदीर्घत्वमिह वार्यते, तत्राह — **अकारस्येति**॥

[१, ४०८–४११]

(**लघुविवरणम्**) बहुव्रीहौ [6]"निष्ठा' इति सूत्रेण विकृतशब्दस्य पूर्वनिपातः प्राप्नोतीत्यत आह — **तृतीयासमास इति**। ननु छिन्ने पुच्छे श्वत्वजातेरभिव्यञ्जकाभावात् कथं श्वेत्यवगमः, अत आह — **छिन्नेऽपीति**। ननु दृष्टत्वादेव शिष्टावयवसंनिवेशस्य [7]श्वत्वजात्यभिव्यञ्जकत्वमस्तु, तकारस्य तु न तिङत्वाभिव्यञ्जकत्वं दृष्टम्, अत आह — **तथा चेति**। 'नाश्वः' इति भाष्यमनुपपन्नम्, अश्व इति तत्र संकेतेऽश्वो भवत्येव, तत्राह — [8]'**न तस्य जात्यन्तरेणेति**। [9]'नन्वनित्यत्वदोष उपसंख्यानेऽपि तुल्य इत्यत आह — **उपसंख्याने त्विति**। उकारादय आदेशा एवेत्यत आह — **तुशब्दादय इति**। नन्वानुमानिकादेशत्वं तत्रास्त्येवेत्यत आह — **एरुरिति**। भाष्ये **पचत्विति**। अस्यानन्तरम् 'इमेऽपि' इत्यनेनोकारादयो निर्दिश्यन्ते। नासावाश्रीयत इत्यत एव स्थानिवद्भावः प्रार्थ्यत इत्यत आह — **सा हीति**। ततश्चोकारस्य स्थानिवत्त्वेऽपि न पदसंज्ञा सिध्यतीति भावः। 'यत्र प्राधान्येन' इति भाष्यमनुपपन्नम्, इड्विधौ वृलः प्राधान्येनाश्रयणाभावात् प्रदीव्येत्यादौ 'अनल्विधौ' इति [10]'प्रतिषेधाप्रसङ्गात्, अत आह — **यत्रेति**॥

---

[1] उणादिसूत्रम् २०४.
[2] ज्ञातुमशक्यत्वात् — ति.
[3] दृष्टत्वात् — क.
[4] नन्वाकाङ्क्षाविरोधेऽत्र — क; नन्वाकाङ्क्षाविधेरत्र — ति.
[5] सर्वसाम्येऽस्य — ति.
[6] पा. सू. २. २. ३६.
[7] श्वत्वजातेरभिव्यञ्जकत्वम् — ड, ढ.
[8] नास्य — ढ.
[9] नन्वनित्यदोषः — ण.
[10] प्रतिषेधाभावात् — ढ.

[१, ४०८–४११]

(विवरणम्) तृतीयेति। बहुव्रीहौ [1]'निष्ठा' इति विकृतशब्दस्य पूर्वनिपातः स्यादिति भावः। अवयवविगमेऽपि श्वेति प्रत्ययप्रयोगावुपपादयति — **छिन्नेऽपीति**। कथं तकारस्य तिङ्त्वव्यञ्जकत्वम्, अदृष्टत्वादित्यत आह — **तथा चेति**। दृष्टान्तार्थम् 'अर्थ' इत्युक्तम्। ननु छिन्नावयवः श्वा अश्वगुणयोगात् संकेताद्वा अश्वो भवत्येवेत्यत आह — **अवयवेति**। **अवस्थित इति**। न च वक्तुं शक्यमिकारप्रसङ्गे उकार इति, अनर्थकत्वेन प्रसक्तार्थप्रतिपादनायेति वक्तुमशक्यत्वात्। अवयवत्वेन प्रसक्तिरिति वाच्यम्। तथा च पूर्वावयवापगमादवयवान्तरप्रादुर्भावाच्चानित्यत्वं स्यादित्यर्थः। 'स एवायम्' इति प्रत्यभिज्ञया भाष्ये नित्यत्वमुपलक्षितम्, स एवायं विकृतश्चेति नोपपद्यत इत्यन्वयः, विरोधादिति भावः। ननु विरोधपरिहाराय नित्यत्वं त्यज्यतामित्यत आह — **नित्येष्विति**। नास्त्यनित्यत्वम्, तेः प्रसङ्गे तोर्विधानादित्यन्वयः। कथमेतदित्यत आह — **एरुरितीति**। 'तस्मात्' इत्युपलक्षणमित्यभिप्रेत्याह — **तत्रेति**। कात्यायनीये उपसंख्यानमात्रम्, न हेत्वभिधानमित्यतो भाष्ये भारद्वाजीयपाठ उपक्षिप्तः। सूत्रनिर्दिष्टव्यावृत्तय आह — [2]**त्विति**। प्रत्यक्षादेशत्वं चेह निषेध्यमित्याह — **एरुरित्यत्रेति**। **यदीति**। [3]'इदमो मः' इत्यादिवदिति भावः। भाष्ये सत्यादेशत्वे स्यादुकारादेरेव स्थानिवद्भावः, तदेव नास्तीत्यनेनोक्तं मत्वादेशत्वमुकारादेर्वक्ष्यामीत्याह — **इम इति**। परस्तु स्थानिवद्भावनिमित्तमादेशत्वमनेनोक्तम्, तच्च नास्तीति गूढाभिसंधिः पृच्छति — **कथमिति**। परस्त्वर्थवतः प्रसङ्गे विधीयमानस्यादेशत्वम्, तदिकारादेरनर्थकस्य स्थाने विधीयमानस्योकारादेर्नास्तीत्यभिप्रेतं मन्वानो नायं [4]नियमोऽनर्थकस्थाने विधीयमानस्य लोपादेरादेशत्वदर्शनादित्यभिप्रेत्याह — **आदिश्यत इति**। ननु तामादेः पदसंज्ञायामाश्रीयमाणत्वाभावेऽपि स्थानिवद्भावाद्यथा पदसंज्ञाहेतुत्वम्, एवमुकारस्यापीत्यत आह — **सा होति**। [5]तेश्च नायमादेश इति भावः। स्थानिवद्भावद्वारापि नासावुकारः पदसंज्ञाहेतुत्वेनाश्रीयत इति च भाष्यार्थः। **आश्रीयत इत्यर्थ इति**। आश्रयितुमिष्यत इति यावत्। **अभीति**। समुदायस्यार्थान्तरत्वमङ्गीकृत्योक्तम्। 'अल्विधि' इति भावप्रधानमिति सूचयन्नाह — **इकारस्य पदेति**। ननु यदि यत्र प्राधान्येनालाश्रीयते तत्र 'अनल्विधौ' इति प्रतिषेधः, तर्हि प्रपठ्येतीड्विधौ न प्रतिषेधः स्यादित्यत आह — **यत्रेति**। ननु समुदायसंनिधौ नावयवस्य पृथङ्निमित्तत्वम्, यदि हि स्यात् पचतीत्यत्र तावधेरपि पदसंज्ञायां जश्त्वं स्यादित्यत उक्तम् — भाष्ये **अथवेति**॥

[१, ४०८–४११]

(उद्द्योतनम्) बहुव्रीहौ निष्ठायाः पूर्वनिपात[6]प्रसङ्गः, अत आह — **तृतीयेति**। अवयवियोगेऽपि प्रत्ययप्रयोगावुपपादयति — [7]**छिन्न इति**। तकारमात्रस्य [8]तिङ्त्वव्यञ्जकत्वमस्तीत्याह — **तथा चेति**। 'अर्थ' इति दृष्टान्तार्थम्। ननु संकेतादिना [9]'श्वा अश्वो भवत्येव, अत आह

---

[1] पा. सू. २. २. ३६.
[2] 'तुशब्दादयः' इत्यस्य प्रतीकग्रहणमिदम्।
[3] पा. सू. ७. २. १०८.
[4] नियमोऽनर्थकस्य स्थाने — ञ.
[5] ततश्च — ञ.
[6] प्रसङ्गादाह — अ, इ, ऋ.
[7] छिन्नेति — अ, म.
[8] तिङव्यञ्जकत्वम् — अ.
[9] 'श्वा' इति नास्ति — म, आ, ऋ.

— **अवयवेति**। एकदेशविकारेऽनित्यत्वमुपपादयति — **अवस्थित इति**। नन्वेकदेशविकारमङ्गीकृत्योपसंख्यानेऽपि [1]न [2]नित्यत्वनिर्वाहः, अत आह — **उपसंख्यान इति**। एकदेशविकारो यत्र श्रूयते तत्रानुमानिकादेशस्यापि स्थानिवद्भाव उपसंख्येय इति 'तस्मादुपसंख्यानम्' इति वार्तिकार्थ इत्यर्थः। नास्त्यनित्यत्वम्, तेः प्रसङ्गे तोर्विधानादित्यन्वयः। तत्र हेतुः — **एरुरिति**। **तत्र** तेस्तोर्विधाने सति। 'आदेशग्रहणात्' [3]इति भाष्यानुसारेण। कात्यानीयोपसंख्याने हेत्वनभिधानाद् भाष्ये भारद्वाजीयोपन्यासः। 'न चेमे' इति प्रत्यक्षादेशत्वनिरास इत्याह — **साक्षादिति**। अवयवविकारेऽपि क्वचिदतिदेशं विनापि तिङत्वं भविष्यतीत्याशङ्कानिरासाय — [4]**रूपान्यत्वाच्चेति**। तदुपपादयति — **यदीति**। [5]"इदमोः मः' इत्यादिवदिति भावः। यद्यपि 'अनादेशत्वात्' इत्यनेन प्रत्यक्षादेशत्वं तोर्निरस्तम्, तथाप्युकारमात्रस्यादेशत्वं निरस्तमिति मत्वाह —भाष्ये **इमेऽपीति**। प्रश्नपूर्वकं तदुपपादयति–भाष्ये **कथमिति**। ननु यथा णलादेः पदसंज्ञायामनाश्रीयमाणस्यापि स्थानिवद्भावात् पदसंज्ञाहेतुत्वं, तथोकारस्यापि, अत आह — **सा होति**। [6]**न त्विति**। तथा चोकारः स्थानिवद्भावेनापि न पदसंज्ञाहेतुत्वेनाश्रित इत्यर्थः। समुदायाश्रयणमाह — **तिबिति**। भाष्ये 'आश्रय इति चेत्' इत्यत्र आश्रीयत इत्याश्रयः। आश्रयिष्यत इति चेदिति यावत्। ननु यत्र प्राधान्येनालाश्रीयते तत्रानल्विधाविति प्रतिषेधश्चेत् प्रपठचेत्यादाविट्प्रतिषेधो न स्यात्, तत्र वल आर्धधातुकविशेषणत्वेन प्राधान्याभावात्, अत आह — **यत्रेति**। ननु समुदायसंनिधौ यद्यवयवस्यापि पृथङ्निमित्तत्वं तदा पचतीत्यत्र तावधेरपि पदसंज्ञायां जश्त्वं स्यात्, अतो भाष्ये — **अथ वेति**॥

[१, ४०८ – ४११]

(रत्नप्रकाशः) **एकदेशविकृतस्येति**। अवयवेनान्यथाभूतस्येत्यर्थः। **उपसंख्यानमिति**। 'एकदेशविकृतः प्रकृतिवत्' इति वक्तव्यमित्यर्थः। तस्य वचनस्य 'एकदेशविकृतः प्रकृतिवत् अनल्विधाववर्तमानां संज्ञां लभते' इत्यर्थो भविष्यतीति भावः। **एकदेशविकृतस्यानन्यत्वादिति**। प्रक्रियादशायामेकदेशविकाराङ्गीकारेऽपि न शब्दानां शास्त्रनिर्वर्त्यत्वमिति भावः। उपसंख्यानवाद्याह — **अनित्यविज्ञानं त्विति**। **तस्मादुपसंख्यानमिति**। यस्मादेकदेशविकृतस्यानन्यत्वेऽङ्गीक्रियमाणे शब्दानामनित्यत्वं प्रसज्यते तस्मान्नित्यत्वानुसारेणोपसंख्यानमेवाश्रयणीयम्। तदाश्रयणे तु [7]'एरुः' इत्यनेन तिशब्दप्रसङ्गे तुशब्दः साधुरिति बोधितमिति न नित्यत्वहानिरिति मन्यते। तदापादितमनित्यत्वदूषणमकिंचित्करमिति तस्योत्तरमदत्त्वा भारद्वाजीयैर्दत्तं दूषणं दृढमिति कृत्वा तत्रोपायान्तरं वक्तुं तन्मतमनुवदति — **भारद्वाजीया इत्यादिना**। **इम इति**। तुप्रभृतयः। ननु तुप्रभृतीनामादेशत्वात् तिङादिसंज्ञा भवतीति नोच्यते, किं त्वेकदेशविकारेऽपि तिप्रभृतिरेवायमित्युपलम्भात् तिङादिसंज्ञास्त्येव तत्रेत्याश्रीयत इत्यत आह — **रूपान्यत्वाच्चेति**। शुनः पुच्छे छिन्नेऽप्यवशिष्टांशेन श्वत्वजातिरभिव्यज्यत इति युज्यते, तथैवानुभवात्। प्रकृते तुशब्दादौ तिप्रभृतिबुद्धिर्न जायते कस्यापीति तिप्रभृतिरेव स इति वक्तुं [न]

---

[1] 'न' इति नास्ति — इ.
[2] 'नित्यत्व' इति नास्ति — म.
[3] इत्येतदित्यर्थः।
[4] अवयवान्यत्वाच्चेति — इ.
[5] पा. सू. ७. २. १०८.
[6] प्रदीपे 'नावयवनिबन्धना' इत्यत्र 'न त्ववयवनिबन्धना' इति पाठोऽन्नंभट्टस्येति प्रतीयते।
[7] पा. सू. ३. ४. ८६.

शक्यत इति भावः। एतेन 'तद्यथा' इति [1]प्रतीकगतं 'पचत्वित्यत्रेकारस्य विकारेऽपि तकारस्तिङ्त्वस्य व्यञ्जकः' इति निरस्तम्। अनुभवविरोधात्। प्रकृतप्रतीकगतस्वग्रन्थविरोधाच्च। अत एव "तथा चेकारलोपेऽपि 'अपचत्' इति तकारमात्रस्य तिङत्वमर्थप्रतीतिहेतुत्वं चास्ति" इत्यपि निरस्तम्। अनधीतव्याकरणैरपि 'पचतु' इत्याद्यर्थो बुध्यत इति कृत्वा व्याकरणस्यानर्थक्यापत्तेः। इदानीं भारद्वाजीयदत्तं दूषणं युक्तियुक्तमित्यभ्युपगम्यैव 'एकदेशविकृतेषूपसंख्यानम्' इति तदीयं वचनं विनैव स्थानिवत्सूत्रेणैव 'पचतु' इत्यादौ पदसंज्ञा साधयितुं शक्यत इत्याशयेनाह — **इमेऽप्यादेशा इति**। तुप्रभृतय आदेशा मा भूवन्, इम एवोकारादय आदेशा भवन्तु। तावतैवेष्टं सिध्यतीति भावः। एकदेशविकारेऽभ्युपगम्यमानेऽनित्यता स्यादित्याशयेन पृच्छति — **कथमिति**। उकारादीनामादेशत्वमुपपद्यत इति शेषः। प्रक्रियादशायां काल्पनिकैकदेशविकारादिस्वीकारमात्रेण न शब्दानामनित्यतेत्याशयेन समाधत्ते — [2]**आदिश्यन्त इति**। य आदिश्यन्ते त आदेशाः, न त्वर्थवत्पर्यन्तानुधावनमिति भावः। **योऽत्रादेशः** उकारः। **नासावाश्रीयत इति**। पदसंज्ञायामिति शेषः। **यश्चाश्रीयत इति**। तुशब्दादिः। समाधत्ते — **नैतदिति**। उकारादय इकारादिसंज्ञां लभन्त इति तुप्रभृतेस्तिप्रभृतिशब्देन ग्रहणात् सर्वेष्टसिद्धिरिति भावः। एतेन "[3]'तिप्तस्झि' इति तिप्संनिवेशे इकारतकारावपि संनिविष्टावितीकारस्य तिङत्वात् तदादेशस्याप्युकारस्य तिङत्वमिति सिद्धा पदसंज्ञा" इति निरस्तम्। समुदायप्रधाने निर्देशेऽवयवानामप्राधान्यात् [4]"प्रधानाप्रधानयोः प्रधाने कार्यसंप्रत्ययः' इति नियमेन तिबाद्यवयवानां तिङादिसंज्ञायोगात्। तकारादेरपि तिङत्वे तदन्तस्यापि पदत्वापत्तौ जश्त्वाद्यापत्तेः। इकारस्य तिङत्वेऽपि तस्य तकारान्ताद्विहितत्वाभावेन यस्मात् सुप्तिङौ विहितौ तदादि तदन्तं पदमिति विहितत्वघटिता पदसंज्ञेकारान्तस्यैव न प्राप्तेत्युकारान्तेऽप्यप्राप्तेश्च। **अल्विधिप्रसङ्ग इति**। इत्वस्य वर्णसमुदायावृत्तितया वर्णमात्रवृत्तित्वादल्विधित्वमिति भावः। **नैवं [सति] कश्चिदप्यनल्विधिरिति**। 'अनल्विधौ कर्तव्ये' इति पूर्वपक्ष्यभिमतसूत्रार्थाभिप्रायेणेदम्। **यत्र प्राधान्येनेति**। [5]"इको यणचि' इत्यादौ। तथा च सिद्धान्त्यभिमतसूत्रार्थपक्षेऽप्युकारादेः प्राधान्येन पदसंज्ञादावनाश्रयणात् 'अनल्विधौ' इति निषेधो न भविष्यतीति भावः। ननु विधिग्रहणसामर्थ्यादप्राधान्येनाप्यल आश्रयणे 'अनल्विधौ' इति निषेधो भवतीत्येतस्याप्ययुक्तत्वादित्याशयेनाह — **अथवेति**। तथा च प्राधान्येनाप्राधान्येन वा योऽत्र विधिरलमाश्रयते तस्य च विधावाश्रयणं चेच्छब्दतः, तत्र 'अनल्विधौ' इति निषेधो भवति। शब्दतोऽनाश्रयणे न निषेधः। 'पचतु' इत्यादाविकारादेरिकारादिशब्देन विशेषणसमर्पकेण वा विशेष्यसमर्पकशब्देन वानाश्रयणात् स निषेधो नेति भावः। **आदेशमात्रमिति**। आश्रीयमाणमनाश्रीयमाणं चेत्यर्थः। एतेन 'प्रत्यक्षमानुमानिकं चेत्यर्थः' इति निरस्तम्। 'योऽत्रादेशो नासावाश्रीयते यश्चाश्रीयते नासावादेशः' इति भाष्येण स्वकृततद्व्याख्यानेन च विरोधात्॥

[१, ४०८–४११]

(नारायणीयम्) बहुव्रीहौ कर्मधारये च विकृतशब्दस्य पूर्वनिपातप्रसङ्गः, स्थानिवद्भावोप-

---

[1] प्रतीकगतः — ब.

[2] भाष्ये 'आदिश्यते यः स आदेशः' इत्यत्र 'आदिश्यन्ते ये त आदेशाः' इति रत्नप्रकाशकृत्पाठ इति भाति।

[3] पा. सू. ३. ४. ७८.

[4] परिभाषा १०६.

[5] पा. सू. ६. १. ७७.

संख्यानानुपपत्तिश्च। [1]तत्र ह्येकदेशे विकारः। तत्र किमेकदेशस्यैव स्थानिवद्भाव उपसंख्यायते, समुदायस्य वा। नाद्यः, प्रयोजनाभावात्, अनुक्तसिद्धत्वाच्च। न द्वितीयः, अनादेशत्वात्। [2]न चानादेशस्यापि वचनात् स्थानिवद्भावः, [3]समुदायस्यास्थानित्वात्, अवयववद्भावविधौ फलाभावात्। तस्मादेकदेशद्वारेण य आदेश आनुमानिकस्तस्येदमुपसंख्यानमित्याह — **एकदेशेनेति**। कथमभिव्यञ्जकनाशेऽभिव्यङ्ग्यधारीत्याशङ्क्याभिव्यञ्जकस्यान्यस्य सत्त्वादित्याह — **छिन्न इति**। ननु जात्यभिव्यञ्जकानामेकतरापगमेऽपि[4] परिशिष्टाज्जातिवीरस्तु। तिङ्संज्ञा तु समुदायनिवेशिनी तत्समुदायभिन्ने कथमस्मिन् स्यात्, अत आह — **एवमिति**। घुसंज्ञासूत्रे 'लब्धात्मकस्य भावस्य' इति ग्रन्थे प्राग् लब्धो व्यपदेशस्तत्समुदायान्यथात्वेऽपि न निवर्तत इति प्रतिपादितम्। **तकार इति**। तकारावस्थितिः समुदाये तिङ्त्वाभिव्यक्तौ कारणमित्यर्थः। [5]न तु तकारमात्रे तिङ्त्वमिहेष्टम्। अत्राविगीतदृष्टान्ततयाह — **तथा चेति**। [6]यथार्थबोधनं धर्मः समुदायस्य [7]सन्नपि परिशिष्टे [8]परिक्रान्तः, तथा तिङ्त्वस्य संक्रमः। अवयवविकारेऽपि तज्जात्यभिव्यक्तिर्वक्तव्या, न तु जात्यन्तरानभिव्यक्तिः, अप्रस्तुतत्वादित्याशङ्क्य व्यतिरेकमुखेन तज्जात्यभिव्यक्तिरनेन दृढीक्रियत इत्याह — **अवयवेति**। उपसंख्यानवादिनः कथं नानित्यत्वम्, न्यायतः [9]सिद्धिवादिनश्च कथमनित्यत्वम्, अत आह — **अवस्थित इति**। प्रागादेशग्रहणेन साधितस्योपसंख्यानेनेदानीं साधनादादेशग्रहणस्य [10]तत्फलासाधकत्वं किमित्यत आह — **तत्रेति**। 'न चेमे' इति ग्रन्थे उकारादीनामादेशत्वं निषिध्यते, उत तुशब्दादीनाम्। नाद्यः, तेषामादेशत्वस्य प्रत्यक्ष-
[त्वात्। नान्त्यः, उकारद्वारा तेषामप्यानुमानिकादेशत्वाङ्गीकारादित्याशङ्क्य प्रत्यक्षादेश]स्य स्थानिवद्भावप्रयोजकत्वं, प्रत्यक्षादेशत्वं च तुशब्दादिषु निषिध्यत इत्याह — **तुशब्दादय इति**। चकारात् स्थानिवत्त्वाभावे हेत्वन्तरमुपन्यस्यत इति भाति। तदयुक्तम्, रूपान्यत्वस्य स्थानिवद्भावविघातकत्वाभावादित्याशङ्क्य, मास्तु स्थानिवद्भावः, प्रत्यभिज्ञानादेव तिङ्त्वं भविष्यतीति शङ्कानिराकरणार्थमेतदित्याह — **यदीति**। [11]यद्यप्येकदेशविकारस्य रूपान्यत्वं नास्तीत्युक्तं, तथाप्यनुभवविरुद्धमनन्यत्वानुमानमिति भावः। न हि कश्चित् [12]तिशब्दे तुशब्दत्वमनुभवति। 'इमेऽपि' इति भाष्यस्यानुमानिकादेशत्वं तुशब्दादीनामप्यस्तीत्यर्थः। आदेशग्रहणाद्धि तस्यापि स्थानिवत्त्वेन भाव्यम्। अविदिताभिप्रायस्योत्तरम् — **आदेशः स्थानिवदिति चेदिति**। तद्व्याख्यानं व्याचष्टे — **इकारस्येति**। तस्य हि तथात्वं प्रत्यक्षम्। 'नैतत्' इत्यादेः पूर्वशेषत्वं निरस्यति — **अत्रेति**। ननु तदभ्यन्तरत्वमात्रे कथमवयवस्य तिङ्संज्ञा, समुदाये तस्या निवेशनात्, अत आह — [13]**तिबिति**। ननु [14]पूर्वमुक्तम् 'सकारावस्थितिसमये नैव लब्धाकारेण प्रत्ययसंज्ञा' इति, इह पुनरुच्यते 'अवयवस्यापि तिङ्त्वम्' इति। नैष दोषः, इह काश्चित् संज्ञा अक्तपरिमाणनिवेशिन्यः, यथा-अङ्गभपद-

---

[1] तत्र ह्येकदेशविकारः — क; तत्र ह्येकदेशविकारस्वीकारः — ति.
[2] न चादेशस्यापि — क.
[3] समुदायस्यास्थानिवत्त्वात् — क.
[4] एकतमापगमेऽपीति युक्तम्।
[5] ननु तकारमात्रे — क.
[6] यथा तु बोधनं — ति.
[7] सदपि — ति.
[8] संक्रान्त इत्यर्थः।
[9] सिद्धवादिनः — क.
[10] तत्फलसाधकत्वं — क.
[11] यद्येकदेश — क.
[12] 'तुशब्दे तिशब्दत्वमनुभवति' इत्युचितं भाति।
[13] तिङिति — ति.
[14] उरण् रपर इति सूत्रे 'मातुः करोतीत्यत्राप्रत्ययविर्जनीयस्येति षत्वं प्राप्नोति' इत्यत्र प्रदीप उक्तम्।

संज्ञाः [1]'यस्मात् प्रत्ययविधिः' इति वचनात् प्रत्ययसंज्ञाविशिष्टावधौ[2] प्रवर्तन्ते। अर्थप्रत्याय-ननिमित्ता हि सा। तिङ्संज्ञा तु संनिवेशमात्राश्रया। संनिवेशोऽवयवानामविशिष्टः समुदायेनेति सावयवेऽप्यविरुद्धा। यद्येवं 'भवसि' इत्यादौ सान्तावधेः पदसंज्ञायां रुत्वादिप्रसङ्गः। नैष दोषः, समुदायस्य कार्यप्रयोजकत्वेऽवयवानां कार्याप्रयोजकत्वात्। इह तु समुदायाप्रयोजकत्वादवयव-प्रयोजकता। वस्तुतस्त्वादेशग्रहणादभिमतसिद्धिरित्येव युक्तम्। पदसंज्ञायामलोऽसाधारणाकार-स्यानाश्रयणात् कथमल्विधिः पदसंज्ञा, अत आह — **इकारस्येति**। अस्ति वास्तवमलाश्रयत्वम्, नेह कश्चिन्निषेधविशेष उपात्त इति भावः। 'नैवं सति' इति भाष्ये विधेर्निर्विषयत्वापत्तेर्विशेष-लाभ[3] इत्युक्तम्। तत्र प्राधान्येन साक्षात्त्वं लक्ष्यम्, अन्यथा गुणभावेनालाश्रयणेऽपि निषेधार्थं विधिग्रहणमित्येतद्विरोधापत्तेरित्यभिसंधायाह — **यत्रेति**। भवतु सकलस्यादेशस्यादेशग्रहणात् स्थानिवत्त्वम्, आदेशत्वं त्वस्य नास्तीत्युक्तम् 'योऽसौ' इति ग्रन्थे, अत आह — **आनुमानिकमिति**॥

[१, ४११–४१४]

(लघुविवरणम्) 'कार्या बुद्धिः' इत्यनुपपन्नम्, न हि बुद्धिपर्यायत्वेन कार्यशब्दो दृष्टचर इत्यत आह — **अन्यस्येति**। ननु ह्रस्वत्वमौत्तरपदिकं ङ्याप्नोः संज्ञाछन्दसोरेवेत्यत आह — **बहुलग्रहणादिति**। 'प्राचीनं ग्रामात्' इत्यनुपपन्नम्, प्राचीन इति [4]सप्तमीनिर्देशस्य न्याय्यत्वा-दित्यत आह — **तत्रेति**। प्रतियोग्यपेक्षायामाह — **तस्या इति**। 'अपवादप्रसङ्गस्तु' इत्यनुप-पन्नम्, न ह्युत्सर्गस्यापवाद आदेश इत्यत आह — **बुद्धीति**। ननु यदि षष्ठीनिर्दिष्टस्यादेशः स्थानि-वत् कथं तर्हि [5]'नाभि नभं च' इति नाभिशब्दस्य नभभावे स्थानिवत्त्वादङ्गसंज्ञा, तदभावे वा कथं [6]'यस्य' इति लोप इत्यत आह — **नाभीति**। **प्रथमाया इति**। व्यत्ययेनेति भावः। यत्र तर्हि योग्यः स्थानी [न] [7]उपलभ्यते तत्र कथमित्यत आह — **विश्रवणेति**। यदि विश्रवश्शब्दस्य विश्रवणादेशो न विधीयते ततो विश्रवश्शब्दादपि प्रत्ययोत्पत्तिप्रसङ्ग इत्यत आह — **विश्रवश्शब्दात्त्विति। श्यनो नित्त्वादिति**। नित्त्वं ह्याद्युदात्तार्थं कृतम्। यदि च[8] स्था-निवद्भावात् पित्त्वं स्यात् ततो विकरणस्य पित्त्वादनुदात्तत्वे लसार्वधातुकस्य [9]'तास्यनुदात्तेत्' इति सूत्रेणानुदात्तत्वे पारिशेष्याद् धातुस्वरेणैवाद्युदात्तत्वं सिद्धम्। न च दिवादिष्वनेकाचो धातवः सन्ति, यतो धातुस्वरेणान्तोदात्तत्वप्राप्तौ नित्त्वमाद्युदात्तार्थं स्यात्। एतदेवाभिप्रेत्योक्तम् — **न हीति। चानशीति**। अत्र हि लसार्वधातुकत्वाभावात् लसार्वधातुकानुदात्तत्वाभावात् [10]'चितः' इत्यन्तोदात्तत्वं स्यात्। तन्निवृत्तये नित्त्वमिति भावः॥

[१, ४११ – ४१४]

(विवरणम्) सर्वविकार इति। [11]'अस्तेर्भूः' इत्यादौ। न 'सोमस्य स्थाने' इति 'दर्भाणां

---

[1] पा. सू. १. ४. १३.
[2] विशिष्टा विधौ प्रवर्तते — क.
[3] विशेषालाभः — क.
[4] सप्तम्या निर्देशस्य — ड, ढ.
[5] उगवादिभ्यो यदिति सूत्रीयगवादिगणसूत्रम्।
[6] पा. सू. ६. ४. १४८.
[7] लभ्यते — ड, ढ.
[8] चशब्दो नास्ति — ड, ढ.
[9] पा. सू. ६. १. १८६.
[10] पा. सू. ६. १. १६३.
[11] पा. सू. २. ४. ५२.

स्थाने शरैः' इतिवदित्याह—**तदिति**। नित्यस्यावश्यकर्तव्यत्वात् प्रारब्धस्य चावश्यपरिसमापनीयत्वादिति भावः। **अन्यस्येति**। प्रकृत इति भावः। न च्छान्दसं ह्रस्वत्वमित्याह — **बहुलेति**। भूतपूर्वे [1]हि स्थानशब्दो निवृत्तिवचनः स्यात्। तथा च शब्दनित्यत्वविरोध[2] इत्यत आह — **न चेति**। नन्वाम्राणामधिकरणापेक्षायां [3]'प्राचीनम्' इत्युक्तम्। तत्र सप्तमीनिर्देशो न्याय्य इत्यत आह — **प्राचीति**। सप्तम्यन्तादुत्पन्नस्यास्तातेः [4]'अञ्चेर्लुक्' इति लुक्। सप्तम्यर्थस्याभिहितत्वान्माभूत् सप्तमी, प्रथमा तु कथमित्यत आह — **अन्तरिति**। 'आम्रबुद्ध्या' इति तृतीया षष्ठी वा। आद्ये प्रतिपत्तिर्विषयीकारः प्राप्तिर्वा। नाद्यः, अन्यविषयबुद्धेरन्यविषयत्वायोगात्। नापि द्वितीयः, व्याप्यव्यापकभावे ह्याम्रन्यग्रोधयोराम्रबुद्ध्या न्यग्रोधबुद्धिः स्यात्, न च सोऽस्तीति प्रकृतासंगतिश्च। पक्षद्वयेऽपि षष्ठी उपात्तस्य प्रतियोगित्वायोगादनुपपन्नेत्यत आह — **तस्या इति**। ननूत्सर्गापवादयोः स्थान्यादेशभावाभावात् कथं [4]'स्थानिवत्त्वमित्यत आह — **बुद्धीति**। **अण्कृतेति**। युग्ङीपोः प्रसङ्ग इत्यर्थः। विषयशब्देनापवादोऽभिप्रेतः। तेन युक्तपृथग्लिङ्गकरणादित्यर्थ [5]'इहाभिमतः। अनुबन्धोपलक्षितस्याभिन्नरूपत्वे [6]'एतदभिहितम् [7]'अइउण्' इत्यत्र। कथमेतद्भिन्नरूपेष्वप्युत्सर्गापवादेषु स्यादित्यतः पूर्वपक्षमेव स्थितं कृत्वा वार्तिककृता 'सिद्धं तु' इत्युक्तम्। भाष्यकारस्तु केषुचिच्चोद्यस्य परिहर्तुं शक्यत्वादुक्तप्रकारेण पूर्वः परिहारोऽव्यापक इत्यपरितोषेणोत्तर[8]परिहारावतरणसंभवात् पूर्वपरिहारं स्थितं कृत्वा तुशब्दं विकल्पार्थमाख्यत्। षष्ठीग्रहणस्यानुवर्तमानस्य षष्ठ्यन्ततया विपरिणामादुपात्तेन [9]'च तन्निर्दिष्टस्य लक्षणाप्रसङ्गात् तत्राप्यपरितोषात् 'अथ वाचार्य' इत्युवाच। ननु यदि षष्ठीनिर्दिष्टस्यादेशः स्थानिवदित्युच्यते कथं तर्हि [10]'नाभि नभं च' इति यत्प्रत्ययसंनियोगेन विहितनभभावस्य भसंज्ञा। तदभावे वा कथं [11]'यस्य' इति लोप इत्यत आह — **नाभीति**। **षष्ठ्या इति**। व्यत्ययेनेति भावः। यत्र तर्हि योग्यस्थान्यनुमीयते तत्र कथमित्यत आह — **विश्रवणेति**। **प्रत्ययविषयमिति**। शिवाद्यण्विषयमित्यर्थः। वालवायशब्दो विदूरभावमापद्यते, अथवा वालवायस्य वाचकोऽन्य एव विदूरशब्दो ञ्यप्रत्ययविषय इत्यर्थः। यदि विश्रवश्शब्दस्य विश्रवणरवणावादेशौ न विधीयेते ततो [12]विश्रवश्शब्दादपत्यप्रत्ययोत्पत्तिप्रसङ्ग [13]इत्यत आह — **विश्रव इति**। **श्यन इति**। कृतोपपादनमेतत् [14]'सर्वादीनि' इत्यत्र। **चानशीति**। चानशो लसार्वधातुकत्वाभावाल्लसार्वधातुकानुदात्तत्वं नास्तीति [15]'चितः' इत्यन्तोदात्तत्वं स्यात्। नित्त्वे तु परत्वात् सतिशिष्टत्वाच्च चित्स्वरं बाधित्वा [16]'ञ्नित्यादिः' इत्येतद् भविष्यतीति भावः। **सामान्येनेति**। न विकरणविषयमेवेत्यर्थः। **ज्ञापकमिति**। इष्टसिद्धये ज्ञापकमाश्रीयते न नियमार्थमित्यर्थः॥

---

[1] हिशब्दो नास्ति — छ.
[2] इत्याह — च, छ, ञ,. ट.
[3] पा. सू. ५. ३. ३०.
[4] स्थानित्वम् — ञ.
[5] इहाभिप्रेतः — ट.
[6] एतदुक्तवान् — ञ.
[7] माहेश्वरसूत्रम्. १.
[8] 'उत्तर' इति नास्ति — च, छ.
[9] चकारो नास्ति — ञ.
[10] उगवादिभ्यो यदित्यत्र गवादिगणसूत्रम्।
[11] पा. सू. ६. ४. १४८.
[12] विश्रवश्शब्दादण्प्रत्ययोत्पत्ति — ञ.
[13] इत्याह — च, छ, ञ, ट.
[14] पा. सू. १. १. २७.
[15] पा. सू. ६. १. १६३.
[16] पा. सू. ६. १. १९७.

[१, ४११ – ४१४]

(**उद्द्योतनम्**) **यत्र** यस्मिन् मते। **सर्वविकारे** "अस्तेर्भूः' इत्यादौ। चन्द्रत्वभ्रमं वारयति — **तृणेति**। 'दर्भाणां स्थाने शराः' इतिवन्न भवतीत्याह — **तदसंनिधाविति**। 'कार्या बुद्धिः' इति भाष्यं संगमयति – **अन्यस्येति**। **अत्र** प्रकृते। शब्दस्य नित्यत्वात् तद्बुद्धेरेव विपरिणामो युक्त इत्यर्थः। [२]कार्यशब्दो बुद्धिशब्दश्च पर्यायाविति केषांचिद् भ्रमं निराह — **न त्विति**। न च्छान्दसं ह्रस्वत्वमित्याह — **बहुलेति**। भूतपूर्वे स्थानशब्दो निवृत्तिवचनः, तथा च शब्दनित्यत्वविरोधः, अत आह — **न चेति**। नन्वाम्राणामधिकरणत्वेन 'प्राचीने' इति सप्तम्या भाव्यम्, अत आह — [३]**प्राग्देश इति**। [४]"दिक्छब्देभ्यः सप्तमीपञ्चमीप्रथमाभ्यो दिग्देशकालेष्वस्तातिः' इति प्राच्यामित्यर्थेऽस्तातिः। तस्य [५]'अञ्चेर्लुक्' इति लुकि प्राग्देश इत्यर्थे 'प्राक्' इति भवति। **विभाषेति**। अञ्चत्यन्तात् स्वार्थे खः स्यात्, न तु दिक्स्त्रियामिति सूत्रार्थः। सप्तम्यर्थस्याभिहितत्वान्माभूत् सप्तमी, प्रथमा कुतः, अत आह — **तदिति**। प्रातिपदिकान्तर्भूतत्वादित्यर्थः। 'बुद्धया' इति तृतीयान्तत्वे न्यग्रोधबुद्धेस्तया[६] [७]प्रतिपाद्यत्वासंभवः, षष्ठ्यन्तत्वे न्यग्रोधबुद्धेस्तद्विषयत्वासंभवः प्रकृतानुपयोगश्च, अत आह — **तस्या इति**। नन्वपवादस्योत्सर्गादेशत्वाभावात् कथमुत्सर्गकृतप्रसङ्गः, अत आह — **बुद्धीति**। **अण्कृतेति**। युग्ङीपोरपि प्रसङ्ग इत्यर्थः। विषयशब्देनापवाद उक्तः, तृतीया च व्यत्ययेन षष्ठ्यर्थ इत्यभिप्रेत्याह — **यदयमिति**। अनेनोत्सर्गापवादव्यावृत्तिरित्याह — **न चेति**। 'नाभेः' इति षष्ठ्यभावान्नभादेशस्य स्थानिवत्त्वं न स्यात्, तदभावे भसंज्ञाया अभावात् [८]"यस्य' इति लोपो न स्यात्, अत आह — **नाभीति**। **षष्ठ्या इति**। व्यत्ययेनेति भावः। यत्र तर्हि योग्यः स्थान्यनुमीयते तत्र कथम्, षष्ठ्यश्रवणात्, अत आह — **विश्रवणेति**। विश्रवश्शब्दस्य नेमावादेशौ, किं तु शिवाद्यण्[९]प्रत्ययस्यैतौ स्वतन्त्रप्रकृती इत्यर्थः। प्रकृत्यन्तरत्वे संमतिमाह — **यथेति**। [१०]वैदूर्यस्य वालवायादुत्पत्तिरङ्गीक्रियते। तत्र वालवायशब्दस्य विदूरशब्दो नादेशः, किं तु [११]"विदूराञ्ञ्यः' इति ञ्यप्रत्ययस्य विदूरशब्द एव प्रकृतिरिति यथा, तथा विश्रवणरवणयोरेवाण्प्रकृतित्वमित्यर्थः। नन्वेवं [१२]विश्रवश्शब्दादप्यण् स्यात्, अत आह — **विश्रवश्शब्दादिति**। स्थानिवद्भावेन पित्त्वस्यापि प्राप्तौ तन्निवृत्त्यर्थं शित्त्वं न ज्ञापकमित्याशङ्क्य निराकरोति — **न चेति**। [१३]ज्ञापकत्वमेवाह — **न हीति**। 'दीव्यन्ति' इत्यादौ लसार्वधातुकस्वरेण तिङोऽनुदात्तत्वात् श्यनोऽपि पित्त्वेनानुदात्तत्वाद् धातुस्वरेणैवाद्युदात्तत्वसिद्धेर्नित्करणं व्यर्थं सत् पित्त्वाभावं ज्ञापयतीत्यर्थः। एतद् दूषयति — **तदयुक्तमिति**। **चानशीति**। 'दीव्यमानः' इत्यत्र चानशो लसार्वधातुकत्वाभावेनानुदात्तत्वाभावात् चित्स्वरेणान्तोदात्तत्वं स्यात्। नित्त्वे तु परत्वात् सति शिष्टत्वाच्च चित्स्वरं बाधित्वा [१४]"ञ्नित्यादिर्नित्यम्'

---

[१] पा. सू. २. ४. ५२.

[२] कार्यशब्दः — अ, इ, ऋ.

[३] प्रदीपे 'प्राचि देशे' इत्यस्य स्थाने 'प्राग्देशे' इत्यन्नंभट्टपाठ इति भाति।

[४] पा. सू. ५. ३. २७.

[५] पा. सू. ५. ३. ३०.

[६] 'तया' इत्यादि 'षष्ठ्यन्तत्वे न्यग्रोधबुद्धेः' इत्यन्तं नास्ति — इ.

[७] प्रतिपाद्यत्वस्यासंभवः — अ.

[८] पा. सू. ६. ४. १४८.

[९] प्रत्ययस्यैते स्वतन्त्र — आ.

[१०] वैदूर्यशब्दस्य — म, आ.

[११] पा. सू. ४. ३. ८४.

[१२] विश्रवश्शब्दादण् — अ.

[१३] ज्ञापकमेवाह — अ.

[१४] पा. सू. ६. १. १९७.

इत्याद्युदात्तत्वं भवतीत्यर्थः। तर्हि[1] 'पित्त्वनिवृत्त्यर्थं शित्त्वं न ज्ञापकम्' इत्यस्य कः परिहारः, अत आह — **तस्मादिति**। यस्मान्नित्त्वं न पित्त्वनिवृत्त्यर्थं तस्मादित्यर्थः। **इष्टेति**। इष्टसिद्ध्यर्थं ज्ञापकत्वमेवाश्रीयते न नियमार्थत्वम्, अनुपयोगादित्यर्थः। **सामान्येन** न विकरणमात्रविषयमित्यर्थः॥

[१, ४११–४१४]

(**रत्नप्रकाशः**) विचारान्तरमारभते — **अनुपपन्नमिति**। **सोमस्येति**। 'सोमेन यजेत' इति यागसाधनतयोपदिष्टस्यौषधिविशेषस्येत्यर्थः। **पूतीकतृणानि** पर्णकण्टकशून्यानि स्नुहीसदृशानि। ननु मुख्यासंनिधौ तत्सदृशस्य प्रतिनिधिरुपपद्यते। अत्र तु मुख्यसंनिधावसदृशस्य प्रतिनिधिरिति महद्वैषम्यमित्यस्वरसादाह — **कार्यविपरिणामाद्वेति**। **सन्तीति**। [2]'ङ्यापोः संज्ञाछन्दसोर्बहुलम्' इति बहुलग्रहणादिति भावः। **परिहारान्तरमेवेदमिति**। यद्यपि 'अभूतपूर्वेष्वपि [3]स्थानशब्दप्रयोगात् सिद्धम्' इति परिहारापेक्षं 'कार्यविपरिणामाद्वा सिद्धम्' इति परिहारान्तरं भवतीति स्पष्टमेव ज्ञायते, तथाप्यभूतपूर्वे [4]स्थानशब्दप्रयोगमाश्रित्यैव प्रतिनिध्यसंभवात् 'बुद्धिविपरिणामात्' इति परिहार उक्त इति न ज्ञेयम्। किं तु 'भूतपूर्वे [5]स्थानशब्दो वर्तते' इति पक्षेऽप्ययं परिहार उपपन्न इत्याशयेनेदमुक्तमिति नास्यानर्थक्यम्। **कथमिति**। कथं तत्पक्षे नित्येषु स्थान्यादेशभाव उपपाद्यत इति भावः। **बुद्ध्येति**। तदुपपाद्यत इति शेषः। तदेव प्रदर्शयति — **तद्यथेति**। **प्राचीनमिति**। प्राचि देश इत्यर्थः। प्राक्शब्दप्रकृतिकात् सप्तम्यन्तादस्तातिप्रत्ययः। तस्य [6]'अञ्चेर्लुक्' ततः [7]'विभाषाञ्चेरदिक्स्त्रियाम्' इति स्वार्थे खः। तत्र सप्तम्यर्थस्यान्तर्भूतत्वात् प्रातिपदिकार्थमात्रे प्रथमा। **तस्येति**। यं प्रति वाक्यप्रयोगस्तस्येत्यर्थः। सर्वत्र प्राचि वर्तमानेषु सर्वेषु वृक्षेष्वित्यर्थः। **अवरोहवन्त इति**। **अवरोहाः** जटाः। **तत्र** प्राग्गतवृक्षेषु। **आम्रबुद्ध्या इति**। अनन्तरमिति शेषः। **अपकृष्यमाणानिति**। आम्रबुद्ध्या तेऽन्तःकरणनिविष्टाः सूक्ष्मरूपेण स्थिता इत्येतदुपपत्तिः। बुद्धिविपरिणाममात्रेण स्थान्यादेशभावाश्रयणे उत्सर्गापवादयोरपि स्थान्यादेशभावप्रसक्तौ दोषमाह — **अपवादप्रसङ्गस्त्विति**। **उक्तं वेति**। [8]'अइउण्' इत्यत्र। पूर्वपक्षाभिप्रायेणैकव्यक्तिपक्ष उद्भावितः। अत एवास्वरसात् समाधानान्तरमाह — — **अथवेति**। [9]'नाभि नभं च' इत्यादौ षष्ठीनिर्देशाभावादनुपपन्नं षष्ठीनिर्दिष्टस्य स्थानिवद्वचनमित्यस्वरसादाह — **अथवेति**। ननु शित्करणं नियमार्थं भविष्यति — [10]'शिदेव न पिदित्येवमिति चेन्न, विधिनियमसंभवे विधेरेव ज्यायस्त्वेन तस्य तज्ज्ञापकत्वे प्रौढ्यापत्तेः। एवमत्र [11]'आतोऽनुपसर्गे कः' इत्यस्यापवादे गापोष्टकि कित्करणमपि ज्ञापकं बोध्यम्॥

---

[1] 'तर्हि पित्त्व' इत्यादि 'विकरणमात्रविषयमित्यर्थः' इत्यन्तं नास्ति — इ.
[2] पा. सू. ६. ३. ६३.
[3] स्थानिशब्द — ब.
[4] स्थानिशब्द — ब.
[5] स्थानिशब्दः — ब.
[6] पा. सू. ५. ३. ३०.
[7] पा. सू. ५. ४. ८.
[8] माहेश्वरसूत्रम्. १.
[9] उगवादिभ्यो यदित्यत्र गवादिगणसूत्रम्।
[10] शित एव न पित इत्येवमिति — ब.
[11] पा. सू. ३. २. ३.

[१, ४११–४१४]

(**नारायणीयम्**) किं प्रस्तुतविचारविषये एतदनुपपत्तिचोदनम्, उतादेशमात्रविषये। नाद्यः, [1]'एरुः' इत्यत्र तेस्त्वादेशस्वीकरणादेकदेशविकारप्रयुक्तानित्यताशङ्कानुपपत्तेः। नान्त्यः, तत्रानित्यताशङ्कानिमित्ताभावादित्याशङ्क्य निमित्ताभावोऽसिद्ध इत्याह — **एकदेशेति**। भूतपूर्वत्वाभावं विशदयति — **तदिति**। संप्रत्ययादिशब्दवत् किं कार्यशब्दोऽपि बुद्धिपर्यायः, नेत्याह — **अन्यस्येति**। नन्वौत्तरपदिकस्ह्रस्वत्वस्य किमिह लक्षणम्। [2]'ङ्याप्पोः' इति चेत् संज्ञाच्छन्दसोस्तत्', तत्राह — **ङीति**। भूतपूर्वेऽपि स्थानशब्दमङ्गीकृत्यायं परिहार इत्युक्तम्। तत्र चानित्यताविरोधपरिहाराय बुद्धिविपरिणामः। तत्र [3]'अस्तेः' इत्यादिनिर्देशेनास्त्यादीनां विपरिणामः प्रतिभासते, न बुद्धेरित्यत्राह — **न चेति**। आम्राणामाधारापेक्षत्वात् तदावेदकविभक्तिनिर्देशः कार्य [4]इत्यत्राह — **प्राचीति**। तृतीयापञ्चमीभ्रमनिरासेन षष्ठ्या उचितमर्थमाह — **तस्या इति**। स्थानिवत्त्वद्योतकषष्ठ्यभावात् कथमिहातिप्रसङ्गः, तत्राह — **बुद्धीति**। कदाचिदप्याकारान्तादणोऽभावाद् बुद्धेरपि कथं प्रसङ्गः, तत्राह — **कर्मणीति**। न्यग्रोधविषये कदाचिदप्याम्राणामदर्शनेऽप्यौपदेशिकप्रसक्तिवदत्रापि प्रसक्तिरित्यर्थः। [5]'न ह्ययं शल्यकवत्' इति ग्रन्थे नानालिङ्ग[6]करणज्ञापकत्वस्य दूषितत्वादाह — **तुशब्द इति**। अपवादस्थलेऽपि षष्ठ्यर्थाक्षेपमाशङ्क्याह — **न चेति**। [7]लौकिकन्यायाद्विशेषविधिविषये सामान्यविधिनिवृत्त्युपपत्तेर्नास्त्याक्षेपः। आक्षेपे च कुतः षष्ठीनिर्देशः। अस्य यत्नस्याव्याप्तिमाशङ्क्याह — **नाभीति**। सति स्थानिवत्त्वे 'नभ्यम्' इत्यङ्गत्वात् [8]'यस्य' इति लोपः। शब्दस्वरूपापेक्षया च नपुंसकप्रथमान्तमिति भावः। यत्र तर्हि स्थान्यनिर्दिष्टोऽप्याक्षिप्यते तत्राव्याप्तिः, अत आह — **विश्रवणेति**। नादेशाविमौ, किं तु स्वतन्त्रप्रकृती अणि। यथा 'विश्रवणरवण' इति शिवादिषु पठिष्यते। ताभ्यां विश्रवश्शब्दः [9]'स्थानी नाक्षिप्यतेऽणादौ'[10]। तयोः कस्मात् प्रयोगो नास्त्यणोऽन्यतः, तत्राह — **प्रत्ययेति**। विशिष्टप्रत्यय एव प्रातिपदिकप्रयोगोऽदृष्टः, अत आह — **यथोक्तमिति**। यदि तर्हि नादेशौ [11]तदा ताभ्यां विश्रवश्शब्दस्यापत्यप्रत्ययविषयेऽनिवर्तितत्वात् तस्मादपि प्रत्ययापत्तिः, अत आह — **विश्रवश्शब्दादिति**। **ज्ञापकादिति**। नित्त्वं हि प्रकृतेराद्युदात्तार्थम्। यदि चात्र विकरणेषु स्थानिवद्भावात् पित्त्वं स्यात् तदा श्यनः पित्त्वादनुदात्तत्वेऽदुपदेशात् परस्य लसार्वधातुकस्यानुदात्तत्वे धातुस्वरेणाद्युदात्तत्वं सिद्धम्। अनेकाचश्च धातवो दिवादिषु न सन्ति, येन नित्त्वपित्त्वयोः फलविशेषो भवेत्। तदाह — **न हीति**। **चानशीति**। तत्र हि लसार्वधातुकानुदात्तत्वं नास्ति, [12]अलादेशत्वाच्चानशः। ततश्चान्तोदात्तत्वं स्यात्। यद्येवं नियमार्थत्वसंभवात् कथं ज्ञापकम्, अत आह — **तस्मादिति**। नानाकल्पनासंभवेऽभिमतकल्पनाश्रीयत इत्यर्थः। नन्वेतद्विकरणविषयं ज्ञापकं स्यात्, अत आह — **सामान्येनेति**। इष्टसिद्धिरुभयत्र हेतुः॥

---

[1] पा. सू. ३. ४. ८६.
[2] पा. सू. ६. ३. ६३.
[3] पा. सू. २. ४. ५२.
[4] इत्याह — क.
[5] महाभाष्यम् अइउण्सूत्रे।
[6] करणस्य ज्ञापकत्वस्य — ति.
[7] तक्रकौण्डिन्यन्यायादित्यर्थः।
[8] पा. सू. ६. ४. १४८.
[9] स्थान्याक्षिप्यते — क.
[10] अत्रादिग्रहणमनावश्यकं भाति। अनादौ—क.
[11] 'तदा' इति नास्ति — ति.
[12] लस्थानिकादेशत्वाभावादित्यर्थः।

[१, ४१४–४२०]

(**लघुविवरणम्**) 'जात्याख्यायां वचनादेशे' इत्यनुपपन्नम्, एकार्थो बह्वर्थवद् भवतीत्याश्रयणात्, अत आह — **एकस्मिन्निति**। 'आवधिषीष्ट' इत्यनुपपन्नम्, [१]'तिङ्ङतिङः' इति निघाते प्रत्यय-स्वराभावात्, अत आह — **यदेति**। किमर्थं तर्हि [२]'सर्वत्र विभाषा गोः' इत्युक्तमित्यत आह — **यदा त्विति**॥

[१, ४१४–४२०]

(**विवरणम्**) ननु [३]'एकस्मिन् बहुवचनम्' इत्युच्यते, न[८] त्वेकवचनस्य बहुवचनमिति। तत आदेशत्वाभावात् का प्राप्तिः स्थानिवत्त्वस्येत्यत आह — **एकस्मिन्निति**। भाष्ये 'उक्तम्' इत्यनेन बहुवचनशब्देन न प्रत्ययोऽभिधीयते, किं तु बहुत्वलक्षणोऽर्थ इत्युक्तम्। न च सानुबन्धकेषु भूतपूर्वगत्याश्रयणं दोष इत्याह — **अनुबन्धेति**। 'ननु च' इति भाष्येणापो ह्रस्वः स्थानिवदिति लक्षणेनाबित्युक्तम्। न च भूतपूर्वगत्याश्रयणेऽतिप्रसङ्ग इत्याह — **णलिति**। ननु 'आवधिषीष्ट' इति कथं प्रत्ययस्वरः, यावता [४]'तिङ्ङतिङः, इति निघातेन भवितव्यमित्यत आह — **यदेति**। यदि 'एङः' इति वाच्यं कस्मात् तर्हि [५]'सर्वत्र' इत्युक्तमित्यत आह — **यदा त्विति**। भाष्ये 'एवमपि' इति पाक्षिकं पूर्वत्वं प्राप्नोतीति चोद्यं [६]"सर्वत्र' इत्यत्रानुवर्तमानमेङ्ग्रहणं श्रूयमाण-विशेषणमित्यभिप्रायम्। गोविशेषणमिति चोत्तरं स्पष्टत्वान्नोक्तम्॥

[१, ४१४–४२०]

(**उद्द्योतनम्**) 'कति' इत्यत्र [७]'न षट्स्वस्रादिभ्यः' इति निषेधान्न ङीबिति परिहारः कथं नोक्तः, अत आह — [८]**परिहारान्तरेति**। 'मात्रच्' इति प्रत्ययग्रहणे प्रातिपदिकस्य न प्रसङ्गः, अत आह — **चकारस्येति**। सर्वमात्रशब्दानुकरणसंभवात् कथं सदृशव्यावृत्तिः, अत आह — **प्रत्ययेति**। अन्यथा प्रत्याहारासंभवादिति भावः। ननु [९]'एकस्मिन् बहुवचनम्' इत्युच्यते, न तु 'एकवचनस्य' इति, अतः कथं स्थानिवद्भावः, अत आह — **एकस्मिन्निति**। आपो ह्रस्वत्वेन बाधितत्वात् ह्रस्वादेशस्य दीर्घस्य कथमाप्त्वम्, पकाराभावात्, अत आह — **अनुबन्धेति**। उच्चा-रणानन्तरमेवानुबन्धानां लोपात् सर्वत्र भूतपूर्वगतिरेव, [१०]'ह्रस्वस्य' स्थानिवद्भावेनाप्त्वे तत्स्थानि-कस्याप्याप्त्वमस्तीति भावः। **आ इतीति**। तथा च [११]'दीर्घाग्रहणेऽपि याट्प्रसङ्ग इति भावः।

---

[१] पा. सू. ७. १. २८.
[२] पा. सू. ६. १. १२२.
[३] पा. सू. १. २. ५८.
[४] पा. सू. ८. १. २८.
[५] पा. सू. ६. १. १२२.
[६] पा. सू. ६. १. १२२.
[७] पा. सू. ४. १. १०.
[८] परिहारेति — अ, इ, ऋ.
[९] पा. सू. १. २. ५८.
[१०] स्थानिवद्भावनिषेधपक्षे एतद्ग्रन्थप्रवृत्तेस्तत्र 'ङ्याब्ग्रहणे' इति ह्रस्वस्य स्थानिवद्भाव-निषेधात् कथं 'ह्रस्वस्य स्थानिवद्भावेनाप्त्वे' इत्यादिग्रन्थसांगत्यमिति चिन्तनीयम्। 'स्थानि-वद्भावेन पित्त्वे तत्स्थानिकस्यापि पित्त्वम्' इति पाठो युक्तो भाति।
[११] दीर्घग्रहणेऽपि — म, आ, इ, ऋ.

उक्तरीत्याप्त्वसत्त्वात् कथं लाक्षणिकत्वम्, अत आह — **अत्र चेति**। तथा चाप्त्वं नास्तीत्यर्थः। भूतपूर्वाश्रयणेऽतिप्रसङ्गो नास्तीत्याह — **णलादिष्विति**। [1]तत्संनियोगेनाहादेशविधानादन्यत्र प्रसङ्गाभावः। नन्वेवं [2]णलादावप्याथादेशः स्यात्, अत आह — **तिबादय इति**। भूतपूर्वाश्रयणे थल्येवेति नियमाभावेन सर्वत्र प्रसङ्गात् 'आथः' इत्युक्तेऽपि सर्वत्र सिद्धेः [3]'आहस्थः' इत्यत्र भूतपूर्वानाश्रयणादीङभावज्ञापकत्वं सिद्धमिति भावः। ननु 'आवधिषीष्ट' इति कथं प्रत्ययस्वरः, यावता [4]'तिङ्ङतिङः' इति निघातेन भाव्यम्, अत आह — [5]**यदेति**। **भाष्ये विदुष इति**। [6]'विदेः शतुर्वसुः'। अनुम् यः शता तदन्तादन्तोदात्तात् परा नद्यसर्वनामस्थानाजादिविभक्तिश्चोदात्तेति सूत्रार्थः। [7]'तनादि' इत्युप्रत्ययमारभ्य [8]'इदितो नुम् धातोः' इति नुम्पर्यन्तं प्रत्याहारः। सूत्रे 'अनुमः' इत्युम्रहितस्येत्यर्थः। 'विदुषः पश्य' इत्यत्र 'अनुमः' इति प्रतिषेधः प्रत्याहारग्रहणे सिद्ध इत्याह — **तत्रेति**। उम्प्रत्याहार इत्यर्थः। भाष्ये [9]'सर्वत्र विभाषा गोः' इत्यत्र [10]'एङः पदान्तादति' इति पठनीयमित्याह — **प्रकृतीति**। यथाश्रुतभाष्यमप्येतदभिप्रायतया संगमयति — **यदेति**। विभाषा प्रकृतिभावः, तदभावपक्षे पूर्वत्वं प्राप्नोतीति भाष्यार्थः। भाष्ये **एवमपीति**। स्वाश्रयमेवैङत्वं न स्थानिवद्भावेन प्रार्थ्यमिति 'अनल्विधौ' इति प्रतिषेधाभावात् पाक्षिकं पूर्वत्वं प्राप्नोतीति शङ्कार्थः। [11]'सर्वत्र' इत्यत्रानुवर्तमानमेङग्रहणं [12]श्रूयमाणविशेषणमित्यभिप्रायः। गोशब्दस्यैव विशेषणमित्युत्तरं स्पष्टत्वान्नोक्तम्। भाष्ये **तपरेति**। तपरत्वस्य प्रयोजनान्तराभावादोकारान्तादेव गोशब्दात् [13]परस्य सर्वनामस्थानस्य णित्त्वम्, ओकारान्तस्यैवाकारोऽन्तादेश[14] इत्येतदर्थं तपरत्वमित्यर्थः। [15]भाष्ये **न गोश्वन्निति**। [16]'न गोश्वन्सावर्वर्णराडङ्क्रुङ्कृद्भ्यः'। गो, श्वन्, प्रथमैकवचने यदवर्णान्तम्, राट्, अङ्, क्रुङ्, कृत्, इत्येतेभ्यो यदुक्तं तन्न भवति। गो। गवा, गोभ्याम्। [17]'सावेकाचस्तृतीयादिर्विभक्तिः' इति प्राप्तः प्रतिषिध्यते। सुगुना, सुगुभ्याम्। [18]'अन्तोदात्तादुत्तरपदात्' इति प्राप्तः प्रतिषिध्यते। श्वन्। शुना, श्वभ्याम्, [19]शुने, श्वभ्याम्, परमशुना, परमशुने, परमश्वभ्याम्। पूर्ववत्प्राप्तिः। सावर्वर्ण। तेभ्यः, केभ्यः। [20]राट्। राजतेः क्विप्प्रत्ययः। राजा, [21]परमराजः। [22]अङ्। अञ्चतिः क्विबन्तः, तस्य सनकारस्य ग्रहणं विषयविशेषावधारणार्थम्। यत्र नकारलोपो नास्ति तत्र प्रतिषेधो यथा स्यात्। [23]'नाञ्चेः पूजायाम्' इति नलोपः प्रतिषिध्यते। प्राञ्चा, प्राङ्भ्याम्। नलोपविषये तु भवत्येव विभक्तेरुदात्तत्वम्। प्राचा, प्राचे॥

---

[1] तत्संनियोगेनाहादेशस्य विधानात् — म, आ.
[2] णलादावप्याहादेशः — ऋ.
[3] पा. सू. ८. २. ३५.
[4] पा. सू. ८. १. २८.
[5] यथेति — आ.
[6] पा. सू. ७. १. ३६.
[7] पा. सू. ३. १. ७९.
[8] पा. सू. ७. १. ५८.
[9] पा. सू. ६. १. १२२.
[10] पा. सू. ६. १. १०९.
[11] पा. सू. ६. १. १२२.
[12] 'एङः पदान्तात्' इति सूत्रे श्रूयमाणस्य पदान्तादित्यस्य विशेषणमित्यर्थः।
[13] परस्यैव सर्व — अ.
[14] आकारान्तादेश इति — अ.
[15] 'भाष्ये न गोश्वन्निति' इत्यादि 'प्राचे' इत्यन्तं नास्ति — अ, इ.
[16] पा. सू. ६. १. १८२.
[17] पा. सू. ६. १. १६८.
[18] पा. सू. ६. १. १६९.
[19] 'शुने श्वभ्याम्' इति नास्ति — म.
[20] राजिति क्विप्प्रत्ययान्तः — म.
[21] परमराजा — आ, ऋ, म. काशिकायां 'परमराजः' इत्युपलभ्यते।
[22] अन् — आ, ऋ, म.
[23] पा. सू. ६. ४. ३०.

[१, ४१४–४२०]

(रत्नप्रकाशः) **अयच् प्रत्ययान्तरमिति**। उपपादितमिदं [1]'न वेति विभाषा'सूत्रे। **जात्याख्यायामिति**। एकस्मिन्नर्थे कृतस्यैकवचनस्य बहुवचनमादेश इति मन्यते। **उक्तमिति**। [2]'जात्याख्यायाम्' इति सूत्रे। **ङ्याब्ग्रहणेऽदीर्घ इति**। अत्र 'अदीर्घः' इत्यनेनैकादेशरूप एव दीर्घः पर्युदस्यते। अदन्तादेव टापो विहितत्वेन तत्रैकादेशदीर्घस्यावश्यं स्थानिवद्भावेनाप्त्वस्याङ्गीकरणीयत्वात्। तेन गङ्गीयतेः क्विपि 'गङ्गीः' इत्यत्रेकारस्य दीर्घत्वेऽपि स्थानिवद्भावनिषेधः सिद्धः। तत्र दीर्घग्रहणे विद्यमानेऽपि 'गङ्गीः' इत्यत्रातिप्रसक्तमेवेति प्रकृतवचनमेव व्यापकमाश्रयणीयमित्याह — **तन्न वक्तव्यं भवतीति**। **असत्यपीति**। प्रकृतप्रतिषेधवचनादिति शेषः। **पिच्चासौ भतपूर्व इति**। सर्वत्रानुबन्धानां [3]लुप्तानामेवानुबन्धिनि विशेषसमर्पकतेति लुप्तेन पकारेणानुबन्धेन सहानुसन्धानादयमाकार आब्भवतीति भावः। **लक्षणप्रतिपदोक्तयोरिति**। पकारानुबन्धकरणसामर्थ्यादेकादेशे कृतेऽपि स आकार आप् प्रतिपदोक्तो भवति। प्रकृते तु [4]"गोस्त्रियोः' इति ह्रस्वोत्तरं पुनर्दीर्घो जात इति स आब् लाक्षणिक इति भावः। यद्येवं तर्ह्यनयैव सिद्धे स्थानिवद्भावनिषेधो व्यर्थ इत्याशयेन शङ्कते — **ननु चेति**। **न वक्तव्यमिति**। वचनं विनापि किंचिदिष्टं साधयितुं शक्यत इति भावः। निष्कौशाम्बीयतिप्रभृतेः क्विपि 'निष्कौशाम्बीः' इत्यादौ हल्ङ्यादिलोपादिवारणार्थम् 'अतिखट्वाय' इत्यादौ [5]"याडापः' इत्यस्य वारणार्थं चावश्यं प्रकृतनिषेधवचनं कर्तव्यमेव। एतेन 'अतिखट्वाय' इत्यादावङ्गस्याबन्तता नास्ति, [6]'उपसर्जनस्त्रीप्रत्यये तदादिनियमसत्त्वादिति [7]"याडापः' इति न भविष्यतीति वदन्तः परास्ताः। "प्रत्ययग्रहणं चापञ्चम्याः' इति वार्तिकानुसारेण [9]"याडापः' इत्याप्शब्दस्याबन्तपरत्वे सति पुनस्तस्य [10]'पदाङ्गाधिकारे [11]च' इति वार्तिकानुसारेणाबन्तान्तपरताया अङ्गीकारेण तत्राङ्गस्याबन्तत्वाभावेऽप्याबन्तान्तत्वेन याटो दुर्वारत्वात्। नन्वेवं सति [12]'स्त्रीप्रत्यये नानुपसर्जने' इत्यत्रानुपसर्जनग्रहणं व्यर्थं स्यादिति चेन्न, 'अतिकारीषगन्ध्यपुत्रः' इत्यत्र [13]'ष्यङः संप्रसारणं पुत्रपत्योः' इति संप्रसारणवारणेन तस्य सार्थक्यात्। न च तत्राप्युक्तवार्तिकद्वयानुसारेण द्विस्तदन्तविधिप्रवृत्तौ 'अतिखट्वाय' इत्येतत्समकक्षतेति वाच्यम्, [14]'पदाङ्गाधिकारे च' इत्यत्र पदशब्देन सुप्तिङन्तस्यैव ग्रहणेनोत्तरपदाधिकारे ष्यङन्तान्तग्रहणे मानाभावात्। न चैवं सति 'पक्वेष्टकचितम्' इत्यादौ [15]'इष्टकेषीकामालानाम्' इत्यनेनेष्टकाद्यन्तस्य ह्रस्वो न स्यादिति वाच्यम्, तदर्थमेव तत्र [16]'इष्टकेषीकामालानाम्' इत्यादिप्रयोजनवार्तिकान्तरस्य सत्त्वात्। यदि तद्वार्तिकं पदाधिकारोदाहरणपरमित्याग्रहः, तथापि न दोषः, 'अतिकारीषगन्ध्यपुत्रः' इत्यत्रोपसर्जनस्त्रीप्रत्यये तदादिनियमस्य भगवतैव स्वीकृतत्वात्। **ईट् प्राप्नोतीति**। [17]'ब्रुव ईट्' [18]'अस्तिसिचोऽपृक्ते' इतिसूत्रा-

---

[1] पा. सू. १. १. ४४.
[2] पा. सू. १. २. ५८.
[3] लुप्तानामेवानुबन्धिविशेष — ब.
[4] पा. सू. १. २. ४८.
[5] पा. सू. ७. ३. ११३.
[6] अनुपसर्जन — ब.
[7] पा. सू. ७. ३. ११३.
[8] का. वा. १.१ . ७२-२८.
[9] पा. सू. ७. ३. ११३.
[10] का. वा. १. १. ७२–२१.
[11] वेति — ब.
[12] महाभाष्यम् ६. १. १३.
[13] पा. सू. ६. १. १३.
[14] का. वा. १. १. ७२–२१.
[15] पा. सू. ६. ३. ६५.
[16] पा. सू. १. १. ७२–२२.
[17] पा. सू. ७. ३. ९३.
[18] पा. सू. ७. ३. ९६.

भ्यामिति भावः। **नैतदस्ति ज्ञापकमिति**। इदं मन्दबुद्ध्याशङ्कामात्रम्, सामान्यवचनबलेन निरवकाशस्यान्यथा[1]नयनासंभवात्। अन्यथोत्सर्गापवादयोरपि विकल्पः स्यात्, उत्सर्गाभावपक्षेऽपवादस्य चारितार्थ्यात्। [2]'सांप्रतिकाभावे भूतपूर्वगतिः' इति परिभाषापि प्रकृतमूर्खशङ्कामूलिका निष्प्रयोजनैव। **झलादिर्यो भूतपूर्व इति**। णलादिषु पञ्चसु थलेव झलादिर्भूतपूर्व इति मन्यते। **आथिमेवायमिति**। साक्षान्निर्दिष्टाहिविधानोत्तरं तिबादीनां पञ्चानां णलादिविधानात् पूर्वं झल्परत्वमाहश्चापि स्थितमेवेति भावः। **द्विसकारक इति**। 'सिचस्स्' इति, एकस्य सकारस्य [3]'संयोगान्तस्य लोपः' इति लोपे ततोऽन्यस्य रुत्वादिकमिति भावः। **वृद्धितत्वेति**। [4]"अत उपधायाः' इति वृद्धिः, [5]"हनस्तोऽचिण्णलोः' इति तत्वम्। **इट्प्रतिषेधः प्राप्नोतीति**। 'उपदेशे' इत्येकाच एव विशेषणम्, न त्वनुदात्तादित्यस्यापि। तथा च [6]"अदिहनी अनुदात्तौ' इति गणपाठे विहितानुदात्तसंज्ञां वधिर्लब्धवानिति तत्प्राप्तिरिति भावः। **आद्युदात्तनिपातनमिति**। धातुपाठे कृता यानुदात्तसंज्ञा सा 'न विद्यते उदात्तो यस्मिन्' इत्यन्वर्था भवति, तत्रापि पश्चात् 'धातोः' इत्यन्तोदात्तविधानसंभवात्। तथा चाद्युदात्तनिपातनेनातिदेशिक्यन्वर्थसंज्ञा बाध्यत इति भावः। वस्तुतस्तु-इदं समाधानं प्रौढिवादमात्रम्। एकश्रुत्यैव धातुपाठस्य प्रसिद्धत्वेन तत्र कृतोदात्तानुदात्तसंज्ञयो रूढिमात्रत्वस्यैव स्वीकर्तव्यत्वेन वधेराद्युदात्तनिपातनेनातिदेशिकानुदात्तसंज्ञाया वारयितुमशक्यत्वेनेडागमनिषेधस्यानिवारणात्। वधादेशस्याद्युदात्तनिपातनकल्पनावद् धातुपाठेऽनुदात्तानां सर्वेषां तथैव पाठकल्पने तु बह्वदृष्टकल्पनेति चमत्काराभावः। ननु 'उपदेशे' इत्यनुदात्तस्यापि विशेषणं भवतु। तथा चोपदेशे य एकाजनुदात्तश्च तस्मादेव परस्य वलादेरार्धधातुकस्येडागमनिषेधो भविष्यति, न तु वधेः परस्येति चेन्न, 'इण् गतौ' 'इङ अध्ययने' इत्यादीनामचामनुदात्तानां धातूनां गुणादिरूपस्यादेशस्योपदेशेऽनुदात्तत्वाभावेन 'एता, एष्यति' इत्यादाविडागमप्रसङ्गात्। तस्मात् [7]"हनो वध लिङि' इति सूत्रे भाष्यकारैर्व्यवस्थापयिष्यते यत् 'अदन्तो वधादेशः' इति, तदेव समाधानं युक्तम्। **आवधिषीष्टेति**। यदा यच्छब्दप्रयोगः 'यदावधिषीष्ट' इति भवति, तदा [8]"तिङ्ङतिङः' इति निघातो [9]"निपातैर्यद्यदि' इति प्रतिषिद्ध इति भवत्युदाहरणम्। **नुक्षुकौ प्राप्नुत इति**। [10]"लीलोर्लुग्नुकावन्यतरस्यां स्नेहविपातने' [11]"भियो हेतुभये षुक्' इति सूत्राभ्याम्। **लोडादेश इति**। लोडादेशस्य हेस्तातङि तस्य हिग्रहणेन ग्रहणात् [12]"शा हौ' [13]"हन्तेर्जः' [14]"हुझल्भ्यो हेर्धिः' इति शाजधयः प्राप्नुवन्तीति भावः। **वस्वादेश इति**। [15]"विदेः शतुर्वसुः' इत्यनेन। **शतुरनुमो नद्यजादी इति**। अनुम् यः शता तदन्तादन्तोदात्तात् परा नद्यजादिश्च शसादिर्विभक्तिरुदात्ता स्यादित्यर्थः। **उकारात् प्रभृतीति**। [16]"सनाशंसभिक्ष उः' इत्युप्रत्ययात् प्रभृतीत्यर्थः। **नुम इति**। [17]"इदितो नुम् धातोः' इत्यत्र निर्दिष्टनुमो मकारादिति भावः। **यदीति**। [18]"तनादिकृञ्भ्य उः' इत्युप्रत्ययोऽवधित्वेन गृहीतः, 'न विद्यते उम्

---

[1] नयनस्यासंभवात् — ब.
[2] परिभाषा ७७.
[3] पा. सू. ८. २. २३.
[4] पा. सू. ७. २. ११६.
[5] पा. सू. ७. ३. ३२.
[6] अदादिगणसूत्रमिदम्।
[7] पा. सू. २. ४. ४२.
[8] पा. सू. ८. १. २८.
[9] पा. सू. ८. १. ३०.
[10] पा. सू. ७. ३. ३९.
[11] पा. सू. ७. ३. ४०.
[12] पा. सू. ६. ४. ३५.
[13] पा. सू. ६. ४. ३६.
[14] पा. सू. ६. ४. १०१.
[15] पा. सू. ७. १. ३६.
[16] पा. सू. ३. २. १६८.
[17] पा. सू. ७. १. ५८.
[18] पा. सू. ३. १. ७९.

यस्य शत्रन्तस्य तस्मादन्तोदात्तात्परा' इत्यादिश्च सूत्रार्थ इति मन्यते। [1]"तुष्यतु दुर्जनः' इति न्यायेन तदभिमतोकारग्रहणस्यावधित्वमाश्रित्यैव समाधत्ते — **अनुमिति**। **अनुम्क इति**। न उम् अनुम्, स एवानुम्कः, स्वार्थे कन्। न विद्यते नुम् यस्य सोऽनुम्कः, [2]"शेषाद्विभाषा' इति समासान्तः कप्। तयोस्तन्त्रेण निर्देशः। अथवा उमन्तर्गतो वसुर्व्यपदेशिवद्भावेन वसोरवयव इत्यनुम्को वसुर्न भवतीति बहुव्रीहिमात्रस्यैव निर्देशः। तेन उम्प्रत्याहारान्तर्गतो वसुरादेश इति तस्य उम्तदवयवकभिन्नत्वाभावात् 'विदुषः' इत्यादौ नातिप्रसङ्गः। तथा 'तुदन्ती' इत्यादौ च शता उमन्तर्गतनुम्सहित [3]एवेति नातिप्रसङ्गः। एतेन 'उकारात् प्रभृति' इति प्रतीकगतं " [4]"तनादिदिकृञ्भ्य उः' इत्युः। तत्र च वसुरन्तर्भूतः" इति, 'यदि' इति प्रतीकगतं 'श्नाप्रत्ययस्य प्रत्याहारेऽन्तर्भावात्' इति, 'शता यः' इति प्रतीकगतं च 'न चात्र श्ना शतुः कृत इत्यनुमेव शता' इति निरस्तम्। शतृप्रत्ययस्याप्युविकरणप्रभृत्युमन्तर्गतत्वेन सूत्रस्य निर्विषयत्वापत्तेः। **मुञ्चतेति**। शत्रन्तोऽयं सनुमिति 'अनुम्' इति प्रतिषेधः स्यादिति भावः। पक्षान्तरे तु शनिमित्तो नुम्, न शतृनिमित्त इति दोषाभावः। **गोः पूर्वणित्त्वात्वेति**। 'अनाश्रीयमाणोऽप्यादेशः स्थानिवत्' इति 'एकदेशविकृतमनन्यवत्' [5]इति वा कृतह्रस्वो गोशब्दो गोग्रहणेन गृह्यत इति प्रसक्ते तस्यानेन प्रतिषेधो वक्तव्य इत्युच्यते। **विभाषा पूर्वत्वं प्राप्नोतीति**। [6]"नान्तःपादमव्यपरे' इति सूत्रन्यासे पूर्वरूपे निषिद्धेऽपि तेनायवौ बाधितावेवेति मते [7]"सर्वत्र विभाषा गोः' इत्यनेन पूर्वरूपमेव विकल्पेन विधीयते। तेनापवादेन नित्यं पूर्वरूपं बाधितं चेदपि तेनावादेशो बाधित एवेति 'गोऽग्रम्, गो ग्रम्' इति रूपं सिध्यति यथा, तथा 'चित्रग्वग्रम्' इत्यत्रापि पूर्वरूपे विकल्पिते तदभावे यणि च 'चित्रगुग्रम्, चित्रग्वग्रम्' इत्यनिष्टपूर्वरूपेण सह रूपद्वयं स्यादिति भावः। एतेन "प्रकृतिभावोऽनेन विधीयते, न तु पूर्वत्वम्। तस्मात् "[8]एङः पदान्तादति' इति पूर्वत्वं प्राप्नोतीति वाच्यम्। यदा त्वप्रकृतिभावः, तदायं प्रसङ्ग उक्तः" इति निरस्तम्। भाष्यारूढमतान्तरमादाय यथाश्रुतस्यैव भाष्यस्योपपन्नत्वेन तस्य कुकविकृतेरिवान्यथानयनानौचित्यात्। **एङ इति वर्तत इति**। तथा च गोरेङोऽति परे पूर्वरूपं वा स्यादिति पूर्वरूपे विकल्पेन विधीयमानेऽपि न दोष इति भावः। ननु स्थानिवद्भावेनोकार एङ्संज्ञां लभत इति दोष एवेत्यत आह — **तत्रानल्विधाविति**। **एवमपीति**। [9]"आदेच उपदेशे' इत्युपदेशग्रहणेन वर्णग्रहणेषु लक्षणप्रतिपदोक्तपरिभाषा न प्रवर्तत इति ज्ञापितत्वादिति भावः। ओत्सूत्रे तु [10]"ओतश्चिञ्वप्रतिषेधः' इतिवार्तिकप्रत्याख्यानप्रवणचित्ततयाग्रहेण वर्णग्रहणेऽपिलक्षणपरिभाषा संचारितेति नानयोर्विरोधो दोषः। **गोतो णिदिति णित्त्वं प्राप्नोतीति**। णित्त्वे सति [11]अचो ञ्णिति' इति वृद्धिः स्यादिति भावः। एतेन 'गोशब्दात्परं [12]संबुद्धिवर्जं सर्वनामस्थानं णित्कार्यकृत् स्यात्' इति कार्यातिदेशपरतया [13]"गोतो णित्' इति सूत्रं व्याचक्षाणाः परास्ताः। प्रकृतभाष्यविरोधात्। **तपरकरणात्सिद्धमिति**। [14]"गोतो णित्' इत्यत्र

---

[1] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.
[2] पा. सू. ५. ४. १०४.
[3] एवेति प्रसङ्गः — ब.
[4] पा. सू. ३. १. ७९.
[5] इति वा गोग्रहणेन गृह्यत इत्यन्वयः।
[6] पा. सू. ६. १. ११५. 'प्रकृत्यान्तःपादम्' इत्यस्य पाठान्तरमिदम्।
[7] पा. सू. ६. १. १२२.
[8] पा. सू. ६. १. १०९.
[9] पा. सू. ६. १. ४५.
[10] का. वा. १. १. १५–१.
[11] पा. सू. ७. २. ११५.
[12] अत्र 'संबुद्धिवर्जम्' इति 'ब' मातृकायामुपलभ्यते। इदमयुक्तं भाति, असंबुद्धिग्रहणस्योत्तरत्रैव विद्यमानत्वेनानुवृत्त्यभावात्, 'हे गौः' इत्यसिद्ध्यापत्तेश्च।
[13] पा. सू. ७. १. ९०.
[14] पा. सू. ७. १. ९० .

तपरकरणात् 'ओतो णित्' इति सूत्रार्थो विवक्षितः। **गकार**स्तूदाहरणदिक्सूचकानुबन्धः। [1]'औतोऽम्शसोः' इत्यत्र तु 'ओतः' इति वर्णनिर्देशः स्पष्ट एव। तथा च ओकार एव तत्र तकार-सहकृतः संज्ञा, सा चाल्विधौ वर्तमानैवेति भावः। **बहुगुमानिति**। [2]'ह्रस्वनुड्भ्यां मतुप्' इति मतुप उदात्तत्वं [3]'न गोश्वन्' इत्यादिना निषिध्येतेति भावः। तथा च पूर्वरूपस्वरयोः कर्तव्ययो-रेकदेशविकृतो गोशब्दो गोग्रहणेन न गृह्यत इत्येतावद्वाचनिकमिति स्थितम्। ननु सत्यपि प्रकृत-निषेधे 'हे चित्रगोऽग्रम्' इत्यत्र गोशब्दस्यैव साक्षादुपलम्भात् पूर्वरूपविकल्पोऽवङादेशविकल्पश्च कुतो नेति चेन्न, गोशब्दस्यात्र लाक्षणिकत्वात्। भाष्ये पूर्वत्वशब्दस्यावङुपलक्षणत्वाच्च॥

[१, ४१४–४२०]

(**नारायणीयम्**) [4]षष्ठ्यनिर्देशादनादेशत्वात् स्थानिवत्त्वप्रतिषेधः किमर्थस्तत्राह — **एकस्मिन्निति**। ननु सांप्रतिकसंभवे कथं भूतपूर्वगतिरित्याशङ्क्य सांप्रतिकासंभवमाह — **अनुबन्धेति**। नन्वनु-बन्धमात्रस्य न भूतपूर्वगत्या आब्रूपतायाः प्राप्तिरित्यत्राह — **आ इति**। नन्वत्रापि टाबाकार एव प्रत्यभिज्ञायत इति कथं प्रतिपदोक्तत्वाभावः, तत्राह — **अत्र चेति**। सर्वेषां भूत-पूर्वतया वलादित्वात् 'आथिमेवोच्चारयेत्' [इति कथम्], अत आह — **णलादिष्विति**। सांप्रति-कासंभवे समनन्तरकाले झलादित्वविज्ञानमिति भावः। यथा लोके 'आढ्यचरोऽयम्' इति काल-व्यवधानप्रतीतिः। **तिबादय इति**। भूतपूर्वशब्दप्रयोगे कालव्यवधानप्रतीतेर्नियमाभावाद्विवक्षाभेदे आढ्यचरशब्देऽपि कालविप्रकर्षावगमात्। ननु तिङनिघाते सति स्वरविशेषचिन्तानुपपत्तिः, तत्राह **यदेति**। वसुसंग्राहकमुकारमाह — **तनादीति**। शतर्यत्र तु न उम्, अनुम्श्रुतेः, अत आह — **श्नेति**। तदन्तविशेषणमिति भावः। आनन्तर्यसंबन्धेनानुम्कत्वं शतुरप्याशङ्क्याह — **न चेति**। आनन्तर्यादिसंबन्धे बहुव्रीहिर्नास्तीति भावः। शे मुचादीनां नुम्विधौ शतुर्निमित्तत्वान्न शत्रन्त-संबन्धितया तस्य व्यपदेश इत्याशङ्क्याह — **शत्रन्तस्येति**। शतुर्निमित्तत्वान्नुम्यपि परम्परया निमित्तत्वम्। [5]अनिमित्तत्वेऽपि चावयवसंबन्धव्यपदेशस्य न काचित् क्षतिः। [6]अतिप्रसङ्गे विश्रान्ति ग्रन्थस्य निवारयति — **तस्मादिति**। तर्हि पूर्वत्वाविधायकसूत्रमनुक्त्वा सूत्रान्तरं किमर्थ-[मुक्त]मित्याशङ्क्य प्रकृतिभावस्य विकल्पं शिष्याणां प्रत्यक्षयन् पूर्वत्वप्राप्तिमादर्शयतीत्याह — **यदेति**। 'एङ इति वर्तते' इत्यस्यैङ इत्यस्तीत्यर्थः। ततश्चैङग्रहणानुवृत्त्योत्तरमिति न वाच्यम्, [7]अनुवृत्तेरनपेक्षणात्। [8]किं त्वल्विधित्वादित्येवेत्याह — **उत्तरमिति**॥

अचः परिस्मन् पूर्वविधौ. १. १. ५७.

[१, ४२१–४२३]

(**लघुविवरणम्**) **अल्विध्यर्थमिति**। आसप्तमाध्यायपरिसमाप्तेरङ्गाधिकार इत्युरदत्वं पर-

---

[1] पा. सू. ६. १. ९३.
[2] पा. सू. ६. १. १७६.
[3] पा. सू. ६. १. १८२.
[4] षष्ठ्या निर्देशात् — क.
[5] निमित्तत्वेऽपि — क.
[6] 'अतिप्रसङ्गे' इत्यस्यानन्तरम् अपिशब्दोऽधिकः।
[7] अनुवृत्तेरपेक्षणात् — क.
[8] किं चाल्विधित्वात् — क.

निमित्तकमिति भावः। अन्तरङ्गत्वादित्यनपपन्नम्, [1]'वार्णादाङ्गं बलीयः' इति शकारादेशप्राप्तेः, अत आह — **अत एवेति**। **युगपत्प्राप्त्यभावादिति**। प्रत्ययोत्पत्तेः प्रागेव तुकः प्रवर्तनादिति भावः। कोऽसौ यत्न इत्यत आह — **तत्रेति**। ननु समुदायनिर्देशेऽप्यलोऽन्त्यपरिभाषया छकारमात्रस्य प्राप्नोतीत्यत आह — **समुदायेति**। **अनर्थक्त्वाद्वेति**। [2]'नानर्थकेऽलोऽन्त्यविधिः' इति वचनादिति भावः। ननु [3]'च्छवोः' इत्यत्र सतुक्छकारस्य निर्देश इति कथमवसीयते, अत आह — **एवं चेति**। ननु यथेह तर्हि स्वाश्रयमच्त्वमाश्रित्य यणादेशो भवति, एवं स्वाश्रयं वल्त्वमाश्रित्य वाय्वोरित्यत्र [4]'लोपो व्योर्वलि' इति लोपः प्राप्नोतीत्यत आह — **वाय्वोरितीति**। **योऽनादिष्टादच इति**। ननु क्रियमाणेऽज्ग्रहणे एतल्लभ्यते, तथा च प्रत्युदाहरणमेतत् स्यादेव। एवं तर्हि स्थान्यपेक्षया पूर्वत्वमत्राभिप्रेतम्। नन्वादेश ऊकार आश्रीयत एवेत्यत आह — **समुदायस्येति**। शङ्कते — **ख्याजादीनामिति**। परिहरति — **घस्लादेशस्येति**॥

[१, ४२१–४२३]

(**विवरणम्**) नन्वादेशमात्रस्य स्थानिवद्भावो विधीयमानोऽजादेशस्यापि पूर्वेणैव भविष्यतीत्यत आह — **अल्विधीति**। अनेन सूत्रस्य सप्रयोजनत्वे भाष्यकारीयपदप्रयोजनचिन्ता युक्ता, न प्रागित्यपि शङ्कापहस्तिता। **उरदत्व इति**। [5]'लिटयभ्यासस्योभयेषाम्' इत्युभयेषांग्रहणात् हलादिशेषात् प्राक् संप्रसारणे कृते वकारस्य संप्रसारणनिषेधात् प्राग् नित्यत्वात् परत्वाच्चोरदत्वमिति भावः। ननु संप्रसारणभाविनि यण्येव संप्रसारणनिषेधे नैतत् प्रयोजनमित्यत उदाहरणान्तरमाह — **एवमिति**। **दीर्घ इति**। नित्यत्वात् परत्वाच्चेति भावः। **ह्रस्वान्त इति**। यद्यपि [6]'नञ्सुभ्याम्' इति तत्रानुवर्तते, तथापि [7]'बहोर्नञ्वत्' इति वचनाद् 'बहुचितीकः' [8]'इत्युदाहृतम्। **वार्तानि** असाराणि। कुत इत्यत आह — **शक्येति**। भाष्ये **शकारः** [9]'च्छ्वोः शूठ्' इत्यनेन विधीयमानः। **अत एव** अन्तरङ्गत्वादेव। प्रत्ययोत्पत्तिनिरपेक्षत्वादेव तुकः प्राक् प्रवर्तनादिति शेषः। ननु वृद्धेरकादेशात् प्राक् परत्वात् प्रवर्तनात् कथं यण्वृद्ध्योर्युगपत्प्राप्तिरित्यत उदाहरणान्तरमाह — **यथा चेति**। ननु सतुक्छकारेणाङ्गस्य विशेषणात् तदन्तविधावङ्गस्येति षष्ठ्या अन्त्येऽल्युपसंहारादङ्गेन सतुको विशेषणेऽपि 'च्छः' इति षष्ठ्या वा तुग्वर्जितछकारमात्रस्य शः स्यादित्यत आह — **समुदायेति**। व्यधिकरणसंबन्धे परिहारान्तरमाह — **अनर्थकत्वादिति**। [10]'नानर्थकेऽलोऽन्त्यविधिः' इति वचनादिति भावः। शकारस्य निर्देशे लिङ्गमाह — **एवं चेति**। **न हीति**। अतएव च[11] वत्करणमिति भावः। यदि स्वाश्रयो न निवर्तेत, ततः 'वाय्वोः' इत्यत्र यलोपः स्यादित्यत आह — **वाय्वोरितीति**। **असिद्धत्वनिषेधात्** ऊठं इति शेषः। **यलोप इति**। ऊठो विधानसामर्थ्यान्न [12]लोप इति 'यलोपः' इत्युक्तम्। **योऽनादिष्टादिति**। यद्यप्यच इत्क्युतावेतदेवं स्यात्, तथा च प्रत्युदाहरणमेतत् स्यात्, तथापि स्थान्यपेक्षया पूर्वत्वमाश्रीयत इति

---

[1] परिभाषा ५५.
[2] का. वा. १. १. ६५–२.
[3] पा. सू. ६. ४. १९.
[4] पा. सू. ६. १. ६६.
[5] पा. सू. ६. १. १७.
[6] पा. सू. ६. २. १७२.
[7] पा. सू. ६. २. १७५.
[8] इत्याद्युदाहृतम् — छ.
[9] पा. सू. ६. ४. १९.
[10] का. वा. १. १. ६५–२.
[11] चकारो नास्ति — च.
[12] लोपशब्देन वकारलोपो विवक्षितः।

तात्पर्यम्। [1]'एकान्ता अनुबन्धाः' इति हृदि निधायाह — **समुदायेति**। **आदेशो गृह्यते** आदेश इत्यनेनेति शेषः। **न प्राप्नोति** स्थानिवद्भावेनेति शेषः। **घस्लादेशस्येति**। [2]'लुङसनोर्घस्लृ' इत्यस्य॥

[१, ४२१–४२३]

(**उद्द्योतनम्**) नन्वजादेशस्यापि स्थानिवद्भावः पूर्वेणैव सिद्धः, अत आह — **अल्विध्यर्थमिति**। **उरदत्व इति**। [3]'लिटचभ्यासस्योभयेषाम्' इत्युभयेषांग्रहणसामर्थ्याद्धलादिशेषात् प्राक् संप्रसारणे कृते परत्वान्नित्यत्वाच्च निषेधात् प्रागुरदत्वमिति भावः। अङ्गाधिकारादङ्गत्वस्य प्रत्ययपरत्व-सापेक्षत्वादभ्यासत्वस्य परसापेक्षत्वाद्वा अत्वस्य परनिमित्तत्वं ज्ञेयम्। संप्रसारणभाविनि यण्येव परतः संप्रसारणनिषेधे नैतत् प्रयोजनम्, अत आह — **एवमिति**। **दीर्घ इति**। नित्यत्वात् परत्वाच्चेति भावः। **ह्रस्वान्त इति**। ह्रस्वान्ते [4]उत्तरपदे बहुव्रीहौ [5]नञ्सुभ्यामुत्तरं कप्यन्त्यात् पूर्वमुदात्त-मिति सूत्रार्थः। यद्यपि [6]'नञ्सुभ्याम्' इत्येवात्रानुवर्तते, तथापि [7]'बहोर्नञ्वत्' इति वचनात् 'बहुचितीकः' इत्युदाहृतम्। **वार्तानि** असाराणि। वार्तत्वे हेतुः — **शक्येति**। भाष्ये **शकारः** [8]'च्छ्वोः शूठ्' इति विधीयमानः। **अत एव** अन्तरङ्गत्वादेव। प्रत्ययोत्पत्तिनिरपेक्षतया तुक् प्राक् प्रवर्तत इत्यर्थः। [9]'वार्णात्' इत्यस्य विषयमाह — **यत्रेति**। ननु परत्वाद्यणः प्राग् वृद्धे-रेव प्रवर्तनात् तयोर्न युगपत्प्राप्तिः, अत आह — **यथा चेति**। यद्यप्यत्रापि परत्वादित्वमेव प्राक् प्रवर्तत इति वक्तुं शक्यम्, तथापि परशब्दस्येष्टवाचित्वाद्यणोऽपीष्टत्वसंभवादाङ्गबलीयस्त्वमेवात्र नियामकम्। अन्यथा वार्णादाङ्गस्य सर्वस्य परत्वावश्यकत्वादेतन्न्यायस्य निर्विषयतैव स्यादिति भावः। **चकारेति**। तुकश्चुत्वेन संपन्नचकारेत्यर्थः। ननु [10]'अलोऽन्त्यस्य' इति तुकः शो न स्यात्, अत आह — **समुदायेति**। **अनर्थकत्वादिति**। [11]'नानर्थकेऽलोऽन्त्यविधिः' इति वचनादिति भावः। सतुक्छकारस्य [12]निर्देशे लिङ्गमाह — **एवं चेति**। तुकः शादेशाभावे इकारस्योपधात्वा-भावेनैव [13]गुणाप्राप्तेर्नङो ङित्करणमनर्थकं स्यादित्यर्थः। **न हीति**। अत एव वत्करणमिति भावः। स्वाश्रयस्यानिवर्तने वाय्वोरित्यत्र [14]'लोपो व्योर्वलि' इति यकारलोपः स्यात्, अत आह — **वाय्वो-रिति**। 'दि ऊ त्वा' इति स्थिते ऊठोऽपि बहिरङ्गत्वेनासिद्धत्वाद् यण् न स्यात्, अत आह — **द्यूत्वेति**। **असिद्धत्वेति**। ऊठ इत्यादिः। यणादेशेऽचोरानन्तर्यस्याश्रयणात् [15]'असिद्धं बहिरङ्ग-मन्तरङ्गे' इति परिभाषात्र न प्रवर्तत इत्यर्थः। **यलोप इति**। ऊठो विधानसामर्थ्यान्न लोप इति भावः। **योऽनादिष्टादिति**। यद्यप्यज्ग्रहणमिदानीं न पुरस्कृतम्, तथापि स्थान्यपेक्षया पूर्व-मात्रे तात्पर्यम्। [16]'एकान्ता अनुबन्धाः' इति पक्षाश्रयेण भाष्यं योजयति — **समुदायेति**। **आदेशो**

---

[1] परिभाषा ५.
[2] पा. सू. २. ४. ३७.
[3] पा. सू. ६. १. १७.
[4] उपपदे — आ.
[5] नञ्सुभ्यामुत्तरपदं कप्यन्त्यात् — आ, इ, ऋ.
[6] पा. सू. ६. २. १७२.
[7] पा. सू. ६. २. १७५.
[8] पा. सू. ६. ४. १९.
[9] परिभाषा ५५.
[10] पा. सू. १. १. ५२.
[11] का. वा. १. १. ६५–२.
[12] निर्देशलिङ्गमाह — आ, ऋ.
[13] गुणप्राप्तेः — म.
[14] पा. सू. ६: १. ६६.
[15] परिभाषा ५०.
[16] परिभाषा ५.

गृह्यते [1]'स्थानिवदादेशः' इत्यत्रादेशशब्देन। [2]**न प्राप्नोति** स्थानिवद्भावेनेत्यादिः। **घस्लिति**। [3]'लुङसनोर्घस्लृ' इति विहितस्य। भाष्ये [4]**आक्राष्टामिति**। कृषेर्लुङ, [5]'अनुदात्तस्य चर्दुपधस्य' इत्यम्, यण्, वृद्धिः, [6]'झलो झलि' इति सिचो लोपः॥

[१, ४२१–४२३]

(रत्नप्रकाशः) परनिमित्तोऽच आदेशः स्थानिवद्रूपं लभते स्थानिभूतादचः पूर्वत्वेन दृष्टस्यैव तस्मान्निमित्ततयाश्रितात् परस्यैव वा कार्ये कर्तव्ये, कृते निवृत्ते वा तस्मिन् स्वरूपेणैवावतिष्ठत इति निष्कृष्टः सूत्रार्थः समस्तभाष्यपर्यालोचनेन लब्धः। एतेन पूर्वसूत्र इवात्रापि कार्यातिदेशः क्रियत इति भ्रान्त्या "अल्विध्यर्थमिदम्। तथाहि — 'वव्रश्च' इत्युरदत्वे कृते [7]'न संप्रसारणे संप्रसारणम्' इति [वकारस्य संप्रसारणनिषेधः] स्थान्यलाश्रयः। एवम् 'अचितीकः, सुचितीकः, बहुचितीकः' इति "चितेः कपि' इति दीर्घे कृते [8]'ह्रस्वान्तेऽन्त्यात् पूर्वम्' इति स्थान्यलाश्रयः स्वरोऽस्माद् वचनाद् भवति" इति निरस्तम्। पूर्वसूत्रस्य संज्ञातिदेशपरतयैव भाष्ये व्यवस्थापितत्वात्। अत्र च रूपातिदेशपरतयैवोपपादयिष्यमाणत्वात्। तदुदाहृतप्रयोजनद्वयस्य रूपातिदेशपक्षेऽपि सिद्धत्वाच्च। **स्थानिवद्भावाच्छे चेति तुक् प्राप्नोतीति**। एतेन रूपातिदेशोऽनेन क्रियत इति स्पष्टम्। कार्यातिदेशे हि 'छकारस्य शकारः परनिमित्तकः, तस्मिन् परे तुक् स्यात्' इत्येव ब्रूयात्। [10]"छे च' इति न ब्रूयात्। एवमेतज्जातीयोत्तरभाष्यादपि ज्ञेयम्। 'स्थानिवद्भावाद्व्यवधानमेव' इति बहुषु स्थलेषु भगवतोक्तत्वादपि रूपातिदेशपरमिदम्। पूर्वस्मात् परस्य विधौ स्थानिवद्भावाश्रयणादपि तथा। **तुगभावे यत्न इति**। [11]'च्छ्वोः' इति तुगागमविशिष्टस्यैव छकारस्य स्थानितया निर्देशः कर्तव्यः। तथा च पूर्वमेव तुक् प्रवृत्त एवेति पुनर्न प्रवर्तते, सकृल्लक्ष्ये लक्षणप्रवृत्तेरिति भावः। वस्तुतस्तु 'विश्नः, प्रश्नः' इत्यपि प्रत्युदाहरणं भवत्येव, [12]'अन्तरङ्गानपि विधीन्' इति न्यायेन पूर्वं तुकोऽप्रवृत्तेः। [13]'च्छ्वोः' इत्यत्र सतुक्को निर्देश इत्यत्र मानप्रयोजनयोरभावाच्च। **अन्तरङ्गत्वादिति**। नङुत्पत्तेः पूर्वमेव तुकः प्रवृत्तेः समानकालत्वसमानाश्रयत्वयोरभावत् [14]"वार्णादाङ्गं बलीयः' इति न भवति। **यणोदेशो न प्राप्नोतीति**। इतोऽपि रूपातिदेशः, वकारे परे पूर्वस्य शास्त्रीयस्याप्रसिद्धेः। भावाभावोभयातिदेशे वाक्यभेदापत्तेः। **स्वाश्रयमत्राच्त्वमिति**। पूर्वसूत्र इवात्रापि संज्ञातिदेशं मन्यते। **योऽत्रादेश इति**। ऊठ् वर्णद्वयात्मकः। **यश्चाश्रीयत इति**। अच्। स्थानिवद्भावेनोठो हल्वकारादिसंज्ञायां सत्यां ततष्ठकारलोपे कृते ऊकारमात्रत्वे हलादिसंज्ञा नास्तीति मन्यते। वस्तुतस्तु रूपातिदेशात् तदपि प्रत्युदाहरणमेव। यत्तूक्तम् 'ख्याञ्नादीनां तर्ह्यनुबन्धवियुक्तानां धातुसंज्ञा आदेशावयवत्वान्न प्राप्नोति' इति। तन्न, तत्र पूर्वसूत्रेणैव स्थानिवद्भावात् तत्र चैकदेशविकृतस्यापि तत्संज्ञालाभाच्च।

---

[1] पा. सू. १. १. ५६.
[2] 'न प्राप्नोति' इति नास्ति — ऋ.
[3] पा. सू. २. ४. ३७.
[4] अक्राष्टाभ्यामिति — म, इ, ऋ.
[5] पा. सू. ६. १. ५९.
[6] पा. सू. ८. २. २६.
[7] पा. सू. ६. १. ३७.
[8] पा. सू. ६. ३. १२७.
[9] पा. सू. ६. २. १७४.
[10] पा. सू. ६. १. ७३.
[11] पा. सू. ६. ४. १९.
[12] अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधत इत्याशयेनेदम्।
[13] पा. सू. ६. ४. १९.
[14] परिभाषा ५५.

एतेन 'घस्लादेशस्य लृदित्त्वादङर्थाज्ज्ञापकाद्धातुकार्याणि भविष्यन्तीत्यदोषः' इत्यपि तदुक्तिः प्रत्युक्ता, तस्यापि पूर्वसूत्रविषयत्वात्। ख्याञो ञकारस्योभयपदित्वार्थतायास्तुल्यत्वेन तत्र तदनुक्तेर्न्यूनता च। न चार्धधातुके परतो घस्लादिविधानादेतत्सूत्रविषयतैव [1]तयोरिति वाच्यम्, आर्धधातुके विषये ते इति सिद्धान्तात्॥

[१, ४२१–४२३]

(**नारायणीयम्**) पूर्वेणैव सिद्धे वचनमिदं किमर्थमित्यत्राह — **अलिति**। **उरदत्व इति**। आसप्तमाध्यायपरिसमाप्तेरङ्गाधिकारपक्षे उरदत्वं परनिमित्ताश्रयम्। **बह्विति**। [2]'बहोर्नञ्वत्' इत्यतिदेशः। अज्ग्रहणस्यावश्यकार्यत्वात् प्रश्नः [3]कथम्, अत आह — **वार्तानीति**। वृत्तौ भवानि वार्तानि। ननु वार्णादाङ्गस्य बलीयस्त्वात् स्थानिवद्भाववादिनस्तु तदभावोऽयत्नसिद्ध इत्यत्राह — **अत एवेति**। **अनर्थकत्वादिति**। [4]'नानर्थकेऽलोऽन्त्यविधिः' इति परिभाषया। सतुक्छकारनिर्देशे प्रमाणमाह — **एवं चेति**। स्वाश्रयनिवृत्तिमतिदेशादाशङ्क्याह — **न हीति**। स्वाश्रयलाभेऽति-प्रसङ्गस्य परिहारमाह — **वाय्वोरिति**। इहापि तर्ह्यसिद्धत्वादेव यण् न स्यात्, अत आह — **द्यूत्वेति**। **योऽनादिष्टादिति**। अज्ग्रहणाभावे कथमयमर्थो लभ्यः। उच्यते, स्थान्यपेक्षं पूर्वत्व-माश्रयणीयम्। तच्चेहास्ति यकारस्य। अज्ग्रहणं तु स्थानिनोऽत्राच्त्वात्। ननूकार एवादेशः, स चाश्रीयते यणीत्यत्राह — **समुदायस्येति**। सानुबन्धकस्य। सानुबन्धस्थले यद्यनुबन्धवियुक्तस्य नास्त्यादेशत्वं [5]तर्ह्यनिष्टमापतेदिति शङ्कित्वा परिहरति — **ख्याजादीनामिति**॥

[१, ४२३–४२४]

(**लघुविवरणम्**) ननु युवजानिरित्यत्र 'परस्मिन्' [6]इत्यनुच्यमाने स्थानिवद्भावाज्जाशब्दस्या-कारस्य लोपः कस्मान्नाशङ्कित इत्यत आह — **अव्युत्पन्नत्वादिति**। व्युत्पत्तिपक्षे कथं प्राप्नोतीत्यत आह — **अन्यथेति**। अयं भावः — जनेर्धातोरौणादिके यक्प्रत्यये कृते [7]'ये विभाषा' इत्यात्वे टापि च सति तस्य यक्प्रत्ययाकारेणैकादेशे तस्य च पूर्वं प्रत्यन्तवद्भावादार्धधातुकग्रहणेन ग्रहणे [8]'अभ्यन्तरो हि समुदायेऽवयवो भवति' इति न्यायेन यकारसंनिधावप्याकारस्य प्रत्ययार्ध-धातुकसंज्ञयोः कृतयोः पश्चाद् युवतिशब्देन जायाशब्दस्य बहुव्रीहौ कृते निङि च यलोपे च सति स्थानिवद्भावात् प्रत्ययत्वे आर्धधातुकत्वे च स्वाश्रयं च ङित्त्वमाश्रित्य [9]'आतो लोप इटि च' इति लोपः प्राप्नोतीति। ननु लोपे कर्तव्ये आत्वस्यासिद्धत्वाल्लोपो न भविष्यतीत्यत आह — **न चेति**। **व्याश्रयत्वादिति**। ये आत्वम्, [10]'निङि लोप इति व्याश्रयत्वम्। कथं [11]'पादशतस्य' इति लोपः पुनर्वचनमित्यत आह — **यस्येति लोप इति**। नन्वादीघ्य इत्यत्रासत्यपि स्थानिवद्-

---

[1] ख्याञ्घस्लोरित्यर्थः।
[2] पा. सू. ६. २. १७५.
[3] किमर्थ इत्यत्राह — ति.
[4] परिभाषा १०५.
[5] न ह्यनिष्टम् — क.
[6] इत्युच्यमाने — ण.
[7] पा. सू. ६. ४. ४३.
[8] महाभाष्यम्. माहेश्वरसूत्रे ३, ४.
[9] पा. सू. ६.४. ६४.
[10] 'निङि' इत्यस्यानन्तरं चकारोऽधिकः — ण.
[11] पा. सू. ५. ४. १.

भावे टित एत्वात् प्रागेव परवात् [1]'यीवर्णयोः' इति [2]कस्मान्न भवतीत्यत आह — **इट एत्वे कृत इति**। नित्यत्वादिति भावः। ननु सत्यपि स्थानिवत्त्वे विकरणेन व्यवधानाल्लोपो न भविष्यतीत्यत आह — **लोप इति**। **नित्यत्वादिति**। यदि हि [3]विकरणस्य लोपो न भवेत्, न भवेत् [4]'यीवर्णयोः' इति लोप इत्यनित्यत्वम्। ननु परस्मिन्नत्यसति विकरणलुकोऽपि स्थानिवद्भावादन्तरङ्गत्वात् [5]'यीवर्णयोः' इति लोपं बाधित्वा [6]'एरनेकाचः' इति यण् भविष्यति। शास्त्रबाधाश्रयणाच्च कृतेऽपि यणि पुनर्लोपो न भविष्यतीत्यत आह — **एरनेकाच इति**। [7]'लुका लुप्तं न स्थानिवत्' इति निषेधादिति भावः॥

[१, ४२३–४२४]

(**विवरणम्**) [8]**आकारस्येति**। [9]'आतो लोपः' इत्यनेन। कथं व्युत्पत्तिपक्षे लोप इत्यत आह — **अन्यथेति**। अयं भावः — जनेरौणादिके यक्प्रत्यये [10]'ये विभाषा' इत्यात्वे टापि तेन चैकादेशे तस्य च पूर्वं प्रत्यन्तवद्भावादार्धधातुकग्रहणेन ग्रहणे पश्चाद्युवतिशब्देन जायाशब्दस्य बहुव्रीहौ [11]'जायाया निङ' इति निङादेशे [12]चैकदेशविकृतस्यानन्यत्वेन [13]यकारसहितस्य निङः प्रत्ययार्धधातुकत्वयोः [14]कृतयोरेकदेशविकृतस्यानन्यत्वादेव निङोऽपि तयोः संज्ञयोः स्थानिवद्भावादजादित्वे पुंवद्भावेन तिशब्दनिवृत्तौ यलोपे च [15]स्थानिवद्भावात् प्रत्ययत्वाजाद्यार्धधातुकत्वयोः स्वाश्रये ङित्त्वे च [16]'आतो लोप इटि च' इति लोपः प्राप्नोति। ननु लोपे कर्तव्ये [17]'असिद्धवत्' इत्यात्वस्यासिद्धत्वाल्लोपो न भविष्यतीत्यत आह — **न चेति**। **व्याश्रयत्वादिति**। ये आत्वं निङि लोप इति भिन्नाश्रयत्वादित्यर्थः। भाष्ये **द्विपादिकेति**। द्वौ द्वौ पादाविति विगृह्य [18]'तद्धितार्थ' इति समासे [19]'पादशतस्य' इति वुन्लोपौ। तस्य पुनर्लोपत्वमुपपादयति — **यस्येति लोप इति**। भाष्ये व्याघ्रस्येव पादावस्येति बहुव्रीहौ [20]'पादस्य लोपः' इति लोपे गर्गादित्वाद्यञि [21]'पादः पत्' इति पद्भावे [22]'न य्वाभ्याम्' इत्यैजागमे च वैयाघ्रपद्य इति रूपम्। भाष्ये नैकवचनं तन्त्रमित्युक्तम् 'यत्र न भसंज्ञा' इत्यनेन। 'तस्य स्थानिवद्भावात्' इत्ययुक्तम्, तेन विनाप्येत्वात् प्राग्लोपस्य परत्वात् प्राप्तेरित्यत आह — **इट इति**। **नित्यत्वात्** असति हि स्थानिवद्भावे एत्वं नित्यम्। सत्यपि वा कार्यातिदेशाच्छास्त्रभेदेनानित्यत्वाल्लोपस्य तन्नित्यत्वमिति

---

[1] पा. सू. ७. ४. ५३.
[2] कस्मान्न स्यादित्यत आह — ङ, ढ.
[3] विकरणस्यालोपो न भवेद्यीवर्णयोरिति — ण.
[4] पा. सू. ७. ४. ५३.
[5] पा. सू. ७. ४. ५३.
[6] पा. सू. ६. ४. ८२.
[7] महाभाष्यम् १. १. ५८.
[8] प्रदीपे 'जाशब्दस्याकारलोपः' इत्यत्र 'जाशब्दस्याकारस्य लोपः' इति पाठ इति भाति।
[9] पा. सू. ६. ४. ६४.
[10] पा. सू. ६. ४. ४३.
[11] पा. सू. ५. ४. १३४.
[12] चकारो नास्ति — ञ, ट.
[13] प्रत्याययकारसहितस्य — ञ.
[14] 'कृतयोः' इति नास्ति — ट.
[15] 'स्थानिवद्भावात्' इत्यादि 'आर्धधातुकत्वयोः' इत्यन्तं नास्ति — ञ.
[16] पा. सू. ६. ४. ६४.
[17] पा. सू. ६. ४. २२.
[18] पा. सू. २. १. ५१.
[19] पा. सू. ५. ४. १.
[20] पा. सू. ५. ४. १३८.
[21] पा. सू. ६. ४. १३०.
[22] पा. सू. ७. ३. ३.

भावः। यद्यपि विकरणः प्रवर्तते, तथापि न स व्यवधायक इति स्थानिवत्त्वे स्यादेव लोप इत्याह **लोप इत्यादिना**। ननु शब्लुकः स्थानिवद्भावाद् व्यवधानाच्छपा लोपो न भविष्यति। न च व्यवहितेऽपि पूर्वशब्दो वर्तत इति स्याल्लोप इति वाच्यम्, निर्दिष्टग्रहणस्यानन्तर्यार्थित्वात्। सत्यपि च [1]श्रुतिकृतानन्तर्ये [2]'दीधीवेवीटाम्' इति [3]गुणप्रतिषेधात् शब्लुकश्च स्थानिवत्त्वादन्तरङ्गत्वात् [4]'एरनेकाचः' इति यणा भवितव्यम्। न च तस्मिन् कृते आदिष्टादचः पूर्वत्वात् स्थानिवद्भावः शब्लुको नास्तीति सुतरां लोपः स्यादिति वाच्यम्, दीधी ई दीधी, वेवी ई वेवीति प्रश्लिष्ट-निर्देशेनेकारान्तयोर्लोपविधानादित्यत आह — **एरनेकाच इतीति**। उपलक्षणमेतत्, [5]'व्यवधानमपि शब्लुकः स्थानिवद्भावान्नास्तीति द्रष्टव्यम्॥

[१, ४२३–४२४]

(उद्द्योतनम्) लोपः [6]'आतो लोपः' इत्यनेन। व्युत्पत्तिपक्षे तु लोपः स्यादित्याह — **अन्यथेति**। **आकारस्य** जायाशब्दाकारस्य। **निङि** [7]'जायाया निङ्' इत्यनेन। **यलोपे** [8]'लोपो व्योर्वलि' इत्यनेन। **स्थानिवद्भावादिति**। जनेरौणादिके [9]यक्प्रत्यये [10]'ये विभाषा' [11]इत्यात्वे टापि च तस्य पूर्वेणैकादेशे पूर्वान्तवद्भावेनार्धधातुकान्तर्भावे सति पश्चान्निङादेशे यलोपे च निङः स्थानिवद्भावेनार्धधातुकत्वाजादित्वयोरेकदेशविकृतन्यायेन[12] सत्त्वात् [13]'आतो लोप इटि च' इत्याकारलोपप्रसङ्ग इत्यर्थः। **आत्वस्य** [14]'ये विभाषा' इत्यात्वस्य। **व्याश्रयत्वादिति**। भिन्नाश्रयत्वादित्यर्थः। [15]'असिद्धवदत्राभात्' इत्यत्र 'अत्र'ग्रहणं कार्यद्वयस्य समानाश्रयत्वलाभार्थम्, तेन 'पपुषः' इत्यादौ वसोः संप्रसारणमाल्लोपे नासिद्धम्, विभक्तौ संप्रसारणं वसावाल्लोप इति भिन्नाश्रयत्वात्। अत्रापि ये आत्वं निङि लोप इति भिन्नाश्रयत्वमित्यर्थः। भाष्ये **द्विपदिकेति**। द्वौ द्वौ पादाविति विग्रह्य [16]'तद्धितार्थ' इति समासे [17]'पादशतस्य संख्यादेः' इति वुन्लोपौ। तस्य पुनर्लोपत्वमुपपादयति — **यस्येतीति**। ननु परनिमित्तग्रहणे सत्येतस्यापरनिमित्तत्वान्न स्था-

---

[1] श्रुतिकृत आनन्तर्ये — ञ, ट.
[2] पा. सू. १. १. ६.
[3] गुणवृद्धिप्रतिषेधात् — ट.
[4] पा. सू. ६. ४. ८२.
[5] व्यवधानमिति शब्लुकः — ट.
[6] पा. सू. ६.४. ६४.
[7] पा. सू. ५. ४. १३४.
[8] पा. सू. ६. १. ६६.
[9] 'यक्प्रत्यये' इत्यतः प्राक् 'जनेर्यगिति' इत्यधिकम् — आ, म.
[10] पा. सू. ६. ४. ४३.
[11] इत्यात्वेऽपि च तस्य — म.
[12] अत्रायमाशयः — 'जाय आ' इति स्थिते सवर्णदीर्घे पूर्वन्तवद्भावेनाकारस्यार्धधातुकान्तर्भावकथनात् 'या' इत्यस्य तदानीमार्धधातुकत्वात् तत्र यकारस्य लोपे सति 'आ' इत्यस्यैकदेशविकृतन्यायेनार्धधातुकत्वं भवति। तस्य निङि स्थानिवद्भावेनार्धधातुकत्वाजादित्वयोर्लाभः। न च निङः पूर्वं यलोपाभावान्निङि सत्याकाराभावात् कथमेकदेशविकृतन्यायोपपादनमिति वाच्यम्, यदि पूर्वं यलोपः स्यात् तदानीमेकदेशविकृतन्यायेनाकारेणार्धधातुकत्वं लब्धं स्यादिति संभावनामात्रेण तदुपपत्तेरिति। एतच्च 'यातिरितिवत्' इति वदता नागेशेन सूचितम्, छायायां स्पष्टीकृतं च।
[13] पा. सू. ६. ४. ६४.
[14] पा. सू. ६. ४. ४३.
[15] पा. सू. ६. ४. २२.
[16] पा. सू. २. १. ५१.
[17] पा. सू. ५. ४. १.

निवत्त्वमिति सिध्यति, तदभावे स्थानिवत्त्वं स्यादेव, अत आह — **स्थानिवत्त्वेति**। भाष्ये **वैयाघ्रपद्य इति**। व्याघ्रस्येव पादावस्येति बहुव्रीहौ [1]'पादस्य लोपोऽहस्त्यादिभ्यः' इति लोपे गर्गादित्वाद्यञि पद्भावे ऐजागमे च रूपम्। ननु स्थानिवद्भावादित्ययुक्तम्, तेन विनाप्येत्वात् पूर्वं परत्वाल्लोपप्राप्तेः, अत आह — **इट इति**। एत्वं नित्यम्, लोपस्त्वेत्वात् पूर्वं [2]स्वशास्त्रेण, अनन्तरं तु स्थानिवद्भावेनेति प्रापकशास्त्रभेदादनित्यः। [3]'टित आत्मनेपदानाम्' इत्युत्तमपुरुषैकवचनस्यैत्वे कृत इत्यर्थः। **लोपः** अन्त्यस्य लोपः। **विकरणश्चेति**। सार्वधातुके परतो लोपसमये विकरणश्च शप् प्राप्नोतीत्यर्थः। **नित्यत्वादिति** लोपे कृतेऽकृते च प्राप्नोति, लोपस्तु विकरणे कृते तेन व्यवधानान्न प्राप्नोतीत्यनित्यः[4]। **लुक्** [5]'अदिप्रभृतिभ्यः' इत्यनेन। [6]'शब्लुकः स्थानिवद्भावाद्यण् कुतो न स्यात्, अत आह — **एरिति**॥

[१. ४२३–४२४]

(**रत्नप्रकाशः**) **युवजानिरिति**। निङादेशस्य यलोपोत्तरमेकदेशविकृतन्यायेनार्धधातुकत्वेऽप्यजादित्वाभावात् सिद्धान्तेऽप्यातो लोपो न भवति। एतेन 'अव्युत्पन्नत्वादुणादीनां जाशब्दाकारस्य लोपो न। अन्यथा आकारस्य निङि कृते यलोपे च निङः स्थानिवद्भावात् प्रत्ययत्वादाकारलोपः स्यात्' इति निरस्तम्। उणादीनां व्युत्पन्नत्वपक्षेऽप्याकारस्य टाबेकादेशत्वेन प्रत्ययत्वात् तदादेशत्वेन निङः प्रत्ययत्वेऽपि यकारस्थितिकाले तेनाकारेणार्धधातुकत्वस्याप्राप्तत्वेन निङोऽपि तदादेशत्वेन स्थानिवद्भावादार्धधातुकसंज्ञाया अलाभेन यलोपेऽपि सुतरां तद्रीत्यार्धधातुकत्वासंभवेनाजाद्यार्धधातुके विधीयमानस्य लोपस्य प्रत्ययमात्रे परेऽप्रसक्तेः। एतेन "न चात्र [7]'असिद्धवदत्राभात्' इत्याकारलोपे कर्तव्येऽसिद्धत्वमात्वस्य, व्याश्रयत्वात्" इति च निरस्तम्। आलोपप्रसक्त्यभावस्यैवोक्तत्वात्। यक्प्रत्ययमाश्रित्यैव जनेराकारस्य कृतत्वेन तमेवाश्रित्य पुनराकारस्य लोपे क्रियमाणे समानाश्रयतायाः सत्त्वात्। सवर्णदीर्घेणान्तरङ्गेणाभीयस्यापहृतत्वेनासिद्धवत्सूत्रप्रसक्तेरेवाभावाच्च। **स्वाश्रयमत्र बल्त्वमिति**। संज्ञातिदेशोऽयमिति मन्यमानस्यैवोक्तरियमिति न युवजानिशब्दस्य प्रत्युदाहरणत्वहानिः सिद्धान्ते। **पुनर्लोपवचनसामर्थ्यादिति**। "यस्य' इति लोपेन सिद्धे [8]'पादशतस्य संख्यादेर्वीप्सायां वुन्लोपश्च' इति पुनर्लोपविधानसामर्थ्यात् लोप एव भवति, न तु तस्य स्थानिवत्त्वमिति मन्यते। वस्तुतस्तु सिद्धान्ते परनिमित्तकत्वाभावार्थमेव पुनर्लोपः कृत इति भवत्येव प्रत्युदाहरणम्। **ननु चात्रापीति**। [9]'यस्येति च' इत्येव सिद्धे [10]'पादस्य लोपोऽहस्त्यादिभ्यः' इति पुनर्लोपवचनादित्यर्थः। **आदीध्य इति**। शब्लुकः स्थानिवत्त्वात् [11]'एरनेकाचः' इति यण् नापादनीयः, [12]'क्विलुगुपधात्व' इत्यादिना स्थानिवत्त्वनिषेधात्॥

[1] पा. सू. ५. ४. १३८.
[2] 'स्वशास्त्रेण' इति नास्ति — अ, म.
[3] पाः सू. ३. ४. ७९.
[4] 'इत्यनित्यः' इति नास्ति — अ.
[5] पा. सू. २. ४. ७२.
[6] शपः स्थानिवत् — अ; शे स्थानिवत् —आ.
[7] पा. सू. ६. ४. २२.
[8] पा. सू. ६. ४. १४८.
[9] पा. सू. ५. ४. १.
[10] पा. सू. ६. ४. १४८.
[11] पा. सू. ५. ४. १३८.
[12] पा. सू. ६. ४. ८२.
[13] का. वा. १. १. ५८–२.

[१, ४२३–४२४]

(**नारायणीयम्**) नन्वपरनिमित्तकस्य निङः स्थानिवत्त्वं चेदाकारलोपः प्राप्नोतीतीयं शङ्का कस्मान्न कृता, अत आह — **उणादीनामिति**। व्युत्पत्तिपक्षे कथमत्र प्राप्तिः, अत आह — **अन्यथेति**। जनेरौणादिके यकि [1]'ये विभाषा' इत्यात्वे टापा सहैकादेशस्य पूर्वान्तिवत्त्वाद्यलोपे परिशिष्टस्य प्रत्ययत्वादिधर्मयोगादाल्लोपः प्राप्नोति। ननु निङादेशात् प्राग्यलोपो नास्ति, अवस्थिते च यकारेऽजाद्यार्धधातुकप्रत्ययत्वं न लभ्यमाकारेणेति कुतस्तदादेशस्तल्लप्स्यते। च न 'अभ्यन्तरो हि' इति पूर्वसूत्रोक्तन्यायात् प्रत्ययत्वादिकमवयवेऽप्यस्तीति वाच्यम्, अन्वर्थायास्तस्याः [3]समुदायनिवेशिनीत्वात्। अत एवोक्तं प्राक् [4]"सकारावस्थितिसमये नैव लब्धाकारेण प्रत्ययसंज्ञा' इति। अत्रोच्यते। [5]"सर्वे सर्वपदादेशाः' इत्यस्मिन् पक्षेऽयं निङादेशः समुदायस्येत्यार्धधातुकप्रत्ययादेशत्वमस्ति। एकदेशादेशत्वेऽप्येकदेशविकृतस्यानन्यत्वात् प्रत्ययत्वमार्धधातुकत्वं च। तच्च यकारलोपोत्तरकालं परिशिष्टे संक्रान्तं प्रत्यक्षं [6]चादेशत्वमिति स्थानिवत्त्वादजादित्वमपीति लोपप्राप्तिः। **व्याश्रयत्वादिति**। यकारादावात्वमजादौ लोप इति व्याश्रयत्वम्। कथं सिद्धस्य लोपस्य पुनर्वचनात् स्थानिवत्त्वनिषेधसिद्धिः, अत आह — **पुनरिति**। नन्वेत्वात् प्राग्लोपः कस्मान्नेत्यत्राह — **इट इति**। नित्यत्वादिति भावः। विकरणेन व्यवधानाल्लोपाप्राप्तिमाशङ्कते — **लोप इति**। परिहरति — **तस्येति**। नन्वस्तु, विकरणाश्रयो यणन्तरङ्गः प्रवर्तिष्यते, तत्राह — **एरिति**॥

[१, ४२५–४३०]

(**लघुविवरणम्**) नन्वेङग्रहणाभावे 'अग्ने' इत्यादौ कथं लोप इत्यत आह — **अग्न इति**। ननु स्थानिवत्त्वेऽपि 'माले' इत्यादौ ह्रस्वान्तत्वाभावाल्लोपो न स्यादित्यत आह — **खट्वे इति**। शङ्कते — **नयत्यादीनामिति**। परिहरति — **नैतेभ्य इति**। इदमेव च भाष्यं लिङ्गमिति भावः। ननु बाभ्रवीया इत्यत्रासत्यपि स्थानिवत्त्वे यञ्प्रत्ययसंनिपातनिमित्तको वान्तादेशस्तद्विघातस्य यलोपस्य संनिपातपरिभाषया निमित्तं न स्यात्, अत आह — **संनिपातेति**। ननु नैधेय इत्यत्र स्थानिवद्भावात् त्र्यच्त्वेऽपि स्वाश्रयं द्व्यच्त्वमाश्रित्य ढग् [7]भविष्यतीत्यत आह — [8]**स्थानिवत्त्वादिति**। ननु बेभिदितेति न पूर्वस्माद्विधौ स्थानिवद्भावं प्रयोजयति। अत्र ह्यल्लोपयलोपाभ्यां प्रागेव परत्वादिड् भविष्यतीत्यत आह — **नित्यत्वादिति**। इट् त्वनित्यः, अल्लोपयलोपयोः कृतयोः [9]"एकाचः' इतीट्[10]प्रतिषेधात्। नन्वेवमप्येकाच्त्वेन श्रवणाभावात् प्रतिषेधो न भविष्यतीत्यत आह — **उपदेशेति**। ननु भिद्यशब्दस्य प्रकृतिप्रत्ययैकदेशसमुदायस्य बेभिद्यशब्दादेशे संप्रमुग्धत्वात् प्रकृतिप्रत्ययविभागस्य नष्टो भिदिर्भवतीति कथमिट्प्रतिषेधः प्राप्नोतीत्यत आह — **द्विः प्रयोग-**

---

[1] पा. सू. ६. ४. ४३.
[2] प्रत्ययसंज्ञाया इत्यर्थः।
[3] समुदायनिवेशितत्वात् — ति.
[4] उरण्प्पर इति सूत्रे प्रदीपे।
[5] महाभाष्यम्. १. १. २०.
[6] चाजादेशत्वमिति — ति.
[7] भविष्यतीत्याह — ढ.
[8] प्रदीपे 'स्थानिवद्भावात् त्र्यच्कत्वव्यपदेशे' इत्यत्र 'स्थानिवत्त्वात् त्र्यच्कत्वव्यपदेशे' इति पाठ इति भाति।
[9] पा. सू. ७. २. १०.
[10] प्रतिषेधप्रसङ्गात् — ड, ढ.

श्चेति। **वर्णनिर्देशे त्विति**। [1]'ठस्य' इत्यत्र। ननु झेर्विधीयमानो जुस् कथमिकारलोपे स्यादित्यत आह — **एकदेशेति**। नन्वेवमपि चडकारेण व्यवधानान्नाभ्यस्तात् परो झिरित्यत आह — **तत्रेति**। निमित्तापेक्षया पूर्वत्वमाश्रित्य शङ्कते — [**ननु**] **पूर्वस्मादपीति**। अजपेक्षया पूर्वत्वमाश्रित्य परिहरति — **उच्यत इति**। भाष्ये स्थान्याश्रये आदेशाश्रये च विधौ स्थानिवद्भावो यथा स्यादिति विधिग्रहणमित्युक्तं 'विधिमात्रे' इत्यनेन। कथमेतद्विधिग्रहणाल्लभ्यते, अत आह — **अच इति**। अयं भावः — योगविभागः क्रियते। 'अचः परस्मिन् पूर्वे' इत्येको योगः। षष्ठ्याश्छान्दसो लुक्। 'विधौ' इति द्वितीयः। तेन च स्थानिवदेवेति नियमादादेशाश्रयं [न] भविष्यतीति। भाष्ये स्वविधावित्यत्र [2]स्वशब्देन स्थान्यादेशश्चाभिधीयते। कथमाट् स्वविधिरित्यत आह — **अजादेरिति**। विशिष्टस्य कार्यित्वे विशेषणमपि कार्यीति भावः। इदं च प्रयोजनं [3]'असिद्धवदत्राभात्' इत्यनाश्रित्योक्तम्। ननु चक्रतुरित्यादौ नित्यत्वाद् द्विर्वचनात् प्रागेव यणि कृतेऽपि[4] [5]'द्विर्वचनेऽचि' इति स्थानिवद्भावाद् [6]द्विर्वचनं भविष्यतीत्यत आह — **ततश्चेति**। स्थान्यादेशयोरन्यतरापेक्षया परत्वमाश्रित्य शङ्कते — **नन्विति**। निमित्तापेक्षया परत्वे विज्ञायमाने हे गौरित्यादि कथं सिध्यतीत्यत आह — हे **गौरित्यत्र त्विति**। **निमित्तात् परस्येति**। भावसाधनो विधिशब्द [7]आश्रयितव्य इति भावः। ननु निर्दिष्टग्रहणस्यानन्तर्यार्थत्वात् कथं व्यवहितस्य पूर्वस्याश्रयणम्, तत्राह — **पूर्वशब्दस्येति**। परिभाषानुपस्थाने तदङ्गं 'निर्दिष्टे' इत्येतदपि नोपतिष्ठत इत्यर्थः। 'परिहारं वक्ष्यति' इति भाष्यस्यायमर्थः — दध्यत्रेत्यत्र [8]"न वा बहिरङ्गलक्षणत्वात्' इति परिहारः, चक्रतुरित्यत्र [9]"द्विर्वचनेऽचि' इति, [10]"द्विर्वचनं यणयवायाव' इति वा॥

[१, ४२५–४३०]

(विवरणम्) यत्र तर्हि स्थानिवद्भावेऽपि न ह्रस्वान्तता तत्र कथमित्यत आह — **खट्व इति**। लोपः सिद्ध इत्यनुषङ्गः। **नतेभ्य इति**। इदमेव च [11]भाष्यमत्रार्थे लिङ्गमिति भावः। बभ्रुशब्दात् [12]'मधुबभ्रवोः' इति यञि [13]वृद्धावोर्गुणे वान्तादेशे [14]'वृद्धाच्छः' इति छे [15]'यस्य' इति लोपे [16]'आपत्यस्य च तद्धिते' इति यलोपे च बाभ्रवीया इति रूपम्। तत्र यप्रत्ययसंनिधाननिमित्तो वान्तादेशो यप्रत्ययसंनिपातविघातकस्य यलोपस्य न निमित्तमिति कथं स्थानिवद्भावाभावेऽपि [17]'हलः' इत्यधिकृत्य [18]'आपत्यस्य च' इति यलोप इत्यत आह — **संनिपातेति**। निपूर्वाद्घाञः[19]'उपसर्गे

---

[1] पा. सू. ७. ३. ५०.
[2] स्वपदेन — ढ.
[3] पा. सू. ६. ४. २२.
[4] अपिशब्दो नास्ति — ड, ढ.
[5] पा. सू. १. १. ५९.
[6] 'द्विर्वचनम्' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — ड, ढ.
[7] आश्रयिष्यत इति — ण.
[8] का. वा. ८. २. २३–३.
[9] पा. सू. १. १. ५९.
[10] का. वा. ६. १. १२–९.
[11] भाष्यमुक्तार्थे — च, छ.
[12] पा. सू. ४. १. १०६.
[13] 'वृद्धौ' इति नास्ति — च, छ, ट.
[14] पा. सू. ४. २. ११४.
[15] पा. सू. ६. ४. १४८.
[16] पा. सू. ६. ४. १५१.
[17] पा. सू. ६. ४. १५०.
[18] पा. सू. ६. ४. १५१.
[19] पा. सू. ३. ३. ९२.

घोः किः' इति किप्रत्यये [1]'आतो लोप इटि च' इत्याकारलोपे [2]'कुगति' इति समासे [3]'द्व्यचः' इति वर्तमाने [4]'इतश्चानिजः' इति ढकि नैधेय इति रूपम्। किंविषयं तर्हि स्वाश्रयमपीत्यत आह — **यदिति**। ननु प्रसक्तस्यानभिनिर्वृत्तस्य निषेधेन निवृत्तिः, [5]अत्र चाल्लोपयलोपाभ्यां प्रागेव परत्वादिण्निर्वृत्त इति कथं निषेध इत्यत आह — **नित्यत्वादिति**। **तत इति**। अनेनेटोऽनित्यत्वमप्युक्तम्। ननु कृतद्विर्वचनं नैकाच्छ्रूयत इत्यत आह — **उपदेशेति**। ननु भिद्यशब्दे सन्यङन्तस्य द्विर्वचनविधानात् प्रथमस्यैकाचोऽभिधीयमानं द्विर्वचनं व्यञ्जनानां नटभार्यातुल्यत्वाद् भिद्य् इत्यस्य स्यात्। तथा च द्विरुक्तस्यादेशस्य न स्वतोऽनुदात्तत्वमुपदेशे, नापि [6]स्थानिवद्भावतः, स्थानिनोऽतादृक्त्वादिति कथमिट्प्रतिषेधप्राप्तिरित्यत आह — **द्विःप्रयोग इति**। **ठस्येक इतीति**। [7]'ठस्येकः' इत्यत्र संघातग्रहणे नास्त्यनल्विधाविति प्रतिषेधः, अन्यथा स स्यादिति भावः। नन्विकसंनियोगेन विहितो "यस्य' इति लोपः कथं तद्विघातस्य [8]कस्य निमित्तमित्यत आह — **संनिपातेति**। निमित्तापेक्षया पूर्वत्वमाश्रित्य शङ्कते — **ननु पूर्वस्मादिति**। अजपेक्षया पूर्वत्वमाश्रित्य परिहरति — **उच्यत इति**। नन्वतिदेशेन स्वाश्रयं न निवर्त्यत इति कथं वाय्वोरित्यादौ यलोपनिवृत्तिरित्यत आह — **अच इति**। 'अचः परस्मिन् पूर्वे' इत्येको योगः। 'पूर्वे' इति च षष्ठ्याश्छान्दसो लुक्। 'विधौ' इति द्वितीयो योगः। स च नियमार्थः — स्थानिवदेवेति [इति] भावः। अनाश्रीयमाणत्वं नादेशापेक्षया, विरोधादित्यभिप्रेत्याह — **कार्य इति**। भाष्ये **स्व**शब्देन स्थान्यादेशश्चाभिधीयते। **अजादेरिति**। विशिष्टस्यागमित्वे विशेषणस्याप्यागमित्वमिति भावः। **पदान्त इति**। तत्र विधिशब्दो भावसाधन इति भावः। **ततश्चेति**। अनेनैव सिद्धत्वादिति भावः। स्थान्यादेशयोरन्यतरापेक्षया परत्वमाश्रित्य शङ्कते — **नन्विति**। परिहारः स्पष्टः। **हे गौरिति**। न हि तत्र निमित्तात् परस्य विधिः, किं तु तस्यैवेत्यर्थः। **निमित्तादिति**। विधिशब्दो भावसाधनः, संबन्धसामान्ये षष्ठ्याः समास इति भावः। **आदेशाश्रयेति**। त्यदाद्यत्वेत्वगुणलक्षणादेशाश्रयेत्यर्थः[10]। **तस्मिन्निति**। अस्यानुपस्थाने तदङ्गं निर्दिष्टग्रहणमपि नोपतिष्ठत इति भावः। 'परिहारम्' इति भाष्यस्यायमर्थः — दध्यत्रेत्यत्र [11]'न वा बहिरङ्गलक्षणत्वात्' इति, चक्रतुरित्यत्र [12]'द्विर्वचनेऽचि' इति॥

[१, ४२५–४३०]

(**उद्द्योतनम्**) ननु 'अग्ने' इत्यादौ संबुद्धिलोपार्थमेङग्रहणम्, अत आह — **अग्न इति**। यत्र स्थानिवद्भावेन न ह्रस्वान्तता तत्र कथम्, अत आह — **खट्व इति**। **हल्ङ्याब्भ्य इ[ती]ति**। लोपः सिद्ध इत्यनुषङ्गः। [13]**ने लो पो इति**। णीञ् प्रापणे, लूञ् छेदने, पूञ् पवने। [14]अत्र

---

[1] पा. सू. ६. ४. ६४.
[2] पा. सू. २. २. १८.
[3] पा. सू. ४. १. १२१.
[4] पा. सू. ४. १. १२२.
[5] इह चाल्लोप — अ.
[6] स्थानिवद्भावेन – अ.
[7] पा. सू. ७. ३. ५०.
[8] पा. सू. ६. ४. १४८.
[9] 'कस्य' इति नास्ति — च, छ.
[10] 'आश्रयेत्यर्थः' इत्यस्यानन्तरं 'व्यवहितेऽपीतीति' इति प्रतीकोऽधिकः — अ.
[11] का. वा. ८. २. २३-३. 'न वा' इति पूर्ववार्तिकादनुषक्तम्।
[12] पा. सू. १. १. ५९.
[13] प्रदीपे 'ने लो इति कथम्' इत्यत्र 'ने लो पो इति कथम्' इत्यन्नंभट्टपाठ इति भाति।
[14] तत्र — म, आ, ऋ.

स्थानिवद्भावेन ह्रस्वान्तत्वं नास्तीत्येङग्रहणं कर्तव्यमित्यर्थः। **नैतेभ्य इति**। अनभिधानात्। अत्रेदमेव भाष्यं लिङ्गमिति भावः। बभ्रुशब्दात् [1]'मधुबभ्रुवोः' इति यञ्। आदिवृद्धिः, [2]'ओर्गुणः' वान्तादेशः, [3]'वृद्धाच्छः' [4]'यस्य' इति लोपः, [5]'आपत्यस्य' इति यलोपः, बाभ्रवीयाः। [6]माण्डव्यशब्दो गर्गादियञन्तः। भाष्ये **हल इति**। तस्मिन्ननुवर्तमाने [7]'आपत्यस्य' इत्यनेनेत्यर्थः। यकारसंनिपातनिमित्तवान्तादेशस्य तद्विघातकयलोपनिमित्तत्वाभावात् [8]'स्थानिवत्त्वाभावेऽपि कथमत्र यलोपः, अत आह — **संनिपातेति**। निपूर्वाद्धाञः [9]'उपसर्गे घोः किः' [10]'आतो लोप इटि च'। [11]'कुगति' इति समासः। 'द्व्यचः' इत्यनुवृत्तौ [12]'इतश्चानिञः' इति ढक्, नैधेयः। ननु स्वाश्रयमत्र द्व्यच्त्वं स्यात्, अत आह — [13]**स्थानिवद्भावादिति**। स्वाश्रयमित्यस्य विषयमाह — **यदिति**। ननु कर्मव्युत्पन्नविधिशब्दाभावे पूर्वस्य कार्ये कर्तव्य इति कथं लभ्यते, अत आह — **अच इति**। 'अचः परस्मिन् पूर्वस्य' इति सूत्रं कर्तव्यमित्यर्थः। आक्षेपमेवाह — **पूर्वस्येति**। स्थानिवद्भावस्य कार्यार्थत्वात् पूर्वसंबन्धि [14]कार्यं विधीयमानत्वाद् विधिरिति लभ्यत इत्यर्थः। भाष्ये **सर्वविभक्त्यन्तः** अनेकविभक्त्यन्तपूर्वपदयुक्तः। संबन्धसामान्ये षष्ठीसमास इति तात्पर्यम्। ननु परत्वादतो लोपात् पूर्वमिट् स्यात्, अत आह — **नित्यत्वादिति**। अकारलोपे निषेधादिटोऽप्रवृत्तेस्तस्यानित्यत्वम्। ननु कृतद्विर्वचनस्यानेकाच्त्वात् कथं निषेधप्रसक्तिः, अत आह — **उपदेशेति**। ननु द्विरुक्तस्यादेशस्यानुदात्तोपदेशत्वाभावात् कथमिट्प्रतिषेधः, अत आह — **द्विःप्रयोग इति**। 'भिद्' इत्यस्यानुदात्तस्यैव द्विःप्रयोगादनुदात्तत्वमस्तीत्यर्थः। स्थानिवद्भावस्य प्रयोजनमाह — **अल्लोपस्येति**। **माथितिक इति**। मथितं पण्यमस्येति ठक्। पाक्षिकमेतत् प्रयोजनमित्याह — **यदेति**। इकादेशानन्तरमकार[15]लोपे कप्रसङ्गः, स च स्थानिवद्भावनिबन्धनः, स च समुदायादेशत्वे, नान्यथेति भावः। नन्विकारसंनिपातनिमित्तकस्याकारलोपस्य कथं तद्विघातककारनिमित्तत्वम्, अत आह — **संनिपातेति**। नन्वन्तादेशो झकारमात्रस्य, तथा च तस्य स्थानिवद्भावेनापि झित्वाभावात् कथं जुस्प्रसङ्गः, अत आह — **झेरिति**। यद्यप्यन्तादेशः परः, तथाप्यङ्गाधिकारेणाङ्गसापेक्षत्वात् प्रत्ययमात्रापेक्ष इकारलोपोऽन्तरङ्ग इति भावः। **पररूपे** अन्ताकारस्य चङ्कारेण सहेत्यर्थः। **तस्य** चङ्कारस्य. **आदिवद्भावात्** झिग्रहणेन ग्रहणादित्यर्थः। **कथमिति**। गकारादुत्तरस्योकारस्य वृद्धिविधेः स्थानिवद्भावे सति संबुद्धिलोपः स्यादित्यर्थः। **निमित्तत्वेनेति**। अचः पूर्वस्य निमित्तताश्रयणेन यो विधिस्तत्र स्थानिवद्भावः, संबुद्धिलोपस्तु न तथेत्यर्थः। नन्वतिदेशेन स्वाश्रयानिवर्तनात् कथं वाय्वोरित्यादौ यलोपनिवृत्तिः, अत आह — **अच इति**। 'अचः परस्मिन् पूर्वे' इति लुप्तषष्ठीक एको योगः 'विधौ' इत्यपरः, स च स्थानिवदेवेति नियमार्थः। **कार्य इति**। न त्वादेशे, प्रकृत्यनपेक्षादेशासंभवादिति भावः। भाष्ये

---

[1] पा. सू. ४. १. १०६.
[2] पा. सू. ६. ४. १४६.
[3] पा. सू. ४. २. ११४.
[4] पा. सू. ६. ४. १४८.
[5] पा. सू. ६. ४. १५१.
[6] भाष्ये 'माधवीयाः' इत्यस्य स्थाने 'माण्डवीयाः' इत्यन्नंभट्टपाठ इति प्रतीयते। छप्रत्यये परत एव 'आपत्यस्य' इति यलोपसंभवात्, केवलयञन्तस्य प्रकृतानुपयोगात्।
[7] पा. सू. ६. ४. १५१.
[8] स्थानिवद्भावेऽपि — अ.
[9] पा. सू. ३. ३. ९२.
[10] पा. सू. ६. ४. ६४.
[11] पा. सू. २. २. १८.
[12] पा. सू. ४. १. १२२.
[13] स्थानिवत्त्वादिति — अ, म.
[14] कार्यस्य विधीयमानत्वात् — म.
[15] लोपप्रसङ्गः — अ,म; लोपे प्रसङ्गः — आ, ऋ.

स्वशब्देन स्थान्यादेशश्चोच्यते। **अजादेरिति**। विशिष्टस्यागमित्वे विशेषणस्याप्यागमित्वादिति भावः। भाष्ये **यण्लोपयोः** [1]'इणो यण्' [2]'श्नसोरल्लोपः' [3]इत्यनयोः। भाष्ये **धिन्वन्ति** उत्रत्यय-स्यार्धधातुकत्वाद्यणादेशे वलादित्वादिट्प्रसङ्गः। **संयोगोपलक्षितेति**। तथा **न** संयोगान्तलोपेऽपि [4]'पूर्वत्रासिद्धे न स्थानिवत्' इति न प्रवर्तत इत्यर्थः। **पदान्त इति**। तत्र विधिशब्दो भावसाधन इति भावः। **साच्चकस्येति**। विशिष्टस्य [5]कार्यित्वे विशेषणमपि तथेति भावः। **ततश्चेति**। अनेनैव सिद्धत्वादित्यर्थः। स्थान्यादेशयोरन्यतरापेक्षया परत्वमाश्रित्य शङ्कते — **नन्विति**। इडा-गमस्याचः परस्य तृचो विधेयत्वात् [6]तत्र स्थानिवत्त्वाभावे इण्निषेधः स्यादित्यर्थः। निमित्तापेक्षया परत्वेन परिहरति — **उच्यत इति**। **विधिः** इड्विधिः। 'माथितिकः' इत्यत्राकारलोपे इको निमित्तम् [7]तस्यैव कादेशः, न तु तस्मात् परस्य। 'अपीपचन्' इत्यत्रैकादेशेऽन्तो निमित्तम्, तस्यैव जुस्, न तस्मात्परस्येति स्थानिद्वभावसिद्धिरित्याह — **एवमिति**। **हे गौरिति**। सौ परतो वृद्धिः, सोरेव लोपः, न तस्मात्परस्येति [8]स्थानिवद्भावः प्राप्तः। 'ओद्ध्रस्वात्' इति वक्तव्ये एङिति प्रत्याहारग्रहणान्न भवतीत्यर्थः। 'बाभ्रवीयाः' इत्यत्रावादेशे यकारो निमित्तम्, तस्यैव लोपे कर्तव्ये वकारमात्रमाश्रीयते। नासावादेशः। यश्चादेशो वान्तः, नासावाश्रीयत इति स्थानिवत्त्वा-भावः। स्वाश्रयं तु हल्त्वं न निमित्तम्, विधावित्यस्य नियमार्थत्वादित्याह — **योऽत्रेति**। **निमित्तादिति**। किप्रत्यय आकारलोपनिमित्तम्, इदन्ताच्च ढग्विधिरिति निमित्तात्परत्वम्। **आसन्निति**। अकारलोपस्य सार्वधातुकं निमित्तम्। ततः 'पूर्वप्रकृतेरेवाडागम इति स्थानिवद्-भावसिद्धिरित्यर्थः। **परेति**। शब्दपरविप्रतिषेधेन पूर्वं तस्यैव यणित्यर्थः। **अनुपस्थानादिति**। तदनुपस्थाने तदङ्गनिर्दिष्टग्रहणमपि नोपतिष्ठत इति भावः। **संबन्धसामान्य इति**। तेन पूर्व-स्मादित्यपि संगृहीतम्। 'आयन्' इत्यादावादेशात् पूर्वस्य आडागमस्य विधाने स्थानिवद्भावा-दाट्सिद्धिरित्यर्थः। भाष्ये **वक्ष्यतीति**। दध्यत्रेत्यत्र [9]'न वा बहिरङ्गलक्षणत्वात्' इति, चक्रतु-रित्यत्र [10]'द्विर्वचनेऽचि' इति॥

[१, ४२५–४३०]

(रत्नप्रकाशः) यदयमिति। 'अग्ने, वायो' इत्यादौ स्थानिवत्त्वात् [11]'एङ्ह्रस्वात्' इत्येव लोपः सिध्यतीति मन्यते। 'खट्वे माले' इत्यादौ तु हल्ङ्यादिलोपः। **गोऽर्थमेतदिति**। उपलक्षण-मेतत्, इकारोकारान्ताद्विचि 'चे जे ने यो रो लो' प्रभृतीनाम्। **प्रत्याहारग्रहणमिति**। गो शब्दवद् एकारान्तः प्रसिद्धो नास्तीत्येवमुक्तम्। तथा च 'हे गौः' इति प्रत्युदाहरणं भवत्येव। एतेन 'नयत्यादीनां विजन्तानां ने लो इति प्रयोगो न' इति निरस्तम्। एतादृशशङ्कितृग्रन्थानु-रोधेन न्यायसिद्धप्रयोगनिराकरणानौचित्यात्। **यलोपो न प्राप्नोतीति**। न च पूर्वग्रहणे कृतेऽपि

---

[1] पा. सू. ६. ४. ८१.
[2] पा. सू. ६. ४. १११.
[3] 'इत्यनयोः' इति नास्ति — अ, इ, ऋ.
[4] का. वा. १. १. ५८–३. पूर्वत्रासिद्धीये — म, ऋ.
[5] कार्यत्वे — म, इ, ऋ.
[6] तस्य स्थानिवद्भावे — अ.
[7] 'तस्यैव' इत्यादि 'अन्तो निमित्तम्' इत्यन्तं नास्ति — अ.
[8] पूर्वं प्रकृतेरेवाडागम इति — अ.
[9] का. वा. ८. २. २३–३. 'न वा' इति पूर्व-स्मादनुषक्तम्।
[10] पा. सू. १. १. ५९.
[11] पा. सू. ६. १. ६९.

यादिप्रत्ययसंनिपातलक्षणो वान्तादेशस्तल्लोपनिमित्तं नेति यलोपो दुर्लभ इति वाच्यम्, संनिपातपरिभाषाया अनित्यत्वेन तत्सिद्धेः। **स्वाश्रयमत्र हल्त्वमिति**। संज्ञातिदेशं मन्यते। **योऽत्रादेश इति**। अव्। **यश्चेति**। वकारः। **नैधेय इति**। आलोपस्य स्थानिवद्रूपे 'निधा इ अस्' इति स्थिते द्वयच्प्रकृतिकषष्ठयन्तं नेति [1]'द्वयचः' इति ठकोऽप्राप्तिः। एतेन'स्थानिवत्त्वात् त्र्यच्कत्वव्यपदेशे सति विरोधात् स्वाश्रयं द्वयच्त्वं न लभ्यते। यदविरुद्धं स्वाश्रयं तदतिदेशेन न बाध्यते, विरुद्धं तु बाध्यत एव। संख्याकृतश्च व्यपदेशः परस्परपरिहारेण लोके स्थितः। न हि त्रिपुत्रो द्विपुत्रव्यपदेशं लभते' इति निरस्तम्। 'अल्विध्यर्थमिदम्' इति कार्यातिदेशार्थत्वमस्य सूत्रस्य प्रतिज्ञायात्र व्यपदेशातिदेशमाश्रित्य सिद्धान्त्यभिमतप्रत्युदाहरणोपपादनायोगात्। **विधिग्रहणं किमर्थमिति**। पूर्वस्येत्युक्तेऽपि 'पूर्वसंबन्धिनि कर्तव्ये' इत्यर्थलाभादिति भावः। **सर्वविभक्त्यन्त इति**। पूर्वसूत्रे व्याख्यातमिदम्। **बेभिदितेति**। 'बेभिद्' इति यङन्तात् तृच्। नित्यत्वाद्लोपयलोपयोः [2]'एकाचः' इति निषेधः प्राप्नोतीति भावः। यत्तूक्तम् 'उपदेश इत्युभयान्वयि—उपदेश एकाच उपदेशेऽनुदात्तादिति' इति। तन्न, शेषनिघातेन धातोरनुदात्तत्वेऽपि धातुपाठसिद्धरूढानुदात्तसंज्ञायास्तत्स्याभावेनातिप्रसङ्गस्याभावादेकाच एव तद्विशेषणौचित्यात्, तावतैव प्रकृतनिर्वाहाच्च। **माथितिक इति**। [3]'ठस्येकः' इत्यकारसहितस्यैव ठस्येकादेशः। कादेशविधावपि स एव स्थानीति भावः। संनिपातपरिभाषयाप्येतत् सिध्यति। एतेन [4]"'ठस्येकः' इति स्थान्यादेशयोरकार उच्चारणार्थः" इति वदन्तो निरस्ताः। तथात्वे 'ठ इक्' इत्येव लाघवात् सूत्रं स्यात्। तदेवं सम्यग्रूपातिदेशपरतया सूत्रे व्यवस्थापितेऽपि सिद्धान्त्याशयानभिज्ञो मन्दबुद्धिः शङ्कते —**नैतानि सन्तीति**। पूर्वसूत्र एव व्याख्यातमिदम्। [5]"तुष्यतु दुर्जनः' इति न्यायेन तदभिमतकल्पनामाश्रित्योत्तरमाह — **इदं तर्हीति**। **विधिमात्र इति**। तथा च स्थान्यजाश्रित एव कार्ये कर्तव्ये स्थानिवद्भावे विहिते पुनः 'विधौ' इति वचनं नियमः स्यादिति केनचिन्मन्दबुद्धिना कर्तव्याशङ्का नोदेतीति भावः। एतेन "'अचः परस्मिन् [6]'पूर्वः' इत्यनेन स्थानिवद्भावे विहिते पुनः 'विधौ' इति वचनं नियमार्थम् — स्थानिवदेव यथा स्यात्, मा भूत् स्वाश्रयमित्यर्थः" इति निरस्तम्। प्रातिपदिकनिर्देशा अर्थतन्त्रा इति मताश्रयणे 'अच् परः पूर्वः' इत्येव सूत्रस्य कर्तुमौचित्येन 'अचः परस्मिन् पूर्वः' इत्यर्धजरतीयानौचित्यात्। विधिशब्देनातिरिच्यमानेन तदभिमतनियमालाभात्। कथंचित् तत्परत्वाङ्गीकारे 'अनाश्रीयमाणायामपि प्रकृतौ' इति भाष्यविरोधाच्च। अनेन हि भाष्येण पूर्वविधिमात्रे स्थानिवद्भाव इत्येव लभ्यते, न तु स्थानिवदेव न स्वाश्रयमिति। **अनाश्रीयमाणायामिति**। पूर्वविधौ निमित्तत्वेनेति शेषः। **आयन्निति**। अजादेराड्विधानात् स्वविधिराट्। **दध्यत्रेति**। [7]"पूर्वत्रासिद्धे च' इति वार्तिकमविदुष उक्तिरियमिति न दोषः। एतेन [8]"'पूर्वत्रासिद्धे न स्थानिवत्' इत्येतदत्र नास्ति, [9]"तस्य दोषः संयोगादिलोपलत्वणत्वेषु' इत्यत्र संयोगादिलोपस्य संयोगोपलक्षितलोपोपलक्षणत्वात्" इति निरस्तम्। भाष्ये नानाविधमन्दाशङ्कानां तदुदाहरणानां च सत्त्वेन तेषामेवाज्ञानमूलकत्वेनोपपादनीयत्वेन तदनुरोधेन निर्दुष्टलक्षणानां तन्मूलकप्रयोगाणां चान्यथाकर्तुमनुचितत्वात्। **चक्रतुरिति**। साच्कस्य द्विर्वचनमिति स्वविधिर्भवति। ततश्च

---

[1] पा. सू. ४. १. १२१.
[2] पा. सू. ७. २. १०.
[3] पा. सू. ७. ३. ५०.
[4] पा. सू. ७. ३. ५०.
[5] लौ. न्या. द्वितीयभागे पुटम् ३५.
[6] प्रदीपे 'पूर्वस्येत्यनेन' इत्यत्र 'पूर्व इत्यनेन' इति रत्नप्रकाशकृत्पाठ इति भाति।
[7] का. वा. १. १. ५८–३.
[8] का. वा. १. १. ५८–३.
[9] का. वा. १. १. ५८–१०.

[1]'द्विर्वचनेऽचि' इति सूत्रं न कर्तव्यमिति भावः। एतेन 'अरिरिषति' इति रूपसाधनाय 'न हि कार्यी निमित्ततयाश्रीयते' इति परिभाषामाश्रयन्तो निरस्ताः। तत्र गुणस्य स्थानिवद्रूपे सति द्वित्वप्रसक्त्यभावेनैव स्थानिवत्त्वाभावस्य सिद्धत्वेन निर्मूलतत्परिभाषाश्रयणानर्थक्यात्। **अत्रापि प्राप्नोतीति**। स्थानिवद्रूपतेति शेषः। **स्वाश्रया इति**। संज्ञातिदेशाभिप्रायकम्। 'विधिग्रहणं विधिमात्रे स्थानिवद्यथा स्यादित्येवमर्थम्' इति सिद्धान्तिना यदुक्तं तद् यथाश्रुतसूत्रन्यास इति न तेन विरोधो दोष इति मन्यते। एतेनास्य कुत्सितस्य मतस्य समर्थनपरमध्येतृव्यामोहकरं "शब्दानां स्वं लक्षणम्। तेन ज्ञापकाश्रया इत्यर्थः। [2]'द्वयोरेकस्य डतरच्' [3]'देयमृणे' [4]'किरतौ लवने' इत्यादि ज्ञापकमादेशाश्रयकार्यभावस्य" इति निरस्तम्। सूत्रार्थस्यान्यथाज्ञानेनैव बहुषु स्थलेषु शङ्काग्रन्थस्योपपन्नत्वेनात्रापि तथैवोपपादयितुं युक्तत्वात्। **न वक्तव्यमिति**। 'अपरविधौ' इत्यत्र परशब्दस्यावधित्वेनादेशः संबध्यते चेत् 'बेभिदिता' इत्याद्यसिद्धिप्रसङ्गात्, निमित्तमभिसंबध्यते चेत् 'हे गौः' इत्याद्यसिद्धिप्रसङ्गाच्चाधिकाद्दोषादिति भावः। **निमित्तमभिसंबध्यत इति**। इदमपि [5]'यक्षानुरूपबलिन्यायेनैव ज्ञेयम्। 'स्थानिभूतादचः पूर्वत्वेन दृष्टस्य विधौ' इति सिद्धान्तस्य व्यवस्थापयिष्यमाणत्वात्। **मूर्धाभिषिक्तमिति**। सर्ववृत्तिषूदाहृतत्वात्। **पट्व्येति**। 'पटु ई आ' इति स्थिते पूर्वं परयणादेशे कृते तेन व्यवधानात् पूर्वस्य यणादेशो न प्राप्नोति, स्थानिवद्भावात्तु भवति। अन्तरङ्गोऽपि पूर्वयणादेशो न प्रवर्तते, [6]'अन्तरङ्गानपि विधींस्तन्निमित्तविघातको बहिरङ्गो विधिर्बाधते' इत्युक्तेरिति भावः। **व्यवहितेऽपीति**। पूर्वग्रहणे विद्यमाने परस्य न प्राप्त एवेति [7]'पूर्वस्यैवेति नियमपरा "तस्मिन्' इति परिभाषात्र न प्रवर्तत इति भावः। **आदेश एवाभिसंबध्यत इति**। इदं सूत्रकृदभिमतम्। उत्तरसूत्रगतं सवर्णग्रहणं ह्येवमेवोपपद्यते, न तु 'योऽनादिष्टात्' इति वक्ष्यमाणसिद्धान्तभाष्यानुसारेण। **भावसाधनस्येति**। तथा च पूर्वशब्दस्य भावप्रधानस्य विधिशब्देन षष्ठीतत्पुरुषः। पूर्वत्वस्य विधौ, विधीयमानस्य पूर्वत्व इत्यर्थः फलित इति भावः। **इट् च नेति**। धिन्वन्तीत्यत्र वकारस्य स्थानिवद्रूपेण वलादेरभावादिति भावः। **परिहारं वक्ष्यतीति**। दध्यत्रेत्यत्र [9]'संयोगान्तलोपे यणः प्रतिषेधः' इति, चक्रतुरित्यत्र तु [10]'द्विर्वचनेऽचि' इति भावः॥

अत्रेदमवधेयम् — बेभिदितादिसिद्धये तन्त्रेण कर्मसाधनविधिशब्दान्तोऽपि 'पूर्वविधौ' इति निर्दिष्ट इति। वस्तुतस्तु 'आयन्, आसन्' इत्यत्र विकरणोत्पत्तेः पूर्वमेव परत्वेनाटि कृते ततोऽन्तरङ्गत्वेन विकरणोत्पत्तेः पूर्वमेव [11]'आटश्च' इति वृद्धौ कृतायां ततो विकरणे तस्य लुकि चास्तेरत इण एश्चाभावेनाल्लोपयणोस्तत्रासंभवादेव सिद्धौ तदर्थं भावसाधनपक्षो न ग्राह्य एव। एवं च 'अचः पूर्वत्वविज्ञानादैचोः सिद्धम्' इति सिद्धान्तविरोधोऽपि न भवति। अन्यथा वैयाकरण इत्यत्र भाव्यमानस्य आयः पूर्वत्वं भवतीत्ययुक्तमेव तत् स्यादिति॥

---

[1] पा. सू. १. १. ५९.
[2] पा. सू. ५. ३. ९२.
[3] पा. सू. ४. ३. ४७.
[4] पा. सू. ६. १. १४०.
[5] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[6] महाभाष्यम् १. १. २९.
[7] अव्यवहितपूर्वस्यैवेत्याशयः।
[8] पा. सू. १. १. ६६.
[9] का. वा. ८. २. २३–१.
[10] पा. सू. १. १. ५९.
[11] पा. सू. ६. १. ९०.

[१, ४२५–४३०]

(**नारायणीयम्**) संबुद्धिलोपे स्थानिवद्भावाभावस्य कथं निमित्तमेङग्रहणमित्याशङ्क्य स्थानिवत्त्वे एङग्रहणमन्तरेणापि सिद्धेरित्याह — **अग्न इति**। यत्रैङन्ते सति स्थानिवत्त्वेऽप्यन्यतोऽसिद्धिस्तादृशमेङन्तमस्य विषय इति ज्ञापकभङ्गमाशङ्क्य समाधत्ते — **नयत्यादीनामिति**। ननु चासत्यपि परविधित्वेन यलोपे वान्तादेशस्य स्थानिवत्त्वे संनिपातपरिभाषया [1]यलोपाप्रसङ्गः, तत्राह — **संनिपातेति**। अवाद्यादेश एव यलोपनिमित्तम्। [2]असति तस्मिन् तदप्रसङ्गादित्याशङ्क्याह — **वान्त इत्यादिना**। नन्वस्तु स्थानिवद्भावः, स्वाश्रयं द्वयच्त्वमादाय ढग् भविष्यतीत्यत आह — [3]**स्थानिवत्त्वादिति**। ननु स्वाश्रयं भवतीति पुरस्तादुक्तम्, तत् कथं स्वाश्रयं न लभ्यते, तत्राह — **यदिति**। विरोधमाविष्करोति — **संख्येति**। असति विधिग्रहणे किंविभक्त्यन्तः पूर्वशब्द उपादेयः, तत्राह — **अच इति**। विधिग्रहणमन्तरेण तदर्थलाभः [4]कथम्, अत आह — **षष्ठचेति**। यङ्वस्थानसमये प्रवृत्तस्येट उत्तरकालं निषेधप्राप्तौ सत्यामपि निवृत्तिर्न भविष्यतीत्यत आह — **नित्यत्वादिति**। ननु द्विरुक्तस्यानेकाच्त्वात् कथं [4]निषेधप्राप्तिः, तत्राह — **उपदेशेति**। ननु भिद्यशब्दस्थाने द्वावादेशौ। तत्र संमुग्धतया भिद्स्वरूपाप्रत्यभिज्ञानात् भिद्स्थानिकत्वाभावाच्च स्थानिवद्भावादपि भिदित्वापरामर्शात् कथमत्र [5]'एकाचः' इति निषेधप्राप्तिः, तत्राह — **द्विरिति**। षाष्ठिकं द्विर्वचनं द्विष्प्रयोगद्विर्वचनमिति सिद्धान्तः। तत्रोच्चारणक्रियाप्रवृत्तिमात्रेण प्राचीनासंमोहाद् भिदिरिहास्तीति बुद्धेरस्ति निषेधप्राप्तिरित्यर्थः। स्थानिवत्त्वेऽपि निमित्ताविघातान्निषेधमाशङ्क्याह — **अल्लोपस्येति**। नन्वानुपूर्व्या माथितिकः सिद्धः। नात्राकृत [6]इकादेशे लोपप्राप्तिः। [7]न चाकृते लोपे तान्तत्वमिति, तत्राह — **इकस्येति**। पाक्षिकश्चायं दोष इत्याह — **यदेति**। नन्वजादिसंनिपाताश्रयो "यस्य' इति लोपः [8]कादेशस्याजादित्वविघातस्य कथं निमित्तम्, अत आह — **संनिपातेति**। नित्यत्वादिकारलोपे झिरेव नास्तीत्याशङ्क्याह — **झेरिति**। चङा व्यवधानात् [10]कथं प्राप्तिः, अत आह — **तत्रेति**। कस्य तर्हि स्थानिवद्भावः, तत्राह — **स्थानिवदिति**। **कथमिति**। निमित्तं पूर्व एङ, तस्माद्विधिरस्तीति प्रश्नः। **अच इति**। अस्यैव सिद्धान्तत्वात्। नन्वचः पूर्वो गकारः, तस्मादुत्तरविधिः संबुद्धिलोपः, व्यवहितेऽपि परशब्दप्रवृत्तेः, अत आह — **निमित्तत्वेनेति**। विशेषः कथं लभ्यः, तत्राह — **तथा हीति**। निमित्तं विधिसंबन्धितया विशेषणमाश्रितमिति भावः। वाय्वोरित्युदाहरणात् स्वाश्रयनिवृत्तिर्विधिग्रहणफलमुक्तम्। तत्र किं शब्दाधिक्यादर्थाधिक्यमित्याशङ्क्याक्षरनिमित्तां स्वाश्रयनिवृत्तिं दर्शयति — **अच इति**। स्थानिनमाश्रित्य स्थानिवद्भावविधेः 'अनाश्रीयमाणायाम्' इत्यनुपपन्नमित्यत आह — **कार्य इति**। यद्वा 'वाय्वोः' इत्यत्र बहिरङ्गपरिभाषयाभिमतसिद्धिरभिहिता, तथापि पटयतीत्यादौ स्वाश्रयनिवृत्तये विधिग्रहणमावश्यकम्। अत एव पूर्वमपि भाष्यकारेण 'योऽत्र' इत्यादि परिहारान्तरमभिहितम्। अङ्गस्याड्विधेः कथं स्वविधित्वमित्याशङ्क्य विशिष्टकार्यित्वे[11] विशेषणमपि कार्यीत्यभिप्रायेणाह—

---

[1] यलोपप्रसङ्गः — ति.
[2] सति तस्मिन् — क.
[3] प्रदीपे 'स्थानिवद्भावात् त्र्यच्कत्वव्यपदेशे' इत्यत्र 'स्थानिवत्त्वात् त्र्यच्कत्वव्यपदेशे' इति पाठः स्वीकृतः।
[4] निषेधाप्राप्तिः — ति.
[5] पा. सू. ७. २. १०.
[6] एकादेशे — क.
[7] न च कृते लोपे — क.
[8] पा. सू. ६. ४. १४८.
[9] कादेशस्याजादित्वाविघातस्य — क.
[10] कथमप्राप्तिः — क.
[11] कार्यत्वे — क.

— **अजादेरिति** । 'एकाचः' इति बहुव्रीहिविज्ञानान्नाचः [1]कार्यित्वमित्याशङ्क्य विशिष्टकार्यित्वे-[2]ऽस्याप्यस्ति [3]कार्यित्वमित्याह — **साच्कस्येति**। **ढक इति** । भावसाधनो विधिशब्द इति भावः। निमित्तात् पूर्वत्वेनाडादिविधानाभावात् कथं निमित्ताभिसंबन्धेऽप्यभिमतसिद्धिरित्याशङ्क्य कर्म-साधनत्वमाश्रित्य परिहरति — **आयन्नित्यादिष्विति**। किंकृतमस्य प्राधान्यम्, अत आह — [4]**सर्वेति** । असंग्रहकारणमाह — **पट्विति** । निर्दिष्टग्रहणस्यानन्तर्यार्थत्वात् कथं शास्त्रे व्यवहित-पूर्वाश्रयणम्, अत आह — **पूर्वेति** । 'भावसाधनस्य' इत्यत्र किमपेरध्याहारः, किं वैवकारस्य। नाद्यः, सकृच्छ्रुतादर्थद्वयालाभात्। नान्त्यः, अव्याप्तेरेव। न हि यत्रादेशात् पूर्वस्य सतः कार्यं विज्ञायते तत्रादेशात् पूर्वो भाव्यत इत्याशङ्क्यावधारणमध्याहरन् अस्मिन् पक्षे प्राप्तमनिष्टं संबन्ध-सामान्यषष्ठ्यङ्गीकारेण निवारयति — **भावसाधन इत्यादिना** । विधानक्रियायां हि [5]कार्यमपि संबन्धितया विशेषणं भवत्येव। ननु सत्यपि स्थानिवत्त्वे स्वाश्रय इट् कथं नाम न स्यात्, अत आह — **विधीति** ॥

[१, ४३१–४३५]

(**लघुविवरणम्**) **चरत्यर्थे त्विति** । [6]'पद्भाव इके चरतावुपसंख्यानम्' इति वचनादिति भावः। 'असिद्धं बहिरङ्गलक्षणमन्तरङ्गलक्षणे' इत्यनुपपन्नम्, [7]'नाजानन्तर्ये' इति प्रतिषेधात्, अत आह — **नित्यादपीति**। [8]'परनित्यान्तरङ्ग' इति परिभाषात्र विवक्षितेति भावः। 'आरभ्य-माणे नित्योऽसौ' इति येनोक्तं तस्य यदि 'परश्चासौ' इति ग्रन्थस्तर्हि स्वरो न सिध्यतीति दोषः स्वपक्षे [9]स्वेनैवाङ्गीकृतः स्यादित्यत आह — **स एवेति**। नन्वत्र यणादेशशास्त्रस्यैकत्वात् शास्त्र-परविप्रतिषेधो नोपपद्यते, अत आह — **शब्देति**। ननु सर्वेषु लक्ष्येष्वेकं शास्त्रं सकृत् प्रवर्तमान-मुभयत्रापि यौगपद्येन प्रवर्तेतेत्यत आह — **एकमपीति**। ननु शास्त्रद्वयमपि विरोधाभावाद्युगपदेव प्रवर्तेतेत्यत आह — **एकस्य चेति**। आदेशेन हि निवर्त्यमानमलब्धास्पदं कथमिव हेतुः स्यादिति भावः। नन्वङ्गस्याङ्गिसापेक्षत्वात् 'प्रत्यङ्गवर्ती लोकः' इत्यत्र लोकशब्देन यद्यङ्ग्यभिधीयते तत-स्तस्य प्रत्यङ्गवर्तित्वमनुपपन्नम्, न हि शरीराद्यङ्गी हस्तादिष्वङ्गेषु प्रत्येकं परिसमाप्य समवैतीत्यत आह — **प्रत्यासन्नेति**। नन्वङ्गमङ्गं प्रति प्रत्यङ्गमिति व्युत्पाद्यमानस्य यौगिकत्वान्न रूढ्या प्रत्या-सन्नवाचित्वं संभवतीत्यत आह — **अङ्गशब्देनेत्यादिना**। विभोरात्मनः स्वशरीरमिव सुहृदोऽपि प्रत्यासन्ना एवेत्यत आह — **शरीरस्येति** । **भोगः** सुखदुःखसाक्षात्कारः। 'बाह्येनार्थेन योगो भवति' इत्यनुपपन्नम्, नित्यत्वाच्छब्दार्थसंबन्धस्य, शब्दबुद्धिकर्मणां विरम्य व्यापाराभावात् क्रमे-णार्थ[10]प्रतिपादकत्वाभिधानमप्ययुक्तमित्यत आह — **नित्येऽपीति** । [11]**उपेयस्येति** । साधुशब्दस्ये-त्यर्थः। ननु 'सामान्यभूतेऽर्थे वर्तते' इत्यनुपपन्नम्। वर्तनं हि संयोगो वा स्यात् समवायो वा। नाद्यः, शब्दस्य गुणत्वे न सामान्येन संयोगः, द्रव्ययोरेव संयोगात्। द्रव्यत्वेऽपि शब्दस्य सामान्य-

---

[6] का. वा. ६. ३. ५३–१.

[1] कार्यत्वम् — क.
[2] कार्यत्वे — क.
[3] कार्यत्वम् — क.
[4] 'सर्वेति' इत्यादि 'व्यवहितपूर्वाश्रयणमत आह' इत्यन्तं नास्ति — क.
[5] कार्येऽपि — क, ति.
[7] परिभाषा ५१.
[8] परिभाषा ३८.
[9] स्वेनाङ्गीकृतः — ड.
[10] प्रतिपादनमप्ययुक्तम् — ड, ढ.
[11] प्रदीपे 'उपेयव्यवस्थापनात्' इत्यत्र 'उपेयस्य व्यवस्थापनात्' इति पाठोऽभिमतः।

स्याद्द्रव्यत्वान्नात्र संयोगः। नापि द्वितीयः, न हि शब्दस्य सामान्येन समवायः। किं तर्हि, [1]सामान्ये शब्दस्य वर्तनमभिधानं विवक्षितमिति चेत् किमिति आदौ सामान्यमेवाभिधत्ते न व्यक्तिमित्यत आह — **तत्रेति**। अभिधानं नाम मुख्यया वृत्त्या शब्दनिष्ठं बोधकत्वम्। न च विशेषणमबोधयित्वा विशिष्टं बोधयितुं शक्यते। न च विशेषणबोधः शाब्दे व्यवहारेऽन्यतः प्राप्त इति भावः। **ततस्तदनुरक्तेति**। नैयायिकमतानुसारेणाभिधानशक्त्या, मीमांसकमतानुसारेण लक्षणया। **द्रव्यं** व्यक्तिः। ननु लिङ्गादिप्रतीतेः प्राक् किमिति व्यक्तावेव प्रतीतिरुपजन्यते, अत आह — **लिङ्गेति**। **शक्तिः** कर्मत्वादिः। [2]'तदागमे हि दृश्यते' इति न्यायेन [3]संख्यादीनां प्रत्ययार्थत्वात् प्रथमोच्चारितप्रकृत्या प्रथममेव द्रव्यप्रतीतिर्युक्तेति भावः। ननु किमिति आदौ लिङ्गमभिधीयत इत्यत आह — **तत इति**। विभक्त्यंशात् प्राग्वर्त्यंशाभिधेयत्वेन संख्याद्यपेक्षया लिङ्गं प्रत्यासन्नमिति भावः। निरपेक्षत्वादपि तत्पूर्वमभिधेयमित्याह — **द्वचादीति**। एकत्वस्य कथं बहिरङ्गत्वमित्यत आह — **एकत्वेति**। विभक्त्यभिधेयत्वस्य तुल्यत्वात् किमिति आदौ संख्याभिधीयते, न [4]शक्तिरित्यत आह — **सापीति**। ननु शक्तेः संख्यादिभिरेकार्थसमवायाविशेषात् कथं बाह्यत्वमित्यत आह — **तद्धीति**॥

[१, ४३१–४३५]

(विवरणम्) चरत्यर्थे त्विति। [5]'पद्भावे इके चरतावुपसंख्यानम्' इति वचनात्, [6]'पर्पादिभ्यः ष्ठन्' इति पदिक इति भवतीत्यर्थः। [7]'असिद्धं बहिरङ्गलक्षणम्' इति कथम्, [8]'नाजानन्तर्ये' इति निषेधादित्यत आह — **नित्यादिति**। [9]'परनित्यान्तरङ्गं' इति परिभाषा विवक्षितेति भावः। **तदा ङीप इति**। अन्तरङ्गत्वादेव परयणादेशात् पूर्वमिति भावः। [10]'भवतूभयोर्नित्यत्वम्, किमत इत्यत आह भाष्यकारः — **परश्चेति**। **व्यवस्थया** [11]'विप्रतिषेधे परम्' इति नियमेनेत्यर्थः। नन्वेवं परं शास्त्रमित्युच्यते, कथं तदसति शास्त्रभेदे स्यादित्यत आह — **एकमपीति**। ननु विप्रतिषेधे परेण व्यवस्था, स एव कथमित्यत आह — [12]**एकस्य चेति**। आदेशस्य प्रसङ्गे विधानादादेशसमये स्थानिनोऽसत्त्वम्, निमित्तत्वं च सत्त्वे, सत्त्वासत्त्वे चैकस्यैकत्र युगपद्विरुद्धे इति भावः। 'प्रत्यङ्गवर्ती' इत्यत्राङ्गशब्देनावयवाभिधानात् लोकशब्देनावयव्यभिधीयत इति न मन्तव्यम्, अवयविनो व्यासज्यवृत्तित्वेन प्रत्यवयववृत्तित्वाभावात्, प्रकृतानुपयोगप्रसङ्गाच्चेत्यभिप्रेत्याह — **प्रत्यासन्नेति**। **प्रत्यासन्नत्वात्** अङ्गिनं प्रतीति शेषः। भाष्ये शरीरं प्रतीत्यन्वयः। स्वशरीरमिति चार्थः। प्रत्यासत्तिश्च तेन न संयुक्तत्वात्, विभोरात्मनस्तस्य सर्वत्राविशेषात्, किं त्वन्यथेत्याह — **शरीरस्येति**। **भोगः** सुखदुःखसाक्षात्कारः। ननु बाह्येनार्थेन योगो भवतीति कथम्, नित्यत्वाच्छब्दार्थसंबन्धस्य। लोके च युगपत् सकलार्थ[13]प्रतीतेः क्रमाभिधानमप्यर्थप्रतिपादनस्यायुक्तमित्यत आह — **नित्येऽपीति**। सामान्ये वर्तनं नाम सामान्याभिधानम्, तत्र प्रथमं

---

[1] सामान्यस्य शब्दे वर्तनम् — ड, ढ, ण.
[2] मीमांसासूत्रम् ४. १. १५.
[3] संख्याकर्मादीनां — ण.
[4] न तु शक्तिः — ढ.
[5] का. वा. ६. ३. ५३—१.
[6] पा. सू. ४. ४. १०.
[7] परिभाषा ५०.
[8] परिभाषा ५१.
[9] परिभाषा ३८.
[10] भवतु तयोः — ञ.
[11] पा. सू. १. ४. २.
[12] एकस्येति — ञ, ट.
[13] प्रतीतिः — ञ.

सामान्याभिधाने युक्तिमाह — **तत्रेति**। न विशेषणाभिधानं विना विशिष्टाभिधानं सुबोधम्। न च शाब्दे व्यवहारेऽन्यतस्तत् प्राप्तमिति भावः। 'द्रव्य' इति [1]व्यक्तिर्विवक्षिता। तत्प्रतीतिश्च शब्देनाभिधावृत्त्येति केचित्। अन्ये तु लक्षणावृत्त्येति। सामान्यसमनन्तरमेव व्यक्त्यभिधाने युक्तिमाह — **लिङ्गेति**। **शक्तिः** कर्मत्वादिः। आश्रय इत्यनेन [2]शब्दतो विशेषणत्वेन प्रतीत्यभावे सति गुणत्वं लिङ्गादीनां प्रथमतोऽनभिधाने कारणम्, द्रव्यस्य च प्रथमतोऽभिधाने प्राधान्यं कारणमुक्तम्। प्रत्यासन्नत्वं लिङ्गस्य संख्यात उपपादयति — **द्व्यादीति**। **वस्त्वन्तरेति**। स्वसमवायिकारणत्वेनानेक[3]वस्त्वपेक्षेत्यर्थः। [4]नन्वेवमेकत्वस्य कथं वस्त्वन्तरापेक्षा, [5]सा हि न व्यासज्यवर्तिनीत्यत आह — **एकत्वेति**। प्रयोजनापेक्षया बहिरङ्गेत्यर्थः। **सजातीयेति**। द्रव्यत्वापेक्षया च सजातीयत्वम्। एतच्च संख्या गुणः, गुणश्च द्रव्यमात्रवृत्तिरित्याश्रित्योक्तम्। अथवा स्वाश्रयत्वेन सजातीयत्वम्। ननु लिङ्गादिभिरेकार्थसमवायाविशेषात् कथं शक्तेर्बाह्यत्वमित्यत आह — **तद्धीति**॥

[१, ४३१–४३५]

(**उद्द्योतनम्**) पादाभ्यां चरतीति पदिकः। [6]'पर्पादिभ्यः ष्ठन्' इत्यत्र [7]'पादः पच्च' इत्युपसंख्यानात्। **अण्** [8]'कर्मण्यण्'। [9]'उदकस्योदः संज्ञायाम्' इत्युदादेशः। **संज्ञायामिति**। ऊठि सति संज्ञात्वानभिव्यक्तेरिञ्नन्तरमूठ् न भवति। तथा च नेदं दृढोदाहरणमिति भावः। भाष्ये **अल्लोपः** [10]'अल्लोपोऽनः', **टिलोपः** [11]'नस्तद्धिते' इत्यनेन। णत्वस्यासिद्धत्वान्नान्तत्वमिति भावः। ननु [12]'नाजानन्तर्ये' इति निषेधात् कथमत्रासिद्धपरिभाषा, अत आह — **नित्यादपीति**।

"परं विदुः पूर्वपरोपपत्तौ परस्य नित्यस्य च नित्यमेव।
नित्यान्तरङ्गोपगमेऽन्तरङ्गं तस्माद्विधिः प्रातिपदो बलीयान्"

इति वृद्धोक्तेरित्यर्थः। उदात्तस्थानिको यो यण् हल्पूर्वस्तस्मात्परा नद्यसर्वनामस्थानमजादिविभक्तिश्चोदात्ता स्यादिति भाष्योदाहृतसूत्रार्थः। **इष्टमिति**। नदीविभक्त्योर्द्वयोरप्युदात्तत्वमिष्टम्, तच्च प्रथमं [13]पूर्वयणि सत्येव भवतीत्यर्थः। ननु भवतु द्वयोर्नित्यत्वम्, ततः किम्, अत आह — भाष्ये **परश्चेति**। **व्यवस्थया** [14]'विप्रतिषेधे परम्' इति नियमेन। नन्वेकस्य यण्शास्त्रस्य कथं पौर्वापर्यम्, अत आह — **एकमपीति**। शास्त्रभेदेऽपि विरोधाभावात् कथं परव्यवस्था, अत आह — **एकस्य चेति**। निवर्तमानस्य स्थानित्वं विद्यमानस्य च निमित्तत्वमिति [15]विरुद्धं युगपदेकस्य न संभवतीत्यर्थः। सूत्रारम्भवाद्याह — भाष्ये **एवं तर्हीति**। भाष्ये **सा तर्हीति**। 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इत्येषा परिभाषा। प्रत्याख्यानवाद्याह — भाष्ये **ननु चेयमपीति**। नन्वङ्गशब्दस्यावयववाचित्वाल्लोकशब्दोऽवयविपरः। न चावयवी प्रत्यवयव-

---

[1] व्यक्तिविवक्षा — च, छ.
[2] शब्दघटितविशेषणत्वेन — च, छ.
[3] वस्त्वपेक्षयेत्यर्थः — च, छ, ञ.
[4] नन्वेवमेकस्य — ञ.
[5] एकत्वरूपसंख्येत्यर्थः।
[6] पा. सू. ४. ४. १०.
[7] पर्पादिगणसूत्रम्।
[8] पा. सू. ४. ४. १.
[9] पा. सू. ६. ३. ५७.
[10] पा. सू. ६. ४. १३४.
[11] पा. सू. ६. ४. १४४.
[12] परिभाषा ५१.
[13] पूर्वे यणि — अ.
[14] पा. सू. १. ४. २.
[15] 'विरुद्धम्' इति नास्ति — आ.

पर्याप्तवृत्तिः, व्यासज्यवृत्तित्वात्, प्रकृतानुपयोगश्च, अत आह — **प्रत्यासन्नेति**। [1]लक्षणाबीजमाह — **अङ्गनामिति**। **भोगेति**। तथा चेतरापेक्षया प्रत्यासन्नत्वमित्यर्थः। भाष्ये **प्रतिशरीरं** शरीरं प्रति। ननु शब्दार्थसंबन्धानां नित्यत्वात् क्रमेण [2]शब्दप्रतीतिरयुक्ता, शब्दश्रवणानन्तरं युगपत् सर्वार्थ[3]प्रतीतेस्तत्क्रमोऽप्ययुक्तः, अत आह — **नित्येऽपीति**। भाष्योक्तं प्रतीतिक्रममुपपादयति — **तत्रेति**। घटशब्दाद् घटत्वप्रतीत्यनन्तरं तद्विशिष्टद्रव्यप्रतीतिरित्यर्थः। **द्रव्ये** व्यक्तौ। लिङ्गाद्यपेक्षया व्यक्तेः पूर्वप्रतीतौ [4]प्राधान्यं हेतुमाह — **लिङ्गेति**। **शक्तिः** कारकम्। **तत्पूर्वं** लिङ्गादेः पूर्वम्। लिङ्गस्यासन्नत्वमाह — **द्वचादीति**। कारकात् संख्यायास्तदाह — **सेति**। **सजातीयेति**। आश्रयत्वेन सजातीयेत्यर्थः। भाष्ये **ह्रस्वान्त इति**। [5]'बहोर्नञ्वदुत्तरपदभूम्नि' इत्यतिदेशात् सर्वत्रेष्यत इत्यर्थः॥

[१, ४३१–४३५]

(**रत्नप्रकाशः**) एतत्सूत्रोदाहरणानि कानिचिदन्यथापि साधयितुं शक्यन्त इति प्रयोजनविचारमारभते — **कानीति**। **स्तोष्याम्यहमिति**। कथयिष्यामीत्यर्थः। तत्र कर्मतया 'पादिकम्' इत्युदाहरणानामन्वयः। तत्र पादोऽस्यास्तीति मत्वर्थीयष्ठन्। पादेन दीव्यतीति ठग्वा। चरत्यर्थे ठकि तु [6]'पद्भावे इके चरतावुपसंख्यानम्' इति वचनात् पदिक इत्येव भवति। उदकं वहतीत्यर्थेऽण्, संज्ञायामुदभावः, अपत्य इञ्, [7]'इतो मनुष्यजातेः' इति [8]ङीष्। श्वोभूतिर्नाम शिष्यः, तस्यामन्त्रितम्। शातनपातनशब्दाभ्यां गौरादित्वान्ङीष्। नेतारौ इति शिष्ययोरामन्त्रितम्, नयेते प्राप्नुतो गुरुमुखाच्छास्त्रमिति व्युत्पत्तेः। धारणरावणशब्दाभ्याम् [9]'अत इञ्'। **यजादीनां य इति**। एतत्सूत्राभावे एवं व्याख्यातुं शक्यत इति भावः। सति सूत्रेऽनेनैवोपपत्तौ तत्र क्लिष्टकल्पनानाश्रयणीयैव। **असिद्धमिति**। [10]'अन्तरङ्गानपि' इति तु [11]'ज्ञापकसिद्धं न सर्वत्र' इत्यत्र न भविष्यतीति भावः। 'नित्यादप्यन्तरङ्गं बलीयः' इति प्रकृतभाष्यस्वरसादपि गम्यते। **अवश्यं चेति**। सत्यप्यस्मिन् सूत्र इति भावः। **कर्त्र्येति**। 'कर्तृ ई आ' इति स्थितेऽन्तरङ्गे पूर्वयणि कृते तस्मादुदात्तयणो हल्पूर्वात् परस्य ङीपोऽनुदात्तस्य [12]'उदात्तयणो हल्पूर्वात्' इत्युदात्तः। ततस्तस्य यणि ततः परस्याकारस्य तेनैवोदात्ते सिद्धमिष्टमिति भावः। **अनेनेति**। प्रकृतसूत्रेणेत्यर्थः। **परश्चासौ व्यवस्थयेति**। ह्यर्थे चः। **असौ** परयणादेशः, **व्यवस्थया** परस्य स्थाने जायमानत्वात्, परो हीत्यर्थः। तथा [च] विप्रतिषेधे पर एवादौ स्यादिति भावः। ननु युगपदुभयोर्यणोः प्रवृत्तिसंभवेन विरोधाभावात् कथं [13]'विप्रतिषेधे परम्' इत्यस्य प्रवृत्तिरित्यत आह — **युगपत्संभवो नास्तीति**। ङीपः पूर्वयणं प्रति निमित्ततया सत्त्वं स्वयणं प्रति निवृत्तिश्चेत्युभयं युगपन्न संभव-

---

[1] 'लक्षणा' इत्यादि 'भोगेति' इत्यन्तं नास्ति — अ; लक्षणे बीजमाह — आ.
[2] शब्दप्रतिपत्तिरयुक्ता — आ, म.
[3] प्रतिपत्तेः — म.
[4] प्राधान्ये हेतुमाह — म.
[5] पा. सू. ६. २. १७५.
[6] का. वा. ६. ३. ५३–१.
[7] पा. सू. ४. १. ६५.
[8] एवं कथनेन भाष्ये 'औदवाहिम्' इत्यस्य स्थाने 'औदवाहीम्' इति पाठोऽभिमत इति प्रतीयते।
[9] पा. सू. ४. १. ९५.
[10] 'अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते' इति परिभाषेत्यर्थः।
[11] परिभाषा १२५.
[12] पा. सू. ६. १. १७४.
[13] पा. सू. १. ४. २.

तीति भावः। युक्त्यन्तरं स्मर्तुं कालक्षेपाय पृच्छति — **कथं च सिध्यतीति**। तस्योत्तरमाह — **बहिरङ्गेणेति**। समयं प्राप्य स्मृतयुक्तिराह — **एवं तर्हीति**। **अत्रोदात्तयणिति**। 'कर्त्र्या' इत्यत्र ऋकारस्य रेफः। **कर्तव्येति**। या तु 'स्वरविधौ व्यञ्जनमविद्यमानवत्' इति परिभाषा सा यस्य व्यञ्जनस्य स्वरः प्राप्नोति तद्व्यञ्जनमविद्यमानवदित्येतदर्थकतया व्यवस्थापितेत्याशयेनान्यार्थिकाया अस्याः कर्तव्यतापादिता। **अवश्यमिति**। यतो बहुप्रयोजनेति प्रागुक्तं बहुप्रयोजनत्वं हेतुत्वेन संबध्नाति। **सा चाप्येषेति**। यदाप्यवश्यं कर्तव्या [1]तदापि यत्नविशेषमन्तरेण लोकत एव सिद्धेत्यर्थः। **प्रत्यङ्गवर्तीति**। अङ्गशब्देन शरीरलक्षकेण लक्षणवाचिनः प्रतिशब्दस्य [2]'लक्षणेनाभिप्रती आभिमुख्ये' इत्यनेनाव्ययीभावः। तस्मिन्नुपपदे [3]'सुप्यजातौ णिनिस्ताच्छील्ये' इति [4]'वृतेर्णिनिः। अङ्गं प्रति वर्तनं नाम शौचाचमनदन्तधावनस्नानाद्यनुष्ठानम्। तदेतदभिप्रेत्योक्तम् — **प्रतिशरीरं यानीति**। एतेन 'प्रत्यासन्नवाची प्रत्यङ्गशब्दः। अङ्गशब्देन प्रत्यासत्तिर्लक्ष्यते, अङ्गानां प्रत्यासन्नत्वात्। अङ्गमङ्गं प्रति प्रत्यङ्गमित्यव्ययीभावः' इति कैयटो निरस्तः। साक्षाद्भगवतैवाङ्गशब्दस्य शरीरपरतया व्याख्यातत्वेन तद्विरोधेन तस्य प्रत्यासत्तिलक्षकत्वेन व्याख्याने औचित्यमानप्रयोजनानामभावात्। ननु यथाश्रुतभाष्याल्लोकाचारप्रतिपादकादसिद्धपरिभाषार्थलाभः कथमिति चेच्छृणु, स्वशरीरं स्वभोगायतनत्वेनात्यन्तं प्रेमास्पदत्वादन्तरङ्गं सुहृदाद्यपेक्षया। सुहृदश्च संबन्ध्यपेक्षया स्वहितकारिण इत्यन्तरङ्गा इत्येव लोके तावदन्तरङ्गबहिरङ्गभावः सर्वानुभवसिद्धः। दार्ष्टान्तिकेऽपि प्रातिपदिकं सामान्ये लाघवानुगृहीततयान्तरङ्गे तावत् प्रवर्तते। ततो व्यक्तिपरिच्छेदकलिङ्गसंख्यापेक्षया स्वार्थाश्रयतयान्तरङ्गायां व्यक्तौ वर्तते। तत्र लिङ्गविशिष्टपरिच्छेदकसंख्यापेक्षया लिङ्गस्य केवलप्रातिपदिकार्थाश्रयव्यक्तिमात्रपरिच्छेदकतयान्तरङ्गत्वेन तद्वृत्तिपूर्वकं प्रातिपदिकस्य संख्यायां वर्तनं ज्ञेयमिति सिद्धोऽन्तरङ्गबहिरङ्गभाव इति। **तद्वत्कार्यैरपीति**। अन्तरङ्गाश्रितस्य कार्यस्यान्तरङ्गत्वात्, बहिरङ्गाश्रितस्य बहिरङ्गत्वादिति भावः। अयमेव क्रमः पाणिनिनाप्याश्रितः। स ह्यव्यक्तं सामान्यपरान् धातून् प्रथमतो निर्दिश्य ततो व्यक्तिसमर्पकान् कृतो विधाय ततो लिङ्गबोधकान् टाबादीन् विधाय ततः संख्याकारकादिबोधकविभक्तिं विधाय विभक्त्यन्तात् तद्धितान् विहितवान्। **बाह्येनेति**। अपत्यादिना। एतेन 'कर्मत्वादिना। तद्धि क्रियापेक्षत्वाद् बाह्यम्' इति कैयटो निरस्तः। संख्याकारकोभयद्योतकतया विभक्तेरेकस्या एव विहितत्वेन संख्यासमकक्षत्वात् कर्मत्वादेः, भाष्यगतसंख्याशब्दस्य कर्मत्वाद्युपलक्षणतयैव व्याख्यातुं युक्तत्वात्। एवमेव 'तद्वत् कार्यैरपि भवितव्यम्' इति भाष्यस्योक्तपाणिन्याश्रितक्रमस्य [5]'चोपपन्नत्वाच्च ॥

[१, ४३१–४३५]

(नारायणीयम्) गुणगणकीर्तनरूपस्य मुख्यस्य स्तौत्यर्थस्येहासंभवात् कीर्तनमात्रमुच्यत इत्याह —**कथयिष्यामीति**। **चरतीति**। [6]'पद्भावे इके चरतावुपसंख्यानम्' इत्यनेन। किं कृतस्य यणोऽसिद्धत्वं विवक्षितम्, नेत्याह — **नित्यादिति**। कृतस्य त्वसिद्धत्व उच्यमाने 'कर्त्र्या' इत्यादौ [7]'स्वरासिद्धिः स्यात्। तस्याः परिभाषाया बहुप्रयोजनत्वादकर्तव्यताशङ्कानुदयादावश्यकत्वस्थापनं

---

[1] तथापि — ब.
[2] पा. सू. २. १. १४.
[3] पा. सू. ३.२ . ७८.
[4] वृत्तेर्णिनिः — ब.
[5] चकारो नास्ति — ब.
[6] का. वा. ६. ३. ५३ — १.
[7] स्वरसिद्धिः' — क.

मुधेत्याशङ्क्य स्थानिवद्भावविषये [1]तस्या नापेक्षेत्यपि वक्तुं [न] शक्यत इत्येतावदुच्यत इत्याह— **स्थानिवदिति** । स्थानिवद्भावाद्रूपमात्रसिद्धावपि स्वरासिद्धिं बहिरङ्गपरिभाषया तत्सिद्धिं च विशदयति — **कात्रेति** । पूर्वयणादेशस्य नित्यत्वेऽपि परस्यापि तथात्वात् कथमस्य प्राक् प्रवृत्तिः, येन स्वरसिद्धिः स्यादित्याशङ्क्योभयोर्नित्यत्वे [2]'विप्रतिषेधे परम्' इति परशब्दस्येष्टवाचितयाभिमतसिद्धिरित्यभिसंधायाह — **सतीति** । परयणो नित्यत्वस्य प्रागेव प्रतिपादितत्वादविगीतार्थानुवादो व्यर्थ [3]इत्याशङ्क्य 'परश्चासौ' इति परशब्दो व्यवस्थायां सुप्रसिद्ध इति वक्ष्यमाणभाष्यशेषोऽयं प्रागुक्तानुवाद इत्याह — **इतर इति** । लक्ष्यानुसारादिष्टवाचिनः परशब्दस्य ग्रहणमित्याशङ्क्य बहिरङ्गपरिभाषयेष्टसिद्धिसंभवे किमित्ययं क्लेश इत्यभिसंधायाह — **स एवेति**। **शब्देति**। शास्त्रस्य च परत्वं पाठकृतं विषयकृतं चाविशेषात् तत्राश्रीयत इत्यर्थः। ननु लक्षणभेदे परशब्दविषयत्वेन परत्वमस्य वाच्यम्, स एव तु नास्ति, तत्राह — **एकमपीति**। भाष्योक्तं युगपदसंभवं प्रकटयति — **एकस्य चेति**। उपकारकत्वेन सुहृदादीनामङ्गता चेदभिमता, अन्तरङ्गे प्राक्प्रवृत्तेरुदाहरणं न स्यात्, अत आह — **प्रत्यासन्नेति**। वाचीत्युक्त्या रूढिभ्रान्तिः स्यात्, अत आह — **अङ्गेति** । लक्षणानिमित्तं संबन्धमाह — **अङ्गनामिति** । अङ्गशब्देन चेत् प्रत्यासत्तिर्लक्ष्यते प्रत्तेरर्थान्तरं वाच्यम्, तदाह — **अङ्गमिति**। उपक्रमे तु प्रत्यासन्नवाची प्रत्यङ्गशब्द इत्युक्तं [4]प्रत्यर्थपरामर्शेनासन्नवर्तनस्यैव प्रकृतोपयोगितया । [5]'अङ्गशब्देन' इत्यत्र यदि वाशब्दोऽस्ति तदा सुयोजनम्। सर्वतः शरीरासत्तिः किंकृतेत्याशङ्क्याह — **[शरीरस्येति।] सौहार्दस्येति**। अनुकूलाचरणं सौहार्दम्। पित्रादेः संबन्धिनः स्वजनाद्यपेक्षं [6] प्रत्यासत्तिं सिद्धवत्कृत्य तेषां कार्यकरणे [7]कारणमाह — **अवश्यकर्तव्यत्वादिति**। अकरणे प्रत्यवायात्। शरीरकार्यकरणे भोगासिद्धिः, सुहृत्कार्याकरणे प्रत्युपकारासिद्धिस्तत्कार्यकरणे कारणम्। ननु लोके पदात् प्रयुज्यमानाद्युगपत्पञ्चकर्प्रतीतेः कथमभिधानक्रमोक्तिः। कथं च 'यथैव' इत्यादिनार्थप्रादुर्भावक्रमाधीनत्वं शब्दप्रादुर्भावक्रमस्योच्यते। शब्दार्थस्य नित्यत्वात्, तत्राह — **नित्येऽपीति** । [9]'उपादायापि ये हेयास्तानुपायान् प्रचक्षते' इति न्यायादसत्योपाश्रयेणाप्यन्वाख्यानप्रवृत्तिः। असत्यक्रमकल्पनानिमित्तं न्यायमाह — **तत्रेति** । तत्र गुणे सति विशेषण[10]ज्ञानसामग्र्यां सत्यां विशिष्टधीलक्षणकार्यस्य विलम्बानर्हत्वात्। इतश्च द्रव्यधीवल्लिङ्गादिधियः प्रागभाविन्य इत्याह — **लिङ्गेति** । **समासन्नमिति**। वस्त्वन्तरानपेक्षत्वात्। एकत्वसंख्यायाः स्वोत्पत्तौ वस्त्वन्तरानपेक्षत्वे[ऽपि] कार्येऽपेक्षामाह — **एकत्वेति** । 'सापेक्षत्वात् समानत्वं संख्याशक्त्योस्ततस्तयोः। नैकस्यान्तरता[11] युक्तियुक्तेत्यत्रोच्यतेऽधुना'—**सा सजातीयेति**। 'पञ्चकार्थबहिर्भूतः कुत्सनादिर्न चोच्यते। बाह्यशब्देन, कर्मादिस्त्यागापातात् स उच्यते' इत्याह — **कर्मत्वादिनेति**। प्रातिपदिकान्तर्गतस्य तस्य कथं बाह्यत्वम्, अत आह — **तद्धीति** ॥

---

[1] तस्यानपेक्षेत्यपि — क.
[2] पा. सू. १. ४. २.
[3] 'इत्याशङ्क्य' इत्यस्यानन्तरम् 'आह' इत्यधिकम् — क.
[4] प्रत्यर्थपरामर्शेनासन्निवर्तनस्यैव — क.
[5] सहशब्देन — क.
[6] क्रियाविशेषणमेतत्।
[7] 'कारणम्' इत्यस्यानन्तरम् 'ननु' इत्यतः प्राग्वर्तिग्रन्थो नोपलभ्यते — क.
[8] प्रवृत्तेः — क.
[9] वाक्यपदीयम् २. ३८.
[10] ज्ञाने सामग्र्यां — क; ज्ञापने सामग्र्यां — ति.
[11] अन्तरङ्गतेत्यर्थः।

[१, ४३५–४४०]

(**लघुविवरणम्**) ननु वैयाकरण इत्यत्र यणादेशस्य भावात् कथमादेशाभावेनानादिष्टत्वमित्यत आह — **अकृत इति**। ननु सूत्रेऽनादिष्टादित्यनभिधानात् कथमेतल्लभ्यत इत्यत आह — **अजपेक्षस्येति**। 'यदेवादः' इति भाष्यमनुपपन्नम्, शब्दानित्यत्वप्रसङ्गादित्यत आह — **सादृश्यादिति**। 'तद्यथा' इत्यनुपपन्नम्, अचा पूर्वत्वविशेषणे आदेशेन [1]पूर्वत्वस्याविशेषणादित्यत आह — **यथेति**। नन्वजपेक्षया पूर्वत्वे विज्ञायमाने धिन्वन्तीत्यत्र वकारस्येड्विधौ तस्याजपेक्षया पूर्वत्वाभावादसति स्थानिवद्भावे इट् स्यादित्यत आह — **धिन्वन्तीत्यत्रेति**। पञ्चमीसमासोऽप्याश्रीयत इत्यर्थः। 'निमित्तत्वेन' इति विशेषणकृत्यं दर्शयति — **वैयाकरण इत्यत्रेति**। 'तत्रादेशलक्षणप्रतिषेधः' इत्येतदनवसर उक्तम्, विधिग्रहणं स्वाश्रयनिवृत्त्यर्थमित्युक्तत्वादित्यत आह — **भाष्यकारेणेति**। ततश्च वार्तिककारस्य [2]प्रतिषेधवचनमुपपन्नमेवेति भावः। 'ननु चैतदपि' इत्यनुपपन्नम्, यणादेशस्य सिद्धत्वेऽपि तेन स्थानिनो निवर्तितत्वेनाच्परत्वाभावादित्यत आह — **शास्त्रेति**। 'नान्यस्य' इत्यनुपपन्नम्, यणादेशशास्त्राप्रवृत्तावीकारस्य स्थितत्वादित्यत आह — **कार्येति**। 'तदेव' इत्यनुपपन्नम्, विषयभेदेन शास्त्रभेदात्, अत आह — **सकृदिति**। एकेनैव कथं भावाभावावतिदेष्टुं शक्येते इत्यत आह — **एवमस्येति**। 'बहुखट्वकः' इत्यादौ स्वरविधौ व्यञ्जनस्याविद्यमानत्वादव्यवहितपूर्वसंभवे कथमिव व्यवहिते स्यादित्यत आह — **तत्रेति**। ननु 'श्लेष्मघ्न' इत्यादौ संयोगसंज्ञा अपूर्वविधित्वात् स्थानिवद्भावाभावाद् भविष्यति। ततश्च तदाश्रये प्लुतगुरुसंज्ञे भविष्यत इत्यत आह — **कार्येति**। ननु पूर्वमात्रस्येति पक्षे 'अवीवदत्' इति दोषोऽपरिहृतः स्यादित्यत आह — **अवीवददिति** ॥

[१, ४३५–४४०]

(**विवरणम्**) नन्वादेशस्य भावात् कथम् 'अनादिष्टात्' इत्युच्यत इत्यत आह — **अकृत इति**। कथमेतदित्यत आह — **अजिति**। 'अनादिष्टात्' इति नानादेशरूपादच इत्यर्थं इत्याह — **आदेशनमिति**। **तद्यस्येति**। यदेति शेषः। ननु षष्ठ्यन्तपञ्चम्यन्तयोर्भेदात् 'यदेव' इत्ययुक्तमित्यत आह — **सादृश्यादिति**। 'तद्यथा' इत्यनुपपन्नम्, अचा पूर्वत्वं विशेष्यत इति वदतादेशेन पूर्वत्वस्याविशेषणादित्यत आह — **यथेति**। परमतेनायं दृष्टान्त इति भावः। नन्वजपेक्षे पूर्वत्वे 'धिन्वन्ति' इत्यत्र नानादिष्टादचः पूर्वस्येट्, किं त्वादेशस्यैवेति स्थानिवद्भावाभावादिट् स्यादित्यत आह — **धिन्वन्तीति**। पञ्चमीसमासोऽप्याश्रीयत इति भावः। पूर्वस्मादिति हेतुपञ्चमीत्युक्तं 'निमित्तत्वेन' इति। तस्य प्रयोजनमाह — **वैयाकरण इति**। [3]ननु 'आदेशलक्षणप्रतिषेधः' इत्येतदनवसरदुस्स्थम्, विधिग्रहणं स्वाश्रयनिवृत्त्यर्थमित्युक्तत्वादित्यत आह — **भाष्यकारेणेति**। ततश्च वार्तिककारस्य प्रतिषेधवचनमुपपन्नमिति भावः। पूर्वविध्यर्थं यत्तदपि [4]स्थानिवद्भावेनेति चोद्यम्। पूर्वविधिशब्दस्य लक्षणाप्रसङ्गान्न पूर्वविध्यर्थं यत्तत् स्थानिवद्भावेन भवतीति परिहरति — **नेति**।

---

[1] पूर्वस्याविशेषणात् — ण.
[2] प्रतिषेधनमुप — ड, ढ.
[3] 'नन्वादेश' इत्यादि 'उक्तत्वादित्यत आह' इत्यन्तं नास्ति — च, छ, ट.
[4] अत्रोत्तरवाक्ये च 'स्थानिवद्भावेन' इत्यस्य स्थाने 'असिद्धत्वेन' इत्युचितं भाति।

'ननु चैतदपि' इत्यनेनेकारयणोऽसिद्धत्वेनेकारे [1]'यण् भविष्यतीति विवक्षितम्, उत विभक्ताविति। नाद्यः, आदेशेन निर्वर्तितस्यादेशे निवृतेऽपि प्रादुर्भावायोगात्। न द्वितीयः, स्थानिवद्भाववदसिद्धत्वस्यापि लौकिक आनन्तर्येऽयोगादित्यत आह — **शास्त्रेति**। 'अपाचितराम्' इत्यत्रासति तग्रहणे 'तराम्' इति समुदायस्य लुक् स्यादित्युच्यते, उत तरामोः[2] क्रमेणेति। नाद्य इत्युक्तं भाष्योदाहृत[3]वार्तिके 'संघातस्य' इत्यनेन। न द्वितीय इत्युक्तं 'तलोपस्य च' इति। **इह** सूत्र इत्यभिप्रेत्याह — **न हीति**। 'इह' इत्यस्य भावाभावातिदेश इत्यर्थमभिप्रेत्याह — **विधिशब्दमिति**। **अध्युत्तरपदादिति**। [4]"अषडक्षाशितङ्गु]अलङ्कर्मालंपुरुषाध्युत्तरपदात्खः' इत्यनेन। ननु दृष्टान्ते कालभेदेन वाक्यभेदः, दार्ष्टान्तिके तु वाक्यैकत्वमिति वैषम्यमित्याशङ्क्याह — **एवमिति**। ननु मथुरायाः पूर्वमित्यत्र पूर्वशब्दो न मुख्यः, इह तु 'बहुखट्वकः' इत्यत्र स्वरविधौ व्यञ्जनस्याविद्यमानत्वात् मुख्यसंभवे किमित्यमुख्ये स्यादित्यत [5]आह — **तत्रेति**। भाष्ये **एकानुदात्त**शब्देन [6]"अनुदात्तं पदमेकवर्जम्' इत्ययं स्वरो विवक्षितः। **उदात्तत्वमिति**। प्रत्ययस्वरेण। **निघातेति**। [7]"निपातैर्यद्यदि' इत्यनेनेति शेषः। भाष्ये 'श्लेष्मघ्न' इत्यादौ [8]"अमनुष्यकर्तृके च' इति टक्। [9]"घञर्थे कविधानम्' इति वा कः। ननु संयोगसंज्ञायाः समुदायनिवेशिनीत्वेन पूर्वविधित्वाभावात् तन्मात्राश्रयत्वाच्च गुरुप्लुतयोर्न तत्र स्थानिवद्भावप्रसक्तिरित्यत आह — **कार्येति**। ततश्च प्लुतद्वारा पूर्वविधित्वं संयोगसंज्ञाया इति भावः। **समुदाय इति**। यथोद्देशपक्षश्चेति भावः। **पूर्वेति**। तथा च दीर्घादिविधौ स्थानिवत्त्वनिषेध उपपन्न इति भावः। निषेध इत्युपलक्षणं ण्याकृत्याश्रयणस्य॥

[१, ४३५–४४०]

(उद्द्योतनम्) नन्वादेशानन्तरं स्थानिवद्भावात् 'अनादिष्टात्' इत्ययुक्तम्, अत आह — **अकृत इति**। [10]कथमेतदित्यत आह — **अजिति**। अनादिष्टादित्यनादेशरूपादच इत्यर्थ इत्याह — **आदेशनमिति**। **तद्यस्येति**। यदेति शेषः। तथा च 'विश्नः' इत्यादौ [11]तुगादिप्रसङ्ग इति भावः। ननु षष्ठ्यन्तपञ्चम्यन्तयोर्भेदात् 'यदेव' [12]इत्याद्ययुक्तमित्याशङ्क्याह — **सादृश्यादिति**। [13]ननु 'अनादिष्टात्' इति वदतादेशात् पूर्वत्वानङ्गीकारात् 'तद्यथा' इत्ययुक्तम्, अत आह — **यथेति**। [14]आदेशपक्षो दृष्टान्त इत्यर्थः। तथा च [15]"यश्चोभयोः' इति दोषपरिहारौ समावित्यर्थः। ननु 'धिन्वन्ति' इत्यत्राचः पूर्वस्य न विधिः, किं त्वादेशस्यैवेति स्थानिवद्भावादिट् स्यात्, अत आह —

---

[1] ईकारे यण् न भविष्यतीति — ट; ईकारयण् न भविष्यतीति — च, छ; ईकारयण् भविष्यतीति — ञ.
[2] तरबामोः — ञ.
[3] वाक्ये — ट.
[4] पा. सू. ५. ४. ७.
[5] आह — मुख्ये तदेति — च, छ, ट.
[6] पा. सू. ६. १. १५८.
[7] पा. सू. ८. १. ३०.
[8] पा. सू. ३. २. ५३.
[9] का. वा. ३. ३. ५८–४.
[10] 'कथम्' इत्यादि 'अजिति' इत्यन्तं नास्ति — इ, म, ऋ.
[11] नातिप्रसङ्ग इति — म, ऋ.
[12] इत्याद्ययुक्तमित्यत आह — अ, ऋ.
[13] तद्यथेत्यनुपपन्नम्, अचा पूर्वत्वं विशेष्यत इति वदतादेशेन पूर्वत्वस्याविशेषणादित्यत आह — यथेति — आ, इ, म, ऋ.
[14] परमतेन दृष्टान्तः — आ, इ; आदेशपक्षे दृष्टान्त इत्यर्थः — म, ऋ.
[15] लौ. न्यायसाहस्री. पृष्ठम् २४५.

धिन्वन्तीति। 'पूर्वस्मादपि' इत्याश्रीयते, पूर्वस्य निमित्तत्वं च। अङ्गाधिकारादिटोऽङ्गं निमित्तमिति भावः। 'निमित्तत्वेन' इत्यस्य प्रयोजनमाह — **वैयाकरण इति**। [1]**भाष्यकारेणेति**। तथा च वार्तिककारस्य प्रतिषेधोपन्यासो युक्त इति भावः। उत्सर्गशब्दस्य [2]स्थानिनि वृत्तौ हेतुमाह **स हीति**। स्थानिवद्भावोऽपि वक्तव्य इति वार्तिकार्थः। स्थानिवद्भावं विनापि 'पट्व्या' इत्यादिरूपसिद्धिं शङ्कते — **नन्विति**। **विभक्तावेव** विभक्तौ परत एव। **नैतदिति**। आनन्तर्यस्य लौकिकत्वेन पूर्वविधित्वाभावान्नात्रासिद्धत्वम्। तथा चेकारयणा व्यवहितत्वान्न [3]विभक्तिमादाय यण्, ईकारयणश्च स्थानिवत्त्वाभावान्नेकारमादायापि यणिति भावः। 'लौकिके' इत्यस्यैव व्याख्यानम् — **यथा प्रयोग इति**। यथा प्रयोगे लौकिकेऽसिद्धत्वं नास्ति, एवमानन्तर्येऽपीत्यर्थः। वार्तिकस्थानुदेशोऽतिदेश इत्याह — **अतिदेश इति**। कार्यासिद्धत्वेन स्थानिनो निवर्तनात् कथं यण्, अत आह — **शास्त्रेति**। तथा च पूर्वमीकारे यण्शास्त्रं न प्रवर्तते, किं त्वीकारे परत उकारस्यैव पूर्वं यणि पश्चादीकारस्येतीष्टसिद्धिरिति भावः। शास्त्रासिद्धत्वे 'नान्यस्य' इति वार्तिकायोगमाशङ्क्याह — **कार्येति**। कार्यासिद्धत्वपक्षे 'पट्व्या' इति रूपं न सिध्यतीति वार्तिकार्थः। **शास्त्रासिद्धत्वमिति**। लक्ष्यानुरोधादिति भावः। भाष्ये **उक्तमिति**। [4]"षत्वतुकोरसिद्धः' इत्यत्र। 'कथम्' इति भाष्यतात्पर्यमाह — **सकृदिति**। समाधानतात्पर्यमाह — **विषयेति**। भाष्ये **चिणो लुकीति**। चिणो लुकि तग्रहणं न कर्तव्यमित्यनेन वार्तिकेनोच्यते। असति तग्रहणे 'अपाचितराम्' इत्यत्र तरामित्यस्यापि लोपः स्यादिति चेत्, तत्र किं तराम्समुदायस्य वा लोपः, तरामोः प्रत्येकं क्रमेण वा। नाद्यः, संघातस्याप्रत्ययत्वात्। न द्वितीयः, तलोपस्यासिद्धत्वादिति वार्तिकार्थः। यथाश्रुतसूत्रेणापि वाय्वोरित्यादौ लोपाभावः सिध्यतीत्याह — **काममिति**। भाष्यम्। श्लोके इहशब्दं सूत्रपरमङ्गीकृत्य व्याचष्टे — **न हीति**। न केवलं गौरवाभावमात्रम्, किं तु लाघवमपीत्याह — **विधिशब्दमिति**। 'विधौ' इत्येतन्नियमार्थं 'स्थानिवदेव यथा स्यात्, स्वाश्रयं मा भूत्' इति। तेन वाय्वोरित्यादौ यलोपाभाव इति विधिग्रहणस्य प्रयोजनमुक्तम्। [5]"अभावातिदेशेनैव यलोपाभावसिद्धेः[6] 'विधौ' इति न कर्तव्यमित्यर्थः। **अध्युत्तरेति**। [7]"अषडक्षाशितङ्ग्वलंकर्मलिंपुरुषाध्युत्तरपदात् खः' इत्यनेन। ननु वक्तृतात्पर्याज्ञानात् कथं [8]'श्रोत्रा वाक्यद्वयं कल्पनीयम्, अत आह — **येनेति**। नन्वत्रैकस्मिन् सूत्रे उभयोरतिदेशः कथं लभ्यते, वाक्यभेदप्रसङ्गात्, अत आह — **प्रतिलक्ष्यमिति**। लक्ष्यानुसाराद्वाक्यशेषकल्पनं वाक्यभेदश्चेष्ट इति भावः। लौकिकप्रयोगः संशयबीजमित्याह — **अमीषामिति**। नन्वनन्तरे मुख्यः, व्यवहिते गौणः, अनेकार्थत्वस्यान्याय्यत्वात्, अर्थद्वयपरत्वे वाक्यभेदश्च स्यात्, अत आह — **तत्रेति**। **यादृशमिति**। अन्यथा तद्विषये लक्षणस्यानर्थक्यापत्तेरिति भावः। भाष्ये **एकाननुदात्तशब्देन** [9]"अनुदात्तं पदमेकवर्जम्' इति स्वरो विवक्षितः। **लुनीह्यत्रेति**। [10]अत्र स्थानिन आदेशाद्वानन्तरपूर्वस्य हकारस्यानुदात्तत्वं न क्रियते, किं तु व्यवहितस्येकारस्योकारस्य [11]चेति स्थानिवद्भावाभावाद् वर्ज्यमानस्वरो न स्यादित्येतदुपपादयति — **हेरिति**। **उदात्तत्वं** प्रत्ययस्वरेण। **यणादेश इति**। यद्यपि

---

[1] 'भाष्यकारेणेति' इति नास्ति — ऋ.
[2] स्थानिनि प्रवृत्तौ — इ, ऋ.
[3] 'विभक्तिमादाय' इत्यनन्तरम् अपिशब्दोऽधिकः — म, इ, ऋ.
[4] पा. सू. ६. १. ८६.
[5] भावातिदेशेनैव — आ, म.
[6] सिद्धिः — म.
[7] पा. सू. ५. ४. ७.
[8] 'श्रोत्रा' इत्यनन्तरं 'वा' इत्यधिकम् — अ.
[9] पा. सू. ६. १. १५८.
[10] तत्र — अ, म, ऋ.
[11] वेति — म, ऋ.

पदसंस्कारपक्षे 'लुनीहि' इत्यस्य [1]कृतस्वरस्य पदान्तरसंबन्धेन यणि कृतेऽपि पूर्वं कृतस्वरो न निवर्तते, तथापि वाक्यसंस्कारपक्षे शब्दपरविप्रतिषेधेन पूर्वं यणि कृते स्वरासिद्धिरित्यभिप्रायः। पूर्वमात्रविधौ [2]स्थानिवद्भावे तु स्वरसिद्धिरित्याह — [3]**स्थानिद्भावात्त्विति**। 'पञ्चारत्न्यः' इत्यस्य छान्दसत्वाङ्गीकारेण यणमुपपादयति — **जसादिष्विति**। [4]"जसि च' इति गुणविधिप्रभृतिष्वित्यर्थः। 'इगन्ते कालवाचिनि कपालादौ च परतः पूर्वपदप्रकृतिस्वरः स्याद् द्विगुसमासे' इति [5]"इगन्त' इति सूत्रार्थः। **निघातेति**। [6]"तिङतिङः' इति [7]प्राप्तस्य निघातस्य [8]"निपातैर्यद्यदि' इत्यनेन प्रतिषेधादित्यर्थः। उदात्तवति तिङि परे गतिरनुदात्तः स्यादिति [9]"तिङि च' इति सूत्रार्थः। निघाताप्रसक्तिमुपपादयति — **तत्रेति**। ननूदाहरणत्रयेऽपि बहिरङ्गाद्यणः प्रागेवान्तरङ्गः स्वरो वाक्यसंस्कारपक्षेऽपि स्यादिति नोक्तदोषः, अत आह — [10]**एतच्चेति**। भाष्ये [11]**योऽसाविति**। वदेर्णिच्युपधावृद्धौ 'वादि' इति स्थिते पुनर्णिचि पूर्वस्य लोपे तस्य स्थानिवद्भावादुपधाह्रस्वो न स्यादित्यर्थः। भाष्ये **श्लेष्मघ्नेति**। [12]"अमनुष्यकर्तृके च' इति टक्। ननु समुदायस्य संयोगसंज्ञा न तु पूर्वस्य। तन्मात्राश्रयौ च गुरुसंज्ञाप्लुताविति न तत्र [13]स्थानिवत्त्वप्रसङ्गः, अत आह — **कार्येति**। **व्यवहितस्येति**। तथा च प्लुतद्वारा संयोगसंज्ञाया अपि पूर्वविधित्वमिति भावः। [14]**पूर्वः पक्षः** 'गुरुसंज्ञा च' इत्याक्षेपाभिप्राय इत्यर्थः। उक्ताभिप्राये 'ननु च' [15]इत्यादिना चोद्यसाम्यापादनायोगमाशङ्क्याह — **यथोद्देशेति**। तथा च न कार्यद्वारापि व्यवधानम्। **प्रत्येकमिति**। तथा चानन्तरपूर्वविधिः संयोगसंज्ञेति स्थानिवद्भावात् [16]संज्ञाया अभावात् प्लुतो न स्यादित्यर्थः। **समुदाय इति**। तथा च प्रत्येकसंज्ञामादायोक्तो दोषो निरस्तः। यथोद्देशपक्षश्चाश्रितः। तेन [17]प्लुतद्वारापि न पूर्वविधित्वम्। ननु भाष्यकृतैकस्मिन्नपि पक्षे दोषानुद्धारात् कः पक्षः सिद्धान्तः, अत आह — [18]**पूर्वमात्रेति**। तथा च प्रतिदीव्नेत्यादिसिद्धये दीर्घविधौ स्थानिवत्त्वनिषेध उपपद्यत इति भावः। नन्वस्मिन् पक्षे 'अवीवदत्' इति कथं सिध्यति, अत आह — **अवीवदादिति**॥

[१, ४३५–४४०]

(**रत्नप्रकाशः**) [19]**अचः पूर्वत्वविज्ञानादिति**। भाष्यकृतोऽभिमतमिदम्। उत्तरसूत्रगतस्य द्विर्वचनसवर्णानुस्वारजश्चर्ग्रहणस्य प्रत्याख्यातत्वेनास्य भाष्यकृदभिमतस्य न काप्यनुपपत्तिः। **अनादिष्टादिति**। **आदिष्टः** आदेशः, अप्रवृत्त आदेशो यस्य सोऽनादिष्टः, तस्मादित्यर्थः। स्थानिभूतादचः

---

[1] श्रुतस्वरस्य — आ.
[2] स्थानिवद्भावेऽपि स्वर — इ.
[3] स्थानिवद्भावे त्विति — अ, इ, ऋ.
[4] पा. सू. ७. ३. १०९.
[5] पा. सू. ६. २. २९.
[6] पा. सू. ८. १. २८.
[7] प्राप्तनिघातस्य — ऋ.
[8] पा. सू. ८. १. ३०.
[9] पा. सू. ८. १. ७१.
[10] 'एतच्चेति' इत्यारभ्य 'उरणिति यथा' इत्यन्तं लुप्तम् — इ.
[11] यासाविति — म.
[12] पा. सू. ३. २. ५३.
[13] स्थानिवत्प्रसङ्गः —अ.
[14] पूर्वपक्षः — म.
[15] इत्यादिना साम्या — आ, इत्यादिसाम्या — ऋ.
[16] 'संज्ञाया अभावात्' इति नास्ति — म, ऋ.
[17] प्लुतादिद्वारापि — अ.
[18] 'पूर्वमात्रस्येति' इत्युचितं भाति।
[19] वार्तिके 'अचः पूर्वविज्ञानात्' इत्यत्र 'अचः पूर्वत्वविज्ञानात्' इति पाठोऽभिमतो रत्नप्रकाशकृत इति भाति।

पूर्वत्वेन दृष्टस्य विधाविति यावत्। तथा च 'वैयाकरणः' इत्यत्रैचः स्थानिभूतादचः पूर्वत्वेनादृष्टत्वात् तस्यादेशे कर्तव्ये स्थानिवत्त्वं नेति भावः। **अच इति पञ्चमीति**। सूत्रे 'अचः' इति षष्ठीपञ्चम्येकवचनयोस्तन्त्रेण निर्देश इति भावः। तमाशयमविद्वान् सूत्रे 'अचः' इति पञ्चम्येकवचनमेव निर्दिष्टमित्याशयेन तदुक्तमिति मन्यमान आह — **यद्येवमिति**। **अन्यत् कर्तव्यमिति**। इतीति शेषः। तर्हि स एव दोष इत्यत आह — **अन्यच्च न कर्तव्यमिति**। तन्त्रेणोभयोरपि निर्दिष्टत्वादपूर्वो न कर्तव्य इति भावः। **यदेवाद इति**। सारूप्यादैक्येन व्यपदेशः। ननु तर्हि तन्त्रनिर्देशाश्रयणमेव दोष इति चेन्न, सूत्रकारमतेऽपि 'आदेशः' इत्यनुवृत्तस्य प्रथमान्तस्यावृत्तिमभ्युपेत्य पञ्चम्या [1]'विपरिणाम्य व्याख्येयतया तदपेक्षया तन्त्रनिर्देशाश्रयणे लाघवादित्याशयेनाह — **तद्यथेति**। पूर्वसूत्रेणेव संज्ञातिदेश एवानेन क्रियत इति मन्यमानः कश्चिदाह — **तत्रेति**। वाय्वोरित्यादावित्यर्थः। एतेन 'अतिदेशेन पराश्रयं कार्यं प्राप्यते, न तु स्वाश्रयं निवर्त्यते। भाष्यकारेण तु विधिग्रहणात् स्वाश्रयकार्याभावः साधितः' इति कैयटो निरस्तः। कार्यातिदेशपक्षे 'पूर्वविधौ' इति सप्तम्यनुपपत्तेः। 'भाष्यकारेण' इत्यादेः प्रागेव दूषितत्वाच्च। [2]'तुष्यतु दुर्जनः' इति न्यायेन रूपातिदेशसूचकं तत्समकक्षं पक्षान्तरमाह — **असिद्धवचनात्सिद्धमिति**। 'स्थानिवत्' इत्यननुवर्त्य 'असिद्धः' इत्यध्याहृत्यादेशशब्दे तद्विधायकशास्त्रलक्षणामाश्रित्य व्याख्यानात् सिद्धमिष्टमिति भावः। आदेशस्यैवासिद्धत्वमुक्तमिति मन्यमानः शङ्कते — **उत्सर्गलक्षणानामनुदेश इति**। स्थानिप्रयुक्तकार्यार्थमतिदेशान्तरं कर्तव्यमित्याशयः। **उक्तं वेति**। [3]'षत्वतुकोरसिद्धः' इत्यत्र यथा [4]'शास्त्रासिद्धत्वात् स्थानिवद्वचनानर्थक्यम्' इत्युक्तम्, तद्वदत्रापि शास्त्रासिद्धत्वमेवाभिमतमिति स्थानिवद्वचनं न कर्तव्यमिति भावः। **तदेव नाम तस्मिन्निति**। पट्वचा मृद्वचेत्यादावुकारङीपोर्यण्विधायकम् [5]'इको यणचि' इत्येकमेव सूत्रम्। तस्यैव तस्मिन् प्रवर्तमानेऽसिद्धत्वं न युज्यत इति भावः। **तदेव चापि तस्मिन्निति**। लक्ष्यभेदेन लक्षणभेदस्वीकारेऽपि सारूप्यात् 'तदेव' इत्युक्तम्। नन्वसिद्धशब्दाध्याहारेण [6]'चादेशपदलक्षणया च व्याख्यानेऽत्यन्तक्लिष्टकल्पना स्यादित्यस्वरसात् पक्षान्तरं परिगृह्णाति — **काममतिदिश्यतां वेति**। **वक्तर्यधीनमिति**। आयत्तपर्यायोऽधीनशब्दः। न हि [7]'अध्युत्तरपदात्' इति खः। तथा सति सप्तम्या लुकि 'वक्त्रधीनम्' इत्युचितत्वात्। स्ववाक्यं व्याचष्टे — **अथवेति**। **एवमिहापीति**। परनिमित्तोऽजादेशः पूर्वविधौ विषये स्थानिवन्निमित्तं भवति, न भवति वेति व्याख्यास्यामीति भावः। एवं सति फलितमाह — **इह तावदिति**। **किं पुनरिति**। द्वेधा लोके दर्शनात् संदेहात् प्रश्नः। "तस्मिन्' इति परिभाषात्र नोपतिष्ठत इत्यवोचाम। यत्तूक्तं कैयटेन 'यदा विषयभेदेन लक्षणं भिद्यते तदा यादृशं यत्र पूर्वत्वं संभवति तादृशं तत्राश्रीयत इति व्यवहितस्यापि ग्रहणम्। यदा त्वेकमेव लक्षणं तदा किमित्यव्यवहिते संभवति व्यवहितमाश्रीयत इत्यनन्तरस्यैव ग्रहणेन भाव्यम्' इति। तन्न, सूत्रभेदे ज्ञाते पूर्वमात्रस्य ग्रहणम्, तस्मिन् ज्ञाते सूत्रभेदज्ञानम्, तथा सूत्रैक्ये ज्ञातेऽनन्तरस्यैव ग्रहणम्, तस्मिन् सति सूत्रैक्यज्ञानम्, इत्यन्योन्याश्रयात्। **एकाननुदात्तद्विगुस्वरेति**। न अनुदात्तोऽननुदात्तः, एकोऽननुदात्त एकाननुदात्तः,

---

[1] विपरिणमय्येत्युचितम्, अमन्तत्वेन मित्त्वात् ह्रस्वत्वस्यावश्यंभावित्वात्, ज्वलह्वलह्मलनमामनुपसर्गाद्वेत्यनुपसर्गादेव विकल्पविधानात् सोपसर्गस्य नित्यमित्त्वात्। घञन्ताद्विपरिणामशब्दात् तत्करोतीति णिचि वा साधनीयम्।

[2] लौ, न्या. द्वितीयभागे पृष्ठम् ३५.

[3] पा. सू. ६. १. ८६.

[4] का. वा. ६. १. ८६-५.

[5] पा. सू. ६. १. ७७.

[6] अत्र चशब्दोऽधिको भाति।

[7] पा. सू. ५. ४. ७.

[8] पा. सू. १. १. ६६.

उदात्तः स्वरितो वेत्यर्थः। एकाननुदात्तश्च द्विगुश्च तयोः स्वरौ, तौ च गतिनिघातश्च तेषूपसंख्यानम् — ते भवन्तीति भिन्नं वचनं कर्तव्यं भवतीति भावः। **लुनीह्यत्रेति**। हेरपित्त्वादाद्युदात्तत्वम्। **एकवर्जमित्येष स्वर इति**। उदात्ते स्वरिते वा सत्येव तमेकं वर्जयित्वावशिष्टस्यानुदात्तत्वं कर्तव्यम्, प्रतिलक्ष्यं च लक्षणभेद इति 'लुनीह्यत्र' इत्यत्र नकारेकारस्य निघाते कर्तव्ये स्थानिवद्भावे सिद्धेऽपि लकारोकारस्य तस्मिन् कर्तव्ये स न सिद्ध इति वचनं कर्तव्यमिति भावः। **पञ्चारत्न्य इति**। [1]'तेन क्रीतम्' इत्यार्हीयस्य ठकः [2]'अध्यर्ध' इति लुकि सति [3]'जसादिषु छन्दसि वावचनं प्राङ् णौचङ्युपधायाः' इति वचनात् [4]'जसि च' इति गुणाभावे यणि रूपं ज्ञेयम्। तस्य यणः स्थानिवत्त्वाभावात् [5]'इगन्तकाल' इति स्वरो न स्यादिति पृथग्वचनं कर्तव्यमिति भावः। **यत्प्रलुनीह्यत्रेति**। यच्छब्दयोगो निघातप्रतिषेधार्थः। यत्तु कैयटेनोक्तम् 'एतच्च सर्वमनाश्रित्यान्तरङ्गबहिरङ्गभावमुक्तम्' इति। तन्न, [6]'अन्तरङ्गानपि विधीन्' इति बहिरङ्गेणादेशेन तेषां बाधात्। **तस्य स्थानिवद्भावादिति**। तेन व्यवधानात्, तस्य चोत्तरेण णिचा व्यवहितस्य चङ्परत्वाभावाच्चेति शेषः। णित्त्वजात्याश्रयणान्न दोष इति समाधानं सुगमिति, अन्यत्रोक्तमिति वोपेक्षितम्। **श्लेष्म३घनेति**। अस्य 'एहि' इत्यादिर्बोध्यः। वाक्यस्यैव टेरचा सह तदनन्त्यस्य संबोध्यपदसंबन्धिनः पर्यायेण प्लुतविधानात्। तत्र ह्यकारेण व्यवधानात् पूर्वस्याकारस्य गुरुसंज्ञाभावे गुरुत्वप्रयुक्तः प्लुतो न स्यादिति भावः। संयोगसंज्ञाभावस्तु नापादितः, तस्याः पूर्वपरोभयविधित्वात्। एतेन 'कार्यार्थत्वात् संयोगसंज्ञाया व्यवहितस्यात्र प्लुविधिरिति पूर्वः पक्षः' इति कैयटो निरस्तः। यथोद्देशपक्षे संयोगसंज्ञायाः सिद्धत्वेन कार्यकालपक्षाश्रयेण तत्साधने मानप्रयोजनयोरभावात्। प्लुतविधेरसिद्धत्वेन कार्यकालत्वाश्रयेणैव सिद्धान्ते गुरुसंज्ञायाः समाधेयत्वेन च 'व्यवहितस्यात्र प्लुतविधिः' इत्युक्तेरसंबद्धप्रलापत्वाच्च। यत्तूक्तं विवरणकृता 'ननु संयोगसंज्ञायाः समुदायनिवेशिनीत्वेन पूर्वविधित्वाभावात् तन्मात्राश्रयत्वाच्च गुरुप्लुतयोर्न स्थानिवद्भावप्रसक्तिरित्यत आह — [**कार्येति**।] ततश्च प्लुतद्वारा पूर्वविधित्वं संयोगसंज्ञायाः' इति। तदपि तुच्छम्। [7]'हलोऽनन्तराः' इति सूत्रे प्रवर्तमाने स्थानिवद्भावप्रसक्तेरभावेन [8]'संयोगे गुरु' इति सूत्रे प्रवर्तमान एव स्थानिवद्भावस्य प्रसक्ततया गुरुसंज्ञाया एवासिद्धेरापादनीयत्वात्, तथैव ऋषिभिरापादितत्वात्, 'ननु च' इत्याद्युत्तरभाष्यविरोधाच्च। प्रत्येकं संयोगसंज्ञा भवतीति पक्षे आपादितदोषाणामुद्धृतत्वेन सोऽपि पक्षः स्थित इति मन्यमानः कश्चिच्छङ्कते — **ननु चेति**। **पूर्वपरविधिरिति**। एतेन भाष्येण पूर्वस्यैव विधौ पूर्वस्मात् परस्यैव वा विधौ स्थानिवद्भाव इत्यवधारणघटितः सूत्रार्थोऽभिमत इति ज्ञायत इति तथैवादौ स निदर्शितः॥

[१, ४३५–४४०]

(नारायणीयम्) नन्वादेशः स्थानिवत्, इति वचनात् स्थानिवद्भावकालेऽचो निवृत्तिरवभासते। न चास्यामवस्थायामजपेक्षया पूर्वस्य विधिः कर्तव्यो भवति। ततोऽसंभावितोऽयं वाक्यार्थ इत्यत्राह — **अकृत इति**। नेदानीमजपेक्षया पूर्वस्य विधौ कार्ये त्वजादेशः स्थानित्वदित्युच्यते, येनासंभवि

---

[1] पा. सू. ५. १. ३७.
[2] पा. सू. ५. १. २८.
[3] का. वा. ७. ३. १०९–१.
[4] पा. सू. ७. ३. १०९.
[5] पा. सू. ६. २. २९.
[6] अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधत इत्यभिप्रायेणेदम्।
[7] पा. सू. १. १. ७.
[8] पा. सू. १. ४. ११.

स्यात्। किं त्वादेशात् प्रागवस्थायामचः पूर्वत्वेन यो दृष्टस्तस्य विधावादेशः स्थानिवदिति वाक्यार्थ इत्यर्थः। कथं पुनः 'कालान्तरस्थधर्मोऽयं स्थानिवत्त्वविधौ भवेत्। निमित्तमिति शङ्काया उतरं प्रोच्यते — **अजिति**।' तात्कालिकतया [1]निमित्तासंभवात् कालान्तरगतस्य निमित्तत्वमित्यर्थः। किं च निमित्तविशेषणस्य कालान्तरगतत्वं, न तु निमित्तस्य पूर्वविधिकर्तव्यत्वस्य। तत्पुरुषे [2]आदेश-भिन्नत्वमर्थः स्यात्। ततश्चाव्यभिचारादविशेषणम्, स्थानिवद्भावादादेशापेक्षया [3]सर्वेषामचा भिन्न-त्वात्। आदेशमात्रापेक्षया भिन्नत्वविवक्षायां व्यभिचारासंभवेऽपि तद्व्यवच्छेदस्यानिष्टत्वमिति न तत्पुरुषो युक्तः। प्रागवस्थाद्योतनं च तत्र न स्यात्, तस्मादाह — **आदेशनमिति**। प्रत्यासत्त्या-देशमपि [4]विशेषयत्वित्यत आह — **ततश्चेति**। व्याप्तिन्यायादादेशमात्रपरिग्रहोऽपि संभाव्यत इत्यर्थः। ननूपात्तविभक्तिपरित्यागेन विभक्त्यन्तरस्वीकरणे स्यादनित्यत्वम्, अत आह — **सादृश्या-दिति**। नन्वजपेक्षपूर्वत्वस्वीकारकाले आदेशापेक्षपूर्वत्वस्यानङ्गीकारात् कथं दृष्टान्तसंगतिः, तत्राह — **यथेति**। नेदं दृष्टान्तकीर्तनम्, वादिद्वयासंप्रतिपत्तेः। किं तु विभक्तिविपरिणामगौरवं तवापि समानमित्युच्यत इत्यर्थः। ननु यद्यजपेक्षं पूर्वत्वं तदा 'धिन्वन्ति' इति न स्यात् स्थानिवत्त्वम्, निमित्तापेक्षपूर्वत्वविज्ञाने तु सिध्यति स्थानिवत्त्वम्, अत आह — **धिन्वन्तीति**। पूर्वस्येति संबन्ध-सामान्ये षष्ठी। संबन्धिता च कार्यतया निमित्ततया वा। तथा च 'धिन्वन्ति' इत्यत्राचः पूर्वस्य निमित्ततया विधिसंबन्धित्वात् सिध्यति स्थानिवत्त्वम्। इड्विधौ ह्यङ्गस्येत्यनुवृत्तं निमित्तसंबन्ध-बोधकषष्ठ्यन्तम्, प्रातिपदिकार्थमात्राधिकारपक्षे पञ्चम्यन्तं वा। ततश्चाङ्गस्यास्ति निमित्तत्वम्। **क्वचित्** आयादौ। ननु 'मुनिवदयं राक्षसः' इत्यादौ राक्षसजातिस्वाभाव्यहानिप्रतीतिर्लोकेऽस्तीती-हापि स्वाश्रयनिवृत्तिरस्तु, तत्राह — **अतिदेशेनेति**। एकस्य वाक्यस्योभयत्र तात्पर्याभावात् परा-श्रयधर्मप्रापकपरं [5]वचनम्, न स्वाश्रयनिवृत्तौ तात्पर्यवत्। 'मुनिवदयं राक्षसः' इत्यत्र तु न स्वा-श्रयनिवृत्तिर्वाक्यार्थतया भासते, किं तु मुनिधर्मेष्वहिंसनादिष्वतिदिष्टेषु तद्विरुद्धहिंसनादिनिवृत्ति-र्भासते। नन्वेवमपि विधिग्रहणसिद्धत्वात् स्वाश्रयनिवृत्तेरादेशलक्षणप्रतिषेधवचनमनर्थकम्, अत आह — **भाष्येति**। अतो वार्तिककारस्य प्रतिषेधोक्तिरुपपन्ना। निवर्त्यमानत्वसाधर्म्यात् स्थानि-नि गौण उत्सर्गशब्द इत्याह — **स हीति**। क्रियाशब्दत्वं वा तेनोक्तम्। **नन्विति**। उकारस्य यण्विधेः पूर्वविधित्वात् तस्मिन् कर्तव्ये परयणादेशस्यासिद्धत्वात्। **नैतदिति**। [6]स हि विभक्त्या-नन्तर्ये। पूर्वस्य विधेः कर्तव्यत्वं तस्मिंश्चासिद्धम्। असिद्धत्वे चानन्तर्यमिति कथमयं न पूर्व-विधिः, अत आह — **लौकिक इति**। आनन्तर्यस्य पूर्वसंबन्धित्वेऽपि विधित्वं नास्तीत्यर्थः। [7]विधि-ग्रहणं पूर्वसंबन्धिमात्रोपलक्षणमिति वदन्तं प्रत्याह — **यथेति**। यदि धर्ममात्रोपलक्षणं तदा पूर्वस्य प्रयोगे कर्तव्येऽप्यजादेशस्यासिद्धत्वात् तस्य प्रयोग एव न स्यात्। ननु यणा निर्वर्तितस्याचः कथं यणोऽसिद्धत्वमात्रेण निमित्तता पूर्वयणं प्रति, तत्राह — **शास्त्रेति**। तदा हीकारयण [8]एव निवृत्ति-रत्रेति सिद्धः पूर्वयण्। [9]नष्टस्य भावो न युज्यत इति 'नान्यस्य' इति ग्रन्थ उच्यते। नाश एव तु शास्त्रासिद्धत्वादीकारस्य नास्तीत्युक्तम्, अत आह — **कार्येति**। नन्वस्मिन् विषय इदं नोक्तम्, अत आह — **शास्त्रेति**। तत्र [10]तथोक्तत्वादिहापि तथात्वमित्यर्थः। 'तदेव' इति कथम्, विषय-

---

[1] निमित्तत्वासंभवादित्यर्थः।
[2] आदेरभिन्नत्वं — क, ति.
[3] सर्वेषामचामभिन्नत्वात् — क.
[4] विशेषयत्यत आह — क.
[5] वचनं स्वाश्रय — क.
[6] सति विभक्त्यानन्तर्ये — ति.
[7] विधिग्रहणमपूर्व — क.
[8] एकनिवृत्तिरत्रेति — क.
[9] नष्टभावो न — क, ति.
[10] यथोक्तत्वात् — क.

भेदेन लक्षणस्य भिन्नत्वात्, अत आह — **सकृदिति**। आकृतिपक्ष इत्यर्थः। 'तदेव चापि' इत्याकृतिपक्ष एव परिहाराभिधानमिति भाति। कथं भेदमन्तरेण विषयविषयिभावः संभवतीत्याशङ्क्य सादृश्यनिबन्धनतत्त्वव्यवहारो भाष्ये, व्यक्तिपक्षाश्रयेण तु परिहार इत्याह — **विषयेति**। भाराप्रसक्तेस्तन्निषेधः कथमित्यत्राह — **न हीति**। भावस्यैवान्तरङ्गत्वादतिदेशः स्यात्। अत एव [1]लोके चाभावातिदेशाय 'तद्वदत्र नास्ति' इति नञ्सहितं वाक्यं प्रयुज्यते। अतोऽत्रापि तदतिदेशायाधिकयत्नापेक्षेत्यस्ति भारप्रसक्तिः। [2]उत्तरं तु सामर्थ्यादिना 'मरुवज्जलम्' इत्यादौ नञोऽप्रयोगेऽप्यभावातिदेशदर्शनादिहापि वाय्वोरित्यादिविषयस्य लक्षणस्य भावातिदेशस्यायोग्यत्वादभावस्याप्यतिदेश इति। 'नास्ति भारः' इत्यस्यार्थान्तरमाह — **विधीति**। विद्यमानभारनिवृत्तिर्भविष्यद्भारपरिहारश्च नञर्थ इत्यर्थः। विधिग्रहणं हि स्वाश्रयनिवृत्तये। अभावातिदेशात्तु स्वाश्रयनिवृत्तेः सिद्धत्वाद्विधिग्रहणं न कर्तव्यम्। [3]ख इति न मन्तव्यम्, लक्षणाभावादित्याह — **अधीति**। एकस्माद्वाक्यात् कथं विरुद्धद्वयावगतिरित्याशङ्क्य विषयभेदेन परिहरति — **येनेति**। ननु लोकवत् पुरुषभेदेन व्यवस्थेहानिष्टेत्याशङ्क्य लक्ष्यभेदेन तामाह — **एवमिति**। नन्विह पूर्वशब्दस्य साक्षादुपादानात् [4]'तस्मिन्' इति परिभाषानुपस्थानान्निर्दिष्टग्रहणस्यानन्तर्यार्थित्वादिति हेतोरभावात् पूर्वमात्रग्रहणस्य [5]न्याय्यत्वम्, तत्राह — **तत्रेति**। वर्ज्यमानस्वरनिमित्तमुदात्तं दर्शयति — **हेरिति**। [6]तर्ह्युदात्तोत्तरकालमेव वर्ज्यमानस्वरसिद्धेः किमतः स्थानिवद्भावेन, तत्राह — **तत्रेति**। नित्यत्वादिति भावः। 'पूर्वमात्रस्य' इति पक्षेऽयं दोषो नास्तीत्याह — **स्थानिवद्भावात्त्विति**। जसि गुणशङ्कां निवारयति — **जसादिष्विति**। तिङपरं गतिमात्रमुदाहार्यम्, यच्छब्दोदाहरणं किमर्थम्, अत आह — **यदिति**। ननु संयोगसंज्ञाया अपूर्वविधित्वादुपधालोपस्य स्थानिवत्त्वाभावात् तस्यां सत्यां तन्निमित्तकार्यसिद्धिः, अत आह — **कार्येति**। ननु प्लुतविधेः पूर्वविधित्वेऽपि संज्ञाया न पूर्वविधित्वम्। न हि यस्य यदर्थत्वं तस्यापि तथाविधत्वनियमः, तत्राह — **पूर्वेति**। ननु प्लुतविधिवाक्येनैकवाक्यत्वात् संज्ञावाक्यस्य प्लुतविधेर्व्यवहितपूर्वविधित्वे[7] कथं तद्विरुद्धानन्तरपूर्वविधित्वं संज्ञायाः, अत आह — **यथेति**। एवमपि पूर्वपरविधित्वेन पूर्वविधित्वं कथम्, अत आह — **प्रत्येकमिति**। प्रत्येकं संज्ञापक्षे कथमयं परिहार इत्याशङ्क्यान्वर्थत्वात् समुदायसंज्ञापक्ष एवोचित इत्याशयवानाह — **समुदाय इति**। कोऽपि पक्षो न समर्थित इति शङ्कां निवारयति — **पूर्वमात्रस्येति**। तत्र पक्षेऽन्तिमस्य दूषणस्य 'न वा' इत्यनेनासाधारणतया परिहारेऽप्याद्यस्य कः परिहारः, तत्राह — **अवीवददिति**॥

[१, ४४०–४४३]

(लघुविवरणम्) नन्वेकादेशस्योभयनिमित्तकत्वेऽपि परनिमित्तकत्वमप्यस्तीति सूत्रेणैव स्थानिवद्भावः सिद्ध इत्यत आह — **परस्मिन्नित्येतदिति**। **गुणत्वादिति**। स्थानिवद्भावो हि विधेयतयात्र प्रधानमिति भावः। 'परस्मिन्नित्येतन्नियमार्थम्' इति यदुक्तं, तत्राह — **अयोगेति**। अपरनिमित्तकादेशव्युदासेनेत्यर्थः। 'अच इति संख्याया विवक्षितत्वात्' इति यदुक्तं, तत्राह —

---

[1] लोके नाभावातिदेशाय — क.
[2] उक्तं तु — क.
[3] खञ इति — क.
[4] पा. सू. १. १. ६६.
[5] न्याय्यत्वात् — क, ति.
[6] न ह्युदात्तोत्तर — क.
[7] 'विधित्वे' इत्यस्यानन्तरम् 'अपि'शब्दोऽधिकः — क.

वर्णनिर्देश इति। उभयथा शास्त्रीयव्यवहारमेव दर्शयति — **उरिति**। **अत्यरराजदिति**। राजानमतिक्रान्तवानिति [1]'विगृह्य [2]'प्रातिपदिकाद्धात्वर्थे' इति णिच्। **परिहारान्तरं** पक्षान्तरम्। **लोपस्य परनिमित्ततेति**। परं सुबन्तं निमित्तीकृत्य लोपसमासयोर्विधानादिति भावः। 'नेन्य :' इत्यनुपपन्नम्, [3]'यङोऽचि च' इति लुक् [4]'ऊतोऽचि' इत्यनेनोकारान्ताद्धातोः परस्मिन् व्यवस्थाप्यते। अतोऽत्र लुगेव नास्तीत्यत आह — **ऊतोऽचीत्येतदिति**। **साक्षादिति**। षष्ठीनिर्देशेनेत्यर्थः॥

[१, ४४०–४४३]

(**विवरणम्**) ननूभयनिमित्तत्वेऽपि परनिमित्तत्वस्यापि भावात् सिद्ध एकादेशस्य स्थानिवद्भाव इत्यत आह — **परस्मिन्नितीति**। भाष्ये श्रायसावित्यत्र [5]'देविकाशिंशपा' इत्यात्वम्। **गुणत्वादिति**। आदेशविशेषणत्वेनेति शेषः। उपसंख्यानवादी प्रष्टव्यः — किमुभयनिमित्तत्वे परनिमित्तत्वं नास्तीति, उत परमेव निमित्तं न भवतीति। नाद्य इत्याह — **अन्वयेति**। द्वितीयं प्रत्याह — **अयोगेति**। अच्समुदायस्य स्थानित्वेऽपि न दोष इत्याह — **वर्णेति**। वस्तुतस्त्वच इति षष्ठ्या अच्स्थानिक [6]आदेशो निर्दिष्टः, एकादेशस्य च [7]'पूर्वपरयोः' इति षष्ठीद्विवचनेन [8]'प्रत्येकमचोः स्थानित्वमुक्तमिति संख्याविवक्षायामपि [9]'न दोष इत्याह — **भवत्विति**। [10]'उभयथा व्यवहारमेव स्पष्टयति — **उरणिति**। **अत्यरराजदिति**। राजानमतिक्रान्तवानिति [11]'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति णिच्। इष्ठवद्भावाट्टिलोपश्च। **स्थानिन इति**। पूर्वसूत्रेण स्थानिवद्भावादिति भावः। कैकेय इत्यादौ [12]'केकयमित्रयु' इत्यादिनेयादेशः। **परिहारान्तरस्य** पक्षान्तरस्येत्यर्थः। **लोपस्येति**। [13]'सुपा' इत्यधिकारात् समासवल्लोपस्यापि [14]परनिमित्ततेत्यर्थः। ननु [15]'यङोऽचि च' इति लुक् ऊतः परे यङ्यचि [16]नियत इति कथं 'नेन्यः' इत्याद्युदाहरणमित्यत आह — **ऊत इति**। **अनाश्रयणात्** [17]सिद्धान्तत्वेनेति शेषः। **अच इत्युपादानादिति**। षष्ठ्यादेशप्रतियोगिनी, न च समुदायस्यादेशः साक्षादचः प्रतिसंबन्धिनीति भावः॥

[१, ४४०–४४३]

(**उद्द्योतनम्**) ननूभयनिमित्तकत्वेऽपि परनिमित्तकत्वस्य सत्त्वादेकादेशस्य स्थानिवद्भावः सिध्यत्येव, अत आह — **परस्मिन्निति**। **लभ्यत एवेति**। सामान्येन स्थानिवद्भावविधेः परनिमित्तकापर[18]निमित्तकसाधारणत्वादिति भावः। **अनेन** परस्मिन्नित्यनेन। **वैयाघ्रपद्य इति**। गर्गादिः। अत्र

---

[1] 'विगृह्य' इत्यस्य स्थाने 'राजशब्दात्' इत्यस्ति — ण.
[2] चुरादिगणसूत्रम्।
[3] पा. सू. २. ४. ७४.
[4] का. वा. २. ४. ७४–१.
[5] पा. सू. ७. ३. १.
[6] आदेशो न निर्दिष्टः — च.
[7] पा. सू. ६. १. ८४.
[8] प्रत्येकमचां — च, छ, ट.
[9] 'न' इति नास्ति — च, छ.
[10] उभयव्यवहारमेव — च, छ, ञ.
[11] चुरादिगणसूत्रम्।
[12] पा. सू. ७. ३. २.
[13] पा. सू. २. १. ४.
[14] परनिमित्ततयेत्यर्थः — च, छ, ट.
[15] पा. सू. २. ४. ७४.
[16] नियम्यत इति — ञ.
[17] असिद्धान्तत्वेनेति — ञ.
[18] निमित्तकत्वसाधारणत्वादिति — अ.

[1]'पादस्य लोपोऽहस्त्यादिभ्यः' [2]इति लोपोऽपरनिमित्तकः, तस्य पद्भावे कार्ये स्थानिवद्भावनिरासाय 'परस्मिन्' इत्युच्यते। **आदीध्य इति**। [3]'टित आत्मनेपदानाम्' इति टित एत्वमपरनिमित्तम्, तस्य स्थानिवद्भावात् [4]'यीवर्णयोर्दीधीवेव्योः' इतीकारलोपः प्राप्नोति। 'परस्मिन्' इति वचनान्न भवति। **एवमिति**। परनिमित्तक आदेश इति विशेषणस्येतरव्यावृत्तिपरत्वात् पूर्वनिमित्तकस्यापि व्यावृत्तिरित्यर्थः। 'श्रायसौ' इत्यादि भाष्यं व्याचष्टे — **श्रायसेति**। श्रायसावित्यत्र [5]'देविकाशिंशपा' इत्यादिना भवाद्यर्थाणि परतः श्रेयस [6]आदेरच आत्वम्। **गुणत्वादिति**। यद्यप्युद्देश्यादेशविशेषणमच इति, तथापि हलादेशव्यावृत्त्यर्थमच इति [7]विशेषणस्योपात्तत्वात् तद्विशेषणत्वेन संख्या विवक्षिता। तथा च विधिस्पृष्टाज्विशेषणत्वादित्यर्थः 'पर्यवसन्नः। [8]'आदेशविशेषणत्वेन गुणत्वम्' इति तु चिन्त्यम्, संख्यायास्तद्विशेषणत्वाभावात्। उपसंख्यानवादिना किमुभयनिमित्तकस्य परनिमित्तकत्वं नास्तीत्युच्यते, किं वा विशेषणस्य व्यवच्छेदार्थत्वात् परमेव निमित्तमिति [9]विवक्षितमिति विकल्पं मनसि निधाय नाद्य इत्याह — **अन्वयेति**। न द्वितीय इत्याह — **अयोगेति**। 'शङ्ख पाण्डुरः' इतिवदयोगव्यवच्छेदेनापि विशेषणत्वं संभवतीत्यर्थः। अच्समुदायस्य [11]स्थानित्वेऽपि न दोष इत्याह — **वर्णेति**। जातेः सर्वव्यक्तिष्वेकत्वान्न संख्याविवक्षायाः प्रयोजनम्, व्यक्तिगतैकत्वं तु न शब्दार्थ इति तद्विवक्षाया अप्रसङ्ग एवेति भावः। वस्तुतोऽच [12]इत्यच्स्थानिक आदेशो निर्दिश्यते, एकादेशस्य च [13]'पूर्वपरयोः' इति षष्ठीद्विवचनेन प्रत्येकमचोः स्थानित्वमुक्तमिति संख्याविवक्षायामपि न दोष इत्याह — **भवतु वेति**। संख्या विवक्षितेति शेषः। उभयथा व्यवहारमेवाह — **उरणिति**। यथा — अण्ग्रहणेनाज्झल्समुदायस्थोऽण् [14]न गृह्यते, अग्ग्रहणेन तु समुदायस्थोऽप्यग् गृह्यते तथात्र[15] 'अचः' इत्यज्झल्समुदायस्थोऽप्यज् गृह्यते न वेति प्रश्न इत्यर्थः[16]। **अत्यरराजदिति**। राजानमतिक्रान्तवानिति [17]'प्रातिपदिकाद्धात्वर्थे बहुलमिष्ठवच्च' इति णिच्। इष्ठवत्त्वाट्टिलोपः। निषेधप्राप्तिमेवाह — **अस्तीति**। **अत्र** टिमध्ये। अवादेशे कार्ये स्थानिवद्भावाप्राप्ति शङ्कते — **गुणलोपयोरिति**। **स्थानिन इति**। पूर्वसूत्रेण स्थानिवद्भावादित्यर्थः। न च 'अनल्विधौ' इति निषेधः, [18]'पूर्वत्वस्य शास्त्रीयकार्यत्वाभावेन प्रतिषेधाप्रसङ्गादिति भावः। स्थानिवद्भावे सत्यवादेशो न प्राप्नोतीत्याह — **तत्रेति**। केकयशब्दात् [19]'जनपदशब्दात् क्षत्रियादञ्' इत्यञि [20]'केकयमित्रयु' इत्यादिना यादेरियादेशे [21]सति 'कैकेयः' इति रूपम्। तत्रेयादेशस्य स्थानिवद्भावाद् [22]गुणो न प्राप्नोतीति भाष्य उक्तम्। तत्र गुणसिद्धिं शङ्कते —

---

[1] पा. सू. ५. ४. १३८.
[2] इत्यकारलोपः — ऋ.
[3] पा. सू. ३. ४. ७९.
[4] पा. सू. ७. ४. ५३.
[5] पा. सू. ७. ३. १.
[6] आदेरेचः — आ, ऋ.
[7] विशेषणस्य विवक्षितत्वाद्विशेषणसंख्या — अ.
[8] 'पर्यवसन्नः' इति नास्ति — म.
[9] विवरणोक्तिमनूद्य खण्डयति — आदेशेत्यादिना।
[10] विवक्षितं वेति — अ.
[11] स्थानिवत्त्वेऽपि — म.
[12] इत्यच्स्थानिकादेशः — अ.
[13] पा. सू. ६. १. ८४.
[14] 'न' इति नास्ति — म, ऋ.
[15] 'अत्र' इति नास्ति — अ.
[16] 'अर्थः' इत्यादि 'पूर्वसूत्रेण स्थानिवद्भावादित्यर्थः' इत्यन्तं नास्ति — इ.
[17] चुरादिगणसूत्रम्।
[18] पूर्वस्य — ऋ.
[19] पा. सू. ४. १. १६८.
[20] पा. सू. ७. ३. २.
[21] 'सति' इति नास्ति — म, इ, ऋ.
[22] आद्गुणो न — इ.

नन्विति। **दोषः** [1]गुणाप्रसक्तिदोषः। **स्थानिवन्न भवतीति**। स्थानिनि यथा कार्यं न भवति तथादेशेऽपि न भवतीत्यभावातिदेशविवरणम्। **दोषः स्यादिति**। स्थानिनि यकारे [2]गुणाभावादियादेशेऽपि न स्यादित्यर्थः। नन्वभावोऽप्यादेशेऽतिदिश्यते, तथा च तत्रापि 'योऽत्राश्रीयते नासावादेशः' इति न्यायादिकार[3]मात्रस्यादेशत्वाभावात् तन्मात्राश्रयो गुणः स्यादेव। किं च वाय्वोरित्यादिसिद्धये क्वचिदेवाभावातिदेशोऽङ्गीक्रियते, न सर्वत्र, अत आह — **परिहारेति**। पक्षान्तरस्येत्यर्थः। लोपस्य परनिमित्तकत्वमुपपादयति — **समानाधिकरणेति**। तृतीयापूर्वपदं क्तप्रत्ययान्तं सुबन्तं समानाधिकरणेन समस्यते क्तान्तस्य लोपश्चेति वार्तिकार्थः। **लोपस्येति**। [4]'सुपा' इत्यधिकारेण समासस्य परनिमित्तत्वात् संनियोगशिष्टस्य लोपस्यापि परनिमित्ततेत्यर्थः। ननु [5]'यङोऽचि च' इत्यत्र [6]'ऊतोऽचि' इति वार्तिकेनोकारान्ताद्विहितस्य यङोऽच्प्रत्ययस्य लुक्, नान्यत्रेति नियमात् 'चेच्यः' इत्युदाहरणमयुक्तम्, अत आह — **ऊतोऽचीति**। **अनाश्रयणादिति**। भाष्यकृतेत्यादिः। [7]'सनीस्रंस इत्यादावपि लुगङ्गीकारेण भगवता तद्वार्तिकप्रत्याख्यानादित्यर्थः। चिञो यङ्यचि [8]'अकृत्सार्व' इति दीर्घे द्वित्वेऽभ्यासगुणे यङो लुकि [9]'एरनेकाचः' इति यणि चेच्यः। एवं [10]'णीञो नेन्यः। कृञो यङि [11]'रीङृतः' इति रीङि द्वित्वेऽभ्यासगुणे यङो लुकीयङादेशे [12]चेक्रियः। लूञो यङि द्वित्वेऽभ्यासगुणे यङो लुक्युवङि लोलुवः। [13]'न धातुलोपे' इति सर्वत्र गुणनिषेधः। **अच इत्युपादानादिति**। षष्ठी तावदादेशसंबन्धे। साक्षात्संबन्धसंभवे च परम्परासंबन्धो न ग्राह्यः। तत्राच एव स्थानित्वे साक्षात्संबन्धः, समुदायस्य स्थानित्वे [14]तस्य साक्षात्संबन्धः, तद्द्वाराचः परम्परया। [15]'वाजपेयस्य यूपः' इत्यत्र तु साक्षात्संबन्धासंभवात् परम्पराश्रयणमिति भावः।

---

[1] गुणप्रसक्ति — अ, म.
[2] गुणाभावादादेशेऽपि — म.
[3] मात्रस्यादेशित्वाभावात् — अ.
[4] पा. सू. २. १. ४.
[5] पा. सू. २. ४. ७४.
[6] का. वा. २. ४. ७४–१.
[7] सनीस्रसः — आ, इ; सरीसृसः — ऋ.
[8] पा. सू. ७. ४. २५.
[9] पा. सू. ६. ४. ८२.
[10] णियो नेन्यः — म.
[11] पा. सू. ७. ४. २७.
[12] 'चेक्रियः' इत्यस्यानन्तरं 'डुक्रीञ् द्रव्यविनिमये, इत्यस्माद्यङ्यचि यङ्लुकीयङादेशे चेक्रिय इति रूपम्' इत्यधिकम् — ऋ.
[13] पा. सू. १. १. ४.
[14] 'तस्य' इति नास्ति — अ, इ.
[15] मीमांसातृतीयाध्यायप्रथमपादे नवमाधिकरणे 'आनर्थक्यात् तदङ्गेषु' इत्यत्र 'सप्तदशारत्निर्वाजपेयस्य यूपो भवति' इति वाजपेयप्रकरणस्थवाक्ये यूपद्रव्यगतस्य सप्तदशारत्नित्वस्य प्रकरणादानन्तर्याच्च वाजपेयाङ्गत्वमिति पूर्वपक्षं कृत्वा सिद्धान्तितम् — वाजपेयस्य सोमयागतया तस्य यूपसंबन्धाभावात् 'सप्तदश प्राजापत्यान् पशूनालभते' इति वाजपेयाङ्गभूतपशोरङ्गभूते यूप एव सप्तदशारत्नित्वस्यान्वयः। यूपद्वारा पश्वङ्गत्वं तद्द्वारा वाजपेयाङ्गत्वम्। एवमपि प्रकरणानन्तर्ययोर्नानुपपत्तिः, अन्ततो वाजपेयाङ्गत्वाङ्गीकारात्। अत्र पक्षे वाजपेयस्येति षष्ठी परम्परासंबन्धे वर्तते, देवदत्तस्य नप्तेतिवत्। पूर्वपक्षे यूपशब्दस्य षोडशिग्रहलक्षणापि दोष इति। तदत्रानुसन्धेयम्॥

[१, ४४०–४४३]

(**रत्नप्रकाशः**) 'पूर्वविधौ' इत्यत्र पूर्वस्यैव विधिः पूर्वविधिरित्यवधारणमाश्रितमित्यन्यत्रापि तथैवावधारणं प्रसक्तमित्येकादेशस्य स्थानिवद्भावो न प्रसक्त इत्याशयेनाह — **एकादेशस्येति**। **श्रायसौ गौमताविति**। अणौङोरेकादेशस्य परादित्वेन ग्रहणान्नुम् प्राप्तः। **चातुरावानडुहौ** अत्राणौङोरेकादेशस्य परादित्वेन ग्रहणादाम् प्राप्तः। **पाद इति**। सप्तम्येकवचनेन [1]तस्य तथात्वात् पद्भावः प्राप्तः। **उदवाहे** अत्र सप्तम्येकवचनेन तस्य तथात्वादूठ् प्राप्तः। **अचोश्चेति**। 'उभयनिमित्तत्वात्' इति हेतुना सह 'उभयादेशत्वाच्च' इति हेत्वन्तरप्रदर्शनपरमिदम्। 'पूर्वविधौ' इत्यत्र पूर्वस्येत्येव सिद्धे विधिग्रहणबलात् पूर्वस्यैवेत्यवधारणमाश्रितम्, अन्यत्रावधारणाश्रयणे न किंचिन्मानमिति पूर्वपरनिमित्तस्यापि परनिमित्तत्वादचोरादेशस्याप्यच आदेशत्वान्नोक्तदोष इत्याह — **नैष दोष इति**। एतेन "परस्मिन्नित्येतदवधारणार्थमुपात्तम्। तथा ह्यनुपादीयमानेऽपि परस्मिन्नित्यस्मिन् परनिमित्तकस्य स्थानिवद्भावो लभ्यत एव। तत्र यथानेनापरनिमित्तकस्य स्थानिवद्भावो वार्यते 'वैयाघ्रपद्यः, आदीध्ये' इति, एवं परस्मिन्नेव य आदेश इत्यवधारणादुभयनिमित्तस्याप्राप्तिरिति भावः" इति कैयटो निरस्तः। 'परस्मिन्' इत्यस्यापरनिमित्तव्यावर्तनेन चरितार्थस्य नियमपरत्वकल्पने मानाभावात्। तस्य नियमपरत्वसंभवे सिद्धान्तस्यासंभवदुक्तिकत्वापत्तेश्च। यदप्युक्तं तेनैव "अच इति गुणत्वादेकत्वसंख्यायाः 'पशुना यजेत' इतिवद्विवक्षितत्वादचोरादेशस्य[2] न स्थानिवत्त्वं प्राप्तम्" इति। तदपि न, एकवचनस्यौत्सर्गिकस्य [3]'न केवला प्रकृतिः प्रयोक्तव्या' इति निषेधपरिपालनार्थत्वेनाप्युपक्षीणस्य संख्यान्तरनिवर्तकत्वायोगात्। 'पशुना यजेत' इत्यत्र त्वेकेनापि पशुना यागे कृते विधिरुपपन्न इति द्वितीयादि न गृह्यते, 'न हिंस्यात् सर्वा भूतानि' इति निषेधात्। 'ग्रहं संमार्ष्टि' इत्यत्र तु द्वितीयादिसंमार्गे बाधकाभावात् सर्वेषां ग्रहाणां प्रत्येकमेकत्वेन विनिगमनाविरहेण सर्वसंबन्धितया श्रुतस्य संमार्गस्येच्छयान्यतमसंबन्धित्वकल्पनानौचित्यात् सर्वेषु ग्रहेषु संमार्गो भवति, तथात्राप्येकवचनस्य संख्यान्तरव्यावर्तकत्वासंभवेनाचोरादेशोऽपि स्थानिवदितीष्टं सिध्यति। यदुक्तं तेनैव सिद्धान्ते 'अन्वयव्यतिरेकाभ्यां निमित्तत्वावधारणाद् भवत्येव परस्य निमित्तता, अयोगव्यवच्छेदेन परस्मिन् य आदेश इति विशेषणात्' इति। तदप्ययुक्तम्, पूर्वपक्षिणा परस्य निमित्तत्वाभावस्यानापादितत्वेनान्वयव्यतिरेकाभ्यां तत्साधनस्यासंबद्धप्रलापत्वात्। 'अनुपादीयमानेऽपि परस्मिन्' इत्यादिपूर्वपक्षग्रन्थेनायोगव्यवच्छेदस्य परस्मिन्ग्रहणाभावेऽप्युपलम्भस्योक्तत्वेन 'अयोगव्यवच्छेदार्थं परस्मिन्ग्रहणम्' इति प्रतिज्ञामात्रेण तद्दूषणापरिहाराच्च। यदप्युक्तं तेनैव द्वयोरिति प्रतीके 'वर्णनिर्देशे जातिग्रहणान्नास्ति संख्याविवक्षा, भवतु वा, तथापि न दोष इति भावः' इति। [तदपि न,] जातिपदार्थवादिमीमांसकमतानुसारेण पश्वेकत्वदृष्टान्तेन साधिताया एकत्वविवक्षायाः 'वर्णग्रहणे जातिग्रहणात्' इति पञ्चम्यन्तप्रयोगमात्रेणानिराकरणात्। 'भवतु वा विवक्षा, तथापि न दोषः' इत्यस्य व्याहतत्वाच्च। एकत्वविवक्षायां ह्येकस्याचो य आदेश इति प्रतीयत इति द्वयोरादेशस्य स्थनिवत्त्वं दुर्लभमेव भवति। अचोरिव हलचोरप्यादेशोऽच आदेशः स्यादिति मन्यमानः पृच्छति — **अथ हलचोरिति**। एतेन "उभयथा [4]शास्त्रे व्यवहारदर्शनात् प्रश्नः।

---

[1] एकादेशस्य परादित्वादित्यर्थः। तेन च भत्वादिति तात्पर्यम्। एवमुत्तरवाक्येऽपि।

[2] 'अचोरादेशस्य' इत्याद्यर्थसिद्धानुवादः।

[3] महाभाष्यम् १. २. ६४.

[4] शास्त्रव्यवहार — ब.

[1]'उरण् रपरः' इत्यत्राणनण्[2]समुच्चयोऽकङादिरादेशो रपरो न भवति। [3]'नाग्लोपि' इत्यत्र त्वरराजदिति हलकोर्लोपेऽप्यग्लोपित्वाश्रयणादुपधाह्रस्वत्वनिषेधो भवति, अस्ति ह्यत्राको दर्शनमिति" इति निरस्तम्। [4]'उरण् रपरः' इत्यत्र 'उः स्थाने योऽण्' इत्युक्तेरादेशस्यैवाणो ग्रहणमित्यणनण्-समुच्चयगतस्याण आदेशत्वाभावादेव ग्रहणं यथा न जायते तथात्रापि 'अचँ आदेशः' इत्युक्ते हलच्समुच्चयरूपस्थानिघटकस्याचः स्थानित्वाभावादेव तत्समुदायादेशस्याच आदेशत्वाभावस्यैव निर्णयेन तद्दृष्टान्तेन, तथा [5]'नाग्लोपि' इत्यत्राको लोपोऽग्लोपः, स यस्यास्ति सोऽग्लोपीत्यर्थाश्रयणेनाग्लोपयोः प्रतियोग्यनुयोगितामात्रस्यैव प्रतीयमानतयागनग्लोपे सत्यप्यग्लोपसत्त्वमात्रेण ह्रस्वनिषेधसंभवेन तद्दृष्टान्तेन चात्र संशयानुपपादनात्। किंचिदज्ञानावलम्बनेनैव प्रष्टुराशये वर्णनीये संनिहितसंशयबीजत्यागे मानाभावात्। सिद्धान्ते शङ्काबीजयोर्वैषम्यकारणानिरूपणेन व्यर्थाध्येतृमनःखेदसंपादनानौचित्याच्च। **एकादेश इति**। पररूपमित्यर्थः। **विंशक इति**। [6]'विंशतित्रिंशद्भ्याम्' इति ड्वुन्। **विंशमिति**। [7]'शदन्तविंशतेश्च' इति डः। **स्थवीयानिति**। यद्यपि लोपोत्तरं लोपकाले वा गुणो विहित इति स स्थानिभूतादचः पूर्वत्वेन दृष्टो नेति 'वैयाकरणः' इत्यादाविव स्थानिवद्भावो न प्राप्नोति, तथापि सूत्रकाराभिमतादेशापेक्षपूर्वत्वाभिप्रायेणेदमिति न दोषः। एतेन 'स्थानिनोऽनादिष्टादचः पूर्वत्वात् तद्द्वारेण गुणस्यापि भविष्यतीत्यदोषः' इति निरस्तम्। 'वैयाकरणः' इत्यादावपि स्थानिभूतादचः पूर्वत्वेन वकारादेर्दृष्टत्वेन तद्द्वारेणैजादेरपि तत्संभवेन 'अचः पूर्वत्वविज्ञानादैचोः सिद्धम्' इति भाष्यस्य निर्विषयत्वापत्तेः। यत्तु विवरणकृतोक्तं 'पूर्वसूत्रेण स्थानिवद्भावादिति भावः' इति। तन्न, अशास्त्रीयस्य पूर्वत्वेन दृष्टत्वस्यातिदेशायोगात्। कृत्वाचिन्तोदाहरणानां केनचित् प्रकारेणोपपत्तौ तदुपपादनार्थं सिद्धान्तभङ्गाश्रयणानौचित्याच्च। **एत्वं न सिध्यतीति**। [8]"आद्गुणः' इति गुणो न सिध्यतीत्यर्थः। यत्तूक्तम् 'नन्वज्मात्रे गुणो विधीयते, न त्वजादौ। तेन योऽत्रादेशो नासावाश्रीयते, यश्चाश्रीयते नासावादेश इति न्यायेन न दोषः। नैतदस्ति, स्थानिवन्न भवतीत्यभावातिदेशाश्रयणपक्षे दोषः स्यादेव। परिहारान्तरस्याभिधास्यमानत्वाद्वैतन्नाश्रितम्' इति। तन्न, निर्दुष्टस्य रूपातिदेशपक्षस्यैव भाष्यकृत्संमतत्वेन तदाशयमबुद्ध्वाव्यवस्थितासंबद्ध[9]प्रलापानौचित्यात्। **उत्तरपदलोपे चेति**। तस्य परनिमित्तत्वं तु [10]'वर्णो वर्णेन' इति सूत्रगतेन [11]'समानाधिकरणाधिकारे शाकपार्थिवादीनामुपसंख्यानमुत्तरपदलोपश्च' इति वार्तिकेन समानाधिकरण उत्तरपदे परे पूर्वपदावयवभूतोत्तरपदस्य लोपविधानादवगन्तव्यम्। एतेन [12]'समानाधिकरणाधिकारे क्तस्तृतीयापूर्वपद उत्तरपदलोपश्च' इति लोपस्य परनिमित्तता' इति निरस्तम्। [13]'अन्नेन व्यञ्जनम्' [14]'भक्ष्येण मिश्रीकरणम्' इति सूत्रद्वयगततद्वार्तिकस्य भाष्यकृता निराकृतत्वेन सूत्रेण वा, तद्वार्तिकापेक्षया व्यापकेन परेणास्मदुक्तवार्तिकेनैव वा 'दधिसक्तवः' इत्यादीनामपि साधयितुमुचितत्वात्। **नेन्य इति**। [15]'एरनेकाचः' इति यण्। यत्तूक्तम् " [16]'ऊतोऽचि' इत्येतदनाश्रयणादुपन्यासः' इति। तन्न,

---

[1] पा. सू. १. १. ५१.
[2] समुदाय इत्यस्यार्थानुवादः।
[3] पा. सू. ७. ४. २.
[4] पा. सू. १. १. ५१.
[5] पा. सू. ७. ४. २.
[6] पा. सू. ५. १. २४.
[7] पा. सू. ५. २. ४६.
[8] पा. सू. ६. १. ८७.
[9] अव्यवस्थितासंबद्धेति छेदः।
[10] पा. सू. २. १. ६९.
[11] का. वा. २. १. ६९-८.
[12] का. वा. २. १. ३४, ३५–४.
[13] पा. सू. २. १. ३४.
[14] पा. सू. २. १. ३५.
[15] पा. सू. ६. ४. ८२.
[16] का. वा. २. ४. ७४–१.

तद्वार्तिकस्य [1]'यङोऽचि च' इति सूत्रगतस्य ऊकारान्ताद्विहितो यो यङ् तस्यैवाचि लुग् भवती-त्येतदर्थकस्य भाष्यकृता तत्रैव निराकृतत्वेनाध्येतृमनःखेदाय तदुट्टङ्कनानौचित्यात्। **अस्तु तर्हि न स्थानिवदिति**। अच आदेशो नेति कृत्वेति शेषः। एतेन 'अच इत्युपादानात् साक्षा-देव यत्राच् स्थानित्वेनोपात्तस्तस्यैव स्थानिवद्भावः, न तु हलजादेशस्येत्यर्थः' इति निरस्तम्। हलचोरादेशस्य परम्परया अच आदेशत्वाश्रयणे मानप्रयोजनयोरभावेन 'साक्षात्' इत्युक्तेरनर्थक-त्वात्। **न धातुलोप इति**। इदं सूत्रं न प्रत्याख्यातमिति तत्रैव प्रपञ्चितम्॥

[१, ४४०–४४३]

(नारायणीयम्) ननूभयनिमित्तकत्वेऽपि परनिमित्तकत्वस्याहानात् किमुपसंख्यानेन, अत आह — **परस्मिन्निति**। ननु [2]प्राप्तस्योपादानं नियमार्थम्। न चेह [3]तद्विशेषणोपादानात् प्रागेव तद्विशेषणप्राप्तिः, येनायं नियमो भवेत्, अत आह — **तथा हीति**। असत्यस्मिन् विशेषणे परनिमित्तकस्य निमित्तशून्यस्योभयनिमित्तकस्य च स्थानिवद्भावप्राप्तिरिति विशेषणमेतदवधा-रणार्थम्। यथा निमित्तशून्यस्य स्थानिवत्त्वनिवारकं तथोभयनिमित्तकस्यापीत्याह — **तत्रेति**। अचोः [4]स्थानित्वेऽप्यच इति संख्याया विवक्षाभावात् सिद्ध एव स्थानिवद्भावः, तत्राह — **अच इति**। वासफलस्याध्ययनादेर्निमित्तत्वं वासप्रयोजकत्वाद्विवक्ष्यते। लोके फलत्वं च प्रत्येकमस्त्ये-वेत्यन्यतरतो व्यपदेशस्तत्र युक्तः। इह [5]त्वेकैकस्मादेकादेशासिद्धेर्न निमित्तभावः प्रत्येकमित्या-शङ्क्याह — **अन्वयेति**। यद्येकैकस्मात् [6]कार्यादर्शनमात्रेण निमित्तभावव्याहतिस्तदा तन्त्वादी-नामपि लोकप्रसिद्धं निमित्तत्वं न स्यात्, सामग्र्या एव तु स्यात्। तस्मात् [7]कार्यानुगतान्वय-व्यतिरेकतया निमित्तत्वं लोकवच्छास्त्रेऽपीत्यर्थः। अस्तु परस्यापि निमित्तत्वम्, तथापि विशेषण-स्यावधारणार्थत्वात् तन्मात्रनिमित्तत्वं स्थानिवत्त्वप्रयोजकमित्युक्तम्, अत आह — **अयोगेति**। यदि विशेषणानुपादानेऽपि परनिमित्तकत्वं नियमतो लभ्येतादेशस्य, ततोऽन्यव्यावृत्तिपरं विशेषणं स्यात्। न चैतदस्ति, तदनुपादानेऽनिमित्तकस्यापि स्थानिवत्त्वप्रसक्तेः। तस्मान्नियमतः परनिमित्तकत्व-लाभार्थमेतद्विशेषणं, नेतरव्यावृत्तिपरमित्यर्थः। वर्णनिर्देशे संख्याविवक्षा जातिपरत्वान्नास्ति। यथा संयोगसंज्ञायामुक्तम्। इह तु परिहारान्तरसत्त्वात् तदुपेक्षेत्याह — **वर्णेति**। यत्र साक्षा-दचः स्थानित्वं तदादेशग्रहणं न्याय्यमिति कथं हलजादेशस्य स्थानिवत्त्वशङ्केत्याशङ्क्य न्यायापरा-मर्शेन दर्शन[8]मात्रपरोऽयं संदेह इत्याह — **उभयथेति**। **तुल्येति**। यदि गुणोत्तरकालं लोपः स्यात् तदा [9]स्थान्यपेक्षया पूर्वत्वं भवेत्। गुणतुल्यकालत्वे तु तन्नास्तीत्यर्थः। **तद्द्वारेणेति**। स्थानि-वद्भावादिति न मन्तव्यम्। शास्त्रीयकार्ये स्थानिवद्भावविधानादनादिष्टादचः पूर्वत्वस्य शास्त्रीय-कार्यत्वाभावात्। तस्मात् तत्स्थानापन्नस्य तद्धर्मलाभाल्लौकिकन्यायाद् अनादिष्टादचः पूर्वत्वं गुणस्येत्यभिमानमात्रमिदम्, न हीदृशमनादिष्टादचः पूर्वत्वं स्थानिवद्भावनिमित्तं भवत्यत्र। **अभावातिदेशेति**। तत्र ह्ययमर्थः — यथा स्थानिनि कार्यं न भवति तथादेशे सत्यपि न भाव्यम्।

---

[1] पा. सू. २. ४. ७४.
[2] प्राक्तस्योपादानं — क; प्रोक्तस्योपादानं — ति.
[3] तद्विशेषोपादानात् — क, ति.
[4] स्थानिवत्त्वेऽपि — क.
[5] त्वेकैकस्मादेकादेशसिद्धेर्न निमित्ताभावः — क.
[6] कार्यदर्शनमात्रेण निमित्ताभाव — क.
[7] कार्यानुकृतान्वयव्यतिरेकितया — क, ति.
[8] मात्रकृतोऽयं — ति.
[9] स्थान्यपेक्षापूर्वत्वं — क.

नन्वादेशनिमित्ततया कार्यप्राप्तावेवाभावातिदेशोऽपि। [1]न चात्रादेशनिमित्तकार्यप्राप्तिः, तदवयवनिमित्तत्वाद् गुणस्येत्यपरितोषादाह — **परिहारेति**। उत्तरपदलोपस्यापरनिमित्तत्वमाशङ्क्य येन [2]समानाधिकरणेन क्तान्तस्य समासस्तदेवार्थान्निमित्तमित्यभिप्रायेणाह — **समानाधिकरणाधिकार इति**। यङ्लुकैवात्र न भाव्यम्, [3]'ऊतोऽचि' इत्यूकारान्तादेव [4]तद्विधानादित्यत आह — **ऊत इति**। किं निर्दोषतैव तत्पक्षास्थानकारणम्, न, न्यायोऽपीत्याह — **अच इति** ॥

[१, ४४३–४४७]

(**लघुविवरणम्**) ननु द्विर्वचनविधौ स्थान्याश्रित एव, [5]'अनचि' इति प्रसज्यप्रतिषेधे प्रतिषेधविधौ स्थान्याश्रितः, उत्सर्गापवादयोश्चैकवाक्यत्वम्। ततश्च द्विर्वचनविधावपि स्थान्याश्रित इत्यत आह — **द्विर्वचनादावपीति**। लुग्ग्रहणाकरणं प्रयोजनं [6]न भवतीत्याह — **अदुह्वहीत्येवमर्थस्त्विति**। वचनसामर्थ्याद् व्यवधानेऽपि भविष्यतीत्यत आह — **वचनसामर्थ्यादिति**। नन्वदेर्विधीयमानो जग्धिभावः कथमादेर्भविष्यतीत्यत आह — **आदयतेरिति**। ननु युलोपादयो यणादेशस्य बहिरङ्गत्वेनासिद्धत्वान्न भविष्यन्तीत्यत आह — **बहिरङ्गेति**। **जन जनन इत्यस्मादिति**। **आत्मनेपदम्** इट्। [7]'गमहन' इत्युपधालोपः। ननु 'सौर्ये' इति कथमुदाहरणं न भवति, अत्रापि हि स्थानिवद्भावाभावे एकादेशस्य प्रवृत्तेः प्रागेव परत्वादीकारे परत उपधा यकार इति लोपः प्राप्नोतीत्यत आह — **सौर्ये इत्यत्रेति**। **श्यां** शीप्रत्यये। 'सौर्यी' इत्यत्र स्थानिवद्भावाभावेऽपि [8]'असिद्धवदत्राभात्' इत्यणोऽकारलोपस्यासिद्धत्वादुपधा यकार इति लोपः प्राप्नोति। **विधिग्रहणादिति**। पूर्वेणाश्रीयमाणायामेव प्रकृतौ स्थानिवद्भाव इत्यादेशाश्रयकार्यप्रसक्तौ विधावित्यनेन स्वाश्रयं निवर्त्यत इति भावः। सप्तमे कीदृशः परिहारो वक्ष्यत इत्यत आह — **श्रुतीति** ॥

[१, ४४३–४४७]

(**विवरणम्**) **उतेति**। आदेशे च प्राप्तिरित्यपि द्रष्टव्यम्। ननु स्थानिवद्भावात् संयोगसंज्ञा न प्राप्नोतीति वक्तव्यम्, किमुच्यते गुरुविधिरित्यत आह — **कार्येति**। ननु [9]'अनचि' इति प्रतिषेधे स्थान्याश्रितः, ततश्च पक्षान्तरेऽपि प्रतिषेधे द्विर्वचनग्रहणं कर्तव्यमित्यत आह — **अनचीति**। 'तत्रायम्' इत्यनेन पक्षद्वयेऽपि वरेग्रहणं न कर्तव्यमित्युक्तं भवति। **क्सस्येति**। [10]'क्सस्याचि' इत्यनेन क्सलोपे प्रकृते लुग् वक्तव्य इति [11]च [12]वार्तिकार्थः। पक्षान्तरे [13]'वा दुहदिह' इति लोप एव वक्तव्य इति भावः। तत्राप्यवश्यं लुग् वक्तव्य इत्याह — **अदुह्वहीति**।

---

[1] न चात्रातिदेशे निमित्त — क.
[2] सामानाधिकरण्येन — क.
[3] का. वा. २. ४. ७४–१.
[4] तद्विधानादित्याह — क.
[5] पा. सू. ८. ४. ४७.
[6] 'न' इति नास्ति — ण.
[7] पा. सू. ६. ४. ९८.
[8] पा. सू. ६. ४. २२.
[9] पा. सू. ८. ४. ४७.
[10] पा. सू. ७. ३. ७२.
[11] चकारो नास्ति — च.
[12] वाक्यार्थः — च, छ.
[13] पा. सू. ७. ३. ७३.

[1]**अल्लोपस्येति**। [2]'गमहन' इत्यनेन विहितस्य। **घत्वाप्रसङ्ग इति**। [3]'हो हन्तेः' इत्यनेन। **एकदेशेति**। [4]वृद्धया। **वधेति**। [5]'हनो वध लिङि' इत्यनेन। **आत्मनेपदमिति**। इङिति शेषः। श्लुस्तु भवति, जुहोत्यादित्वादिति भावः। नन्वणन्त एवोदाह्रियतामित्यत आह — **सौर्ये इत्यत्रेति**। [6]**श्यां** शीप्रत्यय इत्यर्थः। 'सौर्यी' इत्यत्र त्विनि [6]'यस्य' इति लोपस्य समानाश्रयत्वात् [7]'असिद्धवत्' इत्यसिद्धत्वादणि [8]'योऽकारलोपस्तस्य [9]व्याश्रयत्वादसिद्धत्वाभावादुपधायकार इति [10]'सौ च' इति दीर्घे कृते लोप [11]ईतीति प्राप्नोतीति भावः। [12]प्रथमं सूत्रे आश्रीयमाणायामेव प्रकृतौ स्थानिवद्भावः। 'विधौ' इत्यनेन [13]नियमार्थेन स्वाश्रयं न भवतीति[14] चेत् किमाश्रीयमाणायामेवेत्यनेन कृतं स्यादित्यत आह — **अत एवेति**। **अदुह्वहीति**। शक्यते [15]त्वत्र वक्तुं 'यद्येतावत् प्रयोजनं स्यात्, [16]वीत्येव ब्रूयात्। तस्मादिदमपि लुग्वचनमविशेषेण स्थानिवद्भावस्य लिङ्गमित्येव वक्तव्यम्' [इति]। सप्तमे वक्ष्यमाणं दर्शयति — **श्रुतीति**॥

[१, ४४३–४४७]

(उद्द्योतनम्) उत यत्रेति। यस्मिन् कार्ये स्थानी नाश्रीयते, आदेशे च सति प्राप्तिः, तत्रापीत्यर्थः। 'संयोगसंज्ञाविधिः' इति वक्तव्ये [17]गुरुविधिरित्ययुक्तम्, अत आह — **कार्येति**। अत्र कार्यस्य [18]स्थान्यनाश्रितत्वमाह — **लोपेति**। **स्थानी** लोपस्याकारः, यण इकारः। भाष्ये 'द्विर्वचनादयश्च' इति गौरवमुक्तम्, तत् कल्पान्तरे [19]नास्तीत्याह — **द्विर्वचनादावपीति**। ननु [20]'अनचि च' इति [21]प्रतिषेधे स्थान्याश्रितः। तथा च कल्पान्तरेऽपि प्रतिषेधे द्विर्वचनग्रहणं कर्तव्यमिति तदंशे साम्यमेव, अत आह — **अनचीति**। उदाहरणान्तरेऽपि [22]स्थान्यनाश्रयत्वमाह — **एवमिति**। वरे तु स्थान्याश्रयणमस्तीति [23]नोदाहरणमित्याह — **वरे त्विति**। भाष्यकृतोऽपि वरेग्रहणं पक्षद्वयेऽपि न कर्तव्यमित्येवाभिप्रेतम्। तत्पाठस्तु संपातायात इत्याशयेनाह —

---

[1] प्रदीपे 'अलोपस्य स्थानिवत्त्वात्' इत्यत्र 'अल्लोपस्य स्थानिवत्त्वात्' इति चौखाम्बामुद्रिते पाठः।
[2] पा. सू. ६. ४. ९८.
[3] पा. सू. ७. ३. ५४.
[4] वृद्धचाम् — ञ.
[5] पा. सू. २. ४. ४२.
[6] पा. सू. ६. ४. १४८.
[7] पा. सू. ६. ४. २२.
[8] 'योऽकारलोपः' इति नास्ति — च, छ, ट.
[9] व्याश्रयत्वादसिद्धत्वाभावे उपधा — ञ.
[10] पा. सू. ६. ४. १३.
[11] सूर्यतिष्येति सूत्रे 'ईति' इत्यनुवर्तत इत्याशयः।
[12] प्रथमसूत्रे — च, छ, ञ, ट.
[13] 'नियमार्थेन' इति नास्ति — ञ.
[14] इतिशब्दो नास्ति — छ, ञ.
[15] तत्र — ञ.
[16] अत्र विवरणकृदाशय एवं स्यादिति भाति — 'वा दुहदिहलिहगुहामात्मनेपदे दन्त्ये' इत्यनेन वकारादावप्यन्त्यस्याकारस्य लोपे सति 'वि' इत्युपरि न्यासेन वकारादौ प्रत्यये क्सस्य लोप इत्यवशिष्टस्य सकारस्य लोपः, यद्वा, अन्त्यलोपे प्राप्ते पुनर्विधानसामर्थ्यात् कृत्स्नस्य लोप इति लुग्ग्रहणं व्यर्थं सज्ज्ञापकमिति।
[17] गुरुविधीत्ययुक्तम् — म, ऋ.
[18] स्थान्याश्रितत्वमाह — ऋ.
[19] नास्तीत्यभिप्रेत्याह — ऋ.
[20] पा. सू. ८. ४. ४७.
[21] प्रतिषेधः स्थान्याश्रितः — अ, इ, ऋ.
[22] स्थान्याश्रयत्वम् — अ; स्थान्यनाश्रितत्वम् — इ.
[23] नोदाहरणमित्याशयेनाह — ऋ.

[1]**तत्रायं भाव इति**। **क्वसस्येति**। [2]'लुग्वा दुह्' इत्यत्र लोप इत्यनुवृत्तावपि लुग्ग्रहणसामर्थ्यात् सर्वलोपो विधीयते। तत्र पक्षान्तरे [3]'झलो झलि' इति लोपस्य स्थान्याश्रितत्वाभावेनान्त्यलोपस्य स्थानिवद्भावाभावात् [4]'झलो झलि' इति सलोपेन 'अदुग्ध' इत्यादि सिध्यति। अस्मिन् पक्षे स्थानिवद्भावेन सलोपासिद्धेः सर्वलोपार्थं लुग् वक्तव्य इति गौरवमिति [5]तात्पर्यम्। **लोपः** सलोपः। क्वसस्य लोपे प्रकृते लुग्वचनं कर्तव्यमिति वार्तिकार्थः। पक्षान्तरेऽपि लुग् वक्तव्य एवेत्याह — **अदुह्वहीति**। **अल्लोपस्येति**। [6]'गमहन' इत्यनेन विहितस्य। **घत्वेति**। [7]'हो हन्तेः' इत्यनेन विहितस्य घत्वस्याप्रसङ्ग इत्यर्थः। वचनाद् व्यवधानेऽपि घत्वाङ्गीकारेऽतिप्रसङ्गमाह — **वचनेति**[8]। [9]नन्वदेर्विहितो जग्धिरादयतेः कथं स्यात्, अत आह — **आदयतेरिति**। **एकदेशविकृतस्येति**। वृद्धयेत्यादिः। प्राप्तिमेवाह — **न चेति**। पूर्वकल्पे तु [10]णिलोपस्य स्थानिवद्भावादादेशाप्रसङ्ग[11] इति भावः। **घात्यादिति**। हन्तेर्ण्यन्तादाशीर्लिङ्, [12]'हो हन्तेः' इति कुत्वम्। [13]'हनस्तोऽचिण्णलोः' इति नस्य तत्वम्, उपधावृद्धिः। **वधेति**। [14]'हनो वध [15]लिङि' इत्यनेन। ननु यलोपे कर्तव्ये बहिरङ्गस्य यणोऽसिद्धत्वाद् वलि लोपाप्रसङ्गः, एवमग्रेऽपि, अत आह — **बहिरङ्गेति**। भाष्ये **अकुर्वीति**। लङात्मनेपदोत्तमपुरुषैकवचनम्। 'अकुरु [16]इ आशाम्' इति स्थिते इकारस्य शब्दपरविप्रतिषेधेन यणि सति [17]'ये च' इत्युलोपप्रसङ्गः। भाष्ये **अलुनीति**। अत्रापि लङ। 'अलुना इ आशाम्' इति स्थिते यणि हल्परत्वादीत्वप्रसङ्गः। ननु ह्वादिजनेरात्मनेपदं नास्ति, दैवादिकस्य तु श्लुर्नास्ति, अतः कथम् 'अजज्ञि' [18]इति, अत आह — **जनेति**। [19]'गमहन' इत्युपधालोपे 'अजज्ञ् इ आशाम्' इति स्थिते यणि नकारस्यात्वप्रसङ्गः। भाष्ये 'रायि' इति सप्तमी। रै [20]इ आशाम्' इत्यत्र यणि सत्यात्वप्रसङ्गः। ननु [21]'सौर्ये' इत्यत्रैव यलोपः कथं नोक्तः, अत आह — **सौर्ये इति**। सौर्य ई इति स्थिते यदि [22]'यस्य' इति लोपः स्यात् तदा यलोपः प्रसज्येत। शीप्रत्यये परतो [23]'यस्य' इति लोपाभावाद् यलोपाप्रसङ्ग इत्यर्थः। सूर्यस्य [24]ङ्यामेव यलोपनियमान्नात्र प्रसङ्गः, अत आह — **सूर्येति**। भाष्ये **यलोपः** [25]'सूर्यतिष्य' इत्यनेन। **गोत्रस्त्रिया इति**। गोत्रं या स्त्री तदभिधायिनोऽपत्ये णः स्यात्, चाट्ठक् कुत्सने गम्ये, इति [26]'गोत्रस्त्रियाः कुत्सने ण च' इति सूत्रार्थः। गार्ग्या अपत्यं गार्गो जाल्मः। अञ् यञ् इञ्

---

[1] अत्रायं — ऋ.
[2] पा. सू. ७. ३. ७३.
[3] पा. सू. ८. २. २६.
[4] पा. सू. ८. २. २६.
[5] 'तात्पर्यम्' इत्यस्यानन्तरं 'तथासोरिति सप्तमी' इत्यधिकं दृश्यते — अ, इ, ऋ.
[6] पा. सू. ६. ४. ९८.
[7] पा. सू. ७. ३. ५४.
[8] वचनेनेति — अ.
[9] नन्वत्तेर्विहितः — म, इ, ऋ.
[10] णिलोपे स्थानि — आ.
[11] आदेशप्रसङ्ग इति — म.
[12] पा. सू. ७. ३. ५४.
[13] पा. सू. ७. ३. ५२.
[14] पा. सू. २. ४. ४२.
[15] लङि — म.
[16] 'इ' इति न दृश्यते — म.
[17] पा. सू. ६. ४. १०९.
[18] इतीत्यत आह — म.
[19] पा. सू. ६. ४. ९८.
[20] 'इ' इति नास्ति — अ.
[21] 'सौर्ये' इत्यादि 'नोक्तोऽत आह' इत्यन्तं नास्ति — अ.
[22] पा. सू. ६. ४. १४८.
[23] पा. सू. ६. ४. १४८.
[24] ङ्यामेव लोपनियमात् — अ.
[25] पा. सू. ६. ४. १४९.
[26] पा. सू. ४. १. १४७.

एतदन्तादण् स्यात् संघादिषु, इति [1]'संघाङ्कलक्षणेष्वञ्ञिञामण्' इति सूत्रार्थः। गार्गः संघोऽङ्को लक्षणं वा। एवं बैदः, दाक्षः संघादिः। ननु 'अनाति' इति प्रसज्यप्रतिषेधे [2]समाधानानुपपत्तिः, पर्युदासे शङ्कानुपपत्तिः, अत आह — **अनातीति**। **सदृशेति**। [3]'नञिवयुक्त'न्यायेन नञिवयुक्तस्य [4]सदृशार्थकत्वादित्यर्थः। **आश्रीयमाणायामिति**। विधावित्यस्य नियमार्थत्वेन स्वाश्रयकार्याप्रसङ्गस्योक्तत्वादुक्तदोषाणां चादेशाश्रयत्वादप्रसङ्ग इति 'स्थान्याश्रितकार्ये स्थानिवत्' इति पक्षः स्थित इत्यर्थः। ननु विधिग्रहणात् स्वाश्रयनिवृत्तिश्चेत् किमाश्रीयमाणायामित्यनेन कृतं स्यात्, अत आह — **अत एवेति**। [5]अस्वरसादित्यर्थः। **अत एवेति**। [6]द्विर्वचनादिग्रहणरूपादित्यर्थः। **अदुह्वहीति**। [7]यद्येतावत् प्रयोजनं स्यात् तदा "वि न' इत्येव ब्रूयात्। तस्माल्लुग्ग्रहणमप्यविशेषेण स्थानिवद्भावस्य लिङ्गमित्येव वक्तव्यमिति केचित्। तच्चिन्त्यम्, वाक्यभेदेन [8]वकारे निषेधापेक्षया लुग्वचनस्यैव लघुत्वात्। सप्तमे वक्ष्यमाणमाह — **श्रुतीति**॥

[१, ४४३–४४७]

(**रत्नप्रकाशः**) **किं पुनराश्रीयमाणायामिति**। यद्यपि भगवता विधिग्रहणात् 'विधिमात्रे स्थानिवद् भवति, अनाश्रीयमाणायामपि प्रकृतौ' इति प्रागेवोक्तम्, तथापि तद्विचारवार्तिकव्याख्यानार्थं पुनः प्रश्न इति न दोषः। **गुरुविधिर्न सिध्यतीति**। तथा च गुरुसंज्ञार्थं [10]'न पदान्त' इति सूत्रे गुरुग्रहणं कर्तव्यमिति भावः। **द्विर्वचनादय इति**। यलोपादय आदिपदग्राह्याः, न तु वरच्, 'यायावरः' इत्यत्रालोपे प्रकृतेराश्रयणात्। यत्तूक्तम् "[11]'अनचि' इति पर्युदासाश्रयणात् तत्सदृशस्य हल एव द्विर्वचनादावाश्रयणम्, न त्वचः। एवं यलोपेऽपि" इति। तन्न, [12]'अनचि' इत्यस्य पर्युदासत्वेऽप्यजभावस्यैव द्वित्वे आश्रयणीयत्वेन 'तत्सदृशस्य हल एव तत्राश्रयणम्' इत्युक्तेरयुक्तत्वात्। अन्यथा 'वाक्क्, त्वक्क्' इत्यादावसाने द्वित्वानापत्तेः। 'द्विर्वचनादौ' इत्यादिशब्दानर्थक्याच्च। यदप्युक्तम् 'भाष्ये तु वरेशब्दोऽपि पठितः। तत्रायं भावः — यङ एव समुदायस्य प्रत्ययत्वं न तदवयवस्याकारस्येत्यजादौ प्रत्यये [13]आकारलोपस्य विधानादत्राप्रसङ्ग एवेति' [इति]। तदपि न, रूपातिदेशस्यैव प्रकृतसूत्रेण क्रियमाणत्वेनाल्लोपस्य स्थानिवद्भावे सति तस्याकारस्यैकदेशविकृतन्यायेन प्रत्ययत्वेन प्रकृतेराश्रयणानपायात्। ननु स्थानिवद्रूपातिदेशेऽपि

---

[1] पा. सू. ४. ३. १२७.
[2] समासानुपपत्तिः — म.
[3] परिभाषा ७५.
[4] सादृश्यार्थकत्वादित्यर्थः — म.
[5] 'अस्वरसादित्यर्थः। अत एवेति' इति नास्ति — अ.
[6] द्विर्वचनादिरूपग्रहणादित्यर्थः — अ.
[7] 'यद्येतावत्' इत्यादिर्विवरणोक्त्यनुवादः।
[8] विवरणे 'वि' इत्येव ब्रूयात्, इत्येवोपलभ्यते। तस्य वकारादौ प्रत्यये परतो लोप इत्यर्थः। क्सस्य 'वा दुह' इत्यनेनान्त्यलोपे प्राप्ते 'वि' इति पुनर्विधानसामर्थ्यात् कृत्स्नस्य लोपस्तेन विधीयत इति व्यर्थस्य लुग्ग्रहणस्य ज्ञापकत्वमिति तस्याशयः। अत्र पुनर्लोपविधानेन कृत्स्नस्यैव लोपो भवति, न त्वन्त्यमात्रस्येत्यार्थिकनिषेधलाभात् तमादायान्नंभट्टेन 'वि न' इत्येव ब्रूयादित्यनूद्यते, उपरि 'वकारे निषेधापेक्षया' इति च कथ्यत इति भाति॥ तदाचि नेत्येव — अ; तदा वो नेत्येव — म.
[9] वकारनिषेधापेक्षया — म.
[10] पा. सू. १. १. ५८.
[11] पा. सू. ८. ४. ४७.
[12] पा. सू. ८. ४. ४७.
[13] अकारलोपस्य — ब.

तस्य यङ्वयवत्वाभावेनैकदेशविकृतन्यायेनापि न तस्य प्रत्ययत्वमिति चेन्न, स्थानिवद्भूपातिदेशविधानव्याजेनादेशशास्त्रस्यासिद्धतायां एव विधानात्। एतदभिप्रायेणैव 'असिद्धवचनात् सिद्धम्' इति भगवता प्रागुक्तत्वात्। अन्यथा यातेर्यङन्तात् क्तिचि 'यातिः' इत्यस्यासिद्धेश्च। ननु तर्हि प्रकृतभाष्यगतवरेग्रहणस्योपपत्तिः कथमिति चेत्, उत्तरसूत्रे 'वरेयलोप' इत्येकमेव कार्यं निर्दिष्टमिति पूर्वपक्षाभिप्रायेणेति गृहाण। **क्सलोपे लुग्वचनमिति**। [1]'क्सस्याचि' इति लोपसूत्रे सत्यपि पृथक् [2]'लुग्वा दुह' इत्यादिसूत्रं कर्तव्यमिति [भावः।] **अदुग्धेति**। क्सस्य [3]'अलोऽन्त्यस्य' इत्यन्त्यस्य लोपे कृते तस्य स्थानिवद्भावात् [4]'झलो झलि' इति लोपो न स्यादिति लुग्विधेयः। यद्यपि [5]'पूर्वत्रासिद्धे च' इति वचनात् तत्र स्थानिवद्भावो न भविष्यति, तथापि 'अदुह्वहि' इत्येतदर्थमवश्यं तद्वक्तव्यमित्यन्यदेतत्। **हन्तेर्घत्वमिति**। [6]'हो हन्तेर्ञ्णिन्नेषु' इति नकारे परतो विधीयमानस्य घत्वस्य स्थानिवद्भावे सत्यप्रवृत्तेर्वचनान्तरं कर्तव्यमिति भावः। **ग्रहणेष्विति**। बाहुलकात् कर्मणि ल्युट्, गृह्यमाणेष्वित्यर्थः। स्थानिष्विति शेषः। **जग्ध्यादिष्वादेशप्रतिषेध इति**। 'आदेश' इति लुप्तसप्तम्यन्तम्, जग्ध्यादिष्वादेशेषु प्रतिषेध इत्यर्थः। आदिशब्देन [7]'आदि' इत्यत्र घस्लृभावः, 'घात्यात्' इत्यत्र वधादेशः। **निराद्येति**। जग्धिविधौ णेरनाश्रयणात् तल्लोपो न स्थानिवदिति भावः। **यणादेश इति**। बहिरङ्गपरिभाषानालोचनेनेदम्। **अजज्ञीति**। 'जन जनने' इति जौहोत्यादिकाद् व्यत्ययेनात्मनेपदम्। 'जनी प्रादुर्भावे' इति दैवादिकात् श्यनश्छान्दसः श्लुः। **सौर्यीति**। सूर्येणैकदिक् [8]'तेनैकदिक्' इत्यण्। सौर्ये हिमवतः शृङ्गे अत्युन्नते, ते अस्य स्त इति मत्वर्थीय इनिः। [9]'सूर्यतिष्य' इत्यादिना तत्र यलोपः स्यादिति भावः। [10]'मत्स्यस्य ङ्याम्' [11]'सूर्यागस्त्ययोश्छे च' इति परिगणनापर्यालोचनेनेदम्। **गार्गाभ्यामिति**। गार्ग्याः कुत्सिताभ्यामपत्याभ्यामित्यर्थः। तत्र [12]'गोत्रस्त्रियाः कुत्सने ण च' इति णप्रत्यये विवक्षिते [13]'भस्याढे' इति पुंवद्भावे ततो णे भ्यामि [14]'सुपि च' इति दीर्घे तस्य स्थानिवद्भावेन तद्धितत्वे सति ततः [15]'यस्य इति लोपे [16]'आपत्यस्य च तद्धिते ऽनाति' इति यलोपो न स्यादिति भावः। 'अनाति' इति [17]पर्युदासाश्रयेणैतच्चोद्यम्। बहिरङ्गपरिभाषा तु [18]'अन्तरङ्गानपि' इति परिभाषाविषये न प्रवर्तते। **नैष दोष इति**। [19]प्रसज्यप्रतिषेधाश्रयणादिति भावः। **सर्वेषामिति**। 'जग्ध्यादिष्वादेशेषु प्रतिषेधः' इत्यादीनामित्यर्थः। **अनाश्रीयमाणायामपीति**। ननु तर्हि 'अविशेषेण' इति पक्षात् 'आश्रीयमाणायां प्रकृतौ' इति पक्षस्य भेदः क इति चेत्, फलतो न कोऽपि भेदः। किं तु वृत्तौ 'आश्रीयमाणायाम्' 'अनाश्रीयमाणायां प्रकृतौ' इत्यंशस्य सत्त्वासत्त्वकृत एव भेदस्तयोरिति गृहाण। तदेवम् 'आश्रीयमाणायाम्'

---

[1] पा. सू. ७. ३. ७२.
[2] पा. सू. ७. ३. ७३.
[3] पा. सू. १. १. ५२.
[4] पा. सू. ८. २. २६.
[5] का. वा. १. १. ५८–३.
[6] पा. सू. ७. ३. ५४.
[7] अदधातोर्णिजन्तात् कर्मणि चिणि 'आदि' इति।
[8] पा. सू. ४. ३. ११२.
[9] पा. सू. ६. ४. १४९.
[10] का. वा. ६. ४. १४९–५.
[11] का. वा. ६. ४. १४९–६.
[12] पा. सू. ४. १. १४७.
[13] का. वा. ६. ३. ३५–११.
[14] पा. सू. ७. ३. १०२.
[15] पा. सू. ६. ४. १४८.
[16] पा. सू. ६. ४. १५१.
[17] प्रसज्यप्रतिषेधाश्रयेणेत्युचितं भाति।
[18] 'अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते' इत्याशयेनेदम्।
[19] 'पर्युदासाश्रयणादिति भावः' इति युक्तं भाति।

इति पक्षं निर्दुष्टं निरूप्य पक्षान्तरं समर्थयितुमाह — **अथवेति**। **न वा संयोगस्येति**। ननु संयोगसंज्ञा भवतु नाम, तदाश्रयेण गुरुसंज्ञा न स्यादिति दूषणस्य कथमुद्धार इति चेत्, गुरुसंज्ञायाः कार्यकालत्वाश्रयेण तत्र [1]'पूर्वत्रासिद्धे च' इति स्थानिवद्भावनिषेधादिति गृहाण। **उच्यन्ते न्यास एवेति**। अत एव लिङ्गादविशेषेण स्थानिवद्भाव इति भावः। **क्रियते न्यास एवेति**। उक्तास्यावश्यकता। **सप्तम इति**। 'वचनसामर्थ्यात् स्थानिवद्भाव [कृतं व्यवधानमविघातकमिति श्रुति] कृतमानन्तर्यमाश्रीयते' इति वक्ष्यतीति भावः। एतेन रूपातिदेश इति स्पष्टमेव प्रतीयते॥

[१, ४४३–४४७]

(नारायणीयम्) प्रकृतिशब्दार्थं वदन् तदाश्रयणविषयमपि दर्शयति — **यत्रेति**। गुरुविधिस्तु[2] न सिध्यतीति कीर्तनात् संयोगसंज्ञा किं सिध्यतीत्याशङ्क्य [संयोग] [3]संज्ञासिद्धिरेव विवक्षिता स्यात्। एवं तु गुरुविधिशब्दप्रयोग औपचारिक इत्याह — **कार्येति**। न च संयोगपदमेव वार्तिके कस्मान्नोपात्तमिति वाच्यम्, मास्तु संज्ञासिद्धिरिति शङ्कापरिहारायौपचारिकप्रयोगात्। भाष्ये च 'न प्राप्नोति' इति त्रिभिः संबध्यते। वस्तुव्याख्यानं च तत्। पक्षान्तरसाधारण्यमस्य दोषस्य परिहरति — **लोपेति**। **नाश्रीयत इति**। अत्र पक्षान्तरे नास्ति स्थानिवत्त्वप्रसङ्ग इति भावः। द्विर्वचनादिषु पक्षान्तरेऽपि तेषामुपादानं प्रतिषेधे कार्यमेव। प्रकृत्यनाश्रयं प्रतिजानीते — **द्विरिति**। तत्क्रमेण साधयति — **अनचीति**। यदा हि प्रसज्यप्रतिषेधस्तदा दध्यत्रेत्यादौ स्थान्याश्रयो द्विर्वचननिषेधः स्यादिति स्थानिवत्त्वं निषेध्यमेव। पक्षान्तरे तु पर्युदासत्वेऽचि न विधिर्न प्रतिषेधः, [4]किं त्वच्सदृशे विधिरिति प्रकृत्यनाश्रयणात् स्थानिवत्त्वाभावादादेशाश्रयं द्विर्वचनं सिध्यतीति नार्थः स्थानिवत्त्वनिषेधेनेत्यर्थः। एवं द्विर्वचने प्रकृत्यनाश्रयणं प्रसाध्य यलोपेऽपि साधयति — **एवं यलोप इति**। 'ब्राह्मणकण्डूतिः' इत्यादावल्लोपस्थानिनोऽकारस्य वलिलोपेऽनाश्रयणात् स्थानिवत्त्वाप्रसङ्गान्निषेधे यलोपपदमनुपादेयमित्यर्थः। क्वचित्तु 'वरेयलोपेऽपि' इति [5]पाठः, सोऽयुक्तः, वरेग्रहणस्य यलोपविशेषणत्वपक्षस्यासिद्धान्तत्वात्। 'वरे तु' इत्याद्युत्तरग्रन्थानुपपत्तेश्च। विद्यमानं वा वरेग्रहणं टीकायां यलोपस्थानिवत्त्वनिषेधस्य विषयप्रदर्शनपरम्, न तु यलोपविशेषणत्वप्रदर्शनपरम्। अन्यथासिद्धश्चायं विषयः। वरेग्रहणासिद्धेर्वरेविधिमुल्लङ्घ्य यलोपविधौ प्रकृत्यनाश्रयणं स्वेनोच्यत इत्याह — **वरे त्विति**। [6]'आल्लोपे वरे लुप्तस्य स्थानिवत्त्वनिषेधः पक्षान्तरेऽपि कर्तव्य इत्यर्थः। किमिति तर्हि भाष्ये तत्पक्षे गौरवप्रदर्शनपरवाक्ये वरेग्रहणम्, तदकरणलाघवस्य पक्षान्तरेऽप्यभावादिति शङ्कते — **भाष्ये त्विति**। परिहरति — [7]**तत्र चेति**। पक्षद्वयेऽपि वरेग्रहणं न कर्तव्यमिति भाव इत्यर्थः। अत्र ह्येतत्पक्षे गौरवापादनमुखेन पक्षान्तर एषामनुपादानमुच्यते। तत्र द्विर्वचनयलोपयोः पक्षान्तरानुपादानमेव विवक्षितम्। वरेविधौ त्वनुपादानमात्रम्। कथं पक्षद्वयेऽपि तदकरणम्, तत्राह — **यङ इति**। यकारावस्थितिसमयेऽकारस्य प्रत्ययत्वाभावादप्रत्ययादेशलोपस्थानिवत्त्वेन कथं प्रत्यय इत्यर्थः। लोपस्य चाभावात्मकत्वात् आदेशसहितसमुदायेऽवस्थितं प्रत्ययत्वं

---

[1] का. वा. १. १. ५८–३.
[2] भाष्ये तुशब्दरहितपाठो दृश्यते।
[3] संज्ञाया असिद्धिरित्यर्थः।
[4] किं त्वच्सदृशविधिरिति — क.
[5] प्रदीपेऽयं पाठ इत्याशयः।
[6] अल्लोपे — क.
[7] प्रदीपे 'तत्रायं भावः' इत्यत्र 'तत्र चायं भावः' इति पाठोऽभिमत इति भाति।

लोपे परिशिष्टे संक्रामतीत्यपि शक्यमिह वक्तुम्। [1]'घोर्लोपो लेटि' इत्यतो लोपे प्रकृते लुग्ग्रहणं सर्वलोपार्थं पक्षद्वयेऽपि कर्तव्यमित्याशङ्क्य प्रकृत्याश्रयणे स्थानिवत्त्वपक्षेऽन्त्यलोपे [2]'झलो झलि' इति लोपादभिमतसिद्धेरस्मिन्नेव पक्षे दोष इत्याह — **क्वस्येति**। ननु 'अदुह्वह्यर्थम्' इति तत्र वक्ष्यते, तत्किमिदानीं तस्यान्यथासिद्धिरभिमता, येनास्मिन् पक्षे लुग्ग्रहणं कर्तव्यमित्युच्येत, अत आह — **अदुह्वहीति**। घत्वं वक्तव्यमिति कथम्, उक्तत्वादित्याशङ्क्य तदुक्तमेतन्मते न प्राप्नोतीत्याह — **अलोपस्येति**। [3]'येन नाव्यवधानम्' इति न्यायादकारस्य व्यवधानेऽपि भविष्यति, तत्राह — **वचनेति**। आङ्पूर्वत्वभ्रमं निरस्यति — **आदयतेरिति**। णिलोपस्य स्थानिवत्त्वं कथं न, अत आह — **न चेति**। ननु 'सौर्ये' इत्यत्रैव यलोप उपपादयितुं शक्यः, यथा 'सौर्ये' इत्यत्र सूर्यादणि तदन्तादिनि चाकारद्वयस्यापि [4]'यस्य' इति लोपे परलोपस्य समानाश्रयतयासिद्धत्वे पूर्वलोपस्य च प्रकृत्यनाश्रयणादस्थानिवत्त्वे उपधा यकार इति लोपप्रसङ्गस्तथात्राप्यणि प्रकृत्यकारस्य लोपेऽणकारस्यैकादेशात् प्रागेव यलोपप्रसङ्ग इत्यत आह — **सौर्ये इति**। आदिग्रहणाद् यलोपेऽपि श्यां प्रतिषेध इत्यर्थः। ननु गार्ग्यशब्दादपत्यार्थश्चेत् [5]'यञिञोश्च' इति फका भाव्यम्। शेषार्थश्चेच्छेन भाव्यमित्याशङ्क्य गार्गीशब्दादपत्यविशेषेऽकारप्रत्ययमुपपादयति — **गोत्रेति**। तस्येदमित्यर्थेऽपि तमुपपादयति — **संघेति**। कथं च कृत्वा चोद्यम्, कथं च कृत्वा परिहारः, तत्राह — **प्रसज्येति**। तदाश्रयणे हि 'अनाति' इति वाक्यान्तरं यलोपनिषेधकम्। तत्र चादेशस्याश्रयणं न प्रकृतेरिति स्थानिवत्त्वाभावादादाश्रयनिषेधप्रसङ्गः। पर्युदासे त्वेकवाक्यत्वादाद्वचतिरिक्ततद्धिते यलोपो विधीयते, आति त्वौदासीन्यं वाक्यस्य। तत्र प्रकृत्याश्रयणात् सिद्धः स्थानिवत्त्वेन यलोपः। ननु 'सर्वेषाम्' इत्युक्तेर्न केवलं यलोपस्य परिहारः, अपि तु सर्वेषामित्यर्थः। एवं च ग्रहणस्थानिवत्त्वपक्षे यलोपे परिहाराभिधानादनयापि परिहारप्रतिज्ञया तत्पक्षविषयया भाव्यम्। ततश्च 'उक्तम्' इत्यविशेष[6]पक्षाङ्गीकारायुक्तिः, अत आह — **आश्रीयमाणायामिति**। 'उक्तम्' इति ग्रन्थे नाविशेषपक्षाङ्गीकरणम्, किं तु प्रस्तुतपक्ष एव परिहाराभिधानम्। 'अनाश्रीयमाणायाम्' इत्यनेन विषयोऽपि स्वाश्रयमात्रं लक्ष्यते। 'विधिमात्रे' इत्यस्यादेशाश्रयकार्येऽपीत्यर्थः। प्राक्चायं ग्रन्थः स्वाश्रयनिवृत्तिपरत्वेन टीकायां व्याख्यातः, नाविशेषपक्षपरत्वेन। ननु विधिग्रहणाद् वाच्यवृत्त्या स्थानिवत्त्वस्य पुनर्विधानान्नियमप्रतिपत्तेः स्थानिवदेव कार्यमादेशः प्रतिपद्यते न स्वाश्रयमिति लभ्यते। नियमश्च प्राप्तविषयो वाच्यः। प्राप्तिश्च प्रस्तुतपक्षे प्रकृत्याश्रयविषयैवेति तदाश्रयहीनेषु प्रस्तुतोदाहरणेषु कथं स्वाश्रयनिवृत्तिर्विधिग्रहणादपि स्यात्। उच्यते, यदि प्रकृत्याश्रयण एव नियमात् स्वाश्रयनिवृत्तिस्तदा विधिग्रहणमपार्थकम्। न हि पटयतीत्यादौ किंचिदादेशाश्रयं कार्यमनादिष्टादचः पूर्वस्य प्राप्तम्, यन्निवृत्त्यर्थो नियमः स्यात्। प्राप्तौ किमादेशाश्रयकार्ये कर्तव्ये स्थानिवदेवेति नियमः, उत प्रकृत्याश्रयकार्ये। नान्त्यः, नियमवैफल्यात्। आद्ये त्वप्राप्तविषयो नियम इत्यागतम्। न ह्यादेशाश्रयकार्ये स्थानिवत्त्वप्राप्तिरस्मिन् पक्षे। तस्मिन्नियमसामर्थ्यादजादेशत्वपरनिमित्तकत्वपूर्वविधिकर्तव्यताकत्वे स्थानिवत्, निमित्तवत्स्थले प्राप्तेऽपि प्रकृत्यनाश्रयणात् स्थानिवद्भावे स्वाश्रयनिवारणमिति बोद्धव्यम्। न चैवमविशेषपक्षादस्याविशेष इति वाच्यम्, फलाभेदेऽपि स्वरूपभेदात्। तथाहि — अविशेषपक्षे सति अदुग्धादिषु नियमान्न स्थानिवत्त्वम्। अत्र तु

---

[1] पा. सू. ७. २. ७०.
[2] पा. सू. ८. २. २६.
[3] महाभाष्यम् ७. २. ३.
[4] पा. सू. ६. ४. १४८.
[5] पा. सू. ४. १. १०१.
[6] 'पक्षाङ्गीकारो' इत्यस्यानन्तरं 'द्वितीये प्रवर्तते' इत्येवोपलभ्यते — क.

पक्षेऽसत्यपि स्थानिवत्त्वे यत्नात् स्वाश्रयनिवृत्तिरिति। गुरुविध्यसिद्ध्यादिदूषणमस्मिन् पक्षे नास्ति। न हि [1]ध्नन्तीत्यत्र लोपः संयोगसंज्ञाया आश्रयः, यतः स्थानिवत् स्यात्। अत एव भाष्येऽविशेषपक्ष एव तदनुत्पादेन परिहार इति। केचित् फलभेदमप्याचक्षते। तदयुक्तम्, दा३ध्यश्च, मा३ध्वश्वादिष्वादेशाश्रयत्वात् संयोगसंज्ञायाः। [2]ध्नन्तीत्यत्रापि लोपस्य स्वरूपेण संज्ञानिमित्तत्वेऽपि[3] हलानन्तर्यसंपादकतया निमित्तत्वमस्त्येव। एवं द्विर्वचनादिष्वपि द्रष्टव्यम्। भाष्येऽपि च पक्षद्वयस्थापनानन्तरं 'ननु च' इत्यनुवादपुरस्सरं परिहाराभिधानमिति न किंचिदनुपपन्नम्। केचित्तु 'विधिमात्रे' इत्यस्य शास्त्रीये विपरीते चेति व्याख्यां कुर्वन्ति। ततश्च वाय्वोरित्यादिष्वशास्त्रीयोऽपि स्थानिदृष्टो यलोपाभावोऽतिदिश्यत इति। अत्र तु पक्षे ग्रहणेषु स्थानिवदिति पक्षासंभव एव। संभवतु वा वाक्यभेदेन स टीकोक्त इति न तद्विषये प्रवर्तते। ननु किमनेन क्लेशेन, सर्वेषामेवेति परिहारमात्रप्रतिज्ञा प्रस्तुतविषयेत्येव व्याख्यायताम्। परिहारस्तु विधिग्रहणादविशेषपक्षस्वीकारादिति, तत्राह — **अत एवेति**। यद्ययं ग्रन्थोऽविशेषपक्षपरः स्यात् 'अथवा' इत्युत्थानममयुक्तं स्यात्॥

न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु. १. १. ५८.

[१, ४४७–४५१]

(**लघुविवरणम्**) 'वेतस्वानिति रुः प्राप्नोति' इति भाष्यमनुपपन्नम्, न ह्यत्र सकारः पदान्तः, येन सकारस्य रुत्वे कर्तव्ये 'न पदान्त' इति स्थानिवत्त्वनिषेधः स्यात्। असति च स्थानिवत्त्वनिषेधेऽकारलोपस्य स्थानिवत्त्वात् सकारान्तस्य पदत्वाभावाद्रुत्वाप्रसङ्गादित्यत आह — **भावसाधनेति**। ननु सकारः स्थित [4]एवेत्यविधेयत्वात् कथं पदान्तत्वेन विधेय इत्यत आह — **स्वादाविति**। स्वरूपेण सकारः स्थितोऽपि पदान्तत्वेन विशिष्टो विधेय एवेत्यर्थः। 'तसौ मत्वर्थे' इति भाष्यमनुपपन्नम्, नियमेन 'तदस्मिन्' इत्यत्रार्थे डमतुप्प्रवृत्तावेतदेवं स्यात्। यदा तु निर्वृत्तादिषु ड्मतुब्भवति तदैतदनुपपन्नमित्यत आह — **तदस्मिन्नस्तीति**। कथं भसंज्ञां प्रत्यकारान्तमित्यत आह — **भसंज्ञां प्रतीति**। किमपेक्षया 'संप्रति' इत्युच्यते, अत आह — **स्थानिवत्त्वेति**। प्रकृते तदभावमाह — **इह त्विति**। ननु 'ब्रह्मबन्धुना, ब्रह्मबन्धवे' इति भवितव्यमित्यत आह — **ब्रह्मबन्धुशब्दादिति**। नन्वेवमप्यूङि परत उकारः पदान्तः, न तु धकार इत्यत आह — **ऊङ्नूङोरिति**। ननु [5]"यचि भम्' इति भसंज्ञा [6]पदसंज्ञाया बाधिका भविष्यतीत्यत आह — **भसंज्ञां त्विति**। ननु यणादेशे भसंज्ञायाः प्राप्तिरेव नास्तीति कस्मान्नोच्यते, अत आह — **यणादेशेति**। तस्य स्थानिवद्भावेन संज्ञाप्राप्तिरिति भावः। किं भावसाधन एवैतत् सिध्यति, नेत्याह — **पक्षद्वयेति**। किमर्थं तर्ह्युपन्यस्तमित्यत आह — **भावसाधनेति**। कथं [7]भावसाधन एतत् सिध्यतीत्यत आह — **यकारेति**। ननु प्रयोजनान्तरोपन्यासः किमर्थ इत्यत आह — **असाधारणमिति**। ननु षड्भिर्दीव्यतीत्यर्थे षाषिक इति भवितव्यमित्यत आह — **षडङ्गुलीति**। ननु

---

[1] 'श्लेष्मघ्नेत्यत्र' इत्युचितं भाति।
[2] 'श्लेष्मघ्नेत्यत्रापि' इत्युचितं भाति।
[3] अनिमित्तत्वेऽपीति छेदः।
[4] एवेत्यभिधेयत्वात् — ण.
[5] पा. सू. १. ४. १८.
[6] 'पदसंज्ञायाः' इति नास्ति — ड, ढ.
[7] 'भावसाधने' इत्यस्यानन्तरम् एवकारोऽधिकः — ड, ढ.

स्वादावपि पदसंज्ञायां षकारः [1]पदान्तत्वेन विधेय इति स्थानिवत्त्वनिषेधे षकारान्तस्यैव भसंज्ञेति पदसंज्ञाया बाधनात् कथं षडिकसिद्धिः, अत आह — **षषित्ययमिति**। कर्मसाधने कथं सिद्धिरित्यत आह — **कर्मसाधने त्विति**। **पदान्तत्वेन सिद्ध इति**। तस्य जश्त्वे कर्तव्य इति शेषः। षकारान्तस्य स्थानिवत्त्वनिषेधो हि जश्त्वाभावाय। न च भसंज्ञां विना तत्सिद्धिरिति भसंज्ञामेव [प्रति] स्थानिवत्त्वनिषेध इत्यर्थः। अन्तर्वर्तिन्या विभक्त्येदानीमेव जश्त्वं विधेयमिति मन्यमानः शङ्कते — **कथं पुनरिति**। परिहरति — **नैष इति**। अन्तर्वर्तिन्या विभक्त्या डकारः प्राक् सिद्ध एवेत्यर्थः। ननु तर्हि कर्मसाधनेऽपि पदान्तस्य सतो डकारस्य [न] किंचिद्विधेयमिति स्थानिवद्भावाप्रतिषेधात् षडित्यस्य भसंज्ञायामकारलोपस्य स्थानिवद्भावादकारान्तमेतद् भसंज्ञां प्रतीत्यन्तर्वर्तिविभक्त्याश्रयपदत्वानिवृत्तौ स्यादेव षडिकसिद्धिरित्यत आह — **कर्मसाधने त्विति**। न हि शास्त्रीय एव कार्ये स्थानिवद्भाव इति भावः। ननु तर्हि भावसाधनेऽपि षकारः पदान्तत्वेन विधेय इति स्यादेव स्थानिवत्त्वनिषेध इत्यत आह — **न चेति**। डकारो हि पदान्तत्वेन विधातव्यः श्रवणाय। न च षकारः पदान्तत्वेन श्रोतुं शक्यत इति भावः। अस्तु तर्हि जश्त्वनिमित्तः स्थानिवत्त्वनिषेध इत्यत आह — **न चेति**। **सग्धिरिति**। अदेः क्तिनि [2]'बहुलं छन्दसि' इति घस्लादेशे [3]'घसिभसोर्हलि च' इत्युपधालोपे [4]'झलो झलि' इति सकारलोपे [5]'झषस्तथोः' इति धत्वे [6]'झलां जश् झशि' इति जश्त्वे समाना ग्धिरिति समासे सभावे च रूपम्। **बब्धामिति**। भसेर्लोटि तसस्तामि शपः श्लौ द्विर्वचने उपधालोपे धत्वे च रूपम्। अत्रोपधालोपस्य स्थानिवत्त्वनिषेधाज्जश्त्वम्। अस्तु तर्हि [7]'पूर्वत्रासिद्धे न स्थानिवत्' इति स्थानिवत्त्वनिषेध इत्यत आह — **पूर्वत्रासिद्ध इति**। कोऽसौ यत्न इत्यत आह — [8]**अत्रेति**। कथं तर्हि षडिकसिद्धिरित्यत आह — **षडिकस्त्विति**। 'उभयत आश्रये नान्तादिवत्' इति भाष्यमनुपपन्नम्, स्वादौ परतः पदसंज्ञाविधानेनादिवद्भावस्यैवाश्रयणादित्यत आह — **यस्मादिति**। पदेऽन्तः पदान्त इति परिहारः पक्षद्वयेऽपि साधारणः, अत एवाह — **एवं षडिक इकेति**। कथं भसंज्ञा पदकार्यत्वेनोपप्लोष्यत इत्यत आह — **यचि भमित्यत्रेति**॥

[१, ४४७–४५१]

(विवरणम्) ननु पदसंज्ञायां विधीयमानायामकारलोपस्य स्थानिवद्भावात् [9]सावधेर्नास्ति 'स्वादौ पदम्' इति पदसंज्ञेति नात्र पदान्तः सकार इति कथं रुप्राप्तिश्चोद्यत इत्यत आह — **भावेति**। भावसाधने विधिशब्दे रुप्राप्तिमुपपादयति — **वेतसेत्यादिना**। यद्यपि सकारो न विधेयः, तथापि [10]पदान्तत्वलक्षणधर्मविशिष्टस्स विधेय एव स्वादावित्यनेनेति स्थानिवत्त्वनिषेधात् सावधेः पदसंज्ञायां पदान्तः सकार इति रुः स्यादित्यर्थः। ननु मत्वर्थो यदा ड्मतुप् स्यात् तदा भसंज्ञा, यदा तु सोऽर्थान्तरे कथं तदा सेत्यत आह — **तदिति**। 'पदसंज्ञाम्' इति भाष्यं व्याचष्टे — **पदान्तत्वे त्विति**। किमपेक्षया 'संप्रति' इत्युच्यत इत्यत आह — **स्थानिवत्त्वनिषेधा-**

---

[1] पदान्ते विधेयः — ड.
[2] पा. सू. २. ४. ३९.
[3] पा. सू. ६. ४. १००.
[4] पा. सू. ८. २. २६.
[5] पा. सू. ८. २. ४०.
[6] पा. सू. ८. ४. ५३.
[7] अत्रैव सूत्र उपरितनमिदं वार्तिकम्।
[8] प्रदीपे 'एकाक्षरपूर्वपदानाम्' इत्यतः प्राक् 'अत्र' इति पाठोऽभिमत इति भाति।
[9] सकारावधिकस्येत्यर्थः। एवमुत्तरत्रापि।
[10] पदान्तलक्षण — ट.

दिति। **यथेति**। तत्र ह्यौकारादेः पदान्तस्य सतो यणावोः कर्तव्ययोः [1]'श्नसोरल्लोपः' न स्थानिवत्। पदान्तरसंनिधौ च पदान्तरसंस्कारसंभवादनादिष्टादचः पूर्वस्य स्यात् स्थानिवद्भावः। 'तत्र [2]'भावसाधनस्य' इति भाष्यस्यायमर्थः — द्वन्द्वान्ते श्रूयमाणेन विधिशब्देन सह षष्ठीसमासाय भावसाधनो विधिशब्द उपादेयः। कर्मसाधने [3]तु [4]विधिशब्दे द्विर्वचनादिभिः सामानाधिकरण्यं [5]पदान्तेन तु वैयधिकरण्यमिति दुर्घटः समास आपद्येत। यदि [6]तु पदान्तेनापि सामानाधिकरण्यमेवेति, ततः पूर्वोक्तदोषस्तदवस्थ एवेति कर्मसाधनपक्षोऽकिंचित्कर इति भावसाधन एव विधिशब्द उपादेय इति। पूर्वत्र स्थानिवद्भावेन भसंज्ञाप्रतिबन्धः, 'ब्रह्मबन्ध्वा' इत्यत्र तु भसंज्ञा न प्रतिषिध्यते, किं तु सा [7]प्रवर्तमानापि पदसंज्ञां न प्रतिबध्नाति भेदेनेति 'इह च' इत्युक्तं भाष्ये। तत्र जश्त्वप्राप्तिमुपपादयति — [8]ब्रह्मबन्ध्विति। यणादेशोच्चारणं न [9]भसंज्ञाभावप्रतिपादनाय, यणः स्थानिवद्भावेन भसंज्ञाप्रतिबन्धकत्वायोगादित्याह — **यणिति**। भाष्ये तूदात्तयण्निबन्धन-[10]स्वरनिषेधार्थं [11]'नोङधात्वोः' इति विषयप्रदर्शनेनोङन्ताद् विभक्युत्पत्तिं प्रदर्शयितुं पदत्वेऽसाधुत्वबोधनाय 'ब्रह्मबन्ध्वा' इत्युदाहृतम्। भाष्ये उपादान इति सप्तम्यास्तीत्यत्रानुषक्तया तस्य हेतुत्वमुच्यते, न तु तस्यैव हेतुत्वमित्याह — **पक्षेति**। **पदान्ताविति**। एकदेशविकृतस्यानन्यत्वेन पदसंज्ञाप्रवर्तनादित्यर्थः। **पदान्ततायाः इति**। पदसंज्ञाया अविधानाद् धर्मविशिष्टत्वेन वा पदान्तस्याविधानादिति भावः। **सिद्ध इतीति**। जश्त्वे तस्य कर्तव्य इति शेषः। वाचिके वागाशीर्दत्तोऽनुकम्पित इति विगृह्य [12]ठाजादौ कृते कुत्वप्राप्तिरित्याह — **चकारस्येति**। चोद्यपरिहारौ [13]स्पष्टौ। कर्मसाधने तु विधेः प्राक् पदत्वं [14]मृग्यते न तु[15] [16]विधानसमय इत्यभिप्रेत्याह — **कर्मेति**। [17]षान्तत्वपदान्तत्वयोर्विरोध इत्याह — **न चेति**। **सग्धिरिति**। अदेः क्तिनि [18]'बहुलं छन्दसि' इति घस्लादेशे [19]'घसिभसोर्हलि च' इत्युपधालोपे [20]'झलो झलि' इति सलोपे [21]'झषस्तथोः' इति [22]भष्भावे [23]'झलां जश् झशि' इति जश्त्वे समाना ग्धिरिति विगृह्य समासे समानस्य [24]सभावे रूपम्। भसेर्जौहोत्यादिकस्य लोटि तसस्तामि शपः श्लौ द्विर्वचने पूर्ववदुपधालोपादौ हलादिशेषे जश्त्वे च रूपम्। कोऽसौ यत्न इत्यपेक्षायां पञ्चमे वक्ष्यमाणं दर्शयति — **एकेति**। तथा च हलचोरादेशत्वान्नास्ति स्थानिवद्भाव इति भसंज्ञया [25]पदसंज्ञाया

---

[1] पा. सू. ६. ४. १११.
[2] भावसाधनेति — च, छ, ञ, ट.
[3] तुशब्दो नास्ति — च, छ.
[4] विधिशब्दस्य — ञ.
[5] पदान्ते तु — ट.
[6] प्रवर्तमाना भसंज्ञा पदसंज्ञां — च, छ,
[7] 'ब्रह्मबन्ध्विति' इत्यस्यानन्तरं 'ननु' इत्यधिकम् — ञ.
[8] भसंज्ञामात्रप्रतिषेधाय — ञ.
[9] स्वरितनिषेधार्थं — च, छ.
[10] पा. सू. ६. १. १७५.
[11] अजादौ — च, छ; ठजादौ — ट.
[12] सार्थौ — च, छ, ट.
[13] दृश्यते — च, छ.
[14] तुशब्दो नास्ति — च, छ.
[15] विधिविधानसमये — ञ, ट.
[16] पदान्तत्वपक्षे त्वनयोर्विरोध इत्याह — ञ.
[17] पा. सू. २. ४. ३९.
[18] पा. सू. ६. ४. १००.
[19] पा. सू. ८. २. २६.
[20] पा. सू. ८. २. ४०.
[21] धभावे — ञ.
[22] पा. सू. ८. ४. ५३.
[23] सभावेन रूपम् — च, छ.
[24] 'पदसंज्ञायाः' इति नास्ति — च, छ; 'पदसंज्ञायाः' इत्यस्यानन्तरं 'वा' इत्यधिकम् — ञ, ट.

[1]एकावधिकाया बाधनात् सिद्धो वाचिक इति भावः। [2]'षषष्ठाजादिवचनात् सिद्धम्' इति वार्तिकस्य पाञ्चमिकस्यार्थः उत्तरेत्यादिः। **षडिक इति**। [3]'यस्य इति लोपे च तस्य स्थानिवद्भावादकारान्तस्य भसंज्ञेति भिन्नावधिकत्वादन्तर्वर्तिन्या विभक्त्या प्राप्ता पदसंज्ञा न निवर्तत इति षडिकः सिद्ध इति व्यवहितान्वयाध्याहाराभ्यां योज्यम्। [4]'स्वादिष्वसर्वनामस्थाने' इत्यत्र यस्मादित्यनुवृत्त्योभयाश्रयत्वं[5] पदसंज्ञाया उपपादयति — **यस्मादिति**। पदशब्दो न यौगिकोऽत्र, किं तु पारिभाषिक इत्यभिप्रेत्याह — **न चेति**। अयं च परिहारः साधारण इति हृदि निधायाह — **एवमिति**। विधिशब्दो भावसाधनः, संबन्धसामान्यषष्ठ्याश्च समासः। तथा च पदान्ते विधातव्ये पदान्तस्यान्यस्मिंश्च विधेये स्थानिवत्त्वनिषेध इत्यभिप्रेत्य भाष्ये 'अथवा' इत्युक्तम्। तत्र कथं भसंज्ञा पदकार्यमित्यत आह — **यचीति**। ननु पदसंज्ञाया जश्त्वादिविधिसमये प्राग् [6]वावस्थानाज्जश्त्वादि पदसंज्ञकान्तस्य विधीयमानं भवतु पदान्तविधिः, नैवं भसंज्ञासमकालं पदसंज्ञेति कथं पदान्तविधिर्भसंज्ञेत्यत आह — **तद्विषयत्वादिति**। यस्य यत्कार्यं तस्य पूर्वमेव प्राप्तत्वं मृग्यते, न तु कार्यसमयेऽपि सत्त्वं समवायिकारणवदिति भावः। पदविषया च भसंज्ञा पदान्तविषयापीति पदान्तकार्यमित्यपि द्रष्टव्यम्। एतच्चाप्रवृत्तये पदकार्यस्य, न तु प्रवृत्तनिवृत्तय इति षडिके न दोषः। [7]प्रौढिवादोऽयं वा, षडिके दोषप्रसङ्गात्॥

[१, ४४७–४५१०]

(**उद्द्योतनम्**) ननु पदसंज्ञायाः पदान्तविधित्वाभावेन तस्यां कर्तव्यायामकारलोपस्य स्थानिवद्भावात् [8]'सावधेर्नास्ति पदसंज्ञेति सकारस्य पदान्तत्वाभावात् कथं रुत्वाशङ्का स्यात्, अत आह — **भावेति**। ननु भावसाधनपक्षे पदान्तस्य विधाने स्थानिवत्त्वनिषेधः। न च पदसंज्ञाविधानं पदान्तस्य विधानम्, अतः संज्ञाविधौ स्थानिवत्त्वनिषेधाभावाद्रुत्वाप्राप्तितादवस्थ्यमित्याशङ्क्य पदान्तस्य विधानमुपपादयति — **वेतसेति**। कुमुदादिभ्यो ड्मतुप् स्याच्चातुर्थिक इति [9]'कुमुदनडवेतसेभ्यो ड्मतुप्' इति सूत्रार्थः। **पदान्तताया इति**। यद्यपि [10]सकारो न विधेयः, तथापि पदान्तत्वविशिष्टत्वेन तात्पर्यतो विधीयते [11]'स्वादिषु' [12]इति संज्ञाविधिना, पदकार्यार्थित्वात् संज्ञाविधानस्य। पदान्तशब्दस्य भावप्रधानत्वमभिप्रेत्य 'पदान्ततायाः' [13]इत्युक्तमिति केचित्। ननु यदि मतुबर्थ एव ड्मतुप् स्यात् तदा [14]भसंज्ञा, निर्वृत्तादिषु त्रिषु न भत्वमिति रुत्वप्रसङ्गः, अत आह — **तदस्मिन्निति**। अत्र सप्तम्यर्थो मतुबर्थ इति भावः। **अनभिधानादिति**। अत एव [15]'वेतस्वान् बहुवेतसे' इति मत्वर्थस्यैव [16]कोशे पाठः। 'पदसंज्ञाम्' इति भाष्यं व्याचष्टे — **पदान्तत्व इति**। पदसंज्ञाशब्दः पदान्तत्वपर इत्यनेन व्याख्यातम्। किमपेक्षया 'संप्रति' इत्यु-

---

[1] एकावधिकया — च, छ.
[2] का. वा. ५. ३. ८४ — ५.
[3] पा. सू. ६. ४. १४८.
[4] पा. सू. १. ४. १७.
[5] उभयत आश्रयत्वं — ञ.
[6] चावस्थानात् — च, छ.
[7] प्रौढवादोऽयम् — च, छ.
[8] सकारावधेरित्यर्थः।
[9] पा. सू. ४. २. ८७.
[10] सकारोऽविधेयः — आ.
[11] पा. सू. १. ४. १७.
[12] इति पदसंज्ञाविधिना — ऋ.
[13] 'इत्युक्तम्' इति नास्ति — अ.
[14] 'भसंज्ञा' इति नास्ति — म.
[15] अमरकोशे भूमिवर्गे श्लो. ९.
[16] कोशपाठः — म, आ, ऋ.

च्यते, अत आह — **स्थानिवत्त्वेति**। **तस्य विधौ** तस्य कार्यान्तरविधौ। **कौ स्त इति**। अत्र स्थानिवत्त्वनिषेधाद्विनौकारः पदान्तः, तस्यावादेशविधौ स्थानिवत्त्वनिषेधः। भाष्ये **तत्र भावसाधनस्येति**। द्वन्द्वान्ते श्रूयमाणविधिशब्देन षष्ठीसमासाय भावसाधनो विधिशब्दोऽङ्गीकार्यः। कर्मसाधनत्वे तु द्विर्वचनादिभिः सामानाधिकरण्येऽपि पदान्तेन वैयधिकरण्यात् समानाधिकरणसमासो न स्यात्। पदान्तेनापि सामानाधिकरण्याङ्गीकारे 'वेतस्वान्' [1]इत्यत्रातिप्रसङ्गानुद्धारात् कर्मसाधनत्वाङ्गीकारो व्यर्थः। अतो भावसाधन एवेति भावः। धकारस्य जश्त्वमुपपादयति — **ब्रह्मेति**। **ऊङ** [2]'ऊङुतः' इत्यनेन। नन्वादिवद्भावेनोङि परतो धान्तस्य भसंज्ञया पदसंज्ञाबाधात् कथं जश्त्वम्, अत आह — **भसंज्ञामिति**। नन्वेवं 'ब्रह्मबन्धूः' इत्यत्रापि जश्त्वसंभवाद्यण्सहितोदाहरणं किमर्थम्, अत आह — **यणादेशेति**। ननु 'कौ स्तः' इत्यादेः कर्मसाधनत्वेऽपि सिद्धत्वात् कथं [3]भावसाधनत्वस्यासाधारणमुदाहरणम्, अत आह — **पक्षद्वयेति**। भावसाधनत्वपक्षे सिद्धिमुपपादयति — **यकारेति**। [4]यणावोर्विधाने तयोरपि विधानादित्यर्थः। **पदान्ताविति**। एकदेशविकृतस्यानन्यत्वेन पदसंज्ञा [5]प्रवृत्तेरित्यर्थः। **पदान्तताया इति**। [6]'सुप्तिङन्तं पदम्' इति विधीयमाना पदसंज्ञा यवान्तस्य भवतीति पदान्ततायाविधानम्। वस्तुतो यकार [7]वकारविधिरेव पदान्तविधानम्। अत एवोक्तम् — **विधीयमानावेवेति**। **षडिति**। षडङ्गुलिरनुकम्पित इत्यत्रार्थे ठच्। बह्वचो मनुष्यनाम्नोऽनुकम्पायां ठज् वा स्यात्, पक्षे क इति सूत्रार्थः। 'अस्मिन् प्रकरणे ठच् अजादिश्च यः प्रत्ययस्तस्मिन् परतो द्वितीयादचः परस्य लोपः, ऊर्ध्वग्रहणं सर्वलोपार्थम्', इति [8]"ठाजादावूर्ध्वं द्वितीयादचः' इति सूत्रार्थः। **यस्येति लोपे** 'षड' इति डकारस्थाकारस्य। **अन्तर्वर्तिन्येति**। सुबन्तस्याङ्गुलिशब्देन समासादित्यर्थः। **सिद्धः** जश्त्वे कर्तव्य इत्यादिः। **नास्ति स्थानिवत्त्वनिषेध इति**। अकारलोपस्येत्यन्वयः। तत्र यद्यपि भसंज्ञाविधौ स्थानिवत्त्वनिषेधो नास्तीति [9]वक्तव्ये 'पदान्ततायाः अविधानात्' इति हेतुरयुक्तः, तथापि पदत्वे भत्वे चोभयत्र स्थानिवत्त्वनिषेधस्य प्रसङ्ग एव नास्तीत्यतिशयार्थमुक्तम्। भसंज्ञया पदसंज्ञाबाधशङ्कां निराह — **अकारेति**। डकारोपर्यकारस्य [10]'यस्य' इति लोपस्येत्यर्थः। **अन्तवर्तीति**। प्रथमाबहुवचनान्तः षट्छब्दः समस्यत इत्यन्तर्वर्तिविभक्त्या भसंज्ञा नास्तीति ठजाश्रया वाच्या, तत्र च स्थानिवद्भावादकारान्तस्य सा न षान्तस्येति भावसाधनत्वपक्षे जश्त्वं सिद्धमित्यर्थः। असाधारण्यार्थं कर्मसाधनत्वपक्षे [11]जश्त्वासिद्धिमाह — **कर्मेति**। **पदान्तत्वेनेति**। अन्तर्वर्तिविभक्त्येत्यर्थः। **स्थानिवत्त्वनिषेधादिति**। षान्तावधेः पदस्य भसंज्ञाविधानादित्यर्थः। यद्यप्यन्तर्वर्तिविभक्तिनिबन्धना पदसंज्ञा, भसंज्ञा तु प्रत्ययनिबन्धनेति निमित्तभेदोऽस्ति, तथाप्येकविषयत्वमात्रं [12]बाधप्रयोजकमित्याशयेनाह — **एकेति**। वागाशीर्दत्तोऽनुकम्पित इत्यर्थे पूर्ववट्ठचि शीरित्यादेर्लोपे आकारस्य [13]'यस्य' इति लोपे वाचिकः। तत्र कुत्वप्राप्तिमाह — **चकारस्येति**। षकारस्य जश्त्ववदित्यर्थः। [14]भावसाधनत्वपक्षेऽपि षडिकासिद्धिं शङ्कते — **कथमिति**। **स्थानि-**

---

[1] 'इत्यत्र' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — म.

[2] पा. सू. ४. १. ६६.

[3] भावसाधनस्यासाधारण — अ.

[4] अयावोर्विधाने — अ, इ, ऋ.

[5] प्रवृत्तिरित्यर्थः — अ.

[6] पा. सू. १. ४. १४.

[7] 'वकार' इति नास्ति — म.

[8] पा. सू. ५. ३. ८३.

[9] वक्तव्यम् — अ, इ, ऋ.

[10] पा. सू. ६. ४. १४८.

[11] जश्त्वसिद्धिमाह — म.

[12] बाधप्रयोजनमिति — अ, ऋ.

[13] पा. सू. ६. ४. १४८.

[14] भावसाधनपक्षेऽपि — अ.

वत्त्वेति। तथा च तुल्यावधिकया भसंज्ञया [1]पदत्वबाधाज्जश्त्वासिद्धिरित्यर्थः[2]। [3]**पूर्वमिति**। अन्तवर्तिविभक्त्या प्रत्ययोत्पत्तेः पूर्वमेवेत्यर्थः। **इदानीम्** अकारलोपानन्तरम्। **कर्मसाधन इति**। तस्मिन् पक्षे पदान्तत्वेन सिद्धस्य कार्यान्तरविधौ स्थानिवत्त्वनिषेधाज्जश्त्वासिद्धिरित्यर्थः[4]। तदुपपादयति — **डकारस्येति**। [5]**पदनिवृत्तौ** पदत्वनिवृत्तौ। **विधेया** [6]तात्पर्यत इत्यादिः। ननु भावसाधनत्वेऽपि षकारापत्तेः पदान्तत्वात् स्थानिवत्त्वनिषेधः स्यादित्यत आह — **न चेति**। **भाव्या** पदान्तत्वेनेत्यादिः। [7]**तस्य** षत्वरूपस्य। तत्र हेतुः — **पदान्तत्व इति**। नन्वेवमपि षडिको भावसाधनेऽपि न सिध्यति, पदान्ततायविधिनिमित्तस्थानिवत्त्वनिषेधाभावेऽपि जश्विधिनिमित्तनिषेधात् तुल्यावधिकभसंज्ञया पदत्वबाधात्, अत आह — **न चेति**। तन्निषेधस्य विषयमाह — **यत्रेति**। **सग्धिरिति**। अदेः क्तिनि "बहुलं छन्दसि' इति घस्लादेशे [9]"घसिभसोर्हलि च' इत्युपधालोपे [10]"झलो झलि' इति सलोपे [11]"झषस्तथोः' इति धत्वे उपधा[12]लोपस्यास्थानिवत्त्वाद्घस्य जश्त्वम्, समाना च सा ग्धिश्च सग्धिः। [13]"समानस्य छन्दसि' इति सभावः। **बब्धामिति**। भसेर्लोट्, तामि ह्वादित्वाच्छपः श्लुः। द्विर्भावः, अभ्यासकार्यम्, पूर्ववदुपधालोपादि। ननु तथापि [14]"पूर्वत्रासिद्धे न स्थानिवत्' इति स्थानिवत्त्वनिषेधः किं न स्यात्, अत आह — **पूर्वत्रेति**। **न हीति**। षत्वापत्तेः पूर्वत्रासिद्धीयत्वाभावादित्यर्थः। को यत्न इत्याशङ्क्य पञ्चमे वक्ष्यमाणमाह — **एकेति**। तथा च हलचोरादेशस्य स्थानिवत्त्वाभावादेकविषये भसंज्ञया पदसंज्ञानिवृत्तावन्तर्वर्तिविभक्त्यधीनजश्त्वस्यापि निवृत्तेर्वाचिकः सिद्ध इत्यर्थः। **षडिक इति**। लक्ष्यानुरोधेनात्र ठाजादिलोपस्यैवाङ्गीकारः, नोत्तरपदलोपस्येति भावः। **यस्येति लोप इति**। [15]तथा च भसंज्ञाविधौ तस्य स्थानिवत्त्वेन भिन्नावधिकया तया पदसंज्ञाया अबाधाज्जश्त्वसिद्धिरित्यर्थः। [16]"स्वादिष्वसर्वनामस्थाने' इत्यत्र यस्मादित्यनुवृत्त्या पदसंज्ञाया उभयाश्रयत्वमुपपादयति — **यस्मादिति**। पारिभाषिकं पदमत्र गृह्यते, न यौगिकमित्यभिप्रेत्याह — **न चेति**। अयं परिहारः साधारण इत्याशयेनाह — **एवमिति**। भावसाधनविधिशब्दस्य सम्बन्धसामान्यषष्ठीसमासेन पदान्ते विधेये पदान्तस्यान्यस्मिन् विधेये च स्थानिवत्त्वनिषेधो लभ्यत [17]इत्याशयेन 'अथवा' इति भाष्यम्। तत्र भसंज्ञायाः पदकार्यत्वमुपपादयति — **यचीति**। ननु जश्त्वादिविधिसमयेऽपि पदसंज्ञास्तीति [18]"पदसंज्ञकान्तस्य विधीयमानं जश्त्वादि भवतु पदान्तविधिः, भसंज्ञाविधिसमये पदत्वाभावात् कथं सा पदान्तविधिः, अत आह — **तद्विषयत्वादिति**। भसंज्ञातः

---

[1] पदत्वाभावात् — अ.
[2] जश्त्वाभावसिद्धिरित्यर्थः — अ, म.
[3] 'पूर्वमिति' इत्यादि 'निषेधाज्जश्त्वासिद्धिरित्यर्थः' इत्यन्तं नास्ति — अ.
[4] जश्त्वसिद्धिरित्यर्थः — म.
[5] प्रदीपे 'पदत्वनिवृत्तौ' इत्यस्य स्थाने 'पदनिवृत्तौ' इत्यन्नंभट्टपाठः।। 'पदनिवृत्तौ' इति न दृश्यते — अ.
[6] तात्पर्य इत्यादिः — आ, ऋ.
[7] प्रदीपे 'तस्या अपदान्तरूपत्वात्' इत्यत्र 'तस्यापदान्तरूपत्वात्' इति पाठोऽन्नंभट्टस्वीकृत इति प्रतीयते।
[8] पा. सू. २. ४. ३९.
[9] पा. सू. ६. ४. १००.
[10] पा. सू. ८. २. २६.
[11] पा. सू. ८. २. ४०.
[12] लोपस्य स्थानिवद्भावात् — अ; लोपस्य स्थानिवत्त्वात् —म.
[13] पा. सू. ६. ३. ८४.
[14] पूर्वत्रासिद्धीये — अ, इ, ऋ.
[15] तथा च संज्ञाविधौ — अ.
[16] पा. सू. १. ४. १७.
[17] इत्याशयेनाह — अथवेति — अ, म.
[18] पदसंक्रान्तस्य — म.

पूर्वं पदत्वेनैव तस्यास्तत्कार्यत्वम्, नियतपूर्ववर्तित्वस्यैव हेतुत्वप्रयोजकत्वादिति भावः। [1]अस्मिन् पक्षे षडिकासिद्धिप्रसङ्गात् प्रौढ्येदं समाधानमित्याहुः॥

[१, ४४७–४५१]

(**रत्नप्रकाशः**) एतत्सूत्रान्ते विद्यमानो विधिशब्दो भावसाधनः, तेन सह चरन्तद्वन्द्वस्य षष्ठी-तत्पुरुष इति मन्यमानः शङ्कते — **पदान्तविधिमिति**। तत्र पदान्तशब्दो भावप्रधानः। येन विधिना विधानेन कस्यचिद्वर्णस्य पदान्तत्वं भवति स विधिः पदान्तविधिः। तस्मिन् प्रवर्तमाने स्थानिवन्न भवतीत्यर्थात् 'वेतस्वान्' इत्यत्रातिप्रसङ्ग इति भावः। **वेतस्वानिति**। वेतसाः सन्ति यस्मिन् देशे स वा, वेतसानामदूरभावो वा देश इत्यर्थः। [2]'कुमुदनडवेतसेभ्यः' इति ड्मतुप्, सुपो लुक्, ततो डित्त्वसामर्थ्यादभस्यापि टेर्लोपः। ततः [3]'सुप्तिङन्तम्' इत्यन्तर्वर्तिनीं विभक्तिं स्थानिवद्-भावेनाश्रित्य प्रसक्तां पदसंज्ञां बाधित्वा [4]'स्वादिषु' इति पदसंज्ञायां सत्यां रुत्वं स्यादिति भावः। कर्मसाधन एवात्र विधिशब्दः। तथा च 'वेतस्वान्' इत्यत्र यदा मत्वर्थीयो ड्मतुप् तदा भसंज्ञया बाधात् पदसंज्ञैव नास्तीति रुत्वं दूरापास्तमेव। यदा त्वदूरभवार्थो ड्मतुप् तदा स्थानिवद्भावा-दकारान्त एव पदसंज्ञक इति सकारान्तेन पदसंज्ञैव न लब्धेति तदाश्रयं रुत्वं न भवतीत्याशयेनाह **नैष दोष इति**। एतेन "[5]'तदस्मिन्नस्ति' इत्यत्रैव ड्मतुप्, न तु निर्वृत्तादिषु" इति निरस्तम्। तत्कल्पनायां मानाभावात्। भाष्यस्यान्यथोपपन्नत्वात्। तदाशयानभिज्ञोऽन्यः स्वमतानुसारेणाह **अकारान्तमिति**। सिद्धान्ती स्वाशयं सूचयति — **ननु चेति**। **संप्रति पदान्त इति**। विधीयमानस्य पदान्तत्वे भाविनीत्यर्थः। इदानीमन्यः सिद्धान्त्याशयं बुद्ध्वा तदनुवादपूर्वकं स्वाशयमाविष्करोति — **कर्मसाधनस्येति**। स्वाशयं प्रकाश्य दूषणान्तरमाह — **ब्रह्मबन्ध्वेति**। ऊङेकादेशस्य टायां यणि कृते तस्याजादित्वाभावेन तदाश्रया [6]'स्वादिषु' इति पदसंज्ञा धकारान्तस्य भवतीति जश्त्व-प्रसक्तिः। एतेन "ब्रह्मबन्धुशब्दादूङ। ऊङ्नूङशब्दयोरेकादेश आदिवद्भावादूङ्ग्रहणेन गृह्यत इति तस्मिन् [7]'स्वादिषु' इति पदसंज्ञायां धकारस्य पदान्तता विधेयेति स्थानिवत्त्वनिषेधाज्जश्त्वं स्यात्। भसंज्ञां तु प्रत्येकादेशस्य स्थानिवत्त्वादुकारान्तमेतदिति भिन्नावधिकत्वाद् भपदसंज्ञयोर्नास्ति बाध्यबाधकभावः। यणादेशोच्चारणं चातन्त्रम्, एकादेशस्यैवोदाहरणत्वात्" इति निरस्तम्। उभयत आश्रयेऽन्तादिवद्भावनिषेधेन यथाश्रतैकादेशताशून्ययणादेशाश्रयेणैव पूर्वस्य पदसंज्ञायां जश्त्व-स्यापादनीयत्वात्। तं पूर्ववादिनं सिद्धान्त्युपहसति — **अस्ति पुनरिति**। इतर आह — **अस्तीति**। इष्टं संगृहीतमित्यनुषज्यते। **कानि सन्तीति**। वाक्यसंस्कारपक्षस्यैव मुख्यत्वेन स्थानिभूतादचः [8]'पूर्वत्वेन दृष्ट इकार इति तस्य [9]'भाविपदत्वे यणि कर्तव्येऽस्तेरल्लोपस्य स्थानिवत्त्वे प्रसक्ते 'न पदान्तविधौ' इति निषेधः सिध्यतीति भावः। पक्षद्वयसाधारणमिदं प्रयोजनम्। भावसाधनपक्षे त्वसाधारणं प्रयोजनं च किंचित् सिध्यतीति [10]मन्यमान आह — **षडिकश्चापीति**। षडङ्गुलि-

---

[1] विवरणोक्तिमाह — अस्मिन्निति।
[2] पा. सू. ४. २. ८७.
[3] पा. सू. १. १. १४.
[4] पा. सू. १. १. १७.
[5] पा. सू. ४. २. ६७.
[6] पा. सू. १. ४. १७.
[7] पा. सू. १. ४. १७.
[8] पूर्वत्वेन न दृष्टः — ब.
[9] पदशब्दः पदान्तपरः। बहुव्रीहिश्च बोध्यः, भाविपदान्तत्वक इत्यर्थः।
[10] मन्यमानमाह — ब.

शब्दात् [1]'बह्वचो मनुष्यनाम्नष्ठच्' इति ठचि [2]'ठाजादावूर्ध्वं द्वितीयादचः' इति ङकारादेर्लोपे सति षडशब्दस्याकारान्तस्य [3]'यचि भम्' इति भसंज्ञायां सत्यां [4]'यस्य' इति लोपेऽपि भसंज्ञां प्रति स्थानिवद्भावात् तदकारान्तमेवेति भिन्नावधिकया भसंज्ञया [5]'स्वादिषु' इति पदसंज्ञा षकारस्य पदान्ततासंपादिका न बाध्यत इति तस्यां सत्यां जश्त्वे 'षडिकः' इति सिध्यतीति भावः। स एवाह स्वमते — **वाचिकस्तु न सिध्यतीति**। सिद्धान्त्याह — **अस्तु तर्हि कर्मसाधन इति**। शङ्कते — **यदीति**। सिद्धान्त्यन्यं परीक्षितुमाह — **अस्त्विति**। अन्य आह — **वाचिक इति**। पुनः स एवाह — **वाचिकषडिकाविति**। सिद्धान्त्याह — **कर्तव्य इति**। [6]'एकाक्षरपूर्वपदानामुत्तरपदलोपः' इति वागाशीरित्याशीश्शब्दस्य ठाजादौ लोपे सत्यन्तर्वर्तिविभक्त्याश्रितां [7]'स्वादिषु' इति च पदसंज्ञां बाधित्वा भसंज्ञैव भवतीति जश्त्वाभावाद्वाचिकः सिध्यति पक्षद्वये। षडिकस्तु भावसाधनपक्षे साधित एव। कर्मसाधनपक्षेऽपि सिध्यति। अकारान्तस्य प्राप्तां समानाश्रयां [8]'स्वादिषु' इति पदसंज्ञां [भसंज्ञा बाधते, षकारान्तस्य प्राप्तां [9]'सुप्तिङ' इति पदसंज्ञां] न बाधत इति जश्त्वप्रवृत्त्या सिध्यति। तत्पक्षे 'वेतस्वान्, ब्रह्मबन्ध्वा' इत्यत्र तु दोषो न प्रसक्त एव। भावसाधनवादी पृच्छति — **कथमिति**। भावसाधनपक्षेऽपि 'ब्रह्मबन्ध्वा' इत्यत्र दोषो न प्रसक्त एवेत्याह सिद्धान्ती — **उभयत इति**। एकादेशवत् तदादेशस्यापि पूर्वपरावयवत्वेन पौर्वापर्येणोभयत आश्रयणे नान्तादिवत्त्वमिति भावः। अन्यः पृच्छति — **कथमिति**। **पदेऽन्त इति**। तथा च ङमतुपः पदत्वाभावात् तस्मिन् परतः पूर्वस्य पदसंज्ञायां क्रियमाणायामपि स्थानिवद्भावो भवत्येवेति समानाश्रया भसंज्ञा [10]'सुप्तिङन्तम्' इति [11]'स्वादिषु' इति च पदसंज्ञां बाधत इति भावः। तदेवं 'वेतस्वान्' इत्यत्रातिप्रसङ्गं व्यापकयुक्त्या समाधाय प्रागुक्तामव्यापिकामपि तत्र सकारान्ते व्यवस्थापयितुमाह — **अथवेति**। **पदकार्याणीति**। पदशब्दः पदान्तपरः। यथा रुत्वादि पदान्तत्वविशिष्टसकारादिनिवर्तकं सत् पदान्तविधिर्भवति, तथा पदान्तत्वविशिष्टसकारनिवर्तिका भसंज्ञेति पदान्तविधित्वाविशेषेण तस्यां प्रवर्तमानायामपि स्थानिवद्भावनिषेधात् सकारान्ते प्रवर्तमाना सा पदसंज्ञां बाधत इति भावः। तदेवं कर्मसाधनपक्षो भावसाधनपक्षश्च भगवता व्यवस्थापितः। [12]'स्तेनाद्यन्नलोपश्च' इति नलोपविधानं तु पक्षद्वयेऽप्यपेक्षितमेव। तथा च तत्र कर्मसाधनपक्ष ऋजुः, अन्यो वक्र इत्येतावांस्तु विशेषः। एतेन "[13]'यचि भम्' इत्यत्र [14]'तसौ मत्वर्थे' इत्यत्र च पदमिति वर्तते। तेन पदं सद् भसंज्ञं भवतीति लब्धे पदत्वे तन्निबन्धनरुत्वाप्रतिबन्धार्था भसंज्ञा तद्विषयत्वात् पदान्तविधिरिति स्थानिवत्त्वनिषेधाद् भत्वाद्धुत्वाभावः सिद्धः" इति निरस्तम्। पदत्वाश्रितभसंज्ञायाः पदत्वबाधकत्वोक्तेरसंबद्धप्रलापत्वात्। भाष्यस्यान्यथोपपन्नत्वाच्च॥ अत्रेदमवधेयम् — 'पूर्वत्रासिद्धे न स्थानिवत्' इति रुत्वे जश्त्वे च कर्तव्ये स्थानिवत्त्वाभावात् 'वेतस्वान्, ब्रह्मबन्ध्वा' इत्यादौ रुत्वजश्त्वादिकं यावत् त्रैपादिकं तत् प्राप्नोत्येवेति मतद्वयेऽपि दोषो यद्यपि, तथापि प्रकृतभाष्यानुसारेण पदान्तनिषेधांशे तद्वचनं न प्रवर्तत इति कल्प-

---

[1] पा. सू. ५. ३. ७८.
[2] पा. सू. ५. ३. ८३.
[3] पा. सू. १. ४. १८.
[4] पा. सू. ६. ४. १४८.
[5] पा. सू. १. ४. १७.
[6] का. वा. ५. ३. ८४-४.
[7] पा. सू. १. ४. १७.
[8] पा. सू. १. ४. १७.
[9] पा. सू. १. ४. १४.
[10] पा. सू. १. ४. १४.
[11] पा. सू. १. ४. १७.
[12] पा. सू. ५. १. १२५.
[13] पा. सू. १. ४. १८.
[14] पा. सू. १. ४. १९.

नीयम्। यच्च तेनोक्तं प्राक् 'षष् इत्ययं शब्दोऽन्तर्वर्तिन्या विभक्त्या सिद्धः पदत्वेनेति पदान्तताया अविधानान्नास्ति स्थानिवत्त्वनिषेध इत्यकारलोपस्य स्थानिवत्त्वादकारान्तस्य भसंज्ञा। पदसंज्ञा त्वन्तर्वर्तिविभक्त्याश्रयेण षकारान्तस्येति सिद्धं जश्त्वम्। कर्मसाधने तु षषः षकारः [1]'पदान्तत्वेन सिद्ध इति स्थानिवत्त्वनिषेधात् षकारान्तस्यैव संज्ञेति तुल्यावधिकया भसंज्ञया पदसंज्ञाया एकसंज्ञाधिकाराद्बाधनाज्जश्त्वासिद्धिः' इति। तदत्यन्तासंबद्धम्। अन्तर्वर्तिनीं विभक्तिमाश्रित्य प्रवर्तमानायाः [2]'सुप्तिङन्तम्' इति पदसंज्ञाया अकारान्तप्रवृत्तभसंज्ञया बाधायोगेन भावसाधन पक्ष इव कर्मसाधनपक्षेऽपि तत्र जश्त्वस्य सिद्धत्वात्। कर्मसाधनपक्षे पदान्तशब्दप्रभृतेश्चरन्तस्य द्वन्द्वस्य विधिशब्देन षष्ठीतत्पुरुषस्य कर्मधारयस्य चायोगेन लुप्तसप्तम्यन्ततामाश्रित्य 'पदचरमावयवादिषु विधिषु विधेयेषु सत्सु, वरे परे च परनिमित्तोऽजादेशो न स्थानिवत्' इति व्याख्येयत्वेन डकारस्य पदान्तत्वेन सिद्धस्य प्रसङ्गे षकाररूपापत्तिसंपादकभसंज्ञायां विधीयमानायां स्थानिवत्त्वनिषेधापादनस्यायोगाच्च। ननु [3]'एकाक्षरपूर्वपदानामुत्तरपदलोपो वक्तव्यः' इति वचनेन वाचिकसाधनात् तद्वत् 'षषिकः' इत्येव न्याय्यत्वेन किमप्रसक्तषडिकसाधनेनेति चेन्न, [4]'षषष्ठाजादिवचनात् सिद्धम्' इति तत्रैव वचनान्तरस्य सत्त्वेन तत्रोत्तरपदलोपाप्रसक्तेः॥

[१, ४४७–४७१]

(नारायणीयम्) भाष्ये वक्ष्यमाणं शिष्यानुग्रहायादौ दर्शयति — **भावेति**। मतुप्यल्लोपानुपपत्तेराह — **वेतसेति**। ननु यथात्र पदान्तत्वेन सिद्धस्य पदसंज्ञा न विधीयत इति कर्मसाधनपक्षे दोषाभावस्तथा भावसाधनपक्षेऽपि पदान्तो न भाव्यते, संज्ञायास्तस्याः प्रागेव सकारस्य सिद्धत्वादित्यदोष इत्याशङ्क्य स्वरूपसिद्धावपि पदान्तत्वयोगितया भाव्यमानत्वं सकारस्यास्तीत्यभिसंधायाह — **स्वादाविति**। **पदान्ततायाः इति**। सकारस्याभाव्यमानत्वाद् वस्तुतः पदान्तता भाव्येत्येवमुच्यते। विशिष्टस्य तु भाव्यत्वे तात्पर्यमित्युक्तमेव। ननु मतुप् चेदिदं [5]शक्यं वक्तुम्, तत्र त्वल्लोपाभावः। [6]ड्मतुप्प्रत्ययस्य च चातुर्थिकत्वात् कथं मत्वर्थीयत्वनिर्णयनियमः, तत्राह — **तदिति**। **अनभिधानादिति**। 'देशे तन्नाम्नि' इत्यधिक्रियते। न च वेतस[7]निर्वृत्ते तन्निवासे [8]'तद्दूरभवे च वेतस्वानिति नामतया वर्तते। अकारस्य लुप्तत्वात् कथमकारान्तत्वोक्तिरित्यत्राह — **भसंज्ञामिति**। **नास्तीति**। सकारान्तेऽकारान्ते वा। 'पदसंज्ञां प्रति सकारान्तम्' इति भाष्यं भावसाधनत्वाद् विधिशब्दस्योपपन्नमित्याह — **पदान्तत्व इति**। भूतपूर्वमस्य पदान्तत्वं न सांप्रतिकमिति भाष्यार्थभ्रम[9]व्युदासाय व्याचष्टे — **स्थानिवत्त्वेति**। [10]**अस्त्येवेति**। पदसंज्ञायां कार्यायाम्। सा हि न पदान्तस्य कार्यम्। ब्रह्मबन्धुशब्दः किं पुंल्लिङ्ग इहोदाहृतः, उत स्त्रीलिङ्गः। [आद्ये] 'ब्रह्मबन्धुना, ब्रह्मबन्धवे' इत्यापत्तेः। अन्त्येऽपि किम् उ ऊङ आ इत्यकृत एकादेशे धान्ते पदसंज्ञाप्राप्तिः, कृते वा। नाद्यः, उकारान्तत्वात्, तत्र च भसंज्ञाप्राप्तेः।

---

[1] पदान्तत्वेन न सिद्ध इति — ब.
[2] पा. सू. १. ४. १४.
[3] का. वा. ५. ३. ८४–४.
[4] का. वा. ५. ३. ८४–५.
[5] वक्तुं शक्यम् — क.
[6] मतुबन्तस्य च — क, ग.
[7] निवृत्ते — क, ग.
[8] तद्दूरभवे च — क, ग.
[9] व्युदसनाय — क.
[10] प्रदीपे 'भवत्येव स्थानिवद्भावः' इत्यत्र 'अस्त्येव स्थानिवद्भावः' इति पाठोऽभिमत इति भाति।

अन्त्येऽपि किं कृते यणि प्राप्तिरकृते वा। नाद्यः, बहिरङ्गस्य यणोऽसिद्धत्वात्, कृते च वान्तत्वात्। अतोऽन्त्यः परिशिष्यत इत्याह — **ब्रह्मबन्धुशब्दादिति**। शिष्टं वेतस्वता तुल्यम्। यद्येवं 'ब्रह्मबन्धूः' इत्येव देयमुदाहरणम्, अत आह — **यणादेशेति**। एतत्पक्षे सिद्धचभिधानात् कर्मसाधनपक्षेऽसिद्धिरिति शङ्का स्यात्, तां निवारयति — [1]**पक्षद्वयेति**। [2]नन्वपदान्तस्य सतो [3]यणो विधिः न पदान्तस्य भावनम्, विधिसमये पदान्ततायाप्रतिपत्तेः[4]। विधानोत्तरकालं हि लक्ष्ये पदान्तस्थानिके पदान्ततावगम्यते, अत आह — **यकारेति**। विहितस्य यो धर्मः स एव विधीयमानस्य। यथोक्तं पूर्वसूत्रे 'आयन्' इत्यादिषु पूर्वं आङ् भाव्यत इति। पूर्वत्वमपि विहितेऽवगन्तव्यम्। लोकप्रसिद्धश्चायं व्यवहारः, यथा राजा जायत इति। किमिदमपि पूर्वोदाहरणवत् पक्षद्वयसाधारणम्, नेत्याह — **इदानीमिति**। उत्तरपदलोपे स्थानिवत्त्वतन्निषेधचिन्तानुपपत्तेस्तदुपपत्तयेऽजादेशं प्रदर्शयति — **षडङ्गुलीति**। असाधारण्यं व्युत्पादयति — **षषित्ययमिति**। यद्यपि ठच्येव भपदसंज्ञयोर्भिन्नावधिकतया [5]पदत्वस्याबाधाज्जश्त्वसिद्धिर्वक्तुं शक्या। यथोक्तं वेतस्वति। तथापि भाष्यकारेण [6]पुरस्तादेव वेतस्वति रुत्वाभावाय संज्ञयोः समानविषयत्वस्य वक्ष्यमाणत्वादन्तर्वर्तिविभक्त्याश्रयेण पदत्वप्रसाधनमिति द्रष्टव्यम्। नन्वन्तर्वर्तिविभक्त्याश्रयमपि पदत्वं भत्वेन किमिति न बाध्यते, तत्राह — **अकारान्तस्येति**। भिन्नावधिकत्वाद् बाध्यबाधकभावो नेत्यर्थः। कथं भिन्नावधिकत्वम्, अत आह — **अकारेति**। कथं स्थानिवत्त्वम्, पदान्तविधिप्रयुक्तो निषेधः कुतो नेत्यत आह — **नास्तीति**। तत्र हेतुः — **पदान्तताया इति**। तत्र च हेतुः — **अन्तर्वर्तिन्येति**। भाव्यं हि विधिगोचरम्, पदत्वं त्विह सिद्धमिति तदन्तत्वमपि यस्मिन् कस्मिंश्चित् सिद्धमेव। अतो न पदान्तत्वस्य तद्धर्मिणो वेह विधित्स्यमानत्वम्। यतस्तत्प्रतिबन्धार्थं भसंज्ञायां स्थानिवत्त्वनिषेधः स्यादित्यर्थः। कर्मसाधने तर्हि कथमेतदसिद्धिः, तत्राह — **कर्मेति**। **सिद्ध इति**। [7]प्रक्रियावस्थायां [8]निषेधात्। भसंज्ञा जश्त्वनिवृत्त्यर्था, जश्त्वं च पदान्तस्य कार्यम्, अतः कार्यार्थसंज्ञाया अपि पदान्तकार्यत्वमित्यर्थः। उत्तरपदलोपमजानतश्चोद्यमित्याह — **चकारस्येति**। अनुकम्पितो वागाशीर्दत्त इति पूर्ववट्टुचि द्वितीयादच उत्तरस्य लोपे आकारस्य "यस्य' इति लोपे तस्य स्थानिवत्त्वाद् भपदसंज्ञयोर्भिन्नावधिकत्वमिति [9]पदान्तत्वाबाधात् कुत्वप्रसङ्ग इत्यर्थः। षडिकसिद्धिमाक्षिपति — **कथं पुनरिति**। पदान्तस्य भाव्यमानत्वात् [10]स्थानिवत्त्वनिषेधेन भाव्यमित्यर्थः। नन्वन्तर्वर्तिन्या विभक्त्या पदत्वस्य सिद्धत्वात् पदान्तताया अपि यस्मिन् कस्मिंश्चिद्धर्मिणि सिद्धत्वान्नेह [11]पदान्तत्वस्य विधित्स्यमानत्वमित्युक्तम्, अत आह — **डकारस्येति**। पदान्तमात्रस्य सिद्धत्वेऽपि पदान्तव्यक्तिविशेषस्य भाव्यमानत्वमस्तीत्यर्थः। तदेतद् दृष्टान्तेन स्पष्टयति — **यावतेति**। यथा 'कौ स्तः' इत्यादौ पदान्तमात्रस्य सिद्धत्वेऽपि तद्व्यक्तिविशेषस्य वकारादेर्भाव्यमानत्वमादाय निषेधप्रवृत्तिस्तथेहापीत्यर्थः। ननु पदान्त[12]विध्यर्था निषेधप्रवृत्तिः, न चेह डकारः पदान्तो भसंज्ञया भाव्यते। अपि तु निवर्त्यते। अतः कथं तस्यां कर्तव्यायां निषेधप्रवृत्तिशङ्केत्यपि शङ्कैतद्दृष्टान्तेन निवर्तिता। यथा हि यकारादेः पदान्तस्य निवर्तनाय निषेधप्रवृत्तिस्तथेहापि भसंज्ञया डकारे विनिवर्तनीये निषेधप्रवृत्तिः। पदान्ते हि

---

[1] पक्षद्वयेऽपीति — क.
[2] ननु पदान्तस्य — ग.
[3] यण्विधिः — क, ग.
[4] अप्रतिपत्तेरिति छेदः।
[5] परस्ताद् वेतस्वीति — ग.
[6] प्रक्रियावस्थायामनिषेध इति — क.
[7] निषेधादिति। भसंज्ञा — ग.
[8] पा. सू. ६. ४. १४८.
[9] पदान्तत्वाभावात् — क.
[10] स्थानिवत्त्वेन भाव्यमित्यर्थः — क.
[11] पदान्तस्य — क, ग.
[12] सिद्धचर्था — क, ग.

विधित्स्यमाने निषेधः। निषेधोत्तरकालं तु क्वचित् पदान्तः प्रवर्तते, क्वचिन्निवर्तते। यथोक्तं पूर्वसूत्रे 'इट् च न भविष्यति' इति। पूर्वस्मिन् हि [1]'भावनविषयेऽजादेशस्य स्थानिवत्त्वम्, सति तु स्थानिवत्त्वे 'आयन्' इत्यादिषु पूर्वो भाव्यते, 'धिन्वन्ति' इत्यादिषु निवर्त्यते। समाधत्ते — **नैष इति**। न बाह्यार्थोत्पन्नतद्धितनिमित्तभसंज्ञाप्राप्तिपर्यन्तमन्तरङ्गतया प्राप्नुवज्जश्त्वं न [2]निर्वर्त्यते। न च जश्त्वस्यासिद्धत्वात् तद्धितोत्पत्तिः प्राथमिकी। पूर्वस्य हि कर्तव्यत्वावगमेऽसिद्धत्वम्। न चेह जश्त्वप्रवृत्तिसमये तद्धितस्य कर्तव्यत्वागमः। अतो डकारस्यापि भसंज्ञायाः प्रागेव सिद्धत्वान्न पदान्तव्यक्ति[3]विशेषभावनमादाय निषेधाशङ्केत्यर्थः। यदि तर्हि डकारोऽपि प्रागेव सिद्धः कथं कर्मसाधने जश्त्वासिद्धदूषणमित्याशङ्क्य न ब्रूमस्तदसिद्धिर्दूषणमिति, किं तर्हि, तन्निवृत्त्यापत्तिर्दूषणमितीत्याह[4] — **कर्मेति**। **जश्त्वनिवृत्ताविति**। न च कृतनिवर्तनस्यान्याय्यत्वम्, लोपादिवत् प्रक्रियायां तदुपपत्तेः। न च तद्वदत्र निवर्तकवचनमेव नास्तीति वाच्यम्, 'पदान्त एव जश्त्वं साधु' इत्यस्य वचनस्यापदान्ते तन्निवर्तकत्वात्। [5]'पदान्तभावनं प्रकारान्तरेणाशङ्क्य निरस्यति — **न चेति**। इत्थं भावसाधने पदान्तविधिप्रयुक्तनिधाषेप्रवृत्त्या षडिके साधिते निषेधान्तरमाशङ्क्य निरस्यति — **न चेति**। सौत्रनिषेधाप्राप्तावपि वाचनिकनिषेधप्राप्तिरिति शङ्कां परिहरति — **पूर्वत्रेति**। कृत एव कर्तव्यतोक्तिरावश्यकत्वाभिप्रायेत्यभिप्रेत्याह — **एकाक्षरेति**। **षडिकस्त्विति**। [6]'षषष्ठाजादिवचनात् सिद्धम्' इति वचनसत्त्वात्। एवं तावद् भावसाधनपक्षः स्थितः। कर्मसाधने तु [7]'षडिकासिद्धिष्ठाजादिलोपेऽप्युक्तैव। तत्र भावसाधनपक्षोक्तदूषणपरिहाराय 'कथम्' इत्यादि भाष्यम्। तत्र 'ब्रह्मबन्ध्वा' इत्यत्र जश्त्वप्राप्तिः 'उभयत आश्रये' इति परिहृता। तत्र स्वादिग्रहणेन [8]'ग्रहणार्थमादिवद्भावोऽपेक्ष्यते, नान्तवद्भाव इत्याशङ्क्योभयाश्रयत्वं विशदयति — **यस्मादिति**। पदशब्दः पारिभाषिको न यौगिक इत्याह — **न चेति**। ततश्च पदसंज्ञया पदान्ततामावनेऽपि पदेऽन्तस्याभावनात् स्थानिवत्त्वनिषेधाभावान्नास्ति सान्तस्य पदत्वमिति रुत्वाभावः। **एवमिति**। यदीह पदं परं स्यात् तदा तस्मिन् षकारापत्तेर्भाव्यमानत्वेन भसंज्ञायां स्थानिवन्निषेधः स्यात्। अत्र च पक्षे कर्मसाधनेऽपि षडिकसिद्धिरप्यनेन दर्शिता। ननु पदाधिकारे [9]'रुत्वादिविधानवन्न भसंज्ञायास्तथा विधानम्, प्रत्युत तदपवादतया [10]'तस्या विधिः। अतः कथम् 'इदमपि' इत्युच्यते, अत आह — **यचीति**। ननु भसंज्ञायां पदानुवृत्तिः किं संज्ञासमावेशार्था, ततश्च स्यादेव रुत्वम्, नेत्याह — **तन्निबन्धनेति**। भसंज्ञायाः पदान्तविधित्वसंपादनेन पदानुवृत्त्युपपत्तौ नैकसंज्ञाधिकारो बाधनीय इति भावः। ननु रुत्वादिः पदान्तविधिः। भसंज्ञा तु न पदान्तभावनम्, नापि पदान्तस्य सतः कार्यम्, समुदायनिवेशित्वेन भसंज्ञायाः पदान्तमात्रकार्यत्वाभावात्, अत आह — **तद्विषयत्वादिति**। भाव्यमानो रुत्वादिर्निवर्त्यतया विषयो यस्यास्तस्या भावस्तत्त्वम्, तस्मादित्यर्थः। संज्ञायाः कार्यार्थत्वाद् भसंज्ञानिवर्त्यकार्यस्य पदान्तविधित्वात् तस्या अपि तथात्वमित्यर्थः। न चैवं पदान्तविधित्वोपपादने भसंज्ञायां पदानुवृत्तिवैफल्यमिति वाच्यम्, असत्यां हि तदनुवृत्तौ सान्ते प्राप्तरुत्वादिनिवृत्त्युद्देशेन[11] भसंज्ञाप्राप्त्यसिद्धेः पदान्तविधित्वासिद्धेः॥

---

[1] भावनाविषये — क, ग.
[2] निवर्त्यते — क, ग.
[3] विशेषभावनामादाय–क; विशेषतामादाय–ग.
[4] दूषणमित्याह — क.
[5] पदान्तभवनं — ग.
[6] का. वा. ५. ३. ८४–५:
[7] षडिकसिद्धिः — ग.
[8] ग्रहणार्थमादिवद्भाव एवापेक्ष्यते — क.
[9] कुत्वादि — क.
[10] तदन्तविधिः — क, ग.
[11] 'निवृत्त्युद्देशेन' इत्यन्तमेव 'क' मातृकायामुपलभ्यते।

नन्वसत्यपि पदाधिकारे [1]'तसौ मत्वर्थे' इतीह भसंज्ञा रुत्वनिवृत्त्युन्मुखा प्राप्तैव। नैतदस्ति, अल्लोपस्य स्थानिवत्त्वेन सान्तत्वबुद्धेरभावात्। न च स्थानिवत्त्वनिषेधः, परस्पराश्रयत्वात्। सत्यां हि रुत्वनिवृत्त्युन्मुखतया भसंज्ञाप्राप्तौ निषेधः, निषेधे च सति संज्ञाप्राप्तिरिति। सति तु पदाधिकारे यदवधौ पदत्वं तदवधौ भसंज्ञेति वेतस्वानित्यत्र पदसंज्ञायाः पदान्तविधित्वात् स्थानिवत्त्वनिषेधे सान्तावधौ पदत्वमिति भसंज्ञापि तद्विषया तर्क्यते। [2]निषेधापेक्षया तां च तर्कितां प्राप्तिमाश्रित्य निषेधप्रवृत्तिरिति निरवद्यम्॥

[१, ४५१–४५४]

(लघुविवरणम्) 'कण्ड्यतेरप्रत्ययः' इति भाष्यमनुपपन्नम्, यगन्तात् क्विपोऽभावादित्यत आह — **क्यजन्तादिति**। ननु स्थानिवत्त्वं यकारोपधात्वोपयोगि, न विरोधीत्यत आह — **एक इति**। ननु स्थानिवत्त्वनिषेधे[3] कथमिव यकारस्योपधात्वमित्यत आह — **स्थानिवत्त्वनिषेध इति**। ननु लिति प्रत्यये [4]स्वरभाजोऽनन्तरस्यासंभवाद्व्यवधानेऽपि भविष्यतीत्यत आह — **कारक इत्यादाविति**। ननु पूर्वमिति साक्षादभिधानात् [5]'तस्मिन्निति निर्दिष्टे' इत्यस्यानुपस्थितौ व्यवधानेऽपि भविष्यति, व्यवहितेऽपि पूर्वशब्दस्य दर्शनादित्यत आह — **यत्र त्विति**। ननु [6]'अनुदात्तं पदमेकवर्जम्' इति वचनान्नास्ति यौगपद्यसंभव इत्यत आह — **पक्ष इति**। ननु भत्वात् [7]'न भकुर्छुराम्' इति प्रतिषेधेन भवितव्यमित्यत आह — **रेफेति**। प्रकृते समन्वयाभावे हेत्वन्तरमाह — **इह त्विति**। हेत्वन्तरं निरस्यति — **लोपशब्द इति**। दृष्टान्तेऽसंबद्धपदव्यवायाभावः, इह त्वस्तीति वैषम्यमित्यत आह — **तत्रेति**। संभवव्यभिचारयोर्विशेषणसंबन्धप्रयोजकत्वात् तयोस्त्रिष्वेव संभवादिति तात्पर्यार्थः। त्रिष्वेव संभवमुपपादयति — **द्विवर्चनेति**। कथमेतत् सर्वमित्यत आह — **स्मृतीति**। प्रयोगमूलत्वाद्व्याकरणस्मृतेर्यथाप्रयोगं स्मृत्यर्थव्यवस्थानमित्यर्थः। **पाठक्रमादिति**। पञ्चमे चिन्तितम् — "अर्थाच्च'। 'अग्निहोत्रं जुहोति, यवागूं पचति' इति श्रूयते। तत्र संदेहः — किं पाकहोमयोरनियमः, उत नियमः। नियमेऽपि किं पूर्वं होमः पश्चात् पाकः, उत विपर्ययः। किं तावत् प्राप्तम्। नियामकप्रमाणाभावाद् विध्योश्च स्वार्थमात्रपर्यवसायित्वादनियम इति, अथवा पाठक्रमेणात्र [9]समिदादिष्विव पूर्वं होमः पश्चात् पाकः। होमश्च द्रव्यान्तरेण निर्वर्तनीयः। पाकस्त्वदृष्टार्थो भविष्यतीति प्राप्तम्। [10]एवं प्राप्ते ब्रूमः — [11]पूर्वं पाकः पश्चाद्धोमः। यदि [12]हि विपर्ययः स्यात् ततो होमस्य द्रव्याभावादनिर्वृत्तिरेव स्यात्। न च श्रुतसंभवे द्रव्यान्तरं कल्पयितुं शक्यते। संभवति च पूर्वं पाकनिर्वृत्तौ श्रुतं द्रव्यम्। पाकस्य च पश्चाद्भावित्वे तेन संस्कृताया यवाग्वा भूतभाव्युपयोगित्वाभावात् संस्कार्यत्वासंभवे पाकस्य

---

[1] पा. सू. १. ४. १९.
[2] निषेधानपेक्षया — ग.
[3] 'निषेधे' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — ड, ण.
[4] स्वरभाजोऽनन्तरस्याभावात् — ड, ढ.
[5] पा. सू. १. १. ६६.
[6] पा. सू. ६. १. १५८.
[7] पा. सू. ८. २. ७९.
[8] मीमांसासूत्रम् ५. १. २.
[9] समिधो यजति, तनूनपातं यजतीत्यादिविहितसमिद्यागादिष्विवेत्यर्थः। समिदादिष्विव पाठक्रमेणेत्यन्वयः।
[10] 'एवम्' इत्यस्यानन्तरं तुशब्दोऽधिकः — ड, ढ.
[11] 'पूर्वम्' इत्यस्यानन्तरं तुशब्दोऽधिकः — ड, ढ.
[12] हिशब्दो नास्ति — ड, ढ.

प्रधानकर्मत्वापत्तौ द्वितीयाश्रुतिः [1]पीड्येत। तस्मात् पाठक्रमं बाधित्वार्थक्रमो ग्रहीतव्य इति॥

[१, ४५१–४५४]

(विवरणम्) भाष्ये **अवर्णलोपविधिः** [2]'आतो लोप इटि च' इति। यायावर इत्यत्र 'वरे लुप्तं न स्थानिवत्' इत्येव [3]यलोपस्यापि सिद्धत्वात् 'यलोपं प्रति न स्थानिवत्' इत्यस्यान्यदुदाहरणं वाच्यमिति पृच्छति — **यलोपे किमिति**। **उक्तमिति**। [4]'कण्ड्वादिभ्यो यक्' इत्यत्र। **ततः** आदित्यशब्दादित्यर्थः। **कण्डूतिशब्दस्येति**। विशेषणत्वादिति भावः। **उदात्तत्वं न स्यादिति**। [5]'लिति' इत्यनेन। नन्विह पूर्वमित्यनुवर्तनात् [6]'तस्मिन्निति निर्दिष्टे' इत्यस्यानुपस्थानात् तदङ्गनिर्दिष्टग्रहणस्यापीहानुपस्थितेः पूर्वशब्दस्य [7]च व्यवहितेऽपि प्रयोगात् स्वरः सेत्स्यतीत्यत आह — **यत्र त्विति**। 'अनुदात्तं पदम्' इति वचनात् 'पक्षे' इत्युक्तम्। **न प्रवर्तत इति**। तेन [8]'हलि च' इति दीर्घो [9]भवत्येवेति भावः। प्रकृतत्वं तु न सूत्रान्तरे वर्तमानत्वमित्याह — **प्रस्तुत इति**। साक्षात् स्वसंबद्धस्य पदस्य पदान्तरेणाव्यवधानम् **आनुपूर्व्यम्**, तेन संनिविष्टानां संबन्धे कारणमाह — **तत्रेति**। आनुपूर्व्यमुपलक्षणं भाष्य इत्याह — **इहेति**। **तथापीति**। अत एव विधिग्रहणं प्रकृतमनुवर्तत इत्युक्तम्। पदान्तेति लुप्तषष्ठीकं पदम्। ननु योगविभागादौ किं प्रमाणमित्यत आह — **स्मृतीति**। प्रयोगमूलत्वादिति तात्पर्यम्। **ग्रहणकवाक्यं** संग्रहवाक्यम्। भाष्ये **साचीनं** तिर्यग्गच्छन्तमित्यर्थः॥

[१, ४५१–४५४]

(उद्द्योतनम्) भाष्ये **अवर्णलोपविधि प्रतीति**। वलि लोपं [11]प्रत्यतो लोपस्य स्थानिवत्त्वनिषेधेऽप्यवर्णलोपे [12]स्थानिवद्भावानिषेधात् [13]'आतो लोप इटि च' इटि द्वितीययकारस्याकारस्य लोपप्रसङ्ग इत्यर्थः। 'वरे लुप्तं न स्थानिवत्' इत्यनेनैव 'यायावरः' इत्यत्र यकारलोपस्यापि सिद्धत्वाद् यलोपस्य किमुदाहरणमिति पृच्छति — भाष्ये **यलोप इति**। **क्यजन्तादिति**। कण्डूमात्मन इच्छतीत्यत्रार्थे क्यच्। **उक्तं** [14]'कण्ड्वादिभ्यो यक्' इत्यत्र। सूर्यो देवता अस्याः सौरी। अत्र स्थानिवत्त्वानिषेधे यलोपो न स्यादित्याह — **एक इति**। भाष्ये **उपधात्वेति**। 'क्विलुगुपधात्व' इत्यनेन। ननु स्थानिवत्त्वनिषेधेऽपि [15]'असिद्धवदत्राभात्' इति लोपद्वयस्यापि यलोपं प्रत्यसिद्धत्वादुपधात्वं न स्यात्, अत आह — **स्थानिवत्त्वनिषेध इति**। **समानेति**। ईत्येव यलोपविधानात्। **ततः** आदित्यशब्दात्। ण्यद्वयमपि [16]'दित्यदित्यादित्य' इत्यनेन।

---

[1] विहन्येत — ड, ढ.
[2] पा. सू. ६. ४. ६४.
[3] यलोपविधावपि सिद्धम्। यलोपं प्रति — ञ.
[4] पा. सू. ३. १. २७.
[5] पा. सू. ६. १. १९३.
[6] पा. सू. १. १. ६६.
[7] चकारो नास्ति — ट.
[8] पा. सू. ६. १. १५८.
[9] पा. सू. ८. २. ७७.
[10] भवतीति भावः — च, छ.
[11] प्रत्यलोपस्य — अ.
[12] स्थानिवद्भावानिषेधे — अ.
[13] पा. सू. ६. ४. ६४.
[14] पा. सू. ३. १. २७.
[15] पा. सू. ६. ४. २२.
[16] पा. सू. ४. १. ८५.

भाष्ये **कण्डूयेति**। अप्रत्ययेन क्तिनो बाधात्। भाष्ये **क्तिच्** [1]'क्तिच्क्तौ च संज्ञायाम्' इत्यनेन। **कण्डूतिशब्दस्येति**। विशेषणत्वादिति भावः। **आकर्षिक इति**। मत्वर्थीयठनन्तत्वेऽस्योदाहरणत्वं न भवति, अत आह — **चरत्यर्थ इति**। **चिकीर्षक इति**। 'चिकीर्षकः, जिहीर्षकः' इत्यत्र ण्वुल्। अत्र [2]'लिति' इत्यनेन लिति प्रत्यये प्रत्ययात् पूर्वमुदात्तं स्यादित्युदात्तत्वं स्थानिवत्त्वनिषेधं विना न सिध्यतीत्याह — **यस्येति**। अतो लोपस्येत्यपि बोध्यम्। **ककारेति**। हकार[3]ककारेकारयोरपीति ज्ञेयम्। **स्वरः उदात्तत्वम्**। नन्वव्यवहितपूर्वासंभवाद्व्यवहितेऽपि स्यात्, अत आह — **कारक इति**। तत्रापि रेफेण व्यवधानमाशङ्क्याह — **स्वरविधाविति**। [4]**अत्र** आकर्षिक इत्यादौ। ननु [5]'लिति' इत्यत्र पूर्वमित्यनुवर्तनेन [6]'तस्मिन्' इति परिभाषानुपस्थानात् तदङ्गनिर्दिष्टग्रहणस्याप्यनुपस्थितेर्व्यवहितेऽपि पूर्वशब्दप्रयोगात् [7]'स्वरः सेत्स्यति, अत आह — **यत्र त्विति**। **नैवेति**। मुख्यसंभवे गौणाग्रहणादित्यर्थः। स्थानिवद्भावेऽपि स्वरसिद्धिं शङ्कते — **ष्ठल इति**। **आकारस्य** आकर्षिक इत्याकारस्य। **पक्ष इति**। एकस्मिन् पदे सकृत्प्रवृत्तस्य [8]'लिति' इत्यस्य वर्णद्वये युगपदव्यापारात् पर्यायेण द्वयोः स्वरः स्यादित्यर्थः। **एष्टव्य इति**। तथा च स्वरविधौ व्यञ्जनस्याविद्यमानतयानन्तर[9]पूर्वसंभवाद् व्यवहिताकारस्य न स्वर इत्यर्थः। भाष्ये **पञ्चारत्न्य इति**। यणः स्थानिवत्त्वादिगन्ते परतः पूर्वपदप्रकृतिस्वरः सिध्यतीत्यर्थः। [10]**अत्रेति**। नकारान्तत्वेन रेफान्तत्वाभावादित्यर्थः। **न प्रवर्तत इति**। तथा च [11]'हलि च' इति दीर्घः स्यादेवेत्यर्थः। भाष्ये **गिर्योरिति**। यणः स्थानिवत्त्वात् [12]'हलि च' इति दीर्घो न भवतीत्यर्थः। **वाग्वोरिति**। यणः स्थानिवत्त्वाद्वलि लोपो न भवति। सूत्रान्तरे विद्यमानत्वरूपं प्रकृतत्वं न संभवति, अत आह — **प्रस्तुत इति**। 'आनुपूर्व्येण' इति शङ्कातात्पर्यमाह — **तत्रेति**। 'न चैतानि' इति भाष्यमुपलक्षणमित्याह — **इह त्विति**। **द्विधेति**। प्रथमान्तत्वेन सप्तम्यन्तत्वेन चेत्यर्थः। **विक्षिप्ताः** आनन्तर्येणासंनिविष्टाः। 'इह तु' इत्युक्तदोषान् परिहरति — [13]**लोपाजादेश इति**। आवृत्तस्य प्रथमान्ततया आदेशविशेषणत्वमित्यर्थः। स्वरादीनां समुच्चयं परिशेषात् साधयति — [14]**तत्रेति**। संभवव्यभिचाराभ्यां विशेषणत्वं न त्वेकरूपवैकल्येऽपीत्यन्यत्राप्रसक्तिमाह — [15]**द्विर्वचनेति**। 'कानि सन्ति' इत्यत्र संभवः, 'कानि यन्ति' इत्यत्र व्यभिचारः। तथा च लोपस्य विशेषणत्वसंभवात् [16]'इणो यण्' इति यणः स्थानिवत्त्वात् 'कानि यन्ति' इत्यत्र यण् स्यादित्यर्थः। **योगेति**। अत एव भाष्ये 'विधिग्रहणमनुवर्तते' इत्युक्तम्। 'पदान्त' इति च लुप्तषष्ठीकम्, तथा च पदान्तविधौ न स्थानिवदिति योगे लोपो न विशेषणमित्यर्थः। योगविभागादौ मानमाह — **स्मृतीति**। प्रयोगमूलत्वाल्ल-

---

[1] पा. सू. ३. ३. १७४.
[2] पा. सू. ६. १. १९३.
[3] ककाराकारयोरपीति — अ; ककारयोरपीति — म, ऋ.
[4] प्रदीपे 'अन्यव्यवधाने न स्यात्' इत्यस्य स्थाने 'अत्र व्यवधाने न स्यात्' इति पाठान्तरं नागेशेन प्रादर्शि। सोऽन्नंभट्टस्वीकृतः स्यादिति भाति।
[5] पा. सू. ६. १. १९३.
[6] पा. सू. १. १. ६६.
[7] स्वरः स्यादत आह — अ.
[8] पा. सू. ६. १. १९३.
[9] पूर्वासंभवात् — म.
[10] 'अत्रेति' इत्यादि 'रेफान्तत्वाभावादित्यर्थः' इत्यन्तं नास्ति — इ.
[11] पा. सू. ८. २. ७७.
[12] पा. सू. ८. २. ७७.
[13] लोपादेश इति — अ, इ.
[14] अत्रेति — ऋ.
[15] द्विर्वचने चेति — अ.
[16] पा. सू. ६. ४. ८१.

क्ष्यानुरोधेनैतावन्तोऽर्था विवक्षिता इत्यर्थः। **ग्रहणकेति**। अनेकार्थसूचकसूत्रादित्यर्थः। भाष्ये **उदहारि** उदकाहर्त्रीति भगिनीविशेषणम्। **साचीनं** तिर्यग्गच्छन्तम्। अत्र व्युत्क्रमेणान्वये हेतुमाह — **पाठेति**॥

[१, ४५१–४५४]

(**रत्नप्रकाशः**) 'वरेयलोप' इत्यत्र वरेग्रहणेन यलोपो विशेषित इति मन्यमानः शङ्कते — **वर इति**। **यायावर इति**। यातेर्यङन्तात् [१]'यश्च यङः' इति वरच्यल्लोपे सति तस्य स्थानिवत्त्वेन यलोपेऽप्राप्ते तत्र स्थानिवत्त्वनिषेधार्थं वरेयलोपग्रहणं कृतमिति [२]'आतो लोप इटि च' इत्यालोपे कर्तव्येऽल्लोपः स्थानिवत् स्यादेवेति दोष इति भावः। वरेग्रहणस्य यलोपविशेषणत्वमभ्युपगम्याप्युक्तदोषः परिहर्तुं शक्यत इत्याह — **नैष दोष** [६] **इति**। सिद्धान्त्याह — **अथवेति**। **योगविभाग इति**। योगावयवे योगशब्द औपचारिकः। **वरे लुप्तं न स्थानिवदिति**। तथा चालोपेऽपि कर्तव्येऽल्लोपो न स्थानिवदिति भावः। **कण्डूयतेरिति**। क्यजन्तादिति भावः। 'यगन्तेभ्यः कण्ड्वादिप्रकृतिभ्यः क्विब्न' इति [३]'कण्ड्वादिभ्यो यक्' इति सूत्रे भगवतैवोक्तत्वात्। **क्वौ लुप्तं न स्थानिवदिति**। तद्वचनस्य व्यापकत्वात् तेन सिद्धत्वकथनं न दुष्यति। विचि तु यलोपस्योदाहरणमिदमपि भवत्येवेत्यन्यदेतत्। **सौरीति**। सूर्यशब्दात् [४]'तस्येदम्' इत्यणि ततो ङीपि [५]'यस्य' इत्यकारयोर्लोपे सति [६]'सूर्यतिष्य' इति यलोपे कर्तव्येऽणो लोपो न स्थानिवदिति भावः। एतेन 'स्थानिवत्त्वनिषेधे द्वितीयलोपस्य समानाश्रयत्वादसिद्धत्वादणि लोपस्य व्याश्रयत्वात् सिद्धत्वाद्यकारस्योपधात्वाल्लोपः सिद्धः' इति कैयटो निरस्तः। 'सूरी कुन्ती' इत्यत्र सूर्यशब्दोपधायकारलोपविधानसामर्थ्यात् सूर्यशब्दाकारलोपस्य स्थानिवत्त्वस्यावश्याश्रयणीयत्वेन तत्र यलोपे स्थानिवत्त्वं [न] निषेधनीयमित्यस्यापि 'नैतदस्ति, उपधात्वविधिं प्रति न स्थानिवत्' इति वदता भगवतोक्तप्रायत्वाच्च। 'उपधात्वविधिं प्रति' इति प्रत्ययविधिविषयतया भगवता व्यवस्थापयिष्यत इति मदुक्ताभिप्रायकतैव तस्य भाष्यस्योचिता। **आदित्य इति**। अदितिर्देवतास्य आदित्यः पुरोडाशः, तस्यायं खण्ड आदित्यः। दित्यादिसूत्रेणोभयत्र ण्यः। तत्र पूर्वण्यस्यातो लोपस्य स्थानिवत्त्वे तद्यकारस्य [७]'हलो यमां यमि' इति लोपो न प्राप्तः, तन्निषेधे सति भवतीति भावः। **पूर्वत्रासिद्ध इति**। वक्ष्यमाणस्य तस्य वचनस्यावश्यकत्वादिति भावः। **इति भवितव्यमिति**। [८]'अ प्रत्ययात्' इति क्तिनपवादतयाकारविधानादिति भावः। **कण्डूयतेः क्तिजिति**। [९]'क्तिच्क्तौ च संज्ञायाम्' इत्यनेनात्र क्तिच्। **ब्राह्मणकण्डूतिरिति**। रोगविशेषस्य संज्ञेयम्, अश्वकर्णादिवत् षष्ठीतत्पुरुषः। यत्तु कैयटेनोक्तम् 'कर्मधारये कण्डूतिशब्दस्य पूर्वनिपातप्रसङ्गः' इति। तन्न, तत्र ब्राह्मणशब्दस्यैव विशेषणतौचित्येन पूर्वनिपातसंभवात्। अवयवार्थशून्यसमासे यथाकथंचित् समासस्योपपादनीयत्वेन तत्रावयवार्थप्रयुक्तदोषानवकाशाच्च। **आर्कषिक इति**। चरत्यर्थे [१०]'आकर्षात् ष्ठल्'। [११]'यस्य' इति लोपः। तस्य स्थानिवत्त्वनिषेधे

---

[१] पा. सू. ३. २. १७६.
[२] पा. सू. ६. ४. ६४.
[३] पा. सू. ३. १. २७.
[४] पा. सू. ४. ३. १२०.
[५] पा. सू. ६. ४. १४८.
[६] पा. सू. ६. ४. १४९.
[७] पा. सू. ८. ४. ६४.
[८] पा. सू. ३. ३. १०२.
[९] पा. सू. ३. ३. १७४.
[१०] पा. सू. ४. ४. ९.
[११] पा. सू. ६. ४. १४८.

[1]'लिति' इति ष्ठलः पूर्वस्य ककाराकारस्योदात्तत्वं सिध्यति। ननु ष्ठलो लित्करणसामर्थ्यादत्र स्थानिवद्भावो न भविष्यतीत्यस्वरसादाह — **चिकीर्षक इति**। 'कारकः' इत्यादौ ण्वुलो लित्त्वं चरितार्थम्। एतेन 'ष्ठलो लित्करणाद्व्यवधानेऽपि भविष्यतीति चेत्, आकारस्यापि पक्षे स्यादिति स्थानिवत्त्वनिषेधः कर्तव्यः' इति कैयटो निरस्तः। ष्ठलो लित्करणात् स्थानिवत्त्वनिषेधस्यैव कल्पनात्। **पञ्चारत्न्य इति**। व्याख्यातं पूर्वसूत्रे। **प्रतिदीव्नेति**। अल्लोपस्य स्थानिवत्त्व-निषेधात् [2]'हलि च' इति दीर्घः। [3]'न भकुर्छुराम्' इति निषेधोऽत्र न भवति, वकारान्तस्य धातोर्भत्वाभावात्। **ब्राह्मणकण्डूतिरिति**। अत्रेदमवधेयम्। वर्णाश्रयतया यलोपस्यान्तरङ्गत्वेन तस्मिन् कर्तव्येऽल्लोपस्य बहिरङ्गस्यासिद्धत्वात् कथं यलोपः स्यात्, अतो यत्र [4]'अचः परस्मिन्' इति स्थानिवत्त्वस्य बहिरङ्गपरिभाषायाश्च समानविषयता तत्रोभयोः सहैव प्रवृत्तिः सहैव निवृत्ति-रिति यलोपे स्थानिवत्त्वनिषेधसामर्थ्याज्ज्ञायते। अन्यथा यलोपे स्थानिवत्त्वनिषेधोऽनर्थकः स्यात्। नन्वेवं सति वरेग्रहणमनर्थकं स्यात्, [5]'नाजानन्तर्ये' इति [6]निषेधेन बहिरङ्गपरिभाषानिषेधेन स्थानि-वत्त्वस्यापि निषेधादिति चेन्न, [7]'नाजानन्तर्ये' इति निषेधस्यानित्यताज्ञापनेन तस्य चारितार्थ्यात्। तज्ज्ञापनफलं तु [8]'विप्रतिषेधे परं कार्यम्' इति सूत्रगतस्य [9]'अन्तरङ्गं च' इति वार्तिकस्य भाष्य-कृत्कृतप्रत्याख्यानस्योपपत्तिः। [10]'व्याख्यानतो विशेषप्रतिपत्तिः' इत्याश्रित्य प्रौढया वार्तिकं निरा-करोति — **न वक्तव्यमिति**। **इह** 'न पदान्त' इति प्रकृतसूत्रे। [11]**प्रकृतः** निर्दिष्टः। **आदेशोऽ-पीति**। स्थानिवत्सूत्रादनुवर्तत इति भावः। **विधिग्रहणमपीति**। पूर्वसूत्राद् द्वितीयमनुवर्तत इति भावः। शङ्कतेऽन्यः — **आनुपूर्व्येणेति**। **अनानुपूर्व्येणापीति**। इदमपि प्रौढयेति ज्ञेयम्। आनुपूर्व्येणार्थान्तरबोधनेनोपक्षीणानां पदानां मध्ये विशकलिततया कानिचित् पदानि योजयित्वा-र्थान्तरकल्पनाया अनौचित्यात्। दृष्टान्तवाक्येऽर्थान्तर [पर] त्वाभावेन कथंचिदेकार्थबोधनसंभवेऽपि प्रकृते तदसंभवाच्च॥

[१, ४५१–४५४]

(नारायणीयम्) पूर्वापरविरोधं परिहरति — **क्यजन्तादिति**। ननु यान्तस्य श्रूयमाणस्या-जादेशे स्थानिवद्भावो योपधात्वसंपादक एव, अत आह — **एक इति**। ननु यथैवाजादेशद्वयस्य स्थानिवद्भावो योपधात्वविघातकस्तथा तन्निषेधोऽपि, अत आह — **स्थानिवत्त्वेति**। प्राथमिक-स्यापत्यत्वे सत्यपि स्थानिवत्त्वे [12]'आपत्यस्य' इति यलोपः सिद्धः। अतस्तस्यानापत्यत्वं प्रदर्श्यते — **अदितेरिति**। **कर्मधारय इति**। संज्ञाविशेषणत्वं मन्यते। ठक् चेत् किदन्तोदात्तत्वेन भाव्यमिति न पूर्वविधिः। ठञ्ठनोरपि ञ्निदाद्युदात्तत्वे सत्यपि स्थानिवत्त्वे दोषाभावः, अत आह — **चरतीति**। वचनाद् व्यवहितेऽपि विधानमाशङ्क्य निरस्यति — **कारक इति**। ननु पूर्व-शब्दस्येह साक्षादुपादानान्निर्दिष्टपरिभाषा नास्तीति लोकवद्व्यवहितपूर्वग्रहणं भविष्यति, अत आह

---

[1] पा. सू. ६. १. १९३.
[2] पा. सू. ८. २. ७७.
[3] पा. सू. ८. २. ७९.
[4] पा. सू. १. १. ५७.
[5] परिभाषा ५१.
[6] 'निषेधेन' इत्यधिकं भाति।
[7] परिभाषा ५१.
[8] पा. सू. १. ४. २.
[9] का. वा. १. ४. २–८.
[10] परिभाषा १.
[11] प्रकृतं निर्दिष्टम् — ब.
[12] पा. सू. ६. ४. १५१.

— **यत्र त्विति**। गौणं [1]तस्य ग्रहणमित्यर्थः। नन्वाकाङ्क्षायत्तत्वादन्वयस्यानुपूर्वी क्वोपयुज्यते, अत आह — **तत्रेति**। आसत्तिरप्यन्वयावबोधहेतुरित्यर्थः। [2]इहान्वयानवगमे कारणान्तरमाह — **इह त्विति**। कारणान्तरं निराकरोति — **लोपेति**। द्विरावृत्त्याजादेशविशेषणत्वेऽपि विशिष्टजादेशस्य त्रिषु [न] स्थानिवद्भावः, इतरत्र त्वजादेशमात्रस्येत्येषा व्यवस्था कथमित्यत आह — **तत्रेति**। योगविभागादौ किं प्रमाणमित्यत आह — **स्मृतीति**। प्रयोगमूलत्वादस्याः स्मृतेः प्रयोग एव प्रमाणमित्यर्थः। कथं पुनरेकस्माद्वाक्याद्विषयभेदेन विलक्षणार्थावसायः, तत्राह — **ग्रहणकेति**। लोकेऽपि [3]कथमसंनिहितानामन्वयावगतिरित्यार्थसंनिधानमाह — **पाठेति**॥

[१, ४५५–४६१]

(**लघुविवरणम्**) 'अकृत्वा' इति भाष्यमनुपपन्नम्, परत्वाद् वृद्धिप्रसङ्गात्, अत आह — **ण्यल्लोपाविति**। ननु वृद्धौ कृतायां प्रत्ययलक्षणेनावादेशः स्यादित्यत आह — **आवादेश इति**। नन्वन्तरङ्गत्वात् पूर्वं वृद्धिरावादेशश्च प्राप्नोतीत्यत आह — **एतच्चेति**। **दयूरिति**। दिवेर्णिचि क्विपि णिलोपे स्थानिवत्त्वनिषेधाद्ढ्यादेशे च रूपम्। **ङीषन्ताभ्यामिति**। गौरादित्वादिति भावः। ननु न स्त्रीप्रत्ययलुक् परनिमित्तकः, तद्धितलुकोऽभावरूपत्वेन [4]परत्वासंभवादित्यत आह — **तद्धितस्येति**। ननूत्तरपदे परतो विधीयमानः पुंवद्भावः कथमनुत्तरपदे [5]परतः स्यादित्यत आह — **भस्येति**। नन्वेवमपि भाषितपुंस्कत्वाभावाद् बिम्बबदरशब्दयोः कथं पुंवद्भावः स्यादित्यत आह — [6]**अत्र चेति**। पूर्वोदाहरणाभ्यां विशेषमाह — **वृद्धत्वादिति**। [7]"नित्यं वृद्ध' इत्यनेन। यौगिकत्वे प्रकृत्यन्तरत्वमसिद्धमित्यत आह — **बिम्बेति**। ननु वर्णाश्रय इत्यनुपपन्नम्, "सिद्धश्च प्रत्ययविधौ' इत्यनेन प्रत्यये विधातव्ये पुंवद्भावस्य प्रागेव निष्पन्नत्वप्रतिपादनादित्यत आह — **यद्यपीति**। **ऐकार इति**। [8]'वृषाकप्यग्नि' इत्यनेन विहितः। नन्वत्रापि [9]"भस्याढे तद्धिते' इति पुंवद्भावो भविष्यतीत्यत आह — **समानायामिति**। इन्द्रादयः शब्दा इन्द्रत्वादिरूपे प्रवृत्तिनिमित्ते पुँल्लिङ्गाः, पुंयोगे तु स्त्रीलिङ्गा इति समानाथामाकृतौ [11]भाषितपुंस्कत्वाभावः। [12]'भस्याढे' इत्यत्र भाषितपुंस्कादित्यस्यासंबन्ध इत्यत आह — **वर्णाश्रयत्वादिति**। **पूर्वेणैवेति**। [13]'एकाचो बशः' इत्यनेन। भाष्ये संयोगान्तलोपप्रभृतयः कस्मान्नोदाहृता इत्यत आह — **संयोगान्तलोपादय इति**। स्वयमुदाहरति — **स्कन्दयतेरिति**। काष्ठतगित्यनुपपन्नम्, संयोगान्तलोपं बाधित्वा संयोगादिलोपप्रसङ्गादित्यत आह — **संयोगादिति**। ननु 'पूर्वत्रासिद्धे न स्थानिवत्' इत्याश्रयणे किर्योरित्यत्र स्थानिवत्त्वनिषेधात् [14]'हलि च' इति दीर्घः प्राप्नोतीत्यत आह — **उणादीनामिति**। [15]ननु भवतु स्थानिवत्त्वनिषेधः, तथापि माषशब्दस्य वपनीशब्देन समासे समासान्तो नकारो न

---

[1] तस्याग्रहणमित्यर्थः — ग.
[2] इहान्वयावगमे — ग.
[3] कथं संनिहितानाम् — ग.
[4] परत्वाभावादित्यत आह — ड.
[5] 'परतः' इति नास्ति — ड, ढ.
[6] तत्रेति — ड, ढ.
[7] पा. सू. ४. ३. १४४.
[8] का. वा. ६. ४. ११४–२.
[9] पा. सू. ४. १. ३७.
[10] का. वा. ६. ३. ३५–११.
[11] भाषितपुंस्कत्वाभावात् — ण.
[12] का. वा. ६. ३. ३५— ११.
[13] पा. सू. ८. २. ३७.
[14] पा. सू. ८. २. ७७.
[15] ननु यद्यपि स्थानिवत्त्व — ड, ढ.

भवतीति णत्वं न भविष्यतीत्यत आह — **समासान्तस्येति**। **ङीबुत्पत्तेः प्रागिति**। "गतिकारकोपपदानाम्' इति वचनात्॥

[१, ४५५–४६१]

(विवरणम्) 'क्विलुक्' इति वार्तिके द्वन्द्वान्ते श्रूयमाणा सप्तमी प्रत्येकमभिसंबध्यते। तत्र क्वाविति निमित्तसप्तमी विधावित्यनेन संबध्यते। तथा च [1]क्विनिमित्ते विधौ न स्थानिवदित्यर्थः। **लुकि** लुक्संज्ञकेऽदर्शने स्थानिवद्भावो नेत्यर्थः। **उपधात्वशब्देनोपधात्वनिबन्धनं** कार्यं लक्ष्यते। तथा च तस्मिन् कर्तव्ये [3]चङ्परनिह्रसि च विधेये न स्थानिवदिति वार्तिकार्थः। पिपठिषतेः क्वि-प्रत्यये यद्यतो लोपः स्थानिवत् स्यात् ततो [4]रेफान्तस्यापदत्वात् दीर्घो न स्यादिति [5]चोद्यम्। **ऊण् न स्यादिति**। क्वौ वकारान्तस्थानङ्गत्वादित्यर्थः। ऊठि च [6]'एत्येधत्यूठ्सु' इति वृद्धिः। ननु णिलोपानन्तरं वृद्धौ यद्यप्यादिष्टादचः पूर्वत्वादौकारस्यावादेशो णिलोपस्य स्थानिवद्भावान्नास्ति, प्रत्ययलक्षणेन तु प्राप्नोति। न च तस्मिन् सत्यपि पुनरूठ्वृद्धिभ्यां लौरिति भविष्यतीति वाच्यम्, पुनरपि प्रत्ययलक्षणेनावादेशप्रसक्तावनवस्थाप्रसङ्गादित्यत आह — **आवादेश इति**। [7]**तत्र त्विति**। नायं वाचनिको विप्रतिषेधः, किं तु परशब्दस्येष्टवाचित्वलभ्य एवोक्त इति भावः। क्वौ लुप्तस्य स्थानिवद्भावप्रतिषेधं प्रत्यस्यासंभवान्नैतदुदाहरणमित्याह — **क्वाविति**। सति सप्तम्या अजादेश इत्यनेन संबन्धे क्विनिमित्तस्य लोपव्यतिरिक्तस्याजादेशस्यासंभवात् 'क्वौ लुप्तं न स्थानिवत्' इत्यस्योद्भव इति द्रष्टव्यम्। **दयूरिति**। दिवेर्णिचि क्विपि तस्य लोपे ऊठि [8]'स्थानिवद्भावनिषेधाल्लघूपधगुणस्यायादेशे च रूपम्। **ङीषन्ताभ्यामिति**। गौरादित्वादिति शेषः। **अन्यथेति**। भावाभावरूपत्वादिति भावः। **तदाश्रय इति**। वृक्षजातौ स्त्रीलिङ्गत्वात् फले **च** नपुंसकलिङ्गत्वादिति भावः। **किं तर्हीति**। [9]'यौगिकत्वे हि वृक्षसंबन्धात् फले [10]वर्तन्ते न पुनः फलसंबन्धाद्वृक्ष इति विनिगमनासंभवादिति भावः। **अन्तरङ्गानिति**। [11]'प्रत्ययोत्तरपदयोश्च' इति न [12]'सुपो धातुप्रातिपदिक'लुग्विषयमेवेति भावः। **अव्यविकेति**। [13]'वोतो गुणवचनात्' इति [14]ङीपो विकल्पितत्वादिति भावः। ननु [15]न भसंज्ञकस्य पुंवद्भावो विधीयते, येन वर्णाश्रयत्वात् प्रत्ययलक्षणेन भसंज्ञाभावादिह त्वनेन पुंवद्भावो न स्यात्। [16]'सिद्धश्च प्रत्ययविधौ' इत्यनेन [17]'अढे तद्धिते' इत्यस्य विषयसप्तमीत्वप्रतिपादनादित्यत आह — **यद्यपीति**। **भत्वाभावात्** भाविभत्वाभावादित्यर्थः। नन्वानुक् न ङीष्युच्यते, येन [18]स्थानिवद्भावेनानुगापाद्येतेत्यत उक्तम्

---

[1] परिभाषा ७६.
[2] क्विब्निमित्ते — च.
[3] चङ्परह्रस्वे विधेये — च.
[4] रेफस्यापदान्तत्वात् — च.
[5] बोध्यम् — छ.
[6] पा. सू. ६. १. ८९.
[7] यत्र त्विति — च, छ, ञ, ट.
[8] स्थानिवद्भावनिषेधादूठीत्यन्वयः।
[9] यौगिकत्वेऽपि वृक्ष — च, छ; यौगिके हि वृक्ष — ञ.
[10] वर्तते — च.
[11] पा. सू. ७. २. ९८.
[12] पा. सू. २. ४. ७१.
[13] पा. सू. ४. १. ४४.
[14] 'गुणवचनान्ङीबाद्युदात्तार्थः' इति वार्तिकरीत्यात्र ङीप इत्युक्तिरिति बोध्यम्।
[15] 'न' इति नास्ति — च, छ, ट.
[16] का. वा. ६. ४. ११४–२.
[17] का. वा. ६. ३. ३५–११.
[18] स्थानिवद्भावेनानुगपोद्येतेत्यतः — ञ.

— **ङीष्संनियुक्त इति**। **ऐकारः** [1]'वृषाकप्यग्नि' इत्यनेन विहितः। नन्वत्रापि [2]'भस्याढे' इति पुंवद्भावेन सिध्यतीत्यत आह — **समानायामिति**। इन्द्रादयः शब्दा इन्द्रत्वादयैः प्रवृत्तिनिमित्तैः पुँल्लिङ्गाः, पुंयोगे तु स्त्रीलिङ्गा इति [3]नैकस्मिन् प्रवृत्तिनिमित्ते भाषितपुंस्कत्वमित्यर्थः। ननु वर्णोपसर्जनप्रत्ययाश्रयत्वेन केवलवर्णाश्रयत्वाभावात् स्यात् प्रत्ययलक्षणमिति चेन्न, तथापि समानायामाकृतौ भाषितपुंस्कत्वाभावान्नास्ति पुंवद्भाव इति स्थानिवद्भावेनानुक् श्रूयेत। नन्वनुपसर्जनाधिकारादुपसर्जनान्नानुग् भविष्यतीत्याशङ्क्य दोषान्तरमाह — **अथवेति**। भाष्ये **नैतद् घञन्तमिति**। [4]'एरच्' इत्यचः प्रसङ्गादित्यर्थः। **पूर्वेणैवेति**। [5]'एकाचो बशः' इत्यनेन। ननु भाष्ये कस्मात् संयोगान्तलोप उपेक्षितः, कस्माच्च पदान्ते नोदाहृता ढत्वादय इत्यत आह — **संयोगेति**। स्वयमुदाहरति — **स्कन्दयतेरिति**। ननु यदि 'पूर्वत्रासिद्धे न स्थानिवत्' इत्युच्यते तर्हि किर्योरित्यत्र [6]'हलि च' इति दीर्घः स्यादित्यत आह — **उणादीनामिति**। ननु स्थानिवत्त्वनिषेधेऽपि माषशब्दस्य वपनीशब्देन समासे प्रातिपदिकान्तत्वेऽप्युत्तरपदान्तत्वाभावाण्णत्वं न स्यादित्यत आह — **ङीबिति**। [7]'गतिकारकोपपदानां कृद्भिः' इति वचनादिति भावः॥

[१, ४५५–४६१]

(उद्द्योतनम्) लुकि न स्थानिवत्, उपधात्वाश्रितकार्ये न स्थानिवत्, चङपरह्रस्वत्वे [8]'कार्ये न स्थानिवत्, इति वार्तिकार्थः। पिपठिषतेः क्विप्यतो लोपस्य स्थानिवत्त्वे रेफान्तस्यापदत्वाद् दीर्घो न स्यादिति 'पिपठिषतेः' इति भाष्यार्थः। **ऊण् न स्यादिति**। क्वौ परतो वकारान्तस्यानङ्त्वादित्यर्थः। 'लावि' इत्यत्र णिलोपे वकारस्योठि [9]'एत्येधत्यूठ्सु' इति वृद्ध्या 'लौः' इति। [10]णिलोपस्य पूर्वत्वे वार्तिकमाह — **ण्यल्लोपाविति**। **गोहितमिति**। गवे हितमिति [11]'सुपो धातु' इति [12]ङेर्लोपे प्रत्ययलक्षणेनादेशो न भवतीत्यर्थः। **एतच्च** पूर्वविप्रतिषिद्धत्वम्। **अन्तरङ्गत्वं** वृद्धेरित्यादिः। [13]ण्याश्रिता वृद्धिरन्तरङ्गा, क्विबाश्रितो णिलोपो बहिरङ्गः। **तत्र** [14]अन्तरङ्गत्वे। **विप्रतिषेधेति**। तुल्यबलत्वाभावात्। तथा च तस्मिन्नाश्रिते 'लौः' इत्यप्युदाहरणमिति भावः। लवशब्दाण्णिच्, क्विप्। अतो लोपे णिलोपे वस्योठि वृद्धिः, लौः। **प्रदर्शनाय** 'क्वौ विधि प्रति न स्थानिवत्' इत्यस्यावश्यकत्वाय। क्वौ लुप्तस्य स्वयमुदाहरणमाह — **दयूरिति**। [15]दिवेर्णिच्, उपधागुणः, क्विप्, णिलोपः, ऊठ्यादेशः। अत्र णिलोपस्य [16]स्थानिवत्त्वनिषेधेनैव रूपसिद्धेः क्वौ लुप्तोदाहरणत्वम्। **ङीषन्ताभ्यामिति**। गौरादित्वान्ङीष्। **अनुदात्तेति**। प्रत्ययस्वरेणान्तोदात्तत्वे शेष[17]निघातेनानुदात्तादित्वम्। ननु लुकोऽभावस्य परत्वासंभवेन परनिमित्तत्वाभावादेव स्थानिवत्त्वाभावात् किं तन्निषेधेन, अत आह — **तद्धितस्येति**। **अन्यथा** गौण-

---

[1] पा. सू. ४. १. ३७.
[2] का. वा. ६. ३. ३५–११.
[3] नैतस्मिन् — च, छ.
[4] पा. सू. ३. ३. ५६.
[5] पा. सू. ८. २. ३७.
[6] पा. सू. ८. २. ७७.
[7] परिभाषा ७६.
[8] 'कार्ये' इति नास्ति — म.
[9] पा. सू. ६. १. ८९.
[10] णिलोपपूर्वत्वे — अ, इ, ऋ.
[11] पा. सू. २. ४. ७१.
[12] ङिलोपे — अ.
[13] यणाश्रिता — म.
[14] बहिरङ्गत्वे — अ.
[15] दिवेर्णिच्युपधागुणः क्विपि णिलोपः — अ.
[16] स्थानिवत्त्वेनैव — ऋ.
[17] निघातेनानुदात्तत्वम् — अ, म, ऋ.

परत्वानङ्गीकारे। बौद्धं परत्वमभावस्य साक्षात् संभवतीत्याह — **अथवेति**। प्रतियोगिद्वारा अभावेऽपि परत्वबुद्धिः संभवतीत्यर्थः। यद्यपि ङीष्यन्तरङ्गतया [1]'यस्य' इति लोपे ङीषो लुक्यकारश्रवणं दुर्लभम्, तथापि [2]'निमित्ताभावे नैमित्तिकस्याप्यभावः' इति ङीषो लुक्यकारस्तिष्ठति। [3]तस्य लुकः स्थानिवद्भावेन लोपनिरासाय तन्निषेधः। वस्तुतः [4]'अन्तरङ्गानपि' इति वक्ष्यमाणत्वादत्रापि[5] [6]'यस्य' इति लोपात् पूर्वमेव[6] लुगिति भावः। [7]**तदाश्रय इति**। वृक्षजातौ स्त्रीत्वात् फले क्लीबत्वादिति भावः। आमलकस्य बिम्बादितुल्यतां वारयति **वृद्धत्वादिति**। [8]**भत्वेति**। तथा च [9]'भस्याढे' इति पुंवत्त्वं न भवतीत्यर्थः। **नेति**। बिम्ब्याः फलमित्यादि[10]योगनिमित्तका न भवन्तीत्यर्थः। फलविशेषजातौ रूढा इत्याह — **किं तर्हीति**। यौगिकत्वे वृक्षसंबन्धात् फले वर्तते फलसंबन्धाद्वा वृक्ष इति विनिगमकाभाव इति भावः। अन्तरङ्गतया पूर्वमेव यण् स्यादिति स्थानिवत्त्वनिषेधो व्यर्थः, अत आह — **अन्तरङ्गानपीति**। **अव्यविकेति**। यथा अवेरिदमाविकमित्यन्यस्य[11] विग्रहः, अन्यस्मात् प्रत्ययः, तथा पञ्चभिः पट्वीभिः क्रीत इति विग्रहः, पञ्चपटुशब्दात् प्रत्ययः, [12]'वोतो गुणवचनात्' इति [13]ङीषो विकल्पितत्वात्। तथा च स्थानिवत्त्वनिषेधानुपयोग इत्यर्थः। ननु न भसंज्ञकस्य पुंवद्भावो विधीयते, येन वर्णाश्रयत्वेन प्रत्ययलक्षणेन भत्वाभावात् पुंवद्भावो न स्यात्। किं तु [14]'सिद्धश्च प्रत्ययविधौ' इत्यनेन [15]'अढे तद्धिते' इत्यस्य विषयसप्तमीत्वप्रतिपादनात्, अत आह — **यद्यपीति**। [16]'इद्दरिद्रस्य' इति सूत्रे [17]'दरिद्रातेरार्धधातुके आलोपः' [18]'सिद्धश्च प्रत्ययविधौ' इति वक्ष्यते। तत्र 'आर्धधातुके' इति विषयसप्तमी [19]न परसप्तमीति [20]'सिद्धश्च' इत्यनेनोक्तम्। एवं चात्र **सिद्धश्च प्रत्ययविधावित्यस्ति** स न्यायोऽत्राप्यस्ति। 'अढे' इति विषयसप्तमी, भसंज्ञा भाविन्यङ्गीक्रियत इति विवक्षितम्। **भत्वाभावात्** भाविभत्वाभावात्। [21]भसंज्ञाया यजाश्रयत्वेन वर्णाश्रयत्वं ज्ञेयम्। भत्वानाश्रयेण पुंवद्भावं शङ्कते — भाष्ये **एवं तर्हीति**। दूषयति — [22]भाष्ये **ठक्छसोरिति**। [23]'न लुमताङ्गस्य' इति यथाश्रुते प्रत्ययलक्षणेन पुंवद्भावः संभवति, अतः 'न खलु' इति भाष्यम्। **यत्र** येषु। ननु ङीषि परत आनुग् न विधीयते, येन स्थानिवद्भावेनानुगापाद्येत, अत आह — **ङीष्संनियुक्त इति**। **अग्नाय्य इति**। [24]'वृषाकपि' इत्यनेन

---

[1] पा. सू. ६. ४. १४८.
[2] परिभाषेन्दुशेखरेऽकृतव्यूहपरिभाषाविचारेऽयं न्याय उक्तः।
[3] अकारस्येत्यर्थः। लोपनिरासायेत्यनेनान्वयो बोध्यः।
[4] तत्रापि — अ.
[5] पा. सू. ६. ४. १४८.
[6] एवकारो नास्ति — अ, इ, ऋ.
[7] तदाश्रयण इति — आ, इ, ऋ.
[8] 'भत्वेति' इति नास्ति — आ, म.
[9] का. वा. ६. ३. ३५–११.
[10] योगनिमित्तको न भवतीत्यर्थः — आ, म, ऋ.
[11] आविकमित्यस्य — अ.
[12] पा. सू. ४. १. ४४.
[13] ङीपः — अ.
[14] महाभाष्यम् ४. २. ३८.
[15] का. वा. ६. ३. ३५–११.
[16] पा. सू. ६. ४. ११४.
[17] का. वा. ६. ४. ११४–१.
[18] का. वा. ६. ४. ११४–२.
[19] 'न परसप्तमीति' इत्यादि 'अढ इति विषयसप्तमी' इत्यन्तं नास्ति — म.
[20] का. वा. ६. ४. ११४–२.
[21] 'भसंज्ञायाः' इत्यतः प्राक् 'भाष्ये' इत्यधिकम् — अ, इ, ऋ.
[22] 'भाष्ये' इति नास्ति — म, ऋ.
[23] पा. सू. १. १. ६३.
[24] पा. सू. ४. १. ३७.

27825

ङीबैकारादेशश्च। नन्वत्रापि [1]'भस्याढे पुंवत्' इत्यनेनैव सिध्यति, अत आह — **समानायामिति**। एकेन प्रवृत्तिनिमित्तेन लिङ्गद्वयवृत्तौ भाषितपुंस्कत्वम्। इन्द्रादिशब्दा इन्द्रत्वादिप्रवृत्तिनिमित्तकाः पुंल्लिङ्गाः, पुंयोगनिमित्तकाश्च स्त्रीलिङ्गा इति नैकस्मिन् प्रवृत्तिनिमित्ते भाषितपुंस्कत्वमित्यर्थः। [2]'भस्याढे' इत्यत्र भाषितपुंस्कत्वानाश्रयणेऽप्याह — **वर्णेति**। न चात्र [3]वर्णोपसर्जनप्रत्ययाश्रयत्वेन केवलवर्णाश्रयत्वाभावात् प्रत्ययलक्षणं स्यादिति वाच्यम्, यथाकथंचिद्वर्णाश्रय एव तन्निषेधात्। अत एवोक्तं भाष्ये 'वर्णाश्रये' इति। ननु स्थानिकार्यमादेशेऽतिदिश्यते। आनुगैकारयोर्न तत्कार्यत्वम्। किं [4]चानुपसर्जनाधिकारादुपसर्जनान्नानुग् भविष्यति, अत आह — **अथवेति**। लुकि स्थानिवत्त्वनिषेधे 'आदीध्ये' इत्युदाहरणं संगच्छते। अन्यथा शपा व्यवधानेन [5]'यीवर्णयोः' इति ईकारलोपाप्राप्तेः 'परस्मिन्' इत्यस्य तदुदाहरणमयुक्तं [6]स्यादित्याह — **लुकि चेति**। उपपन्नत्वमेवाह — **शब्लुकीति**। **चातुर्थिक इति**। परिखाया अदूरभवो देशः पारिखः। अकान्तादिकान्तात् खोपधाच्च वृद्धाद् भवार्थे छः स्यादिति [7]'वृद्धात्' इति सूत्रार्थः। भाष्ये **पटयतीति**। उपधात्वाश्रयविधिमात्रं प्रति [8]'स्थानिवत्त्वनिषेधे पटयतीत्यत्र टिलोपे [9]'अत उपधायाः' इति वृद्धिः स्यात्। तन्निरासाय 'प्रत्ययविधावुपधाश्रये न स्थानिवत्' इति पारिखीयार्थं वक्तव्यम्। तथा च चङ्परनिर्ह्रासे पृथङ्निषेधः कार्य इत्यर्थः। भाष्ये **अर्क इति**। घञि णिलोपस्य स्थानिवत्त्वे [10]चकारान्तमङ्गं न भवतीति [11]'चजोः' इति कुत्वं न स्यादित्यर्थः। भाष्ये [12]**नैतदिति**। एरचा बाधितत्वादित्यर्थः। भाष्ये **आष्टमिकं** [13]'चोः कुः' इति। आष्टमिकमपि कुत्वं णिलोपस्य स्थानिवत्त्वे न सिध्यतीत्युदाहरणं युक्तमित्याह — भाष्ये **एतदपीति**। आष्टमिककुत्वमपीत्यर्थः। ननु 'अदुह्वहि' इत्यत्र झल्परत्वाभावेन [14]'सलोपासंभवाल्लुगवश्यं वक्तव्य इत्युक्तत्वात् 'लुग्ग्रहणं न कर्तव्यम्' इति भाष्यं कथम्, अत आह — **अदुह्वह्यर्थमिति**। **तदर्थं** तदुपपत्त्यर्थम्। **छेदमिति**। तथा च 'न' इत्यन्तेन वार्तिकव्याख्या, 'कर्तव्यम्' इति भगवद्वचनमिति भावः। भाष्ये **आदिचतुर्थत्वे** आदिवर्णस्य चतुर्थवर्णत्वे, भष्भाव इति यावत्। 'धत्से' इत्यादौ [15]'श्नाभ्यस्तयोरातः' इत्याल्लोपस्य स्थानिवत्त्वे झषन्तत्वाभावाद् भष्भावो न स्यादिति स्थानिवत्त्वनिषेधः। ननु विधिसामर्थ्यादालोपो न स्थानिवत्, अत आह — भाष्ये **चकार इति**। तद्व्याचष्टे — **झषन्तत्वादिति**। [16]स्थानिवत्त्वनिषेधे सतीत्यादिः। **पूर्वेण** [17]'एकाचो बशः' इत्यनेन। भाष्ये **आदित्य इति**। [18]'दित्यदित्यादित्य' इति ण्ये [19]'यस्य' इति लोपस्य स्थानिवत्त्वे यलोपो न स्यादित्यर्थः। भाष्ये **पापक्तिरिति**। अत्राल्लोपस्य स्थानिवत्त्वात् कुत्वं न स्यात्। **यायष्टिरिति**। अत्र [20]'व्रश्च' इति षत्वं न स्यात्। 'पाक्तिः, याष्टिः' इत्यत्र णिलोपस्य स्थानिवत्त्वात्

---

[1] का. वा. ६. ३. ३५—११.
[2] का. वा. ६. ३. ३५-११.
[3] वर्णोपसर्जनेति बहुव्रीहिः।
[4] चानुपसर्जनाधिकारान्नानुग् — म.
[5] पा. सू. ७. ४. ५३.
[6] स्यादित्यत आह — आ.
[7] पा. सू. ४. २. १४१.
[8] स्थानिवत्त्वविधिनिषेधे — म.
[9] पा. सू. ७. २. ११६.
[10] चान्तमङ्गं — अ, इ, ऋ.
[11] पा. सू. ७. ३. ५२.
[12] न चैतदिति — अ, इ, ऋ.
[13] पा. सू. ८. २. ३०.
[14] सलोपाभावात् — आ, म.
[15] पा. सू. ६. ४. ११२.
[16] 'स्थानिवत्त्वनिषेधे सतीत्यादिः' इति नास्ति —अ.
[17] पा. सू. ८. २. ३७.
[18] पा. सू. ४. १. ८५.
[19] पा. सू. ६. ४. १४८.
[20] पा. सू. ८. २. ३६.

कुत्वषत्वे न स्याताम्। [1]क्तिजुक्तिः प्रत्ययान्तात् क्तिनोऽभावात्। ननु भाष्ये प्रतिज्ञातसंयोगान्तलोपमनुदाहृत्य कुत्वादिकं कथमुदाहृतम्, अत आह — **संयोगेति**। स्वयमुदाहरति — **स्कन्दयतेरिति**। णिलोपस्य स्थानिवत्त्वे दकारषकारयोः संयोगान्तलोपो न स्यात्। ननु 'काष्ठतक्' इत्यत्र संयोगादिलोपेन भाव्यम्, अत आह — **संयोगादीति**। पदान्तेऽप्युदाहरति — **दोहयतेरिति**। ननु यदि 'पूर्वत्रासिद्धीये न स्थानिवत्' इति, तर्हि गिर्योरित्यत्र [2]'हलि च' इति दीर्घः स्यात्, अत आह — **उणादीनामिति**। भाष्ये **तस्य दोषः** 'पूर्वत्रासिद्धीये न स्थानिवत्' इत्यस्य। तथा च तत्र स्थानिवद्भावोऽङ्गीकार्य एवेति भावः। माषा उप्यन्तेऽनया, माषान् वपतीति वा ल्युटि माषवपनी। अत्र णत्वप्रसङ्गमाह — **समासान्तस्येति**। ननु माषशब्दस्य वपनीशब्देन समासे नकारस्य समासान्तत्वाभावात् णत्वं न प्राप्नोति, अत आह — **ङीबुत्पत्तेरिति**। [3]'गतिकारकोपपदानां कृद्भिः सह समासवचनम्' इति वचनादिति भावः॥

[१, ४५५–४६१]

(**रत्नप्रकाशः**) **क्विलुगुपधेत्यादि**। [4]उपधात्वनिमित्तकप्रत्यये चङ्परणिनिमित्तह्रस्वे कुत्वे च कर्तव्ये क्वौ परे च परनिमित्तोऽजादेशो न स्थानिवत्, लुक् च परनिमित्तो न स्थानिवदिति वाच्यमित्यर्थः। **नैतदस्तीति**। असाधारणमिति भावः। एवमन्यत्रापि। **लौरिति**। [णि-] लोपस्य स्थानिवत्त्वाद्वृण् न स्यादिति भावः। ऊठं विनैव तद्रूपसिद्धिरित्याशयेनाह — [5]**नैष दोष इति**। **अकृत्वेति**। [6]'अन्तरङ्गानपि' इति न्यायेनेति भावः। न च णिलोपस्य [7]स्थानिवत्वादावादेशः स्यादिति वाच्यम्, वृद्धेरनादिष्टादचः पूर्वत्वाभावात्। एतेन [8]"'ण्यल्लोपावियङ्यण्गुणवृद्धिदीर्घेभ्यः पूर्वविप्रतिषिद्धम्' इति णिलोपः, ततो वृद्धिः। आवादेशस्तु वर्णाश्रयत्वात् प्रत्ययलक्षणेन न भवति। यथा गवे हितं गोहितमित्यवादेशः। एतच्चान्तरङ्गत्वमनाश्रित्योक्तम्" इति कैयटो निरस्तः। यत्र णिच एवेयङादिकं प्रवृत्तं तत्रैव पूर्वविप्रतिषेधेन णिलोपस्य विधानात्। पूर्वस्यालिवध्यर्थतायाः स्वयमेवोक्तत्वेन तद्विस्मरणाच्च। **लवमाचष्ट इति**। लवशब्दस्याव्युत्पन्नत्वाश्रयेण वा ज्ञापकसिद्धस्य [9]'अन्तरङ्गानपि' इति न्यायस्यानित्यत्वाश्रयेण वात्रेष्टसिद्धिः। अन्यथा लूधातोः पचाद्यच्युक्तन्यायेन गुणावादेशयोरकृतयोरेवाल्लोपे स्थानिवत्त्वनिषेधेऽपि 'लू' इति स्यात्, न तु 'लौः' इति। **क्वौ लुप्तमिति**। क्वौ परे पूर्वं यत् **लुप्तं** लोपः स इत्यर्थः। क्वौ परे भावरूपस्याजादेशस्याभावाल्लुप्तशब्दनिर्देशः। तथा चाभावस्य व्यवधायकत्वाभावेनाल्लोपोऽपि न स्थानिवदिति भावः। एवं च 'लावयतेर्लौः' इत्यप्यस्यैवोदाहरणमुचितम्। [10]णिलोपस्य क्वौ परे स्थानिवत्त्वनिषेधः क्रियते, तदाश्रितान्तरङ्गकार्यस्य पूर्वमेव कर्तुमुचितत्वात्। 'क्वौ लुप्तम्' इत्यस्य क्विनिमित्तो लोपोऽभिमत इति मन्यमानः शङ्कते — **एवमपीति**। [11]यक्षानुरूपबलिन्यायेन

---

[1] णिजिति। प्रत्ययान्तात् — म.
[2] पा. सू. ८. २. ७७.
[3] परिभाषा ७६.
[4] उपधानिमित्तक — ब.
[5] भाष्ये 'नैतदस्ति' इत्यस्य स्थाने 'नैष दोषः' इति भाष्यपाठो रत्नप्रकाशाभिमत इति भाति।
[6] 'अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते' इत्यभिप्रायेणेदम्।
[7] स्थानिवत्त्वादादेशः — ब.
[8] का. वा. ६. ४. ४८–१.
[9] अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधत इत्यस्येति भावः।
[10] यलोपस्य — ब.
[11] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.

'क्वौ' इत्यस्यार्थान्तराश्रयेण परिहरति — **नैष दोष इति**। एतेन 'क्वौ लुप्तं न स्थानिवत्, क्वौ विधिं प्रति न स्थानिवत्' इत्यर्थद्वयं भाष्यकृतोऽभिमतमिति मन्यमानः 'क्वौ विधिं प्रति न स्थानिवदित्यस्यार्थस्य प्रदर्शनायेदमुदाहृतम्। इदं तु क्वौ लुप्तस्योदाहरणं देवयतेर्दयूरिति' इति वदन् कैयटो निरस्तः। 'नैवं विज्ञायते — क्वौ लुप्तं न स्थानिवत्' इति शङ्कित्वभिमतार्थस्य भाष्यकृतैव निराकृतत्वेन पुनस्तत्पक्षस्वीकारे मानप्रयोजनयोरभावात्। मदुक्तप्रकारेणैव 'दयूः' इत्यस्यापि सिद्धत्वात्। एकस्यैकार्थाश्रयेणैवोपपत्तावनेकार्थाश्रयणायोगाच्च। एतेन 'सख्युर्गोमान् पदस्त्वं च क्वौ लुप्तस्य निदर्शनम्। अनित्यत्वे पिपठिषि क्वौ विधौ लौर्द्वयोर्दयूः।' इति [1]कौस्तुभोऽपि निरस्तः। 'पिपठिषि' इति रूपस्य विचि साधितत्वात्। क्वौ 'पिपठींषि' इति रूपस्यैव [2]'दीधीवेवीटाम्' इत्यत्रास्माभिः साधितत्वात्। 'सख्युः' इत्यादीनां 'क्वौ लुप्तम्' इत्यनेनैव मद्वर्णितार्थकेन सिद्धतया 'क्वौ विधिं प्रति' इति पक्षस्य पक्षान्तरस्य वाश्रयणे मानाभावाच्च। **बिम्बं बदरमिति**। बिम्बीबदरीशब्दाभ्याम् [3]'अनुदात्तादेश्च' इत्यञ्। तस्य फले लुक्, [4]'लुक् तद्धितलुकि' इति [5]ङीषो लुक्। तस्य स्थानिवत्त्वनिषेधात् [6]'यस्य' इति लोपो न। अभावस्यापि बुद्ध्या स्थानिदेशत्वाश्रयणात् तद्धितलुग्रूपपरनिमित्तो ङीषो लुक्। **पुंवद्भावेनापीति**। [7]'भस्याढे तद्धिते' इत्यनेन। यद्यपि भाषितपुंस्कत्वाभावात् पुंवद्भावो न भवत्येव, तथापि 'लुग्वचनानर्थक्यम्' इति वक्ष्यमाणदूषणमत्रापि लगतीति तन्नोद्भावितम्। **आमलकमिति**। वृद्धान्मयट्, तस्य फले लुगिति पुंवद्भावाप्रसक्तिरिति भावः। **प्रकृत्यन्तरत्वादिति**। बिम्बबदराऽमलकादयो न यौगिकाः, किं तु जातिविशेषयुक्तफलवाचिन इति भावः। **पञ्चभिरिति**। [8]'आर्हात्' इति ठक्। तस्य [9]'अध्यर्ध' इति लुक्। [10]'लुक् तद्धितलुकि' इति ङीषो लुक्। तस्य स्थानिवत्त्वनिषेधात् 'पञ्चपटुः' इत्यत्र यण् नेति भावः। [11]'अव्यविकन्यायस्यानभिधानमूलकस्यागतिकगतित्वात् 'पटुशब्दादेव क्रीतप्रत्ययो भवति, न तु पट्वीशब्दात्' इति नोक्तम्। एतेन 'प्रतिपत्तिगौरवात् स न्यायोऽत्र नाश्रितः' इति कैयटो निरस्तः। गत्यभावे गौरवस्याप्यवश्याश्रयणीयत्वात्। अन्यथा निर्विषयत्वापत्तेः। **न चात्र यजादिं पश्याम इति**। तथा च संज्ञानिमित्ते तद्धिते ढभिन्ने विवक्षिते क्रियमाणोऽपि पुंवद्भावो न भवति, लुकापह्नियमाणस्य भसंज्ञानिमित्तत्वाभावादिति भावः। **पञ्चेन्द्र इति**। देवताऽणः [12]'अध्यर्ध' इति लुकि [13]'लुक् तद्धितलुकि' इति ङीषो लुक्। तस्य स्थानिवत्त्वनिषेधात् [14]'यस्य' इति लोपो न भवति। **पञ्चाग्निरिति**। पञ्च अग्नाय्यो देवता अस्येत्यत्रापि प्राग्वल्लोपो नेति ज्ञेयम्। अत्र समानायामाकृतौ भाषितपुंस्कत्वाभावाल्लुग्भाविनस्तद्धितस्य भनिमित्तत्वाभावाच्च पुंवद्भावो न भवति। यत्तु कैयटेनोक्तम् 'ङीषो लुकः स्थानिवत्त्वादानुगैकारयोः श्रवणं स्यात्' इति। तन्न, [15]'संनियोगशिष्टानामन्यतराभावे उभयोरप्यभावः' इति न्यायेन ङीषा सहैव तयोरपि निवृत्तत्वात्। ङीषि परत आनुगादेरविधेयत्वेनानुगादिकं प्रति ङीष्लुकः स्थानिवत्त्वायोगाच्च। **पारिखीय इति**। परिखाया

---

[1] श. कौ. पुटम् २३९.
[2] पा. सू. १. १. ६.
[3] पा. सू. ४. ३. १४०.
[4] पा. सू. १. २. ४९.
[5] ङीपो लुक् — ब.
[6] पा. सू. ६. ४. १४८.
[7] का. वा. ६. ३. ३५ — ११.
[8] पा. सू. ६. १. १९.
[9] पा. सू. ५. १. २८.
[10] पा. सू. १. २. ४९.
[11] अयं न्यायो महाभाष्ये ४. १. ८८.
[12] पा. सू. ५. १. २८.
[13] पा. सू. १. २. ४९.
[14] पा. सू. ६. ४. १४८.
[15] परिभाषा ८७.

अदूरभावो देशः पारिखः, तत्र भव इत्यर्थः । अणि कृतस्याकारलोपस्य स्थानिवत्त्वनिषेधात् [1]'वृद्धादकेकान्तखोपधात्' इति छो भवति। **अर्क इति**। अर्च्यते पूज्यत इति चुरादिण्यन्तात् कर्मणि घञ्। णिलोपस्य स्थानिवत्त्वनिषेधात् [2]'चजोः कु घिण्ण्यतोः' इति कुत्वमिति भावः। [3]**औणादिक एष क इति**। बाहुलकात् कल्पनीय इति भावः। तथा चोपायान्तरकथनमुत्तरवार्तिकावतारिकामात्रं तदिति 'अर्कः' इति घञन्तं कुत्वोदाहरणं युक्तमित्येव ज्ञेयम्। **पूर्वत्रासिद्धे चेति**। त्रैपादिके कार्ये कर्तव्ये चेत्यर्थः। न्यायसिद्धानुवादमात्रमेतत्, [4]'पूर्वत्रासिद्धम्' इति त्रैपादिकशास्त्रस्यासिद्धत्वेनैव तस्मिन् प्रवर्तमाने स्थानिवद्भावासंभवात्। **लुग्ग्रहणं न कर्तव्यमिति**। 'वा दुह' इत्याद्येव सूत्रं पठनीयम्। 'क्सस्य' इति 'लोपः' इति चानुवर्त्य दुहादीनां क्सस्य लोपो वा स्याद्दन्त्ये तङि, इति व्याख्येयम्। [5]'झलो झलि' इत्यत्र 'व् झलि' इति झकारात् पूर्वभागे वकारः प्रश्लेष्टव्यः। तथा च 'अदुह्वहि' इत्याद्यपि सिध्यति। [6]'योगविभागादिष्टस्यैव सिद्धिः' इति न्यायेन वकारे परतः क्सस्यैव सकारस्य लोपो भवतीति स्वीकारात् 'अपक्ष्वहि' इत्यादौ सिचः सस्य लोपो न भविष्यतीति भावः। ननु वकारप्रश्लेषमात्रेण योगविभागः कथं जात इति चेत्, झलः परस्य सस्य लोपः स्याद्वकारे झलि चेति वाक्यभेदस्य वकारप्रश्लेषनिमित्तत्वाद् योगविभागे च वाक्यभेदावश्यंभावादिति गृहाण। एतेन 'अदुह्वह्यर्थं लुग्वचनं कर्तव्यमेव। तदर्थं लुग्ग्रहणं नेति छेदं कुर्वन्ति। कर्तव्यं भवतीत्युत्तरम्। अवश्यकार्यमित्यर्थः' इति कैयटो निरस्तः। तादृशासंबद्धप्रलापव्याख्यानापेक्षया 'इदं भाष्यं प्रौढिवादेन, अदुह्वह्याद्यर्थं लुग्ग्रहणस्यावश्यकत्वात्' इत्युक्तेरेव समीचीनत्वात्। मदुक्तरीत्या सम्यगुपपन्नत्वाच्च। **आदिचतुर्थत्व इति**। दधातेरादेर्दकारस्य चतुर्थत्वे, भष्भाव इति यावत्। **चकारो न कर्तव्य इति**। सकारध्वशब्दानुकर्षणार्थ इति शेषः। तयोर्हि 'दध्' इति झषन्तत्वात् [7]पूर्वसूत्र....॥

[१, ४५५–४६१]

(**नारायणीयम्**) इह स्थानिवत्त्वकृतं दोषं विशदयति — **णिलोपस्येति**। परत्वाद् वृद्धिप्राप्तिमाशङ्क्याह — **ण्यलिति**। समानाश्रयत्वे पूर्वविप्रतिषेधः, इह त्वन्तरङ्गत्वं वृद्धेरिति तया भाव्यमेव प्रथमत इति निषेधोदाहरणमिदं भवत्येवेत्याह — **एतच्चेति**। किं क्विमात्रे लुप्तस्यासंभवेनेदमुदाहृतम्, नेत्याह — **क्वाविति**। **अस्येति**। अभिमतस्य। अयं ह्यर्थो वाचनिकः। कुत्र तर्हि तत्संभवः, तत्राह — **इदं त्विति**। किमिह तद्धितलुकः[8] स्थानिवद्भावाशङ्का, उत ङीष्लुकः। नाद्यः, अपरनिमित्तकत्वात्, अत एव नान्त्योऽपीत्याशङ्क्य ङीष्लुकः परनिमित्तकत्वं वक्ष्यन् प्रक्रियामाह — **बिम्बीति**। किमिति स्थानिद्वारकं परत्वम्, स्वत एव तु कुतो नास्तीत्यत आह

---

[1] पा. सू. ४. २. १४१.
[2] पा. सू. ७. ३. ५२.
[3] भाष्ये 'औणादिक एष कशब्दः' इत्यत्र 'औणादिक एष कप्रत्ययः' इति चौखाम्बामुद्रिते पाठो दृश्यते। 'औणादिक एष कः प्रत्ययः' इति रत्नप्रकाशकृदभिमतः पाठ इति भाति।
[4] पा. सू. ८. २. १.
[5] पा. सू. ८. २. २६.
[6] परिभाषा १२३.
[7] 'पूर्वसूत्र' इत्यतः परं कियांश्चिद्भागस्त्रुटितः— ब. 'पूर्वसूत्रेणैव भष्भावः सिध्यतीति भावः' इति वाक्यं स्यादिति भाति।
[8] लुकि स्थानि — ग.

— **अन्यथेति**। अभावस्य निरुपाख्यत्वान्न तत्परत्वं 'ङीषीत्यर्थः। यदि तर्हि निरुपाख्यत्वम्, कथमस्मिन् स्थानिधर्मारोपणमपीत्यपरितुष्यन्नाह — **अथवेति**। स्त्रीलिङ्गसमानाधिकरणोत्तरपदनिमित्तकत्वात् पुंवद्भावस्य कथमिह प्राप्तिः, अत आह — **भस्येति**। लुग्वादिनोऽपि फलंवाचिनः प्रकृत्यन्तरत्वमङ्गीकार्यमेव, न ह्येक एव शब्दो वृक्षं फलं चाचष्ट इति व्यक्तिभेदस्यावश्यकत्वात्। अतः 'प्रकृत्यन्तरत्वात्' इति हेतुना विवक्षितं दर्शयति — **बिम्बेति**। लुङ्मते हि तद्धितङीषोर्लुकि प्राचीना प्रकृतिः फलाभिधायिनी। [1]'स्त्रीशास्त्रकृतं प्रत्यभिज्ञानमिति प्रकृत्यन्तरत्वेन यौगिकत्वनिरासो विवक्षित इत्यर्थः। **अव्यविकन्यायेनेति**। अवेर्मांसमिति विगृह्य 'अविक'शब्दादेव तत्समानार्थात् प्रत्यय उत्पद्यते 'आविकम्' इति, न त्वविशब्दात्। तत् कस्य हेतोः, 'आवम्' इति विकारेऽभिधानाभावात्। एवं च द्वयोः शब्दयोः समानार्थयोरिहैकत्र विग्रहः, अपरत्र वृत्तिरित्यर्थः। **यद्यपीति**। ततश्च प्रत्ययोत्पत्तेः प्रागेवाजादिप्रत्यये बुद्धिस्थे पुंवद्भावे सिद्धे पश्चात् प्रत्यय इति न पुंवद्भावे प्रत्ययलक्षणापेक्षेत्यर्थः। **यत्रेति**। [2]'सिद्धश्च' इत्यस्य हि भाविभत्वके पुंवद्भाव इत्यर्थः। तद्धितान्तरसत्त्वे विवादाभावादाह — **यत्रेति**। स्थानिवद्भावकृतदोषप्रदर्शनाय प्रक्रियामाह — **सास्येति**। अत्र कथं पुंवद्भावाभावः 'तत्राह — **समानायामिति**। इन्द्रशब्दस्य हि पुंसि स्वरूपमीश्वरत्वं वा [3]प्रवृत्तिनिमित्तम्, स्त्रियां तु [4]पुंयोगः। वार्तिके भाषितपुंस्कत्व[5]विशेषणाभाव इति मतेऽप्याह — **वर्णेति**। ननु सत्यपि स्थानिवद्भावे नानुकोऽवस्थानप्राप्तिः। ङीष्निवृत्तिर्हि तन्निवृत्तौ कारणम्। न च स्थानिवत्त्वेन ङीष्निवृत्तिर्निवर्त्यते, तथा सति ङीष्श्रवणापत्तेः। अतो ङीष्निवृत्तिकृतानुग्निवृत्तिरुपपन्नैवेत्यत आह — **अथवेति**। यद्यपि प्रागुक्तप्रत्युदाहरणोपपत्तये एष निषेध इति समञ्जसं न भवति, तथाप्यन्यार्थे निषेधेऽस्मिन् सति तदपि प्रत्युदाहरणम्। यदा तु भस्येत्यनेन यजादिप्रत्ययविषयलक्षणेति पञ्चेन्द्रादौ [6]'पुंवद्भावसिद्धिः, तदा तदपि न प्रत्युदाहरणम्, वैयाघ्रपद्य एव तु प्रत्युदाहरणमित्येषोऽत्रार्थः॥

द्विर्वचनेऽचि १. १. ५९.

[१, ४६१–४६६]

(लघुविवरणम्) ननु निमित्तापेक्षया पूर्वस्य द्विर्वचनं विधीयत इति [7]'अचः परस्मिन्' इत्यनेनैव सिद्धः स्थानिवद्भाव इति किमनेन योगेनेत्यत्राह — **अचः परस्मिन्नित्यत्रेति**। **न पदान्त[द्विर्वचन] इति प्रतिषेधप्रसङ्गादिति**। [8]"पूर्वत्रासिद्धे न स्थानिवत्' [9]इत्याश्रयणेन द्विर्वचनग्रहणप्रत्याख्यानेऽपि रूपस्थानिवद्भावसिद्ध्यर्थं सूत्रमेतदवश्यारम्भणीयम्। ननु [10]'रूपस्थानिवद्भावे कथमादेशवतो द्विर्वचनं प्राप्नोतीत्यत आह — **कार्येति**। ननु सूत्रारम्भे नित्यत्वाद्यणं बाधित्वा

---

[1] 'वृक्षजातिः स्त्रियाम्' इति लिङ्गानुशासनशास्त्रेत्यर्थः।

[2] का. वा. ६. ४. ११४ — २.

[3] प्रत्ययनिमित्तम् — ग.

[4] पुंप्रयोगः — ग.

[5] विशेषणभाव इति — ग.

[6] पुवद्भावासिद्धिः — ग.

[7] पा. सू. १. १. ५७.

[8] का. वा. १. १. ५८ — ३.

[9] इत्याश्रयेण — ड, ढ.

[10] रूपस्थानिवद्भावे आदेशवतो द्विर्वचनं प्राप्नोतीत्यनुपपन्नमित्यत आह — ण.

द्विर्वचनं भविष्यतीत्यत आह — **यण्युक्तस्यैवेति**। द्विर्वचनं शब्दान्तर[1]प्राप्त्यानित्यमिति भावः। एतदनाश्रयणेऽपि यणपि नित्य इति परत्वाद्यणेव स्यादित्यर्थः। ज्ञापकं विघटयति — **नन्विति**। ज्ञापकं समर्थयते — **नैतदिति**। सत्यपि विशेष आह — **छान्दसश्चेति**। रूपस्थानिवत्त्वे च गुणान्तरमाह — **रूपेति**। ननु गाङादेशो लकारावस्थायामेव प्रवर्तमानो न द्विर्वचननिमित्तेऽच्यजादेश इति स्थानिवत्त्वं न भविष्यतीत्यत आह — **कृत एशादेश इति**। परत्वाल्लादेशे कृते तत एव प्रागेशा भवितव्यमिति भावः। अत्र पञ्च पक्षा भाष्य उपक्षिप्ताः — अचि योऽजादेशः स द्विर्वचने कर्तव्ये स्थानिवदिति प्रथमः। द्विर्वचन इत्यनेनाक्षिप्तः प्रत्ययोऽचीत्यनेन विशेष्यते, तत्र [2]'यस्मिन्' इत्यनेन तदादिविधौ [3]सत्यजादौ प्रत्यये योऽजादेशः स द्विर्वचने कर्तव्ये स्थानिवदिति द्वितीयः। अधिकरणल्युडन्तेन वा औपचारिकेण वाच्प्रत्ययान्तेन वा द्विर्वचनशब्देन विशेषितेनाचाजादेशो विशेष्यते, द्विर्वचननिमित्तेऽचि योऽजादेशः स स्थानिवदिति तृतीयः। नेत्यनुवर्तते, स्थानिवदिति निवृत्तम्, द्विर्वचननिमित्तेऽच्यजादेशो न भवतीति चतुर्थः। द्विर्वचनशब्दो [4]'नपुंसकमनपुंसकेन' इत्येकशेषेण निर्दिष्टः, तत्र चैकेनाज् विशेष्यते, अपरेण कालावधारणम्, द्विर्वचननिमित्तेऽचि योऽजादेशः स द्विर्वचने कर्तव्ये स्थानिवदिति पञ्चमः। तत्र प्रथमपक्षे दोषोद्भावनमित्याह — **अचीति**। ननु शित्यात्वप्रतिषेधेऽज्निमित्तकमात्वं न भवतीति कथं स्थानिवद्भाव इत्यत आह — **शित्सदृश इति**। 'प्रत्यय इति चेत्' इत्यनेन द्वितीयपक्षे दोषोद्भावनम्। 'एवमपि' इति तृतीये [5]'दोषोद्भावनम्। तत्र हेतुमाह — **एकत्वादिति**। स्थानिवदित्यनुवृत्तौ कथमस्य [6]पक्षस्योद्भावनमित्यत आह — **स्थानिवदिति**। 'एवमपि' इति चतुर्थे दोषोद्भावनम्। 'प्रत्ययश्च' इत्यनुपपन्नम्, इह प्रत्ययग्रहणाभावात्, अत आह — **द्विर्वचनेनेति**। कथं सहविवक्षाभाव एकशेष इत्यत आह — **सहेति**। ननु [7]'ओः पुयण्ज्यपरे' इति कथं ज्ञापकम्, 'यत्र 'द्विर्वचनेऽचि' इति स्थानिवद्भावस्तत्रोवर्णान्ताभ्यासस्य संभवः। तथाहि — यु मिश्रण इत्यस्य पूङ पवन इत्यस्य च सनि कृते यथाक्रमं [9]'सनीवन्तर्ध' इति, [10]'स्मिपूङ' इति चेटि कृते गुणावादेशयोः कृतयोरनेन स्थानिवद्भावे उवर्णान्ताभ्यासोऽस्ति। अतः कथं ज्ञापकमित्यत आह — **न हीति**। **निनवनीयिषतीति**। नवनमिच्छति नवनीयति, ततः सन्, निनवनीयिषति। अत्र स्थानिवत्त्वे उवर्णान्ताभ्यासता स्यादित्यर्थः। परिहरति — **नैतदिति**॥

[१, ४६१–४६६]

(**विवरणम्**) **अथापीति**। [11]प्रौढिवादोऽयम्, निमित्तापेक्षया पूर्वत्वस्य तत्रानवस्थितत्वात्, द्विर्वचनग्रहणस्य च प्रत्याख्यातत्वात्। भाष्ये 'तत्राभ्यासरूपम्' इत्युपलक्षणम्, नित्यतुरितीयङश्रवणप्रसङ्गात्। [12]अभ्यासरूपमपि न सिध्यतीत्यपि द्रष्टव्यम्। **यण्युक्तस्यैवेति**। यद्यपि सति स्थानिवद्भावे द्विर्वचनं नित्यम्, तथापि यणपि नित्य इति परत्वात् [13]स स्यादिति भावः।

---

[1] प्राप्त्या, अनित्यमिति छेदः।
[2] का. वा. १. १. ७२ — २९.
[3] सत्यजादिप्रत्यये — ण.
[4] पा. सू. १. २. ६९.
[5] दूषणोद्भावनम् — ण.
[6] पक्षस्योद्भव इत्यत आह — ढ.
[7] पा. सू. ७. ४. ८०.
[8] यावतात्र द्विर्वचनेऽचीति — ण.
[9] पा. सू. ७. २. ४९.
[10] पा. सू. ७. २. ७४.
[11] प्रौढवादोऽयम् — च, छ, ञ.
[12] अभ्यस्तरूपमपि — च, छ, ट.
[13] 'सः' इति नास्ति — च, छ.

[1]'ई घ्राध्मोः' इतीत्वयुक्तस्यैव द्विर्वचनं कार्यातिदेश इत्यज्ग्रहणमनर्थकं स्यादित्याह — **कार्येति**। सत्यपि विशेष आह — **छान्दस इति**। [2]'तनिपत्योः' इत्यतश्छन्दसीत्यधिकारादिति भावः। ननु लिटि विधीयमानस्य [3]गाङोऽच्यादेशत्वं कथमित्यत आह — **कृत इति**। [4]'लिटि' इति परसप्तमी। तत्र परत्वाद् गाङः पूर्वं लादेशः। तत एव चैशि पश्चाद् गाङादेशोऽच्यादेश इति मन्यत इति भावः। अत्र पञ्च पक्षा भाष्य उपक्षिप्ताः — अचि योऽजादेशः स द्विर्वचने कर्तव्ये स्थानिवदिति प्रथमः। द्विर्वचन इत्यनेनाक्षिप्तः प्रत्ययोऽचीत्यनेन विशेष्यत इति [5]'यस्मिन्' इति तदादिविधौ अजादौ प्रत्यये योऽजादेशः स द्विर्वचने [6]कर्तव्ये स्थानिवदिति द्वितीयः। अधिकरणल्युडन्तेन वौपचारिकेण वाच्प्रत्ययान्तेन [7]वा द्विर्वचनशब्देन विशेषिताचाजादेशो विशेष्यत इति तृतीयः। नेत्यनुवर्तते, स्थानिवदिति निवृत्तम्, द्विर्वचननिमित्तेऽच्यजादेशो न भवतीति चतुर्थः। द्विर्वचनशब्दो [8]'नपुंसकमनपुंसकेन' इत्येकशेषेण निर्दिष्टः, तत्रैकेनाज् विशेष्यते, अपरेण कालावधारणम्, द्विर्वचननिमित्तेऽचि योऽजादेशः स द्विर्वचने कर्तव्ये स्थानिवदिति पञ्चमः। तत्र प्रथमपक्षे दोषोद्भावनमित्याह — **अचीति**। भाष्ये 'अचिकीर्तत्' इत्यत्र [9]'उपधायाश्च' इतीत्वम्। आत्वं कथमच्यादेश इत्यत आह — **शिदिति**। शकार एवेत् शिदिति तत्पुरुषः। तथा च [10]'यस्मिन् विधिस्तदादौ' इति तदादिविधावेकवाक्यतालाभेन [11]च पर्युदासे इत्संज्ञकशकारादिप्रत्ययव्यतिरिक्ते प्रत्यये आत्वमिति भवत्यत्रात्वमच्यादेश इति भावः। भाष्ये **दुद्यूषतीति**। दिवेः सनि [12]'सनीवन्तर्ध' इतीडभावपक्षे [13]'हलन्ताच्च' इति कित्त्वे [14]'च्छ्वोः' इत्यूठि यणादेशे [15]'सन्यङोः' इति द्विर्वचने च रूपम्। न च 'बिभवनीयिषति' इत्यत्र स्थानिवद्भावेन भूशब्दस्य द्विर्वचनेऽपि [16]'ओः पुयण्ज्यि' इतीत्वं भविष्यतीति वाच्यम्, [17]'येन नाव्यवधानम्' इति णिव्यवधानमात्रमाश्रीयते, न त्वनेकप्रत्ययव्यवधानमाश्रीयत इति भावः। भाष्ये 'एवं तर्हि' इति द्वितीयपक्षोद्भावनम्। 'एवं तर्हि द्विर्वचन' इति तृतीयमाशङ्कितम्। स्वयं निर्वचनेन द्विर्वचनशब्दस्याजादौ वृत्तिं दर्शयति — **अथवेति**। **एतदिति**। तद्रूपारोपणम्, न्याय्यत्वेनेति शेषः। अथवा निमित्तशब्दमन्तरेण निमित्तार्थो गम्यत इत्येतावन्मात्रे दृष्टान्तः। दार्ष्टान्तिके तु द्विर्वचनशब्दो मुख्य एवेत्याह — **अथवेति**। **एतदिति**। अधिकरणसाधनत्वमित्यर्थः। **कालेति**। द्विर्वचनविधानसमय एवेत्यवधारणाभाव इत्यर्थः। 'एवं तर्हि' इति भाष्ये उद्भावनं चतुर्थस्य

---

[1] पा. सू. ७. ४. ३१.
[2] पा. सू. ६. ४. ९१. क्या॰च्छन्दसीत्यधिकारादिति — ञ.
[3] गाङोऽजादेशत्वं — ट.
[4] पा. सू. २. ४. ४९.
[5] का. वा. १. १. ७२ — २९.
[6] 'कर्तव्ये' इति नास्ति — च, छ, ट.
[7] च द्विर्वचन — ञ.
[8] पा. सू. १. २. ६९. भाष्ये द्विर्वचनशब्दद्वयमपि नपुंसकलिङ्गमेव दृश्यते। स एव पाठो विवरणकृताप्याद्रीयत इति ज्ञायते, उपरि 'भाष्ये उभयत्रापि नपुंसकलिङ्गनिर्देशात् नपुंसकमनपुंसकेनेत्येकशेषायोगादाह' इत्यवतारिकादानात्। अत इह 'नपुंसकमनपुंसकेनेति' इत्येतत् प्रक्षिप्तं स्यादिति भाति। मद्रनगरीमुद्रिते तु भाष्ये 'द्विर्वचनश्च' इति द्वितीयस्थले पाठो निर्दिष्टो दृश्यते।
[9] पा. सू. ७. १. १०१.
[10] का. वा. १. १. ७२ — २९.
[11] चकारो नास्ति — ञ.
[12] पा. सू. ७. २. ४९.
[13] पा. सू. १. २. १०.
[14] पा. सू. ६. ४. १९.
[15] पा. सू. ६. १. ९.
[16] पा. सू. ७. ४. ८०.
[17] महाभाष्यम् ७. २. ३.

पक्षस्य। तमुपपादयति — **स्थानिवदिति**। 'एवं तर्हि' इति पञ्चमस्य स्वीकारो भाष्ये। तत्राश्रुतस्य प्रत्ययस्य कथं विशेष्यत्वमित्यत आह — **द्विर्वचनेनेति**। अचीत्युपादानादिह द्विर्वचनं षाष्ठिकं गृह्यते। तच्च प्रत्यय इति तेन प्रत्यय आक्षिप्त इत्यर्थः। भाष्ये **द्विर्वचनं च** चिकीर्षितत्वेन निर्दिश्यत इति शेषः। **विरुद्धत्वादिति**। अतुल्यसंबन्ध एकेन विरुद्धत्वम्। एतच्च [1]सहविवक्षासंभवायोक्तम्। यदुक्तं सहविवक्षा[2]संभवान्नैकशेष इति, तत्राह — **सहेति**। **प्रागेवेति**। [3]'सर्वादीनि' इत्यत्र। भाष्ये उभयत्रापि नपुंसकलिङ्गनिर्देशात् [4]'नपुंसकमनपुंसकेन' इत्येकशेषायोगादाह — **विभक्तीति**। विभक्त्यन्तैकशेषपक्षस्तत्र[5] न स्थित इत्यतः कल्पान्तरमाह — **अथवेति**। सर्वेष्वित्यस्य कृत्यमाह — **यियविषतीति**। अत्र च [6]'सनीवन्तर्ध' इति [7]'स्मिपूङ्' इति चोभयत्रेट्। अवर्णपराः पुयण्जयः प्रत्ययान्तरेऽपि संभवन्ति, णावपि। तत्र णौ स्थानिवद्भावलक्षणमनुमीयते न प्रत्ययान्तर इति नास्ति विनिगमनमिति शङ्कते — **नन्विति**। सन्परावर्णपरेषु [8]पुयण्जिषूवर्णान्ताभ्यासस्येत्वं विधीयते। न च प्रत्ययव्यवधानं विना सर्वे तथाविधाः संभवन्तीति प्रत्ययव्यवधानेऽवश्याश्रयणीये णावेकेनैव व्यवधानमन्यत्र ल्युट्क्यजादिनानेकेनेति णिरेव सामर्थ्यलब्ध इति परिहरति — **नैतदिति**। भाष्ये **अनैमित्तिकमिति**। तथा च कप्रत्ययबाधनाय [10]'ह्वावामश्च' इति ह्वेञ्वेञोः पुनरण्विधानमर्थवदिति भावः॥

[१, ४६१–४६६]

(उद्द्योतनम्) ननु [11]'अचः परस्मिन्' इत्येव स्थानिवत्त्वसिद्धेः किमर्थमिदं सूत्रम्, अत आह — **अच इति**। 'अथापि' इति प्रौढ्या, निमित्तापेक्षया पूर्वत्वस्य तत्रास्थितत्वात्। द्विर्वचनादिग्रहणस्य प्रत्याख्यातत्वाच्च। **यणादेश इति**। परत्वाद् द्विर्वचनात् पूर्वं यणादेश इति भावः। भाष्ये **जेघ्रीयत इति**। [12]'ई घ्राध्मोः' इति यङि विधीयमानस्येकारस्य [13]स्थानिवत्त्वे रूपातिदेशे 'जाघ्रीयते' इति स्यात्, तन्निरासाय 'अचि' [14]इत्युक्तमिति ज्ञापकत्वमित्यर्थः। कार्यातिदेशेऽज्ग्रहणवैयर्थ्यमुपपादयति — **कार्येति**। [15] **घ्रीध्मीति**। ईकारसहितस्यैवेत्यर्थः। अज्ग्रहणस्य प्रयोजनान्तरं शङ्कते — **नन्विति**। **क्वसौ** [16]'क्वसुश्च' इति लिडादेशे क्वसौ। ननु द्वित्वे 'प्स्वान्' इत्यत्र पकारद्वयम्, द्वित्वाभावे एक एवेति श्रुतौ विशेषोऽस्तीत्यत आह — **छान्दस इति**। [17]'तनिपत्योः' इत्यतश्छन्दसीत्यनुवर्तत इत्यर्थः। **दृष्टेति**। तथा चोपधालोपस्य स्थानिवत्त्वेऽपि द्विर्वचनं न भविष्यतीत्यर्थः। रूपातिदेशस्य प्रयोजनान्तरं सूचयन्नाह — **रूपेति**। कार्यातिदेशे 'निन्युः' इत्यत्रेयङश्रवणप्रसङ्ग इति भावः। ननु लिटि विधीयमानस्य गाङोऽचि परतो विधाना-

---

[1] सहविवक्षाया असंभवायेत्यर्थः।
[2] असंभवादिति छेदः।
[3] पा. सू. १. १. २७.
[4] पा. सू. १. २. ६९.
[5] तत्रानवस्थित इत्यर्थः — च, छ; तत्र न स्थित इत्यर्थः — ट.
[6] पा. सू. ७. २. ४९.
[7] पा. सू. ७. २. ७४.
[8] पुयण्जिष्ववर्णान्ताभ्यासस्य — ट.
[9] बाधनार्थं — ञ.
[10] पा. सू. ३. २. २.
[11] पा. सू. १. १. ५७.
[12] पा. सू. ७. ४. ३१.
[13] स्थानिवत्त्वरूपातिदेशे — अ, म.
[14] इत्युक्तमित्यर्थः। कार्यातिदेशे — म, आ.
[15] घ्राध्मीति — अ, इ; घ्राध्मेति — म.
[16] पा. सू. ३. २. १०७.
[17] पा. सू. ६. ४. ९९.

भावात् कथं स्थानिवत्त्वम्, अत आह — **कृत इति**। परत्वादिति भावः। हलचोरादेशस्य कथं स्थानिवत्त्वम्, अत आह — **ङकारस्येति**। अत्र पञ्च पक्षा भाष्य उपक्षिप्ताः। 'अचि योऽजादेशो द्विर्वचने कार्ये स स्थानिवत्' इति प्रथमः। 'अजादौ प्रत्यये योऽजादेशः स द्विर्वचने कार्ये स्थानिवत्' इति द्वितीयः। 'द्वित्वनिमित्तेऽचि 'योऽजादेशः स स्थानिवत्' इति तृतीयः। 'द्वित्वनिमित्तेऽच्यजादेशो न भवति' इति चतुर्थः। 'द्वित्वनिमित्तेऽचि योऽजादेशो द्विर्वचने कार्ये स स्थानिवत्' इति पञ्चमः। तत्र प्रथमपक्षे दोषोऽयमित्याह — **अचीति**। भाष्ये **अचिकीर्तदिति**। कृतेर्णिचि [२]'उपधायाश्च' [३]इतीत्वम्, रपरत्वम्, [४]'हलि च' इति दीर्घः। [५]'चङ्, णिलोपः, द्वित्वम्। ननु शिति प्रतिषेधादनैमित्तिकमात्वं कथं स्थानिवत् स्यात्, अत आह — **शिदिति**। श् इदिति कर्मधारयः। [६]'यस्मिन् विधिस्तदादौ' इतीत्संज्ञकशकारादिप्रत्ययव्यतिरिक्तप्रत्यये आत्वमिति [७]'भवत्यच्यजादेश [८]इत्यर्थः। भाष्ये **दुद्यूषतीति**। दिवेः [९]'सनीवन्तर्ध' इतीडभावपक्षे [१०]'हलन्ताच्च' इति कित्त्वे [११]'च्छ्वोः शूठ्' इत्यूठि यणादेशे [१२]'सन्यङोः' इति द्वित्वे [१३]कृते रूपम्। एवं सिवेः 'सुस्यूषति' [१४]इति। अत्र यणः स्थानिवत्त्वेऽभ्यासे इकारश्रवणप्रसङ्ग [१५]इत्यर्थः। भाष्ये **बिभवनीयिषतीति**। [१६]अत्रावादेशस्य स्थानिवत्त्वादभ्यासे उकारश्रवणप्रसङ्गः। न चात्र स्थानिवद्भावेन 'भू' इत्यस्य द्वित्वेऽपि[१७] [१८]'ओः पुयण्' इतीत्वं भविष्यतीति वाच्यम्, सनि परे विधीयमानमित्वं [१९]'येन नाव्यवधानम्' इति णिव्यवधाने भवति, न त्वनेकप्रत्ययव्यवधानेऽपीति भावः। द्वितीयपक्षमुद्भावयति — भाष्ये **एवं तर्हीति**। 'द्विर्वचने' इत्यनेनाक्षिप्तप्रत्ययस्य 'अचि' इति विशेषणादजादौ प्रत्यये योऽजादेशः स स्थानिवदिति लभ्यत इत्यर्थः। भाष्ये **दिवादय इति**। झलादौ सन्यूठ्, नाजादाविति्यर्थः। कृत्यादिपरिहारार्थं [२०]तृतीयपक्षमाशङ्कते — भाष्ये **एवं तर्हीति**। 'द्विर्वचननिमित्तेऽचि' इत्येतदुपपादयति — **तत्रेति**। सूत्र इत्यर्थः। औपचारिकत्वमसहमान आह — **अथवेति**। यद्वा, निमित्तशब्दं विनापि निमित्तार्थो गम्यत इत्येतावन्मात्रे दृष्टान्तः। दार्ष्टान्तिके तु मुख्य एवेत्याह — **अथवेति**। **अप्रतिपद्यमानम्** अजानानम्। 'एवमपि' इति परिहारभाष्यमुपपादयति — **एकत्वादिति**। **कालेति**। द्विर्वचनसमय एवेत्यवधारणालाभ इत्यर्थः। अवधारणाभावे चक्रतुरित्यत्र यण्श्रवणं न स्यादिति भावः। भाष्ये **एवं तर्हीति**। चतुर्थपक्षः, तमुपपादयति — **स्थानिवदिति**। तथा च द्वित्वनिमित्तेऽच्यजादेशो न भवतीत्यर्थः संपद्यते। भाष्ये **एवं तर्हीति**। पञ्चमः पक्षः। तत्राश्रुतप्रत्ययस्य कथं विशेष्यत्वम्, अत आह —

---

[१] य आदेशः — अ.
[२] पा. सू. ७. १. १०१.
[३] इतीत्वे — म. उपरि 'रपरत्वम्' इति नास्ति — म.
[४] पा. सू. ८. २. ७७.
[५] 'चङ् णिलोपः' इति नास्ति — आ, म.
[६] का. वा. १. १. ७२–२९.
[७] भवत्यजादेशः — अ.
[८] 'इत्यर्थः' इत्यस्यानन्तरं 'द्विर्वचननिमित्त इति। एशस्तन्निमित्तत्वादित्यर्थः' इत्यधिकम् — अ, इ, ऋ.
[९] पा. सू. ७. २. ४९.
[१०] पा. सू. १. २. १०.
[११] पा. सू. ६. ४. १९.
[१२] पा. सू. ६. १. ९.
[१३] 'कृते' इति नास्ति — अ, इ.
[१४] इतिशब्दो नास्ति — अ, इ.
[१५] 'इत्यर्थः' इति नास्ति — अ, इ, ऋ.
[१६] तत्रावादेशस्य — म, ऋ.
[१७] अपिशब्दो नास्ति — म.
[१८] पा. सू. ७. ४. ८०.
[१९] महाभाष्यम् ७. २. ३.
[२०] तृतीयमाशङ्कते — म, इ, ऋ.

द्विर्वचनेनेति। 'अचि' इत्युक्त्येह द्विर्वचनं षाष्ठिकं गृह्यते, तत् प्रत्यये परत [1]एवेति तेन तदाक्षेप इत्यर्थः। द्विरुच्यतेऽस्मिन्निति व्युत्पत्त्या प्रत्ययविशेषणत्वम्। 'अचि' इत्यपि प्रत्ययविशेषणमित्याह — **अचीत्येतदिति**। तथा च द्वित्वनिमित्तेऽजादौ प्रत्यये योऽजादेशः स द्वित्वे कार्ये स्थानिवदिति सूत्रार्थः। भाष्ये **द्विर्वचनं च** कार्यत्वेन विवक्ष्यत इति शेषः। **विरुद्धत्वादिति**। एकत्राधिकरणव्युत्पत्तिः,[2] इतरत्र भावव्युत्पत्तिरिति विरुद्धता। **एकेन** युगपदित्यादिः। ननु [3]सहविवक्षाभावात् कथमेकशेषः, अत आह — **सहेति**। [4]"द्विर्वचने परे' 'द्विर्वचने कर्तव्ये' इत्यनयोरेकरूपेण संबन्धाभावादित्यर्थः। **प्राक्** सर्वादिसूत्रे। भाष्ये **द्विर्वचनं च** [5]**द्विर्वचनं चेति**। अनेन [6]"नपुंसकमनपुंसकेन' [7]इत्येकशेषाभावः सूचितः। यद्यपि प्रत्ययविशेषणस्य पुंस्त्वेन भाव्यम्, तथाप्यनुपात्तप्रत्ययं प्रत्यार्थिकविशेषणत्वं नपुंसकत्वेऽप्यविरुद्धमिति भावः। एकशेषे द्विवचनप्रसङ्गं निराह — **विभक्तीति**। अविभक्त्यन्तैकशेषपक्षे द्विवचनप्रसङ्गादाह — **अथवेति**। ननु 'सर्वेषु' इत्ययुक्तम्, पुयण्परे णिं 'विनाप्यभ्यासोवर्णस्य [8]'द्विर्वचनेऽचि' इत्यनेनैव संभवादिति शङ्कते — **यियविषतीति**। यद्यपीत्यादिः। [9]"सनीवन्तर्ध' इति [10]"स्मिपूङ' इति चोभयत्रेट्। समाधत्ते — **तत्रेति**। तथापीत्यादिः। 'बिभावयिषति, [11]रिरावयिषति' इत्यादौ णौ स्थानिवत्त्वं विनेत्वासिद्धेर्वर्गप्रत्याहारग्रहणं [12]जग्रहणं च ज्ञापकमेवेत्यर्थः। नन्ववर्णपराः पुयण्जाः प्रत्ययान्तरेऽपि संभवन्ति, णावपि। तत्र णावेव ज्ञापकं नान्यत्रेति किं विनिगमकमिति शङ्कते — **नन्विति**। **तत्र** पुयण्सूत्रे। **निनवनीयिषतीति**। नौतेर्युडन्तस्य क्यच्, सन्, तत्राभ्यासे उकारश्रवणप्रसङ्गः। **नैतदिति**। पवर्गयण्जकारेष्ववर्णपरेषु परतोऽभ्यासोवर्णस्य सनि परे [13]इत्वं विधीयते। [14]न च प्रत्ययव्यवधानं विना सर्वत्रावर्णपरत्वं संभवतीति प्रत्ययव्यवधानस्यावश्यकत्वे णावेकेनैव व्यवधानम्, अन्यत्र ल्युट्क्यजादिनानेकेनेति णावेव स्थानिवत्त्वानुमानं लभ्यत इति भावः। भाष्ये **अनैमित्तिकमिति**। तथा च [15]"ह्वावामश्च' इति ह्वेञ्वेञोः कप्रत्ययबाधनार्थं [16]पुनरण्विधानमुपपन्नमिति भावः॥

---

[1] एवेति न तदाक्षेपः — म.

[2] व्युत्पत्तेः — अ.

[3] सहविवक्षासंभवात् — अ, इ, ऋ.

[4] 'द्विर्वचने परे' इत्यादि 'एकरूपेण संबन्धा' इत्यन्तं नोपलभ्यते — म.

[5] द्विर्वचनश्चेति — अ, म. अयं प्रतीको निर्दिष्टकोशयोरेवोपलभ्यते। मद्रपुरीमुद्रिते भाष्येऽपि 'द्विर्वचनश्च' इति पाठोऽत्र दृश्यते। परं तूपरितनग्रन्थपर्यालोचने 'द्विर्वचनं च' इत्येवात्र पाठः स्वीकृतोऽन्नंभट्टेनेति ज्ञायते। तथा हि — पुंल्लिङ्गपाठस्वीकारे 'यद्यपि प्रत्ययविशेषणस्य पुंस्त्वेन भाव्यम्' इत्यादिग्रन्थविरोधः स्यात्। तदा 'नपुंसकमनपुंसकेन' इत्येकशेषे सति पक्षे एकवद्भावेनैकवचनस्य सिद्धत्वाद् द्विवचनप्रसङ्गशङ्कानिराकरणयोश्च विरोधः स्यात्। अत्र सरूपाणामित्येवैकशेषाङ्गीकारात् तदुपपत्तिः। अतो 'द्विर्वचनश्च' इति पाठोऽन्नंभट्टासंमतः।

[6] पा. सू. १. २. ६९.

[7] इत्येकशेषभावः — म.

[8] विनाभ्यासोवर्णस्य — म, ऋ.

[9] पा. सू. ७. २. ४९.

[10] पा. सू. ७. २. ७४.

[11] दिदावयिषति — अ.

[12] 'जग्रहणम्' इति नास्ति — म.

[13] ईविधीयते — आ, ऋ.

[14] न तत्प्रत्यय — अ.

[15] पा. सू. ३. २. २.

[16] पुनर्विधानम् — आ, म, ऋ.

[१, ४६१–४६६]

(**रत्नप्रकाशः**) ... [1]'वद्भावः क्रियत इति पूर्वसूत्रेण न गतार्थता। एतेन "अथापि निमित्तात् पूर्वस्येति पक्षे प्राप्तिः स्यात्, तथापि [2]"न पदान्तद्विर्वचन' इति प्रतिषेधः" इति कैयटो निरस्तः। असिद्धान्तपक्षाश्रयेण चारितार्थ्यकथनस्य प्रत्याख्यातद्विर्वचनग्रहणेन तस्य प्रतिषेध-कथनस्य चायोगात्। रूपातिदेशपक्षं व्यवस्थापयितुं कार्यातिदेशपक्षे दूषणमाह — **आदेश इति**। **तद्वत इति**। आदेशवत इत्यर्थः। **अभ्यासरूपमिति**। अज्विशिष्टमिति शेषः। **जेघ्रीयत इति**। [3]'ई घ्राध्मोः' इतीकारे कृते तद्विशिष्टस्य द्वित्वमिष्टमेवेत्यज्ग्रहणं व्यर्थं सद्रूपातिदेशं ज्ञापयति। रूपातिदेशे हि घ्राध्माशब्दयोर्द्वित्वेऽनिष्टं स्यादिति तद्वारणेनाज्ग्रहणं सार्थकं भवति। अस्मिन् पक्षे 'नित्यतुः' इत्यादौ [4]"प्रकल्प्यापवादविषयमुत्सर्गोऽभिनिविशते' इतीयङोऽप्रवृत्तौ द्विर्वचने सत्य-नेकाच्त्वात् [5]"एरनेकाचः' इति यण् भवति। एवम् 'इर्त किट कटी' इत्यत्र प्रश्लिष्टस्येकारस्य धातोः, इरिवाचचारेति नामधातोश्चादित [6]इयङप्रवृत्तौ द्वित्वोत्तरम् [7]"एरनेकाचः' इति यणि 'इयतुः' इत्यादि भवति। ननु 'समानाश्रयत्वाभावेन [8]"वार्णादाङ्गं बलीयः' इति यणादेशस्य [9]"तत्राप्रवर्तनादादित इयङि सति तस्य स्थानिवद्रूपे सति द्वित्वे तस्येयङ्रूपेण पुनरवस्थितौ ततः सवर्णदीर्घे 'ईयतुः' इत्येव भवितव्यमिति चेन्न, तत्परिभाषायां समानाश्रयपदस्य भाष्यानारूढत्वात्। [11]"दाश्वान्साह्वान्' इति सूत्रगतभाष्यविरुद्धत्वाच्च। इण्धातोश्च [12]"इणो यण्' इति यणादेशस्य स्थानिवत्त्वेन द्वित्वे सति पुनरुत्तरदले तस्य स्वरूपेणैव स्थितौ [13]"दीर्घ इणः किति' इति दीर्घे [14]"ईयतुः' इत्यादि सिध्यति। **इवर्णाभ्यासतेति**। [15]"पूर्वं धातुः साधनेन युज्यते' इति मते उप-सर्गेण सहैकादेशमकृत्वा गाङादेशे तस्य स्थानिवत्त्वेनेकारस्य द्वित्वे कृते उत्तरदलस्य स्वरूपावस्थि-ताविति भावः। ततः सवर्णदीर्घे 'अधीगे' इत्यनिष्टरूपं स्यादिति यावत्। एतेन 'कृते एकादेशे गाङिति प्रक्रियाश्रयेण चोद्यम्' इति निरस्तम्। सिद्धान्तानुसारेणैवोपपन्नस्य चोद्यस्यापसिद्धान्ता-श्रयेणोपपादनायोगात्। **लिटि लकारादाविति**। तथा चाजादिप्रत्ययनिमित्तत्वाभावाद् गाङः स्थानिवत्त्वं नेति भावः। लिटि विवक्षिते गाङ इति तस्य परनिमित्तत्वाभावादेव स्थानिवत्त्वं नेति समाधानान्तरं बोध्यम्। 'द्विर्वचने' इति पदं 'द्वित्वे कर्तव्ये' इति कालावधारणार्थमिति कृत्वा तेनाचोऽविशेषितत्वेनातिप्रसङ्गं शङ्कते — **कृत्येजन्तेति**। **अचिकीर्तदिति**। [16]"उपधायाश्च' इतीत्वम्। तस्य स्थानिवत्त्वे द्वित्वे च 'अचकीर्तत्' इति [स्यादिति] भावः। एवमुत्तरत्रोह्यम्। **जग्ल इति**। [17]"आदेच उपदेशेऽशिति' इत्यत्र 'अशिति' इति पर्युदासाश्रयणादात्वस्य परनिमित्तता।

---

[1] 'वद्भावः' इत्यतः प्राक् कियांश्चिद्ग्रन्थस्त्रु-टितः — ब.
[2] पा. सू. १. १. ५८.
[3] पा. सू. ७. ४. ३१.
[4] परिभाषा ६४.
[5] पा. सू. ६. ४. ८२.
[6] इयङ्प्रवृत्तौ — ब.
[7] पा. सू. ६. ४. ८२.
[8] यण्सवर्णदीर्घयोरित्यादिः।
[9] परिभाषा ५५.
[10] तत्र प्रवर्तनात् — ब.
[11] पा. सू. ६. १. १२.
[12] पा. सू. ६. ४. ८१.
[13] पा. सू. ७. ४. ६९.
[14] ईषतुः — ब.
[15] महाभाष्यम् ६. १. १३५.
[16] पा. सू. ७. १. १०१.
[17] पा. सू. ६. १. ८५.

दुद्यूषतीति। [1]'सनीवन्त' इतीडभावे [2]'हलन्ताच्च' इति कित्त्वे [3]'च्छ्वोः' इत्यूठ्, यण् द्वित्वम्। **प्रत्यय इति**। अजादौ प्रत्यय इति भावः। चक्रतुरित्यत्रेको यण् अचि परतो विहितोऽपि नान्तरीयकतयाजादिप्रत्यये परतो विहित एवेति न काप्यनुपपत्तिः। . . . [4]'जग्ले' इत्यत्रानैमित्तिकमात्वं शिति तु प्रतिषेध इति पक्षाश्रयणात् परिहारः। **दधित्रपुसमिति**। बहुदिनावस्थिततया गन्धरसरूपान्तरयुक्तं त्रपुसम्, तादृशं यद्दधि तत्प्रत्यक्षो ज्वर इत्यर्थः। एतेन 'समाहारद्वन्द्वः, कर्मधारयो वा' इति निरस्तम्। असमासेऽप्युपपत्तेः। त्रपुसशब्दार्थमनुक्त्वा समाहारद्वन्द्वकथनानौचित्याच्च। अन्तरेण निमित्तशब्दं निमित्तार्थो न गम्यत इत्यभ्युपगम्याप्याह — **अथवेति**। **एवमपीति**। 'द्विर्वचने' इत्यस्याज्विशेषणे उपयुक्तत्वादिति भावः। ननु 'द्विर्वचने' इत्यनेनाज् न विशेष्यते चेत् किं कालावधारणं स्यात्, स्यादेवेत्याह — [**यः**] **पुनरिति**। **स्थानिवन्न भविष्यतीति**। एतेन 'निन्यतुः' इत्यादावियङं कृत्वा तस्य स्थानिवत्त्वेन द्वित्वे सति ततः [5]'एरनेकाचः' इति यणिति वदन्त एतद्भाष्याशयानभिज्ञा निरस्ताः। प्रसङ्गात् संभावितं पक्षान्तरमुपन्यस्य प्रकृतं दूषणं तत्राप्यविशिष्टमित्युक्त्वा स्थानिवद्भावपक्षं व्यवस्थापयिष्यन्नाह — **एवं तर्हीति**। **प्रत्ययश्चेति**। द्विर्वचनेनाक्षिप्त इति शेषः। **द्विर्वचनं चेति**। कालश्चेत्यर्थः। तस्य द्विर्वचनेन विशेषणीयत्वात् ताच्छब्द्यम्। **कथं पुनरिति**। एकस्यैकार्थोपस्थापनेनोपक्षीणतयार्थान्तरपरत्वकल्पनानौचित्यादिति भावः। [6]'व्याख्यानतो विशेषप्रतिपत्तिः' इति तन्त्राद्याश्रयेणानेकार्थपरत्वाश्रयणे न दोष इत्याह — **एकशेषनिर्देशादिति**। शब्दतन्त्रमावृत्तिर्वा एकशेषशब्देनाभिमता। एकशेषार्थतन्त्रे हि द्वन्द्ववत् सहविवक्षायामेव संभवतः। प्रकृते तु सा न संभवति। एतेन "सहविवक्षाभावेऽपि [7]'सरूपाणाम्' इत्येकशेषः, संज्ञापरिभाषावल्लक्षणाङ्गत्वात् तस्येति प्रागेवोक्तम्। विभक्त्यन्तयोश्चैकशेषविधानादप्रातिपदिकत्वाद् द्विवचनाभावः" इति निरस्तम्। एकशेषमात्रस्य कथंचित्साधनेऽपि द्विवचनं शब्दावृत्तिं वान्तरेण वाक्यार्थवर्णनासंभवेनाजागलस्तनायमानैकशेषसाधनाय सरूपसूत्रस्थापनानौचित्यात्। सहविवक्षां विनैकशेषेण तस्य तोषेऽपि सौत्रस्य द्वन्द्ववदेकशेषस्यापि संभवेन तदर्थं सूत्राश्रयणायोगाच्च। **स्थानिवदिति चेदिति**। इतोऽपि ज्ञायते — 'स्थानिवद्भावपक्ष एव व्यवस्थापितः' इति। **अवनुनावयिषतीति**। णु स्तुतौ णिचि 'सनि तस्येटि णिचो [8]गुणायादेशयोः 'अवनावयिषति' इति जातेऽस्यामवस्थायां द्वित्वे कृते 'अवनिनावयिषति' इति स्यादित्यभ्यासे उकारश्रवणार्थं णौ कृतस्यादेशस्य स्थानिवत्त्वं वक्तव्यं सनि द्वित्वे कर्तव्य इति भावः। **ओः पुयण्ज्यिषु वचनमिति**। 'पिपविषते, यियविषति' इत्यत्र [10]'स्मिपूङ्' [11]'सनीवन्तर्ध' इति पूङ्यौतिभ्यां सन इटि गुणेऽवादेशे च ततो 'द्विर्वचनेऽचि' इति स्थानिवद्भावाद् द्वित्वे सत्यभ्यासे उकारसद्भावात् तत्रेत्वविधानाय 'ओः पयोरपरे' इत्येतावत आवश्यकत्वेऽपि वर्गप्रत्याहारजग्रहणं तत्र व्यर्थं सत् सन्परे णौ कृत आदेशः स्थानिवद्रूपं लभते सनि द्वित्वे कर्तव्य इति ज्ञापयतीति भावः। सति हि तस्य स्थानिवद्भावे 'बिभावयिषति, मिमावयिषति, रिरावयिषति, लिलावयिषति, जिजावयिषति' इत्यत्राभ्यासोकारस्येत्वविधानेन तत् सार्थकं भवति। अन्यथा

---

[1] पा. सू. ७. २. ४९.
[2] पा. सू. १. २. १०.
[3] पा. सू. ६. ४. १९.
[4] 'जग्ले' इत्यतः प्राक् कियांश्चिद्ग्रन्थस्त्रुटित इति भाति 'ब' मातृकायाम्।
[5] पा. सू. ६. ४. ८२.
[6] परिभाषा १.
[7] पा. सू. १. २. ६४.
[8] वृद्ध्यावादेशयोरित्यादिः।
[9] गुणावादेशयोः — ब.
[10] पा. सू. ७. २. ७४.
[11] पा. सू. ७. २. ४९.

णिचि वृद्धयावादेशयोः सतोस्ततो द्वित्वे ह्रस्वे [1]'सन्यतः' इत्येवेत्वे सिद्धे किं तेन। ज्ञापनफलं तु 'नुनावयिषति, चुक्षावयिषति' इत्यादावभ्यासे उकारश्रवणम्॥

ननु पूभूमूयुरुलूजुभ्यो विचि पो भो मो यो रो लो जो इत्योकारान्तेभ्यः प्रातिपदिकेभ्य आचारे क्विपि ततः सनि तस्येटचवादेशे तस्य 'द्विर्वचनेऽचि' इति स्थानिवद्रूपे द्वित्वे च 'युयविषति, पुपविषति' इत्यादावभ्यासे उवर्णस्यैकव्यञ्जनव्यवधानेनावर्णपराणां पवर्गयण्जकाराणां सन्परत्वस्य सत्त्वेन तत्रैव [2]'ओः पुयण्जि' इति सूत्रं प्रवर्तते, न तु 'पिपावयिषति, बिभावयिषति, मिमावयिषति' इत्यादौ वर्णत्रयव्यवधानेन सन्परेषु तेषु। अन्यथा पवनभवनमवनयवनरवण[3]लवनजवनेभ्यः क्यचि ततः सनि 'पिपवनीयिषति' इत्यादावपि तत्प्रवृत्त्या तद्बलात् 'निनवनीयिषति, दिदवनीयिषति' इत्यादावप्यभ्यासे उकारश्रवणं प्रसज्येत। अतो भाष्यकृदुक्तं ज्ञापकं तन्न युज्यत इति चेन्न, [4]'अन्येभ्योऽपि दृश्यन्ते' इति दृशिग्रहणात् पूभूप्रभृतिभ्यो विज् न भवतीति भगवत आशयसंभवेन [5]'येन नाव्यवधान'न्यायेन वर्णत्रयव्यवधानेन सन्परेषु तेषु परतस्तत्सूत्रप्रवृत्तेरुचितत्वेन 'बिभावयिषति' इत्यादौ वर्णत्रयव्यवधान एव सन्परत्वमवर्णपरममरलजानामाश्रित्य 'निनवनीयिषति' इत्यादावप्रवृत्तेरुक्तज्ञापकत्वस्य च सिद्धत्वात्। स्थानिवद्भावस्य वाचनिकस्य ज्ञापकसिद्धस्य वातिप्रसङ्गं शङ्कते कश्चित् — **यद्येतज्ज्ञाप्यत इति**। उच्यते वेति शेषः। **अचिकीर्तदिति**। 'कृत संशब्दने' इति चौरादिकाण्णिचि लुङि चङि [6]'उपधायाश्च' इतीत्वे तस्य स्थानिवद्भावे ऋकारविशिष्टस्यैव द्वित्वे ह्रस्वे उरदत्वे हलादिशेषे च 'अचकीर्तत्' इति स्यात्, संयोगपरस्येकारस्य लघुत्वाभावेन [7]'सन्वल्लघुनि' इति सूत्रस्य तत्राप्रवृत्तेरिति भावः। **अवर्णपरा इति**। 'अपरे' इति विशेषणस्योपादानादिति भावः। उपलक्षणमेतत् सन्पराश्चेत्यस्य। तथा च णिजन्ताच्चङि द्वित्वे कर्तव्ये कुत्राप्यच आदेशस्य स्थानिवत्त्वं नेति सिद्धम्। एवं च वार्तिकेऽपि णावित्यस्य 'सनि' इति विशेषणे दत्ते न दोष इत्यपि सिद्धम्। नन्वेवम् 'अनूनवत्, और्णूनवत्, अचुक्षवत्, अपुस्फरत्' इत्यादावभ्यासे उकारश्रवणं कथं स्यादिति चेन्न, 'नुनावयिषति, ऊर्णुनावयिषति, चुक्षावयिषति, पुस्फारयिषति' इत्यादौ सन्परे णिचि दृष्टस्याभ्यासरूपस्य [8]'सन्वल्लघुनि चङ्परेऽनग्लोपे' इत्यनेन तत्रातिदेशे ततो [9]'दीर्घो लघोः' इत्यस्य प्रवृत्त्या तत्राप्यभिमतसिद्धेः। एतेन 'द्वित्वनिमित्तस्याचो णिचैव व्यवधानेऽप्यच आदेशस्य स्थानिवद्भावः प्रवर्तते' इति ज्ञाप्यं वर्णयन् [10]कौस्तुभकृन्निरस्तः। 'पुस्फारयिषति' इत्यत्राप्येकेन रेफेण व्यवहितस्य स्थानिवत्त्वाप्रसङ्गात्। अत एव 'अबीभवत्, अमीमवत्, अलीलवत्' इत्यादिषु 'बिभावयिषति' इत्यादिषु च [11]'ओः पुयण्जि' इतीत्वं प्रवर्तते। "ज्ञापनफलं तु 'चुक्षावयिषति। उडुरिवाचरति उडवति, उडवतेर्णौ सन्, उडुडावयिषति। चङि औडूडवत्। तुतावयिषति, अतूतवत्। ऊर्णुनावयिषति, और्णूनवत्। पुस्फारयिषति, अपुस्फरत्' इत्यादि बोध्यम्" इत्यपि [12]तदुक्तिः प्रत्युक्ता। [13]'सन्वल्लघुनि' इति सूत्रस्य रूपातिदेशपरतया भाष्यकृतैव व्यवस्थापितत्वेन 'अबीभवत्' इत्यादौ [14]'ओः पुयण्जि' इति

---

[1] पा. सू. ७. ४. ७९.
[2] पा. सू. ७. ४. ८०.
[3] लवण — ब.
[4] पा. सू. ३. २. ७५.
[5] अयं न्यायो महाभाष्ये ७. २. ३.
[6] पा. सू. ७. १. १०१.
[7] पा. सू. ७. ४. ९३.
[8] पा. सू. ७. ४. ९३.
[9] पा. सू. ७. ४. ९४.
[10] श. कौ. पृष्ठम् २५०.
[11] पा. सू. ७. ४. ८०.
[12] श. कौ. पृष्ठम् २५१.
[13] पा. सू. ७. ४. ९३.
[14] पा. सू. ७. ४. ८०.

सूत्रप्रवृत्त्युक्तेरसंबद्धप्रलापत्वात्। तत्र स्थानिवद्भावमन्तरेणैव 'अनूनवत्, अचुक्षवत्' इत्यादि-सिद्धेरुक्तत्वाच्च ॥

[१, ४६१–४६६]

(नारायणीयम्) सूत्रानारम्भमाशङ्क्य परिहरति — **अच इति**। **न पदान्तेति**। न हि तर्हि तत्राष्टमिकद्विर्वचनमेव गृह्यत इति प्रमाणमस्ति। ननु रूपस्थानिवत्त्वादस्यानारम्भशङ्कानुचिता। न च चक्रतुरित्यादौ सति स्थानिवत्त्वे नित्यं द्विर्वचनमिति रूपस्थानिवत्त्वाभावेऽप्यभिमतसिद्धिः, यणादेरपि नित्यत्वात्। द्विर्वचनस्य तु शब्दान्तरप्राप्तिरपि। एवं तर्हि परशब्दस्येष्टवाचित्वादुभयनित्यत्वेऽपि प्राग् द्विर्वचनमिति मन्यते। न च शब्दान्तरप्राप्तिः, एकदेशविकृतस्यानन्यत्वात्। अज्ग्रहणलिङ्गाद्रूपस्थानिवत्त्वावगतेः कथं पूर्वपक्षः, तत्राह — **कार्येति**। कार्यातिदेशसाहचर्यात् तस्य प्राधान्याच्चेति भावः। लिङ्गं तु पूर्वपक्षित्वान्न विजानाति। कार्यातिदेशे वचनवैफल्याद्रूपातिदेशो भविष्यतीत्यत्राह — **चक्रतुरिति**। कार्यातिदेशेऽज्ग्रहणमादेशस्य स्थानिद्विर्वचनव्यावृत्तये कर्तव्यमित्याशङ्क्योक्तम् — भाष्ये **भवतीति**। तत् कथमभिमतमादेशे स्थानिकार्यभवनमित्याशङ्क्य न स्थानिकार्यत्वेन, अपि [तु] स्वत इत्याह — **कार्येति**। **श्रुताविति**। कार्यातिदेशेन च प्सेव द्विरुच्यते, ततो हलादिशेषे व्यञ्जनपरस्यैकस्यानेकस्य वा नास्ति श्रुतिकृतविशेष इति भावः। विशेषाङ्गीकारेणाह — **छान्दस इति**। यद्येकपकारदर्शनं तदा "सर्वे विधयः" इति द्विर्वचनाभावोपपत्तेर्न तदर्थमज्ग्रहणमित्यर्थः। रूपस्थानिवत्त्वस्याच आदेशे फलं नान्यत्रेति मतं निरस्यति — **रूपेति**। यदि ह्यत्र रूपस्थानिवत्त्वं न स्यात् निनियतुरिति स्यात्। **न प्रवर्तत इति**। द्विर्वचनकाले स्थानिरूपे सत्युत्तरकालमादेशरूपलाभाय प्रवर्तनीयमादेशशास्त्रेण। तत्प्रवृत्तिश्चापवादनिमित्तसत्त्वादपवादप्रवृत्त्या विहन्यत इत्यर्थः। **कृत इति**। परत्वात् तिङतदादेशाविति भावः। **ङकारस्येति**। ननु पूर्वसूत्रे सानुबन्धकस्यादेशत्वमुक्तम्, तद्वत् स्थानित्वेनापि भाव्यम्। नैष दोषः, आदेशो विधेयत्वात् प्रागनवगत एव विज्ञाप्यो वचनेन। वचने च सानुबन्धकरूपदर्शनमिति युक्तं तस्यैवादेशत्वम्। स्थानी तु विज्ञातरूप उद्दिश्यतेऽन्यविधानाय। तस्यां चावस्थायां नास्त्यनुबन्धसंनिधिः। अत एव स्थानितादशायामसंनिधानात् स्थान्यलाश्रयविधौ क्रियमाणो निषेधो न भवतीत्युक्तम्। न चैवमनुबन्धकार्येषु [२]स्थानिवत्त्वस्यैवाप्राप्तिरिति वाच्यम्, [३]स्थानित्वोपलक्षितधर्माश्रयकार्याणामादेशेऽतिदेशात्। न ह्यध्यापकवदयं पूज्य इत्यत्राध्यापनकालीनपूजाया एवातिदेशः, अपि [तु] कालान्तरगताया अपि। द्विर्वचननिमित्तेऽच्यादेशस्य स्थानिवत्त्वविधिरिति कथमत्र प्राप्तिः, अत आह — **अचीति**। अनैमित्तिकत्वादात्वस्य कथमचि परतोऽयमादेशः, तत्राह — **शिदिति**। कर्मधारयात् सप्तमी। ततश्च तदादिविधिरित्यस्ति शितोऽप्येशस्तत्सदृशत्वम्। **समाहारेति**। गोबलीवर्दवत् सामान्यविशेषवाचिनोर्द्वन्द्वः। **दध्येवेति**। यद्येवं कथं विशेषणविशेष्यभावः, उच्यते। यदा त्रपुसशब्दो दध्यवस्थाविशेषस्यैव वाचकस्तदा द्वन्द्वोक्तिः। यदि तु दध्यवस्थाविशेषसदृशस्यापि त्रपुसशब्दो वाचकस्तदा कर्मधारयत्वमुक्तम्। 'दध्येव' इत्येवकारः सभेदप्रतिसाधनेन सामानाधिकरण्यमुपपादयितुम्, न तु दधिमात्रवृत्तित्वं त्रपुसशब्दस्य द्योतयितुम्। ज्वरादिनिमित्तत्वादुपचारेण ज्वरादिव्यवहारो भवतु, इह त्वज्मात्रस्य चक्रतुरित्यादौ

---

[१] परिभाषा ३५.

[२] स्थानिवत्त्वस्यैव प्राप्तिरिति — ग.

[३] स्थानिवत्त्वोपलक्षित — ग.

[1]द्विर्वचनानिमित्तत्वात् कथं तद्व्यवहारः, अत आह — **तत्रेति**। अचि द्विर्वचनस्य [2]दर्शनान्निमित्तोपचार इति भावः। मुख्यस्यैव निमित्तस्य नैमित्तिकशब्देन व्यपदेश इति ब्रुवाणं प्रत्याह — **अथवेति**। अनिमित्तस्याप्यौपश्लेषिकाधिकरणत्वसंभव इत्यर्थः। निमित्ताभावे उपश्लेष[3]मात्रेणाधिकरणे ल्युटो दुर्लभत्वम्, णिजादौ [4]द्विर्वचनदर्शनात्, नामधातुष्वतिप्रसङ्गश्चेति मन्वानेन पक्षान्तरमुपन्यस्तमित्याह — **एतदिति**। विवादविषयत्वान्न प्रतिपद्यते। एतदुक्तं नाङ्गीकरोतीति यावत्। मत्वर्थीयस्त्वनिमित्तेऽपि भवतीति भावः। ननु [5]नानार्थलाभादेकस्मात् 'न ज्ञायते' इति कथम्, अत आह — **एकत्वादिति**। युगपदेकस्मान्नानार्थलाभो नेति भावः। प्रतिषेधानुवृत्तावप्युद्देश्यस्य कथं निषेधो न विधेयस्य, तत्राह — **स्थानिवदिति**। 'अच्चैव' इति [वक्तव्ये] कथं 'प्रत्ययश्च' इत्युक्तम्, अत आह — **द्विर्वचनेनेति**। अत्र तु पक्षे निमित्ते नैमित्तिकव्यपदेश उपपद्यतेतराम्। अचीत्येतस्य पृथङ्निमित्तत्वे कृत्यादिष्वतिप्रसङ्गः, अत उक्तम् — **अचीति**। अनुवादे तदादिविधिर्नास्ति। ततश्च चक्रतुरित्यादावव्याप्तिरित्यत्राह — [6]**ततश्चेति**। अनुवादेऽपि तदादिविधौ विरोधाभावात्। एकशेषेण लाभमाशङ्क्याह — **विरुद्धत्वादिति**। विरुद्धयोः सहविवक्षाभाव इति भावः। कथं विरुद्धयोः सहविवक्षा, अत आह — **सहेति**। **द्विवचनाभाव इति**। वृक्षावित्यादौ तु सहविवक्षासत्त्वाद्वाक्य एव द्विवचनान्तं प्रक्रान्तम्। व्यक्तिपक्षे आह — **अथवेति**। कथं कृत्वा ज्ञापकमित्यत आह — **न हीति**। **यियविषतीति**। [7]'सनीवन्तर्ध' इति [8]'स्मिपूङ्रञ्ज्वशां सनि' इति [9]चेत्। एतावेव तर्हि पुयण्ग्रहणविषयावित्यत आह — **तत्रेति**। **नन्विति**। सन्युवर्णान्तस्यावर्णपरे पवर्गादावित्वं विधीयते। तत्र यदि सर्वेषु पुयण्जिष्ववर्णपरेषूवर्णान्ताभ्यासासंभवः स्थानिवत्त्वमन्तरेणाद्विर्वचननिमित्तेऽच्यप्येतावज्ज्ञापयितुं शक्यते — [10]'द्विर्वचनानिमित्तेऽपि भवत्येव तुल्यजातीयानां स्थानिवत्त्वमिति। [11]**न पुनर्णाविति**। णिग्रहणं चेदित्वविधौ स्यात् तदा लभ्येतायमपि विशेषः, स च नास्तीत्यर्थः। **येनेति**। सनि सर्वेषु पुयण्जिष्ववर्णपरेषूवर्णान्ताभ्यासासंभवादवश्यं प्रत्ययान्तरमन्तर्भावनीयम्। तत्र चास्मान्न्यायादेकान्तर्भावनम्। ल्युडाद्यन्तर्भावने तु तदन्तात् सनभावान्न स्यादेकान्तर्भावनमिति णिरेवान्तर्भाव्यते। यत्र चाव्यवहितसनोऽसंभवस्तत्रायं प्रकार इति 'यियविषति' इत्यादौ भवत्येवाणावपीत्वम्॥

[१, ४६६–४६८]

(लघुविवरणम्) एवं तर्हि प्रकल्प्येति। सर्वेषु वाक्येषु सकृदेव लक्षणं प्रवर्तते। अतो यणादेशशास्त्रं स्वप्राप्तिसिद्धये [12]द्विर्वचनप्रवृत्तिं प्रतीक्षते। न च यणादेशशास्त्रप्रवृत्तेः प्रागियङादेशशास्त्रस्य प्रवृत्तिरिति भावः। नन्वेतेषु द्विर्वचनं प्राक् कस्मान्न भवतीत्यत आह — **एतेष्विति**।

---

[1] द्विर्वचननिमित्तत्वात् — ग.
[2] दर्शननिमित्तोपचार इति — ग.
[3] मात्रेणापि करणे — ग.
[4] द्विर्वचनादर्शनात् — ग.
[5] एकस्मान्नानार्थलाभादित्यन्वयः।
[6] प्रदीपे 'तस्य च तदादिविधिः' इत्यत्र 'ततश्च तदादिविधिः' इति पाठोऽभिसंहित इति भाति।
[7] पा. सू. ७. २. ४९.
[8] पा. सू. ७. २. ७४.
[9] च, इत्, इति छेदः।
[10] द्विर्वचननिमित्तेऽपि — ग.
[11] प्रदीपे 'तत्र णाविति नास्ति' इत्यत्र 'तत्र न पुनर्णावित्यस्ति' इति पाठोऽभिमत इति भाति।
[12] द्विर्वचननिमित्तं प्रतीक्षते — ङ, ढ.

इत्वार्थं चेत् कथं ज्ञापकमित्यत आह — **प्रसङ्गादिति**। उत्वस्य पारार्थ्यमुपपादयति — **तत्रेति**। किमित्युत्ववादिनेत्वं वक्तव्यम्, गुणावादेशयोः कृतयोर्द्विर्वचने च [1]'सन्यतः' इति सिद्धत्वादित्यत आह — **यत्रेति**। **तथेति**। 'चुटुतुशरादेः' इत्युत्वप्राप्तौ तद्बाधनायेत्यर्थः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामचन्द्रसरस्वतीश्रीचरणविरचिते
महाभाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादेऽष्टममाह्निकम्॥

[१, ४६६–४६८]

(**विवरणम्**) **अनच्कत्वादिति**। आटिटदित्यत्र णिलोपे कृते धातोर्द्वितीयाज्ग्रहितत्वादित्यर्थः। **अन्तरङ्गत्वादिति**। सनुत्पत्तेः प्रागेव णावेव प्राप्तत्वादित्यर्थः। ननु णिर्न द्विर्वचननिमित्तमजिति स्थानिवद्भावाभावात् [2]'सन्यतः' इतीत्वस्य सिद्धत्वात् 'ननु च त्वयापि' इत्ययुक्तमित्यत आह— **ओरिति**। 'परार्थम्' इत्यत्र ज्ञापकापेक्षयेत्वं परशब्देन विवक्षितमित्यभिप्रेत्य व्याचष्टे — **इत्वेति**। यत्र 'द्विर्वचनेऽचि' इति स्थानिवद्भावो 'यियविषति' इत्यादौ, तत्रेत्वार्थमित्यर्थः। **प्रसङ्गादिति**। वर्गप्रत्याहारजकारग्रहणादिति भावः। [3]'सन्यतः' इति विहितमित्वमिहानुवर्तमानं परार्थं मम भविष्यतीति [4]भाष्ये योजना। तत्र [5]'सन्यतः' इत्यभिधानं स्वरूपेणेत्वमपूर्वं न भवतीति दर्शयितुम्। अत एव वैषम्यप्रदर्शनाय 'अपूर्वमुत्वम्' इत्युक्तम्। अपूर्वत्वतदभावमात्रेण वैषम्यमस्याभिप्रेतमिति मन्वानस्तद्विघटयितुमाह परः — **ममापीति**। तद्व्याचष्टे — **उत्वमपीति**। नापूर्वत्वतदभावमात्रेण वैषम्यमभिप्रेतम्, किं तु गौरवतदभावाभ्यामिति दर्शयितुं भाष्ये उक्तम् — [6]**इत्वमपीति**। तदुपपादयति — **यत्रेति**। [7]**गुणावादेशयोरिति** शेषः। **तथेति**। 'चुटुतुशरादेः' इति प्राप्तेरिति शेषः। भाष्ये [8]"ओः पुयण्' इति ज्ञापकमङ्गीकृत्य स्थानिवद्भावोऽप्याश्रितः। सोऽनुपपन्न इत्याक्षिपति — **नन्विति**। णावपीत्वविधानादाह — **अन्तरङ्ग इति**। [9]णेरन्यत्राप्यननेनेत्वविधानादाह — **नित्यश्चेति**। **अनिष्टेति**। सन्वद्भावस्य चङ्परलघुपरत्वाभावेनाभावादवर्णाभ्यासता स्यादित्यर्थः। **अथेति**। [10]अङ्गवर्त्यवर्णपरत्वं यत्राभ्यासस्य द्विर्वचनोत्तरकालं तत्र द्विर्वचनेनान्तरङ्गस्य नित्यस्य च प्रतिबन्धो ज्ञाप्यत इत्यर्थः। **सूत्रमेवेति**। [11]न तूक्तप्रकारेण ज्ञापकमित्यर्थः। **ज्ञापकमिति**। स्थानिवद्भावस्येति शेषः॥

इति भाष्यप्रदीपविवरणे [12]प्रथमस्याध्यायस्य प्रथमे पादेऽष्टममाह्निकम्॥

---

[1] पा. सू. ७. ४. ७९.
[2] पा. सू. ७. ४. ७९.
[3] पा. सू. ७. ४. ७९.
[4] भाष्ययोजना — ट.
[5] पा. सू. ७. ४. ७९.
[6] उत्वमपीति — च, छ.
[7] गुणायादेशयोरिति — ञ.
[8] पा. सू. ७. ४. ८०.
[9] णेरन्यत्राननेनेत्व — च, छ.
[10] पुयण्ज्यवर्णपरत्वं — ञ.
[11] मदुक्तप्रकारेण — ञ.
[12] प्रथमस्य प्रथमे — छ, ञ, ट.

[१, ४६६–४६८]

(उद्द्योतनम्) भाष्ये **आटिटत्** अटतेर्ण्यन्ताच्चङि [1]'अजादेर्द्वितीयस्य' इति टीत्यस्य द्वित्वम्। भाष्ये **अनच्कत्वादिति**। 'आटिटत्' इत्यत्र णिलोपे धातोर्द्वितीयाऽग्रहितत्वादित्यर्थः। भाष्ये 'द्विर्वचनम्' इत्यादिवार्तिकं [2]'दाश्वान्साह्वान्मीढ्वांश्च' इति सूत्रस्थम्। **न हीति**। तुल्यबलत्वाभावादित्यर्थः। किकिनोः परतः [3]'उदोष्ठ्यपूर्वस्य' इत्युत्वं [4]'पपुरिः' इत्यत्र। वार्तिके न्यूनतामाशङ्क्य ते — **नन्विति**। **प्रकल्प्येति**। [5]'यदाकदाचिदप्यपवादप्राप्तिस्थलं परित्यज्येत्यर्थः। षष्ठीसमासे 'ओदौदादेशस्याभ्यासस्य' इति सामानाधिकरण्यायोगादाह — **ओदौतोरिति**। [6]'औकारमुदाहरति — **यथेति**। क्षु, ऊर्णु, हु, श्रु, एभ्यो णौ वृद्ध्यावादेशौ। ऊर्णोतिः [7]'अजादेर्द्वितीयस्य' [8]'न न्द्राः संयोगादयः' इति 'नु' इत्यस्य द्वित्वम्। [9]'आद्यतृतीयौ [10]'चवर्गादेः, [11]'द्वितीयष्टवर्गादेः[12]', [13]'चतुर्थपञ्चमौ शरादेरुदाहरणमिति विवेकः। ओकारमुदाहरति — **पुस्फारयिषतीति**। [14]'चिस्फुरोः' इत्यत्रैच इत्यनुवृत्तेर्गुणे कृते ओकारस्यात्वमित्याह — [15]'**अत्रेति**। **अत्र** पुस्फारयिषतीत्यत्र। अत्र शरादित्वमाक्षिप्य समाधत्ते — **अत्रेति**। **खय इति**। [16]'शर्पूर्वाः खयः' इत्यनेन। ननूदाहृतेषु [17]'वृद्धेः पूर्वं द्विर्वचनेन रूपसिद्धेरुत्वं न वक्तव्यमित्यत आह — **एतेष्विति**। [18]'सनपेक्षद्वित्वापेक्षया ण्याश्रितवृद्ध्यादेरन्तरङ्गत्वम्। एवं [19]'स्फुरतेरप्यात्वमन्तरङ्गम्। **इवर्णेति**। [20]'सन्यतः' इत्यनेन। ननु णेर्द्वित्वनिमित्तत्वाभावेन स्थानिवद्भावाभावात् [21]'सन्यतः' इत्येवेत्वं सिद्धमिति 'ननु च त्वया' इत्ययुक्तम्; अत आह — **ओः पुयण्जीति**। उत्ववादिनापीत्वं वक्तव्यम्, उत्वमधिकमिति न साम्यम्, अत आह — **उत्ववादी त्विति**। ज्ञापकापेक्षयेत्वं परशब्देन विवक्षितमित्याह — **इत्वार्थमिति**। [22]यत्र [23]'यियविषति' इत्यादौ 'द्विर्वचनेऽचि' इति स्थानिवद्भावस्तत्रेत्वार्थमित्यर्थः। **प्रसङ्गादिति**। पवर्गप्रत्याहारजग्रहणादिति भावः। [24]'सन्यतः' [25]'इत्यत इत्वमनुवर्तते, तत् परार्थं मम भविष्यतीति 'परार्थम्' इति भाष्यार्थः। [26]'सन्यतः'

---

[1] पा. सू. ६. १. २.
[2] पा. सू. ६. १. १२.
[3] पा. सू. ७. १. १०२.
[4] 'पपुरिरित्यत्र' इति नास्ति — म; वपुरित्यत्र — अ; पपुरित्यत्र — आ, इ, ऋ.
[5] यदाकदाचिदप्यपवादं परित्यज्येत्यर्थः — अ, म, ऋ.
[6] ओदौतमुदाहरति — आ, म, ऋ.
[7] पा. सू. ६. १. २.
[8] पा. सू. ६. १. ३.
[9] चुक्षावयिषति, जुहावयिषतीत्यर्थः।
[10] चवर्गादी — म.
[11] ऊर्णुनावयिषतीत्ययमित्यर्थः।
[12] टवर्गादिः — म.
[13] शुश्रावयिषति, पुस्फारयिषतीत्युभावित्यर्थः। एतेनान्नंभट्टपाठे 'तुतावयिषति' इति प्रदीपे नास्तीति प्रतीयते॥ चतुर्थपञ्चमे — अ, इ; चतुर्थपञ्चमौ तु शराद्युदाहरणमिति — म.
[14] पा. सू. ६. १. ५४.
[15] तत्रेति — आ, ऋ.
[16] पा. सू. ७. ४. ६१.
[17] 'वृद्धेः पूर्वम्' इत्यन्तमेवोपलभ्यते, उपरि नास्ति — इ.
[18] सनपेक्षितद्वित्वापेक्षया — ऋ.
[19] स्फुरतेरात्वमप्यन्तरङ्गम् — अ.
[20] पा. सू. ७. ४. ७९.
[21] पा. सू. ७. ४. ७९.
[22] 'यत्र' इति नास्ति — अ, म.
[23] 'यियविषति' इत्यस्यानन्तरं 'पिपविषते' इत्यादौ — म.
[24] पा. सू. ७. ४. ७९.
[25] इत्यनेन विहितमित्वमिहानुवर्तत इत्यर्थः।
[26] पा. सू. ७. ४. ७९.

इत्यभिधानं स्वरूपेणेत्वमपूर्वं न भवतीति सूचयितुम् । अत एव वैषम्यमाह — **अपूर्वमिति**। [1]परोऽपूर्वत्वतदभावाभ्यामेव वैषम्यमभिप्रेतमिति मत्वा तद्विघटयति — **ममापीति** भाष्ये। तद्व्याचष्टे — **उत्वमिति** । **अधिकविषये** ओदौदादेशस्येत्यत्र। ननु पूर्वसूत्रस्थमित्वमुत्तरसूत्रेऽनुवर्तत इति युक्तम्, प्रकृते [2]तु कथमनुवृत्तिः, अत आह — **तत्रेति** । 'अभ्यासस्य' इत्यपि न वाच्यमित्याह — **अभ्यासस्येति** । 'समानाश्रयम्' इत्यस्य तात्पर्यमाह — **यत्रेति** । [3]द्विर्वचनापेक्षयावादेरन्तरङ्गत्वं [4]नास्तीत्यर्थः। वक्तव्यत्वमुपपादयति — [5]**पवतेरिति**। **गुणः** द्वित्वात् पूर्वमित्यादिः। नन्ववादेशे [6]'सन्यतः' इत्येव सिद्धम्, अत आह — **पूर्वविप्रतिषेधादिति**। उदाहरणान्तरमाह — [7]**तथेति**। [8]**इत्वेति**। 'ओदौदादेशस्य' इत्यनेन प्राप्तोत्वबाधनार्थमित्यर्थः। तथा चोत्ववादिनो गौरवम् 'इत्वमपि त्वया' इत्यनेनोक्तमिति भावः। भाष्ये [9]'ओः पुयण्जि' इत्यस्य ज्ञापकत्वमङ्गीकृत्य स्थानिवद्भावोऽप्यङ्गीकृतः। तमाक्षिपति — **नन्विति**। **समर्थयिष्यते** व्याख्यास्यते । णौ गुणावादेरन्तरङ्गत्वम्, अन्यत्र 'यियविषति' इत्यादौ नित्यत्वमित्युभयोपादानम् । पूर्वं द्विर्वचनेऽभ्यासोकारः स्थानिवत्त्वमन्तरेण संभवति, [10]'पपतुः' इत्याद्यपि सिध्यति। **अचिकीर्तदिति**। कृत् णि चङ् इति स्थिते पूर्वं द्विर्वचनेऽभ्यासस्य लघुपरत्वाभावात् [11]'सन्वल्लघुनि' इति सन्वद्भावाभावात् [12]'सन्यतः' इतीत्वाभावादवर्णाभ्यासत्वोपपत्तेरित्यर्थः । **अथेति**। यत्राङ्गवर्त्यवर्णपरत्वमभ्यासस्य द्वित्वानन्तरं तत्र द्विर्वचनेनान्तरङ्गनित्ययोर्बाधो ज्ञाप्यत इत्यर्थः। **चक्रतुरिति**। अत्राभ्यासस्यावर्ण[13]परत्वाभावेन पूर्वं द्वित्वाभावात् परत्वान्नित्यत्वाच्च यणि कृतेऽनच्कत्वाद् द्वित्वं न स्यादित्यर्थः। **सूत्रमेवेति**। न तूक्तरूपज्ञापकव्याख्यानमित्येवकारार्थः। **यत्तु** 'नुनावयिषति' इत्यादि। **तेन** 'द्विर्वचनेऽचि' इत्यनेन ॥

इति श्रीमहामहोपाध्यायाद्वैतविद्याचार्यराघवसोमयाजिकुलावंतस-
श्रीतिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ महाभाष्यप्रदीपोद्द्योतने
प्रथमस्याध्यायस्य प्रथमे पादेऽष्टममाह्निकम् ॥

[१, ४६६–४६८]

(**रत्नप्रकाशः**) षष्ठाध्याये द्वित्वप्रकरणान्ते विद्यमानं [14]'द्विर्वचनं यण्' इत्यादिवार्तिकं वाश्रयितुं युक्तम्, प्रकृतसूत्रं वा [15]'ओः पुयण्जि' इति ज्ञापकोपष्टब्धमिति विचारयितुकामः प्रकृतसूत्रप्रयोजनं पृच्छति — **कानि पुनरिति** । **वक्ष्यति हीति** । [16]'दाश्वान्साह्वान्' इति सूत्रे । **पूर्वविप्रतिषेध इति**। नित्यानित्ययोर्द्विर्वचनयणाद्योरेककालप्रसक्ततयैतदुक्तम्। एतेन 'निनवनी-

---

[1] 'परः' इति नास्ति — अ.
[2] तुशब्दो नास्ति — अ.
[3] द्विर्वचनापेक्षयेत्वादेः — म.
[4] नास्तीत्यन्वयः — ऋ.
[5] 'पवतेरिति' इति नास्ति — म.
[6] पा. सू. ७. ४. ७९.
[7] 'तथेति' इति नास्ति — ऋ.
[8] उत्वेति – अ, ऋ.
[9] पा. सू. ७. ४. ८०.
[10] चक्रतुरित्याद्यपि — म.
[11] पा. सू. ७. ४. ९३. 'सन्वल्लघुनीति' इत्यादि 'इतीत्वाभावात्' इत्यन्तं नास्ति — म.
[12] पा. सू. ७. ४. ७९.
[13] परत्वाभावात् पूर्वं — अ.
[14] का. वा. ६. १. १२–९.
[15] पा. सू. ७. ४. ८०.
[16] पा. सू. ६. १. १२.

यिषति' इत्यादावप्यभ्यासे उकारः श्रूयेतेति वार्तिकमते दूषणं परिहृतम् । तत्र गुणावादेशयोरन्तरङ्गयोरादावेव प्रवृत्तत्वात्। **न पठितव्यो भवतीति** । नित्यानित्ययोर्विप्रतिषेधस्यान्याय्यत्वेन नित्यबाधनार्थं गुरुवचनाश्रयणस्यानुचितत्वादिति भावः । तन्मते वचनान्तरमपि गुरुभूतं कर्तव्यमित्याह — **पूर्वविप्रतिषेधे हीति** । **ओदौदादेशस्येति** । ओदौतोरादेशो यस्मिन्नेकाचि तस्य प्रथमादेर्योऽभ्यासः प्रथमोच्चारणविषयस्तस्य चुटुतुशरादेरत उद् भवतीत्येतदर्थकं वचनं कर्तव्यं स्यादिति भावः। एतदुदाहरणानि कौस्तुभानुवादेन दर्शितानि ससन्कानि 'चुक्षावयिषति' इत्यादीनि ज्ञातव्यानि। 'पुस्फारयिषति' इत्यत्र तु [1]"अभ्यासविकारे बाधका न बाधन्ते' इति न्यायेनोत्वप्रवृत्त्युत्तरं [2]"शर्पूर्वाः खयः' इत्यस्य प्रवृत्तिरित्यभ्यासस्य शरादित्वसंभवो ज्ञेयः। ओदौतोः किम्। चिचायिषति, चिखदिषति। चुटुतुशरादेः किम्। बिभावयिषति। यद्यपि 'छो छेदने' चच्छौ, 'दो अवखण्डने' ददौ, 'शो तनूकरणे' शशौ, इत्यत्र तद्वचनमतिप्रसक्तम्, तथाप्यौदादेशसाहचर्येण ओदादेशोऽपि परनिमित्तक एव गृह्यत इति न दोषः। [3]"आदेच उपदेशे' इत्यात्वं त्वपरनिमित्तकम्।

यत्तु [4]कौस्तुभकृतोक्तम् 'अतः किम्। ऋजुम् अणुम् ऋतुम् अंशं चाख्यत् — आर्जिजत्, आणिणत्, [आर्तितत्,] आंशिशत् । अत्र परत्वाद्वृद्धौ कृतायां टिलोपे सणिच्कस्य द्वित्वे कृते मा भूत्' इति । तन्न, [5]"णौ चङ्युपधाया ह्रस्वः' इति सूत्रगतभाष्यस्वरसेन सूत्रभाष्यवार्तिककृतां त्रयाणां मते वृद्धिं बाधित्वा टिलोप एव भवतीति व्यवस्थितत्वेन तत्र ओदौदादेशाभावादेवोत्वाप्रवृत्तेः। तस्मात् 'अतः' इति स्पष्टार्थम्। अभ्यासस्य किम्। उत्तरदलेऽप्युकारश्रवणं मा भूत्। एतेन "चुटुत्वित्यादि तर्ह्यङ्गस्यातो वा विशेषणं स्यात्। उभयथापि दोषः। शीतं लुनातीति शीतलूः सूर्यः, तमाख्यातुमिच्छति 'शिशीतलयिषति' इत्यत्र तकारादुत्तरस्यात उत्प्रसङ्गात्" इति [6]कौस्तुभो निरस्तः। ओदौदादेशशब्देन निनवनीयिषतीत्यादावतिप्रसङ्गवारणाय णौ परे द्विरुच्यमानस्यैव विशेषणीयत्वेन 'अतः' इति तपरकरणस्य स्पष्टार्थस्याजुपलक्षणार्थत्वेन यस्य ओदौदादेशविशिष्टस्य द्विरुच्चारणं प्रसक्तं तस्यैव चुटुतुशरादेरच उत्वस्यापादयितुं युक्तत्वात्। एतेन "नन्वेवमपि 'आञ्चकत्, औजढत्' इत्यादावभ्यासेऽकारश्रवणार्थं यत्नान्तरं वार्तिककृन्मते कुतो नापादितमिति चेन्न, तत्रेकारस्यैवेष्टत्वात्" इत्यपि [7]कौस्तुभः प्रत्युक्तः। तत्राभ्यासस्य ओदौदादेशविशिष्टैकाच्प्रथमोच्चारणविषयत्वाभावेन 'ओदौदादेशस्य' इतिवचनाप्रवृत्त्या सूत्रवार्तिककृतोर्मते रूपसाम्येन शङ्काया असंभवेन तदभ्युपगमेन समाधानस्याप्ययोगात् ।

अथोच्येत — वामनमाधवादिभिः 'आञ्चकत्, औजढत्' इत्येवं रूपं सिद्धान्तितम्। तुल्यजातीयत्वमवर्णपरत्वेनोपपादयन् भाष्यकारोऽपि तत्रानुकूल इति तदनुरोधेन शङ्काव्याजेन वार्तिककारमते प्रथमवार्तिकाप्रसक्ति[8]प्रयुक्तमभ्यासेऽकाराभावे तत्संपादने यत्नाधिक्यमापादितमेव। समाधानं तु बोपदेवमतावलम्बनेन कथंचित् कृतमप्रयोजकमेव, इति। तदपि न, [9]"ओः पुयण्ज्यि' इति सूत्रेण सन्परे णाववर्णादेरादेशस्य स्थानिवद्भावो ज्ञाप्यते। स चादेश ओकारस्थानिकोऽव् औकारस्थानिक आव् वा। [10]आकारोऽपि व्यपदेशिवद्भावेनाकारादिरित्येवम् 'ओदौदादेशस्य'

---

[1] परिभाषा ६७.
[2] पा. सू. ७. ४. ६१.
[3] पा. सू. ६. १. ४५.
[4] श. कौ. पुटम् २५३.
[5] पा. सू. ७. ४. १.
[6] श. कौ. पुटम् २५३.
[7] श. कौ. पुटम् २५३.
[8] प्रयुक्तेऽभ्यासे — ब.
[9] पा. सू. ७. ४. ८०.
[10] चिस्फुरोरिति विहित ओकारस्थानिक आकारोऽपीत्यर्थः।

इत्यादिगौरवमापादयतो भगवतोऽभिमतत्वेन चङ्परे णौ कृतस्याल्लोपस्य स्थानिवत्त्वसंभावनालेशस्याप्यभावेन णिज्विशिष्टस्यैव द्वित्वे 'आज्चिकत्' इत्यादिबोपदेवाभिमतस्य युक्तत्वात्। तस्य वार्तिककृतोऽपि मते सिद्धेश्च। [1]'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति दीर्घे सति 'औजीढत्' इति भवितव्यमित्यन्यदेतत्। **ननु च त्वयापीत्वं वक्तव्यमिति**। ज्ञापनव्याजेन [2]'ओः पुयण्जि' इति सूत्रेणेति शेषः। **परार्थमिति**। 'पिपविषते यियविषति, जिजावयिषति' इत्यत्रेत्वार्थमवश्यं त्वयापि [3]'ओः पुयण्जि' इति सूत्रे कर्तव्ये तत्रैव तत्साधारण्येन वर्गप्रत्याहारपरग्रहणमात्रेण सर्वेष्टसिद्धेरिति भावः। **ममापीति**। उद्ग्रहणमभ्यासग्रहणं चापूर्वं न कर्तव्यमेव, [4]'उत्परस्यातः' इत्यस्यानन्तरमेव 'ओदौदादेशस्य चुटुतुशरादेः' इति पठितुं शक्यत्वादिति भावः। **इत्वमपीति**। [5]'ओः पुयण्जि' इति कर्तव्यमिति भावः। **समानाश्रयमिति**। आदेशेन द्विर्वचनमिति शेषः। **तदर्थमिति**। 'जिजावयिषति' इत्येतदर्थं चेति शेषः। ननु 'चुटुतुशरादेः 'इत्यत्र 'चटुतुशरादेः' इत्येव पठ्यते। तेन 'जिजावयिषति' इति बिभावयिषतीत्यादिवदेव सिद्धमिति चेन्न, 'गुङ् डुङ् शब्दे' इत्याभ्यां णिचि सनि जुगावयिषति, जुङावयिषति' इत्यत्राप्यभ्यासे उत्वस्येष्टत्वेन तत्र 'चु' इति वर्गग्रहणस्यावश्यकत्वात्। तदेवं वार्तिकमतं दूषयित्वा अव्यापकमादेशनिषेधपक्षमुपेक्ष्य स्थानिवद्भावपक्षमुपसंहरति — **तस्मादिति**। इतोऽप्यादेशनिषेधपक्षमाश्रयन्तो निरस्ताः। यत्तूक्तम् "नन्वसत्यस्मिन् सूत्रे [6]'ओः पुयण्जि' इत्येवं समर्थयिष्यते। अन्तरङ्गो नित्यश्च विधिर्द्विर्वचनेन प्रतिबध्यत इति तत्र द्विर्वचने कृते यथाप्राप्तं भविष्यति, इति। तदयुक्तम्, यदि सामान्येन ज्ञापकमाश्रीयते 'अचिकीर्तत्' इत्यत्रापि पूर्वं द्विर्वचनप्रसङ्गादनिष्टरूपप्राप्तिः। अथ तुल्यजातीयापेक्षं ज्ञापकं व्याख्यायते, यथोक्तं भाष्यकारेण, तथा सति 'चक्रतुः, चक्रुः' इत्यादि न सिध्यतीति सूत्रमेव कर्तव्यम्। यत्तु तेन न सिध्यति तदर्थं ज्ञापकमाश्रयणीयं तुल्यजातीयापेक्षमिति सर्वेष्टसिद्धिः" इति। तन्न, [7]'ओः पुयण्जि' इति सूत्रस्य यकारांशेन 'द्वित्वनिमित्ताजादिप्रत्ययनिमित्तोऽच आदेशः स्थानिवद्रूपं लभते' इत्यर्थस्य ज्ञापकत्वसंभवेनेतरांशज्ञापितार्थस्य निर्दुष्टतायाः सर्वसंमतत्वेन चैतत्सूत्रानर्थक्यस्य सुवचत्वात्। अगतिकगतिज्ञापनाश्रयेण सूत्रप्रत्याख्यानं नोचितमित्यन्यदेतत्॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्र-
सरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे
प्रथमस्याध्यायस्य प्रथमे पादेऽष्टममाह्निकम्॥

[१, ४६६–४६८]

(नारायणीयम्) प्रयोजनापरिज्ञानात् प्रश्नोऽत्र नेत्याह — **अन्यथेति**। नैतद्विप्रतिषेधसूत्रस्योदाहरणप्रदर्शनायेत्याह — **अपूर्व इति**। परशब्दस्येष्टवाचितयोदाहरणप्रदर्शनमेव कुतो नेत्यत्राह — **न हीति**। तुल्यबलविरोधस्यैव विप्रतिषेधत्वान्नित्यानित्ययोश्चातुल्यबलत्वात्। **न ह्यत्रेति**। तत्श्चात्रासत्यस्मिन् सूत्रे इयङि सति तद्वतो द्विर्वचनात् 'निनियतुः' इति स्यात्। **यणोऽत्रेति**। यद्यत्र द्विर्वचनं, स्याद्यणपीति तर्कितेऽप्यपवादविषये न प्रवर्ततेऽयमियङ्[8] भीरुरित्यर्थः। अभ्यासे ओदा-

---

[1] पा. सू. ६. ३. १११.
[2] पा. सू. ७. ४. ८०.
[3] पा. सू. ७. ४. ८०.
[4] पा. सू. ७. ४. ८८.
[5] पा. सू. ७. ४. ८०.
[6] पा. सू. ७. ४. ८०.
[7] पा. सू. ७. ४. ८०.
[8] 'इयङ्' इत्यस्यानन्तरम् 'इति' शब्दोऽधिकः – ग.

द्यादेशाभावात् तेन नेदं सामानाधिकरण्यमित्याह — **ओदिति** । अर्थलभ्यकीर्तनम् । 'ऊर्णुनाव-यिषति' इति तवर्गादिरुदाहरणम् । तथाहि — द्विर्वचने णत्वस्यासिद्धत्वान्नुशब्दो द्विरुच्यते । न च [1]"पूर्वत्रासिद्धीयमद्विर्वचने' इति वाच्यम्, तस्यानित्यत्वात् । अत एव परभागे नकारश्रवणम् । तत्राभ्यासे कृतेऽपि णत्वे तस्योत्वेऽसिद्धत्वात् तवर्गादिः । ननु पूर्वविप्रतिषेधादेवाभिमतसिद्धिः, अत आह — **एतेष्विति** । यत्र समाननिमित्तत्वं तत्रैव वाचनिकोऽप्ययं पूर्वविप्रतिषेध इति भावः । यदि चान्तरङ्गमपि वाचनिकं द्विर्वचनं बाधत इति कल्प्येत तदा 'चिकावयिषति, जिहावयिषति' इति न स्यात् । न चात्र चवर्गादित्वादुत्वमिति वाच्यम्, अभ्याससंज्ञाप्रवृत्तिसमये तदभावादिति केचित् । तदयुक्तम्, णौ कृतस्य स्थानिवत्त्वमते 'चुकावयिषति, जुहावयिषति' इति भाव्यमुत्व-मेतन्मतेऽपि । तत्रोत्वस्य साध्यत्वात् । उपायमात्रभेदेऽप्युपेयैक्यात् । तत्साधनं च चवर्गादित्वा-देव । न हि क्वचित् सांप्रतिकासंभवेन तथाश्रयणमिति सर्वत्र तथात्वम् । तस्माद्बहिरङ्गस्या-सिद्धस्यान्तरङ्गबाधनमयुक्तम् । वचनं च समाननिमित्ते सावकाशमिति भावः । [2]"सन्यतः' इती-त्वस्योभाभ्यां वक्तव्यत्वादाह — **ओरिति** । अन्तरङ्गप्रवृत्तेः [3]"सन्यतः' इति सिद्धेः किमर्थं वाच्य-मित्यत्राह — **ज्ञापनार्थमिति** । इतरेणापि पूर्वविप्रतिषेधादुवर्णान्ताभ्यासताप्राप्तेस्तदवश्यं कार्यम् । समाननिमित्ते पूर्वविप्रतिषेध इति मत्वाह — **उत्वेति** । भाष्ये [4]"सन्यतः' इति प्रक्रान्तमित्वमत्र विधीयत इति इद्ग्रहणस्य परार्थत्वमुक्तम् । तदयुक्तम्, सूत्रकरणगौरवाशङ्कायामिद्ग्रहणमात्र-पारार्थ्यस्याकीर्तनीयत्वात् । अतोऽभिप्रायमाह — **इत्वार्थमिति** । 'यियविषति' इत्यादाविति भावः । पक्षद्वयेऽपीत्वविध्यर्थतया सूत्रस्य कर्तव्यत्वे आनर्थक्याभावाज्ज्ञापनार्थत्वानुपपत्तिरित्याशङ्क्य पवर्गा-दिग्रहणसामर्थ्यात् तदुपपत्तिरित्यभिप्रेत्याह — **प्रसङ्गादिति** । पयग्रहणस्येतरेणापि कर्तव्यत्वा-द्वर्गग्रहणाय यत्नाभावादनच्कोच्चारणासंभवेन यस्य कस्यचिदच उच्चार्यत्वात् प्रसङ्गाज्ज्ञापनायो-कारोच्चारणम् । णकारस्त्वधिकः क्रियते । त्वया तु 'ओदौदादेशस्य' इति बहु वाच्यमित्यर्थः । उक्तमजानता इद्ग्रहणमात्रपारार्थ्यं प्रतिपद्यमानेन 'ममापि' इत्युक्तम् । तद्व्याचष्टे — **उत्व-मपीति** । यावच्छक्यं गौरवं परिहरति — **तत्रेति** । स्वाभिप्रायप्रकटनग्रन्थः 'इत्वमपि' इति । तमुपपादयति — **यत्रेति** । ननु जिग्रहणं विप्रतिषेधवादिना न कर्तव्यमित्यत्राह — **तथेति** । च-वर्गादित्वादुत्वप्राप्तिः । इदानीं हि ज्ञापकमिदं सुतरां भवति । 'यियविषति' इत्यादावपि गुणावोः कृतयोः स्थानिवत्त्वाभावादुवर्णान्ताभ्यासासंभवात् । कृतानां तु स्थानिवत्त्वं न कल्प्यते, रूपस्थानि-वत्त्वस्य क्वाप्यदृष्टचरत्वात्, निन्यतुरित्यादावियङ्प्रसङ्गाशङ्कायाश्च । तथा हि — द्विर्वचनकाले स्थानिवत्त्वानुमानम्, उत्तरकालं चादेशरूपावस्थानमेव । अन्यथा कथमुवर्णान्ताभ्यासोऽवर्णपर-पवर्गादिपरः स्यात् । तथा च निन्यतुरित्याद्यसिद्धिः स्यादिति शङ्का स्यादेव । **सूत्रमेवेति** । एवकारो भिन्नक्रमः, कर्तव्यमित्यनन्तरं द्रष्टव्यम् ॥

इति श्रीमहोपाध्यायधर्मराजयज्वशिष्यशास्त्रिनारायणकृतौ कैयटीयटीकायां
प्रथमस्याध्यायस्य प्रथमे पादेऽष्टममाह्निकम् ॥

---

[1] परिभाषा १२६.
[2] पा. सू. ७. ४. ७९.
[3] पा. सू. ७. ४. ७९.
[4] पा. सू. ७. ४. ७९.

प्रथमाध्यायस्य प्रथमे पादे नवममाह्निकम्

अदर्शनं लोपः १. १. ६०.

[१, ४६९–४७१]

(**लघुविवरणम्**) 'अर्थस्य' इति भाष्यमनुपपन्नम्, अदर्शनशब्दो हि स्वार्थं प्रत्याययति, तत-श्चार्थस्यैव [1]संज्ञा न शब्दस्येत्यत आह — **स्वं रूपमिति**। ननु [2]"चादिलोपे' इत्यादौ लोपशब्देना-दर्शनं न भाव्यत इति नास्तीतरेतराश्रयत्वमित्यत आह — **विधीति**। नन्विहेतिकरणो नास्तीत्यत आह — **इहापीति**। नन्वनेकयोगव्यवहितः कथमनुवर्तयितुं शक्यत इत्यत आह — **लोप इतीति**। ननु 'त्रपु' इत्यादावणोऽदर्शनं न भावितमित्यत आह — **यदीति**। ननु प्रत्ययपरत्वाभावेऽपि प्रत्यय-लक्षणेनाङ्गसंज्ञा भविष्यतीत्यत आह — **विधानेति**। 'यस्माच्च' इत्यनुपपन्नम्, न ह्यत्राणो विधि-रस्तीत्यत आह — **सोरिति**। 'न तत्प्रत्यये' इत्यनुपपन्नम्, सोः परत्वादित्यत आह — **ञ्णितीति**। 'यच्च' इत्यनुपपन्नम्, नहि ञ्णित् प्रत्ययः पर इत्यत आह — **सुशब्द इति**। 'न तस्मात्' इत्य-नुपपन्नम्, सुप्रत्ययस्य विधानादित्यत आह — **तस्मादिति**। पूर्वोदाहरणाद्विशेषमाह — **अनाङ्ग-मिति**। कुतः प्रसक्तिरित्यत आह — **शास्त्रादिति**। नन्वेतत् कथं लभ्यत इत्यत आह — **स्थान इति**। लोपसंज्ञाभावे दोषमाह — **ततश्चेति** ॥

[१, ४६९–४७१]

(**विवरणम्**) नन्वर्थप्रत्यायनाय शब्दप्रयोगाददर्शनशब्दः स्वार्थं प्रत्याययतीति सिद्धार्थस्य संज्ञे-त्यत आह — **स्वं रूपमिति**। यद्यपि स्वरूपमप्यर्थ एव, तथापि स्वरूपातिरिक्तोऽभावलक्षणोऽर्थो विवक्षितः। **नानुवाद इति**। तत्र ह्यर्थनिमित्ता संज्ञा, न संज्ञानिमित्तोऽभाव इत्यर्थः। नन्विति-करणस्य सतोऽर्थविपर्यासकत्वम्, स चेह नास्तीत्यत आह — **इहापीति**। असंबद्धपदव्यवायान्नेह तस्यानुवृत्तिरिति चेत्, तत्राह — **लोप इतीति**। लोपनं लोप इत्यन्वर्थता। इतरेतराश्रयपरिहार-मुपजीव्य चोद्यमेतदित्याह — **यदीति**। 'यस्माच्च' इति भाष्यम्। कस्मादित्यत आह — **विधा-नेति**। अत्र प्रत्ययो नाणित्याह — **सोरिति**। [3]"चादिलोपे' इत्यादिसंग्रहाय 'अर्थाद्वा' इत्युक्तम्। नन्वेतावदिह सूत्रम् 'अदर्शनं लोपः' इति, कथमेतावता प्रसक्तस्येति लभ्यते, तत्राह — **स्थान इति**। **अर्थात्** कर्तृलक्षणादित्यर्थः। प्रसक्तिः शास्त्रत एवाभिमतेति चोद्यमित्याह — **अत्रापीति**। न केवलं शास्त्रत एव प्रसक्तिः, किं त्वर्थादपीत्युत्तरेऽभिप्रायः ॥

[१, ४६९–४७१]

(**उद्द्योतनम्**) नन्वर्थप्रत्यायनाय शब्दप्रयोगाददर्शन[4]शब्दादर्थस्य संज्ञा सिद्धा, अत आह —

---

[1] संज्ञा सेत्स्यतीत्यत आह — ण.
[2] पा. सू. ७. १. ६३.
[3] पा. सू. ८. १. ६३.
[4] शब्दार्थस्य — अं, ऋ.

स्वं रूपमिति। यद्यपि शब्दोऽप्यर्थः, तथापि तद्व्यतिरिक्तार्थस्येति भाष्यार्थः। **नानुवाद इति**। तत्र ह्यर्थनिमित्ता संज्ञा, न संज्ञानिमित्तोऽर्थः, पूर्वसिद्धस्यैवानुवादादित्यर्थः। नन्वत्रेतिर्नास्ति, अत आह — **इहापीति**। **स एव** [1]'नवेति'सूत्रस्थ एव। असंबद्धव्यवायान्नानुवृत्तिरिति चेत्, तत्राह — **लोप इति**। [2]लोपनं लोप इत्यन्वर्थता। इतरेतराश्रयपरिहारोपजीवनेन शङ्क्येयमित्याह — **यदीति**। भाष्ये **अणोऽदर्शनमिति**। [3]'त्रपुजतुनोः षुक्' इति विहितस्य। 'यस्माच्च' इति भाष्यतात्पर्यमाह — **अङ्गसंज्ञेति**। त्रपुशब्दात् सोर्विधानेऽप्यणोऽविधानात् तस्मिन् परतोऽङ्गत्वाभावान्न वृद्धिप्रसङ्ग इति 'यस्माच्च' [4]इत्यादिभाष्यार्थः। तमक्षरारूढं करोति — **त्रपुशब्दादिति**। पूर्वभाष्येण पौनरुक्त्यं निराह — **अनाङ्गमिति**। [5]'चादिलोपे' इत्यादिसंग्रहार्थम् 'अर्थाद्वा' इत्युक्तम्। नन्वयमर्थोऽस्मात् सूत्रान्न प्रतीयते, अत आह — [6]**स्थान इति**। 'ग्रामणीः' इत्यत्राणः प्रसङ्गमाह — **अर्थेति**। **अर्थः** कर्ता, **उपपदं** कर्मवाचकग्रामपदम्। **धातुः** णीधातुः। अर्थग्रहणमर्थात् प्राप्त्यर्थम्। **शास्त्रात्** [7]'कर्मण्यण्' [8]इत्यस्मात्। [9]चाहयोर्लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता, एवश्चेदवधारणे प्रयुज्यते। गम्यमानार्थत्वादप्रयोग एव लोपः। देवदत्त एव ग्रामं गच्छतु, स एवारण्यं गच्छतु। अरण्यं चेत्यर्थः। अत्र प्रथमा तिङ्विभक्तिर्नानुदात्ता। चादिपञ्चकलोपे प्रथमा तिङ्[10]विभक्तिर्वानुदात्ता। एतदुदाहरति — **शुक्ला व्रीहय इति**। अत्र श्वेता [11]गाश्चेति चकारलोपः। ननु षष्ठी[12]ग्रहणाननुवृत्तावपि 'शुक्ला व्रीहयः' इत्यादौ स्वरो न सिध्यतीति शङ्कते — **अथ प्रसक्तेति**। शास्त्रत एव प्रसक्तिमभिप्रेत्येयं शङ्केत्याह — **अत्रेति**। शास्त्रादर्थाद्वा प्रसक्तिमात्रमभिमतम्, न तु शास्त्रत एवेत्यभिप्रेत्य समाधत्ते—भाष्ये **अस्तु तर्हीति**। **प्रसङ्गेति**। अपवादविषयपरिहारेणोत्सर्ग[13]प्रवृत्तेरित्यर्थः॥

[१. ४६९–४७१]

(**रत्नप्रकाशः**) **शब्दस्य मा भूदिति**। [14]'स्वं रूपम्' इति वचनादिति शेषः। **इतरेतराश्रयमिति**। विधिप्रदेशेष्विति शेषः। **इतिकरण इति**। [15]'आदेः परस्य' इत्यत्रेवात्रापि तदेवेतिकरणमनुवर्तत इति भावः। लोप इत्यन्वर्थसंज्ञाकरणसामर्थ्यादप्यर्थस्य संज्ञा सिध्यति। **सतोऽप्युक्तमिति**। उच्चारणाभावतात्पर्यकदर्शनाभावस्य लोपसंज्ञायां [16]'तस्य लोपः' इत्यादौ योऽनुबन्धस्तस्यानुच्चारणं भवतीत्यर्थसंभवेन नान्योन्याश्रयतेति भावः। **सर्वप्रसङ्ग इति**। विशेषानुपादानादिति भावः। **प्रत्ययलक्षणं कार्यं प्राप्नोतीति**। प्रत्ययलोपे परे प्रत्ययाश्रितं कार्यं भवतीति विधिपरत्वमेव भवति [17]'प्रत्ययलोपे' इत्यस्येति मन्यते। **नैष दोष इति**। 'प्रत्ययलोपे तल्लक्षणम्' इत्येव सिद्धे पुनः प्रत्ययग्रहणात् तत्सूत्रं नियमपरमिति वक्ष्यते। प्रत्ययलोपस्य स्थानिवत्सूत्रेण प्रत्ययसंज्ञायां सत्यां [18]'सुप्तिङन्तं पदम्' इत्यादिसूत्रैरेव पदसंज्ञादिकं सिध्यति। 'त्रपु,

---

[1] पा. सू. १. १. ४४.
[2] पा. सू. ४. ३. १३८.
[3] इति भाष्यार्थः — आ, म, ऋ.
[4] पा. सू. ८. १. ६३.
[5] स्थानेति — अ, म, ऋ.
[6] पा. सू. ३. २. १.
[7] इति शास्त्रात् — ऋ.
[8] विभक्तिर्वा नानुदात्ता — अ, ऋ.
[9] गावश्चेति — म, ऋ.
[10] ग्रहणानुवृत्तावपि — अ.
[11] प्रवृत्तिरित्यर्थः — अ.
[12] पा. सू. १. १. ६८.
[13] पा. सू. १. १. ५४.
[14] पा. सू. १. ३. ९.
[15] पा. सू. १. १. ६२.
[16] पा. सू. १. ४. १४.

जतु' इत्यादौ तु लोपस्य ञिदादिसंज्ञायां सत्यामपि तत्प्रतियोगिनो ञिदादिप्रत्ययस्य त्रपुजतुप्रभृतिभ्यो विहितत्वाभावेन प्रतियोगिद्वारकविधानघटिताङ्गसंज्ञाया अभावेनैव वृद्ध्यादिकं न भविष्यतीति भावः। **यस्मादिति**। धात्वादेः। **प्रत्ययविधिरिति**। घञादिप्रत्ययविधिः। **प्रत्यय इति**। अतिदेशलब्धप्रत्ययसंज्ञक इत्यर्थः। **यच्चेति**। त्रपुजतुप्रभृति। **प्रत्यये** उक्तलक्षणे। **प्रत्ययविधिः** ञिदादिप्रत्ययविधिः। एतेन '**यस्मादिति**। त्रपुशब्दात् सोर्विधानम्। **न तत्प्रत्यय इति**। ञ्णिति वृद्धिनिमित्त इत्यर्थः। **यच्चेति**। सुशब्दे। **न तस्मादिति**। तस्मात् त्रपुशब्दात् सोरन्यस्याणो विधानं नास्तीत्यर्थः' इति कैयटो निरस्तः। तत्र सुप्रत्ययविधानस्य सत्त्वेन तदभावेऽपि सुप्रत्ययसंज्ञके परे तत्प्रतियोगिप्रयुक्तविधिघटिताङ्गसंज्ञाया अपि सत्त्वेनाप्रस्तुतसुप्रत्ययस्य तद्भेदस्य च निवेशनेन प्रकृतभाष्यव्याख्यानानौचित्यात्। **तुक् प्राप्नोतीति**। अनाङ्गत्वादिति शेषः। **सिद्धं त्विति**। विशेषनैरपेक्ष्येण कृतापि लोपसंज्ञा प्रसक्तशब्दादर्शननिष्ठा सत्येव शास्त्रव्यवहारोपयोगिनी भविष्यति, [1]'प्रत्ययलोपे' इत्यत्र प्रत्ययादेशो लोपः प्रत्ययलोप इत्याश्रयणादिति भावः। ननु [2]'चादिलोपे विभाषा' [3]'ल्यब्लोपे कर्मण्यधिकरणे च' इत्यत्रादेशादेशिभावासंभवात् कथं त्वदुक्तमुपपद्यत इति चेन्न, तत्रापि चादिल्यबन्तार्थस्य गम्यमानत्वे तेषां लोपो भवतीति विध्यनुमानसंभवेनादेशादेशिभावाश्रयणे बाधकाभावात्। एवमेव हि [4]'ढकि लोपः' इत्यत्र ढको निमित्तत्वाश्रयणबलेन ढग्विधिरनुमीयते। मदुक्तभाष्याशयमबुद्ध्वा शङ्कते — **यदीति**। **ग्रामणीरिति**। अणः प्रसङ्गे क्विपो विधानात् तत्र प्रसक्तस्याणोऽदर्शनं वर्तत इति दोष इति मन्यते। **षष्ठीनिर्दिष्टस्येति**। एतदभिप्रायः प्रागेवोक्तः। तथा च 'ग्रामणीः' इत्यत्राणोऽदर्शनसत्त्वेऽपि तस्य षष्ठीनिर्दिष्टप्रतियोगित्वं नास्ति, क्विब्विधावणः षष्ठीनिर्दिष्टत्वाभावादिति न दोष इति भावः। एतेन 'षष्ठीग्रहणमप्यनुवर्तते' इति कैयटो निरस्तः। [5]'तस्य लोपः' इत्यादौ पदार्थयोरन्वयाभावापत्तेः। षष्ठीनिर्दिष्टादर्शनस्य संज्ञिनोऽप्रसिद्ध्या लोपसंज्ञाविधानासंभवाच्च। **चाहलोप इति**। च, अह, इत्येतयोर्लोपे सति एवेत्यवधारणे वर्तमाने प्रयुज्यमाने प्रथमा तिङविभक्तिर्नानुदात्तेति सूत्रार्थः। उदाहरणं तु 'देव एव ग्राममरण्यं गच्छतु'। अत्र ग्राममरण्यं चेति चार्थो गम्यत इति चलोपोऽस्ति। 'देव एव ग्रामं गच्छतु' अत्र ग्रामं केवलमित्यहार्थो गम्यते। **चादिलोप इति**। चवाहाहैवानां लोपे प्रथमा तिङविभक्तिर्वानुदात्ता स्यादिति सूत्रार्थः। शुक्ला व्रीहयो भवन्ति, श्वेता गा आज्याय दुहन्ति। चलोपोदाहरणमिदम्। 'प्रसक्तादर्शनं लोपः' इत्युक्तेऽपि चाहादिप्रसङ्गे [6]लोपस्याविधानात् कथमुपपत्तिरिति पृच्छति — **अथेति**। उत्तरमाह — **को हीति**। नान्यः कोऽपीति भावः। [7]**यत्र चेति**। यस्यार्थो गम्यते स न प्रयुज्यते, अतस्तस्य प्रसक्तस्यादर्शनमिति युक्तमिति भावः। **क्विपासौ बाध्यत इति**। [8]'सत्सूद्विष' इति क्विपोऽणपवादस्य विधानादिति भावः॥

---

[1] पा. सू. १. १. ६२.
[2] पा. सू. ८. १. ६३.
[3] का. वा. २. ३. २८–१, २.
[4] पा. सू. ४. १. १३३.
[5] पा. सू. १. ३. ९.
[6] लोपस्य विधानात् — ब.
[7] भाष्ये 'यत्र गम्यते चार्थः' इत्यत्र 'यत्र च गम्यतेऽर्थः' इति पाठः स्वीकृत इति भाति।
[8] पा. सू. ३. २. ६१.

[१, ४६९–४७१]

(नारायणीयम्)

विश्वलोपावधिर्विष्णुर्विश्वप्रत्ययलक्षणः ।
अलोपो मायिकोऽव्यान्मा मतिं ददमेयगाम् ॥

शब्दानामर्थपरत्वादर्थसंज्ञा सिद्धेत्यत आह — **स्वं रूपमिति** । न च शब्दसंज्ञायां संज्ञावैयर्थ्यम्, लाघवसत्त्वात् । शास्त्रान्तरेण भावितस्यादर्शनस्य शास्त्रान्तरेऽनुवादोपपत्तेराह — **विधीति** । ननु विधिप्रदेशेष्वितरेतराश्रयश्चेदनुवादस्याप्यनुपपत्तिः । न हि यथा वृद्धिविधिप्रदेशेष्वितरेतराश्रयत्वेऽप्यनुवादः [1]'वृद्धिर्यस्याचामादिः' इत्यादौ तथात्र संभवति । तत्र हि शालादिस्थस्याकारस्य वृद्धितया वृद्धिविध्यनपेक्षानुवादोपपत्तिः, इह तु [2]'वेरपृक्तस्य' इत्यादिना भावितो लोपः [3]'प्रत्ययलोपे' इत्यादावनुवादनीयः, तत्राह — **चादीति** । अत्र हि विध्यभावितमेव चाद्यदर्शनं लोपशब्देनानूद्यते । नन्वत्र 'इति'करणं नास्ति, अत आह — **इहापीति** । अनेकसूत्रविच्छिन्नस्याधिकारानुपपत्तेराह — **लोप इति** । लोपनं **लोपः** । न चादर्शनशब्दो लोपक्रियात्मक इति शब्दसंज्ञात्वाभावः । यत्नोपलक्षणपरं तु भाष्यम् । तुशब्दद्योत्यं हेतुं सर्वप्रसङ्गे विशदयति — **यदीति** । शास्त्रभावितादर्शनसंज्ञायां नास्त्ययमतिप्रसङ्गः । स्वाभाविकादर्शनसंज्ञायां त्विति द्योतयितुं तुशब्द इत्यर्थः । अनङ्त्वाद्वृद्ध्यप्राप्तौ वर्णितायां 'यस्माच्च' इत्यादिभाष्यं किमर्थमित्याशङ्क्य प्रत्ययलक्षणेनाङ्त्वं सुपरत्वाञ्ञ्णित्परत्वाद्वा स्यादित्यनङ्त्वासिद्धिरिति शङ्कापरिहारार्थमित्याह — **अङ्संज्ञा चेति** । सोऽविधिरस्तीत्यत्राह — **न चेति** । अङ्शब्दस्य संबन्धिशब्दत्वात् 'ञ्नित्यादिर्नित्यम्' इति विशेषणाद्वा [4]'स्वपेक्षयाङ्स्यापि न वृद्धिः । ञ्णिदपेक्षमङ्त्वं ञ्णितोऽस्माद्विधानाभावान्नास्तीत्यर्थः । 'यस्माच्च' इति भाष्यभावमुपक्रमे वर्णयित्वा ञ्णिद्विधानमङ्गीकृत्य [5]'व्यवधानादनङ्त्वमुच्यत इति भ्रमवारणायाक्षराणि व्याचष्टे — **त्रपुशब्दादिति** । सुप्रत्यये तद् भवतीत्यत्राह — **ञ्णितीति** । अत्र चाङ्गमिति शेषः । अन्यथा प्रत्ययलक्षणेन णित्परत्वात् 'न तत्प्रत्यये परतः' इत्ययुक्तेः ॥ अन्येऽपि वदन्ति — प्रत्ययलक्षणेनापि न ञ्णित्परत्वम् । सोऽहि प्रत्यक्षत्वादानन्तर्यमिति । तदयुक्तम्, लुप्ते सौ प्रसङ्गात् । कुतो ञ्णित्यनङ्गमित्यत उक्तम् — **यच्चेति** । तत्र प्रत्ययशब्देन ञ्णित्परामर्शं वारयति — **सुशब्द इति** । ननु ञ्णित्परामर्शे किं बाधकम् । न तावत् 'न तत्प्रत्यये' इत्यनेन व्याघातः, तत्राङ्गमित्यध्याहारस्य यथाश्रुतानुपपत्त्योक्तत्वात् । न चात्राप्यङ्गाध्याहारे सति व्याघातः, इह तदनध्याहारात् । युक्ततरश्चात्र ञ्णित्परामर्शः, तत्परत्वेऽपि तद्विध्यभावात् तदपेक्षाङ्त्वाभाव इति भाष्यार्थत्वात् । एवं तर्हि [6]सुपरामर्शेऽपि बाधकाभावात् 'यस्माच्च' इत्यत्र [7]च प्रत्ययशब्दाभ्यां सुञ्णितोर्विवक्षितत्वादिहापि तथात्वस्य न्याय्यत्वादिहाप्यङ्गाध्याहारमभिप्रेत्य सुपरामर्शतया प्रत्ययशब्दो व्याख्यातः । एष ह्यत्र समुदायार्थः — विध्यधीनं सावङ्त्वं न ञ्णितीति । अन्यथा ञ्णित्यनङ्त्वमात्रे प्रतिपाद्ये 'एतावद्ग्रन्थानपेक्षणात्, ञ्णिद्विधानाभावमात्रस्य वक्तव्यत्वात् । अयं चार्थः सुपरामर्शे घटत इति सुष्ठूक्तम् 'सुशब्दे' इति । सोऽविधिरस्तीत्यत आह — **तस्मादिति** । प्रत्ययलक्षणकार्यस्य विध्य-

---

[1] पा. सू. १. १. ७३.
[2] पा. सू. ६. १. ६७.
[3] पा. सू. १. १. ६२.
[4] सुप्रत्ययापेक्षयेत्यर्थः ॥ स्वापेक्षयानङ्स्यापि — ग.
[5] व्यवधानादङ्त्वमुच्यत इति — ग.
[6] सुप्रत्ययपरामर्शेऽपीत्यर्थः । एवमग्रेऽपि ।
[7] चाप्रत्यय — ग.
[8] एव तावद्ग्रन्थानपेक्षणात् — ग.

भावेन परिहृतत्वाच्चोद्यावकाशः पुनः कथमित्यत्राह — **अनाङ्गमिति** । क्विपो [1]लोपसंज्ञाया अप्राप्तेर्भाष्यायोगमाशङ्क्याह — **क्विप इति** । [2]अदर्शनमित्यत्र 'अस्ति' इत्यध्याहार्यम् । उत्तरत्र चैतत्पदमनुषञ्जनीयम् । प्रकृतत्वादस्येति च द्रष्टव्यमित्यर्थः । 'सुकृत्' इत्यादाविष्यते क्विबदर्शनस्य लोपसंज्ञेत्यत्राह — **त्रप्विति** । किमिह प्रत्ययलक्षणं कार्यम्, तदाह — **तुगिति** । ननु 'क्विपि' इति न चोद्यते तुगित्यत्राह — **स चेति** । यद्वा, सति प्रत्यये यत्र यत् कार्यं प्राप्तं लुप्तेऽपि तस्मिंस्तत्र तद् भवतीति तुगभाव इत्यत्राह — **स चेति** । अयमर्थः प्रत्ययलक्षणसूत्रे न स्थायीत्यर्थः । यद्वा, 'त्रपु' इत्यत्र क्विपः शास्त्रीयादर्शनाभावात् स्वाभाविकादर्शनस्य सामान्याभावतया क्विब्मात्रप्रतियोगिकत्वाभावात् कथं तुक्प्राप्तिरिति शङ्कित्वाह — **त्रप्विति** । यावद्विशेषाभावातिरिक्तसामान्याभावाभावादिति भावः । अस्त्वत्र क्विबभावः । स तु न प्रध्वंसः, किं त्वत्यन्ताभाव इति कथं तत्प्रतियोगिनोऽत्यन्तमसतः कृत्संज्ञेत्यत्राह — **स चेति** । इहात्यन्तासत्त्वेऽप्यन्यत्र सत्त्वात् तत्र च कृत्संज्ञाप्रवृत्तेस्तत्प्रतियोगिकत्वाच्चास्याभावस्य तुक्प्राप्तिरित्यर्थः । किं च न चान्यत्रापि क्विबादेः सत्त्वम्, शशविषाणकल्पत्वात् तस्येति तृतीये वक्ष्यते । तथापि च यथा 'सुकृत्' इत्यादौ प्रत्ययलक्षणम्, एवमत्रापि प्रसङ्गः । प्रसक्तादर्शनस्य च संज्ञायां [3]'चादिलोपे' इत्याद्यनुवादः कथमित्यत आह — **शास्त्रादिति** । लक्षणगौरवं परिहरति — [4]**स्थान इति** । किमिह शास्त्रीयाणः प्रसक्तिः, उतार्थिकीत्याशङ्क्य द्विविधापीत्याह — **अथति** । परिहारान्तरसत्त्वादनङ्गत्वादवृद्धिरिति नोक्तम् । लक्ष्यनिष्ठं दोषं विशदयति — **ततश्चेति** । वचनं चाप्रतिपादकत्वलक्षणमप्रामाण्यं भजेतेत्यर्थः । आर्थिक्यत्र प्रसक्तिरित्यजानतश्चोद्यमित्याह — **अत्रापीति** । [5]'क्विप् च' इति क्विपोऽणपवादत्वाभावादाह — **सत्सूद्विषेति** । **प्रसङ्गाभाव इति** । अप्राप्त्यनुमानस्य [6]बाधत्वसिद्धान्तत्वात् ॥

प्रत्ययस्य लुक्श्लुलुपः १. १. ६१.

[१, ४७१–४७३]

(लघुविवरणम्) साक्षादिति । [7]'ण्यक्षत्रिय' इत्यादौ । **क्वचिदनुवर्तत इति** । [8]'जुहोत्यादिभ्यः श्लुः' इत्यादौ । **क्वचित् सामर्थ्यादिति** । [9]'कंसीयपरशव्ययोः' इत्यत्र । 'अप्रत्ययस्य' इत्यनुपपन्नम्, प्रत्ययव्यतिरिक्तस्यैवादर्शनस्य प्रत्ययसंबन्धिनो लुगादिसंज्ञाविधानादित्यत आह — **अविद्यमान इति** । ननु स्त्रीप्रत्ययेन तदन्तविधौ तदन्तस्य लुकि प्राप्ते तद्धितलुकि प्रकृतिनिवृत्त्यर्थमपि कस्मान्न भवतीत्यत आह — **पञ्चेति** । गोनिवृत्त्यर्थत्वं प्रत्ययग्रहणस्य न भवतीति शङ्कते —**गोरिति** । [10]'गोरतद्धितलुकि' इति समासान्ताप्राप्तावित्यन्वयः । तत्र हेतुः — **गोर्लुकि कृत इति** । अन्तरङ्गत्वात् समासान्तात् प्रागेवेत्यर्थः । समासार्थस्य पदस्य [11]समासशब्देनाभिधानाद् गोशब्दस्यावयवत्वे टचो व्यवधायकत्वाभावात् लुक् प्राप्नोतीत्यभिप्रेत्याह — **लुक् स्यादिति** ।

---

[1] लोपसंज्ञायाः प्राप्तेः — ग.
[2] इदं च भाष्ये बोध्यम् ।
[3] पा. सू. ८. १. ६३.
[4] स्थानेति — ग.
[5] पा. सू. ३. २. ७६.
[6] बाधकत्वसिद्धान्तत्वात् — ग.
[7] पा. सू. २. ४. ५८.
[8] पा. सू. २. ४. ७५.
[9] पा. सू. ४. ३. १६८.
[10] पा. सू. ५. ४. ९२.
[11] समासे शब्देनाभिधानात् — ण.

निर्दिश्यमानस्य टचा व्यवधानेऽपि वचनप्रामाण्याल्लुक् स्यादिति भावः। नित्यशब्दत्वाश्रयेण शङ्कते — **नन्विति**। शास्त्रानुसारेण लक्ष्यव्यवस्थापकत्वाभिप्रायेण परिहरति — **नैष इति**। ननु योगविभागे पृथग्विभक्त्युच्चारणं गौरवमेवेत्यत आह — **एकयोगेति**। उणादीनामव्युत्पन्नत्वं कथमवगम्यत इत्यत आह — **अत इति**। ननु विशिष्टनिर्देशाभावे यञञोरपि लुक् स्यादित्यत आह — **यञञोस्त्विति**॥

[१, ४७१–४७३]

(**विवरणम्**) ननु लुगादिविधौ प्रत्ययादर्शनविधिर्यथा स्यादिति कर्तव्यं प्रत्ययग्रहणमित्यत आह — **लुगादीति**। **क्वचित् . . . साक्षादिति**। [1]'लुगणिञोः' इत्यादौ। अतिप्रसङ्गनिरासाय विशेषे निर्दिष्टे सामान्यमपि तत्रान्तर्भूततया निर्दिष्टमिति [2]भावः। **क्वचिदिति**। [3]'यस्कादिभ्यः' इत्यादौ। ननु प्रत्ययादर्शनं न प्रत्यय इत्यप्रत्ययसंज्ञेष्यत एवेति 'अप्रत्ययसंज्ञाप्रतिषेधार्थम्' इत्ययुक्तमित्यत आह — **अविद्यमान इति**। प्रतियोगित्वेनेति शेषः। ननु [4]'गोस्त्रियोः' इत्यत्र स्त्रीति स्वरित[5]लिङ्गासङ्गात् [6]'स्वरितेनाधिकारगतिर्भवतीति [7]'स्त्रियाम्' इत्यधिकृत्य विहितानां टाबादीनां [8]ह्रस्वत्वयोग्यानां प्रत्ययानां ग्रहणात् प्रत्ययग्रहणपरिभाषया तदन्तविधावसति प्रत्ययग्रहणे प्रत्ययान्तस्यापि लुक् स्यात् पञ्चेन्द्राण्यो देवता अस्येति पञ्चेन्द्र इत्यादाविति कस्मान्नोक्तमित्यत आह — **पञ्चेति**। शङ्कते — **गोरिति**। "गोरतद्धितलुकि' इति [9]समासान्ताप्राप्तेरिति योजना। तत्र हेतुः — **गोर्लुकीत्यादिः**। पञ्चभिर्गोभिः क्रीत इत्यार्हीयस्य प्रत्ययस्य [10]'अध्यर्ध' इति लुक्। परिहरति — **कृत इति**। परत्वादिति शेषः। न च समासान्ते सति तेन व्यवधानं गोतद्धितलुकोरिति वाच्यम्, तद्धितलुकीति [11]सत्सप्तमीत्वात्, अभावेन पौर्वापर्यासंभवात्, संभवे वा समासार्थपदान्तः समासान्त इत्याश्रयणान्निर्दिश्यमानरूपस्य व्यवधानेऽपि वचनसामर्थ्याल्लुक्प्रसङ्गादिति भावः। नित्यशब्दाश्रयेण शङ्कते — **नन्विति**। शास्त्रपूर्वकलक्ष्य-[12]प्रतिपत्त्यभिप्रायेण परिहरति — **नेति**। **समुदायस्येति**। [13]'यस्य' इति लोपेनैवान्त्यलोपे सिद्धे पुनर्लुग्विधानात् [14]'अलोऽन्त्यस्य' इत्यस्याप्रवृत्तौ निर्दिश्यमानपरिभाषया सर्वस्य लुक् स्यादित्यर्थः। ननु योगविभागे सूत्रभेदः कृतः स्यादित्यत आह — **एकेति**। **छयताविति**। कंसशब्दात् [15]'प्राक् क्रीताच्छः', परशुशब्दात् [16]'उगवादिभ्यो यत्'। भाष्ये **परानिति**। [17]'आऽरुपरयोः खनिशुभ्यां डिच्च' इत्युप्रत्ययः। **कंसेति**। धातौ सप्तमीनिर्दिष्टे तदादिग्रहणात् कमिग्रहणेनैव सिद्ध इति

---

[1] पा. सू. २. ४. ५८.
[2] पा. सू. २. ४. ६३.
[3] पा. सू. १. २. ४८.
[4] लिङ्गात् — ञ.
[5] स्वरितेनाधिकारावगतिः — ञ, ट.
[6] पा. सू. ४. १. ३.
[7] ह्रस्वभाक्त्वयोग्यानां — ट.
[8] पा. सू. ५. ४. ९२.
[9] प्रदीपे 'समासान्ताप्राप्तौ' इत्यत्र 'समासान्ताप्राप्तेः' इति पाठोऽभिमतः।
[10] पा. सू. ५. १. २८.
[11] सति सप्तमीत्वात् — ट; निमित्तसप्तमीत्वाभावेन — ञ.
[12] प्रतिपत्रभिप्रायेण — च, छ, ट.
[13] पा. सू. ६. ४. १४८.
[14] पा. सू. १. १. ५२.
[15] पा. सू. ५. १. १.
[16] पा. सू. ५. १. २.
[17] उणादिसूत्रम् ३४.

शेषः। नन्वेवमपि [1]विशिष्टनिर्देशाभावे यञञोरपि लुक् स्यादित्यत आह — **यञञोस्त्विति**। अन्यशब्दः प्रकृतिव्यतिरिक्तप्रत्ययान्तरवाची। तेन [2]नञ्नः समासेन प्रकृतिरभिधीयत इत्यभिप्रेत्य व्याचष्टे — **प्रकृतीति**। अर्थसिद्धार्थाभिधानं [3]च तत्र भाष्ये — **यच्छयोश्चेति**। प्रातिपदिकाधिकारे कंसीयपरशव्यशब्दयोरवयवभूतं यत् प्रातिपदिकं तस्मात्परस्य लुगित्युक्ते छयतोर्लुग् भविष्यतीत्यर्थः॥

[१, ४७१–४७३]

(**उद्द्योतनम्**) ननु प्रत्ययग्रहणाभावे लुगादिसंज्ञा तददर्शनस्यैवेति न स्यात्, अत आह — **लुगादीति**। **साक्षादिति**। [4]'यूनि लुगणिञोः' इति। अत्रातिप्रसङ्गनिरासाय विशेषे निर्दिष्टे सामान्यमपि तत्रान्तर्भूततया निर्दिष्टमिति भावः। **क्वचिदिति**। [5]'विभाषा घ्राधेट्शाच्छासः' इत्यादौ। **सामर्थ्यादिति**। [6]'यूनि लुक्' इत्यादौ। ननु [7]प्रत्ययादर्शनं न प्रत्यय इत्यप्रत्ययसंज्ञाया इष्टत्वात् तन्निषेधो न युक्तः, अत आह — **अविद्यमान इति**। प्रतियोगित्वेनेत्यादिः। ननु "गोस्त्रियोः' इत्यत्र स्त्रीशब्दे स्वरित[8]लिङ्गात् स्त्र्यधिकारविहितटाबादीनां ग्रहणात् प्रत्ययग्रहणपरिभाषया तदन्तविधौ सति पञ्चेन्द्राण्यो देवता अस्य पञ्चेन्द्र इत्यत्रेन्द्रशब्दस्यापि लुक्प्रसङ्ग इति कुतो नोक्तम्, अत आह — **पञ्चेति**। गोर्लुगभावं शङ्कते — **गोरिति**। [10]'गोरतद्धितलुकि' इति [11]समासान्ताप्राप्तेरित्यन्वयः। तत्र हेतुः — [12]**गोर्लुकीति**। पञ्चभिर्गोभिः क्रीतः पञ्चगुः। [13]'तेन क्रीतम्' इति ठकः [14]'अध्यर्धपूर्व' इति लुक्। अत्र [15]'लुक् तद्धितलुकि' इति गोशब्दस्य [16]लुकि प्रतिषेधानर्थक्यमित्यर्थः। परिहरति — **कृत इति**। परत्वादित्यादिः। न च समासान्तेन व्यवधानान्न गोर्लुगिति वाच्यम्, [17]'लुक् तद्धितलुकि' इत्यस्य परसप्तमीत्वाभावात्। तथात्वेऽपि [18]'निर्दिश्यमानस्य' इति न्यायेन वचनसामर्थ्याद् व्यवधानेऽपि लुक्प्रसङ्ग इति भावः। नित्यशब्दाश्रयेण शङ्कते — **नन्विति**। शास्त्रपूर्वकप्रतिपत्त्यभिप्रायेण परिहरति — **नैष दोष**

---

[1] 'विशिष्टनिर्देशाभावे' इत्यस्यानन्तरम् अपि-शब्दोऽधिकः — च, छ.

[2] नञ्समासेन — ट.

[3] चैतद् भाष्ये — च, छ, ट.

[4] पा. सू. २. ४. ५८. यूनि लुक्, फक्फिञोरिति। अत्रातिप्रसङ्ग — म; यूनि लुगणिञोरित्युक्त्वातिप्रसङ्ग — अ.

[5] पा. सू. २. ४. ७८.

[6] पा. सू. ४. १. ९०. अजादौ प्राग्दीव्यतीये प्रत्यये विवक्षिते युवार्थस्य लुक् स्यादिति सूत्रार्थः। ग्लुचुकस्य गोत्रापत्यमित्यर्थे 'प्राचामवृद्धात्फिन् बहुलम्' इति फिन्प्रत्यये ग्लुचुकायनिः। तस्माद्युवार्थेऽणि (तस्यापत्यमित्यनेन) ग्लौचुकायनः। तस्य छात्र इत्यर्थे तस्येदमित्यणि विवक्षिते युवार्थस्य लुगनेन विधीयते। युवार्थस्यान्यस्याभावात् सामर्थ्यात् प्रत्ययस्येति लभ्यत इत्यर्थः।

[7] प्रत्ययादर्शनमप्रत्यय इत्यप्रत्यये संज्ञायाः — म.

[8] पा. सू. १. २. ४८.

[9] लिङ्गासङ्गात् — अ.

[10] पा. सू. ५. ४. ९२.

[11] प्रदीपे 'समासान्ताप्राप्तौ' इत्यत्र 'समासान्ताप्राप्तेः' इति पाठोऽत्राभिमतः।

[12] गोर्लुगिति — म.

[13] पा. सू. ५. १. ३७.

[14] पा. सू. ५. १. २८.

[15] पा. सू. १. २. ४९.

[16] लुक्प्रतिषेधानर्थक्यमित्यर्थः — म.

[17] पा. सू. १. २. ४९.

[18] परिभाषा १२.

इति। **समुदायस्येति**। [1]'यस्य' इति लोपेनान्त्यलोपस्य सिद्धतया लुक्यलोऽन्त्यपरिभाषानुपस्थानात् [2]'निर्दिश्यमानस्य' इति न्यायेन सर्वस्य लुक् स्यादित्यर्थः। योगविभागे 'गोः, स्त्रियाः' इति सूत्रविन्यासप्रसङ्गादाह — **एकेति**। **छयतावि**ति। कंसशब्दात् [3]'प्राक् क्रीताच्छः', परशुशब्दात् [4]'उगवादिभ्यो यत्'। तयोर्लुकि कंसीयस्य विकारः कांस्यम्, परशव्यस्य विकारः पारशवः। भाष्ये **परान् शृणातीति**। [5]'आऽपरयोः खनिशृभ्यां डिच्च' इत्युप्रत्ययः। **कंसशब्दस्येति**। धातौ सप्तमीनिर्दिष्टे केवलधातोः प्रयोगाभावात् तदादिग्रहणात् कमिग्रहणेनैव सिद्धेऽपीत्यादिः। [6]ननूणादीनामव्युत्पन्नत्वेऽपि यञ्ञोर्निवृत्त्यर्थं विशिष्टनिर्देशः कार्यः, अत आह — **यञ्ञोरिति**। अन्यशब्दः प्रकृतिव्यतिरिक्तप्रत्ययपरः। तेन [7]'नञः समासे प्रकृतिरभिधीयत इत्याशयेनाह — **प्रकृतीति**। भाष्ये [8]'**छयतोश्चेति**। सति प्रातिपदिकाधिकारे कंसीयपरशव्ययोरवयवभूतं यत् प्रातिपदिकं तस्मात् परस्य लुगित्युक्ते छयतोर्लुग् [9]'भविष्यतीत्यर्थः॥

[१, ४७१–४७३]

(**रत्नप्रकाशः**) **प्रत्ययग्रहणं किमर्थमिति**। लुगादिविधौ सर्वत्र प्रत्ययग्रहणसत्त्वाद् विनात्र प्रत्ययग्रहणं प्रत्ययस्यैव लुगादिकं भविष्यतीति भावः। **एताः संज्ञा इति**। एताभिः संज्ञाभिर्विधीयमाना आदेशा इति भावः। **गोरपीति**। पञ्चेन्द्र इत्यादौ स्त्रीप्रत्ययस्येव पञ्चगुरित्यादौ गोशब्दस्यापि लुक् स्यादिति भावः। **प्रकृतेरपीति**। समुदायस्य षष्ठीनिर्दिष्टत्वादिति भावः। **योगविभागादिति**। यद्यप्येकदेशे स्वरितत्वप्रतिज्ञानात् स्त्रीग्रहणमेवानुवर्तत इत्युचितं वक्तुम्, तथाप्युपायस्योपायान्तरादूषकत्वादेवमुक्तम्। [10]'गोरतद्धितलुकि' इति समासान्तप्रतिषेधसामर्थ्यादपि गोशब्दस्य लुग् नेति वक्तुं शक्यते। यत्तु कैयटेनोक्तम् 'कृते समासान्ते लुक् स्यादित्यर्थवानेव प्रतिषेधः' इति। तन्न, समासान्ते कृते सति तेन व्यवधानाल्लुक एवाप्रसक्तेः। तद्धितलुकि परे ह्युपसर्जनस्त्रीप्रत्ययस्य लुगिति तेनाप्युक्तं प्राक्। न हि गोशब्दं प्रति तस्य परत्वं नाश्रीयते स्त्रीप्रत्ययं प्रत्याश्रीयत इति युक्तिमद् भवति। यद्युच्येत 'गोशब्दस्य तत्रानुवृत्तिसामर्थ्याद् व्यवहितस्यापि लुग् भविष्यति' इति। तदपि न, तादृशक्लिष्टकल्पनापेक्षया [11]'अतद्धितलुकि' इति प्रतिषेधेन गोशब्दलुगभावे निश्चिते तस्य तत्रानुवृत्तौ मानाभावात्। **कंसीयपरशव्ययोरिति**। तत्सूत्र इति भावः। **विशिष्टनिर्देशादिति**। छयतोरवश्यकर्तव्यान्निर्देशादिति भावः। **उणादय इति**। उणाद्यन्तानीत्यर्थः। **अव्युत्पन्नानीति**। क्वचिद्व्युत्पत्तिप्रयुक्तं कार्यं न लभन्त इत्यर्थः। तत्र मानं तु [12]'अतः कृकमिकंस' इति सूत्रे कमेः पृथक् कंसग्रहणम्। यदीयं परिभाषा न स्यात् तदा 'उत्तरपदाधिकारे धातुग्रहणे तदादिग्रहणम्' इत्येव कंसशब्दस्यापि कम्यादित्वेन ग्रहणे सिद्धे किं तेन। **स एषोऽनन्यार्थ इति**। प्रकृतिनिवृत्त्यर्थ एव, न तु प्रत्ययनिवृत्त्यर्थः। यञञोस्तु लुग् न प्रसक्तः, तत्समुच्चयेन विधीयमानस्य लुकस्तदन्वितान्वयस्यौचित्यात्। उभयमपि न

---

[1] पा. सू. ६. ४. १४८.
[2] परिभाषा १२.
[3] पा. सू. ५. १. १.
[4] पा. सू. ५. १. २.
[5] उणादिसूत्रम् ३४.
[6] ननूणादीनामपि व्युत्पन्नत्वेऽपि — म.
[7] नञ्समासे — म.
[8] भाष्ये 'यच्छयोश्च' इत्यस्य स्थाने 'छयतोश्च' इति मद्रपुरीमुद्रिते पाठः।
[9] भवतीत्यर्थः — अ; म.
[10] पा. सू. ५. ४. ९२.
[11] पा. सू. ५. ४. ९२.
[12] पा. सू. ६. ३. ४६.

कर्तव्यमित्याशयेनाह — **उक्तं वेति**। [1]'ङ्याप्प्रातिपदिकात्' इति सूत्रे। **यच्छयोश्च लुगर्थमिति**। कंसीयपरशव्ययोः परौ यञञौ भवतः, तयोरवयवात् प्रातिपदिकात् परस्य लुक् चेति व्याख्यानाद् यच्छयोरेव लुग् भविष्यतीति भावः। यद्यपि तत्रोक्तम् — अत्र प्रत्ययग्रहणादेव सिद्धमिति ङ्याप्प्रातिपदिकग्रहणं न कर्तव्यमिति, अत्र तु विपरीतम्, तथाप्यसाधारणप्रयोजननिर्णयायैवं विचारः क्रियत इति न दोषः॥

[१, ४७१–४७३]

(नारायणीयम्) नन्वसति प्रत्ययग्रहणेऽदर्शन[2]मात्रस्येमाः संज्ञाः स्युः, तत्राह — **लुगादीति**। इहानेकसंज्ञाकरणात् तद्भावितस्य संज्ञा। अतोऽदर्शनमात्रस्य [न] प्राप्तिरस्ति, प्रत्ययादर्शनस्यैव तद्भावितत्वसंभवादित्यर्थः। नन्विह प्रत्ययग्रहणे सत्येव लुगादिभिस्तददर्शनस्य[3] भाव्यत्वलाभः। इतरथा तु प्रत्ययातिरिक्तस्याप्यदर्शनं तैर्भाव्येतेति नार्थलभ्यं प्रत्ययादर्शनस्य संज्ञित्वमिति चोद्यं सर्वत्र लुगादिविधौ प्रत्ययसंनिधिं ब्रुवता परिहृतम्। **सामर्थ्यादिति**। [4]'अत्रिभृगु' इत्यत्र गोत्राधिकारे सति गोत्रविहितस्य लुग्विधाने सामर्थ्यात् प्रत्ययसंनिधिः। ननु 'अप्रत्ययादर्शनस्य' इति वक्तव्यम्, अत आह — **अविद्यमान इति**। ननु स्त्रीप्रत्ययान्तप्रातिपदिकस्य लुग्विधिः स्यादसति प्रत्ययग्रहण इति किमिति न चोदितम्, अत आह — **पञ्चेति**। ज्ञापकाद् गोरपि न लुक्प्राप्तिरिति शङ्कते — **गोरिति**। अत्रेत्यस्य 'अतद्धितलुकि' इत्यनेनान्वयः। स्यादित्यत्र यदि गोलुक् स्यादिति शेषः। अतो गोर्न लुगिति विपर्यये पर्यवसानम्। ननु [5]'लुकः प्रागेव प्राप्तं समासान्तं निवारयितुं प्रतिषेधवचनमित्यत्राह — **गोर्लुकीति**। तद्धितार्थापेक्ष[6]द्विगुतत्पुरुषनिमित्तत्वात् समासान्तस्य, तद्धितलुगपेक्षत्वाच्च गोर्लुको यद्यपि लुक्समासान्तयोः साम्यम्, अथाप्यवयवापेक्षत्वाल्लुकोऽन्तरङ्गत्वम्, समुदायापेक्षत्वात्त्वचो[7] बहिरङ्गत्वमिति भावः। परिहरति — **कृत इति**। समासार्थोत्तरपदान्ताः समासान्ता इति पक्षेऽचोऽन्तरङ्गत्वम्। समासस्यान्त इत्यपि पक्षे तद्धितार्थविषये भवद्द्विगुतत्पुरुषापेक्षस्य तद्धितलुगपेक्ष[8]लुगपेक्षयास्त्येवान्तरङ्गत्वम्। सत्यपि वा साम्ये परत्वादच्प्राप्तिरित्यज्ञापकः प्रतिषेधो गोर्लुगभावस्य। न च कृते समासान्ते तत्सहितस्य लुक्प्राप्तिः, येन प्रतिषेधानर्थक्यतादवस्थ्यम्। समासान्तत्वपक्षे गोग्रहणेनाग्रहणात्, उत्तरपदान्तत्वपक्षेऽपि निर्दिश्यमानपरिभाषया [9]श्रुतिसंनिपातिरूपस्य लुग्विधानात्। अतो गोर्लुक्यप्यचः श्रवणं निवारयितुम् 'अलुकि' इति प्रतिषेधोऽर्थवानिति न ज्ञापकस्तल्लुगभावस्य। ननु समासान्ते सति लुका कथं पौर्वापर्यम्। नैष दोषः, सर्वत्रैवाभावेन पौर्वापर्यासंभवात् [सति] सप्तमीविज्ञानाद् गोऽन्तप्रातिपदिकस्य च लुग्विधानम्, तस्य चायं भक्त इति कथं व्यवधानम्। **स्वभावत इति**। अन्यथा विधिप्रदेशेष्वितरेतराश्रयापत्तेः। अत्र च वक्तव्यमुत्तरसूत्रे वक्ष्यामः। **शास्त्रेति**। तद्धितलुकि गोस्त्रियोरदर्शनं साध्वित्यन्वाख्यानात् तद्विपर्ययस्यासाधुत्वमेव लक्षणशरणो मन्येतेत्यर्थः। 'प्रकृतेरपि' इत्यनेन कदाचित् प्रत्ययस्य, कदाचित् प्रकृतेरिति प्रतिपत्तिं वारयति — **समुदायस्येति**।

---

[1] पा. सू. ४. १. १.
[2] मात्रेणेमाः —ग.
[3] तद्दर्शनस्य — ग.
[4] पा. सू. २. ४. ६५.
[5] गोरित्यादिः।
[6] द्विगुरूपतत्पुरुषेत्यर्थः।
[7] समासान्तस्य टच्प्रत्ययस्येत्यर्थः। एवमग्रेऽपि बोध्यम्।
[8] गोलुगपेक्षयेत्यर्थः।
[9] श्रुतिसंनिपातरूपस्य — ग.

एतदिति। [1]एतन्न्यायसाध्ये उपायान्तरं कीर्त्यत इत्यर्थः। योगशब्देन संबन्ध उच्यते, समास-निर्दिष्टानामित्यर्थः। शब्दाधिकारे हि यस्य शब्दस्य स्वरितं तस्य समासैकदेशस्याप्यनुवृत्तिः। 'छयतोः' इत्यस्य केनचिदविशेषणाद्विशिष्टशब्दार्थतया तद्व्याख्यानं कथमित्याशङ्क्य विशिष्टशब्देना-भिमतलुग्विषयाभिधानमित्यभिप्रेत्याह — **छेति**। एवकारेण यौ लुग्विषयत्वेन संमतौ तावेव निर्देष्टव्याविति विशिष्टशब्देन छयतोरभिधानमुचितमिति दर्शयति। यद्वा, 'छयतोः' इति निर्दे-शेऽपि प्रत्ययग्रहणपरिभाषया तदन्तस्य लुक्प्रसङ्गशङ्कां निर्दिश्यमानपरिभाषया तन्निर्देशसामर्थ्येन वा परिहरति — **छेति**। एवकारेण यौ निर्दिष्टौ तयोरेव लुगित्ययमर्थोऽवद्योत्यते। भाष्ये **परान् शृणातीति**। [2]'आङ्परयोः खनिशृभ्यां डिच्च' इति कुप्रत्ययः, डित्यभस्यापि टिलोपः। व्युत्पत्तेः प्रत्यक्षत्वात् कथमव्युत्पन्नत्वोक्तिः। न चैतच्छास्त्रे व्युत्पत्त्यभावाभिधानम्, [3]'उणादयो बहुलम्' इति वचनादेतच्छास्त्रीयत्वादुणादिव्युत्पत्तेः, अत आह — **अत इति**। व्युत्पत्तिकार्या-भावोऽभिधीयत इत्यर्थः। 'सर्पिषा' इत्यादौ व्युत्पत्तिकार्यस्य षत्वादेरिष्टत्वादाह — **क्वचिदिति**। ननूणादिप्रत्यय[4]निवृत्त्यर्थाभावेऽपि विशिष्टनिर्देशस्य प्रत्ययान्तरनिवृत्त्यर्थत्वादनन्यार्थत्वोपसंहारोऽयुक्त इति शङ्कां निरस्यति — **यजिति**। किमपेक्षमन्यत्वमित्यपेक्षायां प्रकृतिनिवृत्त्यपेक्षमित्यभिप्राये-णाह — **प्रकृतीति**॥

[१, ४७४–४७६]

(लघुविवरणम्) ननु षष्ठीनिर्देशार्थत्वे प्रत्याख्याते तुशब्दः प्रयोक्तुमुचितः, न तु वाशब्द इत्यत आह — **षष्ठीति**। षष्ठीनिर्देशार्थत्वं कथं प्रत्ययस्येत्यत आह — **आगस्त्येति**। **तदेति**। संख्यासाम्याभावादित्यर्थः। **तदागस्त्यादेशेनेति**। प्राग्दीव्यतीयेऽजादिप्रत्यये विवक्षितेऽपीत्यर्थः। **प्रत्ययस्येति**। प्रत्ययस्य लुक्, प्रकृतिभागस्य यथासंख्यमादेशाविति शेषः। तथाप्यागस्तीया इति कथं सिध्यतीत्यत आह — **गोत्र इति**। प्राग्दीव्यतीयाजादिप्रत्ययविवक्षायां चेति शेषः। कथं तर्हि भाष्यकारः प्रत्ययग्रहणस्य षष्ठीनिर्देशार्थत्वे स्थिते तर्ह्यर्थे वाशब्दं व्याचष्टे, अत आह — **भाष्यकारस्त्विति**। **सूत्रार्थ इति**। ततश्चाजादिप्रत्ययविवक्षायां [5]'गोत्रेऽलुगचि' इति लुकि प्रतिषिद्धे संनियोगशिष्टत्वादादेशस्याप्यभावे 'आगस्तीयाः' इति सिध्यतीत्यर्थः। 'अथ क्रियमाणेऽपि' इत्यनुपपन्नम्, [6]'निर्दिश्यमानस्यादेशा भवन्ति' इति सर्वादेशत्वसंभवादित्यत आह — **अलोऽन्त्य-स्येति**। ननु वचनं सूत्रं चेत् तत् संज्ञाविधाने चरितार्थमित्यत आह — **प्रत्ययस्येतीति**। ननु 'वचनप्रामाण्यात्' इति वार्तिकमनुपपन्नम्, षष्ठीनिर्देशार्थत्वस्य वार्तिककारमते स्थितत्वादित्यत आह — **वचनप्रामाण्यादितीति**। ननु लोपलुकोरुभयोरन्त्यादेशत्वेऽन्यतर[7]वैयर्थ्यादन्यतरस्य सर्वा-देशत्वे स्थिते लोप एव सर्वादेशः किं न स्यादित्यत आह — **विपर्ययस्त्विति**। तत्र हेतुमाह — **अनुपसंजातेति**। लोपविधानसमये तस्य वैयर्थ्यशङ्काभावादलोऽन्त्यपरिभाषोपस्थितौ लोपोऽ-न्त्यस्य स्थितः। यदीदानीं लुगलोऽन्त्यस्य स्यात् तर्हि लुग्वचनमनर्थकं स्यात्, लोपानुवृत्त्यैव सिद्ध-त्वादिति भावः। ननु तृतीयमेतदित्यत आह — **लोपेति**। नन्वेकदेशलोपो मुख्यः प्रत्ययलोपो

---

[1] एतन्न्याससाध्ये — ग.
[2] उणादिसूत्रम् ३४.
[3] पा. सू. ३. ३. १.
[4] भावप्रधानो बोध्यः, निवृत्त्यर्थत्वाभावेऽपी-त्यर्थः। निवृत्तिरूपार्थाभावेऽपीति वा।
[5] पा. सू. ४. १. ८९.
[6] परिभाषा १२.
[7] वैयर्थ्यादन्यतरादेशस्य — ण.

न भवतीत्यत आह — **अवयवेति**। प्रत्ययो हि समुदायः, स चैकदेशलोपे लुप्यत एवेति भावः। नन्वनुनासिकलोप उपधालोपनिमित्तं विहन्तीति सति विरोधे परत्वादुपधालोपे कृते [1]'सकृद्गतौ' इति न्यायादनुनासिकलोपो न भविष्यतीत्यत आह — **परत्वादिति**। **संग्मीयेति**। गमेर्विधिलिङ, [2]'समो गमि' इत्यात्मनेपदे छान्दसत्वाच्छपो लुकि रूपम्॥

[१, ४७४–४७६]

(विवरणम्) षष्ठीशब्देन तदर्थो लक्ष्यत इति व्याचष्टे — [3]**विशिष्टेति**। सति हि [4]'प्रत्ययस्येत्यस्मिन् स्थानग्रहणानुवृत्तेः प्रत्ययस्येति स्थानषष्ठी लभ्यत इति भावः। वार्तिककाराभिप्रेतं षष्ठीनिर्देशार्थत्वमुपपादयति — **आगस्त्येति**। **सर्वत्रेति**। प्राग्दीव्यतीयेऽजादिप्रत्यये विषयभूतेऽपीत्यर्थः। **सूत्रार्थ इति**। ततश्च लुकि प्रतिषिद्धे संनियोगशिष्टादेशाभावात् 'आगस्तीयाः' इति सिध्यतीत्यर्थः। वचनं न सूत्रम्, तस्य संज्ञाविधानेन चरितार्थत्वात्। किं तु तदेकदेश इत्याह — **प्रत्ययस्येतीति**। पुनःश्रुत्या सर्वस्य प्रत्ययस्येति लभ्यत इति भावः। ननूभयोर्लुग्लोपयोरन्त्यादेशत्वेऽन्यतरवैयर्थ्यादन्यतरस्य सर्वादेशत्वे लोप एव सर्वादेशः किं न स्यादित्यत आह — **विपर्यय इति**। न उपसंजातो [5]'विरोधी वैयर्थ्यशङ्कोद्भवो यस्य लोपस्य स तथोक्तः, तस्य भावस्तत्त्वम्, तस्मादित्यर्थः। **पाठेति**। स्वगतपरिगणनानन्तरमनुवर्तमानस्य परिगणनादिति भावः। **न त्विति**। अयं प्रत्ययलोपव्यपदेशो न गौणः, किं तु मुख्य एव, समुदायिलोपे समुदायस्यापि लोपादित्यर्थः। **अनुनासिकेति**। [6]'अनुदात्तोपदेश' इत्यनेन। भाष्ये **संग्मीयेति**। संपूर्वाद् गमेर्विधिलिङि [7]'समो गम्यृच्छिभ्याम्' इत्यात्मनेपद इटि सीयुटि शपो [8]'बहुलं छन्दसि' इति लुकि [9]'लिङः स लोपोऽनन्त्यस्य' इति सलोपे [10]'इटोऽत्' इत्यकारादेशे उपधालोपे च रूपम्॥

[१, ४७४–४७६]

(उद्द्योतनम्) [11]षष्ठीशब्देन तदर्थविशेषलक्षणेत्याशयेन व्याचष्टे — **विशिष्टस्येति**। प्रत्ययस्येत्युक्ते 'स्थाने' इत्यनुवृत्त्या स्थानषष्ठी लभ्यत इत्यर्थः। [12]'स्थानेयोगत्वालाभे बाधकमाह — **असतीति**। **यः कश्चिदिति**। [13]'प्रातिपदिकात्' इति पञ्चमीकल्पितषष्ठ्या इत्यादिः। **जनपद इति**। जनपदवाचिनोऽनन्तरस्य यस्य कस्यापि लुबङ्गीकारेऽतिप्रसङ्ग इत्यर्थः। यद्यपि पञ्चमीकल्पितषष्ठ्या अपि स्थानेयोगत्वमेवार्थः, अन्यथा 'शोभनाः' इत्यादेरपि [14]'लुबभावप्रसङ्गात्,

---

[1] परिभाषा ४०.
[2] पा. सू. १. ३. २९.
[3] प्रदीपे 'विशिष्टस्य षष्ठ्यर्थस्य' इत्यत्र 'विशिष्टषष्ठ्यर्थस्य' इति पाठ इति भाति।
[4] प्रत्ययस्येत्येतस्मिन् — ञ.
[5] विरोधः — ञ.
[6] पा. सू. ६. ४. ३७.
[7] पा. सू. १. ३. २९.
[8] पा. सू. २. ४. ७३.
[9] पा. सू. ७. २. ७९.
[10] पा. सू. ३. ४. १०६.
[11] षष्ठीशब्दस्य तदर्थ — म.
[12] स्थानयोगत्वालाभे — अ; 'स्थानेयोगत्वालाभे' इत्यादि 'पञ्चमीकल्पितषष्ठ्या अपि' इत्यन्तं नास्ति — म.
[13] पा. सू. ४.१. १.
[14] लुक्यभावप्रसङ्गात् — अ; लुगभावप्रसङ्गात् —आ, ऋ; लुप्प्रसङ्गात् — म.

तथापि प्रत्ययग्रहणस्यैवेदं प्रयोजनमुक्तम्। षष्ठ्यर्थप्रक्रमानुसारेण 'यः कश्चित्' इत्याद्युपक्रममात्रमिति बोध्यम्। ननु 'क्व पुनः' इत्यादिना प्रत्ययग्रहणस्य दूषितत्वाद् वाकारोऽनुपपन्नः, अत आह — **षष्ठीति**। स्थानिविशेष[1]निर्देशार्थत्वमिति यावत्। भाष्यकृता दूषितम्, न [2]तु वार्तिककृतेति वाशब्दो युक्त इत्यर्थः। वार्तिकमते 'प्रत्ययस्य' इत्यस्यावश्यकत्वमाह — **आगस्त्येति**। **एकैकस्येति**। यथासंख्यासंभवादित्यर्थः। **सर्वत्रेति**। प्राग्दीव्यतीय[3]प्रत्यये विषयभूत[4] इत्यर्थः। **न सिध्यति** शैषिकप्रत्यये विवक्षितेऽगस्त्यादेशे वृद्धत्वाभावेन छस्याप्राप्तेरित्यर्थः। तदेतदाह — **अवृद्धत्वादिति**। **गोत्र इति**। [5]'यस्कादिभ्यो गोत्रे' इति प्रकरणे येषां गोत्रप्रत्ययानां लुगुक्तस्तेषामजादौ [6]प्राग्दीव्यतीये प्रत्यये लुङ् न स्यादिति सूत्रार्थः। **संनियोगेति**। लुक्संनियोगेनादेशविधानात् तदभावे तदभाव इत्यर्थः। **आगस्तीया इति**। [7]अगस्त्यशब्दादृष्यण्, ततो [8]'वृद्धाच्छः'। [9]'यस्य' इत्यणो लोपः, [10]'सूर्यतिष्य' [11]इति यलोपः। आगस्त्यकौण्डिन्ययोर्गोत्रप्रत्ययस्य बहुत्वे वर्तमानस्य लुक् स्यात्, प्रकृत्योः क्रमादगस्तिकुण्डिनचावादेशौ स्तः, आगस्त्यस्य कौण्डिन्यस्य वापत्यानि बहूनि — अगस्तयः, कुण्डिनाः। अगस्त्यशब्दादृष्यणः कुण्डिनशब्दाद् गर्गादियञश्च लुक्। **सूत्रार्थ इति**। 'तथा च लुकि प्रतिषिद्धे संनियोगशिष्टादेशाभावात् 'आगस्तीयाः' इति सिध्यतीत्याशयः। वचनं न सूत्रम्, तस्य संज्ञाविधानेन चरितार्थत्वात्, किं तु तदेकदेश इत्याह — **प्रत्ययस्येति**। पुनःश्रुत्या सर्वस्य प्रत्ययस्येति लभ्यत इति भावः। वार्तिककृतोऽपि षष्ठीनिर्देशार्थत्वं [12]नातीव संमतमित्याह — **वचनेति**। ननु लुग्लोपयोर्द्वयोरप्यन्त्यादेशत्वे[13]ऽन्यतर[14]वैयर्थ्यादन्यतरस्य सर्वादेशत्वे वाच्ये लोपस्यैव सर्वादेशत्वं किं न स्यात्, अत आह — **विपर्यय इति**। न उपसंजातो विरोधी वैयर्थ्यशङ्कारूपो यस्य तस्य भावस्तस्मादित्यर्थः। **पाठेति**। प्रत्ययसूत्रे द्वयम्, अनुवर्तमानं तृतीयमित्यर्थः। नन्ववयवलोपे प्रत्यय[15]लोपपदस्य गौणत्वात् मुख्यसंभवे गौणाग्रहणात् 'प्रत्ययस्य' इत्यनुवृत्तेर्न प्रयोजनम्, अत आह — **अवयवेति**। **न त्विति**। एकदेशलोपे [16]प्रत्ययलोपव्यपदेशो न गौणः, किं तु मुख्य एव, समुदायिलोपे समुदायस्यापि लोपादिति भावः। गौणत्वनिरसनस्य व्यतिरेकमुखेन प्रयोजनं निराह — **गौणत्व इति**। **प्रत्ययग्रहणं** द्वितीयमित्यादिः। **उपधालोप इति**। [17]'गमहन' इत्यनेन। **अनुनासिकेति**। [18]'अनुदात्तोपदेश' इत्यनेन। आङ्पूर्वाद्धन्तेः [19]'आङो यमहनः' इत्यात्मनेपदम्। विध्यादिलिङस्तादेशे सीयुटि सलोपे [20]उपधालोपे [21]'हो हन्तेः' इति [22]कुत्वे 'आघ्नीत'। अत्र सीयुट्सकारस्य

---

[1] निर्देशार्थमिति — अ.
[2] तुशब्दो नास्ति — अ.
[3] प्रत्ययविषय — म, आ.
[4] 'भूतेऽपीत्यर्थः' इत्युचितं भाति।
[5] पा. सू. २. ४. ६३.
[6] 'प्राग्दीव्यतीये' 'इत्यस्यानन्तरम् अपिशब्दोऽधिकः — अ.
[7] अगस्त्यशब्दादण् — ऋ.
[8] पा. सू. ४. २. ११४.
[9] पा. सू. ६. ४. १४८.
[10] पा. सू. ६. ३. १४९.
[11] इति लोपः — ऋ.
[12] नाभिमतमित्याह — आ.
[13] अन्तादेशत्वे — अ, म.
[14] 'अन्यतरवैयर्थ्यात्' इति नास्ति — म.
[15] लोपस्य गौणत्वात् — आ, म; लोपवचनस्य गौणत्वात् — ऋ.
[16] अवयविलोपव्यपदेशः — म, आ.
[17] पा. सू. ६. ४. ९८.
[18] पा. सू. ६. ४. ३७.
[19] पा. सू. १. ३. २८.
[20] 'उपधालोपे' इत्यस्यानन्तरं चकारोऽधिकः — अ.
[21] पा. सू. ७. ३. ५४.
[22] कुत्वम् — अ.

प्रत्ययैकदेशस्य लोपेऽपि[1] प्रत्ययलक्षणेनानुनासिकलोपः स्यात्। संपूर्वाद् गमेर्विध्यादिलिङि [2]'समो गमि' इत्यात्मनेपदम्। [3]'बहुलं छन्दसि' इति शपो लुक्, इटोऽदादेशे सीयुडागमे सलोपे उपधालोपे [4]च 'संग्मीय' इति। [5]'संजग्मीय' इति क्वचित् पाठः। तदा [6]'बहुलं छन्दसि' इति श्लुः। उक्तेव प्रक्रिया। अत्रापि पूर्ववदनुनासिकलोपप्रसङ्गः। यद्यपि [7]'अङ्गवृत्ते' इति न्यायेनानुनासिकलोपो न भविष्यति, तथापि तदनाश्रयेणैतदुक्तम्॥

[१, ४७४–४७६]

(**रत्नप्रकाशः**) **षष्ठीनिर्देशार्थमिति**। यत्र प्रत्ययः प्रथमानिर्दिष्टः, तत्र तस्य षष्ठ्यन्तता-कल्पनोपयोगितयात्र 'प्रत्ययस्य' इत्युक्तमिति भावः। **षष्ठ्यर्थाप्रसिद्धिरिति**। प्रथमानिर्दिष्टस्य प्रत्ययस्य षष्ठ्यर्थेन स्थानेन योगो न स्यादिति भावः। **न काचित् षष्ठीति**। न किंचित् षष्ठीनिर्दिष्टमित्यर्थः। षष्ठीनिर्दिष्टमुपपादयितुमाह — **अत्रापीति**। एतेन "विशिष्टस्य स्थाने-योगत्वस्य षष्ठ्यर्थस्य निर्देशार्थमित्यर्थः। असति प्रत्ययस्येत्येतस्मिन् यः कश्चिदानन्तर्यादिसंबन्धः स्यात्। ततश्च "जनपदे लुप्' इति पञ्चालाः शोभना इत्यादौ जनपदवाचिनोऽनन्तरस्य शोभना-देरपि लुप् स्यात्" इति कैयटो निरस्तः। [9]"जनपदे लुप्' इत्यत्र षष्ठ्या एवानिर्देशेनानन्तर्यादेः संबन्धस्यानापादनीयत्वात्। लुप्शब्दान्वययोग्यः षष्ठीनिर्दिष्ट एवेति तत्र किंचित् पदं षष्ठ्यन्त-तया विपरिणमनीयं चेत् तर्हि 'जनपदे' इत्याधारवाचिनोपलक्षितस्य तद्वाचकस्यैव प्रकृतिप्रत्ययान्य-तरस्य षष्ठीनिर्दिष्टत्वं परिकल्प्य लोपान्वयो बोधनीयः स्यादिति तदुपेक्ष्य जनपदवाचिनोऽनन्तरस्य शोभनादेर्लुबापादनानौचित्याच्च। **सर्वादेशार्थं वेति**। वाशब्दस्तर्ह्यर्थे। एतेन 'षष्ठीनिर्देशार्थत्वं तु स्थितमेवेति वार्तिककारेण विकल्पार्थो वाशब्दः प्रयुक्तः' इति कैयटो निरस्तः। प्रकृते षष्ठी-निर्देशस्य साधितत्वात्। अन्यथोत्तरवार्तिके 'वचनप्रामाण्यात्' इति हेतोरसंगतत्वापत्तेश्च। 'षष्ठीनिर्देशार्थं तु' इत्यत्र पूर्ववार्तिके तुशब्दस्य 'लुमति प्रत्ययग्रहणमप्रत्ययसंज्ञाप्रतिषेधार्थम्' इति वार्तिकास्वरससूचकतर्ह्यर्थताया इवात्रापि वाशब्दस्यैतत्पूर्ववार्तिकास्वरससूचकतर्ह्यर्थताया एवोचित-त्वात्। तथैव भगवता व्याख्यातत्वाच्च। यदप्युक्तं तेनैव "[10]'आगस्त्यकौण्डिन्ययोः' इत्यत्र हि यदि लुगनुवर्तते तदैकैकस्य त्रय आदेशाः। अथ नानुवर्तते, द्वावेवादेशौ विधीयेते। तदा अगस्त्यादेशेन सर्वत्र भाव्यमिति 'आगस्तीयाश्छात्राः' इति न सिध्यति, अवृद्धत्वात् प्रकृतेः। प्रत्ययस्येत्युच्यमाने [11]'गोत्रेऽलुगचि' इति लुकि प्रतिषिद्धे संनियोगशिष्टत्वाल्लुगभावादगस्त्यादेशा-भावात् 'आगस्तीयाः' इति सिध्यतीति षष्ठीनिर्देशार्थं प्रत्ययग्रहणम्" इति। तदपि न, [12]'आगस्त्य-कौण्डिन्ययोः' इति सूत्रस्थ [13]'कंसीयपरशव्ययोः' इत्येतत्समकक्षत्वेन 'लुमति प्रत्ययग्रहणमप्रत्यय-संज्ञाप्रतिषेधार्थम्' इति प्रथमवार्तिकोदाहरणताया उचितत्वेन 'आगस्त्यकौण्डिन्ययोरवयवस्य गोत्रे

---

[1] अपिशब्दो नास्ति — ऋ.
[2] पा. सू. १. ३. २९.
[3] पा. सू. २. ४. ७३.
[4] चकारो नास्ति — आ.
[5] 'संजग्मीय' इत्यादि 'प्रक्रिया' इत्यन्तं नास्ति — म, ऋ.
[6] पा. सू. २. ४. ७६.
[7] परिभाषा ९३.
[8] पा. सू. ४. २. ८१.
[9] पा. सू. ४. २. ८१.
[10] पा. सू. २. ४. ७०.
[11] पा. सू. ४. १. ८९.
[12] पा. सू. २. ४. ७०.
[13] पा. सू. ४. ३. १६८.

वर्तमानस्य लुक्, अवशिष्टभागयोः क्रमादगस्तिकुण्डिनच्' इति व्याख्यानेनात्र प्रत्ययग्रहणं विनैव निर्वाहेण च 'षष्ठीनिर्देशार्थं तु' इति वार्तिकोदाहरणतानौचित्यात्। **सर्वादेशा यथा स्युरिति**। [1]'अलोऽन्त्यस्य' [2]'आदेः परस्य' इत्येतौ बाधित्वा [3]'निर्दिश्यमानस्यादेशाः' इति प्रत्ययस्य सर्वस्य ते आदेशा भवन्त्वित्येतदर्थमित्यर्थः। प्रत्ययग्रहणमात्रेण कथमवयवादेशत्वबाधनमित्याशयेन पृच्छति — **अथेति**। **वचनप्रामाण्यादिति**। विनापि प्रत्ययग्रहणं लुक्श्लुलुपः प्रत्ययस्यैव भवन्तीति पुनः प्रत्ययग्रहणं नियमार्थं भवति — प्रत्ययस्यैव, न तु तदवयवस्येतीति भावः। एवं च विनिगमनाविरहात् प्रत्ययावयवस्येव प्रकृतेरपि नियमेन व्यावृत्तिः सिध्यतीति तत्र तत्र भगवतोक्तं तत्र प्रत्ययग्रहणात् प्रकृतिभागस्य न भवतीत्युपपन्नं भवति। इदानीं प्रौढिमाश्रित्य सामान्यापेक्षज्ञापकाश्रयेण प्रत्ययग्रहणं प्रत्याचष्टे — **एतदपीति**। **यदयमिति**। लोपे प्रकृते लुग्ग्रहणसामर्थ्याल्लोपः सर्वादेशो भवति, लुगादि त्वन्त्यस्यैवेति विपरीतस्यापि संभवात् ज्ञापकाश्रयेण सूत्रावयवप्रत्याख्यानासंभवाच्च प्रौढिमात्रमिदम्। यत्तु कैयटेनोक्तम् 'अनुपसंजातविरोधित्वाल्लोपस्तावदन्त्यादेशः स्थितः, ततो लुगारभ्यमाणो यद्यन्त्यस्य स्यात् लोपानुवृत्त्यैव सिद्धत्वाल्लुकं न विदध्यात्। विहितस्तु सर्वादेशत्वस्य ज्ञापकः संपद्यते' इति। तन्न, [4]'अष्टाभ्य औश्' [5]'अतो भिस ऐस्' इत्यत्रासंजातविरोधित्वेन [6]'आदेः परस्य' इत्यस्यैव प्रवृत्त्यापत्तेः। [7]'विप्रतिषेधे परं कार्यम्' इति परिभाषाविरोधेनात्र शास्त्रेऽसंजातविरोधन्यायाश्रयणायोगाच्च। **उत्तरार्थं त्विति**। इदमपि प्रौढिमात्रम्, उत्तरसूत्रे द्वितीयस्यापि प्रत्ययग्रहणस्य सत्त्वात्। तृतीयस्य तत्र प्रयोजनाभावाच्च। एतेन '**द्वितीयमिति**। लोपविशेषणापेक्षया। पाठापेक्षया तु तृतीयम्' इति कैयटो निरस्तः। 'लोपे प्रत्ययलक्षणम्' इत्येवमुत्तरसूत्रन्यासं परिकल्प्योत्तरप्रत्युत्तरयोः प्रवृत्तत्वेन द्वितीयशब्दस्य यथाश्रुतस्यैव साधुत्वात्। अत एव [8]'अन्यतरच्छक्यमकर्तुम्' इति वक्ष्यमाणस्याप्युपपत्तेः। **आघ्नीतेति**। सीयुटः सकारलोपे झलादिनिमित्तस्यानुनासिकलोपस्य प्रसक्तिरिति भावः। एतेन 'परत्वादुपधालोपे कृते पुनःप्रसङ्गविज्ञानादनुनासिकलोपः स्यात्' इति कैयटो निरस्तः। [9]'अन्तरङ्गानपि' इति न्यायेनोपधालोपनिमित्तविघातकस्यानुनासिकलोपस्यैव प्रथमप्रवृत्तेरुचितत्वात्। ततोऽनुनासिकलोपस्यासिद्धत्वेनोपधालोपः स्यादिति वक्तुमुचितत्वाच्च॥

[१, ४७४–४७६]

(नारायणीयम्) [10]'कस्य' इति भाष्ये वक्ष्यमाणवस्तु शिष्यानुग्रहाय वार्तिकोपक्रमे दर्शयति — **विशिष्टस्येति**। लुगादिविधौ कार्यकालत्वादस्योपस्थाने सति प्रत्ययस्य लुगिति संबन्धयितुं शक्यत्वादनियतयोगत्वेन स्थानषष्ठीत्वाच्च सति प्रत्ययग्रहणे प्रत्ययस्य स्थाने लुगिति लभ्यते। ननु 'शपः' इत्याद्यनियतयोगषष्ठ्यां न लुगादिविधौ तावद् दोषः स्यादसत्यस्मिन्, अत आह — **असतीति**। [जनपदे] लुपः संबन्ध्यपेक्षायां षष्ठ्यर्थमात्रलाभेऽपि विशेषालाभ इत्यर्थः। **शोभनादेरपीति**। स्थान इति भावः। यद्येवं कथं स्थानसंबन्धालाभ इत्युच्यते। नैष दोषः,

---

[1] पा. सू. १. १. ५२.
[2] पा. सू. १. १. ५४.
[3] परिभाषा १२.
[4] पा. सू. ७. १. २१.
[5] पा. सू. ७. १. ९.
[6] पा. सू. १. १. ५४.
[7] पा. सू. १. ४. २.
[8] महाभाष्यम् १. १. ६२.
[9] 'अन्तरङ्गानपि विधीन् बहिरङ्गो विधिर्बाधते' इत्याशयेनेदम्।
[10] तस्येति भाष्ये — ग.

लुपा यत्संबन्धितयाक्षिप्तं तस्य स्थानित्वालाभस्य विवक्षितत्वात् । अत्र हि श्रूयमाणजनपद-[1]वाची संबन्धी लुपः, तस्य च न [2]स्थानित्वमुक्तम्, किं त्वानन्तर्यप्रतियोगित्वम् । नन्वेवमपि लुबपेक्षानन्तर्यप्रतियोगित्वं वाच्यं जनपदस्य, न शोभनापेक्षम् । नायमपि दोषः, जनपदानन्तरमदर्शनं भवतीत्युच्यमाने शोभनादेस्तदनन्तरस्यादर्शनमित्यर्थप्राप्तत्वात् । [3]एवं च ब्रुवता प्रत्ययप्रतिपत्त्यर्थत्वमपि प्रत्ययग्रहणस्य विवक्षितम् । तर्ह्यर्थतया भाष्ये वाशब्दस्य व्याख्यानं किं वार्तिकसंमतम्, नेत्याह — **षष्ठीति** । षष्ठ्याः सर्वत्र लम्भयितुं शक्यत्वात् तादर्थ्यस्थितिमननं कथं वार्तिककृतमित्यत्राह — **आगस्त्येति** । प्रत्ययस्य लुगादिस्थानित्वलाभार्थत्वं षष्ठीनिर्देशार्थत्वमिति विवक्षितमित्यर्थः । प्रत्ययस्य स्थानित्वालाभे को दोषः, तमाह — **यदीति** । समुदायस्य षष्ठीनिर्दिष्टत्वादसति प्रत्ययग्रहणे प्रत्ययान्तस्यैव लुक्प्रसङ्ग इत्यादेशत्रयं पर्यायेणैकैकस्य स्यात् । ततश्चागस्तयोऽपि कुण्डिनाः स्युः, कुण्डिनाश्चागस्तयः । लुगादेशपक्षे च विभक्तिमात्रश्रवणप्रसङ्गः । **सर्वत्रेति** । अगस्तीनां छात्रा इति प्राग्दीव्यतीयाजादिप्रत्ययविवक्षायामप्यादेशनिषेधाभावात् । सति तस्मिन्न वृद्धत्वमित्यर्थः । **उच्यमान इति** । लुग्ग्रहणम् [4]'आगस्त्यकौण्डिन्ययोः' इत्यत्रेदानीमनुवर्त्यम् । ततः प्रत्ययांशस्य लुकि परिशिष्टस्य यथासंख्येनादेशप्रवृत्तिरिति नानिष्टम् । **संनियोगेति** । यदि ह्यगस्त्यादेशः स्यात् तदा हल उत्तरत्वाभावात् [5]'आपत्यस्य' इति यलोपो न स्यात् । अतस्तदभावकीर्तनम् । **सिध्यतीति** । कौण्डिन्ये तु [6]'कण्वादिभ्यो गोत्रे' इति शेषार्थेऽण्विधानादलुक्कृतविशेषाभावः । ननु गोत्रग्रहणानुवृत्तावपि गोत्रे वर्तमानयोरागस्त्यकौण्डिन्ययोरित्यर्थः स्यात् । ततश्च लुगनुवृत्तिनिवृत्त्योरुक्तदोषापत्तिरित्यत आह — **तेनेति** । अनयोर्गोत्रार्थत्वाव्यभिचारान्न त्वदुक्तवाक्यार्थः । किं तु गोत्र इति विधानापेक्षया सप्तमी । आगस्त्यकौण्डिन्ययोरिति चावयवषष्ठी, अनयोर्योऽवयवो गोत्रे विहितस्तस्येति । यद्वा, आगस्त्यकौण्डिन्येति गोत्रसमुदायेन गोत्रव्यक्तिर्विशेष्यते — अनयोर्यद् गोत्रमिति । अथवा 'आगस्त्यकौण्डिन्य' इति प्रकृत्यर्थमात्रं विवक्षितम् । तेन गोत्रं विशेषणीयमित्यर्थः । **परिशिष्टस्येति** । विभागः कथमुच्यते । गोत्रविहितस्य लुगिति प्राचीनवाक्येषु सिद्धत्वादिहापि तथाभाव इति लुक् प्रत्ययस्य, आदेशौ तु संनिधानात् परिशिष्टयोः, न तु प्रत्ययस्य, लुका बाधितत्वात्, पौनरुक्त्यापत्तेः, व्याहतार्थत्वात्, तथाभूतत्वाच्च लक्ष्यस्य । यद्वा न गोत्रमाभ्यां विशेष्यते । आदेशसंबन्धस्त्वनयोः, गोत्रे लुगित्यधिकृतस्य तु संनिधिमात्रादिमे विशेषणे । शबादावेकालि स्थानिनि नेदं प्रयोजनमित्याशङ्क्य यञादौ स्थानिनीदं फलमित्यभिप्रेत्याह — [भाष्ये] **अथेति** । किं लुगादिवचनप्रामाण्यं विवक्षितम्, उत प्रत्ययग्रहणप्रामाण्यम् । नाद्यः, तेषामन्यलुगाद्यर्थत्वात् । न द्वितीयः, तस्य फलवत्ताया वार्तिककारसंमतत्वादित्याशङ्क्याह — **प्रत्ययस्येति** । अत्रोक्तदोषमुद्धरति — **वचनेति** । एकदेशलोपः कथं प्रत्ययलोपः, तत्राह — **अवयवेति** । गौणत्वात् कथमस्य प्रत्ययलोपतया ग्रहणप्राप्तिः, अत आह — **अवयव इति** । भवतु तत्र मुख्यत्वम् । अत्र त्वक्तपरिमाणस्य संज्ञेति कथं तदवयवस्य मुख्यं प्रत्ययत्वम्, अत आह — **न त्विति** । [7]'पटादिशब्दतुल्यत्वभ्रान्तिमन्तं प्रति प्रत्ययग्रहणमिति भावः । भ्रमहीनं तु प्रति न कर्तव्यं प्रत्ययग्रहणमित्याह — **गौणत्व इति** । 'स्यात्' इति संभावनायाम्, अकरणं संभावितमिति भावः । उपधालोपेनानुनासिकलोपस्य बाधमाशङ्क्याकृतिग्रहणपक्षे प्रत्ययग्रहणफलमित्याह — **परत्वादिति** ॥

---

[1] वाचि संबन्धी — ग.
[2] स्थानिवत्त्वमुक्तम् — ग.
[3] एवं ब्रुवता चेत्यन्वयो बोध्यः ।
[4] पा. सू. २. ४. ७०.
[5] पा. सू. ६. ४. १५१.
[6] पा. सू. ४.२. १११.
[7] पदादि — ग.

प्रत्ययलोपे प्रत्ययलक्षणम्. १. १. ६२.

[१, ४७६–४७८]

(लघुविवरणम्) ननु 'प्रत्ययग्रहणम्' इति भाष्यमनुपपन्नम्, अप्रत्ययलोपे प्रत्ययलक्षणनिवृत्तये कर्तव्यत्वादित्यत आह — **प्रत्ययेति**। अयं भावः — किमेतत् प्रत्ययग्रहणमप्रत्ययलोपे प्रत्ययलक्षणनिवृत्तये, उत कस्य लोप इत्याकाङ्क्षानिवृत्तये। नाद्यः, लक्षणशब्दोऽयं करणसाधनो निमित्तवाची। तस्य च प्रत्ययशब्देन बहुव्रीहौ कार्यं प्रत्ययलक्षणशब्देनोच्यते। तथा चाप्रत्ययलोपे किं प्रत्ययोऽस्ति, उत लुप्यते। यद्यस्ति, तर्हि [1]प्रत्ययलक्षणं श्रूयमाणं प्रत्ययमाश्रित्य भवत्येव। अथापि लुप्यते, तदापि तदाश्रितं कार्यं प्रत्ययग्रहणे सत्यपि भवत्येव। अथाप्रत्ययलोपो यत्र तत्र श्रूयमाणव्यतिरिक्तप्रत्ययलक्षणकार्यनिवृत्तये प्रत्ययग्रहणमित्युच्येत तर्हि क्रियमाणे प्रत्ययग्रहणे यस्य कस्यचित् प्रत्ययस्य लोपे यत्किंचित्प्रत्ययलक्षणमपि [2]कार्यं किं न स्यात्। अथ प्रत्यासत्त्या यस्य प्रत्ययस्य लोपस्तल्लक्षणमेव कार्यं भवतीति विज्ञास्यत इत्युच्येत तर्ह्यसत्यपि प्रत्ययग्रहणे यत्प्रत्ययलक्षणं यत् कार्यं तत् तस्य लोपे भवतीति विज्ञास्यते। अत एव द्वितीयोऽपि पक्षो निरस्तः। तस्मान्नार्थः प्रत्ययग्रहणेनेति। 'लोपे प्रत्यय' इति परिहारभाष्यमनुपपन्नम्, [3]न ह्यत्र प्राधान्येन प्रत्ययनिमित्तः ष्यङित्यत आह — **प्रत्ययस्येति**। **सुरथस्येति**। रमेर्ह्रन्तेश्च यथाक्रममौणादिके क्थनि क्तप्रत्यये चानुनासिकलोपे सति रूपम्। ननु प्रत्ययग्रहणे सत्यपि 'अग्निचित्' इत्यादौ [4]प्रत्ययस्य प्रादुर्भावः किं न स्यादित्यत आह — **प्रत्ययग्रहण इति**। प्रत्यासत्त्या तस्यैवेति वक्तव्यम्, तच्च विरुद्धमिति भावः। करणसाधनाश्रयणे को हेतुरित्यत्राह — **संदेह इति**। पक्षान्तरेऽपि व्याख्यानमेव शरणमित्याह — **अन्यथेति**। ननु विरोधाद् भावसाधनशङ्का निर्वर्तिष्यत इत्युक्तमित्यत आह — **प्रत्ययेति**। नन्वस्तु तर्हि भावसाधनमेवेत्यत आह — **ततश्चेति**। ननु व्याख्याने लिङ्गं नास्तीत्यत आह — **लक्षणेति**। ननु 'जगत्' इत्यत्र विलोपात् प्रागेव परत्वाद् [5]'गमः क्वौ' इत्यनुनासिकलोपे तत एव तुकि च सत्येव प्रत्यये तुग् दृष्ट इति लुप्ते क्विप्प्रत्यये प्रत्ययलक्षणे न निवर्त्येतेत्यत आह — **अन्तरङ्गत्वादिति**। **प्रत्ययग्रहणे सतीति**। 'तल्लक्षणम्' इति वक्तव्ये प्रत्ययग्रहणसामर्थ्यादवधारणमाश्रीयते प्रत्यय एव लक्षणं यस्येति [इति] भावः। 'रैकुलम्' इत्युदाहरणमनुपपन्नम्, न ह्यत्र प्रत्ययो निमित्तमित्यत्राह — **अवयवेति**। उक्तन्यायमन्यत्राप्यतिदिशति — **अनेनैवेति**। गुणप्रतिषेधाभावे लाभमाह — **तेनेति**। धिविकृव्योरिदित्त्वान्नुमि कृते विचि च वलोपे लघूपधत्वाद् गुणे च सुधेन् सुकर्न् इति स्थिते समासात् स्वाद्युत्पत्तौ हल्ङ्यादिलोपे नलोपे च सुधे सुकरिति भवति। गुणप्रतिषेधे तु धिवेः [6]'इन्हन्पूषा' इति वर्तमाने [7]'सौ च' इति दीर्घे 'सुधी' इति भवति। कृवेश्च [8]'सर्वनामस्थाने च' इति दीर्घे [9]'उपधायाश्च' इतीत्वे नलोपे [10]'वोरुपधाया दीर्घः' इति दीर्घे सति 'सुकी.' इति भवति॥

---

[1] प्रत्ययनिमित्तकं कार्यमित्यर्थः।
[2] कार्यं स्यात् — ड, ढ.
[3] न ह्यत्राप्राधान्येन — ण.
[4] तस्यैव क्विप्प्रत्ययस्येत्यर्थः।
[5] पा. सू. ६. ४. ४०.
[6] पा. सू. ६. ४. १२.
[7] पा. सू. ६. ४. १३.
[8] पा. सू. ६. ४. ८.
[9] पा. सू. ७. १. १०१.
[10] पा. सू. ८. २. ७६.

[१, ४७६–४७८]

(विवरणम्) निमित्तशब्देन प्रत्ययलक्षणशब्दार्थ उक्तः। **कार्यमिति**। बहुव्रीहिलभ्यमुक्तम्। **प्रत्यासत्त्येति**। क्रियमाणेऽपि प्रत्ययग्रहणे यस्य कस्यचित् प्रत्ययस्य लोपे यत्किंचित्प्रत्ययनिमित्तं कार्यं मा भूदिति प्रत्यासत्तिराश्रयणीया। तथा च तयैव लोप इत्युक्तेऽपि प्रत्ययस्य लोप इति विज्ञास्यत इत्यर्थः। ननु यथा स्थानिनः कार्यमादेशेऽतिदिश्यते [1]तस्य तद्रूपत्वाभावेन तदप्राप्तेः, एवं प्रत्ययनिमित्तं कार्यमतिदेष्टव्यं प्रत्ययरूपाभावे। इह तु सौरथी वैहतीत्यत्र प्रत्ययस्य सत्त्वात् कथमतिदेशतः ष्यङः प्राप्तिरित्यत आह — **प्रत्ययस्येति**। **मकारेति**। रमेरौणादिके क्थनि हन्तेश्च क्ते [2]'अनुदात्त' इत्यनुनासिकलोपे गुरूपोत्तमत्वाभावादप्राप्तः ष्यङतिदेशतः स्यादित्यर्थः। ननु प्रत्ययग्रहणेऽपि तर्हि लुप्तस्य सुबादेरनेन प्रादुर्भावः स्यादित्यत आह — **प्रत्ययेति**। **अन्यथेति**। व्याख्यानं न शरणं भेदित्यर्थः। **स्वाद्युत्पत्तिरिति**। कृदन्तत्वेनेत्यर्थः। ननु प्रत्ययलोप इत्युक्तौ कथं 'सति प्रत्यये' इति लभ्यत इत्यत आह — **प्रत्ययशब्द इति**। **ह्रस्वाभावादिति**। इगन्तत्वाभावेनेति शेषः। ननु 'जगत्' इत्यत्र गमेः क्विपि परत्वादपृक्तलोपात् पूर्वं [3]'गमः क्वौ' इत्यनुनासिकलोपे सत्येव प्रत्यये तुकः प्राप्तेः प्रत्ययलक्षणेन तुकः श्रवणं भविष्यतीत्यत आह — **अत्रेति**। नन्वसति प्रत्ययग्रहणे बहुव्रीहेरभावाद् बहुव्रीहिलभ्यकार्यातिदेशो न स्यादिति कस्मान्नोक्तमिति शङ्कां निवर्तयन् परिहार[4]भाष्यतात्पर्यमाह — **प्रत्ययलोप इति**। **वस्तुमात्रेति**। प्रत्ययमात्रपरामर्शित्वाद् बहुव्रीहावप्यवधारणासंभवादिति भावः। **अनेनैवेति**। [5]तत्रापि बहुव्रीहिणैवार्धधातुके लब्धे पुनरार्धधातुकग्रहणादवधारणमाश्रीयत इति भावः। **तेनेति**। धिन्विकृण्व्योरिदित्त्वान्नुमि विचि वस्य लोपेऽपृक्तलोपे च प्रत्ययलक्षणेन लघूपधगुणे सोस्ताभ्यां गतिसमासे सुधेन् सुकर्न् इति स्थिते समासत्वात् स्वाद्युत्पत्तौ हल्ङ्यादिनलोपयोः [6]कृतयोः 'सुधे' 'सुकः' इति भवति। गुणप्रतिषेधे तु 'सुधिन् सु' इति स्थिते [7]'इन्हन्पूष' इति वर्तमाने [8]'सौ च' इति दीर्घे पूर्ववत् सुलोपनलोपयोः 'सुधी' इति भवति। क्रुवेः 'सुक्रुन् सु' इति स्थिते [9]'सर्वनामस्थाने च' इति दीर्घे [10]'उपधायाश्च' इतीत्वे सुनलोपयोः [11]'र्वोरुपधायाः' इति दीर्घे 'सुक्रीः' इति भवति॥

[१, ४७६–४७८]

(उद्द्योतनम्) लक्षणशब्देन निमित्तमुक्तम्, बहुव्रीहिणा च कार्यलाभ इत्यभिप्रेत्याह — **प्रत्ययेति**। **प्रत्यासत्त्येति**। कृतेऽपि प्रत्ययग्रहणे यत्किंचित्प्रत्ययलोपे प्रत्ययान्तरनिमित्तं कार्यं मा भूदिति प्रत्यासत्तिरास्थेया। तथा च तयैव प्रत्ययस्य लोप इति [12]लभ्यत इत्यर्थः। [13]ननु

---

[1] आदेशस्य स्थानिरूपत्वाभावेन स्थानिकार्याप्राप्तेरित्यर्थः।
[2] पा. सू. ६. ४. ३७.
[3] पा. सू. ६. ४. ४०.
[4] भाष्यस्य तात्पर्यमाह — ट.
[5] अत्रापि — ञ.
[6] 'कृतयोः' इति नास्ति — ञ.
[7] पा. सू. ६. ४. १२.
[8] पा. सू. ६. ४. १३.
[9] पा. सू. ६. ४. ८.
[10] पा. सू. ७. १. १०१.
[11] पा. सू. ८. २. ७६.
[12] 'लभ्यत इत्यर्थः' इति नास्ति — म.
[13] 'ननु प्रत्यय' इत्यादि 'प्रत्ययस्य लोप इति' इत्यन्तं नास्ति — म.

[1]प्रत्ययनिमित्तं कार्यं लोपेऽतिदिश्यते । नकारमकारयोर्न प्रत्ययत्वमिति कथं ष्यङापादनम्, अत आह — **प्रत्ययस्येति**। तत्र लुप्तप्रत्ययस्य दर्शनासंभवेन प्रत्ययस्य लोप इति विशेषणासंभवाद्यस्य कस्यचिल्लोपे तन्निमित्तप्रत्ययोत्पत्तिरिति सूत्रार्थः संपद्यते । [2]तदेतदाह — **सुरथस्येति**। **मकारेति** । रमेरौणादिके [3]क्थनि हन्तेश्च क्ते [4]'अनुदात्त' इत्यनुनासिकलोपः । नन्वस्मिन्नर्थे प्रत्ययग्रहणेऽपि लुप्तस्य सोः प्रादुर्भावः स्यात्, अत आह — **प्रत्ययेति** । [5]निषेध्यमर्थमेवाह — **प्रत्ययलोप इति** । तत्र हेतुः — **एवं हीति**। **संदेहे** भावसाधनत्वकरणसाधनत्वसंदेहे। **अन्यथेति**। व्याख्यानं शरणं न चेदित्यर्थः। शङ्कामेवाह — **प्रत्ययेति** । **प्रत्ययान्तरस्येति** । विरोधाल्लुप्तप्रत्ययाग्रहणमिति भावः । तर्हि भावसाधनत्वे किं दूषणम्, अत आह — **ततश्चेति**। **अधोगिति**। दुहेर्लङ्, [6]'दादेः' इति घत्वम्, भष्भावः, हल्ङ्यादिलोपः। पदसंज्ञायाः प्रत्ययत्वाभावादित्यर्थः। करणसाधनत्वे हेत्वन्तरमाह — **लक्षणेति**। 'लोपे प्रत्ययः' इत्युक्तेऽपि [7]'अस्तिर्भवन्तीपरः' इति न्यायेन प्रत्ययो **भवति** उत्पद्यत इत्यर्थलाभादित्यर्थः। ननु 'प्रत्ययलोपे' इत्युक्ते 'सति प्रत्यये' इति कथं लभ्यते, अत आह — **प्रत्ययेति** । 'ग्रामणिकुलमित्यत्र तुगभावमुपपादयति — **न चेति**। **ह्रस्वाभावादिति**। क्विपि सतीगन्तत्वाभावादिति भावः। ननु गमेः क्विपि विलोपात् पूर्वं परत्वादनुनासिकलोपे [8]सत्यपि [9]क्विपि तुकः प्राप्तेर्विलोपेऽपि प्रत्ययलक्षणेन तुकः श्रवणं भविष्यति, अत आह — **अत्रेति**। ननु नित्यप्राप्ते विलोपे आरभ्यमाणोऽनुनासिकलोपस्तस्य बाधकः स्यात्, अत आह — **भिन्नेति** । **अस्मिन्** भिन्नविषयेऽपि येन नाप्राप्तिन्याये । **तस्मात्** विलोपात् पूर्वं मकारलोपाभावात्। भाष्ये **बहिरङ्गमिति** । [10]प्रातिपदिकत्वक्लीबत्व[11]सापेक्षत्वात्। अर्थनिरपेक्षस्तुगन्तरङ्ग इत्यर्थः। **सामर्थ्यात्** प्रत्ययग्रहणेत्यादिः। 'लोपे प्रत्ययलक्षणम्' इत्युक्तेऽपि दोषपरिहारादिति भावः। नन्वसति प्रत्ययपदे बहुव्रीहेरभावात् तल्लभ्यकार्यातिदेशो न स्यादिति कस्मान्नोक्तमिति शङ्कां निराकुर्वन् समाधानभाष्यतात्पर्यमाह — **प्रत्ययलोप इति**। **सर्वनाम्न इति** । 'तल्लक्षणम्' इत्यत्र तच्छब्दस्येत्यर्थः। **वस्तुमात्रेति**। प्रत्ययमात्रं परामृश्यते, तेन प्रत्ययत्वनिमित्तमेव कार्यमित्यवधारणं न लभ्यत इत्यर्थः। **प्रत्ययग्रहण इति**। अन्यथा [12]लाघवात् 'तल्लक्षणम्' इत्येव सूत्रं स्यादिति भावः। **अवयवद्वारेण** 'ङस्' इत्यत्रत्याच्त्वेन रूपेण। **प्रत्ययाश्रयः** प्रत्ययत्वाश्रयः। **अनेनैवेति** । बहुव्रीहिणैवार्धधातुके लब्धे पुनरार्धधातुकग्रहणादवधारणलाभ इति भावः। **तेनेति**। धिविकृव्योरिदित्त्वान्नुमि विचि तस्य लोपे प्रत्यय-

---

[1] प्रत्ययनिमित्तकार्यं — अ.
[2] तदाह — म.
[3] 'क्थनि' इत्यतः प्राक् 'हनिकुषीत्यादिना' इत्यधिकम् — म.
[4] पा. सू. ६. ४. ३७.
[5] विरुद्धमर्थमेवाह — म.
[6] पा. सू. ८. २. ३२.
[7] का. वा. २. ३. १–११.
[8] एवमवतारिकादानात् प्रदीपे 'ग्रामणीरित्यत्र' इत्यस्य स्थाने 'ग्रामणी व् इत्यत्र' इति पाठोऽभिसंहित इति भाति।
[9] सत्येव अ, ऋ.
[10] 'क्विपि' इति नास्ति — अ.
[11] 'ग्रामणिकुलम्' इत्यत्र समासे औत्तरपदिके ह्रस्वत्वे कृते तुक्शङ्काया भाष्ये करणात् तत्र 'इको ह्रस्वोऽङ्यो गालवस्य' इति ह्रस्वस्योत्तरपदनिमित्तकत्वेन बहिरङ्गत्वात् तदनिमित्तकत्वेन तुकोऽन्तरङ्गत्वमिति स्पष्टत्वात् 'ग्रामणि' (कुलम्) इति व्यस्तेऽपि नपुंसकह्रस्वत्वस्य बहिरङ्गत्वं शङ्कापरभाष्यस्योपलक्षणत्वाश्रयेण प्रतिपादयति — प्रातिपदिकत्वेत्यादिना। इदं कृन्मेजन्तसूत्रस्थकैयटानुरोधेन।
[12] सापेक्षादर्थ — म.
[13] लाघवाल्लक्षणमित्येव — अ, ऋ.

लक्षणेन लघूपधगुणे सोस्ताभ्यां गतिसमासे [1]'सुधेन् सुकर्न्' इति स्थिते समासत्वात् स्वाद्युत्पत्तौ हल्ङ्यादिनलोपयोः कृतयोः 'सुधे, सुकर्' इति भवति। गुणाभावे तु 'सुधिन् सु' इति स्थिते [2]'सौ च' इत्युपधादीर्घे [3]सुलोपनलोपयोः 'सुधी' इति भवति। 'सुकृन् सु' इति स्थिते [4]'सर्वनामस्थाने च' इत्युपधादीर्घे [5]'उपधायाश्च' इतीत्वे [6]सुलोपनलोपयोः [7]'र्वोरुपधायाः' इति दीर्घे 'सुकीः' इति भवति॥

[१, ४७६–४७८]

(रत्नप्रकाशः) **प्रत्ययग्रहणं किमिति**। लोपे सति प्रत्ययलक्षणमित्युक्ते प्रत्यासत्त्या प्रत्ययस्यैव लोपे सतीति गम्यत इति भावः। लोपे सत्यपि लुप्तनिमित्तस्य प्रत्ययस्य लक्षणं दर्शनं प्रादुर्भाव इत्यर्थं मन्यमान उत्तरमाह — **लोप इति**। **सौरथीति**। [8]'हनिकुषिनीरमिकाशिभ्यः क्थन्' इति रमेः क्थन्यनुनासिकलोपे सुरथः। तस्यापत्यं गोत्रं स्त्रीत्यत इञि [9]'इतो मनुष्यजातेः' इति ङीष्। तत्रानुनासिके सति संभवन् गुरूपोत्तमत्वलक्षणः ष्यङ् तल्लोपेऽपि स्यात्। एवं वैहतीति। [10]'सूत्रार्थानुपपत्त्या तत्र ष्यङोऽप्रसङ्ग इति मन्यते। एतेन 'प्रत्ययग्रहणे सति विरुद्धत्वान्नायमर्थो भवति — प्रत्ययलोपे कृते तस्यैव पुनः प्रादुर्भाव इति। एवं हि लोपविधानमनर्थकं स्यात्। तस्मात् प्रत्ययनिमित्तं कार्यं प्रत्ययलोपेऽपि भवतीति वाक्यार्थ आश्रीयते' इति कैयटो निरस्तः। प्रत्ययग्रहणाभावे यादृशं प्रत्ययलक्षणशब्दस्यार्थं बुद्ध्वा यद्दूषणमापादितं तद्दूषणस्य प्रत्ययग्रहणे सत्यपि तस्य तादृशमर्थमाश्रित्यैव परिहारस्य वक्तुमुचितत्वात्। 'नैवं विज्ञायते' इत्युत्तरभाष्यस्यापि तथैवोपपन्नत्वात्। "अन्यथा क्रियमाणेऽपि प्रत्ययग्रहणे भावसाधनलक्षणशब्दाश्रयणशङ्का न निवर्तते — प्रत्ययलोपे प्रत्ययान्तरस्य प्रादुर्भाव इति। यथा ग्रामणीरिति क्विलोपे स्वाद्युत्पत्तिः। ततश्च 'अधोक्' इत्यत्र पदसंज्ञा न स्यात्" इति स्वोत्तरग्रन्थेनैतस्य ग्रन्थस्य वानरकीलोत्पाटनीयतासूचनाच्च। लक्षणशब्दस्य निमित्तपरत्वाश्रयणाद् विनापि प्रत्ययग्रहणेनाभिमतसिद्धिरित्याह — **नैवमिति**। **सति प्रत्यय इति**। प्रत्ययशब्दोऽत्र लुप्तसप्तमीको निर्दिश्यते। तेन प्रत्यये सति यत्कार्यं तल्लोपेऽपि भवतीत्यर्थलाभ इति भावः। **जगदिति**। [11]'द्युतिगमिजुहोतीनां द्वे च' इति गमेः क्विप्। अन्तरङ्गत्वाद् [12]'वेरपृक्तस्य' इति वलोपः। ततो [13]'गमः क्वौ' इत्यनुनासिकलोपः। ततस्तुगिति भावः। **अन्यतरदिति**। अत्र यद्वक्तव्यं तत्प्रागेवोक्तम्। **अथ द्वितीयमिति**। 'प्रत्ययलोपेऽपि' इत्येव सूत्रं कर्तव्यम्, प्रत्ययलोपेऽपि तद् भवति, यत् प्रत्यये सतीत्यर्थलाभादिति भावः। **प्रत्ययलक्षणमिति**। प्रत्ययत्वतद्व्याप्यान्यतरधर्मावच्छिन्नलक्षणमित्यर्थः। **वर्णलक्षणमिति**। वर्णत्वव्याप्यधर्मावच्छिन्ननिमित्तमित्यर्थः। प्रत्यये सति वर्णलक्षणं भवतीति तल्लोपेऽपि स्यादिति भावः। एतेन "'प्रत्ययलोपे तल्लक्षणम्' इत्युच्यमाने प्रत्ययस्य यत्र कार्ये निमित्तभावः प्रत्ययत्वरूपाश्रयेण वर्णरूपताश्रयेण वा तत् सर्वं

---

[1] 'सुधेन्' इत्यादि 'स्थिते' इत्यन्तं नास्ति — म.
[2] पा. सू. ६. ४. १३.
[3] सुनलोपयोः — म.
[4] पा. सू. ६. ४. ८.
[5] पा. सू. ७. १. १०१.
[6] सुनलोपयोः — म, ऋ.
[7] पा. सू. ८. २. ७६.
[8] उणादिसूत्रम् १६७.
[9] पा. सू. ४. १. ६५.
[10] सूत्रार्थापत्त्या — ब
[11] का. वा. ३. २. १७८–३.
[12] पा. सू. ६. १. ६७.
[13] पा. सू. ६. ४. ४०.

स्यात्, सर्वनाम्नो वस्तुमात्रपरामर्शित्वात्। प्रत्ययग्रहणे सति तु प्रत्ययत्वनिमित्तमेव कार्यं प्रत्ययलोपे भवति, न वर्णरूपतानिमित्तम्" इति कैयटो निरस्तः[1]। पर्यायशब्दानां लाघवगौरवं नास्तीत्यस्य 'अन्यतरस्याम्, विभाषा' इत्यादिशब्दान् प्रयुञ्जानेन सूत्रकृतैव स्वीकृतत्वेन गुरुभूत-प्रत्ययशब्दं निरस्य तदर्थपर्यवसायितच्छब्दप्रयोगेणाभिमतार्थसाधकसूत्रान्तरापादनायोगात्। 'रैकुलम्' इत्यत्रायादेशस्य केनापि रूपेण प्रत्ययनिमित्तकत्वासंभवेनापादनायोगेन तदापादनपरभाष्य-विरोधात्। पदसंज्ञादेः प्रत्ययत्वाश्रयत्वाभावेन 'मधु' इत्यादावतिदेशासंभवाच्च। सिद्धान्ते नियमपरतयेदं सूत्रं व्यवस्थाप्यत इत्यन्यदेतत्। यदप्युक्तं तेनैव " 'रैकुलम्' इत्यत्रावयवद्वारेण प्रत्ययस्यादेशं प्रति निमित्तत्वमस्त्येव। प्रत्ययत्वाश्रयस्त्वायादेशो न भवतीति न प्रवर्तते" इति। तदपि न, अवयवद्वारेण प्रत्ययस्यादेशं प्रति निमित्तत्वाश्रयणे मानाभावात्। अन्यथा प्रत्ययग्रहणेऽपि तस्य तत्र प्रवृत्तिप्रसङ्गाच्च। न हि 'तल्लक्षणम्' इत्यनेन प्रत्ययलक्षणमित्यर्थो न गम्यते, येन प्रत्ययशब्दे विद्यमानेऽर्थान्तरं प्रतीयेत। पदसंज्ञादिवदायादेशस्य प्रत्ययत्वाश्रयत्वाभावेऽपि न दोष इत्यन्यदेतत्। अस्मदुक्तप्रकारेण तु प्रत्ययलक्षणग्रहणबलेन प्रत्यय एव लक्षणं निमित्तं यस्य तत् प्रत्ययलक्षणमित्यवधारणलाभे सति 'कुमार्यायिदम्' इत्यादावप्रत्ययाश्रयोऽपि भवत्यायादेश इति न तस्यातिदेश इति युक्तम्। यदप्युक्तं तेनैव "अनेनैव न्यायेन [2]'न धातुलोप आर्धधातुके' इति धिन्विकृण्व्योर्विचि [3]'लोपो व्योर्वलि' इति वलोपस्य वल्निमित्तत्वादार्धधातुकनिमित्तत्वाभावाद् गुणनिषेधो न भवति। तेन 'सुधे, सुकर्' इति भवति, न तु 'सुधी, सुकीः' इति। तदपि[न,] रैकुलमित्यत्रायादेशस्येव जीरदानुरित्यत्र वलोपस्यावयवद्वारेणार्धधातुकनिमित्तत्वे सति तत्रत्यभाष्येण स्वग्रन्थेन च विरोधापत्त्यात्रावयवद्वारायादेशस्य प्रत्ययनिमित्तत्वाश्रयणानौचित्येन 'अनेनैव न्यायेन' इत्युपात्तन्यायस्य शिथिलत्वात्। विच आर्धधातुकत्वानपायेन तत्र लोपस्यार्ध-धातुकनिमित्ततया गुणनिषेधे 'सुधी, सुकीः' इत्येव युक्तत्वाच्च। अधिकं तु तस्मिन्नेव सूत्रे निदर्शितम्॥

[१, ४७६–४७८]

(नारायणीयम्)

मद्गीर्मेयं न मात्सर्यमलिने मानसे पदम्।
लब्धावकाशमन्यत्र विन्देद्वेदान्तवेद्यवत्॥

ननु 'लोपे प्रत्ययलक्षणम्' इत्युच्यमाने प्रत्ययावस्थानस्थलेऽन्यत्र वा यस्य लोपात् प्रत्ययनिमित्तं कार्यमप्राप्तं तद् भवतीत्यर्थः स्यात्। ततश्च पिपठीरित्यादौ क्विबादिप्रसङ्गः, तत्राह — **प्रत्ययेति**। ननु ष्यङः प्रत्ययनिमित्तत्वाभावात् कथं तत्प्रसङ्गोक्तिरित्यत आह — **प्रत्ययस्येति**। लक्षण-शब्दो भावसाधनः प्रादुर्भाववाची। प्रत्यासत्तिश्च विषयव्याप्तये नाश्रीयत इति ष्यङः प्रसङ्गोक्ति-रिति भावः। यदवस्थाने यत्प्रत्ययप्राप्तिस्तल्लोपेऽपि तस्य प्रादुर्भाव इति वाच्यत्वात् तथात्वमिहो-पपादयति — **सुरथस्येति**। [3]'हनिकुषिनीरमिकाशिभ्यः क्थन्' इति रमेः क्थन्। हन्तेः क्तः। [4]'अनुदात्त' इत्यनुनासिकलोपः। [5]'इतो मनुष्यजातेः' इति ङीषं बाधित्वा ष्यङः प्रसङ्गः। ननु सति प्रत्ययग्रहणे यद्यपि ष्यङोऽप्रसङ्गः, प्रत्ययलोपस्यात्राभावात्, तथापि प्रत्ययनिमित्तकार्यसिद्धिर्भाव-

---

[1] पा. सू. १. १. ४.
[2] पा. सू. ६. १. ६६.
[3] उणादिसूत्रम् १६७.
[4] पा. सू. ६. ४. ३७.
[5] पा. सू. ४. १. ६५.

साधने कथमित्यत आह — **प्रत्ययेति**। **तस्यैवेति**। प्रत्यासत्तेरिति भावः। **अनर्थकमिति**। न च विकल्पना, करणसाधनत्वेनाप्यस्योपपत्तेः। ननु सति प्रत्ययग्रहणे विरुद्धार्थत्वाद् भावसाधनासंभावना। असति तु तस्मिन् न करणसाधनतानिश्चायकं किंचिदिति भाष्यायोगमाशङ्क्याह — **संदेह इति**। व्याख्यानस्यावश्यकत्वमाह — **अन्यथेति**। ननु व्याहतार्थत्वेन तन्निवृत्तिरुक्ता, अत आह — [1]**प्रत्ययान्तरस्येति**। व्याहत्या प्रत्यासत्तिबाधः स्यादिति भावः। यद्येवं सति प्रत्ययग्रहणे भावसाधनत्वेऽप्यदोष इत्यत्राह — **ततश्चेति**। करणसाधनत्वे युक्तिमप्याह — **लक्षणेति**। तदेवं भावसाधनशङ्कानिवृत्त्यर्थत्वाभावात् प्रत्ययग्रहणस्य प्रत्यासत्त्या प्रत्ययलोपे प्रत्ययनिमित्तं कार्यं भवतीति लभ्यमिति स्थितम्। प्रत्ययग्रहणमतिरिच्यमानमपि कथमिममर्थं लम्भयेत्, अत आह — **प्रत्ययेति**। ननु सत्ताकालेऽपि तुकं प्रति योग्यत्वात् क्विपः कथमित्थं विज्ञानेऽप्यत्र व्यवच्छेदः, तत्राह — **तेनेति**। 'अग्निचित्' इत्यादौ दर्शनमपि संभाव्यते, वलि लोपात् तुकः परत्वादित्यत्राह — **न चेति**। कथं पुनः प्रागप्राप्तस्य लोपोत्तरकालं प्राप्तिः, अत आह — **कृत इति**। प्रत्ययावस्थानकाले तुक इह [2]कथमप्राप्तिः, अत आह — **अत्रेति**। बहिरङ्गोऽप्यपवादोऽन्तरङ्गं बाधिष्यत इत्यत्राह — **भिन्नेति**। ननु क्विबन्त उभयप्राप्तिरिति कथंचित् समानविषयत्वं वर्णयिष्याम इत्यत्राह — **सति त्विति**। दोषवानेवात्र चायं न्याय इति भेदापेक्षा कार्येत्यन्तरङ्गाबाधनमित्याह — **सतीति**। कथमन्यतरेणाभिमतसिद्धिः। सत्यां पुनः-श्रुतौ कृत्स्नत्वलाभ [3]इत्याह — **एकमिति**। प्रत्यासत्त्या लब्धार्थस्य श्रुत्या प्रतिपादनं व्यर्थमिति कात्स्न्र्यलाभ इति भावः। प्रष्टुरभिप्रायमुत्तरे स्थित्वाह — **प्रत्ययेति**। उत्तराभिप्रायमाह — **प्रत्ययस्येति**। ननु प्रत्ययग्रहणेऽपि कार्यं प्रति निमित्तत्वं प्रत्ययस्य गम्यते, न तु तद्रूप्येण निमित्तत्वम्, अत आह — **प्रत्ययेति**। तत्पदोपादानेऽपि सिद्धे पुनःश्रुतिसामर्थ्यादेष विशेषो लभ्यत इति भावः। तल्लक्षणत्वमेवात्र नास्तीत्यत्राह — **अवयवेति**। **प्रत्ययाश्रयस्त्विति**। न हि 'अचि' इति यद्रूपमुपात्तं तत् प्रत्ययस्यासाधारणम्। **अनेनेति**। अनेनैतद्दर्शयति — तत्राप्यार्धधातुकग्रहणमन्तरेण धातुलोपपदस्य बहुव्रीहित्वे सकलेष्टसिद्धौ तद्ग्रहणसामर्थ्यात् तत्त्वेन [4]निमित्तभावो व्याख्यातुं शक्य इति॥

[१, ४७९–४८२]

(**लघुविवरणम्**) ननु 'सदन्वाख्यानाच्छास्त्रस्य' इत्यनुपपन्नम्, शास्त्रं कर्तृ, करणं वा। आद्ये [5]"उभयप्राप्तौ कर्मणि' इति नियमात् शास्त्रस्येति [6]षष्ठ्यनुपपन्ना। सत इति च कर्मण्यनेनैव षष्ठ्यां [7]"कर्मणि च' इति समासप्रतिषेधात् 'सदन्वाख्यानात्' इति च निर्देशोऽनुपपन्नः। द्वितीये तु षष्ठ्यनुपपन्नेत्यत आह — **शास्त्रमिति**। ततश्च पूर्वपक्षे पूर्वप्राप्त्यभावात् [8]"उभयप्राप्तौ' इत्यस्याप्राप्तौ कृद्योगलक्षणायां षष्ठ्यां 'सदन्वाख्यानात्' इति समासोऽपि घटत इति भावः। 'किमर्थम्' इति प्रश्नाभिप्रायं विघटयति — **न चेति**। अदर्शनमात्रविषया लोपसंज्ञा लुगादिशब्दनिर्वृत्तेऽप्यदर्शने प्रवर्तिष्यत इति लुक्युपसंख्यानं न कर्तव्यमित्यत आह — **तत्रेति**। लुक्युपसंख्यानं

---

[1] प्रत्ययान्तरेति — ग.
[2] कथं प्राप्तिः — ग.
[3] इत्यत आहेत्यर्थः।
[4] निमित्ताभावः — ग.
[5] पा. सू. २. ३. ६६.
[6] षष्ठ्यनुपपत्तिः — ण.
[7] पा. सू. २. २. १४.
[8] पा. सू. २. ३. ६६.

किं लोपसंज्ञायाः स्वभावतोऽप्राप्तेः, उत लुगादिभिर्बाधनात् । नाद्य इत्याह — **अदर्शनेति** । [1]न द्वितीय इत्याह — **न चेति**। लोपः संज्ञा यस्येति बहुव्रीहौ मत्वर्थीयोऽनुपपन्न इत्यत्राह — **लोपस्येति**। नन्विष्यत एव प्रत्ययादर्शनस्य लुमत्संज्ञेत्यत आह — **लुगिति**। नन्वाश्रितव्यापारेषु लुगादिष्वाश्रीयमाणेष्वितरेतराश्रयदोषः स्यात्, संज्ञाधीना प्रदेशेषु लुगादिशब्दार्थप्रतिपत्तिः, लुगादिशब्दार्थप्रतिपत्त्यधीना चादर्शनविशेषस्य लुगादिसंज्ञाप्रतिपत्तिरित्यत आह — **आवृत्तिर्वेति**। अयं भावः — आवृत्तौ द्वे वाक्ये भवतः। तत्रैकेन वाक्येन प्रत्ययादर्शनमात्रस्य लुगादिसंज्ञा विधीयते। ततश्च प्रदेशवाक्येषु लुगादिशब्दार्थे प्रतिपन्ने द्वितीयेन वाक्येन लुगादिसंज्ञानां संकरे प्राप्ते नियमः क्रियते — लुगिति यददर्शनं तदेव लुक्संज्ञमिति। एवमितरत्रापि। एतच्च द्वितीये वाक्ये पूर्वस्माद्वाक्याल्लुगादिग्रहणानुवृत्तेर्लभ्यत इति। नन्वत्रापि पक्षे प्रदेशेष्वितरेतराश्रयमेव, अत आह — **विधीति**। ननु 'यथैव' इत्यनुपपन्नम्, तद्भावितग्रहणे विज्ञायमाने लोपसंज्ञाविषये लुगादिसंज्ञाया अप्राप्तेरित्यत आह — **तिसृणामिति**। तद्भावितग्रहणेऽपरिज्ञानाच्चोद्यमित्यर्थः। ननु भवन[2]क्रियायां विकृतेः कर्तृत्वात् तद्वाचिनि भूतशब्दे समानाधिकरणे उत्तरपदे परतः पुंवद्भावेन भवितव्यमित्यत आह — **पुंवद्भावस्त्विति**। पृथक्संज्ञाकरणं भेदेन लोपसंज्ञाया विधानं चेत् तर्हि तदप्रत्ययादर्शने चरितार्थमिति विहतसामर्थ्यमित्यत आह — **लुगादीति**। भाष्ये 'यथैव' इति चोद्यं लोपसंज्ञायामपि तद्भावितग्रहणमाश्रित्य। 'अस्त्यन्यत्' इति भाष्यमनुपपन्नम्, लुगादिसंज्ञाभिर्लोपसंज्ञाया एकविषयत्वे लोपसंज्ञायां तद्भावितग्रहणस्य लुगादिसंज्ञास्विवावश्यंभावित्वादित्यत आह — **प्रत्ययाप्रत्ययेति**। तिसृणां संज्ञानां विधानसामर्थ्याल्लुगादिसंज्ञासु तद्भावितग्रहणे स्थिते यदि लोपसंज्ञायाः पृथक्करणे प्रयोजनं न स्यात्, स्यात् तर्हि तत्रापि तद्भावितग्रहणम्। अस्ति च तत्। तस्मान्न तत्र तद्भावितग्रहणमित्यर्थः॥

[१, ४७९–४८२]

(**विवरणम्**) ननु 'सदन्वाख्यानाच्छास्त्रस्य' इति शास्त्रमन्वाख्याने कर्तृ करणं वा। आद्ये सतः कर्मत्वादन्वाख्याने शास्त्रस्य च कर्तृत्वात् [3]'उभयप्राप्तौ कर्मणि' इति नियमात् 'शास्त्रस्य' इति न षष्ठी स्यात्। [4]'कर्मणि च' इति समासनिषेधात् 'सदन्वाख्यानात्' इति समासोऽप्यनुपपन्नः। द्वितीये [5]'तु षष्ठ्यनुपपन्नेत्यत आह — **शास्त्रमिति**। **अल्विधित्वात्** इमादेरिति शेषः। बहुव्रीहौ मत्वर्थीयोऽनुपपन्न इतीनन्तेन षष्ठीसमासं दर्शयति — **लोपस्येति**। **लुक्श्लिवति**। **संकरः** परस्परं लोपसंज्ञा[6]भिते प्रत्ययादर्शने लोपसंज्ञया च। तथा च वक्ष्यति — गोमतीभूतेति, [7]'लुक् तद्धितलुकि' इति लुक् प्राप्नोति, इति। हरीतकीत्यत्र [8]'हरीतक्यादिभ्यश्च' [9]इत्यञो लुप्। लवण इत्यत्र [10]'लवणाल्लुक्'। **आश्रितेति**। आश्रितः स्वरूपस्य व्यापारोऽदर्शनविषयो यैस्ते तथोक्ताः, अदर्शनविधायका लुगादिशब्दाः प्रत्ययादर्शनस्य संज्ञा इत्युक्ते प्रत्यासत्तेर्यस्यादर्शनस्य

---

[1] नापि द्वितीयः — ड, ढ.
[2] क्रियायाः — ड, ढ.
[3] पा. सू. २. ३. ६६.
[4] पा. सू. २. २. १४.
[5] तुशब्दो नास्ति — ञ.
[6] भावितप्रत्ययादर्शने — ञ.
[7] पा. सू. १. २. ४९.
[8] पा. सू. ४. ३. १६७.
[9] हरीतकीशब्दस्य जातिवाचित्वेन ङीषन्तत्वेनान्तोदात्तत्वात् 'अनुदात्तोदेश्च' इत्यञिति बोध्यम्।
[10] पा. सू. ४. ४. २४.

विधायकास्तस्येति लभ्यत इत्यर्थः। स्यादत्रेतरेतराश्रयदोषः, संज्ञाधीना प्रदेशेषु लुगादिशब्दार्थ-प्रतिपत्तिः, लुगादि[1]शब्दार्थप्रतिपत्त्यधीना [2]चादर्शनविशेषस्य संज्ञेत्यत आह — **आवृत्तिर्वेति**। आवृत्तौ च द्वे वाक्ये भवतः। तत्रैकेन वाक्येन प्रत्ययादर्शनस्यानाश्रितविशेषस्य लुगादिसंज्ञा विधीयते। ततश्च प्रदेशेषु लुगादिशब्दार्थे प्रतिपन्ने द्वितीयेन वाक्येन लुगादिसंज्ञासंकराभावाय नियमः क्रियते — लुगिति यददर्शनं तदेव लुक्संज्ञमिति। एवमितरत्रापि। एतच्च द्वितीये वाक्ये पूर्वस्माद्वाक्याल्लुगादिग्रहणानुवृत्तेर्लभ्यते। ननु तद्भावितग्रहणे 'यथैव' इति चोद्यानुपपत्ति-रित्यत आह — **तिसृणामिति**। [3]तद्भावितग्रहणापरिज्ञानाच्चोद्यमित्यर्थः। **परस्परेति**। लुगादीनां मध्ये यया यददर्शनं भाव्यते तस्य सैव संज्ञेत्यर्थः। **वैयधिकरण्यादिति**। भवनक्रियायां प्रकृतेः कर्तृत्वेनेति शेषः। **क्वचिद्विकारस्येति**। वृत्तौ प्रकृतेरेव कर्तृत्वेऽपि विकृतिशब्दस्य महद्भूतेत्यत्र प्रकृतिवृत्तित्वात् सामानाधिकरण्यमित्यपि द्रष्टव्यम्। अत एव गौणवृत्तित्वात् महच्छब्दस्य [4]'आन्महतः' इत्यात्वाभावः। भाष्ये **एवं लोपसंज्ञापीति**। लोपसंज्ञायामपि लुमत्संज्ञाभ्यः पृथक्करणसामर्थ्यात् तद्भावितग्रहणं मन्वानस्य चोद्यम्। लुमत्संज्ञासु तद्भावित-ग्रहणादेव लोपसंज्ञायां तद्भावितग्रहणं विनापि तस्याः पृथक्करणं सप्रयोजनमिति परिहृतम् — **अस्त्यन्यदिति**। स्वयं प्रयोजनान्तरमाह — **प्रत्ययेति**॥

[१, ४७९–४७२]

(**उद्द्योतनम्**) ननु शास्त्रं कर्तृ करणं वा। आद्ये सतः कर्मत्वात् [5]'उभयप्राप्तौ कर्मणि' इति नियमात् 'शास्त्रस्य' इति षष्ठी न स्यात्, [6]'कर्मणि च' इति निषेधात् 'सदन्वाख्यानात्' इति समासोऽप्यनुपपन्नः। द्वितीये षष्ठ्यनुपपत्तिः, अत आह — **शास्त्रमिति**। **अविच्छेदेन** प्रवाहेत्यादिः। **कर्तृत्वमिति**। 'काष्ठानि पचन्ति' इतिवद्वैवक्षिकमित्यर्थः। **अल्विधित्वादिति**। इमो हलादिसार्वधातुकापेक्षत्वादित्यर्थः। तृहेर्लङि श्नमि, इमि, [7]हल्ङ्यादिलोपे ढत्वे जश्त्वे 'अतृणेट्' इति भवति। नन्वेकस्य [8]संज्ञाद्वयसंभवादुपसंख्यानवैयर्थ्यम्, अत आह — [9]**तत्रेति**। संज्ञासु [10]तत्रन्यायो नास्तीत्याह — **न चेति**। बहुव्रीहौ मत्वर्थीयानुपपत्तेरिनन्तेन षष्ठीसमासमाह — **लोपस्येति**। लोपसंज्ञाया इत्यर्थः। यथाश्रुते इष्टापत्तिमाशङ्क्य 'लुमत्संज्ञम्' इत्यनेन सूचितमर्थमाह — **लुगिति**। लुग्विधिमाह — **उत इति**। **हरीतकीति**। [11]'हरीतक्यादिभ्यश्च' इति विकाराद्यर्थप्रत्ययस्य लुप्। **लवण इति**। [12]'लवणाल्लुक्' इति [13]संसृष्टार्थस्य ठको लुक्। ननु लुगादिशब्दैर्विहितमदर्शनं लुगादिसंज्ञमित्ययमर्थः सूत्रात् कथं लभ्यते, अत आह — **तत्राश्रितेति**। आश्रितः स्वरूपस्य व्यापारोऽदर्शनविषयो यैस्ते तथोक्ताः, लक्षणया लुगादिशब्दा अदर्शनविधायक-लुगादिपराः, तथा चादर्शनविधायका लुगादिशब्दाः प्रत्ययादर्शनस्य संज्ञा इत्युक्ते प्रत्यासत्तेर्यस्या-दर्शनस्य [14]विधायकास्तस्यादर्शनस्येति लभ्यत इत्यर्थः। नन्वेवं प्रदेशेषु संज्ञया लुगादिशब्दार्थ-

---

[1] शब्दप्रतिपत्त्यधीना — ट.
[2] वादर्शनविशेषस्य — ञ.
[3] तद्भावितग्रहणापरिज्ञानं चोद्यार्थः — ञ.
[4] पा. सू. ६. ३. ४६.
[5] पा. सू. २. ३. ६६.
[6] पा. सू. २. २. १४.
[7] अत्र क्रमो न विवक्षित इति ज्ञेयम्।
[8] संज्ञाद्वयाभावात् — म.
[9] तत्रेति — अ, ऋ.
[10] तन्न्यायः — म.
[11] पा. सू. ४. ३. १६७.
[12] पा. सू. ४. ४. २४.
[13] संसृष्टार्थठकः — अ, ऋ.
[14] विधायकास्तस्येति — ऋ.

प्रतिपत्तिः, तत्प्रतिपत्त्यधीना चादर्शनविशेषस्य लुगादि[1]संज्ञेति [2]प्रतिपत्तिरितीतरेतराश्रयत्वम्, अत आह — **आवृत्तिर्वेति** । आवृत्तौ वाक्यद्वयम् । तत्रैकेन वाक्येनानाश्रितविशेषप्रत्ययादर्शनस्य लुगादिसंज्ञा क्रियते । ततः प्रदेशेषु लुगादिशब्दार्थप्रतिपत्तौ द्वितीयवाक्येन सांकर्यपरिहाराय नियमः क्रियते — लुगिति यददर्शनं तदेव लुक्संज्ञं भवतीति । एवमितरत्रापि । पूर्ववाक्याद् द्वितीयवाक्ये लुगाद्यनुवृत्त्योक्तनियमो लभ्यते। वस्तुतो भाविसंज्ञयेतरेतराश्रयस्य [3]सुपरिहरत्वाल्लक्षणयोक्तार्थप्रतिपत्तेः क्लिष्टत्वादाह — **आवृत्तिर्वेति**। तथा च लुगिति यददर्शनं तल्लुक्संज्ञमित्याद्येक[4]वाक्यत्वेऽपि सिध्यतीति वाक्यभेदनियमयोरनुपयोग इति ज्ञेयम्। ननु तद्भावितग्रहणे 'यथैव' इति [5]शङ्कानुपपत्तिः, अत आह — **तिसृणामिति**। [6]तद्भावितग्रहणाज्ञानाच्छङ्क्येयमित्यर्थः। **परस्परेति**। लुगादीनां मध्ये यया यददर्शनं बोध्यते तस्य सैव संज्ञेत्यर्थः। **वैयधिकरण्यादिति** । भवनक्रियायां प्रकृतेः कर्तृत्वादित्यर्थः । **सामानाधिकरण्यादिति** । अमहती महती संपन्ना महद्भूतेत्यत्र प्रकृतेरेव कर्तृत्वेऽपि विकृतिशब्दस्य प्रकृतिवृत्तित्वात् सामानाधिकरण्यम्। अत एव गौणत्वान्महच्छब्दस्यात्वाभावः। ननु क्वचित् प्रकृतेः कर्तृत्वं क्वचिद्विकृतेरित्यत्र किं मानम्, अत आह — **नित्यत्वादिति**। प्रयोगद्वयदर्शनादिति भावः। लोपसंज्ञायामपि तद्भावितग्रहणं मन्वानः शङ्कते — भाष्ये [7]**यथैव तर्हीति**। लोपसंज्ञायां तद्भावितग्रहणाभावेऽपि पृथक्संज्ञाकरणस्य प्रयोजनमस्तीत्याह — भाष्ये **अस्त्यन्यदिति** । स्वयं प्रयोजनान्तरमाह — **प्रत्ययेति** ॥

[१, ४७९–४८२]

(रत्नप्रकाशः) सदन्वाख्यानादिति। **सतः** विद्यमानस्य शब्दस्य, **अन्वाख्यानात्** निमित्तत्वेन कार्यित्वेन वाश्रयणादित्यर्थः। **शास्त्रस्येति**। करणस्य शास्त्रस्य शेषत्वेन विवक्षणात् षष्ठी। कर्तरि वा शास्त्रे कृद्योगलक्षणा । तदेतदाह — भगवान् **सच्छास्त्रेणेति, सतो वा शास्त्रमिति च**। **लुक्युपसंख्यानमिति** । लुगादिशब्दैः कृतमेव प्रत्ययादर्शनं यथा लुगादिशब्दैरनूद्यते, तथा लोपशब्देन कृतमेव 'तत् लोपशब्देनानुवदनीयमिति मन्यते। एतेन 'तक्रकौण्डिन्यन्यायेन लोपसंज्ञाया लुगादिसंज्ञाभिर्बाधनादिति भावः' इति कैयटो निरस्तः । 'यद्येवम्, प्रत्ययादर्शनं तु' इति स्वाशयस्य प्रष्ट्रैव वाचाविष्करिष्यमाणत्वेनात्यन्तमौर्ख्यसूचनाशयान्तरकल्पनानौचित्यात् । आकडारीयसंज्ञातिरिक्तसंज्ञासु बाध्यबाधकभावो नास्तीति सिद्धान्तेतिप्रसिद्धे विद्यमाने तदज्ञानेन प्रश्नोपपादने हि प्रष्टुरत्यन्तमौर्ख्यं सूचितम् । यदप्युक्तं तेनैव 'लुग्ग्रहणस्य चोपलक्षणत्वात् श्लुलुपावपि गृह्येते' इति। तन्न, श्लौ लुपि च लुकीव प्रत्ययलक्षणकार्यप्रसक्तेरनुपपादनात्। **न वा कर्तव्यमिति** । उपसंख्यानमित्यनुषज्यते । **अदर्शनस्येति** । सामान्यत इति शेषः । **लोपसंज्ञत्वादिति**। क्वचित् 'लोपसंज्ञित्वात्' इति प्रामादिकः पाठः । स एवानुसृतः कैयटेन। अयुक्तश्च स पाठः, 'अदर्शनं हि लोपसंज्ञं भवतीत्युच्यते' इति तद्व्याख्यानेन सह विरोधात् । [9]**लुमत्संज्ञाश्चापीति** । तथैवेति शेषः । **तेनेति** । येन कारणेन संज्ञाचतुष्ट-

---

[1] संज्ञा इति — अ, ऋ.
[2] प्रतिपत्ताविवरेतराश्रयत्वम् — म.
[3] सुपरिहारत्वात् — अ, म.
[4] वाक्येऽपि — अ.
[5] शङ्कानुपपन्नेत्यत आह — अ.
[6] तद्भावितग्रहणाच्छङ्क्येयम् — म.
[7] यथैवं तर्हि — ऋ.
[8] अदर्शनमित्यर्थः ।
[9] लुमत्संज्ञा अपीति — ब.

यमदर्शनसामान्यस्यैव कृतं, तेनेत्यर्थः । **लुक्यपि भविष्यतीति** । लुक्शब्देनादर्शने जातेऽपि प्रत्ययलक्षणं भविष्यतीति भावः । **यद्येवमिति** । अदर्शनसामान्यस्यैव लोपलुक्श्लुलुप्संज्ञा यद्यभिमता इति भावः । **प्रत्ययादर्शनं त्विति** । तुश्चार्थो भिन्नक्रमः । लोपशब्देन कृतं प्रत्ययादर्शनं लुमत्संज्ञमपि स्यादित्यर्थः । एतेन 'लुक्श्लुलुप्संज्ञानां संकरः प्राप्नोतीत्यर्थः' इति कैयटो निरस्तः । 'प्रत्ययादर्शनं तु' इत्यादिप्रकृतवचनभावार्थस्याक्षरोपरि प्रतीतस्य 'यथैव तर्हि' इत्यादिनानुपदमेव वक्ष्यमाणत्वेन तमपहाय [1]'सूचीकटाहन्यायेन वचनानुपात्तमपि दोषं निदर्श्य परिहृत्य तदनन्तरं वचनोपात्तदोषं निदर्श्य परिहरिष्यामीत्याशयेन प्रवृत्तं 'तत्र लुकि श्लुविधिः' इत्यादिभाष्यमनुसृत्याक्षरविरुद्धभाववर्णनानौचित्यात् । **लुकि श्लुविधिरिति** । उपलक्षणमिदम् । तेन 'जुहोति' इत्यत्र श्लौ [2]'उतो वृद्धिर्लुकि' इति [3]लुग्विधिप्रतिषेधः । तथा 'हरीतकी' इत्यत्र लुपि [4]'लुक् तद्धितलुकि' इति । तथा 'लवणः सूपः' इत्यत्र लुकि [5]'लुपि युक्तवत्' इति । **न वा पृथगिति** । एकयैव लुमत्संज्ञया प्रदेशवाक्येषु संज्ञिप्रत्यायने सिद्धेऽनेकसंज्ञाकरणसामर्थ्यान्न लुमत्संज्ञानां परस्परं संकर इति भावः । एतेन 'अनेकसंज्ञाविधानसामर्थ्यात् तद्भावितग्रहणं विज्ञायते । आश्रितस्वरूपव्यापारा वा लुगादय आश्रीयन्ते । आवृत्तिर्वा लुगादिशब्दानामाश्रीयत इति तद्भावितग्रहणं सिध्यति । विधिप्रदेशेषु चेतरेतराश्रयदोषानवतारः, नित्यशब्दाश्रयणाद् भाविसंज्ञाविज्ञानाद्वा' इति कैयटः, तदनुसारी 'लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात् तत्तत्संज्ञं स्यात्' इति तत्सूत्रं व्याचक्षाणः कौमुदीकृच्च निरस्तः । अनेकसंज्ञाकरणसामर्थ्येनैवानुवादप्रदेशेषु लुमच्छब्दैः स्वेन स्वेन कृतस्यैवादर्शनस्यानुवाद इति सिद्धे विधिप्रदेशेऽन्योन्याश्रयत्वावहतद्भावितसंज्ञाविधानाश्रयणानौचित्यात् । संप्रसारणसंज्ञास्थले भाविसंज्ञाविज्ञानेनान्योन्याश्रयपरिहारसंभवेऽपि लुगादिसंज्ञास्थले तत्परिहारस्य ब्रह्मणोऽप्यशक्यत्वाच्च । नित्येष्वपि हि शब्देषु यावल्लुगादिशब्दैरदर्शनं न बोधितं तावत् संज्ञा न सिद्धा, यावत् संज्ञा न सिद्धा तावत् तत्कृतादर्शनं न सिद्धमिति ज्ञप्तावन्योन्याश्रयो वज्रलेपायितो भवति । अत एव [6]'भाविसंज्ञाविज्ञानेनापि [न] तस्य परिहार इति स्पष्टं मन्दधियामपि । प्रसक्तं दोषं परिहृत्य 'न वादर्शनस्य लोपसंज्ञत्वात्' इति वार्तिकार्थमुपसंहरति — **तस्मादिति** । यस्माल्लोपसंज्ञायां लुगादिकृतादर्शने प्रवर्तमानायामपि तत्साम्येन लुमत्संज्ञा [7]'परस्परकृतादर्शने न प्रवर्तते तस्मादित्यर्थः । नन्वनेकसंज्ञाकरणसामर्थ्याल्लुमत्संज्ञानां परस्परावगाहनं मा भूत्राम, लुमत्संज्ञा लोपसंज्ञां कुतो नावगाहन्त इति शङ्कते — **यथैवेति** । **गोमतीभूतेति** । अत्र [8]'वेरपृक्तस्य' इति त्वेर्लोपः । **ननु चात्रापीति** । पृथग् लुमत्संज्ञाकरणस्य हीदं प्रयोजनं स्वेनैव कृतमदर्शनं स्वेनानुवदनीयमिति । तत्र यदि लोपशब्देन कृतमदर्शनमप्यनु[9]वदेरंस्ताः, तर्ह्युक्तनियमभङ्गः स्यादेवेति भावः । **लुमत्संज्ञासु यदुच्यत इति** । प्रत्ययस्यैव लुमत्संज्ञकमदर्शनं भवति, लुमत्संज्ञाः स्वकृतमेवादर्शनमनुवदन्ति, तत्कृतादर्शने परेऽङ्गस्य कार्याभावः, [10]'लुक् तद्धितलुकि' इति चेति भावः । **तल्लोपमात्रे मा भूदिति** । तत्संबन्धाभावसिद्ध्यर्थं पृथग् लोपसंज्ञा कर्तव्येति भावः । एतेन 'लुगादिसंज्ञानां भेदेनोपादानात् तद्भावितग्रहणम् । लोपसंज्ञायां नास्ति तद्भावितग्रहणम्' इति कैयटो निरस्तः । व्यर्थासंबद्धप्रलापत्वात् । अनेकलुमत्संज्ञाकरण-

---

[1] लौ. न्या. प्रथमभागे पुटम् ५३.
[2] पा. सू. ७. ३. ८९.
[3] लुक्प्रतिषेधः — ब.
[4] पा. सू. १. २. ४९.
[5] पा. सू. १. २. ५१.
[6] भाविसंज्ञानेनापि — ब.
[7] परस्य कृतादर्शने — ब.
[8] पा. सू. ६. १. ६७.
[9] 'अनुवदेयुः' इत्युचितम्, 'अनोरकर्मकात्' इत्यकर्मकादेवात्मनेपदविधानात् ।
[10] पा. सू. १. २. ४९.

सामर्थ्यात् तासां परस्परमवगाहनं मा भूत्नाम, तत्सामर्थ्यस्य तावतैवोपक्षीणत्वेन लोपसंज्ञानवगाहनं तेन [न] सिध्यतीति मन्यमानं प्रति [1]'तुष्यतु दुर्जनः' इति न्यायेन 'ज्ञापकाभावाल्लुगादिसंज्ञा लोपसंज्ञां नावगाहन्ते' इत्याशयेन लोपसंज्ञा लुमत्संज्ञा अवगाहत इत्यत्र ज्ञापकमनुसरति — **लुमति प्रतिषेधाद्धेति** ॥

[१, ४७९–४८२]

(**नारायणीयम्**) प्रयोजनप्रसिद्धेराह — **स्थानिवदिति** । कृद्योगे कर्तरि षष्ठ्यनुपपन्ना, उभयप्राप्तौ कर्मणि नियमनात् तस्याः, समासाभावाच्च, भाष्येऽप्यभेदानुपपत्तेश्च, अत आह — **शास्त्रमिति** । कर्तरि तृतीया चेद्वक्ष्यमाणाविशेष इत्यत्राह — **शास्त्रेणेति** । नानार्थत्वादाह — [**विद्यमानमिति**] । गोमानित्यादौ सत्त्वानुमादेः सदन्वाख्यानमेतद्वचनारम्भे न हेतुरित्यत्राह — **निमित्तत्वेनेति** । आचार्यकर्तृकस्य कथं शास्त्रकर्तृकत्वम्, अत आह — **शास्त्रस्यैवेति** । करणे कर्तृत्वम् 'असिश्छिनत्ति' इतिवदौपचारिकमित्यर्थः । **अविच्छेदेनेति** । उपचारनिदानकीर्तनम् — यद्धि करणं सकृन्नियोजितमविच्छिन्नप्रवृत्ति तत्कर्तृत्वेनोपचर्यत इति । यद्यप्यवगतप्राचीनव्याख्यानार्थस्य तस्मादस्मिन्नाविशेषाशङ्का, तथापि इतिना व्याख्यानार्थवर्णनं परामृश्यत इति नानुपपन्नं किंचित् । अन्यथासिद्धयाशङ्कायां परिहारः को वार्तिकसंमत इत्यत्राह — **न चेति** । अविरोधात् संज्ञाद्वयसत्त्वादुपसंख्यानं किमर्थमित्याशङ्क्य न विरोधस्य [2]बाधकारणत्वम्, [3]अविरोधेऽपि..... ...मन्यते । लुगिति च तस्य साधुत्वान्वाख्यानाल्लुग्भावितत्वमेव लुक्शास्त्रादृतेऽप्यधिगच्छतीति भावः । एतच्च संप्रसारणसंज्ञादिसूत्रे 'इजादियजादि' इति भाष्यार्थविदुषां सुबोधम् । क्लेशासहिष्णून् प्रत्याह — **भावीति** । तद्भावितसंज्ञाकल्पने कथमेतच्चोद्यम्, अत आह — **तिसृणामिति** । भावानवबोधोत्थितं चोद्यमित्यर्थः । यो लोपस्य लुक्संज्ञायां दोषस्तमाविष्करोति — **च्वेरिति** । पुंवद्भावे सति लुकि वा न विशेष इत्यत्राह — **पुंवदिति** । **क्वचिदिति** । यत्र प्रकृतिकर्तृत्वं तत्र सामानाधिकरण्यम्, अन्यत्र वैयधिकरण्यम् । परस्परसांकर्यनिरासेनापि संज्ञापृथक्त्वोपपत्तेः कथं लोपसंज्ञाविषयेऽप्रवृत्तिरासामित्यत्राह — **लुगिति** । अनेककल्पनसंभवेऽभिमतकल्पनमित्यर्थः । किं प्रयोजनमित्यपेक्षायां भाष्यानुक्तं मुख्यं प्रयोजनमाह — **प्रत्ययेति** । यदि लोपसंज्ञामनारभ्येदमेव सूत्रमुच्येत तदाप्रत्ययादर्शनस्य[4] न कापि संज्ञा स्यादिति [5]'लोपो व्योः' इत्यादावदर्शनग्रहणं कर्तव्यं स्यादिति तद्गौरवपरिहाराय लोपसंज्ञापृथक्त्वमित्यर्थः । भाष्योक्तस्य फलस्य विषयमाह — **यथेति** । असत्यां हि लोपसंज्ञायां 'वेरपृक्तस्य लुक्' इत्यादिकं कर्तव्यमिति दोषोऽयं भवति । सामर्थ्याभावेऽपि लुगादिसंज्ञासाहचर्यात् तद्भावितसंज्ञा कस्मान्नेत्यत्राह — **तस्मादिति** । साहचर्यं न सर्वत्र व्यवस्थापकमित्यर्थः ॥

[१, ४८२–४८६]

(**लघुविवरणम्**) **स्थितैवेति** । न हि [6]'सुप्तिङन्तं पदम्' इति पदसंज्ञाया भसंज्ञापवादः,

---

[1] लौ. न्या. द्वितीयभागे पुटम् ३५.
[2] बाधकरणम् — ग.
[3] 'अविरोधोऽपि' इत्यस्यानन्तरं कियांश्चिद्ग्रन्थस्त्रुटितः — ग, ति.
[4] अप्रत्ययादर्शनस्येति छेदः ।
[5] पा. सू. ६. १. ६६.
[6] पा. सू. १. ४. १४.

येन बाधिका स्यात्, [1]भिन्नावधिकत्वादित्यर्थः। ननु तर्हि पदसंज्ञापि भसंज्ञाया न बाधिकेति प्रत्ययलक्षणेन भसंज्ञायामल्लोपः स्यादित्यत आह — **अल्लोपस्त्विति**। समुदायपदसंज्ञाया भसंज्ञापवादो न भवतीति न बाधिकेति यदुक्तं तत्राह — **द्वितीयेति**। ननु [2]तथापि वर्णाश्रयत्वाद् भसंज्ञा प्रत्ययलक्षणेन न भवतीत्यत आह — **वर्णाश्रयेति**। प्राधान्येन वर्णान् नाश्रयत इत्यर्थः। प्रत्ययलक्षणेन शास्त्रद्वयातिदेशे तयोः पौर्वापर्याद् विप्रतिषेध उपपद्यत इत्यत आह — **अनेनैवेति**। ननु 'आन्यभाव्यस्य' इत्यनुपपन्नम्, समाससंज्ञया गुणवचनसंज्ञाया बाधनाद् गुणवचनष्यञोऽभावादित्यत आह — **अन्यभाव एवेति**। नात्र गुणवचनष्यञ्, किं तर्हि, स्वार्थिक [3]एवेत्यर्थः। ननु 'हन्तेरपि' इत्यनुपपन्नम्, वाच्यवाचकभेदाभावादित्यत आह — **सूत्रेति**। ननु वतण्डशब्दादुत्पन्नस्य [4]"वतण्डाच्च' इति यञो [5]"लुक् स्त्रियाम्' इति लुकि कृते प्रत्ययलक्षणेन शार्ङ्गरवादिपाठात् ष्फं बाधित्वा परत्वाद् ङीन् भविष्यतीत्यत आह — **यथेति**। **सर्वत्रग्रहणा[पकर्षा]दिति**। 'प्राचां ष्फ तद्धितः सर्वत्र' इत्येको योगः। अनेन च प्राचामाचार्याणां मतेन यञन्तात् सर्वत्र बाधकविषये ततोऽन्यत्र च ष्फो विधीयते। तेन ङीनं बाधित्वा पक्षे ष्फः स्यादित्यर्थः॥

[१, ४८२–४८६]

(विवरणम्) वार्तिकतद्व्याख्यानभाष्ययोर्विरोधं परिहरति — **निमित्तशब्देनेति**। अभावो भावस्योपलक्षणमित्याह — **अल्लोपश्चेति**। **सा चेति**। न हि तस्या भसंज्ञापवाद इति भावः। **कालेति**। अस्य चोद्यस्य नायमवसरः, किं तु कालान्तरमिति प्रतिपादनायेत्यर्थः। ननु पदस्य द्विर्वचनविधानात् कथं वाक्यस्य तदित्याशङ्क्य नैतद् द्विर्वचनम्, किं तु द्वे एते वाक्ये इत्याह — **पदसंज्ञाद्वयमिति**। ननु वर्णाश्रयत्वात् कथं प्रत्ययलक्षणेन भसंज्ञेत्यत आह — **भसंज्ञेति**। [6]**नेति**। न वर्णप्रधानेत्यर्थः। भाष्ये **पर्यवपन्नानि** मृतानि, अप्राप्तानीति यावत्। [7]नन्वेतेन प्रत्युत्थापनं कार्यातिदेशे स्यात्, स एव कुतः, शास्त्रनिमित्तातिदेशयोरपि संभवात्, अत आह — **कार्यस्येति**। नन्वन्यभाव इति षष्ठीतत्पुरुषः कर्मधारयो वा। उभयथापि ष्यञ्नानुपपन्नः, प्रथमे भावस्य [8]भावान्तरेणायोगात्, द्वितीयेऽपि समाससंज्ञया गुणसंज्ञाया बाधनादित्यत आह — **अन्यो भाव इति**। **स्वार्थ इति**। चातुर्वर्ण्यादित्वात्। सत्ता न स्थानिनः, किं तु तद्वचपदेशस्येत्याह — **कृदिति**। ननु संज्ञासंज्ञिनोर्भेदाभावात् कथं हन्तेर्हन्तिः संज्ञेत्यत आह — **सूत्रेति**। [9]"नक्षत्रेण युक्तः कालः' इत्यणो [10]'लुबविशेषे' इति लुपि [11]'लुपि युक्तवत्' इति युक्तवद्भावात् स्त्रीलिङ्गता। ततो जातार्थे [12]'संधिवेलादि' सूत्रेणाण्, तस्य वार्तिकेन लुगित्याह — **चित्रेति**। ननु वतण्डशब्दाद् गोत्रापत्ये विवक्षिते [13]'वतण्डाच्च' इति यञो [14]"लुक् स्त्रियाम्' इति लुकि प्रत्ययलक्षणेन

---

[1] 'भिन्नावधिकत्वादित्यर्थः' इति नास्ति — ण.
[2] तत्रापि — ड, ढ.
[3] एवकारो नास्ति — ण.
[4] पा. सू. ४. १. १०८.
[5] पा. सू. ४. १. १०९.
[6] प्रदीपे 'वर्णाश्रयापि भवति' इत्यत्र 'न वर्णाश्रयेति भवति' इति पाठोऽभिसंहित इति भाति।
[7] नन्वनेन — च, ट.
[8] भावान्तरेणायोगः — च, छ, ट.
[9] पा. सू. ४. २. ३.
[10] पा. सू. ४. २. ४.
[11] पा. सू. १. २. ५१.
[12] पा. सू. ४. ३. १६.
[13] पा. सू. ४. १. १०८.
[14] पा. सू. ४. १. १०९.

[1]'यञञश्च' इत्यधिकृत्य [2]'प्राचाम्' इति प्राप्तं ष्फं परत्वाद् बाधित्वा शार्ङ्गरवादिपाठाद् ङीन् भविष्यतीति 'वतण्डो' इत्यत्र प्रत्ययलक्षणेऽपि न दोष इत्यत आह — **यथेति**। [3]'आवट्याच्च' इति चापं बाधित्वा आवट्यायनीति यथा ष्फो भवतीति योजना। ष्फस्य बाधकत्वे हेतुः — **सर्वत्रेति**। 'प्राचां ष्फ तद्धितः सर्वत्र' इति सर्वत्रग्रहणस्य पूर्वसूत्रान्वयात् तस्य च बाधकविषयेऽन्यत्र चेत्येवमर्थत्वात् प्राचामाचार्याणां मते ङीनं बाधित्वा प्रत्ययलक्षणे सति ष्फः स्यादेवेत्यर्थः। **अचीत्यनुवर्तनादिति**। तद्धितशसो निवृत्तय इति भावः। भाष्ये **हलीतीत्वमिति**। [4]'शास इदङ्हलोः' इत्यनेन। **इम्** [5]'तृणह इम्' इत्यनेन। तृहेर्लङि तिप्सिपोरन्यतरस्मिन् श्नमीतश्च लोपे हल्ङ्यादिलोपे चेमागमे आद्गुणेऽटि [6]'हो ढः' इति ढत्वे चर्त्वे [7]'ऋवर्णाच्च' इति णत्वे 'अतृणेट्' इति रूपम्। 'कथं कृत्वा' इति चोद्यम्। 'वक्ष्यति' इति च परिहारः। शास्त्रनिमित्तयोरन्यतरातिदेश इति भाष्यकारेण परिहृते प्राधान्यात् कार्यातिदेशेऽपि न दोष इति स्वयं परिहरति — **सति प्रत्यय इति**। तस्मिन् सतीति परिकल्प्य पूर्वं दूषितम्, तज्जातीयेऽपि सतीत्याश्रित्येदानीं परिहार उक्त इति न विरोधः॥

[१, ४८२–४८६]

(उद्द्योतनम्) वार्तिकतद्व्याख्यानभाष्ययोर्विरोधं परिहरति — **निमित्तशब्देनेति**। अभावो भावस्याप्युपलक्षणमित्याह — **अल्लोपश्चेति**। **सा चेति**। समानाश्रयत्वादित्यर्थः। **लुप्तेऽपीति**। समुदाये भसंज्ञाया अभावादित्यर्थः। ननु भवतु समुदाये पदसंज्ञया न लोपः, प्रकृते भसंज्ञयाल्लोपः किं न स्यात्, अत आह — **अल्लोपस्त्विति**। **कालेति**। प्रत्ययकाले इयमाशङ्का, न तु प्रत्ययलोपकालेऽपीति द्योतयितुम् 'आसीत्' इत्युक्तमित्यर्थः। विप्रकर्षमेवाह — **राज्ञ इत्यत्रेति**। **एका** [8]'स्वादिषु' [9]इति विहिता। **द्वितीया** [10]'सुप्तिङन्तम्' इति विहिता। ननु पदस्य द्विर्वचनं न वाक्यस्येत्याशङ्क्य नेदं द्विर्वचनम्, किं तु वाक्यद्वयमित्याह — [11]**पदसंज्ञाद्वयमिति**। ननु वर्णाश्रयत्वात् कथं प्रत्यय[12]लक्षणेन भसंज्ञा, अत आह — **भसंज्ञेति**। लक्ष्यानुसारेण क्वचिद् वर्णाश्रयेऽपि प्रत्ययलक्षणमङ्गीक्रियते, वर्णस्य प्राधान्येन यत्राश्रयणं तत्र वा तन्निषेध इति भावः। एकयोगलक्षणत्वमुपपादयति — **अनेनैवेति**। **पौर्वापर्यमिति**। तथा च [13]'विप्रतिषेधे परम्' इति दीर्घो न प्राप्नोतीत्यर्थः। ननु शास्त्रनिमित्तयोरतिदेशपक्षे पौर्वापर्यं संभवति, अत आह — **कार्यस्येति**। **व्यपदेशः** निमित्तम्, पित् कृदिति व्यपदेशो वा। परिपूर्वस्य व्येञः क्विपि [14]संप्रसारणे परपूर्वत्वे च कृते [15]'ह्रस्वस्य' इति तुकः [16]'संप्रसारणस्य' इति दीर्घस्य [17]च प्राप्तौ परत्वाद्दीर्घे सति 'परिवीः'

---

[1] पा. सू. ४. १. १६.
[2] पा. सू. ४. १. १७.
[3] पा. सू. ४. १. ७५.
[4] पा. सू. ६. ४. ३४.
[5] पा. सू ७. ३. ९२.
[6] पा. सू. ८. २. ३१.
[7] का. वा. ८. ४. १–१.
[8] पा. सू. १. ४. १७.
[9] इति संज्ञा — अ.
[10] पा. सू. १. ४. १४.
[11] 'पद' इति नास्ति — अ, म.
[12] लक्षणेन संज्ञा — म.
[13] पा. सू. १. ४. २.
[14] संप्रसारणे पूर्वत्वे कृते — म.
[15] पा. सू. ६. १. ७१.
[16] पा. सू. ६. ३. १३९. संप्रसारणस्येत्यनुवर्तमाने हल इत्यनेन विधीयमानस्य दीर्घस्येति भावः।
[17] चकारो नास्ति — अ.

इति रूपम्। भाष्ये [1]**प्रत्यवपन्नानि** [2]मृतानि, अप्राप्तानीति यावत्। नन्वन्यभावशब्दस्य षष्ठी-समासे कर्मधारये वा ष्यञोऽनुपपत्तिः, भावस्य भावान्तरायोगात्, अत आह — **अन्य इति**। **स्वार्थ इति**। चातुर्वर्ण्यादित्वात्। **परिवीरिति**। परिवीरित्यत्रेति यावत्। ,सत्ता न स्थानिनः, किं तु तद्व्यपदेशस्येत्याह — **कृदिति**। भाष्ये 'तद्वक्तव्यम्' इति गौरवे चोदिते [3]लाघवप्रति-पादनाय — **यद्यपीति**। यदीत्यर्थः। **अथवैतर्हि** एवं तर्हि। **तदुपादानेन** तन्मात्रोपादानेन। अभेदे संज्ञासंज्ञित्वानुपपत्तिः, अत आह — **सूत्रेति**। भाष्ये **न भवतीति**। भसंज्ञाया अल्विधि-त्वादित्यर्थः। [4]'नक्षत्रेण युक्तः कालः' इत्यणो [5]'लुबविशेषे' इति लुपि युक्तवद्भावात् स्त्री-लिङ्गता। ततो जातार्थे [6]'संधिवेला' इति सूत्रेणाण्, तस्य वार्तिकेन लुगित्याह — **चित्रेति**। ननु वतण्डशब्दात् [7]'वतण्डाच्च' इति विहितस्य यञो [8]'लुक् स्त्रियाम्' इति लुकि प्रत्ययलक्षणेन प्राप्तं [9]'प्राचां ष्फ तद्धितः' इति ष्फं परत्वाद्बाधित्वा शार्ङ्गरवादिपाठाद् ङीन् भविष्यतीति 'वतण्डी' इत्यत्र प्रत्ययलक्षणेऽपि न दोषः, अत आह — **यथेति**। [10]'आवट्याच्च' इति चापं बाधित्वा 'आवट्यायनी' इति यथा ष्फो भवतीत्यन्वयः। ष्फस्य बाधकत्वे हेतुः — **सर्वत्रेति**। [11]अस्य [12]'प्राचां ष्फ तद्धितः' [13]इति पूर्वत्रान्वयात् तस्य [14]च बाधकविषयेऽन्यत्र चेत्येवमर्थत्वात् प्राचां मतेन ङीनं बाधित्वा प्रत्ययलक्षणेन ष्फः स्यादित्यर्थः। **अचीत्यनुवर्तनादिति**। तद्धितशसो निवृत्त्यर्थमिति भावः। [15]'न चामा साहचर्यात् सुप्शस एव ग्रहणम्, 'अचिनवम्' इत्यत्रात्वनिवृत्तये शसा साहचर्येणाम्यपि सुब्ग्रहणस्य वाच्यत्वात् 'अचि' इत्यनुवृत्त्यैव सुप्शसो लाभः। **अभावादिति**। अनल्विधाविति प्रतिषेधादित्यर्थः। **वक्तव्यमिति**। तथा च गौरवम्, प्रत्ययलक्षणे तु न वक्तव्य-मिति लाघवम्। आङ्पूर्वात् शास्तेः क्विपि [16]'शास इदङ्हलोः' इतीत्वे सकारस्य रुत्वे [17]'वोरुप-धायाः' इति दीर्घे **आशीः**। भाष्ये **इम्** [18]'तृणहः' इत्यनेन। **अतृणेडिति** भाष्ये। तृहेर्लङि तिपि श्नमि [19]'इतश्च' इतीकारलोपे हल्ङ्यादिलोपे इमागमे आद्गुणे हस्य ढत्वे चर्त्वे [20]'ऋवर्णान्न-स्य' इति णत्वे 'अतृणेट्' इति रूपम्। भाष्ये 'कथम्' इति प्रश्नः। 'वक्ष्यति' इत्युत्तरम्। [21]'न डिसंबुद्ध्योः' इति ज्ञापकात् प्रत्ययलक्षणेन भसंज्ञा नास्तीत्यनुपदमेव [22]वक्ष्यतीत्यर्थः। शास्त्र-निमित्तयोरन्यतरातिदेशेन भाष्यकृता परिहृते स्वयं प्राधान्यात् कार्यातिदेशेऽपि न दोष इत्याह — **सति प्रत्यय इति**। यद्यपि 'जगत्' इत्यत्र तुगभावप्रसङ्गेन [23]दूषितोऽयमर्थः, तथापि यस्मिन्

---

[1] भाष्ये 'पर्यवपन्नानि' इत्यत्र 'प्रत्यवपन्नानि' इत्यन्नंभट्टपाठ इति भाति।
[2] क्षीणानि — अ.
[3] लाघवचोदनाय — अ.
[4] पा. सू. ४. २. ३.
[5] पा. सू. ४. २. ४.
[6] पा. सू. ४. ३. १६.
[7] पा. सू. ४. १. १०८.
[8] पा. सू. ४. १. १०९.
[9] पा. सू. ४. १. १७.
[10] पा. सू. ४. १. ७५.
[11] 'अस्य' इति नास्ति — अ.
[12] पा. सू. ४. १. १७.
[13] 'इति' इत्यस्यानन्तरं 'सर्वत्रेत्यस्य' इत्यधिकम् — अ.
[14] चकारो नास्ति — अ.
[15] न चाम्साहचर्यात् — म.
[16] पा. सू. ६. ४. ३४.
[17] पा. सू. ८. २. ७६.
[18] पा. सू. ७. ३. ९२.
[19] पा. सू. ३. ४. १००.
[20] का. वा. ८. ४. १–१.
[21] पा. सू. ८. २. ८.
[22] वक्ष्यत इत्यर्थः — अ.
[23] दूषितोऽयमधः — अ.

सति यत्कार्यं दृष्टं तल्लोपेऽपि [1]तद् भवतीत्याश्रित्य [2]पूर्वं दूषितम्। इदानीं कार्यनिमित्तप्रत्यये यस्मिन् कस्मिन् सति यत्कार्यं दृष्टं तत् तत्कार्यनिमित्तप्रत्ययान्तरस्य लोपेऽपि भवतीत्याश्रीयते, 'परिवीय' इत्यत्र तुङ्निमित्तप्रत्यये सत्यपि तुङ् न दृष्ट इति 'परिवीः' इत्यत्र [3]तन्निमित्तक्विपो लोपे न भवति। एवम् 'आगत्य' इत्यत्र तुग् [4]दृष्ट इति 'जगत्' इत्यत्र [5]तत्सिद्धिः॥

[१, ४८२–४८६]

(रत्नप्रकाशः) **निमित्ताभावादिति**। भावप्रधानोऽत्र निमित्तशब्दः। तेनायमर्थः — यस्य प्रत्ययस्य सतः पूर्वस्य पदसंज्ञां प्रति निमित्तत्वं न भवति, तस्य लोपेऽपि तदभावः स्यादिति। **अनिमित्तं स्यादिति**। प्रकृतातिदेशस्य तत्राप्रवर्तनादिति भावः। **सा भविष्यतीति**। प्रकृतातिदेशेनेति भावः। एतेन 'द्वितीया सुबन्तत्वेन समुदायस्य, सा लुप्तेऽपि स्थितैव' इति कैयटो निरस्तः। लुग्विषये पूर्वं पदसंज्ञाया अप्रवृत्तेः। अन्यथा 'लुक्युपसंख्यानम्' इति वार्तिकतद्भाष्यविरोधाच्च। **आसीदिति**। प्रत्ययस्थितिकालेऽस्य विचारस्याप्रस्तुतत्वात् तत्र [6]ह्यस्तनतामारोप्य लङ् प्रयुक्तः। विचारस्वरूपमाह — **अनया भविष्यतीति**। अनया संज्ञया पदत्वं भविष्यतीति भावः। एतेन 'पदसंज्ञाद्वयमनेन प्रदर्शितम्' इति कैयटः, 'ननु पदस्य द्विर्वचनात् कथं वाक्यस्य तदित्याशङ्क्य नैतद् द्विर्वचनं, किं तु द्वे एते वाक्ये इत्याह — **पदसंज्ञाद्वयमिति**।' इति तद्विवरणं च निरस्तम्। नञ्: सत्त्वासत्त्वाभ्यां वाक्ययोर्भिन्नरूपतायाः स्पष्टत्वेन द्विरुक्तत्वशङ्काया अनुदयात्। **अस्ति चेति**। तावतो भागस्य यजादिपरता प्रत्ययस्थितिकालेऽस्तीति स एव भागः प्रत्यये लुप्तेऽपि स्थित इति तस्य प्रत्ययलक्षणेन भसंज्ञा प्राप्नोतीति भावः। **परिवोरिति**। व्येञ् संवरणे क्विप्। तस्यान्तरङ्गत्वाल्लोपे ततः संप्रसारणम्, पूर्वरूपम्, [7]'हल:' इति दीर्घः, तुक् चेति चत्वारि कार्याण्यनेनैकेनैव सूत्रेणातिदेष्टव्यानीति दीर्घेण तुग्बाधनं न सिध्यतीति भावः। एतेनापि 'स्थानिवत्सूत्रेण कार्यातिदेशः क्रियते' इति वदन्तः कैयटतदनुसारिणः प्रत्युक्ताः। यदप्युक्तमत्र कैयटेन 'कार्यस्य प्राधान्यान्नानेन शास्त्रव्यपदेशावतिदिश्येते' इति। तदपि न, कार्यस्य प्राधान्येऽपि तदतिदेशेनानिर्वाहेऽतिदेशान्तरस्यैवानुसरणीयत्वात्। **पर्यवपन्नानि** निवृत्तानि। **प्रत्युत्थाप्यन्त इति**। प्रतिप्रसूयन्त इत्यर्थः। **न प्रकल्पन्त इति**। बाध्यबाधकभावमनुभवितुमिति शेषः। तत्र समाधानवार्तिकं पठति — **सिद्धं त्विति**। तुशब्दः शङ्काव्यावर्तकः। कुत इत्यत आह — **स्थानिसंज्ञानुदेशादान्यभाव्यस्येति**। अन्यो भावः स्वरूपं यस्य सोऽन्यभावः। स एवान्यभाव्यम्, स्वार्थे ष्यञ् चतुर्वर्णादित्वात्। तस्य स्थानिसंज्ञानुदेशादित्यर्थः। 'स्थानिसंज्ञान्यभूतस्य भवति' इति वचनं कर्तव्यम्, येनोक्तदोषपरिहारः स्यादिति भावः। **किं कृतं भवति** कथमेतावतोक्तदोषपरिहार इति भावः। **सत्तामात्रमिति**। आदेशे स्थानिसंज्ञासद्भावमात्रमनेन क्रियत इति भावः। **यथाप्राप्ते इति**। तुग्दीर्घत्वे यथा प्राप्ते तथैव भविष्यत इत्यर्थः। परेण [8]"हल:' इति दीर्घेण तुग् बाध्यत इति भावः। शङ्कितोह — **तद्वक्तव्यं भवतीति**। सूत्रोपर्यालोचे कृते वचनान्तरकरणेन परिहारो न युक्त इति भावः। परिहरति —

---

[1] 'तत्' इति नास्ति — म.
[2] पूर्वत्र दूषितम् — अ.
[3] तन्निमित्तविलोपे तुग्न भवति — म.
[4] 'दृष्ट इति' इत्यतः 'इत्यत्र तत्' इत्यन्तं नास्ति — म.
[5] तुक्सिद्धिः — ऋ.
[6] अनद्यतनभूततामित्यर्थः।
[7] पा. सू. ६. ४. २.
[8] पा. सू. ६. ४. २.

यद्यप्येतदुच्यत इति । यदैतदुच्यत इत्यर्थः । **अथवैतर्हीति** । तदेत्यर्थः । **स्थानिवद्भावो नारभ्यत इति** । तथा च लाघवविशेषाद् वचनान्तरेणापि परिहारो युक्त इति मन्यते वार्तिककारः । तर्हि [1]स्थानिवत्सूत्रार्थसंग्राहकं कीदृशं वचनं करिष्यसीत्यत आह,— **स्थानिसंज्ञेति** । स्थानिवत्सूत्रस्यैवायमर्थ इत्युक्तमस्माभिः, अयमर्थस्तत्र भाष्यकारैर्गुप्ततयैव प्रतिपादित इति । तत्सूत्रं कार्यातिदेशपरमित्येव मत्वात्रैवं वार्तिककृतोक्तमित्येतावता तस्य संज्ञातिदेशपरतया व्याख्याने न कोऽपि दोषः । अथवा तत्सूत्रस्य संज्ञातिदेशपरत्वप्रकटनायैवात्रैवमुक्तमिति न दोषः । [2]'स्वं रूपम्' इति सूत्रं वार्तिककृता प्रत्याख्यास्यते, तदप्ययुक्तं भवति, अतिदेशोपयोगितयापि तत्सूत्रस्यावश्यकत्वादित्याशयेन तन्मुखेनैव तत्सूत्रमपेक्षितमिति वाचयितुं शङ्कते — **यद्येवमिति** । **न हि काचिद्धन्तेः संज्ञास्तीति** । शास्त्रेण विहिता हन्तिरूपेति शेषः । एतेन 'यद्यपि धातुसंज्ञास्ति, [तथापि] न तदुपादानेनात्मनेपदं विधीयते' इति कैयटो निरस्तः । तेन शङ्कितुरिव स्वस्यापि मौर्ख्यसूचनात् । अत एव [3][4]'आङो यमहनः' इति सूत्रोपात्तो हन्तिः संज्ञा, प्रयोगस्थस्तु संज्ञीति वधेरपि हन्तिसंज्ञातिदेक्ष्यते" इति तदुक्तं निरस्तम् । शङ्कितुरेतादृशमौढ्यसूचनायोगात् । **स्वं रूपं शब्दस्य संज्ञेति** । यद्यपि [4]'स्वं रूपम्' इति सूत्रेण शब्दस्य स्वं रूपं संज्ञीति बोध्यते, तथापि संज्ञासंज्ञिभावस्योभयनिष्ठत्वेन संज्ञापि [5]बोधितैवेति तस्याः संज्ञायाः शास्त्रीयत्वादतिदेशः सिध्यतीति भावः । 'स्थानिसंज्ञान्यभूतस्य' इत्यादिवचने कृते बहूनि प्रयोजनानि सिध्यन्तीत्याह — **भसंज्ञेति** । **भसंज्ञा प्राप्नोतीति** । यथाश्रुतसूत्रे 'अनल्विधौ' इत्यस्याभावादिति भावः । **चित्रेति** । [6]'चित्रारेवतीरोहिणीभ्यः स्त्रियामुपसंख्यानम्' इत्यणो लुक् । अण् योऽकारस्तदन्ताद् ङीबुच्यत इत्यण्लुकोऽण्संज्ञायां सत्यामप्यकारसंज्ञाया अल्विधौ वर्तमानाया अभावेन ङीब्न भवतीति भावः । **वतण्डीति** । [7]'यञश्च' इत्यत्रोत्तरसूत्रात् सर्वत्रग्रहणापकर्षाद् यथा 'आवट्यायनी' इत्यत्र चापं बाधित्वा ष्फो भवति, तथात्रापि शार्ङ्गरवादिपाठप्रयुक्तं ङीनं बाधित्वा [8]'स स्यात्' । [9]'यञश्च' इत्यत्र [अत इत्यनुवर्तनादल्विधित्वात् ष्फो न भवतीति भावः । **गव्यतीति** । [10]'औतोऽम्शसोः' इत्यत्र] अचीत्यनुवर्तनादम्लुकोऽच्संज्ञाभावादात्वाभावः । **तस्येति** । 'स्थानिसंज्ञान्यभूतस्य' इत्यादिवचनस्येत्यर्थः । **दोष इति** । नलोपप्रसक्तिः, इत्वेम्विध्योरप्रसक्तिश्च दोष इति भावः । **भसंज्ञा सिद्धा भवतीति** । तथा च नलोपस्य प्रसक्त्यभावात् [11]'न ङिसंबुद्ध्योः' इत्यत्र ङिग्रहणं न कर्तव्यम् । वचनान्तरपक्षे तत्कर्तव्यमिति भावः । **इत्वं सिद्धमिति** । पक्षान्तरे आशासः क्वावुपधाया इत्वं वाच्यमिति गावः । **इम् सिद्ध इति** । पक्षान्तरेऽपीम्साधनोपायो वक्ष्यते भगवतैव । दोषान्तरमाह — **सूत्रं च भिद्यत इति** । तदेवं वचनान्तरे दूषिते यथान्यासमनुसरति — **यथेति** । **वक्ष्यत्यत्र परिहारमिति** । अत्र 'सतो निमित्ताभावात् पदसंज्ञाभावः' इत्यत्र । **परिहारं वक्ष्यति** ङौ नलोपनिषेधेन भसंज्ञा न भविष्यतीति [इति] भावः । [12]**शास्त्रपरविप्रतिषेधेनेति** । एकेनैव सूत्रेण तुग्दीर्घयोरतिदेशे प्राप्तेऽपि तयोर्विरोधे तदुपदेशशास्त्रगतपौर्वापर्यावलम्बनेन [13]'विप्रतिषेधे परम्' इति सूत्रेण दीर्घ एव भविष्यतीति भावः । अथवा

---

[1] स्थानिवत्सूत्रार्थे संग्राहकं — ब.
[2] पा. सू. १. १. ६८.
[3] पा. सू. १. ३. १८.
[4] पा. सू. १. १. ६८.
[5] बाधितैवेति — ब.
[6] का. वा. ४. ३. ३४–१.
[7] पा. सू. ४. १. १६.
[8] 'स स्यात्' इत्यस्यानन्तरम् 'इति भावः' इत्यधिकं वर्तते — ब.
[9] पा. सू. ४. १. १६.
[10] पा. सू. ६. १. ९३.
[11] पा. सू. ८. २. ८.
[12] शास्त्रविप्रतिषेधादिति — ब.
[13] पा. सू. १. ४. २.

सति प्रत्यये यद्वाधित्वा यत् कार्यं भवितुमर्हति तदेव प्रत्ययलोपेऽतिदिश्यते। सति क्विपि तुकं बाधित्वा दीर्घ एव भवितुमर्हतीति स एवातिदिश्यत इति भावः। एतेन 'सति प्रत्यये यत्कार्यं दृष्टं तल्लुप्तेऽपि भूवतीति सूत्रार्थः। परिवीयेत्यादौ च सति प्रत्यये दीर्घो दृष्टो न तुगिति परिवीरित्यत्रापि दीर्घ एव भवति' इति कैयटो निरस्तः। ल्यपि सति दीर्घस्येव 'प्रस्तुत्य' इति तुकोऽपि दृष्टत्वेन चासंबद्धप्रलापत्वात्। ननु यस्य प्रत्ययस्य येन प्रत्ययेन सहैकसंज्ञकत्वं तयोरन्यतरस्य लोपेऽन्यतरस्मिन् प्रत्यये यस्य यत्कार्यं दृष्टं तस्य तदतिदिश्यते। क्विब्ल्यपोश्च पित्संज्ञा कृत्संज्ञा च तुल्या भवतीति क्विपो लोपेऽपि परिवीयेत्यत्र व्येञो ल्यपि दृष्टो दीर्घः परिवीरित्यत्र व्येञोऽतिदिश्यते। प्रस्तुत्येत्यत्र तु ल्यपि परतः ष्टुञ्स्तुग् दृष्टो न तु व्येञ इति स व्येञो न भविष्यतीति न दोष इति चेन्न, ग्रामणीरित्यादौ क्विप आर्धधातुकस्य लोपे 'नेता' इत्यादावार्धधातुके दृष्टस्य गुणस्यातिदेशापत्तेः। न च 'नीतः' इत्यादौ गुणनिषेधो दृष्ट इति ग्रामणीरित्यत्रापि स एव भविष्यतीति वाच्यम्, विनिगमनाविरहात्। एवं 'सुकृत्, सुष्टुत्' इत्यादौ 'प्रकृत्य, प्रस्तुत्य' इत्यादौ दृष्टस्तुग्वातिदेष्टव्यः 'प्रकर्ता, प्रस्तोता' इत्यादौ दृष्टो गुणो वातिदेष्टव्य इति विनिगमनाविरहः। तस्माद्यत्किंचिदेतत्॥

[१, ४८२–४८६]

(नारायणीयम्) ननु 'सतो निमित्तत्वात्' इति वाच्यम्। न हि सतः प्रत्ययस्य निमित्तसत्त्वं प्रत्ययलक्षणोपयोगि, येन तदभावस्तदभावे हेतुः स्यात्। निमित्तत्वं तु तदुपयोगीति तदभाव एव हेतुतया वाच्यः, अत आह — **निमित्तेति**। असति निमित्तत्वे कार्याभावोऽपीष्यत इत्यत्राह — **तेनेति**। यत्किंचित् प्रति निमित्तत्वस्य सत्त्वादिष्टनिमित्तत्वाभावो विवक्षित इत्याह — **सतीति**। संज्ञाभावमात्रस्यादोषत्वादाह — **नलोप इति**। न केवलमिष्टानिमित्तत्वात् तदसिद्धिर्दूषणम्, अपि त्वनिष्टनिमित्तत्वात् तदापत्तिरपीत्याह — **अल्लोपश्चेति**। संज्ञाद्वयस्यापि बाधमाशङ्क्याह — **द्वे इति। समुदायस्येति**। तत्र च भसंज्ञाप्राप्तेः[1] सा तया न बाध्यते। अस्त्वेवं प्रत्ययश्रवणकाले। लुप्ते तु प्रत्यये कथमित्यत आह — **सा चेति**। समुदाये प्रवृत्तौ लुप्तेऽप्येकदेशे शिष्टेऽवतिष्ठते, निवर्तकाभावात्। यदि प्राक्प्रवृत्तपदसंज्ञया नलोपस्तर्ह्यल्लोपोऽपि प्राक्प्रवृत्तभसंज्ञया स्यादित्यत्राह — **अल्लोपस्त्विति**। भस्याङ्गस्य तद्विधानात् प्रत्ययनिमित्तत्वमल्लोपस्य। प्रत्ययसत्त्वकालस्य लोपकालस्य च क्षणमात्रव्यवायात् कथमनद्यतनप्रत्यय इत्यत्राह — **कालेति**। पूर्वक्षणातीतस्यापि वर्तमानकालसंबन्धनिषेधायानद्यतनत्वविवक्षा लोकानामिति लौकिक्या वाचोयुक्त्या परोपहास इत्यर्थः। पदसंज्ञाद्वयस्य प्रत्ययसत्त्वेऽप्यभावाद् भाष्यायोगमाशङ्क्याह — **राज्ञ इति**। प्रथमे 'भविष्यति' इति बुद्धिमात्रम्, न तु वस्तुसत्त्वविवक्षेत्यर्थः। अनया संज्ञयाभिमतं भविष्यतीत्यक्षरार्थः। प्रत्ययस्थितिकाले सुबन्त[त्व]प्रयुक्तसंज्ञाबाधकत्वं न चेत् लुप्ते कथं बाधकत्वम्, अत आह — **लुप्त इति**। ननु प्रागेव प्रवृत्ता संज्ञैकदेशलोपे परिशिष्टे संक्रान्तेत्युक्तम्। न च प्रवृत्तबाधो न्याय्यः। उच्यते, संक्रमणं हि संज्ञाया अवशिष्टे प्रवर्तनमेव। न ह्यवध्यन्तरे प्रवृत्तसंज्ञया कार्यमवध्यन्तरस्य युक्तम्। अतोऽस्मिन्नवधौ पुनःप्रवृत्त्याकाङ्क्षेति प्रवर्तमानबाधो न्याय्य एव। यद्वा, प्रतिकार्यं संज्ञाप्रवृत्तिरिति नलोपार्था 'सुबन्तम्' इति पदसंज्ञा सुब्लोपानन्तरं प्राप्तेति प्रसक्तबाध एव। भसंज्ञापि तर्हि प्राक् प्रवृत्ता-

---

[1] अप्राप्तेरिति छेदः। संबन्धिनिषेधायानद्यतनत्व — ग.

प्रयोजिकेति[1] शङ्कायामिदानीमेव तत्प्रवृत्तिमाह — **प्रत्ययेति**। संज्ञाद्वयं प्रति नाप्राप्त्यभावादाह— — **एकेति**। द्विर्वचनभ्रमं निरस्यति — **पदेति**। इह 'पदसंज्ञाद्वयम्' इति पाठो युक्तः, प्रत्ययस्थितिकालवदत्र पदसंज्ञाद्वयस्यावधिभेदाभावेन भत्वेनोभयबाधप्रसङ्ग इत्यस्यार्थस्यात्र प्रतिपाद्यत्वात्। 'प्रत्ययलक्षणेन प्राप्तया' इत्यत्र प्राप्तशङ्कां परिहरति — **भसंज्ञेति**। एकप्रवृत्तेरितरप्राप्तिप्रतिबन्धकत्वाद्विरोधोऽस्तीति तदनुपपत्तिकीर्तनं कथमित्यत्राह — **पौर्वापर्यमिति**। [2]विप्रतिषेधेन तत्कालपरप्राबल्यलक्षणेत्यर्थः। एकयोगलक्षणत्वं कार्यातिदेशपक्ष इत्याह — **अनेनेति**। अभिमतसिद्धयेऽतिदेशान्तरमस्त्वित्यत्राह — **कार्यस्येति**। अन्यस्येत्येतावन्मात्रस्य विवक्षितत्वादेकस्यापि भावस्याभावाद् भावद्वयकीर्तनं कथमित्यत्राह — **अन्य इति**। शास्त्रीयसंज्ञैव न विवक्षिता, अपि तु व्यपदेशमात्रमित्याह — **तत्रेति**। असतः प्रत्ययस्य सत्ता[3]संपादनमशक्यमित्यत्राह — **कृदिति**। ननु संज्ञाशब्देन व्यपदेशस्य विवक्षितत्वादत्र च हन्व्यपदेशाश्रयत्वात् कार्यस्य कथं चोद्यमित्यत्राह — **हन्तिमिति**। [4]व्यपदेशव्यपदेशिभावस्य भेदाश्रयत्वात् स्वरूपाश्रयस्य व्यपदेशाश्रयत्वं नेत्यर्थः। कार्यनिमित्तं नेत्यवसेयम्, अन्यथा यथाश्रुतेऽनुपपत्तेरित्याह — **यद्यपीति**। स्वरूपस्य संज्ञित्वेऽपि न सूत्रोपात्तं स्वरूपं वधादेशस्य स्थानीति कथं [तत्संज्ञातिदेश इत्यत आह — **आङ इति**।] यश्च कार्याश्रयः स वधस्थानीति न किंचिदवद्यमित्यर्थः। अणिति व्यपदेशस्य लोप आदेशेऽतिदेशादनिष्टमाशङ्क्याह — **टिदिति**। ननु यञ्लुगन्तवतण्डशब्दस्य शार्ङ्गरवादिपाठाद् ङीन् भविष्यतीति कथं प्रत्ययलक्षणेन ष्फप्राप्तिः, अत आह — **यथेति**। 'गार्ग्यायणी' इत्यादिः ष्फस्यावकाशः, चापस्तूदीचां मते। प्राचां चावटचादुभयप्रसङ्गे परत्वाच्चाप् स्यादिति तन्निवृत्तये सर्वत्रग्रहणं पूर्वसूत्रार्थमिति तत्र स्थितमित्यर्थः। **प्राप्तं** परत्वात्। ङीनोऽनवकाशत्वं निरस्यति — **प्राचामिति**। [5]'न संयोगात्' इत्यल्लोपप्रतिषेधाद् भकार्याभावात् किमर्थमत्र भत्वं प्रार्थ्यत इत्याशङ्क्य पदत्वबाधनार्थमित्याह — **अत्रेति**। अन्यथाभिमतसिद्धिं ब्रुवाणं प्रति गौरवमापादयति — **नेति**। [6]'शास्त्रातिदेशेनोत्तरमिति भाति, तदयुक्तम्, कार्यप्राधान्यादित्याशङ्क्यात्रैवायं परिहार इत्याह — **सतीति**। सति प्रत्यये शास्त्रपरविप्रतिषेधेन दीर्घत्वभवनात् तदेव [7]लुप्तेऽपि भविष्यतीति भाष्याक्षरार्थः। अयमर्थः — व्यक्तिपक्षे परिवीरित्येतद्विषयेणानेन शास्त्रेणावश्यं प्रत्ययलक्षणकार्यस्यातिदेश्यत्वादुभयातिदेशायोगाच्चान्यतरस्मिन्नतिदेष्टव्ये विषयान्तरे दृष्टस्यातिदेश इति॥

[१, ४८६–४९०]

(लघुविवरणम्) ननु 'यञ् योऽकारः' [8]इत्यनेन प्रत्ययान्तत्वाल्लक्षणया[8] अकारवानभिधीयते, ततः [9]'अजाद्यतष्टाप्' इत्यत्राप्यकारवानभिधीयते। न ह्यन्यथानुवर्तमानस्याकारवानर्थो भवितुमर्हति। ततश्च मत्यादिभ्योऽपि टाप् स्यादित्यत आह — **अथवेति**। **नियमार्थमेतदिति**। सामान्येन शासिग्रहणे। अङा साहचर्यात् 'शासु अनुशिष्टौ' इत्यस्यैव ग्रहणे क्रियमाणेऽप्यस्मिन् सूत्रे विध्यर्थमेवेति भावः॥

---

[1] अप्रयोजकेति छेदः।
[2] विप्रतिषेधशब्देनेत्यर्थः।
[3] संपादनमाशङ्क्यमित्यत्राह — ग.
[4] पा. सू. ६. ४. १३७.
[5] शास्त्रातिदेशेनेति नोत्तरमिति — ग.
[6] लुपोऽपि — ग.
[7] इत्यनेनाप्रत्ययान्तत्वात् — ण.
[8] 'लक्षणया' इत्यस्यानन्तरं 'वा' इत्यधिकम् — ढ, ण.
[9] पा. सू. ४. १. ४.

[१, ४८६–४९०]

(**विवरणम्**) ननु विशेषविहितत्वात् संबुद्धिलोपात् पूर्वमम् भविष्यतीत्यत आह — [1]**पूर्वमिति**। भिन्नविषयत्वाद् येन नाप्राप्तिन्यायोऽत्र नास्तीति भावः। **द्विर्वचनं** [2]'श्लौ' इत्यनेन। **इत्वं हलादिशेषश्चेत्यपि** द्रष्टव्यम्। 'अण् योऽकारः' इति वचनव्यक्तिं गृहीत्वा परिहारान्तरमाह — **अथवेति**। अज्झलात्मकस्य यञोऽकारेण सामानाधिकरण्यमयुक्तमित्यत आह — **अकारेति**। यञ् विशेष्यः, तद्विशेषणमत इति। तथा च [3]'गुणे त्वन्याय्यकल्पना' इत्यनेनाकारवान् लक्ष्यत इत्यर्थः। नन्वेवं सति मत्यादिष्वतिप्रसङ्गाभावाय [4]'अजाद्यतः' इत्यत्र मुख्यार्थस्यात इत्यस्येह लक्षणायां वैरूप्यमित्यतो व्याख्यानान्तरमाह — **अथवेति**। अस्मिंश्च पक्षे यञ इति विशेषणमिति तत्र लक्षणा [5]'न्याय्येत्यभिप्रेत्याह — **यञ्नवयव इति**। **नेति**। अजुपलक्षणत्वादम इति भावः। **ज्ञापनार्थं** प्रत्ययलक्षणेन भसंज्ञा नेत्यस्येति शेषः। **कृतेऽपीति**। 'सामान्येन शासिग्रहणे। अङ्साह्चर्यात् 'शासु अनुशिष्टौ' इत्यस्य ग्रहणे क्रियमाणे [6]ऽप्यस्मिन् सूत्रे विध्यर्थमेवेति द्रष्टव्यम्। **अकृते त्विति**। उभयथापीति भावः। [7]'वस्तुतस्त्वमत्यस्मिन् सूत्रे 'शासु अनुशिष्टौ' इत्यस्यैव ग्रहणं वक्तव्यमित्याह — **शास्विति**। ननु शब्दं गृहीत्वा यदुच्यते तत् प्रत्ययग्रहणादनेन मा भूत्, स्थानिवद्भावेन तु किं न स्यादित्यत आह — **स्थानिवदिति**। **अनिनस्मन्निति**। तत्र 'अनर्थकेन' इत्यभिधानमप्रत्ययग्रहणे संभवतीति भावः। ननु स्थानिनिमित्तं यदन्यस्य तत् स्थानिवद्भावेन [8]'लोपेऽपि, यत्तु स्थानिन एव तत् कथं तल्लोपे स्यात्। न ह्यसतो वचनशतेनापि कार्यित्वं संभवति। तथा [9]'चेहासतः कार्यित्वमिति तल्लोपे नास्ति स्थानिवद्भावप्राप्तिरित्यत आह — **तत्र चेति**॥

[१, ४८६–४९०]

(**उद्द्योतनम्**) विशेषविहितत्वात् संबुद्धिलोपात् प्रागमादयो भविष्यन्तीत्यत आह — [10]**यदि त्विति**। **न स्यादिति**। विशेषविहितेनामा बाधितत्वात्। न चैवमपि [11]'येन नाप्राप्ते' इति न्यायेनामा संबुद्धिलोपः कुतो न बाध्यत इति वाच्यम्, भिन्नविषये तन्न्यायाभावात्। तस्मात् पूर्वमेव संबुद्धिलोप इत्यर्थः। भाष्ये **त्री ते वाजिनेति**। अन्तरङ्गत्वात् [12]'शेश्छन्दसि' इति पूर्वं शिलोपे प्रत्ययलक्षणेन नुमुपधादीर्घावित्यर्थः। **द्विर्वचनं** [13]'श्लौ' इत्यनेन। इत्वम्, रपरत्वम्, हलादिशेषः, तत इयङ्, गुणः, रपरत्वम्, हल्ङ्यादिलोपः। भाष्ये **अभिन इति**। भिदेर्लङ्, सिप्, श्नम्, [14]'दश्च' इति रुत्वम्। [15]लोपस्यादेशत्वाभावमुपपादयति — **दिशिरिति**। भाष्ये 'अण् योऽकारः' इत्यत्र 'योऽण् अकारः' 'योऽकारोऽण्' इति [16]वचनव्यक्तिद्वयं संभवति, विशेषणविशेष्यत्वे

---

[1] यदि त्विति — ञ.
[2] पा. सू. ६. १. १०.
[3] लौ. न्या. साहस्री पृष्ठम् २८७.
[4] पा. सू. ४. १. ४.
[5] न्याय्येत्यभिप्रायेणाह — च, छ.
[6] अपिशब्दो नास्ति — ञ.
[7] वस्तुतस्तु सत्यस्मिन् — ञ.
[8] लोपे न — ञ.
[9] चेहासत्कार्यत्वमिति — च, छ.
[10] यदीति — अ, म.
[11] परिभाषा ५८. येन नाप्राप्तिन्यायेनामा — म.
[12] पा. सू. ७. १. ७०.
[13] पा. सू. ६. १. १०.
[14] पा. सू. ८. २. ७५.
[15] लोपस्यानादेशत्वमुप — म.
[16] वचनस्य व्यक्तिद्वयं — ऋ.

कामचारात्। तत्राद्यमाश्रित्याह — [1]**अथवेति**। अज्झलात्मकस्य [2]यञोऽकारेणासामानाधिकरण्यादाह — **अकारेति**। बहुव्रीहिः। अकारेण तद्वतो लक्षणेति भावः। [3]'अजाद्यतः' इत्यत्र मुख्यस्य 'अतः' इत्यस्येह लाक्षणिकत्वे वैरूप्यमाशङ्क्याह — **अथवेति**। **पूर्ववदिति**। अकारेण यञ्विशेषणे तस्याकारवत्त्वाव्यभिचाराद्विशेषणसामर्थ्याच्छ्रूयमाणाकारवत्त्वं[4] लभ्यते। यञा अकारविशेषणे तु वर्णनिमित्तः ष्फ इति प्रत्ययलक्षणाभाव इत्यर्थः। 'अच्यमि' इति भाष्यतात्पर्यमाह — **अच् प्रधानमिति**। **तदादीति**। अचीत्यत्रेत्यर्थः। तदादिविधौ प्रत्ययनिमित्तत्वं स्यात्, तदभावात्तु न प्रत्ययलक्षणमित्याह — **तत्रेति**। [5]'गौरवं निराह — **त्वयापीति**। **ज्ञापनार्थमिति**। 'प्रत्ययलक्षणेन भसंज्ञा न' इत्येतज्ज्ञापनार्थमित्यर्थः। **नियमार्थमिति**। [6]'शास इत्' इत्यत्र सामान्येन शासिमात्र[7]ग्रहणमङ्गीकृत्य नियमार्थमेतद्वार्तिकम् 'आशासः क्वावेवेत्वम्, नान्यत्र' इत्युक्तम्। वस्तुतोऽङ्साहचर्यात् तस्य च परस्मैपदेष्वेव संभवात् परस्मैपदिन एव 'शासु अनुशिष्टौ' इत्यस्य ग्रहणम्, न तु 'शासु इच्छायाम्' इत्यस्येति कृतेऽकृते चास्मिन् सूत्रे [8]'आशासः क्वौ' इति वार्तिकं [9]'विध्यर्थमेवेति मन्तव्यम्। ननु सामान्यग्रहणे वार्तिकस्य क्विपि विध्यर्थत्वे च 'आशास्ते' इत्यत्र सूत्रेणेत्वं किं न स्यादित्याशङ्क्यातिप्रसङ्गं निराह — **आशास्त इत्यादाविति**। उक्तोऽभिप्रायः। भाष्ये **तृणहानीति**। आटः पित्त्वादिम्प्रसङ्ग इत्यर्थः। भाष्ये **अचि नेति**। [10]'नाभ्यस्तस्याचि पिति सार्वधातुके' इत्यत इत्यर्थः। ननु शब्दं गृहीत्वा यदुच्यते तत् प्रत्ययलक्षणेन मा भूत्, स्थानिवद्भावेन किं न स्यात्, अत आह — **स्थानिवद्भावेनेति**। **अनिनस्मन्निति**। [11]'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' इत्यत्र 'अनर्थकेन' इत्येतदप्रत्यय एव संभवतीति भावः। ननु स्थानिनिमित्तमन्यस्य कार्यं स्थानिवद्भावेन भवति, स्वरस्तु स्थानिनः कार्यं तल्लोपे सति कथं स्यात्, असतः कार्यित्वासंभवात्, [12]अतोऽसौ लोपे सति स्थानिवद्भावो नास्तीति नेदं प्रयोजनम्, अत आह — [13]**तत्रेति**। [14]'सोर्मनसी' इति सूत्र इत्यर्थः। सुशब्दात् परं मन्नन्तमसन्तं च [15]पदं बहुव्रीहावाद्युदात्तं स्यात् लोमोषसी वर्जयित्वेति सूत्रार्थः। 'सुदृषत्' इत्यत्र [16]'सुपो धातु' इति जसो लुकि स्थानिवद्भावेनैतत्स्वरनिवृत्त्यर्थमेतत् सूत्रमिति तात्पर्यम्॥

[१, ४८६–४९०]

(**रत्नप्रकाशः**) स्थानिवत्सूत्रेणैव गतार्थत्वाद्वचर्थमिदमित्याशयेन पृच्छति — **कानि पुनरिति**।

---

[1] 'अथवेति' इत्यस्यानन्तरम् 'अकारेऽण्यञ्विशेषणे तु वर्णनिमित्तत्वमिति प्रत्ययलक्षणाभाव इत्यर्थः' इति दृश्यते। अज्झलात्मकस्य' इत्यादि 'वर्णनिमित्तः ष्फ इति' इत्यन्तं न दृश्यते — म.

[2] यञोऽकारेण सामानाधि — अ.

[3] पा. सू. ४. १. ४.

[4] श्रूयमाणाकारपरत्वं — ऋ.

[5] 'गौरवम्' इत्यादि 'त्वयापीति' इत्यन्तं नास्ति — म.

[6] पा. सू. ६. ४. ३४.

[7] ग्रहणमिति नियमार्थम् — म.

[8] का. वा. ६. ४. ३४–१.

[9] विध्यर्थमिति — म, ऋ.

[10] पा. सू. ७. ३. ८७.

[11] महाभाष्यम् १. १. ७२.

[12] असतो लोपस्येह स्थानिवद्भावः — म.

[13] अत्रेति — ऋ.

[14] पा. सू. ६. २. ११७.

[15] 'पदम्' इति नास्ति — अ.

[16] पा. सू. २. ४. ७१.

अपृक्तशिलोपे नुममामाविति । अपृक्तलोपे नुम्, अमामौ च, शिलोपे नुमित्यर्थः । यत्तु कैयटेनोक्तं "यद्यप्यल्विध्यर्थमिदम् 'अतृणेट्' इत्यादौ, तथापि विशेषविहितत्वान्नुमादयोऽप्यस्यैवोदाहरणानीति भावः" इति । तन्न, अल्विध्यर्थतामप्यस्य निरस्य नियमपरतया व्यवस्थापयिष्यमाणत्वात् । **हे अनड्वन्निति** । यद्यपि [1]"अम् संबुद्धौ' इत्यस्य निरवकाशत्वेनान्तरङ्गमपि हल्ङ्यादिलोपं बाधित्वादौ प्रवृत्तिरुचिता, तथाप्येतानि सर्वाणि प्रयोजतानि स्थानिवत्सूत्रेण गतार्थानीति स्वयमपि ज्ञात्वा तत्सूत्रेण लभ्यातिदेशिकसंबुद्धिसंज्ञकसंबुद्धिलोपमाश्रित्य सावकाश एवामिति पूर्वमेवान्तरङ्गो हल्ङ्यादिलोपो भवतीति भावः। एतेन "पूर्वं संबुद्धिलोपमाश्रित्यै-तदुक्तम् । यदि तु विशेषविहितत्वात् [2]"अम् संबुद्धौ' इति पूर्वमम् प्रवर्तते, तदा संबुद्धिलोपो न स्यात्" इति कैयटो निरस्तः । युक्तिशून्यासंबद्धप्रलापत्वात् । तदापि संबुद्धिलोपे बाधकाभावाच्च । **ऐयरिति** । इयर्तेर्लङि सिप्, शप्, श्लुः, द्विर्वचनम् । [3]"अर्तिपिपर्त्योश्च' इतीत्वम् । [4]"अभ्यासस्यासवर्णे' इतीयङ् । **औन इति** । उन्देर्लङ, सिप्, श्नम्, [5]"श्नान्नलोपः' [6]"दश्च' इति रुत्वम् । **स्थानिवद्भावेनापीति** । इतोऽपि ज्ञायते तत् सूत्रं संज्ञातिदेशपरमिति । तस्य कार्यातिदेशकत्वे हि 'अनड्वन्' इत्युदाहरणमसंगतं स्यात्, पूर्वमेवाम्-प्रवृत्तेः । **न च लोप आदेश इति** । **आदिश्यते** उच्चार्यते यः स आदेश इति मन्यते । **लोपोऽपीति** । **आदिश्यते** उपदिश्यते यः स आदेशः, [7]"एष आदेशः । एष उपदेशः' इति हि श्रुतिरिति भावः । **यत्र तर्हीति** । यत्र वर्तमानायाः संज्ञायाः स्थानिवद्भावेनातिदेशो न भवति तत्प्रयुक्तकार्यातिदेशार्थमिति भावः । **क्व चेति** । वर्तमानाया इति शेषः । **योऽल्विधिरिति** । तत्र वर्तमानाया इति शेषः । **किं प्रयोजनमिति** । किं तदल्विधौ वर्तमानसंज्ञाप्रयुक्तं कार्यम्, यदर्थं प्रकृतसूत्रमित्युक्तमिति भावः । **ङौ नकारलोपेति** । न लोपाभावसंपादिका भसंज्ञाल्विधौ वर्तमानाच्संज्ञाप्रयुक्तेति भावः । **इत्येमिति** । [8]"शास इदङ्हलोः' इति हल्संज्ञाप्रयुक्तमित्वम् । एवमिमपि हल्संज्ञाप्रयुक्तं ज्ञेयम् । एवं प्रयोजनमुक्त्वा दोषानाह — **भसंज्ञेति** । तथा च भसंज्ञा ङौ नलोपवारणायैवेष्यते, अन्यत्र दोषावहेति भावः । दोषपरिहारे क्रियमाणे प्रयोजनमपि निरस्तप्रायं भवतीति सूचयितुं चरमनिर्दिष्टं दोषमादौ परिहरति — **भसंज्ञायामिति** । **अण् योऽकार इति** । 'अदन्ता ये टिदादयस्तदन्तात् प्रातिपदिकात्' इति ङीब्विधानाद्विशेषणतयापि वर्णाश्रयणे प्रत्ययलक्षणं नेति भावः । 'अणन्तादकारान्तात्' इत्युक्ते तु वर्णत्वेन प्रत्ययस्य वा तदवयवस्य वानाश्रयणाद् दोष इति स पक्षो निराकृतः । अनेनैव प्रकारेण भसंज्ञावारणेऽप्युपायस्योपायान्तरादूषकत्वाद् ज्ञापकेन वारिता । एतेन "अकारेणाणन्तं न विशेष्यते, किं तर्हि, अणेव । सर्वश्चाण् अकार एवेति विशेषणसामर्थ्यात् 'श्रूयमाणाकाररूपादणः' इति विज्ञायते" इति कैयटो निरस्तः । [9]'अयादिविधावपि 'अचि' इति विशेषणस्याजभावे मा भूदित्युपात्तत्वेन तत्सामर्थ्यादेव 'गोहितम्' [10]'इत्यादावयाद्यप्रसक्तौ [11]"वर्णाश्रये प्रत्ययलक्षणं नास्ति' इति वचनाश्रयणानर्थक्यापत्तेः । टिदादीनां केषांचित् तत्रानेकवर्णात्मकानां प्रत्ययानामकाररूपत्वाभावेन तत्साधारण्येन प्रवृत्तस्य विशेषणस्याणंशे सामर्थ्याश्रयणानौचित्याच्च । तस्मात् तत्राकारेणाणो विशेषणं ङीपो वर्णाश्रयत्व-

---

[1] पा. सू. ७. १. ९९.
[2] पा. सू. ७. १. ९९.
[3] पा. सू. ७. ४. ७७.
[4] पा. सू. ६. ४. ७८.
[5] पा. सू. ६. ४. २३.
[6] पा. सू. ८. २. ७५.
[7] तैत्तिरीयोपनिषत् १. ११. ४.
[8] पा. सू. ६. ४. ३४.
[9] आयादिविधावपि — ब.
[10] इत्यादावायाद्यप्रसक्तौ — ब.
[11] परिभाषा २१.

संपादनेनोपक्षीणमिति [1]"वर्णाश्रये प्रत्ययलक्षणं नास्ति' इत्यनेनैवात्र परिहार उचितः। यदप्युक्तम् "अथवा 'अण् योऽकारः' इत्यणा अकारो विशेष्यत इति वर्णनिमित्तो ङीप् न तु प्रत्ययनिमित्त इति प्रत्ययलक्षणाभावः" इति। तदपि न, अकारान्तात् प्रातिपदिकान्ङीपो विधीयमानत्वेन तस्यैव निमित्तत्वेन वर्णस्यापि निमित्तत्वाभावात्। ननु विशिष्टस्य निमित्तत्वे आश्रीयमाणे विशेषणस्यापि निमित्तत्वं भवत्येव। अत एव ह्युक्तम् — [2]"वृद्धिरादैच्' सूत्रे भगवता — वृद्धेर्निमित्तं यस्मिन् सोऽयं वृद्धिनिमित्तः। वृद्धिनिमित्तं च ककारो ञकारो णकारो वा, इति, इति चेत् तर्हि 'न तु प्रत्ययनिमित्तः' इति व्याहतम्, वर्णनिमित्तत्ववत् प्रत्ययनिमित्तत्वस्यापि सत्त्वात्। **यञ् योऽकार इति**। पूर्ववदकारान्तो यो यञ् इति बोध्यम्। एतेन 'अकारावयवक इत्यर्थः। अथवा यञ्ञवयवे यञ्शब्दो लक्षणया वर्तते, यञ्ञवयवो योऽकार इत्यर्थः। पूर्ववदेतदपि व्याख्येयम्' इति कैयटो निरस्तः। पूर्ववत् 'सर्वथा वर्णाश्रये प्रत्ययलक्षणं नास्ति' इत्येव परिहरणीयत्वेन 'येन विधि'सूत्राविरोधेन 'अकारान्तो यो यञ्' इत्येव व्याख्यातुमुचितत्वेन तदपहाय स्वेच्छया यत्किंचित्कल्पनानौचित्यात्। **अम्यचीति**। अजादावमीत्यर्थः। **अच्यमीति**। अमि वर्तमानेऽचीत्यर्थः। ननूभयथापि वर्णाश्रयत्वसत्त्वात् 'नैवं विज्ञायते — अम्यचीति' इत्ययुक्तमिति चेन्न, 'अजादावमि' इत्युक्तेऽपि [3]"निर्दिश्यमानस्यादेशा भवन्ति' इत्यनेनामि योऽच् तेनैव सहैकादेश आकारो भवतीति स्पष्टप्रतिपत्तये द्वितीयव्याख्यानमाश्रयता भगवता प्रत्ययेन सहैकादेशस्य प्रत्ययाद्युदात्तत्वादिवदतिदेशो न भवतीत्यात्वापादनमेव शिथिलमिति सूचनात्। एतेन 'अच् प्रधानं तद्विशेषणममिति तदादिविध्यभावः। तत्र वर्णनिमित्तमात्वं न प्रत्ययनिमित्तमिति दोषाभावः' इति कैयटो निरस्तः। अल्विधेरिव प्राधान्याप्राधान्यसाधारण्येन वर्णाश्रयत्वस्याश्रयणीयत्वेनोभयथा वर्णप्रत्ययोभयनिमित्ततायां ब्रह्मणापि दूरीकर्तुमशक्यत्वात्। **तर्हीति**। यदा अप्राधान्येनापि वर्णाश्रयणे प्रत्ययलक्षणं नेति वक्तव्यमापतितं तदेत्यर्थः। **नैतानि सन्तीति**। तत्रापि सर्वत्राप्राधान्येन वर्णाश्रयणसत्त्वादिति भावः। तर्हि तानि प्रयोजनानि कथं सिध्यन्तीत्यत आह — **यत्तावदिति**। **क्रियत एतन्न्यास एवेति**। विशेषणतया वर्णाश्रयस्य प्रत्ययलक्षणेनातिदेशो भवतीत्याश्रयणेऽपि भसंज्ञानतिदेशज्ञापनार्थमवश्यं तत्कर्तव्यमेवेति भावः। **शास इत्व इति**। प्रत्ययलक्षणेनेत्वसिद्धावपि 'आशास्ते' इत्यादावतिप्रसङ्गवारकनियमार्थमवश्यं तद्वक्तव्यमिति भावः। विधिपक्षे तु [4]"शास इदङ्हलोः' इत्यत्र परस्मैपदिभ्यां सर्त्यतिभ्यां साहचर्यात् 'शासु अनुशिष्टौ' इति परस्मैपदिन एव ग्रहणमिति 'आशास्ते' इत्यत्र नातिप्रसङ्गः। एवं च नियमपरं वचनं न कर्तव्यमित्येव युक्तम्। प्रागुक्तं तु साहचर्यानित्यत्वप्रयुक्तमिति नातीव दुष्टम्। **वक्तव्यश्चेति**। सर्वत्र स्थानिवद्भावेन निर्वाहेऽपि नियमार्थः कर्तव्य इति भावः। **प्रत्ययं गृहीत्वेति**। प्रत्ययासाधारणधर्मविशिष्टं गृहीत्वेति भावः। **शब्दं गृहीत्वेति**। प्रत्ययाप्रत्ययसाधारणधर्मविशिष्टं गृहीत्वेत्यर्थः। **सुदृषदिति**। अत्र जसो लुकि तस्य स्थानिवदस्संज्ञायां सत्यां दृषच्छब्दस्यासन्ततया [5]"सोर्मनसी अलोमोषसी' इति सूत्रेण सोः परमन्नन्तमसन्तं चोत्तरपदमाद्युदात्तं भवति बहुव्रीहावित्यर्थकेनाद्युदात्तता स्यात्, तन्मा भूदिति प्रकृतसूत्रस्य नियमार्थताश्रितेति भावः। सति त्वस्मिन्नियमेऽस्शब्देनार्थवान् प्रत्ययोऽनर्थकोऽप्रत्ययश्च गृह्यत इत्यस्त्वं प्रत्ययाप्रत्ययसाधारणमिति तद्विशिष्टाश्रयमाद्युदात्तत्वं तत्र न भवति। तथा 'सुदृषत् प्रासादः' इत्यत्र [6]"अत्वसन्तस्य चाधातोः' इत्युपधादीर्घो न भवति॥

---

[1] परिभाषा २१.
[2] पा. सू. १. १. १.
[3] परिभाषा १२.
[4] पा. सू. ६. ४. ३४.
[5] पा. सू. ६. २. ११७.
[6] पा. सू. ६. ४. १४.

[१, ४८६–४९०]

(**नारायणीयम्**) नुमादीनामन्यथासिद्धिर्वार्तिककृता न ज्ञायत इति कल्पनाया अयुक्तत्वात् [1]'प्रयोजनं ङौ' इत्यादितद्वचनाच्च तस्य तज्ज्ञानावगतेराह — **यद्यपीति**। जानताप्यन्यथासिद्धेऽपि प्रवृत्तिर्वाच्या। तदेव कुत इत्यत उक्तम् — **अलिति**। **पूर्वमिति**। असत्यस्मिंस्तस्य नित्यत्वात्। नित्यादपि विशेषविहितं बलवदित्यत्राह — **यदि त्विति**। **न स्यादिति**। अपवादेन बाधितत्वात्। तस्माद्विषयभेदकल्पनया नोत्सर्गापवादताङ्गीकार्येति नित्यत्वाल्लोपप्राथम्यम्। ननु वचनाल्लुप्तायामपि तस्यां भविष्यति। अस्तु, [2]अन्यथासिद्धत्वस्याविवक्षितत्वाददोषः। कस्यचित् प्रसङ्गे भवन्नादेश इति कथं चोद्यम्, अत आह — **दिशिरिति**। रूढस्याप्यस्य संभवदवयवार्थोऽपि न त्याज्य इति भावः। किमवयवार्थानपेक्षो गवादिवद्रूढ इति सिद्धान्तिसंमतम्, नेत्याह — **प्रतीति**। अणन्तादकारान्तादिति विज्ञानस्य प्राप्तिमाह — **अकारेणेति**। प्रत्ययग्रहणपरिभाषयाणा तदन्तप्रतिपत्तेस्तस्यैव प्रस्तुतविशेषणसंबन्ध इत्यर्थः। अस्मिंश्च पक्षे श्रुत्याकारान्तत्वात् प्रत्ययलक्षणेनाणन्तत्वात् ङीप्प्रसङ्गश्चित्रादौ। **अणेवेति**। यावत् स्वविशेष्यप्रातिपदिकसंबन्धो नास्ति ततः प्रागेव विशेषणसंबन्ध इत्यर्थः। अत्र च तदन्तादिति द्रष्टव्यम्। एवमप्यनिष्टानिवारणम्, विशेषणवैयर्थ्यं च, अत आह — [3]**सर्वश्चेति**। श्रूयमाणोऽश्रूयमाणश्चाकार एवेति। वर्णोपसृष्टप्रत्ययाश्रये प्रत्ययलक्षणसत्त्वात् कल्पनागौरवात् 'अतः' इत्यनुवृत्तेरन्यार्थत्वसंभवाच्च श्रूयमाणप्रतिपत्तेरभावादण्शब्दस्याकारान्वयं मत्वाह — **अथवेति**। अत्रापि व्याख्याने तदन्तादिति विज्ञेयमेव। अकारस्याणादिविशेषणे व्यावर्त्यसत्त्वाच्छ्रूयमाणत्वविशेषणालाभादाह — **इतीति**। अकारविशेषणत्वपक्ष आह — **अकारावयव इति**। बहुव्रीहिः। अकारस्य विशेष्यत्वपक्ष आह — **अथवेति**। **पूर्ववदिति**। अकारेण यञ्विशेषणे सर्वस्याकारावयवकत्वाच्छ्रूयमाणप्रतिपत्तिः, इतरत्र वर्णनिमित्ततेति व्याख्यानम्। निरस्योपादेयपक्षयोर्भेदापरिस्फुरणादाह — **अजिति**। विशेषणत्वविशेष्यत्वयोरचः को भेदः, तत्राह — **इतीति**। मास्तु तदादिविधिः, अतः किम्, अत्राह — **तत्रेति**। भाष्ये 'अम्यचि' इत्यमः प्राधान्यमात्रं प्रतिपादितम्, न तु तस्मिन् पक्षे वाक्यार्थस्वरूपम्, तदादिविधेरचा तत्र सत्त्वात्। गौरवं परिहरति — **त्वयापीति**। उपसंख्यानात् सूत्राक्षेपः कथमित्यत्राह — **कृतेऽपीति**। किं तत्र शासिमात्रग्रहणम्, उत यस्माच्छासेरङ् विहितस्तस्य। आद्ये 'आशीः' इत्यत्रानारब्धेऽस्मिन् इत्वसिद्धावुपसंख्यानं नियमार्थमित्यर्थः। द्वितीये तु विध्यर्थमेव, कृतेऽप्यस्मिन् 'आशीः' इत्यत्रेत्वाप्राप्तेः। **अकृते त्विति**। शासिमात्रग्रहणे विशिष्टग्रहणेऽपीत्वाप्राप्तेः। अस्याकरणे क्वावुपसंख्यानस्य नियामकत्वाभावान्नियमसाध्यं कथं लभ्यम्, अत उपसंख्यानस्य नियमार्थत्वायेदमारभ्यमित्यत्राह — **आशास्त इति**। 'तत् प्रत्ययलक्षणेन मा भूत्' इति भाष्यादनेन प्रत्ययलक्षणं नियम्यत इति भाति। तदयुक्तम्, एतद्व्यतिरिक्तप्रत्ययलक्षणवचनाभावात्, अत आह — **स्थानिवदिति**। स्थानिवद्भावनियमार्थमित्यर्थः। भाष्ये भावप्रधानः प्रत्ययलक्षणशब्दः, स्थानिवत्त्वात् प्रत्ययनिमित्ततया भवत् कार्यं प्रत्ययासाधारणाकारग्रहणे भवेत्, न तु प्रत्ययाप्रत्ययसाधारणाकारशब्दग्रहण इत्येवमर्थमिदमित्यर्थः। एष विशेषोऽस्माद्वचनात् कथं लभ्य इत्यत्राह — **प्रत्यय एवेति**। ननु स्वरेऽपि 'अस्' इति गृह्यमाणस्य रूपस्य प्रत्ययेतरसाधारण्येऽप्यर्थवत्परिभाषया विशिष्टप्रतिपत्तेर्न नियमात् तन्निवारणमित्यत्राह — **सोरिति**। ननु तदन्तविधिर्विशेष्यसंनिधाने, इह च तदसंनिधिरिति कथम् [4]'अनिनस्-

---

[1] अस्मिन्नेव सूत्र उपरि वक्ष्यमाणमिदम्।
[2] अनन्यथासिद्धत्वस्याविवक्षितत्वात् — ग.
[3] स चेति — ग.
[4] परिभाषा १६.

मन्' इति परिभाषा, अत आह — [1]**अत्र चेति**। यद्वा, स्थानिवत्त्वेन नासतः कार्यित्वं शक्यं प्रतिपत्तुमिति स्थानिवत्त्वस्य [2]'सोर्मनसी' इति स्वरविधावप्राप्तेर्नियमोऽपि न कर्तव्य इत्यत्राह — **अत्र चेति**॥

रमेशे रतिहीनानां मद्गिरो न मनोरमाः।
रसने दोषयुक्ते हि मधुरो विरसो भवेत्॥

न लुमताङ्गस्य १. १. ६३.

[१, ४९०–४९२]

(**लघुविवरणम्**) 'लुमति' इत्यनुपपन्नम्, न हि लुमत्ययं प्रतिषेधः, [3]क्व तर्हि, तत्प्रतिपादितेऽदर्शने, अत आह — **लुमतीति**। उपसंख्याने हेतुमाह — **अङ्गेति**। ननु बहुव्रीहिस्वर एकपदाश्रयो न भवतीत्यत आह — **सर्वस्येति**। **प्रत्ययस्वरेणेति**। इस्प्रत्ययान्तः सर्पिश्शब्द इति भावः। **नित्स्वरेणेति**। [4]'सप्यशूभ्यां तुट् च' इति कनिन्प्रत्ययान्तत्वेनेति भावः। सिज्लुक्स्वरवर्जनं तु न कर्तव्यमित्याह — **लेरेवेति**। 'ञ्निनिकिल्लुकि स्वराः' इत्यनुपपन्नम्, न हि ञ्निशब्दो निशब्दो वा कस्यचित्प्रत्ययस्येत्संज्ञकोऽस्ति। न च तन्निबन्धनः स्वर इत्यत आह — **इकार इति**। 'ञ्निनिकित्स्वराः' इति व्याख्यानमनुपपन्नम्, तथा सति स्वरा इत्येतदपेक्षमाणस्य ञ्निनिकिच्छब्दस्य सापेक्षत्वादसमर्थत्वाल्लुक्शब्देन समासानुपपत्तेरित्यत आह — **ञ्नित्किताम्इति**। ननु [5]'असुपि' इति पर्युदासे प्रत्ययलक्षणस्य कार्यस्याभावात् किं तत्प्रतिषेधेनेत्यत आह — **प्रसज्येति**। ततश्च प्रतिषेध एव प्रत्यय[6]लक्षणकार्यमिति भावः। वाक्यभेदपरिहाराय पर्युदास एवास्त्वित्यत आह — **पर्युदासे त्विति**। न च [7]'रोऽसुपि' इति वचनसामर्थ्यात् 'असुपि' इति तत्प्रतिषेधस्य श्रूयमाणे सुपि 'अहोभ्याम्' इत्यादौ चरितार्थत्वादन्तरेणापि प्रत्ययलक्षणप्रतिषेधं प्रत्ययलक्षणेन 'असुपि' इति रप्रतिषेधो न भवतीति सांप्रतम्, तथा च सति 'दोर्घाह्ना निदाघः' इत्यत्रापि प्रत्ययलक्षणेन प्रतिषेधाभावाद्रत्वप्रसङ्गः॥

[१, ४९०–४९२]

(**विवरणम्**) यद्यपि लुशब्दयोगात् संज्ञा लुमच्छब्दवाच्या, न च तत्र 'न लुमता' इति प्रतिषेधः, किं तु तत्प्रतिपादितेऽदर्शने, तथापि वाचकधर्मं लुशब्दयोगं वाच्य उपचर्य 'लुमति' इति निर्देश इत्याह — **लुमदिति**। ननु सर्वः स्वरः कार्यित्वेनैकमेव पदं गृह्णातीति [8]'मुधैकपदमित्यत आह — **एकेति**। [9]'पदस्य' [10]'पदात्' इत्यधिकृत्य [11]'आमन्त्रितस्य च' इत्यादिना विधीयमानः

---

[1] प्रदीपे 'तत्र चोत्तरपदादिः' इत्यत्र 'अत्र चोत्तरपदादिः' इति पाठोऽभिमत इति भाति।
[2] पा. सू. ६. २. ११७.
[3] किं तर्हि — ण.
[4] उणादिसूत्रम् १६३.
[5] पा. सू. ८. २. ६९.
[6] लक्षणस्य कार्यमिति — ड.
[7] पा. सू. ८. २. ६९.
[8] नानेकपद इत्यत आह — ण.
[9] पा. सू. ८. १. १६.
[10] पा. सू. ८. १. १७.
[11] पा. सू. ८. १. १९.

पदद्वयाश्रय इति योजना। 'सर्वामन्त्रित' इत्यामन्त्रितग्रहणेनाष्टमिकमपि ग्रहीतुं शक्यमिति [1]'पदस्य' [2]'पदात्' इत्यधिकारेऽनन्तरमपि [3]'आमन्त्रितस्य च' इत्युल्लङ्घ्य व्यवहितमुदाहरति — **दधीति**। **इति भावः** उपसंख्यानं कुर्वत इति शेषः। पूर्वपदमुत्तरपदापेक्षमिति बहुव्रीहिस्वरस्य द्विपदाश्रयत्वान्नास्त्यौपसंख्यानिकस्य[4] प्रतिषेधस्य प्राप्तिरिति तदपवादे 'सर्वस्तोमः' इत्युदाहरणमयुक्तमित्यत आह — **सर्वस्येति**। **विधीयते** अपवादनिवर्तनेन व्यवस्थाप्यत इत्यर्थः। **प्रत्येति**। सूपेरौणादिके इसिप्रत्यये सतीति भावः। **नित्स्वरेणेति**। [5]'सप्यशूभ्यां तुट् च' इति कनिन्प्रत्ययान्तत्वेनेति शेषः। एतच्चोपलक्षणम्। [6]'न्रः संख्यायाः' इत्याद्युदात्तत्वेऽपीत्यपि द्रष्टव्यम्। सिज्लुक्स्वरवर्जनं न कर्तव्यमित्याह — **लेरिति**। [7]'गाति' इत्यनेन लेरेव लुकि [8]'मन्त्रे घसह्वरणश' इत्यत्र पुनर्लिग्रहणं न कर्तव्यम्, [9]'जुसि च' [10]'आतः' इत्येतद्विध्यर्थं भविष्यतीति भावः। 'जिनिकित्स्वराः' इति भाष्यदर्शनात् ञिनिकिदिति स्वरविशेषणमिति प्रत्ययः स्यात्। तथाच लुका सामर्थ्याभावात् 'जिनिकिल्लुकि' इति समासोऽनुपपन्न इति भ्रमं व्युदस्यति — **जिनित्किताविति**। 'प्रयोजयन्ति' इत्यत्र कर्मापेक्षायामाह — **प्रतिषेधमिति**। **लुबिति**। [11]'इवे प्रतिकृतौ' इति विहितस्येत्यर्थः। गर्गा इत्यादिषु यञञ्कनां लुग्लुपोः प्रत्ययलक्षणेनाद्युदात्तत्वाभावे प्रातिपदिकस्वरेण समासस्वरेण च यथायोगमन्तोदात्तत्वं भवति। ननु तद्धिताक्षिप्तप्रातिपदिकस्य तद्धितेन विशेषणात् [12]'प्रत्ययग्रहणे यस्मात्' इति तदन्तविधौ समुदायस्य कार्यित्वेन प्रत्ययलक्षणेन प्राप्तस्यान्तोदात्तत्वस्य प्रत्ययलक्षणप्रतिषेधादभावेऽपि प्रातिपदिकस्वरेण स्यादेव तदिति मुधा प्रत्ययलक्षणप्रतिषेध इत्यत आह — **रेति**। **अन्तोदात्ताविति**। प्रातिपदिकस्वरेणान्तोदात्तत्वात् तयोरिति भावः। पर्युदासे प्रत्ययलक्षणकार्याभावात् [13]प्रतिषेधस्यायोगमाशङ्क्य प्रसज्यप्रतिषेधोऽसुपीति सूचितो भाष्यकृता प्रतिषेधो मा भूदिति ब्रुवता। तमुपपादयति — **पर्युदास इति**। प्रत्ययत्वेन सुप्सदृश इत्युक्तौ 'अहर्ददाति' इत्यत्रापि रत्वं न स्यादिति भावः। नन्विष्यमाणमपि रुत्वं कथं स्यात्, यावता प्रत्ययलक्षणप्रतिषेधात् [14]'असुपि' इति [15]'प्रतिषेधाप्राप्तौ रत्वप्राप्तेरित्यत आह — **लोपेति**। हल्ङ्यादिसूत्रेण सोर्लोपादिति भावः। **रुत्व इति**। लोपे [16]'असुपि' प्रतिषेधेन भवितव्यम्, लुकि तु प्रत्ययलक्षणप्रतिषेधश्चेति सर्वमिष्टं सिध्यतीति भावः॥

[१. ४९०–४९२]

(उद्द्योतनम्) ननु 'लुमत्' इति संज्ञा, न त्वदर्शनम्, संज्ञायां परतो 'न लुमता' इति निषेधासंभवः, अत आह — **लुमतसंज्ञयेति**। संज्ञया संज्ञिलक्षणेति भावः। **तत्र** लुमता प्रति-

---

[1] पा. सू. ८. १. १६.
[2] पा. सू. ८. १. १७.
[3] पा. सू. ८. १. १९.
[4] औपसंख्यानिकप्रतिषेधस्य — च, छ, ञ.
[5] उणादिसूत्रम् १६३.
[6] फिट्सूत्रम् २८.
[7] पा. सू. २. ४. ७७.
[8] पा. सू. २. ४. ८०.
[9] 'जुसि च' इत्यादि 'भविष्यति' इत्यन्तं नास्ति — च, छ; जुस्विधौ 'आतः' इत्येतत् — ट.
[10] पा. सू. ३. ४. ११०.
[11] पा. सू. ५. ३. ९६.
[12] परिभाषा २३.
[13] प्रतिषेधस्य प्रत्ययलक्षणकार्यत्वाय प्रसज्यप्रतिषेधः — च, छ, ट.
[14] पा. सू. ८. २. ६९.
[15] प्रतिषेधाप्रवृत्तौ — ट, ञ.
[16] पा. सू. ८. २. ६९.

पादितादर्शने [1]सति। ननु सर्वस्य स्वरस्यैकमेव पदं कार्यीति 'एक' इति व्यर्थम्, अत आह — **एकेति**। व्यावर्त्यमाह — **यस्त्विति**। [2]**दधीति**। सोर्लुक्यपि प्रत्ययलक्षणेन पदसंज्ञामाश्रित्य निघातः सिद्ध इत्यर्थः। यद्यपि [3]'पदस्य' [4]'पदात्' इत्यनन्तरम् [5]'आमन्त्रितस्य' इत्याष्टमिकनिघात उदाहर्तुमुचितः, तथापि 'सर्वामन्त्रित' इत्यामन्त्रितग्रहणेनाष्टमिकस्यापि ग्रहणसंभवेन तदुपेक्ष्य व्यवहिततिङनिघात उदाहृत [6]इति ज्ञेयम्। उपसंख्यानवादिनस्तात्पर्यमाह — **अङ्गस्येति**। ननु पूर्वपदमुत्तरपदसापेक्षमिति बहुव्रीहिस्वरस्य पदद्वयाश्रयत्वेनौपसंख्यानिक[7]प्रतिषेधाप्रसक्तेस्तदपवादे[8] सर्वस्तोमोदाहरणमयुक्तम्, अत आह — **सर्वस्येति**। सुपि परे सर्वस्याद्युदात्तः स्यादिति सूत्रार्थः। **विधीयते** अपवादनिवर्तनेन व्यवस्थाप्यते। **प्रत्ययेति**। [9]सूपेरौणादिक इसिप्रत्ययः। **नित्स्वरेणेति**। [10]'सप्यशूभ्यां तुट् च' इति कनिन्प्रत्ययान्तत्वादित्यर्थः। उपलक्षणमिदं [11]'न्रः संख्यायाः' इत्याद्युदात्तत्वेनेत्यपि द्रष्टव्यम्। भाष्ये **आद्युदात्तत्वमिति**। संबोधनप्रथमाया लुक्यपि प्रत्यय[12]लक्षणेनामन्त्रितत्वात् षाष्ठिकमाद्युदात्तत्वमित्यर्थः। भाष्ये अडागमस्वरनिरासाय माङ्प्रयोगः, निघातनिषेधाय हिप्रयोगः। सिजन्तस्यादिर्वोदात्त इति सूत्रार्थः। सिज्लुक्स्वरवर्जनं न कर्तव्यमित्याह — **लेरेवेति**। [13]'गाति' इत्यनेन लेरेव लुकि [14]'मन्त्रे घस' इत्यत्र पुनर्लिग्रहणं न कर्तव्यमिति लाघवम्। भाष्ये 'ञ्निनिकित्स्वराः' इति दर्शनात् 'ञ्निनिकित्' इति स्वरविशेषणं प्रतीयते, तथा च [15]लुका समासो न स्यात्, असमर्थत्वात्, अत आह — [16]**ञ्नित्किताविति**। 'प्रयोजयन्ति' इत्यत्र कर्माध्याहरति — **प्रतिषेधमिति। कनो लुबिति**। [17]'इवे प्रतिकृतौ' इति विहितस्येत्यर्थः। इवार्थे वर्तमानात् कन् स्यात् प्रतिकृताविति सूत्रार्थः। देवपथादिराकृतिगणः। **संज्ञायामिति**। उपमानशब्दः संज्ञायामाद्युदात्त इति सूत्रार्थः। भाष्ये 'गर्गाः' इत्यादिषु प्रत्ययलक्षणेनाद्युदात्तत्वाभावे प्रातिपदिकस्वरेण समासस्वरेण च यथायोगमन्तोदात्तत्वम्। नन्वत्रिशब्दस्य प्रातिपदिकस्वरेणान्तोदात्तत्वात् प्रत्ययलक्षणप्रतिषेधोऽनर्थकः, अत आह — **अदेरिति**। प्रत्ययलक्षणेनाद्युदात्तत्वस्य प्राप्तस्य [18]'निषेधे कः स्वरो भवति, अत आह — **अन्तोदात्ताविति**। प्रातिपदिकस्वरेणेत्यर्थः। ननु [19]'असुपि' इति पर्युदासे प्रत्ययलक्षणेन [20]रप्रतिषेधो न भविष्यति, अत उक्तम् — भाष्ये **प्रतिषेधो मा भूदिति**। तदुपपादयति — **प्रसज्येति**। **दीर्घेति**। बहुव्रीहितया टजभावात् [21]'सर्वनामस्थाने च' इत्युपधादीर्घः। हल्ङ्यादिलोपः। **सुप्सदृश इति**। प्रत्ययत्वेन सुप्सदृश इत्युक्तौ 'अहर्ददाति' इत्यत्रापि रत्वं न स्यादिति भावः। ननु प्रत्ययलक्षणप्रतिषेधेनास्यापि प्रतिषेधाप्राप्तौ रत्वमेव भविष्यतीतीष्टमपि रुत्वं कथं स्यात्, अत आह — **लोपेति**।

---

[1] 'सति' इति नास्ति — म.
[2] 'दधीति' इति नास्ति — म.
[3] पा. सू. ८. १. १६.
[4] पा. सू. ८. १. १७.
[5] पा. सू. ८. १. १९.
[6] इति ध्येयम् — म.
[7] प्रतिषेधाप्राप्तेः — अ.
[8] तदपवादेन सर्व — ऋ.
[9] 'सूपेः' इति नास्ति — म.
[10] उणादिसूत्रम् १६३.
[11] फिट्सूत्रम् २८.
[12] लक्षणेनामन्त्रितान्तत्वात् — म.
[13] पा. सू. २. ४. ७७.
[14] पा. सू. २. ४. ८०.
[15] लुक्समासः — अ.
[16] ञ्निनित्किताविति — ऋ, म.
[17] पा. सू. ५. ३. ९६.
[18] निषेधकः — अ, म, ऋ.
[19] पा. सू. ८. २. ६९.
[20] स प्रतिषेधः — ऋ.
[21] पा. सू. ६. ४. ८.

हल्ङ्यादिसूत्रेण सोर्लोपादिति भावः। **रुत्वे** [1]'अहन्' इत्यनेन। **यत्वे** [2]'भोभगो' इत्यनेन। लोपे [3]'हलि सर्वेषाम्' इत्यनेन। अत्र निदाघशब्दस्याप्रयोगे [4]पूर्वप्रयोगे वा यत्वलोपयोरभावाद् रोर्विसर्जनीये 'दीर्घाहाः, दीर्घाहानौ, दीर्घाहानः, दीर्घाहोभ्याम्' इत्यादि ज्ञेयम्। 'अहर्ददाति' इत्यत्रात्यन्तसंयोगे द्वितीया। अह्न एव कर्तृत्वविवक्षया प्रथमा वा, तयोः [5]'स्वमोः' इति लुक्। तेन रत्वसिद्धिरित्याह — **लुकि त्विति**। [6]'सुपां सुलुक्' इति सप्तम्येकवचनस्य लुक्। तेन अह्नि ददातीत्यर्थ इत्यपि केचित्॥

[१, ४९०–४९२]

(**रत्नप्रकाशः**) लुमता शब्देन लोपे कृते तं लोपं स्थानिसंज्ञकमाश्रित्य प्रसक्तमङ्गाधिकारविहितं कार्यं नेति वा, तस्मिन्परे यदङ्गं तस्य कार्यं नेति वा सूत्रार्थेऽव्याप्तिरित्याह — **लुमतीति**। लुमच्छब्दाश्रय इत्यर्थः। एतेन 'लुमत्संज्ञया प्रतिपादितमदर्शनं लुमत्, तत्र यः प्रतिषेतधस्तस्मिन्नित्यर्थः' इति निरस्तम्। संभवति सामानाधिकरण्ये वैयधिकरण्यस्यान्याय्यत्वात्। **एकपदस्वर इति**। [7]'तिङ्ङतिङः' इत्यादिष्वनेकपदाश्रितस्वरेषु प्रत्ययलक्षणं यथा स्यादित्येवमर्थमेकग्रहणम्। **सर्वस्तोम इति**। [8]'बहुव्रीहौ प्रकृत्या' इति सूत्रेण पूर्वपदस्वरविधायकशास्त्रोज्जीवनमात्रं क्रियते, न तु विशिष्य कश्चित् स्वरो विधीयत इति [9]'सर्वस्य सुपि' इत्यनेन क्रियमाणं सर्वशब्दस्य सुबन्तस्याद्युदात्तत्वमेकपदस्वर एवेति भावः। **सर्पिरागच्छेति**। सर्पिःसप्तशब्दौ घृतादित्वादन्तोदात्तौ। तयोः [10]'आमन्त्रितस्य' इत्याद्युदात्तत्वमेकपदस्वरः। संबोधनप्रथमाया लुका लुप्तत्वादामन्त्रितत्वं निषिध्येतेति भावः। **मा हि दातामिति**। [11]'गातिस्था' इति सिचो लुक्। **सिचः** सिजन्तस्य। **एष स्वरः** आद्युदात्तत्वम्। **किं प्रयोजनमिति**। एकपदस्वरोपसंख्यानस्येति शेषः। **ञ्निकिल्लुकीति**। नकारेकार उच्चारणार्थः। ञ्निन्नित्किताां प्रत्ययानां लुकि कृते तन्निमित्तस्वरनिवृत्तिः प्रयोजनमिति भावः। गर्गाः, वत्साः, इत्यत्र यञो लुक्। 'बिदाः, उर्वाः' इत्यत्राञः। 'उष्ट्रग्रीवा, वामरज्जुः' इत्यत्र [12]'इवे प्रतिकृतौ' इति विहितस्य कनो देवपथादित्वाल्लुप्। सर्वत्र ञिदन्तस्य निदन्तस्य चादिरुदात्त इत्यर्थकेन [13]'ञ्नित्यादिर्नित्यम्' इति सूत्रेणाद्युदात्तत्वं प्रसक्तम्। **अत्त्रय इति**। [14]'राशदिभ्यां त्रिप्' 'अदेश्च' इति त्रिबन्तोऽत्त्रिशब्द आद्युदात्तः। तस्मात् [15]'इतश्चानिञः' इति ढकः [16]'अत्त्रिभृगु' इति लुक्। तत्र [17]'तद्धितस्य' [18]'कितः' इति कित्तद्धितान्तत्वप्रयुक्तमन्तोदात्तत्वं प्रसक्तम्। एकपदस्वरांश एवोदाहरणान्तरमाह — **पथिमथोरिति**। **पथिप्रिय इति**। सर्वनामस्थानान्तत्वप्रयुक्त आद्युदात्तत्वे निषिद्धे इनिप्रत्ययप्रयुक्तान्तोदात्त एव प्रकृतिस्वरेणानुगृहीतः।

---

[1] पा. सू. ८. २. ६८.
[2] पा. सू. ८. ३. १७.
[3] पा. सू. ८. ३. २२.
[4] 'पूर्वप्रयोगे' इति नास्ति — म.
[5] पा. सू. ७. १. २३.
[6] पा. सू. ७. १. ३९.
[7] पा. सू. ८. १. २८.
[8] पा. सू. ६. २. १.
[9] पा. सू. ६. १. १९१.
[10] पा. सू. ६. १. १९८.
[11] पा सू. २. ४. ७७.
[12] पा. सू. ५. ३. ९६.
[13] पा. सू. ६. १. १९७.
[14] उणादिसूत्रम् ५१६, ५१७.
[15] पा. सू. ४. १. १२२.
[16] पा. सू. २. ४. ६५.
[17] पा. सू. ६. १. १६४.
[18] पा. सू. ६. १. १६५.

प्रतिषेधो मा भूदिति। [1]'असुपि' इति प्रसज्यप्रतिषेध एवाश्रयणीयः। अन्यथा 'दीर्घाहा निदाघः' इत्यादौ सुब्भिन्ने निदाघादौ परेऽपि प्रसङ्गादिति भावः। इदं त्वङ्गाधिकारविहितस्य निषेध इति पक्ष एव। पक्षान्तरे सूत्रेणैव सिद्धेः॥

[१, ४९०–४९२]

(नारायणीयम्) लुशब्दो यस्मिन् संज्ञाशब्देऽस्ति स लुमान्, तत्र नायं प्रतिषेधः, किं तु 'प्रत्ययलोपे' इत्यधिकाराल्लुमता प्रत्ययलोपेऽङ्गस्य प्रत्ययलक्षणकार्यं [2]नेष्यते। तत् कथ 'लुमति प्रतिषेधे' इत्युक्तम्, अत आह — **लुमदिति**। तद्भाव्ये तद्व्यवहार औपचारिक [इति भावः। **एकपदस्वरे**] तत्र सतीति शेषः। तस्मिन् विधीयमान [3]इत्यर्थः। नन्वयमनुवादः किमर्थः उच्यते, असत्यनुवादे एकपदस्वरस्य लोपशब्देन प्रत्ययलोपेऽपि प्रतिषेध इति भ्रमः स्यात्। अस्मात्त्वनुवादाल्लुमता लोपे निषेधलाभः। प्रत्ययलक्षणोपसंख्यानभ्रमवारणार्थमित्यप्याहुः। वस्तुतस्त्वङ्गाधिकारविहितस्य प्रतिषेध इत्यभिमतम्। किमेकस्य पदस्य सर्वस्य भवन् स्वर एकपदस्वरः, उत तदेकदेशस्य भवन्नपि। नाद्यः, ञ्निदादिस्वरस्यातथात्वात्। तिङनिघातादेस्तथात्वेन तत्र निषेधापाताच्च। नान्त्यः, विशेषणवैयर्थ्यात्, अत आह — **एकेति**। अप्राप्तिनिमित्तं वार्तिकसंमतमाह — **अङ्गस्येति**। कित्स्वरस्य तु पक्षद्वयेऽप्यप्राप्तिरित्याह — **किदिति**। सर्वे स्तोमा अस्मिन् क्रताविति बहुव्रीहौ पूर्वपदप्रकृतिस्वरस्य पूर्वपदशब्दस्य संबन्धिशब्दतयोत्तरपदापेक्षत्वादनेकपदात्मकबहुव्रीह्यपेक्षणाद्वानेकपदाश्रयत्वमिति प्रतिषेधाप्रसङ्गात् प्रतिप्रसवोऽनर्थक इत्यत आह — **सर्वस्येति**। **विधीयते** सामासिकान्तोदात्तनिवारणेन प्रतिप्रसूयते। प्रतिप्रसवतया च नाधिकनिमित्ताकाङ्क्षा। आमन्त्रितस्वराभावे दोषमाह — **सर्पिरिति**। अव्युत्पत्तिपक्ष आह — **घृतेति**। इदं त्वव्युत्पत्तिपक्ष एवोदाहृतमित्याह — **सप्तेति**। [4]**च्लेरेवेति**। एवं हि सिज्ग्रहणं न कर्तव्यं भवति, वक्ष्यमाणलिग्रहणस्यात्रापक्रष्टव्यत्वात्। तस्मात् सिचो लेर्वा लुक्यविशेषे सिज्ग्रहणं विशेषसत्त्वज्ञापनायेति प्रत्ययलक्षणेन स्वरो भवति। इच्छब्दस्य जिनिभ्यां संबन्धे [5]जीतो नीतो वा लुग्भाजोऽसंभवः। असंबन्धे च तथेत्यत आह — **इकार इति**। जिनिकिदित्यस्य लुग्ग्रहणेनासमासे प्रथमान्तस्यास्यानन्वयापत्तिः, लुक् चाविशेषितः स्वरश्च, अत आह — **जिदिति**। **स्वरा इति**। प्रत्यासत्तेर्जिदादिस्वराः। अत्र प्रत्ययलुगसंभवाल्लुग्ग्रहणमुपलक्षणतया व्याचष्टे — **देवेति**। **कन इति**। [6]'इवे प्रतिकृतौ' इति विहितस्य। न तु [7]'संज्ञायां च' इति विहितस्येत्याह — **संज्ञायां त्विति**। कित्स्वरनिवृत्तावपि प्रातिपदिकस्वरेणान्तोदात्तत्वं कस्मान्नेत्यत्राह — **अदेरिति**। एकपदस्वरे प्रत्ययलक्षणनिषेधस्योदाहरणान्तरमुक्तम्। तत्र "पथिमथोः' इति स्वरस्यानिष्टत्वावद्योतनायाह — **पूर्वेति**। प्रातिपदिकस्वर इति भावः। सति प्रत्ययलक्षणे सुबाश्रयो निषेधः स्यादिति भाष्योक्तमुपपादयति — **असुपीति**। ननु पर्युदास आश्रयिष्यते। ततश्च सुप्यौदासीन्येन तद्भिन्नशब्दे विधीयमानं रत्वम् 'अहर्ददाति' इत्यादौ सिध्यतीत्यत आह — **पर्युदासे त्विति**। **रुत्वं चेति**। [8]'अहन्' इत्यनेन। प्रसज्यप्रतिषेधेऽपि कथमत्र रत्वनिषेधः, रत्वविधौ प्रत्ययलक्षणनिषेधात्

---

[1] पा. सू. ८. २. ६९.
[2] नोच्यते — ति.
[3] इति शेषः — ग.
[4] प्रदीपे 'लेरेव लुकि' इत्यत्र 'च्लेरेव लुकि' इति पाठोऽभिमतः।
[5] ञ्नितः — ग.
[6] पा. सू. ५. ३. ९६.
[7] पा. सू. ५. ३. ९७.
[8] पा. सू ६. १. १९९.
[9] पा. सू. ८. २. ६८.

सुप्परत्वाभावात्, अत आह — **लोपेति**। रुत्वरत्वयोर्विशेषमाह — **यत्व इति**। यत्वविधौ रोरित्यधिकाराद्रेफमात्रस्य तदभावः। रुत्वस्यासिद्धत्वात् [1]'सर्वनामस्थाने च' इति दीर्घः। अस्य तर्हि निषेधस्य को विषयः, तमाह — **लुकीति**। नन्वत्रास्तु रुत्वम्, को दोषः, तमाह — **रत्व इति**। रुत्वे सत्युत्वं स्यादित्यर्थः॥

[१, ४९३–४९८]

(**लघुविवरणम्**) ननु यदि 'उत्तरपदत्वे चापदादिविधौ' इत्युत्तरस्य पदत्वे प्रत्ययलक्षणं प्रतिषिध्यते तर्हि 'परमं चर्म' इत्यत्रासमासेऽपि प्रत्ययलक्षणप्रतिषेधान्नलोपो न स्यादित्यत आह — **उत्तरपदमिति**। अन्यथा 'बहुच्पूर्वस्य च' इत्यनर्थकं स्यादिति भावः। उत्तर[2]पदव्यवहारश्च समासे प्रसिद्ध इत्यसमासेऽतिप्रसङ्गो [3]न भवतीति भावः। **स्वरश्चेति**। उत्तरपदादिरित्यधिकारादिति भावः। परिहरति — **ककार इति**। नन्वसमासार्थं सूत्रं नोपपद्यते, तत्र हि [4]"स्वाङ्गशिटामदन्तानाम्' इत्युदात्तस्य सिद्धत्वादित्यत आह — **कर्णेति**। 'उत्तरपदत्वे च' इत्युच्यमाने [5]'कथमिव शाकलं न भवतीत्यत आह — **इक इति**। 'कुमार्यौ' इत्यत्र शाकलनिवृत्तय इति भावः। [6]'नन्विदमोऽश्भावो धुना च प्रत्ययो निपात्यत इति कथं 'दधि अधुना' इत्यत्रातिप्रसङ्ग इत्यत आह — **अधुनेति**। ननु वचनसामर्थ्याद्रूढिं परित्यज्योत्तरं पदमुत्तरपदमिति योगो ग्रहीष्यत इत्यत आह — **न चेति**। 'इह तर्हि' इत्यनुपपन्नम्, सर्वनामस्थानव्यतिरिक्ते स्वादौ [7]'स्वादिषु' इति पदसंज्ञाविधानात् तेन 'प्राप्त्यभावेऽपि [8]'सुप्तिङन्तम्' इत्यनेन प्राप्तेरित्यत आह — **प्रसज्येति**। नन्वेवमपि [9]'अनन्तरस्य विधिर्वा' इति न्यायात् [10]'स्वादिषु' इति प्राप्तेरेव निषेधात् [11]'सुबन्तं पदमिति पदसंज्ञा भविष्यत्येवेत्यत आह — **ततश्चेति**। सुबन्तस्य [12]च सर्वनामस्थाने पदसंज्ञानिषेधसामर्थ्यात् [13]'अनन्तरस्य' इति न्यायो नाश्रीयत इत्यर्थः। 'अथवानन्तरा या प्राप्तिः' इति भाष्यस्यायमभिप्रायः — सुबन्तग्रहणानुवृत्तिः 'असर्वनामस्थाने' इत्यत्रोत्तरार्थैव स्यादिति। ननु सत्यपि योगविभागे [14]'अनन्तरस्य' इति न्यायात् [15]'स्वादिषु' इति पदसंज्ञानिषेधे सुबन्तलक्षणा स्यादेवेत्यत आह — **योगेति**। योगविभागसामर्थ्यादेवेत्यर्थः। ननु 'सर्वनामस्थानेऽयचि' इति यदि सूत्रं क्रियते, पदसंज्ञा च तेन विधीयते ततः 'स्वादिषु' इति पदसंज्ञायां सिद्धायां नियमार्थमेतत् स्यात् — सर्वनामस्थाने स्वादावयच्येवेति। ततश्च 'वाचौ, वाचः' इत्यादौ नियमस्य सप्रयोजनत्वाद्योगविभागस्य च सर्वनामस्थानव्यतिरिक्ते स्वादौ पदसंज्ञार्थत्वात्

---

[1] पा. सू. ६. ४. ८.
[2] पदत्वव्यवहारश्च — ण.
[3] नोद्भावनीयः। — ड, ढ.
[4] फिट्सूत्रम् २९.
[5] कथमिति शाकलं — ण.
[6] काशिकारीतिमनुसृत्यैवं शङ्का। अत्र तत्त्वबोधिनी द्रष्टव्या। तत्र 'धुना च प्रत्ययः' इति काशिकेति दृश्यते। काशिकावृत्तौ चौखाम्बामुद्रिते मूले तु 'अधुना च प्रत्ययः' इति मुद्रितं दृश्यते।
[7] पा. सू. १. ४. १७.
[8] प्राप्त्यभावेन — ड, ढ.
[9] पा. सू. १. ४. १४.
[10] परिभाषा ६२.
[11] पा. सू. १. ४. १७.
[12] सुबन्तलक्षणा पदसंज्ञा — ण.
[13] चकारो नास्ति — ड, ढ.
[14] परिभाषा ६२.
[15] परिभाषा ६२.
[16] पा. सू १. ४. १७.

'परमवाचौ' इत्यादौ सुबन्त[1]लक्षणपदसंज्ञान्तर्वर्तिन्या विभक्त्या स्यादित्यत आह — **असर्वनामस्थान इतीति**। **भाष्ये त्विति**। नञ्: सर्वनामस्थानपदेन संबन्धो नास्तीत्येवंपरं भाष्यमिति भाव:॥

[१, ४९३–४९८]

(**विवरणम्**) [2]ननूत्तरस्य पदत्वमुत्तरपदत्वम्, आहोस्विद् रूढया उत्तरपदवाच्यस्य समासावयवविशेषस्य धर्म: कश्चित्। नाद्य:, तत्र हि प्रत्ययलक्षणप्रतिषेधे 'परमं चर्म' इत्यत्र परमशब्दादुत्तरस्य [3]चर्मन्नित्यस्य पदत्वव्यपदेशे कर्तव्ये प्रत्ययलक्षणप्रतिषेधान्नलोपो न स्यात्। न द्वितीय:, न ह्युत्तरपदत्वं नाम किंचित् प्रत्ययलक्षणं कार्यमस्ति, यदतिदेशात् [4]प्राप्तं निषिध्येतेत्यत आह — **उत्तरपदमिति**। तथा च 'बहुच्पूर्वस्य' इत्यर्थवदिति भाव:। **प्रत्ययलक्षणं न भवतीति**। अतिदेशो न प्रवर्तत इत्यर्थ:। **समासार्थेति**। [5]"सन्महत्परम' इत्यत्र 'सुप् सुपा' इत्यधिकारादिति भाव:। **तामिति**। [6]'सुपो धातुप्रातिपदिकयो:' इति लुप्तामिति शेष:। **कुत्वादीनीति**। कुत्वढत्वघत्वादीनीत्यर्थ:। ननु पदसंज्ञा भसंज्ञया बाध्येतेत्यत आह — **यस्माद्यजादिविधिरिति**। अनुवृत्तेरिति शेष:। **न त्विति**। तथा च भिन्नावधिकत्वाद् भसंज्ञया पदसंज्ञा न बाध्यत इति शेष:। **सेच्शब्दस्येति**। समासादेव सुबुत्पत्तेरिति भाव:। अनभिधाने हेतु:,— **दधीति**। **स्वरश्चेति**। उत्तरपदादिरित्यधिकारादिति भाव:। **न त्विति**। स्थिते उत्तरपदादित्वे तद्विधौ प्रतिषेधापवाद:, इह तु स्वरविधिसमय एवोत्तरपदादित्वबुद्धिर्न प्रागिति भाव:। एतच्चोत्तरपदशब्दस्यारूढत्वमाश्रित्य चोद्यम्। भाष्ये 'यद्यपदादिविधावित्युच्यते' इत्यनेन न [7]प्रतिषेधापवादस्यातिव्याप्तिरुच्यते, किं तु प्रतिषेधस्येति द्रष्टव्यम्। नन्वसमासे "स्वाङ्गशिटाम्' इति कर्णशब्दस्य सिद्धमेवाद्युदात्तत्वमित्यत आह — **कर्णशब्दादिति**। **पदेति**। [8]तच्चार्थात् षष्ठ्यन्तमिग्विशेषणं च पदान्तग्रहणम्। तस्य चानुवृत्ति: 'कुमार्यौ' इत्यत्र शाकलाभावाय। भाष्ये **सितीति**। [10]"सन्नित्यसमासयो:' इति वार्तिक इति शेष:। **प्रत्यासत्त्येति**। प्रत्ययाक्षिप्तप्रकृत्येग्विशेष्यत इति भाव:। विधानविवक्षायामपि न दोष इत्याह — **राजेति**। उत्तरपदशब्दो योगरूढ इत्यभिप्रेत्याह — **समासे हीति**। केवलयोगेऽप्याह — **न चेति**। **संज्ञिनामिति**। न च श्रूयमाणसुबन्तस्य सर्वनामस्थानं परमिति [11]प्रतिषेधाप्राप्तिरित्यर्थ:। ननु परशब्दस्येष्टवाचित्वात् पूर्वविप्रतिषेधेन 'सुबन्तम्' इति पदसंज्ञा भविष्यतीत्याशङ्क्य भाष्यकृतोक्तम् — **प्रतिषेधाश्चेति**। कथमनेन पूर्वविप्रतिषेधो निराकृत इत्यत आह — **विधीति**। प्राप्तस्य हि **उन्मूलनं** निवर्तनम्, तद्रूपत्वादित्यर्थ:। अनेन विधिप्रतिषेधयोर्न युगपत्प्राप्ति:, किं तु विधिप्राप्त्युत्तरकालमिति पूर्वविप्रतिषेधासंभव इत्युक्तं भवति। 'अथवा अनन्तरा' इति भाष्यस्यायमर्थ: — यद्यपि [12]"असर्वनामस्थाने' इत्यत्र सुबन्तस्यानुवृत्ति:। तथा च यदि [13]'अनन्तरस्य' इत्याश्रित्य [14]"स्वादिषु' इति प्राप्तिरेव निषिध्यते न

---

[1] लक्षणा पद — ण.
[2] ननूत्तरपदस्य पदत्वम् — ञ.
[3] चर्मन्नित्येतस्य — च, छ.
[4] प्राप्तिर्निषिध्येतेति — च, छ.
[5] पा. सू. २. १. ६१.
[6] पा. सू. २. ४. ७१.
[7] प्रतिषेधापवादस्याव्याप्ति: —च.
[8] फिट्सूत्रम् २९.
[9] तच्चानर्थक्यात् —च.
[10] का. वा. ६. १. १२७-१.
[11] प्रतिषेधावाप्तिरित्यर्थ: — ञ.
[12] पा. सू. १. ४. १७.
[13] परिभाषा ६२.
[14] पा. सू. १. ४. १७.

[1]'सुप्तिङन्तम्' इत्यपि, [2]ततः सर्वनामस्थाने सुबन्तस्य पदसंज्ञानिषेधो मुधा स्यात्। तथाप्युत्तरार्थतया सुबन्तमित्यनुवर्तमानस्येहानुवर्तनं नान्तरीयकं संभाव्यत इति न तस्य [3]'अनन्तरस्य' इति न्यायबाधने सामर्थ्यमिति। **योगेति**। तत्सामर्थ्यादेव [4]'अनन्तरस्य' इति नाश्रीयत इति भावः। ननु यदि 'सर्वनामस्थानेऽयचि' इति सूत्रविन्यासः, ततस्तेन पदसंज्ञा [5]विधीयेत। तथा च [6]'स्वादिषु' इति सिद्धायां पदसंज्ञायां नियमार्थमेतत् स्यात् — सर्वनामस्थानेऽयच्येवेति। ततश्च 'वाचौ वाचः' इत्यत्र नियमस्य सप्रयोजनत्वाद् योगविभागस्य च सर्वनामस्थानव्यतिरिक्ते स्वादौ पदसंज्ञार्थत्वात् 'परमवाचौ परमवाचः' इत्यादावनन्तरपदसंज्ञायां नियमेन निवर्तितायामपि प्रत्ययलक्षणेन सुबन्तमिति पदसंज्ञा स्यादेवेत्यत आह — **असर्वेति**। **यचीति**। पुरस्तादपकर्षस्योपयोगमाह — **हलादाविति**। **भाष्ये त्विति**। अर्थसिद्धोऽर्थ उक्त इत्यर्थः। तस्य च प्रयोजनं नञ्नः [7]'सर्वनामस्थानपदेन संबन्धो नास्तीति प्रदर्शनम्। भाष्ये **प्लुतविकार इति**। प्लुतसहितविकार इत्यर्थः। बहुसेचावित्यत्र सुबन्तात् पूर्वं बहुचि तत्सहितस्य प्रातिपदिकसंज्ञायां सुपो लुकि पुनः स्वाद्युत्पत्तौ प्रत्ययलक्षणेन पदसंज्ञायां कुत्वप्राप्तेः पदादादिरित्युक्तौ च प्रतिषेधाभावेन षत्वप्राप्तेः बहुसेचाविति न सिद्धचतीत्युक्तं भाष्ये। तत् सत्युत्तरपदत्वे चेत्यस्मिन् कुत्वप्राप्तिमात्रेण तस्मिंश्चासति षत्वप्राप्त्येत्यपिशब्दसहितेन 'पदादेर्नेत्युच्यमानेऽपि' इत्यनेनोक्तम्। तच्चोद्यं नञ्भावेन लाघवान्न्यासान्तरेऽप्याश्रीयमाणे तदवस्थमेवेति कथमित्यनेनोक्तमुपपादयति — **समासेति**। 'बहुच्पूर्वस्य च' इत्युक्तौ पदादेर्नेति षष्ठीतत्पुरुष एवेति द्रष्टव्यम्। 'द्वन्द्वेऽन्त्यस्य' इत्यस्य भाष्येऽझल्परं मध्यपदमुदाहर्तव्यम्, झलि पदत्वं विनापि कुत्वस्य सिद्धत्वात्। **मध्यमेति**। आदिव्यतिरिक्तसमासावयवे उत्तरपदशब्दस्य रूढिमाश्रित्यैतदुक्तम्। 'परमार्थतस्तूत्तरत्वस्य व्यवस्थितत्वात् समासान्त्यावयवे त्वर्थप्रतिप्रत्तिहेतौ योगरूढ उत्तरपदशब्दः। तथा च मध्यमे न मुख्यः, न च मुख्ये संभवत्यमुख्यग्रहणं न्याय्यमिति दूषयति — **मुख्ये त्विति**॥

[१, ४९३–४९८]

(**उद्द्योतनम्**) ननूत्तरस्य पदव्यपदेशे कर्तव्ये प्रत्ययलक्षणनिषेधे 'परमं सद्म' इत्यत्र परमशब्दादुत्तरस्य सद्मशब्दस्य प्रत्ययलक्षणनिषेधात् पदत्वाभावात् नलोपो न स्यात्, अत आह — **उत्तरपदमिति**। **पदव्यपदेशे** पदसंज्ञायाम्। न चैवं परमसद्मेत्यत्र नलोपो न स्यादिति वाच्यम्, तत्र समासादुत्पन्नविभक्त्या समुदायस्य पदत्वे प्रत्ययलक्षणनिषेधाभावेन समासपदान्तत्वेन तल्लोपासंभवादिति भावः। **समासार्थेति**। [9]'सन्महत्' इति समासविधौ 'सुप् सुपा' इत्यनुवर्तनादिति भावः। **तां** [10]'सुपो धातु' इति लुप्ताम्। **कुत्वादीनि** कुत्वघत्वादीनि। ननु भसंज्ञया [11]पदत्वबाधान्न कुत्वप्रसङ्गः, अत आह — **भसंज्ञेति**। **यस्मादिति**। [12]'यचि भम्' इत्यत्र 'यस्मात्' इत्यनुवर्तते। तथा च भिन्नावधिकतया भत्वेन पदत्वं न बाध्यत इत्यर्थः। **प्रागिति**। [13]'गति-

[1] पा. सू. १. ४. १४
[2] तस्य सर्वनाम — च.
[3] परिभाषा ६२.
[4] परिभाषा ६२.
[5] विधीयते — ञ.
[6] पा. सू. १. ४. १७.
[7] सर्वनामस्थानशब्देन — ञ.
[8] परमार्थस्तूत्तर — च, छ.
[9] पा. सू. २. १. ६१.
[10] पा. सू. २. ४. ७१.
[11] पदत्वाभावात् — म
[12] पा. सू. १. ४. १८.
[13] परिभाषा ७६.

कारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेः' इत्यङ्गीकारादित्यर्थः। ननु सेगिति [1]केवलाद्विचि षत्वनिषेधेऽपि[2] सोपपदाद्विचि षत्वं स्यात्, अत आह — **अनभिधानादिति**। [3]तदेवाह — **दधिषेचाविति**। **कर्ण इति**। वर्णवाचिनश्चिह्नवाचिनश्च परः, कर्णशब्दो बहुव्रीहावाद्युदात्त इति सूत्रार्थः। 'यद्यपदादिविधावित्युच्यते' इति भाष्येण प्रत्ययलक्षणप्रतिषेधस्यातिव्याप्तिश्चोद्यते, तदाक्षिपति — **नन्विति**। **स्वरश्चेति**। [4]"उत्तरपदादिः' इत्यधिकारादित्यर्थः। तथा च प्रतिषेधापवादात् स्वरसिद्धिरिति शङ्कार्थः। **न त्विति**। विधेः पूर्वमुत्तरपदादित्वे [5]स्थिते तस्य विधौ प्रतिषेधापवादः [6]दधिसेचावित्यादौ। अत्र स्वरविधिसमय एवोत्तरपदादित्वबुद्धिर्न प्रागिति भावः। नन्वेवं सूत्रं व्यर्थं स्यात्, अत आह — **सूत्रमिति**। नन्वसमासे [7]"स्वाङ्गशिटाम्' इति कर्णशब्दस्याद्युदात्तत्वं सिद्धमेव, अत आह — **कर्णशब्दादिति**। तथा चान्तोदात्तस्याद्युदात्तत्वं विधीयत इत्यर्थः। अस्मिन् सूत्रे 'बहुव्रीहौ' इति नान्वेति, 'उत्तरपदादिः' इत्यत्रोत्तरपदशब्दो यौगिको गृह्यत इति भावः। भाष्ये **यदि पुनरिति**। 'उत्तरपदत्वे चापदादिविधौ' इति त्यक्त्वेत्यर्थः। अस्मिन् पक्षे पूर्वदोषपरिहार इत्याह — **तेनेति**। **पूर्वस्मिन्** स्वरविधौ। **परत्र** षत्वनिषेधे। **पदेति**। ततश्चार्थात् 'षष्ठ्यन्तस्येग्विशेषणतया 'पदान्तस्येकः' इत्युक्तौ [8]'कुमार्यावित्यत्र शाकलप्रसङ्ग इति ज्ञेयम्। भाष्ये **सतीति**। [10]"सिन्नित्यसमासयोः शाकलप्रतिषेधः' इति वार्तिक इत्यर्थः। **प्रत्यासत्त्येति**। प्रत्ययाक्षिप्त[11]प्रकृत्येग् विशेष्यत इति भावः। विधानविवक्षायामपि नोक्तदोष इत्याह — **राजेति**। 'यदि पुनर्नलोपादिविधौ' इत्यत्र शाकलादिप्रसङ्गे निरस्तेऽपि दूषणान्तरमाह — भाष्ये **इह तर्हीति**। **उत्वविधाविति**। तथा च पदान्तस्य वकारस्योत्वमित्यर्थः। भाष्ये **अविशेषेण** उत्तरपदत्वे चापदादिविधावित्येव। [12]योगरूढिमभिप्रेत्याह — **समासे हीति**। केवलयोगेऽप्याह — **न चेति**। तथा च [13]वचनसामर्थ्यादिति [14]सुष्ठूक्तमित्यर्थः। **वाक्शब्दस्येति**। समासार्थविभक्त्या सुबन्तस्य वाक्शब्दस्य [15]भसंज्ञायां पदत्वाभाव इत्यर्थः। **संज्ञिनामिति**। न च श्रूयमाणसुबन्तस्य सर्वनामस्थानं परमिति प्रतिषेधाप्राप्तिरित्यर्थः। ननु परशब्दस्येष्टवाचित्वात् पूर्वविप्रतिषेधेन सुबन्तं पदमिति पदसंज्ञा स्यान्न निषेध इत्याशङ्क्याह — भाष्ये **प्रतिषेधाश्चेति**। कथमनेन पूर्वविप्रतिषेधनिरासः, अत आह — **विधीति**। विधेरुन्मूलनं निवर्तनम्, तद्रूपत्वात्। विधिप्राप्त्युत्तरकालं निषेधप्राप्तिर्न तु तयोर्युगपत्प्राप्तिरिति विप्रतिषेधासंभव इत्यनेनोक्तमिति ज्ञेयम्। 'असर्वनामस्थाने' इत्यस्य प्रसज्यप्रतिषेधत्वेऽपि [16]'परमवाक्' इत्यत्र नोक्तदोष इत्याह — भाष्ये **अप्राप्तेर्वेति**। यद्यपि [17]"यचि भम्' इत्यत्रानुवर्तमानं [18]'सुबन्तमित्येतत् 'असर्वनामस्थाने' इत्यत्राप्यनुवर्तत इति तस्यापि निषेधेन

---

[1] केवलात्पदाद्विचि — ऋ.
[2] अपिशब्दो नास्ति — म.
[3] 'तदेवाह — दधिषेचाविति' इति नास्ति — म.
[4] उत्तरपदादित्यधिकारादिति — अ.
[5] स्थितस्य विधौ — म.
[6] दधिसेचावित्यत्र स्वर — म.
[7] फिट्सूत्रम् २९.
[8] षष्ठ्यन्तमिग्विशेषणम्। पदान्तस्येत्यनुक्तौ — अ.
[9] राजकुमार्यावित्यत्रेति भावः।
[10] का. वा. ६. १. १२७–१.
[11] प्रकृतेर्विहित इति — म; प्रकृतेग्विशेष्यत इति — अ.
[12] योगरूढमभिप्रेत्याह — म.
[13] 'वचन' इति नास्ति — म.
[14] सूक्तमित्यर्थः — अ.
[15] भसंज्ञया पदत्वाभावः — म.
[16] परमदिवेत्यत्र — अ.
[17] पा. सू. १. ४. १८.
[18] सुबन्तस्येत्येतत् — अ, म, ऋ.

भाव्यम्, आनन्तर्याविशेषात्, तथापि स्वस्थानापेक्षया [1]'अनन्तरस्य' इति परिभाषा, [2]न त्वनुवृत्त्यपेक्षयानन्तरस्येत्याश्रीयत इति भावः। भाष्ये **यद्येवमिति**। समासार्थविभक्त्या पदत्वात् कुत्वं स्यादित्यर्थः। **योगेति**। तद्बलादेव [3]'अनन्तरस्य' इति नाश्रीयत इति भावः। ननु 'सर्वनामस्थानेऽयचि पदम्' इति यथाश्रुतभाष्ये 'स्वादिषु' इति सर्वत्र पदसंज्ञायां नियमार्थमिदम् — [4]सर्वनामस्थानेऽयच्येव [5]पदसंज्ञेति। तेन 'वाचौ, वाचः' इत्यत्र न पदकार्यम्। तथा च 'परमवाचौ' इत्यादौ सुबन्तं पदमिति पदसंज्ञाया नियमेनाव्यावर्तनाद्दोषतादवस्थ्यम्। किं च 'अयचि' इति पदभेदलभ्योऽकारः, असर्वनामस्थान इत्यत्रत्यो वा। नाद्यः, 'सर्वनामस्थानेऽयचि' इति भाष्यविरोधात्। न द्वितीयः, पूर्वेण समस्तस्योत्तरेणान्वयायोगात्, अत आह — **असर्वनामेति**। [6]'अमानोनाः प्रतिषेधे' इति नञर्थस्याकारस्य [7]केनाप्यसमस्तस्य क्रियया संबन्ध इत्यर्थः। उत्तरपदेन यचीत्यस्यान्वयमुक्त्वा वाक्यार्थमाह — **तेनेति**। **हलादाविति**। तेन [8]'परमवागिति सिध्यति'। पर्यवसितार्थकथनपरतया भाष्यं संगमयति — **भाष्य इति**। भाष्ये **प्लुतविकार इति**। प्लुतसहितो विकारः [9]'एचोऽप्रगृह्यस्य' इति विहितः। ननु 'बहुसेचौ' इत्यत्र षत्वनिषेधार्थमेव 'उत्तरपदत्वे च' इत्युक्तम्। [10]तत्र 'कथं बहुसेचौ' इति प्रश्नस्य कोऽभिप्रायः, अत आह — **समासेति**। बहुचः प्रत्ययत्वात् समासाभावः, अत एव 'पदादादिः' इत्यपि न संभवतीति प्रश्न इत्यर्थः। भाष्ये **बहुच्पूर्वस्येति**। असमासेऽपि यौगिकमुत्तरपदत्वं संभवति, पदस्यादिरिति षष्ठीसमास एवेति 'बहुसेचौ' इत्यत्र षत्वनिषेधः संभवतीत्यर्थः। [11]'बहुच्पूर्वस्य' इत्यादि नियमान्तरपरतया [12]वा व्याख्येयम्। वार्तिकस्य [13]नियमार्थत्वमाह — **उत्तरेति**। 'उत्तरपदत्वे चापदादिविधौ' इति वार्तिकेनेत्यर्थः। **अन्त्यस्यैवेति**। न तु मध्यमस्येत्यर्थः। [14]'ननु मध्यमस्योत्तरपदत्वाभावादेव प्रतिषेधाप्राप्तेः 'अन्त्यस्य' इति व्यर्थम्, अत आह — **मध्यमेति**। यद्यपि भाष्योदाहरणे मध्यमस्यापदत्वेऽपि झल्परत्वेनैव कुत्वं सिध्यति, तथापि 'वाक्स्रुग्रुचम्' इत्युदाहार्यम्। **मुख्य इति**। समासान्तपद एवोत्तरपदशब्दो मुख्यः, अन्यत्र गौण इत्यर्थः। **एतत्** 'द्वन्द्वेऽन्त्यस्येति वक्तव्यम्' इत्येतत्॥

[१, ४९३–४९८]

(रत्नप्रकाशः) उत्तरपदत्व इति। उत्तरशब्देनोत्तरपदशब्दैकदेशेन समासचरमावयव उच्यते। तस्य पदादिविधिभिन्नविधिविषये पदत्व आश्रीयमाणे लुमता कृतः प्रत्ययलोपो न स्थानिवत् संज्ञां लभत इति वक्तव्यमित्यर्थः। अथवा अपदादिविधौ कर्तव्ये समासचरमावयवस्य पदत्वं प्रत्ययलक्षणेन नेति वाच्यमित्यर्थः। **परमवाचेति**। परमा वाक् तया, परमया वावेति वा विग्रहेऽन्तर्वर्तिनीं प्रथमां तृतीयां वा विभक्तिमाश्रित्य पूर्वपदस्येवोत्तरपदस्यापि पदत्वे [15]'चोः कुः' इति कुत्वं स्यादिति भावः।

---

[1] परिभाषा ६२.
[2] न त्वनुवृत्त्यपेक्षयानन्तर्यस्येत्याश्रीयत इति — म.
[3] परिभाषा ६२.
[4] 'सर्वनामस्थाने' इति नास्ति–म.
[5] पदमिति — अ.
[6] 'अ, मा, नो, न,' एतान्यव्ययानि प्रतिषेधरूपेऽर्थे वर्तन्त इति निघण्टुवचनस्यार्थः।
[7] केनाप्यसमर्थस्य — म.
[8] परमवागित्यादि सिध्यति — अ.
[9] पा. सू. ८. २. १०७.
[10] तदत्र — ऋ.
[11] बहुच्पूर्वपदस्येत्यादि — अ.
[12] वाशब्दो नास्ति — अ.
[13] नियममाह — म.
[14] 'ननु' इति नास्ति — म, ऋ.
[15] पा. सू. ८. २. ३०.

समुदायतृतीयाप्रयुक्ता तु भसंज्ञा समुदायस्यैव, न त्ववयवस्य। अवयवतृतीयाश्रितापि भसंज्ञावयवस्य नास्ति, प्रत्ययलोपस्याल्विधौ वर्तमानाजादिसंज्ञाभावत्। **दधिसेचाविति।** षष्ठीसमासः। उपपदसमासे हि प्राक् सुबुत्पत्तेः समासे सेच्छब्दस्य पदसंज्ञाप्रसक्तिरेव नास्तीति कुत्वेन भाव्यमेव — दधिषेक्, इति। एतेन 'अनभिधानात् सोपपदाद्विजभावाद् दधिषेचावित्यादिप्रयोगो न' इति निरस्तम्। 'दधिसेचः' इति भाष्योदाहरणस्य षष्ठीसमासपक्षे उपपन्नत्वेन [1]तत्रानभिधानकल्पनायां मानाभावात्। **उत्तरपदाधिकारो न प्रकल्पेतेति।** [2]उत्तरपदमुत्तरपदपदं च सुप्तिङन्तमिति मन्यते। वस्तुतस्तूत्तरपदशब्दस्य समासचरमावयवे रूढेराश्रितत्वेन सुबन्तता विनैवोत्तरपदसंज्ञास्तीति न काप्यनुपपत्तिः। एतेन "नन्वपदादिविधावित्युच्यते, स्वरश्चायं पदादिविधिः। ककारोऽत्रादिः, न त्वकार इत्यदोषः। स्वरविधौ व्यञ्जनमविद्यमानवत्, न त्वादिव्यपदेशे। सूत्रं चासमासार्थं स्यात्। कर्णशब्दादर्शआदित्वादचि कृते 'शुक्लः कर्णः' इत्याद्युदात्तत्वं यथा स्यात्" इति निरस्तम्। [3]"सात्पदाद्योः' इत्येवात्र स्वरविधौ पदादिशब्दस्यार्थवतोऽनिर्देशेन पदादिशब्दसंबन्धिविधिनिषेधस्यात्राप्रसक्तिरिति शङ्कितुराशयसंभवेनोत्तरपदाधिकारे तदन्तविधेरपि सत्त्वादपदादिपदेन तस्यापि परामर्शेन 'ननु' इत्याद्याक्षेपासंभवात्। 'अपदादिविधौ' इति प्रतिषेधस्य पदाद्याश्रयविधिविषयत्वेन [4]"कर्णो वर्णलक्षणात्' इत्यादिस्वरविधेः पदादिविधित्वानपायेन तत्र कर्तव्ये प्रतिषेधसंभवेन 'ककारोऽत्रादिः' इत्यादेः समाधानस्याप्यसंबद्धप्रलापत्वात्। 'एवमादिविधिर्न सिध्यति' इत्येतावन्मात्रस्य दूषणस्य स्पष्टतयोक्तत्वेन 'सूत्रं चासमासार्थं स्यात्' इत्याद्यत्यन्तासंबद्धाशयकल्पनानौचित्याच्च। **नलोपादिविधाविति।** [5]"न लोपः प्रातिपदिकान्तस्य' इत्येवमादौ [6]"वाक्यस्य टेः प्लुत उदात्तः' इत्यतः प्राचीन इत्यर्थः। तथा चोत्तरपदाधिकारः प्रकल्पत इति भावः। **शाकलं प्रसज्येतेति।** कुमारीशब्दस्यान्तर्वर्तिविभक्त्या पदत्वादिति भावः। **दधि अधुनेति।** 'अधुना' इति प्रत्यय इदमो विहितः। [7]'इदम इश्', [8]"यस्य' इति लोपः। **यस्माद्य इति।** प्रत्यासत्त्येति भावः। ननु तर्हि 'राजकुमार्यौ' इत्यत्र स दोषस्तदवस्थ एव, औकारविभक्तेः कुमारीशब्दादविहितत्वादिति चेन्न, अवयवावयवः समुदायस्याप्यवयव इति कुमारीशब्दस्य विधीयमानः शाकलह्रस्वः समुदायस्यापि भवत्येवेति समुदायनिषेधेनैवावयवनिषेधसिद्धेः। एतेन "'राजकुमार्यौ' इत्यत्र यद्यपि समुदायाद्विहितः, तथाप्यवयवादप्यसौ विहित इति बुद्धिर्भवत्येव, समुदायद्विर्वचनेऽवयवद्विर्वचनबुद्धिवत्" इति कैयटो निरस्तः। उच्चारणस्य लौकिकस्यानुभवसिद्धस्य भिन्नावयवावयविसाधारण्यसंभवेऽपि शास्त्रीयस्य विधानस्य तत्समाश्रयणानौचित्यात्। अन्यथा 'परमवाचा, परमगोदुहा' इत्यादौ कुत्वधत्वाद्यापादनमयुक्तं स्यात्, समुदायविभक्त्यावयवस्यापि भसंज्ञापत्तेः। **अस्तु तर्हीति।** 'उत्तरपदत्वे चापदादिविधौ' इत्येतावदेव वचनमस्त्विति भावः। **वचनादिति।** निरवकाशेन तेनास्य निषेधस्य बाधनं भविष्यतीति भावः। वस्तुतस्तु पदसंज्ञाभावेऽप्युत्तरपदाधिकार उपपन्न इत्युक्तमेव। एतेन 'समासे ह्युत्तरपदं भवति। न च कर्णशब्दोऽच्प्रत्ययान्तोऽस्ति। अर्शआदिषु हि स्वाङ्गाद्धीनादिति पठ्यते। तेन खञ्जादिभ्य एव हीनस्वाङ्गवाचिभ्योऽच्प्रत्ययो भवति। न च कर्णशब्दो हीनस्वाङ्गवाची' इति निरस्तम्। समासावयवोत्तरपदस्याधिकारासंभवे उत्तरं पदमुत्तरपदमिति यौगिकमेवोत्तरपदं ग्राह्यमिति 'असमासार्थं स्यात्' इति शङ्काया एव तत्कृतायाः प्रबलत्वात्।

---

[1] तत्राभिधान — ब.
[2] 'उत्तरपदत्वे' इति वार्तिके उत्तरेति पदम्, 'उत्तरपदादिः' इत्यत्रोत्तरपदपदं चेत्यर्थः।
[3] पा. सू. ८. ३. १११.
[4] पा. सू. ६. २. ११२.
[5] पा. सू. ८.२. ७.
[6] पा. सू. ८. २. ८२.
[7] पा. सू. ५. ३. ३.
[8] पा. सू. ६. ४. १४८.

अर्शआदेराकृतिगणत्वेन कर्णशब्दादप्यचः संभवाच्च। कर्णशब्दस्याच्प्रत्ययान्तत्वाभावेऽपि [१]'स्वाङ्गशिटामदन्तानाम्' इति प्राप्ताद्युदात्तत्वस्य [२]'कर्णो वर्णलक्षणात्' इत्यनेन नियमसंभवाच्च। तस्माद्यर्तिकचिदेतत्। तदेवं वचनं निर्दुष्टतया व्यवस्थाप्य भगवान् स्वसामर्थ्यं प्रकटयितुमुपक्रमते — **तत्तर्हीति**। **सुप्तिङन्तमिति**। यस्मात् सुप्तिङ्विधिस्तदादि सुबन्तं तिङन्तं च पदं भवतीत्युक्ते तदादिसुबन्तशब्देन शब्दतन्त्ररूपेण तदाद्यवयवसुबन्तमपि पदसंज्ञं भवतीत्यर्थलाभः। यद्यपि तदाद्यवयवस्य सुबन्तस्य पदत्वं सिद्धमेव, तथापि [३]'यचि भम्' इति सूत्रे तदाद्यवयवपरं तदादिसुबन्तमिति नेतुमयमुपायो रचित इत्यत्रानर्थक्येऽपि तस्य [न] दोषः। एवं च [४]'सिति च' इत्यत्र तदाद्यवयवसुबन्ताप्रसिद्धावपि न दोषः। वस्तुतस्तु मण्डूकप्लुत्यैव तदादिपदं सुबन्तपदं च [५]'यचि भम्' इत्यत्रानुवर्त्य तदाद्यवयवस्य सुबन्तस्य भसंज्ञा विधीयत इत्यत्र तात्पर्यमिति न काप्यनुपपत्तिः। **असर्वनामस्थान इतीति**। प्रसज्यप्रतिषेधं मन्यते। **सत्येतदिति**। अवधिभेदादिति भावः। **बलीयांस इति**। प्रापकविशेषनैरपेक्ष्येण प्राप्तिमात्रावलम्बनेन प्रवृत्तेरिति भावः। तथा च [६]'सुप्तिङन्तम्' इति प्राप्तायां अपि पदसंज्ञाया निषेधो भवतीति भावः। **अप्राप्तेर्वेति**। प्रसज्यप्रतिषेधपक्षेऽपि तस्य प्रतिषेधस्य [७]'सुप्तिङन्तम्' इति पदसंज्ञाविषये प्राप्तिर्नास्तीति कृत्वा वेष्टसिद्धिरिति भावः। **परमवाचाविति**। कुत्वं स्यादिति भावः। एवं 'राजकुमार्यौ' इत्यादौ शाकलह्स्वादि स्यादिति ज्ञेयम्। **सुप्तिङन्तं पदमितीति**। "सुप्तिङन्तम्' इति सूत्रे तदादि सुबन्तं चेत्यंशेनेति भावः। **सर्वनामस्थाने अयचीति**। 'असर्वनामस्थाने' इत्यत्र नञ् क्रियान्वयीति तत उत्कृष्यान्यत्र निवेशितः। तथा चायमर्थः — यजादौ सर्वनामस्थाने पूर्वं पदसंज्ञकं न भवतीति। यकारग्रहणमुत्तरार्थमिति तदादिसर्वनामस्थानाप्रसिद्धावपि न दोषः। **असर्वनामस्थान इति**। सर्वनामस्थाने न भवतीत्यर्थः। **यदि तर्हीति**। स्वादौ पूर्वं पदसंज्ञमित्याश्रीयते यदि, तर्हीत्यर्थः। **वाक्यपदयोरिति**। तत्र पदान्तग्रहणं वाक्यान्तोपलक्षणतया व्याख्यास्यामीति भावः। तथा च गौरित्यौकारस्य पदान्तत्वेऽपि वाक्यान्तत्वाभावान्न दोष इति भावः। 'राजा' इत्यादौ तु नलोपस्यासिद्धत्वात् पूर्वं हल्ङ्यादिलोपः सिध्यतीति न दोषः। **इह तर्हीति**। 'सर्वनामस्थाने अयचि' इति निषेधाद्दोष इति भावः। वार्तिककारमते 'अपदादिविधौ' इत्युक्तेर्न दोषः। **पदादादिरिति**। अस्मिन् पक्षे उपपदसमासेऽपि 'दधिसेचौ' इत्येव प्राप्नोति। वार्तिकमते तु 'दधिषेचौ' इति भेदः। **बहुसेचाविति**। वार्तिककारमते तु सेच्शब्दस्यान्तर्वर्तिविभक्त्याश्रया पदसंज्ञास्तीति पदस्यादिः सकार इति षत्वनिषेधः सिध्यतीति भावः। तदेवं सूत्रकारपक्षपातेन भगवता महति यत्ने कृतेऽपि निर्वाहो न जातः। यत्तु 'कौस्तुभकृतोक्तम् — "[१०]'सात्पदाद्योः' इत्यत्र 'सातेः, बहुच्पदाभ्याम्' इति, आदिशब्देन बहुज् निमातव्यः" इति। तन्न, सूत्रभङ्गे कृते सूत्रकारमतसमर्थनाभावात्। 'दधिषेचः' इति षत्वस्यासिद्धेर्वैषम्यस्य दुर्निवारत्वाच्च। यदप्युक्तं तेनैव 'वार्तिककारमतेऽपि बहुच्पूर्वस्य पदसंज्ञा वक्तव्या, पदादिविधावेव न पदान्तविधावित्येवमर्थम्' इति। तन्न, 'उत्तरपदत्वे च' इत्यत्रोत्तरशब्दस्य वृत्तिघटकचरमावयवलक्षकताश्रयेण निर्वाहात्। तदेवं सूत्रकारमते निर्वाहाभावात् तदुपेक्ष्य वार्तिककारमतापेक्षया [११]नञ्ननुवृत्त्या

---

[१] फिट्सूत्रम् २९.
[२] पा. सू. ६. २. ११२.
[३] पा. सू. १. ४. १८.
[४] पा. सू. १. ४. १६.
[५] पा. सू. १. ४. १८.
[६] पा. सू. १. ४. १४.
[७] पा. सू. १. ४. १४.
[८] पा. सू. १. ४. १४.
[९] श. कौ. पुटम् २६९.
[१०] पा. सू. ८. ३. १११.
[११] सूत्रान्नञोऽननुवृत्तिः, 'अपदादिविधौ' इत्यत्रत्यनञ्स्त्यागश्चेत्यर्थः।

नञ्त्यागेन च किंचिल्लाघवमाश्रित्य वचनान्तरं पठति भाष्यकारः — **उत्तरपदत्वे च पदादिविधाविति**। भाष्यवार्तिककृन्मतसाधारण्येन पृच्छति मध्यस्थः — **कथं बहुसेचाविति**। सेच्छब्दस्य समासचरमावयवत्वाभावेन तत्र वचनद्वयस्याप्यप्रवृत्तेरन्तर्वर्तिविभक्त्याश्रितपदसंज्ञामाश्रित्य षत्वनिषेध इव कुत्वमपि स्यादिति भावः। मतद्वयसाधारण्येनोत्तरमाह — **बहुच्पूर्वस्य चेति**। पदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं भवतीति शेषो भाष्यकृन्मते। वार्तिककृन्मते तु 'अपदादिविधौ लुमता लुप्ते प्रत्ययलक्षणं [न] भवति' इति। वस्तुतस्तु मतद्वये उत्तरशब्दस्य वृत्तिचरमावयवलक्षकत्वेनैव सिद्धे 'बहुच्पूर्वस्य च' इति वचनं न कर्तव्यम्। उत्तरशब्दस्य समासचरमावयवे रूढत्वमविद्वान् कश्चिदुक्तमतद्वयसाधारण्येन वचनान्तरं कर्तव्यमित्याह — **द्वन्द्वेऽन्त्यस्येति**। **वाक्स्रक्त्वचमिति**। वाक्शब्दापेक्षया स्रक्शब्दस्योत्तरपदत्वमिति मन्यते। तस्योत्तरपदत्वाभावादेव सिद्धमिति तद्व्यावृत्तिफलकनियमार्थं 'द्वन्द्वेऽन्त्यस्य' इति वचनं न कर्तव्यमेव। ननु तत्र द्वन्द्वपूर्वपदद्वन्द्वे आश्रिते स्रक्शब्दस्याप्युत्तरपदत्वं सिद्धमिति चेन्न, तत्र स्रक्शब्दस्य पदत्वाभावेऽपि वाक्स्रक्शब्दस्य पदत्वमादाय [1]कुत्वसिद्धेः॥

[१, ४९३–४९८]

(**नारायणीयम्**) उत्तरपदशब्दात् त्वप्रत्ययो नेत्याह — **पदत्व इति**। यदि तस्मात् त्वः स्यात् तदा तस्याशास्त्रीयत्वात् पदत्वद्वारकं शास्त्रीयत्वं वर्णनीयमिति त्वान्तसमासो युक्ततर इति भावः। पदशब्दस्य संज्ञाशब्दत्वात् प्रवृत्तिनिमित्ताभावात् तस्मिन् विधीयमानो भावप्रत्ययः कथमित्यत्राह — **पदेति**। स्वरूपनिमित्तकत्वान्निमित्ताभावोऽसिद्धः, स्वरूपं च व्यपदेश इति भावः। [2]उत्तरस्य पदव्यपदेशे कार्य इत्युक्ते कस्मादित्यपेक्षा स्यात्, अत आह — **उत्तरपदमिति**। एवं तु रूढित्वेनावध्याकाङ्क्षा नेति भावः। असत्यस्मिन्निषेधे पदस्येति कुत्वादीनि स्युरित्युक्तम्, तत् कथम्, [3]'सन्महत्' इति समासे पूज्यमानार्थत्वस्यैवोत्तरपदविशेषणत्वादित्याशङ्क्य सर्वत्र समासविधौ सुबन्तत्वमौत्सर्गिकं विशेषणमित्याह — **समासार्थेति**। भसंज्ञया बाधमाशङ्क्याह — **भेति**। [4]'अन्येभ्योऽपि दृश्यन्ते' इति विज्विधौ 'कर्मणि सुपि' इत्यधिकारान्निरुपपदाद्विजलाभात् सोपपदाच्चास्मिन्नुपपदसमास इत्यसुबन्तेन समासात् कथं सेचः पदत्वम्, अत आह — **दध्न इति**। दृशिग्रहणात् निरुपपदादपि विजिति भावः। यदा तर्हि सोपपदाद्विच् तदा किं 'दधिषेचौ' इति प्रयोक्तव्यम्, नेत्याह — **अनभिधानादिति**। अनभिधानं द्विविधम् — अप्रयोगलक्षणमर्थान्तराभिधानलक्षणं[5] चेति। तदिह कीदृशमित्यपेक्षायामाह — **दधीति**। **स्वरश्चायमिति**। न हि पदादिव्यपदेशपूर्वको विधिः, किं तु पदादेर्भवन् विधिरिति भावः। उत्तरपदादिव्यपदेशोऽप्यस्तीत्यन्ये। पदादौ भवत्वमेवास्य विधेरसिद्धमित्याह — **ककार इति**। ननु व्यञ्जनस्याविद्यमानत्वात् कथं नाकारस्य पदादित्वम्, अत आह — **स्वरेति**। **न त्विति**। लौकिकत्वात्। न हि स्वरविधिनिमित्तं स्वरविधिशब्देनोच्यते, मुख्यसंभवादजादेरुत्तरपदस्य स्वरविधानेऽधिकारावकाश इति भावः। नन्वधिकारस्य सावकाशत्वेऽप्यस्य सूत्रस्यानवकाशत्वमित्यत आह — **सूत्रं चेति**। रूढ्यसंभवे योगग्रहणात्। ननु वाक्ये [6]'स्वाङ्गशिटामदन्तानाम्' इत्यन्यथासिद्धमाद्युदात्तत्वमित्यत

---

[1] कुत्वासिद्धेः — ब.
[2] उत्तरपदस्य व्यपदेशे — ग.
[3] पा. सू. २. १. ६१.
[4] पा. सू. ३. २. ७५.
[5] अर्थान्तराभिधानेन विवक्षितार्थाभिधानाभावो विवक्षितः स्यादिति भाति।
[6] फिट्सूत्रम् २९.

आह — **कर्णेति** । विशेषणद्वयव्यावर्त्यमाह — **तेनेति**। **पूर्वस्मिन्** स्वरविधौ । [1]**परत्र** षत्वनिषेधे। अस्य पदकार्यत्वे प्रत्ययलक्षणप्रसङ्गो दोषो वाच्यः, तदेव कुतः, तत्राह — **इक इति**। नन्विदमोऽश्भावो, [2]धुनाप्रत्ययश्च निपात्यते, अतः कथमत्र प्रत्ययत्वम्, अत आह — **अधुनेति**। विशेषलाभनिमित्तमाह — **प्रतीति** । **बुद्धिवदिति**। यद्यवयवद्विर्वचनबुद्धिर्न स्यात् तदा [3]शास्त्राहानेः समुदायद्विर्वचनमिति वक्तुं न युज्येत । अवयवद्विर्वचने समुदाये [4]तद्बुद्ध्यभाववत् समुदायद्विर्वचनेऽवयवे तद्बुद्ध्या भावस्य तुल्यत्वात् । वाक्ये वचनं चरितार्थमित्युक्तम्, अत आह — **समास इति**। रूढिप्रच्यावनाद् वरं निषेधबाधनमिति भावः । यद्वा, उत्तरपदशब्देन समासभागविशेषस्य लक्षणा भविष्यतीति निषेधोऽपि न बाध्यः। किं च योगाश्रयेऽपि वचनानर्थक्यतादवस्थ्यमित्याह — **न चेति** । यस्माद्वचनादुत्तरपदाधिकारप्रकृप्तिरित्युक्तं [तत्] तच्छब्देन न परामृश्यते, तस्य सर्वथा वक्तव्यत्वादित्यभिप्रेत्याह — **उत्तरेति** । 'अनुवृत्तिः करिष्यते' इत्यत्र 'यस्माद्विधिः' इत्यस्यानुवृत्तिर्नाभिमता, तदनुवृत्त्यैव वाक्छब्दस्य भत्वाभावेन पदत्वापादनात् । किं तु सुबन्तानुवृत्तिरित्यभिप्रायेणाह — **ततश्चेति** । सुबन्तानुवृत्तौ सत्यां भसंज्ञावाक्यस्यायमर्थो भवति — यस्माद्यजादिविधिः स समुदायो भसंज्ञो भवति, अत्र च समुदाये यदवयवभूतं सुबन्तं तच्च भसंज्ञं भवति यजादावनन्तर इति। ततश्च परमवाक्छब्दस्यापि भत्वं वाक्छब्दस्यापीति तुल्यावधिकतया भसंज्ञया प्रत्ययलक्षणेन प्राप्ता [5]सुबन्तत्वेन वाक्छब्दे पदसंज्ञा बाध्यते। पर्युदासे सुबन्तमिति [6]पदत्वस्य लब्धव्यत्वादाह — **प्रसज्येति**। प्रसज्यप्रतिषेधेऽपि [7]"अनन्तरस्य विधिर्वा' इति सुबन्तत्वप्रयुक्त[8]पदत्वस्यानिवारणमाशङ्क्याह — **ततश्चेति** । प्रसज्यप्रतिषेधाश्रयणसामर्थ्यात् "अनन्तरस्य विधिर्वा' इति न्यायो नावतरतीति भावः। एवमपि समुदाये संज्ञाद्वयं निवार्यताम्, वाक्छब्दस्य त्वन्तर्वर्तिविभक्त्याश्रयं भविष्यति पदत्वम्, अत आह — **यस्मादिति**। विधिसमानयोगक्षेमत्वान्निषेधस्य विधिवत् समुदायावयवयोर्निषेधनिवेश इति भावः। न च भसंज्ञार्थैव सुबन्तानुवृत्तिरिति प्रमाणादृते सुज्ञानम्। न चैकस्मिन् वाक्ये सुबन्तग्रहणस्य विधिनिषेधकार्यद्वयसंबन्धायोगः, तयोरेकवाक्येऽयोगेन वाक्यभेदस्यावश्यकत्वात्। ननु सर्वनामस्थानमेवात्र नास्ति, कुतो निषेधशङ्का, तत्राह — **प्रत्ययेति**। सति प्रत्यये निषेधस्य स्वादिपदत्वनिवारकत्वम्, न तु सुबन्तपदत्वनिवारकत्वमिति कथम्, अत आह — **अवधीति**। यथा 'वाचौ' इत्यादौ चान्तावधावेका संज्ञा, द्वितीया त्वौदन्ते । न चौदन्ते प्राप्तायां निषेधप्रसक्तिरिति सा भवति । भाष्याक्षरार्थः प्राङ् मया निगदितः । किमिदं वचनम्, न, न्यायोऽयमित्याह — **विधीति**। 'अप्राप्तेर्वा' इत्यादेरयमर्थः — निषेधस्य व्यवहितविधिविषयेऽप्राप्तेः [इति]। एतदेव वस्तु भङ्ग्यन्तरेणाह भाष्यकारः — **अथवेति**। न च प्रसज्यप्रतिषेधाश्रयणसामर्थ्यादुभयबाधः संनिधेर्लिङ्गप्राबल्यादिति वाच्यम्, आश्रयणशब्देन व्याख्यानस्याभिमतत्वे व्याख्यानसामर्थ्यस्य सौत्रसंनिधिबाधनाक्षमत्वात्। आश्रयणशब्देन सूत्रकृद्विवक्षाभिप्रेता चेत्, न, विवक्षागमकप्रमाणाभावात्। अतोऽनन्तरबाधो न्याय्य इति। वस्तुतस्तु विशदं सामर्थ्यं दर्शयितुमिदं नोक्तम्। अत एव हरदत्तमिश्रैरिदमेव सामर्थ्यमुक्तम्। 'यचि' इत्यपकर्षादेव 'परमवाक्' इति निषेधाभावसिद्धे-

---

[1] परतः — ग.
[2] 'धुना' इत्यस्यानन्तरं चकारोऽधिको दृश्यते — ग.
[3] 'शास्त्रहानेः' इत्युचितं भाति।
[4] तद्बुद्ध्याभाववत् — ग.
[5] सुबन्तत्वेन प्राप्तेत्यन्वयः।
[6] पदस्य — ग.
[7] परिभाषा ६२.
[8] पदस्यानिवारणम् — ग.
[1] परिभाषा ६२.

र्योगविभागोक्तिः किमर्थेत्याशङ्क्य 'परमवाचौ' इत्यादौ संज्ञाद्वयनिषेधसिद्धय इत्याह — **योगेति**। सति विभागे पर्युदासशङ्का नेत्याह — **नञ इति**। यद्वा, भाष्ये नञपकर्ष उक्त इति भ्रमं निरस्यति — **असर्वेति**। समुच्चयशङ्कां वारयति — **यचीति**। भत्वविधानादेव यचि पदत्वाभावसिद्धेः समुच्चयोऽनर्थकः। यकारादिसर्वनामस्थानासंभवाद्विशेषणत्वेनान्वयायोगमाशङ्क्य यग्रहणमुत्तरार्थमिति नानुपपन्नं किंचिदित्याह — **तेनेति**। यदि तर्हि 'परमवाचौ' इत्यादेरत्र परिहारस्तर्हि योगविभागमात्रं वर्ण्यमित्याशङ्क्य परमवागिति प्राक् परिहृतस्येदानीं परिहारात् तत्परिहाराय 'यचि' इत्यस्यापकर्षणमुक्तमित्याह — **हलादाविति**। **भवत्येवेति**। 'स्वादौ' इति वा 'सुबन्तम्' इति वा। **वस्तुमात्रमिति**। नञो यजन्वयविवक्षायां नियममुखेन निषेधः प्रतिवक्तव्यः, भत्वविधौ चानपकर्षेणार्थो वर्ण्य इति गौरवमिति भावः। वाक्यान्तिमपदान्तत्वविवक्षायामत्र प्लुतविकारानिराकरणमित्याशङ्क्य वाक्यान्तत्वे सति पदान्तत्वं विवक्षितमिति तन्निवारणमित्याह — **गौरिति**। भाष्ये **उच्यमानेऽपि न सिध्यतीति**। अपिशब्दात् पदस्यादिरिति विज्ञानेऽपि न सिध्यतीत्यर्थः। [1]अनुवृत्तिकरणेन हि समासेषूत्तरपदस्य पदत्वं नास्ति। तदभाववदत्रापि नास्त्युत्तरावयवस्य पदत्वम्। ननु 'सेचौ' इति पदम्, ततः प्राग्बहुच्, तत् कथं न पदस्यादिः। नैतत्, प्राक्तनसुपो लुप्तत्वात्। समुदायादन्यस्य सुप उत्पत्तेः। अर्थवत्त्वेन हि प्रकृतिप्रत्ययसमुदायस्यात्र प्रातिपदिकत्वमिति प्रातिपदिकसंज्ञायां वक्ष्यते। ततश्च समासकल्पोऽयमिति तद्वदत्रोत्तरभागस्यापदत्वम्। मन्दानुग्रहायानुवृत्त्या विना वचनेनाभिमतं साधयितुमाह — **एवं तर्हीति**। अनुवृत्तावपि त्वभिमतसिद्धिरस्ति। [2]'सात्पदाद्योः' इत्यत्र 'सातेर्न' इत्युक्त्वा 'बहुच्पदाभ्यां न' इति वक्तव्यत्वात्। आदिग्रहणस्य स्थाने बहुज्ग्रहणाद् गौरवाभावात्। 'बहुसेचौ' इत्यत्रापि समासकल्पत्वात् पदादिविधावेवेति नियमात् षत्वनिषेधे प्रत्ययलक्षणस्य, कुत्वे तदभावस्य च सिद्धत्वात् प्रश्नः कथमित्यत्राह — **समासाभावादिति**। समासे ह्युत्तरपदव्यवहार इति अत्र तदभावादुत्तरपदविषयकनियमाभावात् प्रत्ययलक्षणेन कुत्वप्रसङ्गः। नोत्तरपदत्वमिति पाठः, न तु नोत्तरस्य पदत्वमिति। ननु न समास एवोत्तरपदव्यवहारो रूढः, किं तु पदसमुदायात्मकप्रातिपदिके परभागस्य तद्व्यवहार इत्याशङ्क्य पदसमुदायात्मकत्वासिद्धिमाह — **नापीति**। यद्वा, न केवलं समासाभावादुत्तरपदत्वाभावः। अपि तूत्तरपदशब्दस्य संबन्धिशब्दत्वात् सति पूर्वस्मिन् पदे तद्व्यवहार इत्यत्र तदभाव इत्याह — **नापीति**॥

[१, ४९८–५०१]

(लघुविवरणम्) ननु स्थग्रहणेन कथं सविभक्तिकस्यादेशो लभ्यत इत्यत आह — **तिष्ठतिरिति**। 'इह चक्षुष्कामम्' इति भाष्यमनुपपन्नम्, लावस्थायामेव लुकि कृते [3]प्रत्ययलक्षणेनापि तिङन्तत्वाभावादित्यत आह — **परत्वादिति**। 'न लुमता तस्मिन्' इत्युच्यमानेऽपि 'अत्त्रयः' इत्यत्र [4]"कितः' इति स्यात्। न ह्ययं किति स्वर इत्यत आह — **अत्त्रय इत्यत्रेति**। **तद्धितस्यैवेति**। तद्धिताक्षिप्तेन प्रातिपदिकेन तस्यैव विशेषणादित्यर्थः। 'तद्विशेषणम्' इति भाष्यमनुपपन्नम्, सकारादिविशेषणत्वे [5]परस्मैपदस्य, विशिष्टं निमित्तं स्यात्, ततश्च विशेषणस्यापि निमित्तत्वादित्यत आह — [6]**विशेषण एवेति**। उपलक्षणं परस्मैपदग्रहणं न तु विशेषणमिति भावः।

---

[1] सुबन्तमित्यस्येत्यादिः।
[2] पा. सू. ८. ३. १११.
[3] प्रत्ययलक्षणेऽपि तिङन्तत्वाभावात् — ड, ढ.
[4] पा. सू. ६. १. १६५.
[5] परस्मैपदविशिष्टं — ड, ढ.
[6] तद्विशेषण एवेति — ढ, ण.

[१, ४९८–५०१]

(विवरणम्). 'आकारप्रकरणात्' इत्यस्य 'आत त्येतन्नियमार्थम्' इति व्याख्यानं संघटयति — **आकारस्येति**। [1]**प्रस्तावात्** आरम्भादित्यर्थः। जुसोऽप्रसङ्गे नियमार्थत्वं हेतुरित्यात इत्यस्यार्थसिद्धहेतुत्वमुपपादयितुम् 'आकारप्रकरणात्' इत्येतदित्यन्यथा व्याचष्टे — **अथवेति**। आत इति सिच इति च झेरेव विशेषणमिति [2]सिज्लुगन्तादिति लभ्यत इति भावः। [3]**अधिकरणत्वासंभवात्** उपश्लेषासंभवादित्यर्थः। षष्ठीचतुर्थीद्वितीया नोपलक्षणम्, किं तु विशेषणमिति परिहारान्तरमाह — **अथवेति**। युष्मदस्मदोरिति समुदायलक्षकमिति भावः। मुख्ये एव पदसमानाधिकरणे संभवत इति समुदायलक्षकत्वं न तयोरित्याह — [4]**अत्रेति**। यद्यपि द्वितीयायां न ते पदे इति तत्र ताभ्यां समुदायलक्षणा। तथा चैकरूप्यायान्यत्रापि लक्षणैव। तथापि परिहारान्तरमुक्तम् — **सर्वग्रहणमपीति**। तदुपपादयति — **अनेकेति**। **सर्वग्रहणमिति**। [5]'अनुदात्तं सर्वम्' इत्येतत्। **परत्वादिति**। सावकाशश्च लुक्, कृतेष्वपि तिबादिषु प्रवर्तनात्। **याजयामित्यस्येति**। चक्षुष्कामामित्यतिङः परत्वं चेत्यर्थः। **लुकि कृत इति**। नित्यत्वादिति भावः। **इडिति**। अङ्गाधिकारविहितकार्यत्वादिति भावः। **इट्प्रतिषेधः** न प्राप्नोतीत्यनुषङ्गः। **तद्धितस्यैवेति**। [6]'कितः' इत्यत्रानुवृत्तस्य तद्धितस्य विशेष्यत्वमिति न तदन्तविधिरित्यर्थः। ननु विशिष्टस्य निमित्तत्वे निमित्तत्वं विशेषणस्यापीत्यत आह — **विशेषण एवेति**। परस्मैपदेष्वित्युपलक्षणम्, न विशेषणमिति भावः॥

[१, ४९८–५०१]

(उद्द्योतनम्) 'आकारप्रकरणात्' इत्यस्य 'आत इत्येतन्नियमार्थम्' इति व्याख्यानं संगमयितुमाह — **आकारस्येति**। **प्रस्तावात्** आरम्भात्। [7]'जुसोऽप्रसङ्गे [8]'आतः' इत्यस्य नियमार्थत्वं हेतुः, तदुपपादनार्थत्वेन प्रकारान्तरेण व्याचष्टे — **अथवेति**। **प्रकृतत्वात्** अनुवर्तनात्। सिच इत्यनुवृत्त्या आत्सिजुभयपरत्वे लब्धे एकदोभयपरत्वासंभवात् सिज्लुकि प्रत्ययलक्षणेनोभयपरत्वं [9]संभवतीति भावः। इतिशब्दस्योपयोगमाह — **पदादिति**। **आधारत्वासंभवात्** उपश्लेषासंभवात्। **समये तिष्ठेति**। रामवाक्यम्। स्थग्रहणेन षष्ठ्यादीनां विशेषणत्वं लभ्यत इति व्याख्यानान्तरमाह — **अथवेति**। **युष्मदस्मदोरिति**। समुदायलक्षणेति भावः। **केवलयोरिति**। यद्यपि विभिक्तिलोपे प्रत्ययलक्षणेन केवलपदत्वं संभवति, तथापि [10]मुख्यस्य विभक्त्यन्तस्य [11]पदस्य ग्रहणे संभवति लाक्षणिकं पदं न गृह्यत इत्यर्थः। **तदवयवस्थं** विभक्तिस्थं, तद्विशिष्टमिति यावत्। **ते एव** विभक्तिरहिते एव युष्मदस्मदी इत्यर्थः। यद्यपि चतुर्थी[12]द्विवचनव्यतिरिक्ते पूर्वस्य न पद-

---

[1] 'प्रस्तावात्' इत्यस्यानन्तरम् 'आत इत्यस्य' इत्यधिकम् — ञ.

[2] सिजन्तादिति लभ्यत इति — च, छ; सिजन्तादादन्तादिति लभ्यत इति–अ.

[3] प्रदीपे 'आधारत्वासंभवात्' इत्यत्र 'अधिकरणत्वासंभवात्' इति पाठः स्वीकृतः।

[4] अत्र चेति — ट.

[5] पा. सू. ८. १. १८.

[6] पा. सू. ६. १. १६५.

[7] उसोऽप्रसङ्गे — ऋ.

[8] पा. सू. ३. ४. ११०.

[9] लभ्यत इति भावः — ऋ.

[10] मुख्यविभक्त्यन्तस्य — अ, म.

[11] 'पदस्य' इति नास्ति — म.

[12] 'द्विवचन' इत्यस्यानन्तरं 'बहुवचन' इत्यधिकम् — ऋ.

त्वम्, [1]द्वितीयायां तु[2] सुतराम्। तथा च तत्र समुदायलक्षणावश्यकत्वे सर्वत्रावैरूप्याय समुदाय-लक्षणैव युक्ता, तथापि समाधानान्तरमाह — भाष्ये **सर्वग्रहणमिति**। तदुपपादयति — **अनेकेति**। ननु 'याजयाम्' इत्यस्य तिङन्तत्वाभावात् कथं तस्य निघातः, कथं वा 'चकार', इत्यस्यानिघातः, अत आह — **परत्वादिति**। **लुकि** तिबादेरित्यर्थः। ननु 'अङ्गस्य' इत्युक्तावङ्गाधिकारः कथं लभ्यते, अत आह — [3]**स्वर्यत इति**। तथा च स्वरितलिङ्गेनाधिकारलाभ इत्यर्थः। **लुकि कृत इति**। नित्यत्वादिति भावः। [4]'क्रमेरिति'[5]प्रतीकं स्थलप्रदर्शनार्थम्। [6]प्रकृत्यन्वये हेतुमाह — [7]**कार्यस्येति**। विस्मरणशीलं प्रत्याह — [8]**ञ्निनिकित्स्वरा इति**। 'न लुमता तस्मिन्' इत्यस्याध्याहारेणान्वयमाह — **लुमतेति**। ननु 'अत्रयः' इत्यत्र [9]कित्तद्धितान्तस्योदात्तत्वं विधीयते, न तु प्रत्यये परतः पूर्वस्येति 'न लुमता तस्मिन्' इति प्रतिषेधाभावादन्तोदात्तत्वप्रसङ्गः, अत आह — **अत्रय इति**। **तद्धितस्यैवेति**। [10]'कितः' इत्यत्रानुवृत्तस्य [11]तद्धितस्य विशेष्यत्वेन विशेषणत्वाभावात् तेन तदन्तविधिर्नास्तीत्यर्थः। ननु विशिष्टस्य निमित्तत्वे विशेषणमपि निमित्तमेव, अत आह — **विशेषण एवेति**। व्यावृत्तावेवोपयोगः, व्यावर्तकत्वमुपलक्षणत्वेनापि संभवतीति न निमित्तत्वमित्यर्थः। ननु 'लुङि' इति विषयसप्तमी, न परसप्तमी। तेन वधाद्यादेशेषु न निषेधप्रसङ्गः, अत आह — **लुकेति**। यदि भावी लुङ् स्यात् तदा विषयसप्तमी स्यात्। लुप्तस्य प्रकृत्युपश्लेषरूपं विषयत्वं न संभवतीत्यर्थः। [12]**विषयापहारात्** विषयत्वापहारात्। भाष्ये **तच्चापीति**। सर्वस्वरो न सिध्यति, 'न लुमता तस्मिन्' [13]इत्यप्युत्सूत्रं [14]कर्तव्यमिति दोषद्वयोपन्यासः। द्वितीयं निराह — भाष्ये **न वक्तव्यमिति**। ननु स्वरितत्वेनाधिकारनिर्देश उक्तः, अत आह — **स्वरितत्वेति**। 'प्रतिज्ञास्वरिताः पाणिनीयाः' [15]इत्यप्रतिज्ञानादित्यनेनोक्तम्। अस्मिन् पक्षेऽपि सर्वस्वरासिद्धिं शङ्कते — भाष्ये **एवमपीति**। **वचनमिति**। सुपो लुक्यपि प्रत्ययलक्षणेन [16]'सर्वस्य सुपि' इत्येष स्वरो भवतीति वचनं कर्तव्यमित्यर्थः। यद्यपि न्यासान्तरेऽपि वचनेनैव सर्वस्वरः सेत्स्यति, तथाप्युत्सूत्रत्वमेव [17]न्यासान्तरे दोष इति भावः॥

[१, ४९८–५०१]

(**रत्नप्रकाशः**) **अभूवन्निति**। [18]'गातिस्था' इति सिचो लुक्। तस्य सिज्ग्रहणेन ग्रहणाज्जुस् प्राप्नोति, तन्निषेधः कर्तव्य इति मन्यते। **सिचीति**। सिज्लुकीत्यर्थः। **आकारप्रकरणादिति**।

---

[1] तृतीयायां — अ.
[2] तुशब्दो नास्ति — अ, म.
[3] स्वरित इति — अ.
[4] गमेरिति — म.
[5] प्रतीकशब्दः पुँल्लिङ्गत्वेनैवामरकोशादौ प्रसिद्धः। नपुंसकत्वे प्रमाणमन्वेष्टव्यम्।
[6] प्रकृत्यन्वयहेतुमाह — अ.
[7] 'कार्यस्येति' इति प्रतीकात् 'अध्याहारेणान्वयमाह' इत्यन्तं नास्ति — म.
[8] ञ्नित्किस्वरा इति — अ.
[9] कित्तद्धितस्यान्तस्योदात्तत्वं — म.
[10] पा. सू. ६. १. ६५.
[11] 'तद्धितस्य' इति नास्ति — ऋ.
[12] विषयापहारः, विषयत्वापहारः — अ.
[13] इत्युत्सूत्रं — अ, म.
[14] वक्तव्यमिति — ऋ.
[15] इत्यपि प्रतिज्ञानादिति — अ; इति प्रतिज्ञानादिति — ऋ.
[16] पा. सू. ६. १. १९१.
[17] 'न्यासान्तरे' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — अ, म.
[18] पा. सू. २. ४. ७७.

[1]'आतः' इति सूत्रस्य नियमार्थस्य सत्त्वादिति भावः। **नियमार्थं भविष्यतीति**। [2]सिचः परः सन् य आतः परो झिस्तस्य जुसिति व्याख्यानात् प्रत्ययलक्षणकृतं सिचः परत्वं श्रुतिकृतमातः परत्वं चाश्रित्य प्रवर्तमानं तन्नियमार्थं भवति — सिज्लुक्यादन्तादेव झेर्जुस् भवति, नान्यस्मादितीति भावः। **इति युष्मत्पुत्र इति**। पदात्परयोरादेशविधानादितिशब्दप्रयोगः। **श्रूयमाणविभक्ति-विशेषणमिति**। 'षष्ठीचतुर्थीद्वितीयानाम्' इत्येव सिद्धे, स्थग्रहणे सत्ययमर्थो भवति — तासु स्थिते ये युष्मदस्मदी इति। तथा च श्रूयमाणास्वेव तास्ववस्थितिः संभवति, न तु लुप्तास्विति तेन तद्विशेषणलाभ इति भावः। **अस्त्यन्यदिति**। तिष्ठतिरहानावपि वर्तते। यथा तपसि स्थितः, तपो न जहातीत्यर्थः। यथा वा [3]'समये तिष्ठ सुग्रीव' इति, समयं मा हासीरित्यर्थः। तेन स्थिते स्थग्रहणे तत्सहितयोः कार्यं विज्ञायत इति भावः। **सर्वग्रहणमपीति**। तथा चादेशानामनेकाल्त्वादेव सर्वादेशत्वे सिद्धेऽनुवर्तमानं सर्वग्रहणं पदविशेषणं सद् अवान्तरस्य पदस्य व्यावर्तकं भविष्यतीति भावः। एवं च स्थग्रहणात् श्रूयमार्णविभक्तिकयोरेव तयोरादेश इति स्थितम्। **याजयांचकारेति**। परत्वात् तिबादिषु कृतेषु [4]'आमः' इति लुक् प्रवर्तत इति मन्यते। **आमि लिलोपादिति**। नित्यत्वाल्लुगेवादौ प्रवर्तत इति भावः। एतेन 'नाप्राप्तेषु तिबादिषु लुगारभ्यमाणस्तेषां बाधकः' इति निरस्तम्। अगतिकगतिभूतस्य [5]'सत्यपि संभवे बाधनं भवति' इति पक्षस्यात्राश्रयणानौचित्यात्। तदेवमव्याप्तिपरिहारार्थम् 'उत्तरपदत्वे' इत्यादिवार्तिकमेकमभ्युपेत्यातिप्रसङ्गं वचनमन्तरेणैव परिहृत्य सूत्रावयवमङ्गस्येति पदं लुमता प्रत्ययलोपे यत्तत् पूर्वमङ्गं तस्येत्यर्थकतया व्यवस्थापयितुं तस्याङ्गाधिकारविहितकार्यपरत्वे दोषमाह — **अङ्गाधिकार इति। जिगमिषेति**। [6]'अतो हेः' इति लुकि [7]'गमेरिट् परस्मैपदेषु' इतीड् न स्यादिति भावः। **संविवृत्सेति**। [8]'न वृद्भ्यश्चतुर्भ्यः' इतीट्प्रतिषेधः। **क्रमेर्दीर्घत्वं चेति**। चकारो भिन्नक्रमः क्रमेरित्यनन्तरं ज्ञेयः। क्रमेश्च दीर्घत्वं न सिध्यतीत्यर्थः। चकारो दीर्घत्वशब्देनैवान्वित इति मन्यमानः पृच्छति — **किं चेति**। तादृश एव कश्चिदुत्तरमाह — **इटश्च विधिप्रतिषेधाविति**। आचार्य आह — **नेत्याहेति**। **अदेशेऽयमिति**। भिन्नक्रम इत्यर्थः। अनन्तरोक्तातिप्रसक्तेरादावुक्ताव्याप्तेश्चाङ्गाधिकारपरत्वम् 'अङ्गस्य' इत्यस्य न युज्यत इत्युपसंहरति — **इहेति**। **किंचिदिति**। इटो विधिप्रतिषेधौ, क्रमेर्दीर्घत्वं च। **किंचिच्चान्यत्रेति**। अङ्गाधिकारादन्यत्र विहितं किंचित् [9]'रोऽसुपि' इत्यादावसुपीति प्रतिषेधादिकम्। **यदि पुनरिति**। एवं तर्हीत्यर्थः। **न लुमता तस्मिन्नित्युच्यत इति**। लुमता शब्देन प्रत्ययलोपे सति तस्मिन् लोपे परे यदङ्गं तस्य यत्कार्यमाङ्गमनाङ्गं वा तन्न भवतीति व्याख्यास्यत इत्यर्थः। तमेवान्यः पृच्छति — **अथेति**। **तद्विशेषणमिति**। परस्मैपदापेक्षया यदङ्गं तत् पूर्वत्वेन गृहीत्वा इट्प्रतिषेधौ न विहितौ। किं तु तदवयवः सकारादिः प्रत्ययो गृहीतस्तथेति न दोष इति भावः। एतेन 'विशेषण एवोपक्षीणत्वात् कार्यं प्रति निमित्तभावो नास्तीत्यर्थः' इति निरस्तम्। अनुबन्धानां गुणवृद्धिनिषेधनिमित्तत्ववद् विशेषणस्यापि कार्यं प्रति निमित्तत्वे बाधकाभावात्। **तद्विशेषणं लुङ्ग्रहणमिति**। लुङपर आर्धधातुके वध्यादय आदेशाः, न तु लुङि परे तत्पूर्वस्येति भावः। 'न लुमता तस्मिन्'

---

[1] पा. सू. ३. ४. ११०.
[2] सिच्परः सन् — ब.
[3] रामायणे किष्किन्धाकाण्डे ३० सर्गे. श्लो. ८१.
[4] पा. सू. २. ४. ८१.
[5] महाभाष्यम् १. १. ४७.
[6] पा. सू. ६. ४. १०५.
[7] पा. सू. ७. २. ५८.
[8] पा. सू. ७. २. ५९.
[9] पा. सू. ८. २. ६९.

इति वचनान्तरमेवाश्रितमिति मन्यमान आह — **तच्चापीति**। **इत्येव सिद्धमिति**। यथा सिध्यति तथैव व्याख्यातम्। **कर्तव्योऽत्र यत्न इति**। भीह्रचादिसूत्रे प्रत्ययात् पूर्वग्रहणेन ज्ञापितया 'स्वरविधौ सप्तम्यस्तदन्तसप्तम्यः' इति परिभाषया [1]"उपोत्तमं रिति' ,[2]"चङ्यन्यतरस्याम्' इत्यत्रैव सुबन्तस्य सर्वशब्दस्यादिरुदात्त इति व्याख्येयमिति भावः। ज्ञापकसिद्धस्य चासार्वत्रिकत्वेन [3]"ञ्नित्यादिर्नित्यम्' इत्यत्र [4]"पथिमथोः सर्वनामस्थाने' इत्यत्र च ञ्नित्यादौ परतः पूर्वस्यादिरुदात्त इति व्याख्यानेनैवेष्टे सिद्धे तदर्थं 'लुमति प्रतिषेधे एकपदस्वरस्योपसंख्यानम्, सर्वामन्त्रितसिज्लुक्स्वरवर्जम्' इति वार्तिकं न कर्तव्यमिति भावः। एतेन 'सर्वशब्दार्थं वचनं कर्तव्यम्' इति निरस्तम्। वचनं विनैवेष्टसिद्धेः। एतेन [5]"सौवर्यः सप्तम्यस्तदन्तसप्तम्यः' इति वचनावलम्बनेन [6]"सर्वस्य सुपि' इत्यत्रैव [7]"ञ्नित्यादिर्नित्यम्' [8]"पथिमथोः सर्वनामस्थाने' इत्यत्रापि तदन्तसप्तमीमाश्रित्य व्याख्याय 'गर्गाः, बिदाः, उष्ट्रग्रीवा, पथिप्रियः' इत्यत्रातिप्रसङ्गवारणाय [9]"संज्ञायामुपमानम्' इति सूत्रज्ञापिताम् 'अनुबन्धस्वरे प्रत्ययलक्षणं नास्ति' इति परिभाषां 'पथिमथोः सर्वनामस्थानस्वरश्च लुमता लुप्ते न' इत्यपूर्ववचनं चाश्रयन्तः [10]कौस्तुभकृतोऽपि निरस्ताः। अस्मदुक्तरीत्या परसप्तम्याश्रयेणैव [11]"संज्ञायामुपमानम्' इति सूत्रस्याप्युपपन्नत्वेन [12]"भक्षितेऽपि लशुने न शान्तो व्याधिः' इति न्यायमनालोच्य तेन ज्ञाप्याम् 'अनुबन्धलक्षणे' इत्यादिपरिभाषामाश्रित्य पथिमथोरित्याद्यपूर्ववचनाङ्गीकारानौचित्यात्। सर्वस्वरमात्रे 'कर्तव्योऽत्र यत्नः' इति प्रकृतभाष्यविरोधाच्च ॥

[१,४९८–५०१]

(**नारायणीयम्**) **प्रस्तावादिति**। आरम्भादित्यर्थः। [13]'सप्तमी' इति योगविभागात् समासं मन्वान आह — **अथवेति**। एवं हि प्रकरणपदं प्रसिद्धार्थं भवति, तदुक्तिश्च सफला भवति, सिजनुवृत्तौ हि तस्य नियमार्थत्वमिति नियामकत्वद्योतनार्थत्वात्। स्थग्रहणमन्तरेण कथं सिद्धिः, येन तत्सामर्थ्याच्छ्रूयमाणप्रतिपत्तिः स्यादित्यत्राह — **षष्ठीति**। ननु सप्तम्यर्थ एव तिष्ठत्यर्थेनाप्याक्षेप्तव्य इति नानयोर्विशेषः कश्चिदित्यत्राह — **अयमिति**। औपश्लेषिकमाधारत्वं श्रवणेऽस्ति न लोपे। ननु सप्तम्याप्याधारत्वप्रतिपादनात् कथं लोपे प्राप्तिः, अथ प्रत्ययलक्षणेन [14]प्राप्तिस्तदा स्थग्रहणेऽपि कथं नामाप्राप्तिः। एवं तर्हि यत्नाधिक्यात् प्रत्ययलक्षणं बाध्यते। टीकायामपि स्वाभाविकं तात्स्थ्यं नेत्युच्यते। प्रत्ययलक्षणं तु नेत्यभिप्रायः। वृक्षस्थानयनचोदनायां वृक्षानानयनात् कथं सविभक्तिकादेशः स्थग्रहणसाध्यः, अत आह — **तिष्ठतिरिति**। स्थित्यर्थग्रहणे प्रयोजनाभावादहान्यर्थग्रहणमिति भावः। प्रसिद्धचनुरोधेऽप्याह — **अथवेति**। यदि पुत्रकं समृद्धं द्रष्टुं चोदना तदैतदुदाहरणम्, न तु सर्वथात्र सरथानयननियमः। अत्रापि स्थ-

---

[1] पा. सू. ६. १. २१७.
[2] पा. सू. ६. १. २१८.
[3] पा. सू. ६. १. १९७.
[4] पा. सू. ६. १. १९९.
[5] महाभाष्यम् ६. १. १९२.
[6] पा. सू. ६. १. १९१.
[7] पा. सू. ६. १. १९७.
[8] पा. सू. ६. १. १९९.
[9] पा. सू. ६. १. २४.
[10] श. कौ. पृष्ठम् २६६.
[11] पा. सू. ६. १. २४.
[12] लौ. न्या. प्रथमभागे पुटम् ३९.
[13] पा. सू. २. १. ४०.
[14] प्राप्तस्तदा — ग.

ग्रहणसामर्थ्याद्विभक्तिसहिते कार्यावगतिः। ननु पदाधिकारेऽपि पदस्यायुष्मदस्मत्त्वात् तयोश्चापदत्वात् सामानाधिकरण्यानुपपत्त्या पदावयवयोर्युष्मदस्मदोर्ग्रहणं स्यादित्यत्राह — **केवलयोरिति**। वैयधिकरण्येनान्वये व्यावर्त्याभावात्। **अत्रेति**। व्यक्तिपक्षे चोद्यमिति भावः। तदा हि यथासंभवं मुख्यलाक्षणिकयोर्ग्रहणमितीह मुख्यग्रहणं स्यात्। [1]'अनुदात्तं सर्वम्' इति प्रथमान्तस्य प्रस्तावात् कथं सर्वग्रहणेन विभक्त्यन्तादेशलाभः, अत आह — **अनुवृत्तमिति**। ननु विपरिणामेऽपि सर्वयोर्युष्मदस्मदोरादेशो लभ्यते, न तु सविभक्तिकयोरित्यत आह — **अनेकेति**। एवं च सर्वग्रहणेन न युष्मदस्मदी विशेष्येते। किं तर्हि, पदमित्याह — [2]**पदस्येति**। पदत्वमपि विभक्तावत्रास्तीत्युक्तम्, अत आह — **प्रयोगेति**। विशेषविहितत्वात् तिबादीन् बाधित्वा लुका भाव्यम्, तत् कथमस्य तिङन्तत्वम्, अत आह — **परत्वादिति**। अविरोधान्न तिबादिबाधकत्वमिति भावः। अविरोधोऽबाधाप्रयोजको भाष्यकृन्मत इत्याह — **नेति**। 'अङ्गाधिकारे' इति पक्षविशेषः किमनूद्यते उतेडादिर्विशेष्यते। नान्त्यः, वैयर्थ्यात्। नाद्योऽपि, तदसंभवादित्याशङ्क्य संभावयति — **अङ्गस्येति**। पक्षविशेषानुवादः किमर्थ इत्यत्राह — **इति सूत्रेति**। यदा तु लुमता लुप्ते प्रत्यये यदङ्गं तस्य विधौ कार्ये निषेधस्तदा न दोषः, इड्विधिनिषेधयोः प्रत्ययकार्यत्वेनाङ्गकार्यत्वाभावात्। [3]क्रमिदीर्घत्वस्याङ्गकार्यत्वेऽपि लुप्तप्रत्ययापेक्षयाङ्गस्य न कार्यमिति तत्राप्यनिषेधः। **तद्धितस्यैवेति**। विशेष्यस्यासंनिधेर्नास्ति तदन्तविधिः। **उपक्षीणत्वादिति**। कुलालजननोपक्षीणस्य तत्पितुर्घटादिनिमित्तत्ववदिति भावः। **लुकेति**। तद्विषयत्वं हि भावितत्साहित्यम्। इह च लुङा लौकिकप्रयोगे कदाचिदपि [न] साहित्यम्। किं सामानाधिकरण्येन विशेषणत्वमुत वैयधिकरण्येन। नाद्यः, असंभवात्। न द्वितीयः, लुङनिमित्तार्धधातुकस्यैवासति लुङ्यनुपपत्तेरित्यत आह — **तेनेति**। चिणो लुङनिमित्तत्वेन लुकः प्रागेव चिण्। **तत्रेति**। व्याख्यातमेतत्। **वचनमिति**। हरदत्तमिश्रैस्तु सुप इति षष्ठीनिर्देशः कर्तव्य इत्युक्तम्॥

अलोऽन्त्यात् पूर्व उपधा. १. १. ६५.

[१, ५०२–५०६]

(लघुविवरणम्) 'एवम्' इत्यनुपपन्नम्, [4]'प्रथमातिक्रमे कारणाभावेन प्रथमाबहुवचनस्य न्याय्यत्वादित्यत आह — **प्रथमायामिति**। समासासमाससंदेहः 'अलन्त्यात्' इत्युच्यमाने स्यात्, अतस्तन्निवृत्तये प्रथमा[5]बहुवचनेन निर्देशः स्यादित्यत आह — **अन्त्यादितीति**। नन्वल्ग्रहणस्यान्त्यविशेषणत्वेऽपि वर्णग्रहणे जातिग्रहणात् संघातात् पूर्वस्योपधासंज्ञा कस्मान्नाशङ्क्यत इत्यत आह — **अन्त्यविशेषणत्व इति**। प्रथमाबहुवचनम् 'अलः' इति संज्ञिनिर्देशार्थमिति व्याख्याने न सूत्रभेद इत्यत आह — **अलन्त्यादितीति**। [6]'अनभ्यासविकार इति प्रतिषेधस्य [7]'भृञ्जाम्' इत्युदाहरणमनुपपन्नम्, भृशब्दो हि धातुरूपोऽभ्यासः सार्थक एवेत्यत आह — **अभ्यास इति**। अता अव्यक्तानुकरणे विशेष्यमाणे तदन्तविधावच्छब्दान्तस्याव्यक्तानुकरणस्य पररूपविधानात् तस्य

---

[1] पा. सू. ८. १. १८.

[2] प्रदीपे 'सर्वस्य प्रयोगार्हस्य' इत्यत्र 'सर्वस्य पदस्य प्रयोगार्हस्य' इति पाठोऽभिमत इति भाति।

[3] क्रमदीर्घत्वस्याङ्ग — ग.

[4] प्रथमातिक्रमणे — ड.

[5] बहुवचननिर्देशः — ण.

[6] अभ्यासप्रतिषेधस्य — ण.

[7] पा. सू. ७. ४. ७६.

चार्थवत्त्वात् 'नानर्थकेऽलोऽन्त्यविधिः' इत्यस्याविषयोऽयमित्यत आह — **अव्यक्तेति**। 'यदयम्' इत्यनुपपन्नम्, सूत्रस्य विकल्पार्थतयानर्थक्याभावादित्यत आह — [1]**आम्रेडितस्येति**। यदि तु [2]'अव्यक्तानुकरणस्य' इति पररूपं सर्वस्य भवति, ततो विकल्पेन मुक्तेऽच्छब्दस्य पूर्वेण पररूपे प्राप्ते निषेधः कर्तव्यः, विकल्पार्थम् 'अन्त्यस्य तु वा' इत्यपि वक्तव्यमिति भावः। ननु लोप-ग्रहणाभावे 'ध्वसोरेद्धावभ्यासस्य' इत्युच्यमाने [3]'अन्यवचनाच्चकाराकरणात्' इति न्यायेन लोपो न स्यादित्यत आह — **तत्रेति**। नन्वेवमप्यभ्यासस्यैव लोप इत्यत्र [4]'नियामकाभावादेत्वलोपौ ध्वसोरभ्यासस्य च पर्यायेण स्याताम्' इत्यत आह — **व्याख्यानादिति**। [5]'आगन्तुकानामन्ते निवेशः' इत्यनेन न्यायेनाभ्यासस्य चेत्यनन्तरं लोपग्रहणं निविशते। तत्राभ्यासं स्थानित्वेन लोपः स्वीकरोति उत ध्वसाविति [6]संशये संनिहितत्वादभ्यासं स्थानित्वेन ग्रहीष्यति, एत्वमपि प्रथमावगतत्वात् संनिहितत्वाच्च ध्वसावेवाङ्गीकरिष्यतीति व्यवस्थेति भावः। ननु 'ध्वसोरेच्च' इत्युच्यमाने एत्ववल्लो-पोऽपि ध्वसोः स्यादित्यभ्यासस्य चेति वक्तव्यम्। ततश्च स्थानिसंनिहितश्च[7] स्थान्यन्तरमेव समुच्चि-नुयात्। एवं चाव्यवस्था तदवस्थेत्यत आह — **योगविभागो वेति**। अत्र चकाराल्लोपग्रहणमनुवर्तते, न त्वेत्वम्, अन्यथा योगविभागवैयर्थ्यादिति भावः। 'द्विशकारको निर्देशः' इत्यनुपपन्नम्, लोप-श्शब्दस्य संज्ञात्वेनाविनियुक्तत्वादानर्थक्येन प्रातिपदिकत्वाभावात् 'पदत्वाभावेऽपदस्य प्रयोगानुप-पत्तेरित्यत आह — **लोपेति**। ननु लोपश्शब्देऽप्रयोगस्थे कथमित्संज्ञेत्यत आह — **इत्संज्ञेति**। [8]'न त्वनो लोपविधानं संभवति, त्यदाद्यत्वेन व्यवधानाद् हलादिविभक्तिपरत्वाभावादित्यत आह — **येनेति**॥

[१, ५०२–५०६]

(विवरणम्) विनिगमनहेत्वभावात् 'एवम्' इत्ययुक्तमित्यत आह — **प्रथमायामिति**। ननु 'अलन्त्यात्' इत्युक्ते समासासमाससंदेहः स्यादित्यत आह — **अन्त्यादितीति**। साहचर्याच्च निश्चयो भवति, यथा अग्रचप्राये लिखितं दृष्ट्वा भवेदयमग्रच इति। अल्ग्रहणमन्त्यनिर्देश इत्यनयोः सामानाधिकरण्याय निर्देशशब्दः करणसाधन इत्याह — **निर्दिश्यत इति**। अनिर्धारित-करणविशेषविवक्षयान्त्यनिर्देश इति व्युत्पाद्य पश्चात् करणविशेषनिर्धारणायाल्ग्रहणमिति [9]संबध्यत इति पुंनपुंसकयोर्वार्तिके सामानाधिकरण्यं [10]न विरुध्यत इति द्रष्टव्यम्। तात्पर्यार्थ-माह — **यदीति**। प्राप्तिपूर्वकत्वात् प्रतिषेधस्य प्राप्तिमाह — **पूर्वस्येति**। **कार्यित्वात्** तस्यो-पधासंज्ञायां प्राप्तायां प्रतिषेध इति शेषः। ननु संज्ञिवदवधिरपि समुदायो नेति कस्मान्न निषिध्यत इत्यत आह — **अन्त्येति**। **प्राप्तिरेवेति**। लघुत्वाभावादिति भावः। संज्ञिनिर्देशाय 'अलः' इति प्रथमाबहुवचनमिति [11]व्याख्याने कथं सूत्रभेद इत्यत आह — **अलिति**। **शब्दस्येति**। धातुष्वेकाक्ष्विदमुक्तम्, अनेकाक्षु प्रथमस्यैकाचो द्विर्वचने ह्यभ्यासस्यार्थवत्त्वशङ्कैव नास्ति। 'अतः'

---

[1] प्रदीपे 'वाम्रेडितस्येति' इत्यत्र 'आम्रेडितस्य वेति' इति पाठः स्वीकृतः।
[2] पा. सू. ६. १. ९८.
[3] महाभाष्यम् १. १. ३.
[4] नियामकत्वाभावात् — ड.
[5] लौ. न्या. साहस्री. पृष्ठम् १७२.
[6] विशये — ण.
[7] चकार इत्यर्थः।
[8] पदत्वाभावे उपपदस्य — ड, ढ, ण.
[9] नन्वनो लोप — ड, ढ, ण.
[10] संबन्ध इति — ञ.
[11] 'न विरुध्यते' इति नास्ति — च, छ.
[12] व्याख्याने न सूत्रभेदः — ञ, ट.

इत्यनेनाव्यक्तानुकरणस्येत्यस्य विशेष्यत्वे तदन्तविधेरनुकार्येण चार्थवत्त्वान्नेदं प्रयोजनं 'नानर्थके' इति परिभाषाया इत्यतः सूत्रार्थमाह — **अव्यक्तेति**। तथा च [1]'कार्ये षष्ठीनिर्दिष्टमनर्थकमिति भावः। नन्वनर्थकं सज्ज्ञापकम्, न च [2]'नाम्रेडितस्य' इति सूत्रमनर्थकम्, विकल्पार्थत्वात्तस्येत्यत आह — [3]**आम्रेडितस्य वेति**। अन्त्यस्य चेत् पूर्वेण पररूपमिति शेषः। यदि तु पूर्वेणातः सर्वस्य भवति, ततो विकल्पेन मुक्ते पूर्वेण पररूपं मा भूदिति नेति वक्तव्यम्। पूर्वेणान्त्यस्य, अनेन सर्वस्येति [4]'विपर्ययाशङ्कानिवृत्तये 'अन्त्यस्य' इति विकल्पाय च 'वा' इति वक्तव्यमिति समग्रं सूत्रमर्थवदिति। **रूपवति** भावात्मक इत्यर्थः। **नीरूपः** वर्णरहित इत्यर्थः। ननु लोपग्रहणाभावे 'ध्वसोरेद्धावभ्यासस्य' इत्युक्ते [5]'अन्यवचनाच्चकाराकरणाच्च प्रकृतस्यापवादः' इत्यनेन न्यायेनैत्वमेव तस्य स्यात्, न लोपः। 'ध्वसोरेद्धौ' इत्यत्र लोपानुवृत्तौ तु यथासंख्येनास्तेरभ्यासासंभवाद्धौ घोरभ्यासस्यैत्वमस्तेर्लोप इति विज्ञायेतेत्यत आह — **तत्रेति**। ननु चकारेण लोपानुवृत्तावपि लोपोऽभ्यासस्यैवेति कथमित्यत आह — **तत्र व्याख्यानादिति**। [6]'आगन्तूनामन्ते निवेशः' इति न्यायाल्लोपग्रहणमनुवर्तमानमभ्यासस्यैवेत्यस्यानन्तरं निविशते। तथा च संनिधानाल्लोपस्याभ्यासः स्थानी। संनिधानात् प्राधान्याच्च ध्वसावेत्वस्येति भावः। ननु 'अभ्यासस्य च' इत्युक्तौ स्थानिसंनिहितश्चः[7] स्थान्यन्तरमेव समुच्चिनुयान्न विधेयान्तरमित्येत्वमभ्यासस्यापि स्यान्न लोप इत्यत आह — **योगेति**। अत्र चकाराल्लोपग्रहणमनुवर्तते न त्वेत्वम्, योगविभागसामर्थ्यादिति भावः। **सर्वेति**। पुनर्लोपग्रहणे हि लोप एव नावशेषः कस्यचिदित्यवगमात् सर्वापहार इति भावः। ननु लोपश्शब्दस्य संज्ञात्वेनाविनियोगादानर्थक्यान्नाप्रतिपदिकत्वेन तावत् स्वाद्युत्पत्तिः, उत्पत्तौ वा हल्ङ्यादिलोपान्न द्विशकारकस्योच्चारणं संभवतीत्यतो द्विशकारकः कथं निर्देश इत्यत आह — **लोपेति**। [8]"पृथक्' इत्यनेन संयोगान्तं पदं न भवतीति संयोगान्तलोपोऽपि नेत्युक्तम्। ननु लोपशब्दो न शकारपर आदेशः, नापि तदर्थ इति कथमित्संज्ञा शकारस्येत्यत आह — **इदिति**। **न कृतमिति**। [9]'लक्षणहेत्वोः' इत्यस्य प्राप्त्यभावादित्यर्थः। **सामान्येनेति**। विभक्तिमात्राश्रयणेनेत्यर्थः। नन्विद्रूपस्यानादेशः, मकारस्य त्यदाद्यत्वम्, तथा च तेन व्यवधानान्नानो हलादिविभक्तिपरत्वेत्यत आह — **येन नेति**। **एतच्चेति**। अवधिनावधिमतो निर्णयं ब्रुवतेति यावत् ॥

[१, ५०२–५०६]

(उद्द्योतनम्) प्रथमेति। प्रथमाबहुवचनान्तमित्यर्थः। यद्यपि बहुवचनस्य पूर्व इत्यनेना-

---

[1] कार्यनिर्दिष्ट — च, छ; कार्यषष्ठीनिर्दिष्ट — ट.

[2] पा. सू. ६. १. १९.

[3] प्रदीपे 'वाम्रेडितस्येत्येव' इत्यत्र 'आम्रेडितस्य वेत्येव' इति चौखाम्बामुद्रिते पाठः।

[4] पर्यायशङ्का — ञ; विपर्ययशङ्का — ट.

[5] महाभाष्यम् १. १. ३.

[6] लौ. न्या. साहस्री. पृष्ठम् १७२.

[7] चकार इत्यर्थः।

[8] प्रदीपे 'शकारः प्रतिनिर्दिश्यते' इत्यत्र 'शकारः पृथङ् निर्दिश्यते' इति विवरणकृत्पाठ इति भाति।

[9] पा. सू. ३. २. १२६.

संबन्धः, तथापि छान्दसो [1]वचनव्यत्ययः स्यादिति भावः। [2]विनिगमने हेत्वभावात् 'एवम्' इत्ययुक्तम्, अत आह — **प्रथमायामिति**। व्याख्यानेन संदेहनिवृत्तिमाशङ्क्याह — **अन्त्यादिति**। निर्देशशब्दस्य करणव्युत्पत्त्या ग्रहणमित्यनेन सामानाधिकरण्यमाह — **निर्दिश्यत, इति**। अनिर्धारितकरणविशेषव्युत्पादितस्य निर्देशशब्दस्य पश्चाद् [3]ग्रहणेन संबन्ध इति वार्तिके पुंनपुंसकयोः [4]सामानाधिकरण्योपपत्तिः। व्युत्पत्तिलभ्यमर्थमाह — [5]**यदीति**। प्रतिषेधस्य प्राप्तिपूर्वकत्वात् तामाह — **पूर्वस्येति**। ननु वर्णग्रहणे जातिग्रहणात् 'अन्त्यादलः' इति पक्षेऽपि [6]समुदायपूर्वस्य शकारस्येत्वप्रसङ्गो [7]न निरस्तः, अत आह — **अन्त्येति**। **संख्या**[8]व्यक्तिगतैकत्वसंख्या। वर्णनिर्देशे जातिनिर्देशात् समुदायाव्यावृत्तिशङ्कां पूर्वदेव परिहरति — **अत्रापीति**। एकत्वविवक्षायां हेत्वन्तरमाह — **पिबेरिति**। **प्राप्तिरेवेति**। अलघूपधत्वादित्यर्थः। ननु 'अलः' इति प्रथमान्तमिति व्याख्याने सूत्रभेदो नास्ति, अत आह — **अलन्त्यादिति**। 'अन्त्यात्' इत्यनेन साहचर्यात् [9]प्रथमाव्याख्यानासंभवात् 'अलन्त्यात्' इति पठनीयम्। तथा च सूत्रभेद इति भावः। अभ्यासस्यानर्थकत्वे हेतुः — **शब्दस्येति**। अर्थावृत्तावभ्यासस्याप्यर्थवत्त्वं स्यात्। शब्दमात्रावृत्तावभ्यस्तस्यैवार्थवत्त्वात् तदवयवाभ्यासस्यानर्थक्यमित्यर्थः। एकाक्षु धातुष्विदं समाधानम्। अनेकाक्षु शङ्कैव नेति ज्ञेयम्। नन्वच्छब्दान्तस्यानुकरणस्यानुकार्येणार्थवत्त्वात् कथमानर्थक्यम्, अत आह — **अव्यक्तेति**। तथा च कार्यभाजोऽच्छब्दस्यानर्थक्यमेवेत्यर्थः। ननु विकल्पार्थं सूत्रं कथं ज्ञापकम्, अत आह — [10]**आम्रेडितस्य वेति**। पूर्वत्रालोऽन्त्यविधिश्चेदत्र 'अन्त्यस्य' इति व्यर्थं सत् तत्र तदभावं ज्ञापयतीत्यर्थः। ननु 'अनभ्यासविकारे' इति प्रतिषेधादभ्यासलोपोऽन्त्यस्यैव स्यात्, अत आह — **अनभ्यासेति**। **रूपवति** वर्णात्मके। **नीरूपः** वर्णरहितः। लोपस्याविकारत्वे भाष्यसंवादमाह — **तथा चेति**। ननु लोपग्रहणाभावे 'ध्वसोरेद्धावभ्यासस्य' इति सूत्रं चेत् [11]'अन्यवचनाच्चकाराकरणाच्च[12] प्रकृतापवादः' इति न्यायेनैत्वमेव स्यान्न लोपः। यदि च लोपोऽनुवर्तते तदास्तेरभ्यासाभावेन यथासंख्येन घोरभ्यासस्यैत्वमस्तेर्लोप इत्यपि स्यात्, अत आह — **तत्रेति**। ननु **च**कारेणानुवृत्तौ[13] लोपोऽभ्यासस्यैवेति कथम्, अत आह — **व्याख्यानादिति**। [14]'अन्ते तु बादरायणः' इति न्यायेनानुवर्तमानं लोपग्रहणमभ्यासस्येत्यनन्तरं निविशते। तथा च

---

[1] 'पूर्व उपधा' इत्यत्र 'पूर्वे' इति प्रथमाबहुवचनान्ततयापि पदच्छेदः कर्तुं शक्यत इत्यसंबन्धशङ्कैव नास्ति, तथापि 'पूर्वः' इति छेदेऽपि समाधानमुक्तमिति बोध्यम्। यद्वा, उपधेति विधेयस्यैकवचनान्तत्वात् तत्सामानाधिकरण्यानुरोधेनोद्देश्यबोधकस्यापि 'पूर्वः' इत्येकवचनान्तत्वमेव युक्तमिति युज्यत एव शङ्का। न च 'हलोऽनन्तराः संयोगः' इत्यत्रेवोद्देश्यविधेययोर्वचनभेदोऽस्त्विति वाच्यम्, तत्र समुदायस्य संज्ञित्वात्, अत्र बहुत्वस्याविवक्षितत्वेन प्रत्येकमेव संज्ञित्वमिति पूर्वशब्दस्यैकवचनान्तस्यैव न्याय्यत्वात्। सूचितमिदं 'पूर्वोऽल्' इत्यनेनोद्द्योते नागेशेन।

[2] विनिगमनहेत्वभावात् — अ.

[3] ग्रहणशब्देनेत्यर्थः।

[4] सामानाधिकरण्योपपत्तेः — म.

[5] 'यदीति' इत्यादि 'तामाह' इत्यन्तं नास्ति — अ.

[6] अस् इति समुदायात् पूर्वस्य शकारस्येत्यर्थः॥ समुदायस्योत्वप्रसङ्गः — मः

[7] 'न' इति नास्ति — अ.

[8] वृत्तिगतैकत्व — अ, म.

[9] प्रथमव्याख्यानासंभवात् — म.

[10] 'वाम्रेडितस्येत्येव' इति प्रदीपस्थाने 'आम्रेडितस्य वेत्येव' इति चौखाम्बामुद्रिते पाठः।

[11] महाभाष्यम् १. १. ३.

[12] चकाराकरणे च — म.

[13] लोपानुवृत्ताविवत्यर्थः।

[14] पूर्वमीमांसायां पञ्चमाध्यायद्वितीयपादे नवमा-

संनिधानादभ्यासस्य लोपः, ध्वसोरेत्वं च सिध्यतीत्यर्थः। ननु 'अभ्यासस्य च' इत्युक्तौ स्थानिसंनिहितचकारः स्थान्यन्तरमेव समुच्चिनुयान्न विधेयान्तरमित्यभ्यासस्याप्येत्वमेव स्यान्न लोपः, अत आह — **योगेति**। योगविभागसामर्थ्यादेत्वं नानुवर्तते, किं तु लोप [1]एवेति भावः। **सर्वेति**। पुनर्लोपग्रहणेन [2]लोप एव, नावशेषः कस्यचिदित्यवगमादिति भावः। ननु [3]लोपश्शब्दस्याप्रातिपदिकत्वेन स्वाद्युत्पत्तेरभावः, उत्पत्तौ वा [4]लोपश्शब्दात् सोर्हल्ङ्यादिलोपाद् द्विशकारकत्वमयुक्तम्, अत आह — **लोपेति**। टिधुभादिवदव्युत्पन्नत्वेऽप्याह — **संज्ञिनेति**। **कृतागमिति**। [5]तथा च विभक्तेरुपरि शकारः पठ्यत इति न हल्ङ्यादिलोप इत्यर्थः। [6]**पृथगिति**। तथा च शकारान्तस्य पदत्वाभावात् संयोगान्तलोपोऽपि न भवतीत्यर्थः। **इत्संज्ञायां** [7]'हलन्त्यम्' इत्यनेन। ननु लोपशब्दः शित्, न तु तदर्थ इति कथं तस्य सर्वादेशत्वम्, अत आह — **इत्संज्ञेति**। शब्दे कार्याभावादर्थे कार्यं विज्ञायत इति भावः। ननु 'हलि लोप इति प्रयोजनम्' इति वक्तव्ये 'आपि लोपोऽकोऽनचि' इति वार्तिकेन [8]तत्प्रत्याख्यानं प्रतीयते, [9]तच्चानुपयुक्तम्, अत आह — भाष्ये **तिष्ठतीति**। यथास्थितसूत्रमनेन न प्रत्याख्यायते, किं त्वन्यथा व्याख्यानं कृतमित्यर्थः। तत्र 'तिष्ठत् सूत्रम्' इति वक्तव्ये 'तिष्ठति' इति कथमुक्तम्, अत आह — **लक्ष्येति**। **न कृतमिति**। [10]'लक्षणहेत्वोः क्रियायाः' इत्यस्याप्रवृत्तेरित्यर्थः। आख्यातद्वयस्यैकवाक्यत्वासंभवादाह — **तत्रेति**। यद्यपि सूत्रमन्यथा तिष्ठति, तथापि तन्न प्रत्याख्यायते, किं त्वन्यथा व्याख्यायत [11]इत्यक्षराञ्जस्यमित्यर्थः। अन्यथा व्याख्यानमेवाह — **तत्रेति**। **सामान्येन** विभक्तिमात्रे परतः। नन्विदोऽनादेशः, मकारस्य त्यदाद्यत्वम्, तथा च तेन व्यवधानान्नानो

धिकरणे विचारः — 'अग्नये कृत्तिकाभ्यः पुरोडाशमष्टाकपालं निर्वपेत्' इत्यग्निदेवतायुक्तानां कृत्तिकादिनक्षत्राणामिष्टयः काम्या विहिताः। तत्र प्रधानहोमाः 'अग्निर्नः पातु कृत्तिकाः' इत्यादियाज्यानुवाक्यापुरस्सरं हूयन्ते। तत्रोपहोमाश्च 'सोऽत्र जुहोति, अग्नये स्वाहा कृत्तिकाभ्यः स्वाहा' इत्यादिनाम्नाताः। प्रधानहोमस्विष्टकृतोर्मध्ये 'दश ते तनुवो यज्ञ यज्ञियाः' इत्यादिमन्त्रैराज्याहुतयो नारिष्टहोमाः 'प्रकृतिवत्' इति चोदकेन प्राप्ताः। तत्रोपहोमानां 'अष्टाकपालं निर्वपेत्। सोऽत्र जुहोति' इति प्रत्यक्षपाठान्मुख्यसामीप्यं प्रतीयते। तच्चातिदिष्टनारिष्टहोमव्यवधाने बाधितं स्यात्। तस्मादुपहोमानां नारिष्टहोमेभ्यः पूर्वानुष्ठानमिति पूर्वपक्षे उच्यते — अन्ते तु बादरायणस्तेषां प्रधानशब्दत्वात्, इति। नक्षत्रेष्टिविधानकाले स्वोपकारकापेक्षायां सत्यां चोदकेन प्राकृतनारिष्टहोमादेरङ्गत्वेन बोधितत्वात् नारिष्टहोमानां क्लृप्तोपकारत्वेन प्रधानप्रत्यासत्त्या पूर्वमनुष्ठानम्, उपहोमानां तूपकारकल्पनानन्तरमेवाङ्गत्वबोधेति पश्चादनुष्ठानमिति सिद्धान्तः। **अन्ते** प्राकृतधर्माणामन्ते, वैकृतान् धर्मान् बादरायण आचार्यो मन्यते, **तेषां** प्राकृतानां धर्माणां, **प्रधानशब्दत्वात्** प्रधानविषयशाब्दबोधविषयत्वात्, उत्पत्तिवाक्यगम्यत्वादित्यर्थः। तद्वदत्र 'ध्वसोरेद्धौ' इत्येत्वस्य ध्वस्भ्यां क्लृप्तसंबन्धत्वात् चकारानुवर्तमानस्य लोपस्याभ्यासस्येत्यनेनैव संबन्ध इति भावः।

[1] एवकारो नास्ति — म.
[2] 'लोप एव' इति नास्ति — ऋ.
[3] लोपशब्दस्याप्रातिपदिकत्वेन — अ.
[4] लोपशब्दात् — म.
[5] 'तथा च' इत्यादि 'पृथगिति' इत्यन्तं नास्ति — अ.
[6] प्रदीपे 'शकारः प्रतिनिर्दिश्यते' इत्यत्र 'शकारः पृथङ् निर्दिश्यते' इत्यन्नंभट्टपाठ इति भाति।
[7] पा. सू. १. ३. ३.
[8] तच्चायुक्तम् — म.
[9] पा. सू. ३. २. १२६.
[10] इत्यक्षरान्वय इत्यर्थः — म.

विभक्तिपरत्वम्, अत आह — **येनेति**। [1]**अधिकारादेवेति**। भाष्योदाहृतप्रयोजनानां सर्वेषामपीत्यर्थः। 'अत्र'ग्रहणेन सर्वलोपसिद्धिमाह — **अयमर्थ इति**। अन्त्यलोपे [2]सिद्धे यत्नाधिक्यादेतदर्थलाभ इत्यर्थः। **एतच्चेति**। अवधिनावधिमतो निर्णयं ब्रुवतेत्यर्थः। [3]**उक्तान्न्यायात्** 'यथाजातीयकः' इति [4]भाष्योक्तान्न्यायात्। [5]अवधिमतोऽवधितुल्यत्वमिवावधिमत्तुल्यत्वमवधेरपि न्यायसाम्यादित्यभिप्रेत्याह — **प्रथमेति**॥

[१, ५०२–५०६]

(**रत्नप्रकाशः**) **किमिदमिति**। संज्ञिसमर्पकपूर्वशब्दसमानाधिकरणतया अविवक्षितबहुत्वसंख्यस्य प्रथमान्तस्यापि संभवात् प्रश्नः। **एवं भवितुमर्हतीति**। प्रथमान्तत्वपक्षे बहुत्वसंख्याया अविवक्षादोषात् पञ्चम्यन्ततैव युक्तेति भावः। **अन्त्यनिर्देशश्चेदिति**। निर्दिश्यते ज्ञाप्यतेऽनेनेति निर्देशः। बाहुलकात् करणे घञ्। अन्त्यस्य निर्देश इति षष्ठीतत्पुरुषः। अन्त्यविशेषणं चेदिति भावः। **संघातप्रतिषेध इति**। पूर्वस्याविशेषितत्वात् समुदायस्यावयवस्य च संज्ञा स्यादिति संघातमात्रस्य प्रतिषेधः कर्तव्य इति भावः। एतेन 'समुदायावयवसंनिधौ समुदायस्यैव कार्यित्वादेकाज्द्विर्वचनवदिति भावः' इति निरस्तम्। समुदायावयवसंनिधौ समुदायस्यैव कार्यित्वमित्याश्रयणानौचित्यात्। 'संघातादपि पूर्वस्य' इत्युत्तरभाष्यस्वरसेन विनिगमनाविरहेण समुदायस्यापि संज्ञा स्यादित्येव वक्तुमुचितत्वाच्च। यदप्युक्तं तेनैव 'अन्त्यविशेषणत्वे वर्णनिर्देशे जातिग्रहणेऽप्यल इत्युपादानसामर्थ्यात् संख्या विवक्ष्यते' इति। तदपि न, [6]'वर्णग्रहणे' इत्यस्य ज्ञापकसिद्धस्य क्वचिदिष्टविषय एवाश्रयणीयत्वेनानिष्टस्थले संचारानौचित्यात्। अत एव 'अलन्त्यात्' इति न्यासेऽपि 'अल्ग्रहणसामर्थ्यात् संख्या विवक्ष्यते, पिबेरदन्तत्वप्रतिज्ञानाच्च। अल्समुदायस्य संज्ञित्वे गुणस्य प्राप्तिरेव नास्तीति किमदन्तत्वप्रतिज्ञानेन' इत्यपि कैयटो निरस्तः। ज्ञापकाद्याश्रयणक्लेशस्य व्यर्थत्वात्। **नैष दोष इति**। समुदायस्योपधासंज्ञायामपि समुदायस्यैवेत्वं स्यादिति दोषो नेति भावः। **अन्त्यस्य भविष्यतीति**। इत्वमिति शेषः। एतेन 'अन्त्यविज्ञानात्' इत्यस्य 'उपधाया इति षष्ठ्यन्त्यमलं नीयत इत्यर्थः' इति वदन् कैयटो निरस्तः। व्याख्येयभाष्यविरोधात्। प्रकृतभाष्येण हि [7]'अलोऽन्त्यस्य' इत्यस्य षष्ठीनिर्दिष्टान्त्यो योऽल् तस्यैवादेशा भवन्तीत्यर्थो गम्यते, न तु स्थाने षष्ठ्यन्त्येऽलि संक्रामतीति। **अभ्यासविकार इति**। विकारो भावरूपादेशः, न तु लोपरूपोऽपि, 'लोपागमवर्णविकारज्ञः' इति पस्पशायां लोपविकारयोः पृथङ्निर्देशात्। तेन [8]'ध्वसोरेद्धावभ्यासलोपश्च' [9]'अत्र लोपोऽभ्यासस्य' इति लोपोऽभ्यासस्य सर्वस्य भवति। अर्थावृत्तेरभावादभ्यासस्यानर्थक्यम्। न विद्यतेऽभ्यासविकारो यस्मिन् विषय इति बहुव्रीह्याश्रयणादनर्थकेसामानाधिकरण्यम्[10]। [11]'भृञामित्' इत्यादिना भृञाद्यभ्यासोऽभ्यासविकारविषय एवेति न दोषः। **अव्यक्तानुकरणस्यात इति**। अव्यक्तस्य ध्वनेरनुकरणं यत् तस्य योऽच्छब्दस्तस्मादितिशब्दस्थेऽचि परे पररूपमेकादेशः स्यादिति सूत्रार्थः। एतेन 'अव्यक्तानुकरणस्य योऽच्छब्दस्त-

---

[1] अधिकारत एवेति — अ.
[2] सिद्धेऽत्रग्रहणादेतदर्थ — म.
[3] उक्तन्यायात् — अ, ऋ.
[4] भाष्योक्तन्यायात् — अ, म, ऋ.
[5] अवधिमत्यवधि — म.
[6] महाभाष्यम् १. १. १४.
[7] पा. सू. १. १. ५२.
[8] पा. सू. ६. ४. ११९.
[9] पा. सू. ७. ४. ५८.
[10] अनर्थकेशब्देन सामानाधिकरण्यमित्यर्थः।
[11] पा. सू. ७. ४. ७६.

स्येतौ पररूपमिति सूत्रार्थः' इति कैयटो निरस्तः। एकादेशविषयपूर्वस्य पञ्चम्या परस्य सप्तम्या निर्देशस्योचितत्वेन 'अतः' इति पञ्चम्यन्तस्य योऽर्थस्तस्य 'तस्य' इति षष्ठ्यन्तेन निदर्शनानौचित्यात्। 'इतौ परे पररूपम्' इत्युक्ते इतिशब्दरूपस्यैवादेशस्यानेकालः प्रसक्तावलोऽन्त्यविधेर्बाधादेवाप्रसक्तेः। 'अन्त्यस्य प्राप्नोति। अनर्थकेऽलोऽन्त्यविधिर्नेति न दोषो भवति' इति भाष्यविरोधाच्च। **नान्त्यस्य पररूपमिति**। अन्यथा 'वाम्रेडितस्य' इत्येव सूत्रं कृतं स्यादिति भावः। **पुनर्लोपवचनसामर्थ्यादिति**। [1]'लोपो यि' इत्यतो लोपग्रहणेऽनुवर्तमाने, इति तत्पूर्वावयवो ज्ञेयः। पुनर्लोपवचनेन हि 'सिद्धे सत्यारम्भो नियमार्थः' इति न्यायेन लोप एव, न तूच्चारणमित्याश्रयणादभ्यासस्य सर्वस्य लोपः सिध्यति। **शिल्लोप इति**। लोपशब्दः शित् क्रियते, तेनादेशः शिद् भविष्यतीति भावः। **लोपश्चेति**। पूर्वः शकारोऽनुबन्धः। द्वितीयो विभक्तिसकारस्य श्चुत्वेन संपन्नः। [2]'सर्वे विधयश्छन्दसि विकल्पन्ते' इति हल्ङ्यादिलोपाभावः, [3]'सुपां सुलुक्' इति सुर्वा। द्वितीयशकारस्येत्त्वाश्रयणमनुचितम्, विभक्त्यन्तस्यानुच्चारणवाचकत्वाभावेन[4] तत्र कृतस्य शित्त्वस्यादेशसंबन्धासंभवात्। क्वचिदप्यस्मिन् शास्त्रे विभक्त्यन्तस्यानुबन्धासञ्जनादर्शनाच्च। एतेन "तत्र 'लोपः' इति भिन्नं पदम्, श् इत्यस्य चोपदेश एवेत्संज्ञा, तत्फलं तु प्रयोगे" इति [5]कौस्तुभो निरस्तः। सूत्रकारमर्यादामुल्लङ्घ्य सुबन्तस्यानुबन्धासञ्जनानौचित्यात्। **आपि लोपोऽकोऽनचीति**। 'अनचि' इति हलीत्यर्थे प्रयुक्तम्। 'आप्यकः' इत्यनुवृत्तिलब्धानुकरणम्। 'हलि लोपः' इत्येव तु सारम्। स्वतन्त्रेच्छत्वादन्यथोक्तिः। तदेतदाह — **तिष्ठति सूत्रमिति**। [6]'हलि लोपः' इतीति शेषः। **अन्यथा व्याख्यायत इति**। तत् सूत्रमन्यथानूद्यते, न तु तत्प्रत्याख्याय तत्स्थाने वचनान्तरं पठितमिति भ्रमितव्यमिति भावः। एतेन 'लक्ष्यलक्षणभावस्याविवक्षितत्वात् तिष्ठत् सूत्रमिति न कृतम्' इति कैयटो निरस्तः। 'तिष्ठत् सूत्रमन्यथा व्याख्यायते' इत्युक्ते लक्ष्यलक्षणभावानवगमात्। न हि 'शयाना भुञ्जते यवनाः' इत्यनेनेव भोजने, 'तिष्ठत् सूत्रमन्यथा व्याख्यायते' इत्युक्ते व्याख्याने कश्चिद्विशेषो गम्यते, व्याख्यानमात्रस्यैव स्थितसूत्रविषयकत्वात्। प्रत्याख्यातसूत्राणामपि स्थितत्वाविशेषाच्च। यद्युच्येत — तिष्ठच्छब्देनाप्रत्याख्यातमित्यर्थो लक्ष्यते, इति। तदपि न, एतादृशक्लिष्टकल्पनायां मानप्रयोजनयोरभावात्। 'पक्त्वौदनं भुज्यते' 'पश्य मृगो धावति' इत्यादाविव गम्यमानतच्छब्दार्थमादाय कर्माकाङ्क्षाशान्तेश्च। **अत्रग्रहणसामर्थ्यादिति**। अत्रशब्देन पुनरभ्यासपरामर्शादभ्यासस्यैव लोपो भविष्यति, न त्वभ्यासावयवस्येति भावः। **अपेक्षिष्याम्ह इति**। यद्यदत्रशब्देन प्राकरणिकं वस्तु समर्पणीयं तत् सर्वं तत्तत्समर्पकपदानुवृत्त्यैव लभ्यत इति भावः। **तस्मान्नार्थ इति**। [7]"विभाषा भवद्भगवदघवतामोच्चावस्य' इत्यत्रापि वस्येति वक्तव्ये 'अवस्य' इत्युक्त्या सर्वादेशता सिध्यतीति भावः। तदेवं 'नानर्थके' इति परिभाषाप्रत्याख्यानेन वर्णसमुदायस्योपधात्वेऽपि दोषाभावं व्यवस्थाप्य, एवं प्रौढ्या परिभाषादिप्रत्याख्याने क्रियमाणे समस्तशास्त्रमाकुलं स्यादित्याशयेन यथाश्रुतसूत्रलभ्यमेवार्थं गम्यमानार्थवाचकपदप्रक्षेपेण दर्शयति — **अलोऽन्त्यात् पूर्वोऽल्लुपधेति वेति**। एतद्वचनं शङ्काकलङ्कितं नेति सूचयितुं भिन्नवचनतयादौ व्याचष्टे — **अथवेति**। **सिद्धमेतदिति**। **एतत्** मया निदर्शितम् 'अल्' इति पदं विनैव **सिद्धं** यथाश्रुतसूत्रेणैवेति

---

[1] पा. सू. ६. ४. ११८.
[2] परिभाषा ३५.
[3] पा. सू. ७. १. ३९.
[4] 'लोप' इति प्रकृतिभागस्यैवोच्चारणाभावरूपार्थवाचकत्वादिति भावः।
[5] श. कौ. पृष्ठम् २७१.
[6] पा. सू. ७. २. ११३.
[7] का. वा. ८. ३. १–२.

भावः। **यथाजातीयक इति**। दृष्टान्ते ब्राह्मणत्वजातीयः, दार्ष्टान्तिके त्वल्त्वजातीयः। यद्यपि 'अलः' इति षष्ठ्येकवचनं निर्धारणे वर्तते, अलां मध्येऽन्त्यात् पूर्व उपधेति वा, 'अलः' इति प्रथमाबहुवचनम्, बहुत्वमविवक्षितम्, अन्त्यात् पूर्वोऽलुपधेति [वा] व्याख्यानेऽपि तुल्यं फलम्, तथाप्येकत्वबहुत्वाविवक्षाकल्पनाप्रयुक्तक्लेशस्तत्रेति भगवता तदुपेक्षितम्॥

[१, ५०२—५०६]

(नारायणीयम्) संदेहविषयस्य कोटचन्तरस्यानुपन्यासादाह — **प्रथमेति**। रूपसामान्यात् प्रश्ने किमधीनो विशेषनिश्चय इत्यत आह — **प्रथमायामिति**। अल्ग्रहणस्यान्त्यशब्दोच्चारणरूपत्वाभावात् [1]तत्करणत्वाभावाच्च दिशेरुच्चारणक्रियत्वानुपपत्तिरित्यत आह — **अभिधीयत इति**। अल्ग्रहणस्य प्रतिपादनरूपत्वाभावात् करणत्वोक्तिः। नन्वल्ग्रहणादल् प्रतिपाद्यते, अन्त्यशब्दादन्त्यः, तत् कथमन्त्यप्रतिपादनेऽल्ग्रहणस्य प्रतिपादनकरणत्वमित्यत आह — **यदीति**। प्रतिपादनमिह न शक्त्या बोधनम्, किं तु प्रतीतिमात्रम्। तच्च सामानाधिकरण्यादस्ति। **अविशेषितत्वात्** अल्त्वेन। न हि साजात्यमवध्यवधिमतोर्नियतम्, अन्यथा दर्शनात् 'नगरात्पूर्वं वनम्' इत्यादाविति भावः। किं संघातस्यैव प्राप्नोति, उत संघातस्यापीत्यत आह — **समुदायेति**। ननु संघातात् पूर्वस्य प्राप्तिरित्यपि दूषणं कथमत्र नास्तीति शङ्कते — **अन्त्येति**। जातिग्रहणे हि तद्गतसंख्यैव वचनावेद्या, न व्यक्तिगता। यथा वक्ष्यति किंत्वविधौ [2]'न चात्र व्यक्तिगतमेकत्वम्, अपि तु जातेः स्वगतम्' इति। परिहरति — **अल इति**। [3]'प्रातिपदिकात्, [4]'सुप्, [5]'सुपा' इत्यादौ जातिग्रहणेऽप्याश्रयगतसंख्या विवक्ष्यते। इह त्वाश्रयगतसंख्याविवक्षायामस्ति कारणमपीति तदप्युक्तम्। प्रागुक्तदूषणानिरसनात् पक्षान्तरोत्थापनमनर्थकमित्यत आह — **अत्रापीति**। **नास्तीति**। उपधाया लघुत्वाभावात्। जसन्तत्वे कथं सूत्रभेद इत्यत आह — **अलिति**। यथाश्रुते ह्यभ्युच्चयदूषणमित्यर्थः। इहालोऽन्त्यविधेर्व्यापारो न विवक्षितः, स्थानषष्ठ्यभावात्। किं तु प्रदेश इत्याह — **उपधाया इति**। ननु स्थानेद्विर्वचने पच्शब्दस्य पच्पच्शब्द आदेश इति तस्यैवार्थवत्त्वम्, नाभ्यासस्य। द्विष्प्रयोगे द्विर्वचने त्वर्थवतो द्विरुच्चारणमिति नानर्थक्यमभ्यासस्य। द्विष्प्रयोगश्च षष्ठे [6]'सिद्धान्तयिष्यते। अतश्चानर्थकविषयस्यालोऽन्त्यविधिपर्युदासस्याभ्यास[7]'कार्येऽप्राप्तेस्तत्पर्युदसनं व्यर्थमित्यत्राह — **अभ्यास इति**। समुदायादेवार्थावगतेः प्रत्येकभागार्थावगत्युत्पत्तावनुभवावृत्तिप्रसङ्गान्न भागेऽर्थवत्त्वम्। ततश्चागमहीनस्य तत्र तत्रार्थविगमनसामर्थ्येऽप्यागमस्थले तत्सहितस्य यथार्थवत्त्वं तथात्र विषये आवृत्तिसहितस्यार्थवत्त्वमनुभवसिद्धमिति तद्बाधितं भागार्थवत्त्वानुमानमित्यर्थः। अत्रानुकरणे विशेष्यमाणेऽदन्तस्यानुकरणस्य [8]'कार्यित्वं स्यादिति न कार्यिण आनर्थक्यम्। अतोऽनुकरणेनाद् विशेष्य इत्यभिसंधायाह — **अव्यक्तेति**। सूत्रेऽस्मिन्नसति नित्यं स्यात् पररूपत्वमिति कथं ज्ञापकमित्यत आह — [9]'**आम्रेडितस्येति**। [10]'यद्यन्त्यस्य पूर्वप्राप्तिः स्यात् तदा निषेधोऽनर्थकः, विकल्पनादेव

---

[1] तत्कारणत्वाभावाच्च — ग.
[2] हलन्ताच्चेति सूत्रे प्रदीपे।
[3] पा. सू. ४. १. १.
[4] पा. सू. २. १. २.
[5] पा. सू. २. १. ४.
[6] सिद्धान्त इष्यते — ग.
[7] कार्यत्वेऽप्राप्तेः — ग.
[8] कार्यत्वं — ग.
[9] प्रदीपे 'वाम्रेडितस्येत्येव' इत्यस्य स्थाने 'आम्रेडितस्य वेत्येव' इति चौखम्बामुद्रिते पाठः। सोऽत्रादृत इति भाति।
[10] यद्यन्तस्य — ग.

पाक्षिकनिवृतेः सिद्धत्वात्। अन्त्यग्रहणं चानर्थकम्, अतद्विषयेऽप्राप्तेः। तस्मान्निषेधान्त्यग्रहणाभ्यां प्राचीनविधेरनन्त्यविषयत्वानुमानमित्यर्थः। एतद्वचनमन्तरेण लोपसिद्ध्यभावात् 'पुनः' इति भाष्यायोगमाशङ्क्याह — **लोप इति**। नन्वसति लोपग्रहणे प्रकृतस्य लोपस्य समस्तत्वाभावादेत्वेनाप्यभ्यासस्य संबन्धः स्यात्, अत आह — **तत्रेति**। घ्वसोरनन्तरश्रुतेनैत्वेन संबन्धान्निराकाङ्क्षत्वमिति न तयोर्लोपसंबन्धाकाङ्क्षा। अभ्यासस्य चेत्यत्र तु किमेतद्वाक्योपात्तविधिश्चेन समर्प्यते, उत प्रस्तुत इति विशये व्याख्यानम्। व्याख्याने लक्ष्यादन्यन्निमित्तमपश्यन्नाह — **योगेति**। **अत्र चेति**। योगविभागसामर्थ्यादेत्वाननुवृत्तिः। ननु लोपश्शब्दात् सोर्हल्ङ्यादिलोपात् कथं शित्त्वेऽपि द्विशकारत्वम्, अत आह — **लोपेति**। प्रातिपदिकाद्धि विभक्तिः, प्रातिपदिकत्वं चाकारान्तस्येति ततो विभक्तिरावश्यकी। कृदन्तत्वोक्तिर्लोपसंज्ञाप्रत्याख्यानाभिप्रायेण। [1]**पृथगिति**। अर्थवत्यननुप्रविष्टम्। अतस्तत्सहितान्न विभक्तिः। यद्येवं तस्येत्संज्ञा न स्यात्, अज्ञातज्ञापनकरणस्योपदेशत्वात्। अभावस्य **च** शकारविहीनेन ज्ञापनात्, अत आह — **तस्य चेति**। [2]उपदिश्यमानाभावे विशेषाधायकत्वाच्छस्य तत्सहितस्योपदेशत्वमित्यर्थः। ननु [3]विशिष्टाभावज्ञापकत्वेन कथमस्योपदेशान्तर्भावः, सत्यपि शे सर्वादेशत्वानुपपत्तेः। न ह्यदर्शनस्य शित्त्वमस्ति। न च संज्ञायां कृतं लिङ्गं संज्ञचर्थं ङमुटष्टित्त्ववदिति वाच्यम्, संज्ञिनोऽभावात्मकत्वेन शित्त्वसंबन्धायोग्यत्वेन संज्ञालिङ्गस्य तादर्थ्याप्रतीतेः, अत आह — **इत्संज्ञेति**। यद्यप्यभावात्मकत्वात् संबन्धिनो न शित्त्वसंबन्धयोग्यत्वम्, अथापि विधीयमानस्य क्वाप्यनुबन्धसंबन्धाभावात् स्मृतिमात्रेणानुबन्धानामुपकारकत्वादिशादिवत् सर्वादेशत्वमस्येत्यर्थः। **सिद्धान्त इति**। वक्ष्यति ह्युत्तरसूत्रे भाष्यकारः 'उपदेश इति हीत्संज्ञोच्यते' इति। ततश्चादेशप्रवृत्तिकाले इकारादिरशिदेव शिता ज्ञाप्यमानस्तत्कार्यभागित्यस्यापि तथात्वम्। [4]"लक्षणहेत्वोः' इति शतुर्नित्यत्वात् तिङप्रयोगोऽनुपपन्न इत्यत्राह — **लक्ष्येति**। एकवाक्योपात्तक्रियाद्वयस्य परस्परसंबन्धोऽवश्यवाच्यः। स च लक्ष्यलक्षणभावात्मक इति कथं तदविवक्षेत्याशङ्क्य वाक्यं भिनत्ति — **तिष्ठतीति**। यदि तर्हि 'तिष्ठति सूत्रम्' इत्यस्य वाक्यशेषाध्याहारेण निराकाङ्क्षत्वम् 'अन्यथा' इत्यस्यानन्वय इत्यत्राह — **तत्त्विति**। उत्थापिताकाङ्क्षयान्वय इति भावः। सूत्र एतावत्पदाभावात् कथमस्य व्याख्यानत्वमित्यत्राह — **तत्रेति**। **सामान्येनेति**। इद्रूपलोपविधाने ह्यजादौ त्वन् व्यवतिष्ठते, न त्वन्विधावज्ग्रहणमस्ति। अनो लोपविधौ बाधकाभावाद्धलादावपि भवति। ननु 'हलि' इत्यनेनान्विशेषणे व्यवधानम्, इदंविशेषणे तु षष्ठीप्रक्लृप्तिरनो न स्यात्। इद्रूपलोपे त्विदंविशेषणत्वम्। न च तत्र षष्ठीप्रक्लृप्त्यपेक्षा, अत आह — **येनेति**। सामर्थ्यं वक्ष्यमाणप्रकारेणेत्याह — **मीमेति**। अत्रग्रहणस्यालोऽन्त्यविधिबाधने सामर्थ्यमाविष्करोति — **अत्रेति**। **एतच्चेति**। अन्त्यस्यात्वेन निश्चयकीर्तनात्॥

---

[1] प्रदीपे 'शकारः प्रतिनिर्दिश्यते' इत्यस्य स्थाने 'शकारः पृथङ्निर्दिश्यते' इति पाठोऽभिमत इति भाति।

[2] उपदिश्यमानो योऽभावस्तत्रेत्यर्थः।

[3] विशिष्टो योऽभावस्तस्य ज्ञापकत्वेनेत्यर्थः।

[4] पा. सू. ३. २. १२६.

तस्मिन्निति निर्दिष्टे पूर्वस्य. १. १. ६६.

तस्मादित्युत्तरस्य. १. १. ६७.

[१, ५०७–५११]

(**लघुविवरणम्**) [1]'तस्माच्छसो नः' इत्यत्र 'तस्मात्' इति परिभाषोपस्थानेन किं व्यवच्छिद्यते, तत्राह — **वृक्षानित्यत्रेति**। पञ्चमीषष्ठीसंदेहे प्राथम्याच्छस इति पञ्चमीति यदा निश्चयः, पूर्वसवर्णदीर्घावयवत्वाच्च पूर्वसवर्णदीर्घपरामर्शनात् 'तस्मात्' इत्यनेनोपचारात् शसुच्यते, तदा [2]सकारस्यापि नत्वप्राप्तौ तन्निवृत्तिः परिभाषया क्रियत इत्यर्थः। 'तस्मात्' इत्यनेन पूर्वसवर्णदीर्घपरामर्शिना सामानाधिकरण्यायोगादेव शसं इति षष्ठीति व्याख्यास्यत इति **शङ्कते** — **अथेति**। पूर्वसवर्णदीर्घावयवत्वाच्च पूर्वसवर्णदीर्घ इत्युच्यमाने लाक्षणिकः प्रयोगः स्यादिति भावः। परिहरति — **एवमपीति**। सामान्यविशेष[3]शब्दयोर्जात्यन्यविशेषपरत्वं व्यावर्तयति — **यदिति**। सोपस्कारत्वात् सूत्राणामन्तरेणापि निर्दिष्टग्रहणं निर्दिष्ट इति लब्धे पुनर्निर्दिष्टग्रहणादयमर्थो भवति —शब्दे निर्दिष्ट इति। [4]सौत्रेण हि निर्दिष्टशब्देन बहिर्भूतवाचिना शब्दोऽभिधीयते। सामर्थ्याक्षिप्तश्चाभिहितपर्याय इत्यभिप्रेत्याह — **अन्तरेणापीति**। नन्वर्थेन पौर्वापर्यासंभवादेव [5]'जनपदे लुप्' इत्यादौ परिभाषा नोपस्थास्यत इत्यत आह — **तत्रेति**। [6]'जनपदे लुप्' इत्यत्र जनपदशब्दो यद्यर्थपरः, ततस्तेन पौर्वापर्यं न संभवति। अथ शब्दपरः, ततो निर्दिष्टग्रहणे सत्यपि परिभाषोपतिष्ठेत[7]। अथोच्येत — अर्थपरत्वेऽपि निर्दिष्टग्रहणाभावे परिभाषोपस्थितावर्थेन पौर्वापर्यासंभावादेव तद्वाची शब्दो गृह्यत इति, अर्थनिर्देशे हि **जनपदे** यः प्रत्यय इति विशेषणविशेष्यभावेऽनियमप्रसङ्गाभावान्नियमफला परिभाषा नोपस्थास्यत इत्यभिप्रेत्याह — **अयं भाव इति**। षष्ठीप्रक्लृप्त्यर्थं परिभाषाद्वयमित्यस्मिन् पक्षेऽनियमप्रसङ्गाभावेऽपि परिभाषोपतिष्ठेतेत्यत आह — **यदि चेति**। परिहरति — **वर्णानामिति**। पूर्वस्येति वचनाद् व्यवहितस्य [8]न भविष्यतीत्यत आह — **व्यवहितेऽपीति**॥

[१, ५०७–५११]

(**विवरणम्**) 'तस्मिन्' इति परामृष्टखञ्व्यवधानाय संबुद्धयन्तमुदाहरति — **यौष्माकीणेति**। [9]'तस्माच्छसो नः' इत्यत्र व्यवच्छेद्यं दर्शयति — **वृक्षानिति**। तस्मादिति साहचर्यात् शस इति पञ्चमीति व्याख्याने पूर्वसवर्णदीर्घपरामर्शितच्छब्दसामानाधिकरण्याय शस्शब्दः **श**सवयवे वर्तते, तथा चादिवद्भावेन शसवयवात् पूर्वसवर्णदीर्घात् पूर्वस्यापि [10]सकारस्य नत्वं प्राप्तम्, 'तस्मात्' इति वचनान्न भवतीत्यर्थः। अनपेक्षितादपेक्षितस्य [11]प्रशस्तत्वात् 'नः' इत्यनेन [12]च स्थानिनोऽ-

---

[1] पा. सू. ६. १. १०३.
[2] षकारस्यापि — ड, ढ, ण.
[3] शब्दयोर्विशेषपरत्वं — ड, ढ.
[4] सूत्रे निर्दिष्ट — ड, ढ.
[5] पा. सू. ४. २. ८१.
[6] पा. सू. ४. २. ८१.
[7] तिष्ठते — ड.
[8] न भवतीत्यत आह — ड, ढ.
[9] पा. सू. ६. १. १०३.
[10] षकारस्य — च, छ, ञ, ट.
[11] प्रशस्यत्वात् — ञ.
[12] चकारो नास्ति — च, छ.

पेक्षितत्वात् षष्ठी शस इति शङ्कते — **अथेति**। सुतरां व्यवच्छेद्यमस्तीत्याह — **एवमपीति**। **तद्वत इति**। यद्यपि थाला प्रकारे बोधिते तद्वतोऽभिधानाय मत्वर्थीयः कर्तुमुचितः, तथाप्येवमादिप्रयोग-साधुत्वज्ञापनाय त्रातीयरः प्रयोग इति भावः। [1]ननु स्वेन दूषितं कथमुदाहरणत्वेन दद्यादित्यत आह — **सिद्धान्तेति**। **इतिकरण इति**। [2]इतिकरणं विना पूर्वं यः पदार्थस्ततोऽर्थान्तरमितिः प्रतिपादयति, इह तु [3]'स्वं रूपम्' इति वचनात् पूर्वं स्वरूपस्य ग्रहणं [4]प्राप्तमिति [5]इतेरर्थ-पदार्थकतेति भावः। **सप्तम्यर्थेति**। यत्राधिकरणनिर्देशोऽवधिनिर्देशश्चेत्यर्थः। **विशेषपरित्यागे-नेति**। निर्धारितविशेषपरित्यागेनेत्यर्थः। **सामान्यम्** अनिर्धारितविशेष इत्यर्थः। [6]'तस्मिन्नणि च' [7]'तस्माच्छसो नः' इत्यत्रापि प्रकरणान्निर्धारितविशेषप्रतिपत्तेरित्यर्थः। **सामान्यस्य** यः कश्चि-द्विशेष इत्यस्य। **सर्वविशेषेषु** इदन्तयानिर्धारितविशेषेषु, **भावात्** अभेदेन भावादित्यर्थः। सामान्यविशेषशब्दयोरुक्तमर्थमजानानस्य चोद्यमित्यभिप्रेत्याभिप्रायमाह — **सामान्येति**। कथ-मनवस्थितिः, यत् पूर्वमवगम्यते तत् सामान्यम्, यत् पश्चात् स विशेष इति व्यवस्थोपपत्तेरित्यत आह — **कदाचिदिति**। सर्वनाम्नोऽन्यत्र [8]'शब्देन बोध्यं सामान्यं दर्शयति — **यदिति**। सर्व-नाम्नस्तु बोध्यं सामान्यमनिर्धारितविशेष [9]'एवेत्यभिप्रेत्याह — **इहापीति**। **सामान्यम्** अनिर्धारित-विशेषात्मकमधिकरणमात्रं निर्दिष्टमित्यर्थः। न ह्यनिर्धारितविशेषव्यतिरेकेण गवादिशब्दवत् सामान्यं सर्वनाम्नोऽभिधेयं संभवति। **निर्देशप्रयोजनानां** निर्देश्यानामिति यावत्। **तमपेति**। द्विवचनविभज्योपपदत्वाभावेन तरपः प्राप्त्यभावादिति भावः। यथाश्रुतमेव कस्मान्न गृह्यत [10]'इत्यत आह — **न पुनरिति**। **अन्तरेणापीति**। साकाङ्क्षेषु योग्यपदाध्याहारादिति भावः। **पुनरिति**। पुनर्निर्दिष्टशब्देन बहिर्भूत इत्युक्ते सप्तम्यर्थे बहिर्भूतात्मके प्रतिपादित इत्यर्थो भवति। कोऽसौ बहिर्भूतः सप्तम्यर्थ इत्यपेक्षायां बहिर्भावस्यावध्यपेक्षत्वादवधेश्च सूत्रोपात्तस्यैव तत्र तत्र ग्रहणात् तस्य [11]च शब्दात्मकत्वादवधिमानपि बहिर्भूतात्मकः शब्द एव प्रतीयत इति शब्दे [12]सप्त-म्या निर्दिष्टे पूर्वस्य कार्यमिति लभ्यत इति भावः। ननु प्रत्ययस्यार्थेन पौर्वापर्यासंभवात् कथं [13]'जनपदे लुप्' इत्यत्र 'तस्मिन्' इति निर्दिष्टत्वस्योपस्थानमित्यत आह — **तत्रेति**। **नन्विति**। न चोपसर्गमात्रविषयः पूर्वः प्रश्नः, तथा सति 'किमर्थमुपसर्गनिर्देशः क्रियते, न दिष्ट इत्येवोच्येत' इति भवितव्यमिति भावः। [14]'जनपदे लुप्' इत्यत्र जनपदशब्दो यद्यर्थपरस्ततस्तेन पौर्वापर्यं न संभवतीति[15] न परिभाषोपस्थानम्। अथ शब्दपरः, निर्दिष्टग्रहणे सत्यपि परिभाषोपतिष्ठते। [16]अथोच्येत, अर्थपरत्वेऽपि निर्दिष्टग्रहणाभावे परिभाषोपस्थितावर्थेन पौर्वापर्यासंभवादेव तद्वाची शब्दो [17]गृह्यत इति, तन्न, अर्थनिर्देशे हि जनपदेऽर्थे यः प्रत्यय इति विशेषणविशेष्यभावेऽनियम-प्रसङ्गाभावान्नियमफला परिभाषा नोपस्थातुमर्हतीत्यभिप्रेत्य परिहरति — **अयमिति**। षष्ठी-

---

[1] ननु तस्येदं दूषितं — ञ.
[2] इति विना — च, छ, ट.
[3] पा. सू. १. १. ६८.
[4] प्राप्नोतीति — ट.
[5] इतेरर्थपदार्थतेति — च, छ.
[6] पा. सू. ४. ३. २.
[7] पा. सू. ६. १. १०३.
[8] शब्दे बोध्यं — ट.
[9] एवकारो नास्ति — ञ.
[10] इत्याह — च, छ.
[11] चशब्दो नास्ति — च, छ, ट.
[12] सप्तमीनिर्दिष्टे — च, छ.
[13] पा. सू. ४. २. ८१.
[14] पा. सू. ४. २. ८१.
[15] 'इति न परिभाषोपस्थानम्' इति नास्ति —च, छ, ट.
[16] अथोच्यते — च, छ.
[17] गृह्येतेति — च, छ, ट.

[१, ५०७–५११]

प्रक्लृप्तिपक्षेऽप्याह — **यदि चेति**। **शब्द इति**। लाघवादसंदेहाच्चेति भावः। निमित्त-स्थानिनोरन्येनाव्यवधानं संहितेति मत्वा चोदयति — **नन्विति**। मध्ये वर्णशून्यकालाभावः संहितेति परिहरति — **नेति**। नन्वसत्यपि निर्दिष्टग्रहणे 'तस्मिन्निति पूर्वस्य' इत्युपस्थानात् समिधावित्यत्र व्यवहितत्वेनेकोऽचः पूर्वत्वाभावान्न यण् भविष्यतीत्यत आह — **व्यवहितेऽपीति**। लक्ष्यभेदेन लक्षणभेदश्चेत्यभिप्रेत्याह — **यत्रेति**॥

(**उद्द्योतनम्**) ननु 'दध्यत्र' [1]इत्यादेरुदाहरणस्य स्फुटत्वात् प्रश्नायोगः, अत आह — **इतिकरणस्येति**। **तत्रैवेति**। परिभाषाया बहुव्यापित्वात् [2]'नैकमुदाहरणम्' इति न्यायाच्च सूत्रद्वय-वैयर्थ्यपरिहाराय सप्तमीपञ्चमीनिर्दिष्टमात्रं गृह्यते, न स्वरूपमित्यर्थः। ननु [3]'तस्मिन्नणि' इत्यत्र युष्मदस्मदोरित्यनुवर्तनात् तयोः प्रत्ययात् पूर्वयोरेवादेशो भविष्यतीति पूर्वग्रहणस्य परिभाषाया वा न [4]तत्र प्रयोजनम्, [5]एवं [6]'तस्मात्' इत्यत्रापि शस इति षष्ठ्यन्तत्वात् तस्यैव नत्वं भविष्यती-त्युत्तरग्रहणस्य परिभाषाया [7]वा न प्रयोजनम्, अत आह — [8]'**अत्रेति**। [9]'तस्मिन्नणि' [10]'तस्मा-च्छसः' इति सूत्रद्वय इत्यर्थः। **व्यवच्छेद्यं** पूर्वोत्तरग्रहणयोरित्यादिः। 'तस्मिन्' इति [11]खञ् परा-मृश्यते, सप्तमी चौपश्लेषिकसंबन्धे। तथा च पूर्वोत्तरयोः खञुपश्लेषतौल्यात् पूर्वस्येव परस्या-प्यादेशप्रसङ्गात् तन्निवृत्तये पूर्वग्रहणं कर्तव्यमित्यर्थः। [12]खञोऽव्यवधानसंपादनाय संबुद्ध्यन्तो-पादानम्। 'देहि, दीयताम्' इत्यत्र वस्त्रादिकमित्यध्याहारः। [13]'तस्माच्छसः' इत्यत्रोत्तरग्रहणस्य व्यवच्छेद्यमाह — **वृक्षानिति**। 'तस्मात्' [14]इति साहचर्यात् शस इति पञ्चमीति [15] चेत् पूर्व-सवर्णदीर्घपरामर्शिना 'तस्मात्' इत्यनेन सामानाधिकरण्याय शस इति तदवयवे वर्तते। तत-श्चादिवद्भावेन शसोऽवयवभूतात् पूर्वसवर्णदीर्घात् पूर्वस्य सस्यापि[16] नत्वं प्राप्तम्, 'तस्मादित्युत्तरस्य' इति वचनान्न भवतीत्यर्थः। [17]ननु स्थानिसमर्पणाय शस इति षष्ठी, न पञ्चमीति नोक्तदोष इति शङ्कते — **अथेति**। **आनिति**। अवर्णस्य द्वितीयाबहुवचनम्। **पूर्वस्य** 'उच्चरतः' इति पदस्थस्य। [18]'थाल्जातीयरोरन्यतरवैयर्थ्यं परिहरति — **थालेति**। **तद्वत इति**। यद्यपि जातीयरैव विवक्षितसिद्धेस्थालो वैयर्थ्यम्, तथाप्येतादृशप्रयोगसाधुत्वख्यापनायोभयप्रयोग इत्याह — **लौकिक इति**। [19]'इदं च' इति भाष्यं न [20]पूर्वपक्षिणः, तेन तदुदाहरणत्वानङ्गीकारात्। किं तु सिद्धान्तिन इत्याह — **सिद्धान्तेति**। **इतिकरण इति**। इति विना योऽर्थः प्रतीयते ततोऽर्थान्तरमितिना प्रति-

---

[1] इत्याद्युदाहरणस्य — म.
[2] महाभाष्यम् ७. १. ९६.
[3] पा. सू. ४. ३. २.
[4] 'तत्र' इति नास्ति — म.
[5] 'एवम्' इत्यादि 'न प्रयोजनम्' इत्यन्तं नास्ति — म.
[6] पा. सू. ६. १. १०३.
[7] 'वा' इति नास्ति — ऋ.
[8] तत्रेति — ऋ.
[9] पा. सू. ४. ३. २.
[10] पा. सू. ६. १. १०३.
[11] 'खञ्' इत्यनन्तरम् एवकारोऽधिकः — अ.
[12] खञ्व्यवधान — म.
[13] पा. सू. ६. १. १०३.
[14] 'इति' इत्यस्यानन्तरं चकारोऽधिकः — म.
[15] इतिशब्दो नास्ति — ऋ.
[16] अपिशब्दो नास्ति — अ.
[17] न च स्थानि — अ.
[18] थाल्जातीयरन्यतर — अ.
[19] एवं चेति भाष्यं — अ.
[20] पूर्ववादिनः — अ.

पाद्यते, न तु स्वरूपपदार्थकत्वमेवेति भावः। नन्वनुकार्यानुकरणयोरभेदादनुकरणस्यापि सर्वनामत्वमविरुद्धम्, अत आह — **सूत्रान्तरेति**। **सप्तम्यर्थः** अधिकरणम्, **पञ्चम्यर्थः** अवधिः। **विशेषपरित्यागेन** [1]निर्धारितेत्यादिः। **सामान्यम्** अनिर्धारितविशेषः। **सामान्यस्य** यः कश्चिद्विशेष इत्यस्य। **सर्वविशेषेषु** इदन्तया निर्धारितविशेषेषु। **भावात्** अभेदेन [2]सत्त्वात्। सामान्यविशेषशब्दयोरुक्तमर्थमजानतः प्रश्न इत्यभिप्रेत्य यथाश्रुतभाष्यानुसारेण प्रश्नाशयमाह — **सामान्येति**। ननु [3]पूर्वप्रतीतं सामान्यं पश्चात् प्रतीतो विशेष इति व्यवस्थोपपत्तेः कथमनवस्थितिः, अत आह — [4]**कदाचिदिति**। **पूर्वं कृष्णादेरिति**। गोत्वव्यञ्जकावयवविशेषसंनिकर्षाभावदशायामिति भावः। 'अपर आह' इत्यतः प्राक्तनभाष्यतात्पर्यमाह — **यद्विशेष्यमिति**। ननु गोत्वसामान्यस्य कथं विशेषत्वम्, अत [5]आह — **यत्त्विति**। **परोपकारितया** परव्यावर्तकतया। घटादि[6]साधारणस्य कृष्णशब्दार्थस्य गोत्वमपि विशेषकमिति विशेष इत्युच्यत इत्यर्थः। दार्ष्टान्तिकेऽपि योजयति — **इहापीति**। **सामान्यम्** अनिर्धारितविशेषरूपमधिकरणमात्रम्, [7]न हि सर्वनाम्ना गवादिशब्देषु गोत्वादिवत् [8]किंचित् सामान्यं प्रतिपादितमस्ति। विशेषणविशेष्यत्वयोरेकत्र विरोधादसंभवशङ्कानिरासार्थत्वेन 'पितापुत्रवत्' इति भाष्यं व्याचष्टे — **जन्येति**। 'एते' इत्यस्य व्यावर्त्यांशमाह — **सप्तमीति**। स्पष्टप्रतिपत्तय इत्यादिः। **इत्याह** इति शङ्कायामाह। [9]'प्रयोजनम्' इति सूत्रेणात्र [10]ठञिति सूचयितुमाह — **निर्देशेति**। निर्देश्यानामिति यावत्। एवं च निर्देश्यानां मध्ये ये सर्वनाम्ना निर्दिश्यन्ते ते युक्ततरा भवन्तीति भाष्यार्थः। ननु द्विवचनविभज्योपपदाभावात् कथमत्र तरप्, अत आह — **भाष्यकारेति**। ननु 'सप्तमीनिर्दिष्टे'[11] इत्युक्तेऽपि बहुव्याप्तिस्तुल्या, अत आह — **यदि हीति**। 'तस्मिन्निति' इत्यत्रेतिकरणेन स्वरूपग्रहणनिरासाद् बहुव्याप्तिरिति भावः। यथाश्रुतमेव कुतो न ग्राह्यम्, अत आह — **न पुनरिति**। **अन्तरेणापीति**। साकाङ्क्षेषु योग्यपदाध्याहारादिति भावः। **बहिर्भावमिति**। निर्दिष्टशब्दस्य बहिर्भूतार्थकत्वे **तस्मिन्** सप्तम्यर्थे [12]बहिर्भूतात्मके, इत्यर्थो भवति। बहिर्भावस्य सावधिकतयावध्यपेक्षायां शब्दानुशासनेऽस्मिन् शब्द एवावधिर्गृह्यत [13]इत्यवधिमानपि शब्द [14]एव प्रतीयत इति शब्दे सप्तमीनिर्दिष्टे पूर्वस्य कार्यमिति[15] लभ्यत इति भावः। शब्दस्यार्थोऽन्तरङ्गः प्रतिपाद्यतयेति न बहिर्भूतः। किं तु शब्द [16]एवेत्यप्याहुः। ननु प्रत्ययस्यार्थेन पौर्वापर्याभावात् [17]'जनपदे लुप्' इत्यत्र कथं 'तस्मिन्' इति परिभाषोपस्थानम्, अत आह — **तत्रेति**। [18]तथा च 'औदुम्बरः पञ्चाला [19]इति चातुरर्थिकौ' इति प्रयोगे जनपदवाचिपञ्चालशब्दे परतः 'औदुम्बरः' इत्यत्र चातुरर्थिकप्रत्ययस्य लुप् स्यात्। 'औदुम्बरो जनपदश्च रम्यौ'

---

[1] निर्धारितपरित्यागेनेत्यर्थः — म.
[2] भावात् — अ.
[3] पूर्वं प्रतीतं — अ.
[4] 'कदाचिदिति' इति नास्ति — म.
[5] आह — परोपकारितयेति — म.
[6] साधारणकृष्ण — अ, म.
[7] 'न हि' इत्यादि 'प्रतिपादितमस्ति' इत्यन्तं नास्ति — म.
[8] किंचित् प्रतिपाद्यं सामान्यमस्ति — ऋ.
[9] पा. सू. ५. १. १०९. 'प्रयोजनमिति' इत्यादि 'निर्देश्यानां मध्ये' इत्यन्तं नास्ति — म.
[10] ठगिति — अ, ऋ.
[11] 'निर्दिष्ट इत्युक्तेऽपि' इत्यादि 'बहिर्भावमिति' इत्यन्तं नास्ति — म.
[12] 'बहिर्भूतात्मके' इति नास्ति — म.
[13] इतिशब्दो नास्ति — म.
[14] एव गृह्यत इत्यर्थः। शब्दे — म.
[15] इतिशब्दो नास्ति — ऋ.
[16] एवेत्याहुः — अ.
[17] पा. सू. ४. २. ८१.
[18] तदा औदुम्बरः — म.
[19] 'इति चातुरर्थिकौ' इति नास्ति — ऋ.

[1]इत्यत्रापि प्रसङ्गो ज्ञेयः। पूर्वोक्तप्रयोजनाक्षेपेणेयं शङ्केत्याह — **अयमिति**। **यः प्रत्यय इति**। [2]लुप्स्थानित्वेनोपस्थितप्रत्ययस्यैव तदर्थकत्वेन [3]विशेषणसंभवे तद्वाचिशब्दान्तरपरत्वकल्पने मानाभावादिति भावः। षष्ठीप्रक्लृप्तिक्षेऽप्याह — [4]**यदीति**। अर्थव्यावृत्तिमात्रं चेत्० प्रयोजनं निर्दिष्टग्रहणेन तद्व्यावृत्तेः क्लिष्टत्वात् [5]'शब्दे पूर्वस्य' इत्येव वक्तव्यं स्यादित्यर्थः। पूर्वप्रयोजनासंभवात् प्रयोजनान्तरकथनमित्याह — **पूर्वोक्तेति**। आनन्तर्यार्थत्वमुपपादयति — **निःशब्द इति**। निमित्तस्थानिनोरन्येनाव्यवधानं संहितेति मन्वानः शङ्कते — **नन्विति**। मध्ये वर्ण[6]शून्यकालाभावः संहितेति परिहरति — **नैष इति**। नन्वसत्यपि निर्दिष्टग्रहणे 'तस्मिन्निति पूर्वस्य' [7]इति पक्षेऽपि धव्यवहितस्येकोऽचः पूर्वत्वाभावान्न 'समिधौ' इत्यादौ प्रसङ्गः, अत आह — **व्यवहितेऽपीति**। नन्वव्यवहितसंभवे व्यवहितं न गृह्यत इत्याशङ्क्य [8]लक्ष्यभेदेन लक्षणभेदाश्रयेणाह — **यत्रेति**॥

[१, ५०७–५११]

(**रत्नप्रकाशः**) **अन्यथाजातीयकेनेति**। [9]'अथेत्ययं शब्दः' इत्यत्रेवेतिकरणेन तस्मिन्तस्माच्छब्दयोः स्वरूपेऽवस्थापिततया यत्र तन्निर्देशेन विहितं कार्यं तदेवोदाहर्तुमुचितमिति भावः। तत्रान्यथाभूता जातिर्यस्येति थालन्तस्य जातिशब्देन बहुव्रीहौ ततः [10]'जात्यन्ताच्छ बन्धुनि' इति स्वार्थे छप्रत्ययः। एतेन 'थाला प्रकारमात्रमभिधीयत इति तद्वतोऽभिधानाय जातीयर्प्रत्ययः कृतः। लौकिके प्रयोगे लाघवानादरप्रदर्शनाय प्रत्ययद्वयप्रयोगः। केवलेनापि जातीयरा प्रकारवान् गम्यते' इति कैयटो निरस्तः। उपमानवाचकात् पटुशब्दप्रभृतेरुपमेये जातीयर्प्रत्ययस्य विधीयमानत्वेन प्रकृते तस्याप्रसक्तेः। **इदं चापीति**। यथा [11]'तस्यापत्यम्' [12]'तस्मै हितम्' [13]'तेन प्रोक्तम्' इत्यादौ सर्वनामप्रकृतिकषष्ठ्येकवचनान्तादिना सकलषष्ठ्यन्ताद्यनुवादो भवति, एवमत्रापि तस्मिन्तस्माच्छब्दाभ्यां सकलसप्तमीपञ्चम्यन्ता निर्दिश्यन्ते। इतिशब्देन तन्निर्देशहेतुककार्यपरत्वं तयोर्बोध्यते। तथा च 'तस्मिन्निति' इत्यनेन सप्तमीनिर्देशेन विहितं कार्यमित्यर्थो लभ्यते। 'तस्मादिति' इत्यनेन पञ्चमीनिर्देशेन विधीयमानं कार्यमिति। तथा च यणीत्वादिकमप्यनयोरुदाहरणं भवतीति भावः। **सर्वनाम्नायमिति**। न तु तस्मिन्तस्मादित्यनयोरनुकरणे एते इति भावः। **विशेषा अपीति**। अचि, हलि, उदः, उपसर्गात्, इत्यादिविशेषा अपीत्यर्थः। [14]'तस्मिन्नणि च' [15]'तस्माच्छसः' इत्यत्र सर्वनाम्नैव निर्देशात् तस्य [16]'सामान्यनिर्दिष्टत्वमभ्युपेत्य तदपेक्षया समुच्चये 'अपि'शब्दः। एतेन 'अपिः संभावनायां, न समुच्चये। न हि विशेषपरित्यागेनेह शास्त्रे सामान्यमस्ति, यदुदाहरणं स्यात्। तस्मात् सर्वे विशेषा इहोदाहरणमित्यर्थः, सामान्यस्य सर्वविशेषेषु भावात्' इति कैयटो निरस्तः। 'इदं चापि' इति पूर्वभाष्यानुसारेणापेः समुच्चयपरतयैव व्याख्यातुमुचितत्वात्। लब्धावकाशः

---

[1] इत्यत्रापि स ज्ञेयः — म; इत्यत्रातिप्रसङ्गो ज्ञेयः — ऋ.
[2] लुपः स्थानित्वेनोपस्थित —अ.
[3] विशेषणत्वसंभवे — म.
[4] यदिति — म.
[5] शब्दपूर्वस्य — अ, म.
[6] शून्यकोटचभावः — अ, ऋ.
[7] इत्युपस्थानाद् व्यव — अ, ऋ.
[8] लक्ष्यभेदे लक्षण — म.
[9] महाभाष्यम्. पस्पशाह्निकम्।
[10] पा. सू. ५. ४. ९.
[11] पा. सू. ४. १. ९२.
[12] पा. सू. ५. १. ५.
[13] पा. सू. ४. ३. १०१.
[14] पा. सू. ४. ३. २.
[15] पा. सू. ६. १. १०३.
[16] सामान्यानिर्दिष्टत्वम् — ब.

कुतर्कवासनावासितान्तःकरणः कश्चित् पृच्छति — **किं पुनरिति**। **गौः सामान्यमिति**। गौरित्युक्ते गोमात्रस्य सर्वस्य प्रतीतेरिति भावः। **कृष्णो विशेष इति**। 'कृष्णो गौः' इत्युक्ते गोविशेषस्य प्रतीतेरिति भावः। तं भावमविद्वान् पुनः पृच्छति — **न तर्हीति**। **भवति चेति**। तादृशविवक्षायां सत्यामिति भावः। तमपि भावमज्ञात्वा पुनराह — **यदि तर्हीति**। **कृष्णः सामान्येनेति**। कृष्णो धावति, क इत्यपेक्षायां 'गौः' इति विशेषसमर्पणादिति भावः। तदेवं पर्यायेण सामान्यविशेषभावमेकस्योपपाद्य क्वचिद्यौगपद्येनापि सामान्यविशेषभावं प्रतिपादयितुमाह — **अपर आहेति**। **पितापुत्रवदिति**। यथा [1]"पराशरात्मजं वन्दे शुकतातं तपोनिधिम्' इत्यत्रैक एव व्यासः शुकापेक्षया पितेति पराशरापेक्षया पुत्र इति च युगपद्व्यपदिश्यते, तथा 'राजपुरुषाश्वः' इत्यादौ पुरुषादिरश्वाद्यपेक्षया विशेषणत्वेन राजाद्यपेक्षया विशेष्यत्वेन [**च**], विशेष्यविशेषणे एव सामान्यविशेषाविति भावः। ननु स्पष्टप्रतिपत्तये 'सप्तमीनिर्दिष्टे पूर्वस्य' 'पञ्चमीनिर्दिष्टे परस्य' इत्येव कुतो न सूत्रितमित्यत आह — **एते खल्वपीति**। एते हीत्यर्थः। **नैर्देशिकानामिति**। अचि, हलि, उदः, उपसर्गात्, इत्यादिनिर्देशेन विहितानां कार्याणाम्, 'उपगोः, पाणिनिना' इत्यादिषष्ठीतृतीयान्तानां च **निर्देशो** ज्ञापनं प्रयोजनं येषां ते नैर्देशिकाः 'सप्तमीनिर्दिष्टे, तस्मिन्निति' 'पञ्चमीनिर्दिष्टे, तस्मादिति' 'षष्ठ्यन्तादपत्ये, तस्यापत्यम्' 'तृतीयान्तात् प्रोक्ते, [तेन प्रोक्तम्'] इत्यादयः शब्दाः, तेषामिति निर्धारणे षष्ठी, तत्र [2]"प्रयोजनम्' इति सूत्रेण निर्दिष्टेऽर्थे [3]"प्राग्वतेष्ठञ्' इति ठञ्। **वार्त्ततरका इति**। **वार्त्ताः** युक्ताः, अतिशयेन वार्त्ता वार्त्ततराः, त एव वार्त्ततरकाः, स्वार्थे कन्। एतेन 'भाष्यकारवचनादत्र तरप्प्रत्ययः। तमपा ह्यत्र भाव्यम्' इति कैयटो निरस्तः। सर्वनामासर्वनामभेदेन निर्देशानां द्वैविध्यं विवक्षित्वा तत्र सर्वनामघटितनिर्देशानां प्रकर्षविवक्षायां तरप एव युक्तत्वात्। **बहुतरकमिति**। पूर्ववत् तरप्कनौ ज्ञातव्यौ। **व्याप्यत इति**। 'तस्मिन्निति' इत्यनेन यणादिकार्यमजादिनिमित्तं च परामृश्यते। 'तस्मादिति' इत्यनेन पूर्वसवर्णादिकार्यमुदादिनिमित्तं च परामृश्यते। 'सप्तमीनिर्दिष्टं' 'पञ्चमीनिर्दिष्टम्' इत्युक्ते तु कार्यमेव परामृश्येत। 'सप्तमीनिर्दिष्टे पञ्चमीनिर्दिष्टे' इत्युक्ते निमित्तमेव परामृश्येतेत्यभिमतार्थलाभ इति भावः। **अथ किमर्थमिति**। तस्मिन्निति तस्मादित्यंशाभ्यामेव कार्यस्य निमित्तस्य चावधेः समर्पणान्निर्दिष्टशब्दः किमर्थ इति भावः। **अर्थे मा भूदिति**। 'अचि, हलि' इत्यादौ सप्तमीनिर्दिष्टत्वेनाजादिशब्दरूपनिमित्तस्येव सप्तमीनिर्दिष्टत्वाविशेषेण [4]"जनपदे लुप्' इत्यादौ जनपदादिरूपस्यार्थस्यावधित्वेनोपादानं मा भूदित्येवमर्थमिति भावः। उपहसति — **किमिति**। **उपसर्गेणेति**। तद्विशिष्टेनेत्यर्थः। **शब्दश्च शब्दाद्बहिर्भूत इति**। पूर्वत्वेन परत्वेन वा बहिर्भावः शब्दाच्छब्दस्यैव संभवति, न त्वर्थस्येति भावः। तर्ह्यर्थस्यावधित्वासंभवादेव ग्रहणं न भविष्यति, व्यर्थं निर्दिष्टग्रहणमित्याशयेन पृच्छति — **अथेति**। **आनन्तर्यमात्र इति**। आनन्तर्ये सत्येवेत्यर्थः। **समिधाविति**। ननु 'अचि' इत्यादिसप्तम्यौपश्लेषिकाधार इत्याश्रित्य [5]"संहितायाम्' इत्यधिकारस्य भगवता प्रत्याख्यातत्वादत्रेकोऽच्युपश्लिष्टत्वाभावादेव यण् न भविष्यतीति व्यर्थमेव निर्दिष्टग्रहणमिति चेन्न, शब्दस्य शब्दं प्रत्याधारताया असंभवेनानन्तर्यलक्षणमेवाधाराधेयभावमाश्रित्य प्रौढचा तस्य प्रत्याख्यानेऽपि वस्तुतोऽप्रत्याख्यानात्। अन्यथा तादृशाग्रहे शास्त्रान्तरमेवेदं स्यात्। एतेन "ननु [6]"संहितायाम्'

---

[1] पूनाप्रकाशिते महाभारते आदौ पाठान्तरत्वेन निर्दिष्टोऽयं श्लोकः। विष्णुसहस्रनाम्न आदौ पठ्यमानध्यानश्लोकोऽयम्।
[2] पा. सू. ५. १. १०९.
[3] पा. सू. ५. १. १८.
[4] पा. सू. ४. २. ८१.
[5] पा. सू. ६. १. ७२.
[6] पा. सू. ६. १. ७२

इत्युच्यते। न च व्यवहितयोः संहितास्ति। अचीति चौपश्लेषिकमधिकरणं निर्दिष्टम्। न च व्यवहित उपश्लिष्टो भवति। नैष दोषः। वर्णानां परः संनिकर्षः संहिता। सा चात्रास्ति। अचीति सत्सप्तमी विज्ञायते। व्यवहितेऽपि पूर्वशब्दो वर्तत इति यत्र विषये यथाभूत इक् संभवति — अनन्तरो व्यवहितो वा, तत्र तथाभूतस्यैव यणादेशः स्यात्" इति कैयटो निरस्तः। एतादृशमौर्ख्यप्रयुक्तशङ्कासमाधानयोराश्रयणे शास्त्रस्य समाप्त्यभावप्रसङ्गात्॥

[१, ५०७–५११]

(**नारायणीयम्**) शास्त्रे सप्तमीनिर्देशे सुप्रसिद्धत्वादुदाहरणप्रश्नः कथमित्यत्राह — **इतीति**। किं यत्र तस्मिन्ग्रहणादिकं तदेवोदाहरणम्, उतान्यदपीति प्रश्न इत्यर्थः। सतीतिकरणे कथमन्यस्योदाहरणत्वोक्तिः, अत आह — **यदीति**। तावन्मात्रस्योदाहरणानुपपत्तेस्तदर्थनिर्देशस्य सर्वस्योदाहरणत्वमित्यर्थः। कैश्चित्तु तत्रैतदुपस्थाने फलाभावादर्थग्रहणमिति व्याख्यातम्, तदयुक्तमित्याह — [1]**अत्र चेति**। संबुद्ध्युदाहरणं विभक्तिव्यवधानं निरसितुम्। **वृक्षानिति**। 'तस्मात्, शसः' इति समानाधिकरणे पञ्चम्यौ, शस्पदं च तदवयवलक्षकम्। आदिवत्त्वाच्च दीर्घस्य शसवयवत्वम्, ततश्चात्रापि प्रसङ्ग इत्यर्थः। **अथेति**। [शस इति] स्थानषष्ठी। तेन शसोऽलोऽन्त्यस्य नत्वम्। तस्मादिति च हेतौ पञ्चमी। एवं सति पूर्वसवर्णदीर्घत्वमन्त्यस्य नत्वस्थानिनो विशेषणमित्याहुः। पूर्वसवर्णदीर्घान्नत्वम्, तच्चेत् शसः संबन्धीत्यपरेषां व्याख्यानम्। सप्तम्यर्थबोधकनिर्देशे तादृशस्योदाहरणत्वोपपत्तेः कथमन्यथाजातीयकत्वम्, अत आह — **इतीति**। [2]विपर्ययलक्षणेतिकरणात् स्वरूपपरत्वनिर्णये तद्विरोधेनोक्तार्थपरत्वानुमानमसंगतमित्यर्थः। पौनरुक्त्यं परिहरति — **थालेति**। 'इदं चापि' इति सिद्धान्तोऽयुक्तः, सामान्यनिर्देशे विशेषाणामनुदाहरणत्वाशङ्कायां ह्येष संगच्छते, अत आह — **सिद्धान्तेति**। नो खलु प्रतिज्ञामात्रादर्थसिद्धिः, अत आह — **इतीति**। पदार्थविपर्यासकृदयम्। लोके चार्थपदार्थकत्वं शब्दानामिति तद्विपर्यासे स्वरूपमर्थः। इह तु शास्त्रे तद्वैपरीत्यम्। इत्थं भाष्याभिप्रायकीर्तनेन सिद्धान्तत्वमुपपाद्यास्मिन्नर्थेऽक्षराणि योजयति — **सूत्रेति**। **सर्वेति**। स्वतन्त्रसर्वनामनिर्देश इत्यर्थः। प्रस्तुतपरामर्शेन विशेषपरत्वाभावात् तत्पदस्य सामान्येन विभक्त्यर्थविशेषणे फलाभावादाह — **तेनेति**। विशेषरहितसामान्याभावात् [3]समुच्चयार्थत्वासंभवश्चेत् [4]संभावनार्थत्वं वा कथम्। न हि पूर्ववादिना स्वरूपपरत्वमाशङ्कमानेन तदसंभावना संभावनीया, अत आह — **तस्मादिति**। स्वरूपपरत्वे कतिपयविशेषस्योदाहरणत्वात् सर्वोदाहरणत्वासंभावनेति बहुवचनसंगतेनापिना तत्संभावनावद्योत्यत इत्यर्थः। संभावनात्र निश्चयः, नोत्कटकोटिकः संशयः। अत्र हेतुमाह — **सामान्यस्येति**। साधारण्येन प्रतिपन्नस्य सामान्यत्वाद्व्यावर्तकस्य विशेषत्वाच्च प्रश्नः कथम्, अत आह — **सामान्येति**। अव्यवस्थामेवाह — **कदाचिदिति**। वैपरीत्यस्यापि भावादाह — **यदिति**। यद्वा स्वरूपे पृष्टे लक्षणेन तत्स्वरूपमननुवर्ण्योदाहरणवर्णनं न शोभत इत्युदाहरणदर्शनेन विवक्षितं सामान्यादिलक्षणमाह — **यदिति**। अथवा प्रस्तुते किं सामान्यं को विशेष इति प्रश्ने लौकिकोदाहरणकीर्तनमयुक्तमित्यत्राह — **यदिति**। लौकिकोदाहरणेन [5]तत्त्वप्रयोजकवतः सामान्यत्वं विशेषत्वं चेत्युक्तमिति प्रयोजकं निर्दिष्टम्। प्रयोजकमात्र-

---

[1] प्रदीपे 'अत्र व्यवच्छेद्यमस्ति' इत्यत्र 'अत्र च व्यवच्छेद्यमस्ति' इति पाठोऽभिमतः।

[2] पदार्थविपर्यासकृदितिकरणादित्यर्थः।

[3] सामान्यभावात् — ग.

[4] संभावनार्थवत्त्वं — ग.

[5] सामान्यत्वविशेषत्वप्रयोजकवत इत्यर्थः।

निर्देशादनवगतविवेकं प्रत्याह — **इहापीति**। 'अपर आह' इति ग्रन्थे किं युगपच्छक्तिद्वयं प्रतिपाद्यम्, उत पर्यायेण। नाद्यः, विरोधात्। दृष्टान्ते त्वपेक्षणीयभेदादविरोधः। नान्त्यः, मतान्तरत्वानुपपत्तेः, अत्र आह — [1]**जन्येति**। दृष्टान्तस्याधिकस्य कीर्तनमात्रेण मतान्तरत्वम्। दृष्टान्तश्च शक्तिद्वययोगमात्रेण, न यौगपद्ये। यथा ह्यपेक्षणीयभेदात् तत्र शक्तिद्वयं तथात्र [2]कार्यभेदाच्छक्तिद्वयमित्यर्थः। सर्वनामनिर्देशस्य सकलविशेषसंग्रहार्थत्वस्य प्रागर्थादुदीरितत्वात् तत्प्रयोजनजिज्ञासानुदयात् तत्फलकीर्तनं मुधेत्याशङ्क्याह — **सप्तमीति**। एवं हि लाघवं भवति। **निर्देशेति**। प्रतिपादनफलानां मध्ये सर्वनामोपलक्षितनिर्देशायुक्ततरा इत्यर्थः। तत्र हेतुः 'एतैर्हि' इति। तदुपपादनम् — **यदीति**। [3]विषयव्याप्तिर्न प्रकारान्तरादिति तन्निर्देशस्य युक्ततरत्वमित्यर्थः। **प्रतीयेतेति**। संभावनायां लिङ्। न च नद्यादिशब्दवदिह शास्त्रे सप्तमीशब्दः परिभाषित इति स्वरूपविध्यनिवारणात्। इतिकरणे तु गौरवम्। ततश्च [4]'सप्तम्यां जनेः' इत्यादौ प्रवृत्तिः स्यात्। ततश्च सप्तम्यन्ते परतो जनेर्ड इति स्यात्। एतदुपस्थितिसामर्थ्याच्च [5]'उपपदम्' इति समासशास्त्रे प्रथमानिर्दिष्टस्यापि पूर्वनिपाताभावः कल्प्येत। जनिविशेषणत्वे प्रत्ययनिमित्तत्वाभावादुपपदत्वमेव नेत्यप्याहुः। किं विशेषणविषयः प्रश्नः, उत विशिष्टविषयः। नाद्यः, उपसर्गनिर्देश इत्येव वक्तव्यत्वात्। नान्त्यः, वक्ष्यमाणप्रश्नस्य पौनरुक्त्यापत्तेः, अत आह — **किमिति**। पौनरुक्त्यं परिहरिष्यते। 'किं गतमुपसर्गेण' इति ग्रन्थात् 'निरयम्' इति ग्रन्थाच्च विशेषणविषयत्वमेव भासत इत्यत्राह — **न पुनरिति**। निर्दिशेरुच्चारणं प्रतिपादनं वार्थ इति। अयं विशेषः कथं लभ्यः, तत्राह — **अन्तरेणापीति**। सोपस्कारत्वात् सूत्राणामिति भावः। **पुनरिति**। प्रसिद्धार्थस्याध्याहारेण लाभादवयवार्थादानाद्बहिर्भावप्रतिपत्तिरित्यर्थः। **शब्दाच्चेति**। बहिर्भावप्रतियोगित्वं शब्दानुशासनप्रस्तावाच्छब्दस्येति भावः। यद्वा, सप्तम्यर्थप्रतिपादने पूर्वस्येत्युक्तौ तद्बोधकशब्दस्य बुद्धिस्थत्वात् तदपेक्षबहिर्भावावगतिः शब्द एवेति बहिर्भावस्य सजातीयविषयत्वादिति केचित्। अन्ये त्वर्थस्य बोध्यत्वाच्छब्दान्तर्भावः। विपर्ययाच्च विपर्ययं शब्दस्याहुः। यद्यपि च 'अचि' इत्यादौ शब्दबोध्यत्वं शब्दस्य, तथापि लोकप्रसिद्धचनुसारेण बहिर्भावो द्रष्टव्यः, कार्यकारणभावेनार्थस्यान्तर्भाव इत्यपरे। अर्थे पौर्वापर्यासंभवात् कथं परिभाषोपस्थानप्रसङ्गः, तत्राह — **तत्रेति**। प्रत्ययस्य जनपदवृत्तित्वं न लभ्येत। अतिशयवाचिनि परतस्तमबादिः स्वार्थिकः प्रसज्येत। आक्षेपपुरस्सरं पौनरुक्त्यं परिहरति — **नन्विति**। 'अथ' इत्यस्योक्तप्रयोजनाभाव इत्यर्थः। प्रयोजनाभावमुपपादयति — **अयमिति**। अनुपपत्त्युपस्थितौ किमेतत्परिभाषापरित्यागेन सप्तम्या अर्थान्तरं कल्प्यम्, उत परिभाषास्वीकारेण तद्वाचिशब्दलक्षणेति विशये लक्ष्याविरुद्धा कल्पना भविष्यतीति भावः। अस्यां कल्पनायां लिङ्गमप्याह — **यदि चेति**। **वक्तव्यमिति**। नोक्तं च। अतो नेदं प्रयोजनमित्यर्थः। विदिताभिप्राय उत्तरयतीत्याह — **पूर्वेति**। **सा चेति**। ननु निमित्तस्य स्थानिनश्च संहितया भाव्यम्। न च येन केनचित् तयोरपि संहितास्तीति वाच्यम्, परस्परसंहिताया अपेक्षितत्वात्। अन्यथा 'दध्यत्र' इत्यत्रापि तयोर्येन केनचित् तत्सत्त्वेन संहिताग्रहणव्यावर्त्याभावात्। अत्राहुः — मध्यस्थव्यञ्जनेन द्वयोरपि परसंनिकर्षसत्त्वादस्ति तद्द्वारिका तयोरपि संहितेति। वस्तुतस्तु वर्णशून्यकालव्यवधान [6]एवासंहितात्वम्। वर्णव्यवहितयोस्त्विह संहितास्त्येवेति। एतच्च संहिता-

---

[1] अन्येति — ग.
[2] कालभेदात् — ति.
[3] विषयाप्तिः — ग.
[4] पा. सू. ३. २. ९७.
[5] पा. सू. २. २. १९.
[6] एव संहितात्वम् — ग.

संज्ञास्थले संहिताधिकारे च स्फुटम्। **सत्सप्तमीति**। कटदेवदत्तवद् वर्णानामुपश्लेषाभावादेत-द्विज्ञानमुचितमिति भावः। ननु पूर्वग्रहणात् कथं व्यवहिते प्रसङ्गः, तत्राह — **व्यवहित इति**। ननु व्यवहिते पूर्वशब्दप्रयोगो गौण इति कथं प्रसङ्गो मुख्यसंभवे, अत आह — **यत्रेति**। व्यक्त-पक्षे इदं प्रयोजनमित्यर्थः ॥

[१, ५११–५१८]

(**लघुविवरणम्**) किंशब्दार्थस्य प्रश्नार्थतां दर्शयति — **किं नियमेति**। योगशब्दस्य संबन्ध-मात्रवचनत्वे योगस्येति वक्तव्यमित्यत आह — **युज्येते इति**। **न हि युगपदिति**। स्थानित्वे हि कार्यित्वेन प्राधान्यम्, निमित्तत्वे हि पारार्थ्येन गुणत्वम्, तच्चैकस्यैकदा विरुद्धमिति भावः। एवमपि समिधावित्यत्रेकारस्य यणादेशप्रसङ्ग इत्यत आह — **द्वयं चेति**। **व्यवहितेति**। निर्दिष्ट-ग्रहणादिति भावः। स्वादिविधायकसूत्रे सप्तमी परेति सप्तमीनिर्देश एव बलवान् प्राप्नोतीत्यत आह — **सूत्रेति**। स्थानिनीत्संज्ञायां लोपे च सशब्द एव भविष्यतीत्यत आह — **स्थानी चेति**। **सूत्र एवोच्चारितस्येति**। षष्ठीप्रक्लृप्तेः प्रागेव परत्वादिति भावः। भवतु प्रकृतौ षष्ठी, विकृतावपि किं न स्यादित्यत आह — **श्रुतयोरेवेति**। श्रुतयोरेव स्थान्यादेशभावसंभवे नाश्रुतयोः स्थान्यादेशभावः कल्पयितुं युज्यत इति भावः। 'अथवास्तु' इति भाष्यस्यायमभिप्रायः — प्रथमा-निर्देशसामर्थ्यादिग्यणोः स्थान्यादेशभावः प्रथमत इति। उभयोर्युगपत्प्रकल्पकत्वाभावेऽपि कस्य प्रकल्पकत्वमित्यत आह — **तत्रेति**। हन्त तर्हि [1]'दीर्घात्' इत्यपि पञ्चम्यनवकाशत्वात् प्रकल्पिका स्यादित्यत आह — **दीर्घादिति** ॥

[१, ५११–५१८]

(**विवरणम्**) पूर्वोत्तरौ निमित्तेन द्वावपि युज्यमानौ तयोश्चान्यतरो न [2]विशेषित इति वार्तिकैकदेशस्यार्थः। प्रकृत्यर्थमाह — **योग इति**। नियमपक्षात् षष्ठीप्रक्लृप्तिपक्षः प्रशस्यः, अनुवाददोषाभावादित्यत आह — **तत्रेति**। **न हीति**। स्थानित्वे हि कार्यित्वेन प्राधान्यम्, निमित्तत्वे च पारार्थ्येन गुणत्वम्, तदुभयमेकस्यैकदा विरुद्धमिति भावः। प्रकारान्तरेण चानु-पपत्तिः [3]प्रागुक्ता। व्यवहितेऽपि पूर्वशब्दप्रवृत्तेः समिधावित्यत्रातिप्रसङ्गस्तदवस्थ इत्यत आह — **द्वयं चेति**। पूर्वस्येत्युक्तत्वान्निर्दिष्टग्रहणाच्चेति भावः। ननु कार्यकालत्वात् परिभाषयोः पौर्वा-पर्याभावान्न विप्रतिषेधेन व्यवस्थेत्यत आह — **सूत्रेति**। भाष्ये 'गोतः परस्य सर्वनामस्थानस्य, सर्वनामस्थाने परतो गोतः' इत्युभयत्रापि षष्ठीनिर्देशात् [4]"णित्' इति भावप्रधानः, तथा च सर्व-नामस्थान इति षष्ठी गोत इति पञ्चमी, तदा सर्वनामस्थानस्य णित्त्वम्। गोत इति षष्ठी चेण्णित्त्वं तस्येत्युक्तम्। गोतो णित्त्वे को दोष इत्यत आह — **यदीति**। ङमो ङमुडागमेऽपि नास्ति दोषः, [5]'संयोगान्तलोपे तस्यासिद्धत्वाद्विधानसामर्थ्याद्वा तदप्रसङ्गादित्यत आह — **ङम इति**। ननु यद्यपि पञ्चमीनिर्देशो निरवकाशः, तथाप्यादेशसंबन्धिविभक्त्यभावेन न सप्तमीनिर्दिष्टस्य कार्यं लभ्यत इत्यपरितोषात् 'यथार्थं वा' इत्युक्तं वार्तिककृता। तत्रार्थशब्दस्य न प्रयोजनादि-

---

[1] पा. सू. ६. १. ७५.
[2] निवेशित इति — ञ, ट,
[3] प्रोक्ता — च, छ.
[4] पा. सू. ७. १. ९०.
[5] संयोगान्तस्य लोपे — ञ.

वाचित्वमित्याह — **यथाविषयमिति**। भाष्ये **पूर्वस्य षष्ठीति**। पूर्वस्य कार्यित्वप्रतिपादनयोग्या षष्ठी भवतीत्यर्थः। एवमुतरत्र षष्ठीत्यपि। **न हीति**। वाक्यभेदप्रसङ्गादिति भावः। **उपदेशेति**। स्थानेऽन्तरतमपरिभाषयानुमीयमानत्वेनादेशस्योच्चारणाभावादित्यर्थः। ननु स्थान्येवेत्संज्ञालोपाभ्यां निरनुबन्ध [1]'इत्यनुमीयमान आदेशोऽपि तादृश एवेति किमित्संज्ञयादेशे, इत्यत आह — **स्थानी चेति**। यदा धातोः परः प्रत्ययः, तदानीमेवादेशो भवन्नेत्संज्ञालोपौ प्रतीक्षत इत्यर्थः। **यत्रेति**। 'तस्मिन्निति निर्दिष्टे' इत्यस्य विषयभेदेन भेदात् क्वचित् पूर्वस्य षष्ठीति विशिष्टपरम्, क्वचिद् विशेषणपरमित्यर्थः। **सूत्र एवेति**। तत्रोपदेशसद्भावादिति भावः। तथा च धातोर्निरनुबन्धक एव क्रियते प्रत्यय इति कुतस्तदादेशस्य सानुबन्धकतेति भावः। **परत्वेति**। अनुपपत्तौ धातोः परस्येति वक्तुमशक्यत्वादित्यर्थः। **अपेक्षाया इति**। अपेक्षानिबन्धनः संबन्धः, अपेक्षा [2]च 'तस्मिन्निति निर्दिष्टे' इत्यस्मिन् तदा, यदा श्रुतयोः संबन्धो न भवेत्। सति तु तस्मिन् आकाङ्क्षा नेति कुतः 'तस्मिन्' इत्यस्योपस्थानमिति भावः। 'अथवा' इति भाष्यस्यायमभिप्रायः — प्रथमानिर्देशसामर्थ्यात् प्रथमत इग्यणोः स्थान्यादेशभाव इति। उभयोर्युगपत्प्रकल्पकत्वाभावेऽपि कस्य प्रकल्पकत्वमित्यत आह — **तत्रेति**। नन्वेवं [3]'दीर्घात्' इति पञ्चम्यनवकाशा षष्ठीप्रकल्पिका स्यादित्यत आह — **दीर्घादिति**॥

[१, ५११–५१८]

(उद्द्योतनम्) **कर्मणीति**। संबन्धक्रियाकर्मणीत्यर्थः। **संबन्धः** उपश्लेषरूपः। पर्यवसितं वाक्यार्थमाह — **तदिति**। **उपश्लिष्टस्येति**। न चानेन वार्तिकस्थयोगशब्दः कर्मणि घञन्तत्वेन व्याख्यात इति न मन्तव्यम्, तथा सति 'पूर्वोत्तरयोः' इत्येतद्विशेषणतया योगशब्दस्य युक्तार्थकस्य समासायोगात्। 'तस्मादित्युत्तरस्य' इत्यस्यापि [4]नियमार्थत्वमाह — **तिङिति**। नियमार्थत्वे त्रैदोष्यापत्तेः षष्ठीप्रक्लृप्तिपक्ष एव श्रेयान्, अत आह — **तत्र षष्ठीति**। 'योगयोः' इति भाष्यं पर्यवसितव्याख्यानम्, तत् संगमयति — **युज्येते इति**। एतद्भाष्यदर्शनात् 'योगाविशेषात्' इति सापेक्षत्वेऽपि समास इत्यपि केचित्। औपश्लेषिकाधिकरणपक्ष इव [5]'सत्सप्तमीपक्षेऽप्यनियम इत्याह — [6]**सत्सप्तमीति**। [7]ननु [8]"अन्यारात्' इत्यादिना 'अचः पूर्वस्य' इति भाव्यम्, कथमचि पूर्वस्येति, अत आह — **उपपदेति**। यौगपद्यं न कुतः, अत आह — **न हीति**। स्थानित्वे कार्यित्वेन प्राधान्यम्, निमित्तत्वे परार्थत्वेन गुणत्वम्, उभयमेकस्यैकदा विरुद्धमिति भावः। ननु व्यवहितेऽपि पूर्वशब्दप्रयोगात् 'समिधौ' इत्यत्रातिप्रसङ्गस्तदवस्थः, अत आह — **द्वयं चेति**। 'पूर्वस्य' इत्यनेन परनिवृत्तिः, 'निर्दिष्टे' इत्यनेन व्यवहितनिवृत्तिश्चेत्यर्थः। ननु भाष्ये दध्युदकादौ संदेह उक्तः, त्वया तु [9]पर्यायप्रसङ्ग इति [10]तद्विरुद्धम्, अत आह — **संदेहस्त्विति**। भाष्यस्यापि पर्यायप्रसङ्ग एव तात्पर्यमिति भावः। **बहोरिति**। बहोरिष्ठेमेयस्सु लोप इत्युक्ते इष्ठादेः कार्यित्वनिमित्तत्वे विरुद्धे इत्यर्थः। पर्यायत्वेऽपि वाक्यभेदप्रसङ्गो बोध्यः। कार्यकालत्वात्

---

[1] इत्यनुमीयमानादेशोऽपि — च.
[2] चकारो नास्ति — च, छ.
[3] पा. सू. ६. १. ७५.
[4] नियममाह — म.
[5] सति सप्तमी — अ, म.
[6] सति सप्तमीति — अ.
[7] नन्वत्राचः पूर्वस्येति — म.
[8] पा. सू. २. ३. २९.
[9] पर्याय इति — ऋ.
[10] तद्विरुद्धमुक्तमत आह — अ, ऋ.

[1]परिभाषायाः कथं पौर्वापर्यम्, अत आह — **सूत्रेति**। **तास्यादिभ्य इति** भाष्ये। [2]'तास्यनुदात्तेन्ङिददुपदेशाल्लसार्वधातुकमनुदात्तमह्न्वडोः', तासेरनुदात्तेतो [3]ङितोऽकारोपदेशाच्च परं लसार्वधातुकमनुदात्तं स्यात् [4]ह्नुङिङ्भ्यां पर वर्जयित्वा। प्रत्ययस्वरापवादः। कर्षा, आस्ते, शेते, पचतः। अत्र लसार्वधातुक इति वक्तव्यम्, [5]'आदिः सिचोऽन्यतरस्याम्' [6]'अभ्यस्तानामादिः' इत्यत्र सार्वधातुके परत इति लाभार्थमिति वार्तिकार्थः। भाष्ये सर्वत्र संदेहशब्दः पर्यायतात्पर्यक इत्याह — **संदेहाच्चेति**। ननु [7]'भू च बहोः' इत्यादेशान्तरविधानात् कथं [8]'बहोर्लोपः, अत आह — [9]**तदा चेति**। गोतो णित्त्वे को दोषः, अत आह — [10]**यदीति**। भाष्ये **आमि परत इति**। तथा च प्रातिपदिकात् पूर्वं सुट्प्रसङ्गः। ननु ङमो ङमुडागमे को दोषः। म च संयोगान्तलोपप्रसङ्गः, तस्मिन् कर्तव्ये ङमुटोऽसिद्धत्वात्, आगमविधिवैयर्थ्यप्रसङ्गाच्च, अत आह — **ङम इति**। यद्यपि पञ्चमी निरवकाशा, तथापि सप्तमीनिर्दिष्टस्यादेशसंबन्धबोधकषष्ठ्यभावात् कथं स्थानित्वलाभः, अतः 'यथार्थं वा' इति वार्तिकम्। तत्रार्थशब्दस्याभिधेयादिपरत्वनिरासायाह — **यथाविषयमिति**। भाष्ये **पूर्वस्य षष्ठीति**। आदेशसंबन्धप्रतिपादन[11]योग्या षष्ठी भवतीत्यर्थः। एवम् [12]'उत्तरस्य षष्ठी' इति। इष्टापत्तिनिरासाय भाष्ये 'उक्तम्' इत्युक्तम्। तत्रेष्ठादीनां षष्ठीकल्पनेऽतिप्रसङ्गाभावात् नियमस्य क्वोपयोगः, अत आह — **यत्रेति**। **न हीति**। वाक्यभेदापत्तेरिति भावः। षष्ठीप्रक्लृप्तिपक्षे दोषान्तरमाह — भाष्ये **प्रत्ययविधाविति**। [13]**उपदेशाभावादिति**। [14]'स्थानेऽन्तरतमः' इति परिभाषयानुमीयमानस्यादेशस्योच्चारणाभावादित्यर्थः। ननु स्थान्येवेत्संज्ञा[15]लोपाभ्यां [16]निरनुबन्धक इत्यनुमीयमानादेशोऽपि तादृश एवेति किमादेश इत्संज्ञया, अत आह — **स्थानी चेति**। यदैव धातोः [17]परः प्रत्ययस्तदैवादेशो भवन्नित्संज्ञालोपौ न प्रतीक्षत इत्यर्थः। नन्विको यण् भवति, तस्य चान्तरतम्याद्यणेव भविष्यतीति नानिष्टं किंचित्, अत आह — **ततश्चेति**। **यण् [18]न लभ्यत इति**। द्वयोः [19]षष्ठीनिर्दिष्टतया स्थान्यादेशभावासंभवादिति भावः। **विरोधेति**। 'दध्युदकम्' इत्यत्रैकस्य स्थानित्व[20]निमित्तत्वविरोधेऽप्यत्र विरोधाभावात् [21]'उभे वनस्पत्यादिषु युगपत्' इतिवदुभयोरप्यनुदात्तत्वसंभवादित्यर्थः। ननु नियमाभावे दध्युदकमित्यादावतिप्रसङ्गनिरासः कथम्, अत आह — **यत्रेति**। 'तस्मिन्निति निर्दिष्टे' इत्यस्य विषयभेदेन भेदात् क्वचित् षष्ठीमात्रकल्पनं क्वचिन्नियतषष्ठी[22]कल्पनमिति विशेष उपपन्न इत्यर्थः। **सूत्र एवेति**। तत्रोपदेशसद्भावात्। तथा च निरनुबन्धक एव प्रत्ययो धातोः [23]परः क्रियत इति तदादेशस्य न सानुबन्धकतेति भावः। **परत्वविशिष्टस्येति**। अनुत्पत्तौ धातोः परस्येति

---

[1] 'परिभाषायाः' इति परिभाषयोरित्यर्थे बोध्यः।
[2] पा. सू. ६. १. १८६.
[3] ङितोऽदुपदेशाच्च — म.
[4] ह्नुङिङोः परं — म.
[5] पा. सू. ६. १. १८७.
[6] पा. सू. ६. १. १८९.
[7] पा. सू. ६. ४. १५८.
[8] 'बहोः' इति नास्ति — म.
[9] तथा चेति — अ.
[10] यदेति — म.
[11] योग्यषष्ठी — अ.
[12] उत्तरत्र षष्ठीति — ऋ.
[13] उपदेशत्वाभावादिति — अ.
[14] पा. सू. १. १. ५०.
[15] लोपयोः — म.
[16] निरनुबन्ध इति — अ.
[17] 'परः' इति नास्ति — म.
[18] न लभ्येतेति — म.
[19] षष्ठीनिर्दिष्टयोः स्थान्यादेश — ऋ.
[20] निमित्तत्वविरोधाभावात् — अ.
[21] पा. सू. ६. २. १४०.
[22] कल्पनमपि। सूत्र एवेति — म.
[23] परं क्रियत इति — म.

वक्तुमशक्यत्वादित्यर्थः । **प्रवृत्त्यन्तरेति** । वाक्यभेदप्रसङ्गेन [1]'धातोः' [2]इत्यस्यावृत्तौ मानाभावादित्यर्थः । [3]**विशेषणत्वेनेति** । इक इति षष्ठी प्रकृतिविशेषणत्वेन [4]परोपकारितयादेशापेक्षितस्थानिविशेषप्रतिपत्त्यर्थतया निर्दिश्यते, न तु संबन्धान्तरप्रतिपादकतयेत्यर्थः । ततः किम्, तत्राह — **इको यणिति** । **अपेक्षा** आकाङ्क्षाधीनः संबन्धः । आकाङ्क्षा च यत्र श्रुतयोः संबन्धाभावः । प्रकृते [5]तत्सत्त्वान्न 'तस्मिन्' इत्यस्योपस्थानमित्यर्थः । भाष्ये **अस्तु तावदिति** । आदेशे षष्ठीप्रकल्पनार्थं परिभाषोपस्थानं भविष्यतीत्यर्थः । यद्यप्याकाङ्क्षाया अभावान्न तत्र 'तस्मिन्' इत्यस्योपस्थानम्, तथाप्यभ्युपेत्याह — भाष्ये **अस्तु न कश्चिदिति** । ननु सप्तमीपञ्चम्योर्द्वयोरपि षष्ठीप्रकल्पने 'तस्मिन् पूर्वस्य, तस्मादुत्तरस्य' इत्ययमर्थः कथं लभ्यते, अतो युगपत्प्रकल्पनं न संभवति, अत आह — **ग्रहणकेति** । परिभाषाद्वयान्वय[6]लभ्यार्थ[7]द्वय[8]प्रतिपादकं वाक्यद्वयं कल्प्यत इत्यर्थः । [9]**तथेति** । [10]आद्गुणेऽप्यचीत्युक्ते पूर्वस्य, [11]'आत्' इत्यतः परस्य [12]चैको गुणो भविष्यतीत्यर्थः । उभयोर्युगपत्प्रकल्पकत्वाभावेऽपि कस्य प्रकल्पकत्वम्, अत आह — **तत्रेति** । ननु [13]'दीर्घात्' इति पञ्चम्यनवकाशात् 'छे' इत्यस्य षष्ठीं प्रकल्पयेत् । ततश्च छकारोपरि तकारस्य श्चुत्वेन चकारे छस्य च [14]'खरि च' इति चर्त्वेन चकारे [15]'चेच्चिद्यते' इत्यनिष्टरूपं स्यात्, अत आह — **दीर्घादिति** । व्याख्याने बीजमाह — **सुराच्छायेति** । अन्यथोक्तरीत्या 'सुराच्चाया' इति स्यादित्यर्थः ॥

[१, ५११–५१८]

(**रत्नप्रकाशः**) तदेवं पदार्थशोधनपूर्वकं सूत्रार्थं व्यवस्थाप्य सूत्रद्वयप्रयोजनकथनपरं वार्तिकमवतारयति — **किमर्थमिति** । एतेन 'किं नियमार्थम्, अथ षष्ठीप्रकल्प्त्यर्थमिति प्रश्नः' इति कैयटो निरस्तः । संनिहितवार्तिकानुरोधेन सामान्यत एव प्रयोजनजिज्ञासया प्रश्नस्योपपन्नत्वेन 'अनेनैव प्रकल्प्तिभविष्यति' इत्यादिविप्रकृष्टप्रौढिभाष्यानुरोधेन कोटिद्वयपरतया नयनानौचित्यात् । **तस्मिंस्तस्मादितीति** । सप्तमीनिर्दिष्टेनाजादिना पञ्चमीनिर्दिष्टेनातिङादिनेत्यर्थः । [16]**पूर्वपरयोर्योगयोरविशेषादिति** । पूर्वस्य [17]परस्य च यौ **योगौ** संबन्धौ, तयोः **अविशेषात्** विशेषाभावादित्यर्थः । तत्र 'योगयोः' इति शेषषष्ठीप्रकृतिकृदन्तेन योगात् 'पूर्वोत्तरयोः' इति कर्तरि कर्मणि

---

[1] अत्र धातुपदाभावात् धातुशब्दो गुपादिपर इति बोध्यम् ।
[2] इत्यस्यानुवृत्तौ — म.
[3] यद्यपि 'विशेषणत्वेन' इति पदं प्रदीपे न दृश्यते, तथाप्येतादृशप्रतीकग्रहणात् प्रदीपे 'प्रकृतौ षष्ठीति' इत्यस्यानन्तरं 'प्रकृतौ विशेषणत्वेन षष्ठी निर्दिश्यते' इत्यन्नंभट्टस्य पाठः स्यादित्यूहनीयं भवति ।
[4] परोपकारितयादेशापेक्षस्थानि — म.
[5] श्रुतयोरेव संबन्धसत्त्वादित्यर्थः ।
[6] 'अन्वय' इति नास्ति — ऋ.
[7] लब्धार्थ — म.
[8] प्रतिपादकवाक्यद्वयं — अ.
[9] तदेति — म, ऋ.
[10] आद्गुणेऽप्येक इत्युक्ते — अ, ऋ.
[11] 'आदित्यतः' इति नास्ति — अ, ऋ.
[12] वैकः — अ.
[13] पा. सू. ६. १. ७५.
[14] पा. सू. ८. ४. ५५.
[15] हीच्चतीत्यनिष्ट — अ, ऋ.
[16] 'पूर्वोत्तरयोर्योगयोः' इति भाव्यम्, उपरितनग्रन्थपरामर्शात् तथोपलब्धेः ॥ भाष्ये 'पूर्वोत्तरयोर्योगाविशेषात्' इत्यत्र 'पूर्वोत्तरयोर्योगयोरविशेषात्' इति चौखाम्बामुद्रिते पाठः ।
[17] 'उत्तरस्य च' इति युक्तम् ।

वा षष्ठी। आद्ये 'सप्तमीनिर्दिष्टेन' इत्यादिमद्वयाख्यानगता तृतीया सहार्थयोगे ज्ञेया, द्वितीये तु कर्तरि। अन्तर्भावितण्यर्थविवक्षायां द्वितीयः, तदविवक्षायां तु पूर्वः कल्पः। पूर्वस्य परस्य च यण्निघातादिप्रसक्ताविति शेषः। तत्र 'दध्युदकम्' इति प्रथमसूत्रोदाहरणम्। 'पचत्योदनम्' इति द्वितीयसूत्रस्य। तच्चोपलक्षणम् — 'ओदनं पचति' इत्यस्य। तदेतत् सर्वं वार्तिकेनैव निर्दिष्टम्। यत्तु कैयटेन वार्तिकं व्याख्यातम् "**पूर्वोत्तरयोरिति**। कर्मणि षष्ठी। योगः संबन्धः। तदयमर्थः — अच्युपश्लिष्टस्येको यणा भाव्यम्। यथाचि परस्मिन् पूर्वं उपश्लिष्ट एवं पूर्वस्मिन्नपि परः। [1]"तिङ्ङतिङः' इत्यत्र यथा अतिङन्तात् परं तिङन्तं भवति, एवं पूर्वमपि। तत्र षष्ठीप्रक्लृप्तिपक्षे षष्ठ्यनुवर्तयितव्येति गौरवप्रसङ्गान्नियमार्थमित्युक्तम्। **योगयोरिति**। युज्येते इति योगौ, कर्मणि घञ्। अचीति सत्सप्तमीपक्षेऽप्यनियमप्रसङ्गः" इति। तन्न, अभिहिते कर्मणि कृद्योगलक्षणषष्ठ्या अप्रसक्तत्वेन 'योगयोः' इत्यस्य कर्मघञन्तप्रकृतिकत्वमाश्रित्य तत्समानाधिकरणे 'पूर्वोत्तरयोः' इत्यत्र 'कर्मषष्ठीति कथनस्यात्यन्तमौख्यावहत्वात्। वार्तिके तद्भाष्ये चैकस्यैव योगशब्दप्रकृतिकषष्ठ्यन्तस्य सत्त्वेन तस्य च कर्मघञन्तप्रकृतिकतया तेनैव व्याख्यातत्वेन च 'योगः संबन्धः' इत्युक्तेरसंबद्धप्रलापत्वात्। [2]'संहितायाम्' इत्यधिकारसूत्रमवलम्ब्यैव भगवता प्रकृतसूत्रे व्यवहृतत्वेन तत्सूत्रप्रत्याख्यानायाश्रितौपश्लेषिकाधारसप्तमीं तत्सूत्रपक्षोचितसप्तमीं च तत्सूत्रपक्ष एवाश्रित्य लोकव्यामोहाय संकीर्णव्यवहारप्रदर्शनायोगात्। इष्टसिद्धयेऽनुवृत्तिप्रयुक्तगौरवस्य भूषणत्वेन तस्य दूषणत्वकथनानौचित्याच्च। **पूर्वः पर इति**। पूर्वभागे वर्तमाने पूर्वशब्दः परभागे वर्तमाने परशब्दः। ग्रामे देवदत्तोऽस्तीत्युक्ते हि किं पूर्वभागेऽस्ति, किं वा परभाग इति पूर्व[पर]भागविषयकः संदेहो भवतीति भावः। **एवमिहापीति**। संदेह इति विप्रकृष्टेनान्वयः। **इको यणचीति**। 'इत्युक्ते' इति शेषः। **दध्युदकमिति**। इत्याद्युदाहरणेष्विति शेषः। **पचत्योदनमिति**। इदमत्र लेखकदोषसमायातम्, 'तिङ्ङतिङः' इत्यस्यानन्तरमुत्तरवाक्ये ज्ञेयम्। **उभाविति**। प्रकृते इकारोकारौ, अन्यत्र यथायथमूह्यौ। संशयस्वरूपमाह — **अचीति**। सतीति शेषः। **पूर्वस्येति**। अस्यावधित्वेन 'अचि' इति सत्सप्तमीनिर्दिष्टाजेव संबध्यते। एतेन "[3]'उपपदविभक्तेः कारकविभक्तिर्बलीयसी' इति न्यायादधिकरणसप्तमी कृता, न तु दिग्योगलक्षणा पञ्चमी" इति कैयटो निरस्तः। अचि सतीको यण् इत्युक्ते पूर्वस्य वा स्यात् परस्य वेति संदेहः स्यादित्येतदभिप्रायेण तस्य वाक्यस्य प्रवृत्तत्वेन तत्र कारकसप्तमीकथनस्य दिग्योगलक्षणपञ्चमीनिषेधस्य चासंबद्धप्रलापत्वात्। [4]'संहितायाम्' इत्यधिकारसूत्रं कुर्वतः पाणिनेः 'अचि' इत्यादिसप्तम्याः सत्सप्तमीत्वस्यैवाश्रयितुमुचितत्वाच्च। **संदेह इति**। तथा चावधारणाभावेन यौगपद्यासंभवात् पर्यायेण पूर्वपरयोर्यण् स्यादिति भावः। **अचि पूर्वस्य स्यादिति**। अचि निर्दिष्टे वर्णव्यवायेनोच्चारणीये सति तस्मात् पूर्वस्यैव स्यादित्यर्थः। **अतिङः परस्येति**। अतिङि निर्दिष्टे वर्णव्यवायेनोच्चारणीये सति तस्मात् परस्यैवेत्यर्थः। **नियमार्थमिति**। पूर्वस्यैव — अनन्तरस्यैव, परस्यैव — अनन्तरस्यैव, इति द्विविधनियमार्थमित्यर्थः। **उभयं निर्दिश्यत इति**। सप्तम्यन्तं पञ्चम्यन्तं चोच्चार्यत इत्यर्थः। **वक्ष्यतीति**। [5]'तास्यनुदात्तेत्' इत्यादिसूत्रे। **अभ्यस्तसिजर्थ इति**। [6]'अभ्यस्तानामादिः' [7]'आदिः सिचोऽन्यतरस्याम्' इति सूत्रयोर्लसार्वधातुक इति सप्तम्यन्तस्यानुवृत्तिसिद्धय इति भावः। **आदिलोप इति**।

---

[1] पा. सू. ८. १. २८.
[2] पा. सू. ६. १. ७२.
[3] महाभाष्यम् २. ३. १९.
[4] पा. सू. ६. १. ७२.
[5] पा. सू. ६. १. १८६.
[6] पा. सू. ६. १. १८९.
[7] पा. सू. ६. १. १८७.

'बहोर्लोप इष्ठेमेयस्सु' इत्यंशे संदेहः। 'भू च बहोः' इत्यंशे तु बहोरिति षष्ठ्येवेति भूरादेशो बहोरेव। तथा च लोपभूभावौ पर्यायेण स्यातामिति भावः। **गोत इति संदेह इति**। तथा च 'तिष्ठति गौः' इत्यत्रानङ्गस्यापि वृद्धिः स्यादिति मन्यते। **अचि परतो ङम इति**। तथा च 'कुर्वन्नास्ते' इत्यत्र णत्वं स्यादिति मन्यते। **विभक्तिविशेषेति**। पञ्चम्या इत्यर्थः। **अनवकाशत्वादिति**। तथा चोत्सर्गापवादयोरयुक्तो विप्रतिषेध इति भावः। **पञ्चमीनिर्देशो भविष्यतीति**। व्यवस्थापक इति शेषः। तदेवं परत्वाद्वापवादत्वाद्वा पञ्चम्या इष्टव्यवस्थापकत्वं सिद्धमिति सूत्रयोर्नियमार्थत्वं स्थितम्। [1]'दीर्घात्' इत्यत्र पञ्चमी षष्ठ्यर्थेति [2]'सुराच्छाया' इति निर्देशादनुमीयत इति न [3]तदनुरोधेन छस्य तुक्। इदानीं भाष्यकृतोऽनयोः षष्ठीकल्पकतापरत्वेनापि व्यवस्थापनं संभवतीति प्रौढिमाश्रयन्ते — **यथार्थं वेति**। यथाविषयमित्यर्थः। **षष्ठीनिर्देश इति**। षष्ठ्यन्तेनैव कार्यिणो निर्देष्टव्या इति भावः। **नियमाभावः** नियामकत्वाभाव इत्यर्थः। यत्र कार्यी षष्ठीनिर्दिष्टो न भवति तत्रानेन षष्ठीनिर्दिष्टत्वमात्रं संपाद्यत इति [4]'इको यणचि' इत्यादौ कार्यी षष्ठीनिर्दिष्ट एवेति तत्रास्य नियामकत्वं न स्यात्, एकस्यानावृत्तस्य विधिनियमद्वयपरतायां असंभवादिति भावः। **इत्संज्ञेति**। आदेशस्यानुमीयमानत्वेन तदुपदेशकशब्दाभावात्, स्थानिवाचकस्य त्वनुवादकत्वेनोपदेशत्वाभावाच्चेति भावः। **प्रकृतिविकारयोरिति**। स्थान्यादेशयोरित्यर्थः। **मा भून्नियम इति**। इदं यत्र षष्ठी प्रकल्पिता तत्र नियमाभावेऽपि सिध्यति, परस्याप्रसङ्गादित्येतावन्मात्रपरं बोध्यम्। यत्र तु स्वतः सिद्धा षष्ठी तत्रानयोरप्रवृत्त्या दोषः स्थित एव। आवृत्त्या वोभयपरत्वमिति कथंचिद् योजने तु षष्ठीकल्पकतापरत्वाश्रयणं व्यर्थमिति प्रौढिवादता स्पष्टैव। **कृतायामित्संज्ञायामिति**। षष्ठीप्रकल्पकसूत्रप्रवृत्त्या तत्र सन्ग्रहणस्यानुवादकत्वेऽपि स्वतोऽज्ञातज्ञापकत्वेनोपदेशत्वसत्त्वेनान्तरङ्गयोरित्संज्ञालोपयोः सतोस्ततः षष्ठीप्रकल्पनमिति भावः। प्रत्ययविधानेनोपक्षीणा पञ्चमी षष्ठीप्रकल्पिकैव नेत्याह — **अथवेति**। **तत्र प्रकल्प्त्या भवितव्यमिति**। तथा च नियमार्थता आवृत्त्यैव संपादितेति प्रौढिः स्पष्टा। ननु तत्रेकः षष्ठीनिर्दिष्टत्वेऽपि यण् सप्तमीनिर्दिष्टो न भवतीति तत्र 'अचि' इति सप्तमी षष्ठीं प्रकल्पयेदिति शङ्कते — [**यदि चेति। यदयमिति।**] एकादेशविधौ सर्वत्र सप्तमीपञ्चम्योः सत्त्वेन परस्परषष्ठीप्रकल्पकत्वादेव सिद्धत्वादिति भाव : ॥

[१, ५११–५१८]

(**नारायणीयम्**) 'किमुदाहरणम्' इति प्रश्नपूर्वकमुदाहरण उक्तेऽपि तस्मिन्नुदाहरणे एतदनारम्भे किं स्यात्, यदनिष्टनिवारणायेदमारभ्यत इति पुनःप्रश्नावकाशमभिप्रेत्य निवार्यमप्यनिष्टं किं षष्ठीप्रकल्पनेन निवार्यते, उत नियमेनेतीदमपि प्रष्टृभिप्रेतमित्याह — **किमिति**। 'तस्मिन्' इत्यादिवचनं नियमार्थम्, कुतः, पूर्वोत्तरयोर्योगयोरविशेषात्, इत्यन्वयमभिप्रेत्य योगशब्दार्थमाह — **योग इति**। [5]'सूत्रार्थत्वेऽनयोः सूत्रयोर्नियमार्थमुच्चारणम्, अविशेषादिति स्यात्। तत्र हेत्वर्थस्य दुर्ज्ञानत्वम्। अत्र च सूत्रव्यवच्छेदे तात्पर्यम्, न भावसाधनत्वे, कर्मसाधनत्वस्य वक्ष्यमाणत्वात्। यदि च 'योगस्य' इति वा 'योगाविशेषात्' इति वा वार्तिके पाठस्तदा भावसाधनत्वेऽपि तात्पर्यम्। उत्तरं तु [6]प्रतीकं भाष्यगतम्। तत्र च द्विवचनोपपत्तये कर्मसाधनत्वव्याख्यानम्। **कर्मणीति**।

---

[1] पा. सू. ६. १. ७५.
[2] पा. सू. २. ४. २५.
[3] पञ्चम्यनुरोधेनेत्यर्थः।
[4] पा. सू. ६. १. ७७.
[5] योगशब्दस्य सूत्रार्थकत्व इत्यर्थः।
[6] प्रतीकशब्दस्य नपुंसकत्वं मृग्यम्।

[1]शिष्यर्थापेक्षं कर्मत्वं षष्ठीनिमित्तं न तु युज्यर्थापेक्षम्, तत्कर्मत्वस्य घञ्नाभिहितत्वात्। उत्प्रेक्ष्यमाणपाठान्तरे तु तदपेक्षकर्मताया अपि षष्ठीनिमित्तत्वं न विरुध्यते। वस्तुतस्तु तदुत्प्रेक्षणमेव निर्मूलम्, 'संबन्धः' इति व्याख्यानस्य सूत्रव्यवच्छेदेन धात्वर्थमात्रकीर्तनपरतयोपपत्तेः। [2]संबन्धशब्दस्य वा कर्मसाधनत्वादुत्तरग्रन्थस्यैतद्विशदनार्थत्वात्। अत एव योगापेक्षषष्ठ्यनुपपत्तौ सत्यां [3]षष्ठ्युपपादनम्। उत्प्रेक्ष्यपाठे त्वयं ग्रन्थोऽनावश्यकः स्यात्। योगस्य कार्यनिमित्तत्वे तद्विशेषस्यानियमहेतुत्वमिति तद्दर्शयति — **तदयमिति**। **अत्रापीति**। दिक्शब्दाध्याहारेण पञ्चम्यां पदाध्याहारनियमे प्रमाणाभावात्। **अपीति**। अत्रेतिर्द्रष्टव्यः। एवमनारम्भे उदाहरणेऽनिष्टप्राप्तिरित्यारम्भावश्यकत्वेऽनिष्टनिवारणं तु कथं क्रियत इति वीक्षायां 'नियम' इत्युक्तम्। तत्र प्रकारान्तरानाश्रयणे हेतुमाह — **तत्रेति**। नन्वधिकरणसप्तम्यामस्त्वनियमप्राप्तिः, अन्यत्र कथमित्याह[4] — **अचीति**। **उपपदेति**। क्रियाकारकसंबन्धस्यान्तरङ्गत्वात् कारकविभक्तेर्बलीयस्त्वम्। किं युगपदिग्द्वयस्य यण्प्रसङ्गे नियमार्थमेतत्, नेत्याह — **तत्रेति**। विशिष्टनियमादुभयव्यावृत्तिरित्याह — **पूर्वस्यैवेति**। पर्यायप्राप्तौ नियम इति कथम्, भाष्ये संदेहोपन्यासात्। संदेहे ह्यप्राप्तिः, अत आह — **संदेहस्त्विति**। संदेहस्यास्थिरत्वं कथम्, अत आह — **न हीति**। व्यक्तपक्ष इति भावः। तदा ह्येतद्विषयलक्षणाप्रामाण्यपरिहाराय पर्यायकल्पना। भाष्योक्तप्रथमोदाहरणे उभयनिर्देशस्यासौत्रत्वात् सौत्रमुभयनिर्देशमुदाहरति — **बहोरिति**। युगपत्कार्यासंभवे भाष्योक्तः संदेहः। स कुतः, तत्राह — **कार्यित्वेति**। कार्यकालत्वात् कथं पौर्वापर्यम्, अत आह — **सूत्रेति**। यथोद्देशाश्रयणम्। कार्यकालत्वेऽपि वा पाठपौर्वापर्यमुपस्थितयोस्तदभावेऽप्युपयुज्यत इति भावः। पर्यायव्यावृत्तेः प्रयोजनत्वात् प्रश्नानुपपत्तिमाशङ्क्याह — **विभक्तीति**। उपक्रमे संदेह इत्याह — **संदेहाच्चेति**। ननु "बहोर्लोपः' इत्यत्र संदेहाल्लोपस्य पर्यायप्राप्तिः कथमापाद्या, भूभावस्थानित्वाद्बहोरिष्ठादीनामेव लोपकार्यित्वनिश्चयादित्यत्राह — [5]**तदा चेति**। बहोः पाक्षिकलोपापादनं भूभावविधिर्न रुणद्धीति नात्र किंचिद्विरुध्यत इति भावः। गोशब्दस्य णित्त्वे फलाभावान्न पर्यायापादनमत्र शक्यते कर्तुमित्यत्राह — **यदीति**। परत्वेन व्यवस्थाभावे को दोषः, तत्राह — **णत्वेति**। अचस्तु ङमुटि तस्यासमानपदस्थत्वात् समानपदस्थस्य च पदान्तत्वाण्णत्वाभावः। ननु ङमो ङमुट्यपि पदान्तभक्तस्य पदान्तग्रहणेन ग्रहणान्न णत्वप्राप्तिः, तत्राह — **पदस्य चेति**। 'तास्यादिभ्यः सार्वधातुके' इत्यादौ द्वयोरपि प्रागकृतार्थत्वेन तुल्यत्वमित्यत्राह — **पूर्वेति**। अर्थशब्दस्यानेकार्थत्वादिह योग्यमर्थमाह — **यथेति**। कार्यीह विषयपदार्थ इत्याह — **प्रदेशेष्विति**। षष्ठीप्रकल्पने पूर्वस्य तत्कल्पनात् षष्ठ्यन्तस्य कार्यसंबन्धादितरस्य तदसंबन्धान्नियमफललाभात् तदभावकृतो दोषो नेत्यत्राह — **यत्रेति**। ततो न दोषस्तत्रेत्यर्थः। क्व तर्हि दोषः, तत्राह — **यत्रत्विति**। [7]"इको यणचि' इत्यादावस्य किं विधिमुखेन व्यापार उत नियममुखेन। नाद्य इत्युक्तम् — **अस्तीति**। न द्वितीय इत्याह — **तत्रेति**। कुत [8]इत्याह — **न हीति**। आकृतिपक्ष इति भावः। तदा हि सकृत् प्रवर्तमानं शास्त्रं विधिज्यायस्त्वन्यायेन विधिमुखेन प्रवर्तत इति नियमासिद्धिः। प्रतिपादनलक्षणोपदेशस्य स्थानिन्यादेशे च सुवचत्वादाह — **आदेशस्येति**। साक्षात् प्रतिपादनमुपदेशः। आदेशश्चात्रानुमानिकः। तर्हि स्थानिनीत्संज्ञायां लोपे च सत्यननुबन्धका-

---

[1] 'अविशेषात्' इत्यत्रत्यशिष्धात्वर्थापेक्षमित्यर्थः।
[2] संबन्धिशब्दस्य — ग.
[3] षष्ठ्यनुपपादनम् — ग.
[4] इत्यत आहेत्यर्थः।
[5] पा. सू. ६. ४. १५८.
[6] तथा चेति — ग.
[7] पा. सू. ६. १. ७७.
[8] इत्यत आहेत्यर्थः।

देशप्रवृत्त्या दोषाभाव इत्यत्राह — **स्थानी चेति**। विहितस्येत्संज्ञादिकं विधेयम्। विधिसमय एव चास्य षष्ठीप्रकल्प्त्या निवृत्त्यभिमुखत्वमित्यर्थः। ननु यणेग् [1]निवर्त्यते। यणोऽप्यनन्तरतमप्रवृत्तौ[न] दोष इत्यत्राह — **ततश्चेति**। षष्ठीप्रकल्पने सत्यनुवाद्यतयैव यणः प्रतिपत्तिर्न विधेयतया। प्रथमानिर्देशस्तु लाघवायेति भावः। ननु परत्वानवकाशत्वाभ्यां नियमपक्षवत् प्रकल्प्तिपक्षेऽपि व्यवस्था भविष्यतीत्यत्राह — **विरोधेति**। नियमपक्षे हि पर्यायप्राप्तिर्निवार्या नियमेनेति 'संदेहाच्च' इत्यत्रोक्तम्। पर्यायश्च विरोधमूल इति युज्यते तत्र परत्वादिना व्यवस्था। विरोधनिदानं च युगपत्स्थानित्वनिमित्तत्वासंभवः। अत्र तु षष्ठीप्रकल्प्त्या स्थानित्वमेवोभयोः, न तु निमित्तत्वं कस्यचिदपीति युगपत्कार्ये विरोधाभावः॥

ननु नियमपक्षे प्रकल्प्त्यभावेऽपि पूर्वोत्तरयोः कार्यित्वं परिभाषाद्वयादवगतमिति निमित्तत्वावगतिस्तत्रापि नास्तीति कथं कार्ययौगपद्यविरोधः, येन तत्र परत्वादिना स्याद्व्यवस्था। नैष दोषः, तत्र हि पूर्वस्यैव कार्यमुत्तरस्यैवेति च व्यापारः। न चैतद्वस्तुद्वयं युगपदुपपद्यत इति परत्वादिना व्यवस्था तत्रोचितैव। प्रकल्प्तिपक्षे तु नियमाभावादविरोध एवोभयकार्यित्वस्य। हरदत्तमिश्रैस्तु प्रकल्प्तिपक्षेऽपि परत्वादिना व्यवस्थोक्ता। तदुपपत्तिः कथमिति चिन्त्यम्। यद्वा, वक्ष्यमाणभाष्यलिङ्गाद्यौगपद्याभावनिश्चयवद्भिस्तैरुक्तमिति द्रष्टव्यम्॥

नियमाभावे नियमफलं कथं लभ्यम्, अत आह — **षष्ठीति**। ननु यत्र प्रकल्पनं, भवतु तत्र नियमफलम्। यथोक्तं भाष्ये। यत्र तु न कल्पनाकाङ्क्षा तत्र कथमित्यत्राह — **यत्र त्विति**। व्यक्तिपक्षाश्रयणमेतत्। नन्वित्संज्ञातोऽप्यादेशसंबन्धोऽन्तरङ्गः सन इत्यत्राह — **सूत्र इति**। उपदेशशब्दस्य करणसाधनत्वाच्छास्त्रं तच्छब्दार्थ इति सूत्र एवेत्संज्ञा प्रवर्तते, प्रयोगे त्वादेश इति भावः। ननु पञ्चमीलिङ्गात् परिभाषाप्रवृत्तौ सनोऽनूद्यमानत्वं भासते, न विधेयत्वमिति कथं विधौ पञ्चम्या उपक्षयः। विधेयत्वेऽपि कथं पञ्चम्यास्तत्रोपयोग [2]इत्याह — **परत्वेति**। विधिमात्रे पञ्चम्यनुपयोगेऽपि परत्वविशिष्टविधौ तदुपयोगः। न च षष्ठीप्रकल्प्त्या विधेयत्वाभाव एव, अपूर्वत्वेन विधेयत्वात्। न चानुमानिकविधिः, प्रत्यक्षतस्तत्संभवात्। न च षष्ठीप्रकल्प्त्या असंभवः, विध्यानुगुण्येन प्रकल्प्तिबाधनात्। ननु षष्ठीसत्त्वात् प्रकल्पकत्वाभावसाधनं किमिकि, उत यणि। नाद्यः, सिद्धसाधनात्। नान्त्यः, हेत्वसिद्धेरित्याशङ्क्याभिप्रायमाह — **इक इति**। वाक्ये प्रकल्पनाभावसाधनमिति भावः। वाक्ये कस्यचित् षष्ठीसत्त्वमन्यस्य कल्पनाभावे कथं प्रयोजकमित्यपि शङ्का टीकायां निरस्ता। षष्ठीसत्त्वे तत्प्रतिपाद्यस्य स्थानित्वावगतेस्तदपेक्षमन्यस्यादेशत्वमिति प्रतीतादेशत्वनिर्वाहाय प्रकल्पनाभावकल्पनात्। कल्पनायां हि प्रथमप्रतीतमादेशत्वं परित्याज्यं यणः, अन्यस्य चाश्रुतस्य तत् कल्पनीयमिति गौरवम्। अथापि स्यात् कल्पना, प्रतीतादेशत्वानुगुणतया, न त्वन्यथेत्याह भाष्यकारः — **अथवेति**। कथं कृत्वा ज्ञापकमित्यत्राह — **यदीति**। युगपत्प्रकल्प्त्यभावे किं पर्यायः, नेत्याह — **तत्रेति**। परत्वानवकाशत्वाभ्यां पञ्चमीप्राबल्ये प्रसक्तमनिष्टं निवारयति — **दीर्घादिति**॥

---

[1] निवर्तते — ग.

[2] इत्यत आहेत्यर्थः।

स्दं रूपं शब्दस्याशब्दसंज्ञा. १. १. ६८.

[१, ५१८–५२०]

(**लघुविवरणम्**) **स्वरूपस्येति**। शब्देनार्थे प्रतिपादितेऽर्थे कार्यस्यासंभवात् [1]तत्साहचर्यादिति शेषः। **अन्ये त्विति**। शब्दस्य [2]स्वं रूपं ग्राह्यत्वेन विधित्सितम्, न चान्यल्लिङ्गमस्तीत्यर्थः। **विध्यन्तरेति**। न हि 'स्वं रूपम्' इत्यनेन [3]'अग्नेः' इत्यादिपञ्चम्यन्तस्य सामानाधिकरण्येन वैयधिकरण्येन वा विशेषणविशेष्यभावः संभवतीत्यर्थः। ननु संज्ञापक्षे प्रदेशेष्वग्निशब्द उच्चारितः संज्ञिस्वरूपं प्रत्याययेत्, लोकप्रसिद्धमप्यर्थम्, [4]न चेदं नास्ति — एकशब्दो बह्वर्थ इति, ततश्च लोकप्रसिद्धेऽर्थे प्रतिपन्ने तत्र च कार्यासंभवात् पर्यायेभ्यो ढगादिर्दुष्परिहर इत्यत आह — **देवदत्तादयश्चेति**। नियमार्थत्वमुपपादयति — **सर्वार्थेति**। अन्यथा शब्दार्थसंबन्धस्यानित्यत्व[5]प्रसङ्गादिति भावः। न च संबन्धस्य [6]द्विष्ठत्वात् संज्ञिनश्च पिण्डादेः कस्यचिद्विनाशित्वात् तद्विनाशे प्रतिशब्दं संबन्धभेदेन [7]समवायवैलक्षण्यात् संयोगिनाशे संयोगनाशवत् शब्दार्थसंबन्धस्यापि नाशः स्यादिति वाच्यम्, शक्तिर्हि संबन्धः, [8]सा चासर्वार्थविषया [9]परस्परनिरपेक्षैकैकार्थनिरूप्या शब्दैकनिष्ठाश्रीयते। ततश्च नानित्यत्वदोष इति भावः। **शक्तियुक्त इति**। शक्त्याश्रय इत्यर्थः। **प्रत्याय्यशक्तियुक्त इति**। शक्तिविषय इत्यर्थः। शब्दादर्थप्रतीतिलक्षणकार्येण तन्निष्ठायां शक्तौ कल्पितायां तयैवार्थप्रतीतौ सिद्धायां पृथगर्थनिष्ठशक्तिकल्पने प्रमाणाभावात्। रूपरूपिणोर्भेदाभावात् षष्ठीनिर्देशोऽनुपपन्नः, संज्ञासंज्ञिसंबन्धश्च, अत आह — **रूपशब्देनेति**। अग्निशब्दत्वादिसामान्यमुपपादयति — **शुकेति**। ननु रूपं शब्दस्येत्येवास्तु, किं स्वग्रहणेनेत्यत आह — **तत्रेति**। आत्मीयवचनेन स्वशब्देन प्रत्यासत्त्या व्यक्तिरभिधीयते। ततश्चायमर्थः — **स्वं** शब्दलक्षणा व्यक्तिरग्निशब्दादिः, **शब्दस्य रूपं** शब्दसंबन्ध्यग्निशब्दत्वादिसामान्यसंज्ञिका भवतीति व्यक्तेः सामान्यं संज्ञेत्येतत्पक्षसंभवः। अथ 'शब्दस्य रूपम्' इत्यनूद्य स्वत्वं विधीयते, तदाग्निशब्दत्वादिसामान्यं **स्वम्** अग्निशब्दादिव्यक्तिसंज्ञं भवतीति द्वितीयः पक्षः संपद्यते। एवं च सामानाधिकरण्येन [10]संज्ञासंज्ञिविध्यर्थं स्वग्रहणमित्यर्थादुक्तं भवति। नन्वेकत्र व्यक्तेर्ढक्, अपरत्र सामान्यादिति फलभेदः स्यादित्यत आह — **व्यक्तिरिति**। उभयत्रापि व्यक्तेरेव ढगिति फले न भेद इत्यर्थः। सापेक्षनिरपेक्षयोर्निरपेक्षं बलवदित्यभिप्रेत्याह — **प्रतीताविति**। संबन्धग्रहणानपेक्षत्वे तात्पर्यम्। अत एवैतद्वैधर्म्यमर्थे प्रतिपादयता 'संबन्धग्रहणमपेक्षते' इत्युक्तम्। हेयत्वमाह — **अनुकरणेति**। **न चेति**। शब्दात्मकत्वात् संज्ञाया इति भावः॥

---

[1] 'तत्' इति नास्ति — ड.
[2] स्वरूपं — ड, ढ.
[3] पा. सू. ४. २. ३३.
[4] 'न चेदम्' इत्यादि 'बह्वर्थ इति' इत्यन्तं नास्ति — ण.
[5] प्रसङ्ग इति — ण.
[6] द्विनिष्ठत्वात् — ढ.
[7] समवायलक्षणवैलक्षण्यात् — ड.
[8] स च सर्वार्थ — ड, ढ.
[9] 'परस्पर' इत्यस्यानन्तरं 'संबन्ध' इत्यधिकम् — ड, ढ.
[10] संज्ञासंज्ञिभावविध्यर्थमित्यर्थः।

[१, ५१८–५२०]

(**विवरणम्**) **स्वरूपस्येति**। शब्देनार्थगतेरर्थे [1]च केषांचित् कार्याणामसंभवात् तत्साहचर्यादिति शेषः। **अन्ये त्विति**। शब्दस्य स्वं रूपमिह ग्राह्यत्वेन विधित्सितमिति नेह प्रदेशविशेषसमर्पकं विधेयव्यतिरिक्तं लिङ्गमस्तीति भावः। **विध्यन्तरेति**। न हि 'स्वं रूपम्' इत्यस्य [2]'अग्नेर्ढक्' इत्यादौ सामानाधिकरण्येन वैयधिकरण्येन वा संबन्धः संभवतीत्यर्थः। ननु संज्ञापक्षे प्रदेशेष्वग्निशब्दः [3]'स्वं रूपं प्रत्याययेत्, लोकप्रसिद्धमप्यर्थम्, [4]'उभयगतिरिह शास्त्रे भवति' इति न्यायात्, एकस्य [5]'शब्दस्यानेकार्थत्वसंभवाच्च। [6]'तथा चार्थे प्रतिपन्ने [7]'तत्र कार्यासंभवात् पर्यायेभ्योऽपि[8]' ढगादिर्दुष्परिहर इत्यत आह — **देवेति**। नियमार्थत्वमुपपादयति — **सर्वेति**। पूर्वत्र **शक्तियुक्त इति** शक्त्याश्रय इत्यर्थः, उत्तरत्र शक्तिविषय इति। शाब्द्यां हि प्रतीतौ शब्दः कारणम्, नार्थः। कारणे च कार्यान्यथानुपपत्तिप्रमाणिका शक्तिः, नाकारणार्थाश्रया भवितुमर्हतीति। अनेकार्थप्रत्यायनशक्तियुक्तत्वाभावे च [9]'शब्दस्यार्थप्रत्यायकत्वं पुरुषाधीनमिति वाच्यम्। तथा च शब्दार्थसंबन्धानित्यत्वं स्यादिति भावः। न च संबन्धस्य द्विष्ठत्वात् संबन्धिनश्च कस्यचित् पिण्डादेरनित्यत्वेन तद्विनाशे प्रतिशब्दं संबन्धभेदेन समवायवैलक्षण्यात् संयोगिनाशे संयोगनाशवत् शब्दार्थसंबन्धस्यापि नाशः स्यादिति वाच्यम्, शक्तिर्हि[10] संबन्धः, सा चासर्वार्थविषया परस्परनिरपेक्षैकैकार्थनिरूप्या शब्दैकनिष्ठाश्रीयते। तथा च विषय[11]'नाशेऽप्याश्रयविनाशाभावान्नानित्यत्वं शब्दार्थसंबन्धस्येति। ननु रूपरूपिणोर्भेदाभावात् शब्दस्येति षष्ठ्यनुपपन्ना, संज्ञासंज्ञिसंबन्धश्चेत्यत आह — **रूपेति**। अनेकव्यक्तिसमवेतत्वाभावेनाकाशत्वादिवत् न तत् सामान्यमित्यत उक्तम् — **शुकेति**। न च तत्रोच्चारणक्रियैव भिद्यते नोच्चार्यमाणः शब्द इति सांप्रतम्, तथापि तालोष्ठपुटव्यापाररूपस्योच्चारणस्याश्रौतत्वेन शब्दश्रवणसमनन्तरं [12]'वक्तृविशेषानुमानं न स्यात्। नापि व्यञ्जका ध्वनय एव भिद्यन्ते न व्यङ्ग्याः शब्दाः। न च वर्णव्यतिरिक्ता ध्वनय एव न सन्तीति वाच्यम्, दूराद्वर्णविशेषमनवगच्छतो ये कर्णपथमवतरन्ति तेषां ध्वनिशब्दवाच्यानामवश्याभ्युपेयत्वादिति सांप्रतम्। उदात्तादीनां वर्णधर्मत्वेन प्रतीयमानानामसति बाधके [13]'ध्वनिधर्मत्वकल्पनासंभवात्[14] [15]'तेषां च परस्परविरुद्धानां युगपदेकधर्म्याश्रयानुपपत्त्या धर्मिभेदकत्वसिद्धावग्न्यादिशब्दभेदसिद्धेरिति भावः। ननु तथापि प्रायेण सामानाधिकरण्ये सति संज्ञासंज्ञिसंबन्धो दृष्टः, [16]'न चेह रूपं शब्दस्येत्यनयोस्तदस्तीत्यत आह — **तत्रेति**। आत्मीयवाचिना स्वशब्देन प्रत्यासत्त्या रूपशब्दोक्तसामान्यस्य[17] व्यक्तिरभिधीयते। तथा चायमर्थः — **स्वं** शब्दलक्षणा व्यक्तिरग्निशब्दादिः **शब्दस्य रूपम्** अग्निशब्दादि[18]'संबन्धिसामान्यसंज्ञिका भवतीति व्यक्तेः सामान्यं संज्ञेत्ये-

---

[1] चकारो नास्ति — ञ.
[2] पा. सू. ४. २. ३३.
[3] स्वरूपं — छ, ञ, ट.
[4] महाभाष्यम् १. १. २३.
[5] शब्दस्यानेकार्थसंभवाच्च — ञ.
[6] तथाप्यर्थे — ञ.
[7] 'तत्र' इत्यस्यानन्तरं चकारोऽधिकः — ञ, ट.
[8] अपिशब्दो नास्ति — च, छ, ट.
[9] शब्दस्यार्थे प्रत्यायकत्वं — ञ.
[10] हिशब्दो नास्ति — च, छ.
[11] नाशेऽप्याश्रयनाशाभावात् — ञ.
[12] व्यक्तिविशेषानुमानं — च.
[13] ध्वनिधर्मकल्पना — च, छ.
[14] असंभवादिति छेदः।
[15] तथा च परस्पर — ञ.
[16] न चेह स्वं शब्दस्येति — ञ.
[17] सामान्यसंबन्धिनीत्यर्थः।
[18] संबद्धसामान्य — ञ.

तत्पक्षसंभवः। अथ शब्दस्य रूपमित्यनूद्य स्वत्वं विधीयते तदा स्वशब्दवाच्या व्यक्तिः सामान्यस्य संज्ञेति द्वितीयपक्षसंभव इति सामानाधिकरण्यं संज्ञासंज्ञिनोरिहापीति सूचयता स्वशब्दस्यार्थवत्तोक्ता भवति। **व्यक्तिद्वारेणैवेति**। सामान्यस्य ढगादिभिः साक्षात् पौर्वापर्यासंभवादिति भावः। नायं नियमः सामानाधिकरण्य एव संज्ञासंज्ञिभाव इति, [1]'उञः' इत्यादौ व्यभिचारात्। तथा च स्वंशब्दस्य जातिपरत्वे शब्दस्य जातिः संज्ञा, व्यक्तिपरत्वे तु शब्दस्येत्यस्य जातिपरत्वाज्जातेर्व्यक्तिः संज्ञेति रूपग्रहणं विनैव सिध्यतीत्यभिप्रायेण पृष्टम् — भाष्ये **रूपग्रहणमिति**। तत्रात्मीयवाचिना स्वशब्देनार्थं विहाय रूपस्यैव कथं परिग्रह इत्यत आह — **प्रतीताविति**। उपदिश्यत इत्युपदेशः संबन्धः, **तदनपेक्षणात्** संबन्धाग्रहणादिति यावत्। रूपतुल्यत्वमर्थस्याभ्युपेत्याह — **न चेति**। आवर्तिन्यो हि संज्ञास्ताः शब्दात्मिकाः संभवन्तीति भावः। अस्तु तर्हि स्वं शब्दस्याभिधेयमित्यध्याहारेणार्थः संज्ञीत्यत आह — **संज्ञित्वे चेति**। इह [2]शास्त्रेऽर्थो गृह्यन्ते। तथा च स्वशब्देनाप्यर्थो गृह्यत इति शङ्कां निवर्तयितुं रूपग्रहणं कुर्वन् [3]अर्थग्रहणं ज्ञापयति। 'स्वं रूपम्' इति वचनाच्च रूपमपि ग्राह्यम्। तत्रोभयानुग्रहायार्थवतो रूपस्य सति संभवे ग्रहणम्। असति तु [4]केवलस्यार्थस्य शुद्धस्य वा रूपस्य ग्रहणमित्यभिप्रेत्याह — **अर्थयुक्तमिति**। **टेरिति**। [5]टिसंज्ञाज्विशेषणस्य निर्धारणषष्ठीलभ्यं वर्णरूपत्वमिति तदाद्यर्थवत्तारूपेण नाश्रीयत इति भावः॥

[१, ५१८–५२०]

(**उद्द्योतनम्**) इदं परिभाषासूत्रमिति [6]केचित्। तदुपन्यस्यति — **स्वरूपस्येति**। [7]'अग्नेर्ढक्' इत्यत्राग्निशब्देनार्थेऽवगतेऽप्यर्थात्[8] प्रत्ययस्य परत्वासंभवात् तत्सहचरितशब्दस्य ग्राह्यतया तद्वाचकशब्दमात्रात् प्रत्ययनिरासाय सूत्रोपात्तशब्दस्यैव ग्रहणार्थमियं परिभाषेत्यर्थः। '[9]तन्निरास[10]पूर्वकं संज्ञामतमाह — **अन्ये त्विति**। **लिङ्गेति**। अत्र शब्दस्य स्वरूपं ग्राह्यत्वेन विधित्सितमिति देशविशेषसमर्पकं विधेयव्यतिरिक्तं लिङ्गं नास्तीत्यर्थः। [11]**विधीति**। यद्यपि [12]'अग्नेर्ढक्' इत्यत्राग्निशब्द एव ग्राह्यः, न शब्दान्तरमिति नियमः संभवति, तथापि [13]'इको गुणवृद्धी' इत्यत्र गुणवृद्धिप्रदेशेषु [14]यथा 'अङ्गस्य' इत्यनेनेक इत्यस्य सामानाधिकरण्येन वैयधिकरण्येन वा संबन्धः, तथात्र न संबन्ध इत्यर्थः। ननु संज्ञापक्षे प्रदेशेष्वग्निशब्दोऽग्निशब्दं प्रत्याययेत्, लोकप्रसिद्धमप्यर्थम्। तथा च तद्वाचक[15]शब्दान्तरव्यावृत्तिर्न स्यादिति शङ्कामात्रं निराह — **देवदत्तेति**। नियमार्थत्वमेवाह — **सर्वेति**। वृद्धिसूत्रे [16]'अनेकशक्तेः' इति फक्किकाव्याख्याने कृतोपपादनमेतत्।

---

[1] पा. सू. १. १. १७.
[2] शास्त्रेऽर्थो गृह्यते — ञ.
[3] अन्वर्थग्रहणं — ञ.
[4] केवलार्थस्य — ञ.
[5] टिसंज्ञकस्य विशेषणस्य — च, छ, ट.
[6] 'केचित्' इत्यस्यानन्तरम् 'आहुः' इत्यधिकम् — म.
[7] पा. सू. ४. २. ३३.
[8] अर्थे ढक्प्रत्ययस्य निरासाय सूत्रोपात्त — म.
[9] एतन्निरास — ऋ.
[10] पूर्वकसंज्ञामतमाह — अ; पूर्वकं संज्ञामाह — म.
[11] 'विधीति' इत्यतः 'न संबन्ध इत्यर्थः' इत्यन्तं नास्ति — म.
[12] पा. सू. ४. २. ३३.
[13] पा. सू. १. १. ३.
[14] यदा — अ.
[15] अर्थे प्रतिपन्ने तत्र कार्यासंभवात् तद्वाचकशब्दान्तरस्यापि ग्रहणापत्त्येति भावः।
[16] अनेकशक्तिरिति — अ, म.

अर्थ इति। शब्दे [1]प्रतिपादकत्वशक्तिवदर्थे प्रतिपाद्यत्वशक्तिरभ्युपेया, विनिगमकाभावादित्यर्थः। [2]केचित्तु 'शक्तियुक्तोऽर्थः' इत्यस्य शक्तिविषय इत्यर्थः, कार्यानुपपत्तिकल्प्यशक्तेरर्थप्रतीतिजनकशब्द एव कल्प्यतया तदजनकार्थेऽकल्पनात्, इत्याहुः। तच्चिन्त्यम्, वाच्यवाचकभावज्ञानं हि शब्दस्य सहकारि। गोशब्दो गोत्वस्य वाचक इति ज्ञानवद् गोत्वं गोशब्दवाच्यमिति ज्ञानस्याप्यर्थधीहेतुत्वात्। न च शब्दनिष्ठशक्तिविषयत्वमेव वाच्यत्वमिति वाच्यम्, वाच्यनिष्ठशक्तिनिरूपकत्वमेव वाचकत्वमित्यपि सुवचत्वात्। सिद्धान्ते शब्दार्थसंबन्धानां त्रयाणामपि नित्यत्वेन वाचकतया ज्ञातशब्दवद् वाच्यतया ज्ञातार्थस्यापि हेतुत्वाविरोधात्। अवस्थाभेदभिन्नव्यक्तिनिष्ठतया देवदत्तत्वादेरपि जातित्वात्। दण्डादौ घटजननशक्तिज्ञानं तदुपादानहेतुः, न तु [3]घटजनने शक्तिज्ञानं दण्डस्य सहकारि। इह तु शब्दस्यार्थज्ञानजनने शब्दज्ञानं सहकारीति कारणता[4]निर्वाहकशक्तिविलक्षणतयास्या [5]अकारणनिष्ठत्वेऽपि विरोधाभावाच्चेति कैयटाशय इति **नवीनाः**। **व्यवहाराय** नियतव्यवहाराय। तेनाग्निशब्दस्यैव ग्रहणम्, न तदर्थस्येत्यर्थः। ननु रूपरूपिणोरभेदात् कथं शब्दस्येति षष्ठी, कथं वा संज्ञासंज्ञिभावः, अत आह — **रूपशब्देन चेति**। एकव्यक्तिकाकारत्वादेः सामान्यत्वाभावादाह — **शुकेति**। उदात्तादीनां [6]वर्णधर्मत्वाङ्गीकारेण तद्भेदे शब्दस्यापि भेदस्यावश्यकत्वाद् व्यञ्जकध्वनीनामेव भेदः, न व्यङ्ग्यशब्दस्येति मतमयुक्तमिति भावः। ननु [7]'वृद्धिरादैच्' इत्यादौ प्रायेण सामानाधिकरण्ये सत्येव संज्ञासंज्ञित्वदर्शनात् 'रूपं शब्दस्य' इत्यत्र तदभावात् कथं संज्ञासंज्ञित्वम्, अत आह — **तत्रेति**। रूपशब्देन सामान्याभिधाने सतीत्यर्थः। आत्मीयवाचिना स्वशब्देन रूपशब्दवाच्यसामान्यसंबन्धिनी व्यक्तिरभिधीयते। एवं च स्वशब्देनाग्निशब्दव्यक्तिमुद्दिश्य 'शब्दस्य रूपम्' इति विधानेऽग्नि[8]शब्दत्वसामान्यं व्यक्तेः संज्ञा, 'शब्दस्य रूपम्' इत्युद्दिश्य 'स्वम्' इति विधाने व्यक्तिः सामान्यस्य संज्ञेति सामानाधिकरण्येनैव पक्षद्वयमपि संभवति। अत एव स्वशब्दस्य संज्ञासंज्ञिसामानाधिकरण्यसंपादकत्वान्न वैयर्थ्यमिति भावः। [9]ननु व्यक्तेः संज्ञित्वे [10]'अग्नेर्ढक्' इति संगच्छते, अग्नि[11]शब्दत्वसामान्यस्य संज्ञित्वे ढक्परत्वं न संभवतीति कथं पक्षद्वयस्य साम्यम्, अत आह — **व्यक्तिरिति**। व्यक्तिः सामान्यरहिता न कार्यं प्रतिपद्यते, सामान्यमपि व्यक्तिद्वारा कार्यं प्रतिपद्यत इति सामान्यावच्छिन्नव्यक्तेः कार्यसंबन्ध इत्यत्र कल्प[12]द्वयस्य साम्यमेवेत्यर्थः। सामानाधिकरण्य एव संज्ञासंज्ञित्वमिति न नियमः, [13]'उञः' इत्यादौ व्यभिचारात्। तथा च स्वशब्दस्य [14]जातिपरत्वे शब्दस्य जातिः संज्ञा, व्यक्तिपरत्वे तु 'शब्दस्य' इत्यस्य भावप्रधानत्वाद् व्यक्तिः [15]शब्दत्वसामान्यस्य संज्ञेति रूपग्रहणं विनापि सिध्यतीत्यभिप्रेत्य 'रूपग्रहणं किमर्थम्' इति भाष्यम्। तत्र 'शब्दस्य स्वम्' इत्युक्ते आत्मीयवाचिना स्वशब्देन रूपमेव गृह्यते नार्थ इत्यत्र किं विनिगमकम्, अत आह — **प्रतीताविति**। उपदिश्यते ज्ञाप्यत इत्युपदेशः संबन्धः, तदनपेक्ष-

---

[1] प्रतिपादनशक्तिवत् — अ, ऋ.
[2] विवरणोक्त्यनुवादः — केचित्त्वित्यादिना ।
[3] घटजननशक्तिज्ञानं — अ.
[4] निर्वाहिशक्ति — म.
[5] अकरणनिष्ठत्वेऽपि — अ; करणनिष्ठत्वेऽपि — म.
[6] वर्णधर्मत्वेनाङ्गीकारेण — म.
[7] पा. सू. १. १. १.
[8] शब्दस्य सामान्यं — म.
[9] व्यक्तिसंज्ञित्वे — म.
[10] पा. सू. ४. २. ३३.
[11] शब्दसामान्यस्य — म.
[12] द्वयसाम्यमेवेत्यर्थः — अ.
[13] पा. सू. १. १. १७.
[14] 'जातिपरत्वे शब्दस्य' इति नास्ति — अ.
[15] 'शब्दत्व' इति नास्ति — म.

णात् संबन्धग्रहणानपेक्षणादिति यावत्। अन्तरङ्गत्वे चोपदेशानपेक्षत्वं हेतुः। [1]अर्थे हेतुत्रयराहित्यमाह — **अर्थो हीति**। **संबन्धेति**। [2]अतो बहिरङ्ग इत्यर्थः। **अनुकरणेति**। तथा च तत्रासंभवाद्धेय इत्यर्थः। भवतु वा रूपतुल्यत्वमर्थस्य, तथापि तस्य [3]संज्ञात्वसंज्ञित्वयोरसंभवाद्रूपस्यैव ग्रहणं युक्तमित्यभिप्रेत्य संज्ञात्वं तावन्निराह — **न चेति**। 'आवर्तिन्यः संज्ञा भवन्ति' इति न्यायात् शब्द एव संज्ञा, नार्थ इत्यर्थः। अस्तु तर्हि शब्दस्य स्वमभिधेयमित्यध्याहारेणार्थस्य संज्ञित्वम्, अत आह — **संज्ञित्वे चेति**। **सूत्रमिति**। लोकव्यवहारादेवार्थस्याभिधेयत्वसिद्धेरित्यर्थः। ज्ञापकत्वे युक्तिमाह — **यत इति**। [4]व्यावर्त्ये सत्यपि ज्ञापकत्वं न कुतः, अत आह — **सतीति**। **नेति**। 'व्यर्थं सज्ज्ञापकं भवति' इति न्यायादिति भावः। ननु रूपग्रहणेन स्वशब्दस्यार्थपरत्वे ज्ञापिते क्वचिद्रूपं क्वचिदर्थो गृह्यत इति शङ्कां [5]निराकरोति — **अर्थयुक्तमिति**। सति संभव इत्यादिः। असंभवे तु क्वचित् [6]केवलस्यार्थस्य रूपस्य वा ग्रहणं संभवत्येवेति भावः। अर्थवद्ग्रहणस्य प्रयोजनमाह — **तेनेति**। [7]'सुपां सुलुक्' इत्यादिना विहितस्य विभक्त्यादेशस्य 'शे' इत्यस्यार्थवत्त्वम्, न 'काशे' इत्यादौ स्थितस्येत्यर्थः। **यथेति**। [8]'अचोऽन्त्यादि टि' इत्यत्र निर्धारण[9]षष्ठ्यान्त्यशब्दस्याच्परत्वात् [10]तदाद्यर्थवत्तया नाश्रीयत इत्यर्थः। [11]यद्यपीट एत्वेऽर्थवतष्टेर्ग्रहणं संभवति, तथापि वर्णरूपेणैव तत्रापि [12]टिग्रहणात् [13]'आत्मनेपदानम्' इति बहुवचनाच्च नार्थाश्रयणमिति भावः॥

[१, ५१८–५२०]

(**रत्नप्रकाशः**) 'अशब्दसंज्ञा' इति लुप्तषष्ठीकं पदम्। स्वशब्द आत्मीये। आत्मीयत्वं च 'सेयं दीपशिखा' इतिवत् प्रत्यभिज्ञाहेतुसामान्यम्। तथा च शब्दसंज्ञेतरशब्दस्य सदृशं रूपं संज्ञीति सूत्रार्थः। एतेन 'रूपशब्देन चेहाग्निशब्दत्वादिकं शुकशारिकापुरुषोदीरितभिन्नशब्दव्यक्तिसमवेतं सामान्यमभिधीयते। तत्र व्यक्तेः सामान्यं संज्ञा, सामान्यस्य वा व्यक्तिरिति व्याख्याने कामचारः। व्यक्तिः कार्यं प्रतिपद्यमाना सामान्यप्रतिबद्धैव प्रतिपद्यते। सामान्यमपि कार्यं प्रतिपद्यमानं व्यक्तिद्वारेणैव प्रतिपद्यत इति फले न कश्चिद् भेदः' इति कैयटो निरस्तः। कार्यप्रतिपत्ताविव संज्ञासंज्ञित्वप्रतिपत्तावपि व्यक्तिसामान्ययोः साहित्यस्यैवावश्यकत्वेन केवलयोः संज्ञासंज्ञिभावकथनस्यासंबद्धप्रलापत्वात्। **रूपग्रहणं किमर्थमिति**। स्वशब्देनैवेष्टग्रहणसिद्धेरिति भावः। **न ह्यन्यत् स्वमिति**। अर्थस्य सत्त्वेऽपि तस्य संज्ञात्वं न संभवति, संज्ञित्वे सूत्रानर्थक्यमिति भावः। एतेन 'प्रतीतावुपदेशानपेक्षत्वादन्तरङ्गत्वादहेयत्वादसाधारणत्वाच्च रूपमेव ग्रहीष्यते। अर्थो हि प्रतीतौ संबन्धग्रहणमपेक्षते। अनुकरणशब्देषु नार्थः प्रतीयते। साधारणश्च, पर्यायैरपि प्रत्यायनात्। न चार्थः संज्ञेति शक्यते वक्तुम्, संज्ञित्वे चार्थस्य सूत्रमेतदनर्थकमिति प्रश्नः' इति कैयटो निरस्तः। शक्तिग्रहपूर्वकत्वेन शब्दादर्थप्रतीतेः 'प्रतीतावुपदेशानपेक्षत्वात्'

---

[1] अर्थहेतुत्रय — अ.
[2] अर्थतो बहिरङ्ग इत्यर्थः — अ.
[3] संज्ञासंज्ञित्वयोः — ऋ.
[4] व्यावर्त्यसत्त्वेऽपि — म.
[5] निवारयति — म.
[6] केवलग्रहणं संभवत्येवेति — अ.
[7] पा. सू. ७. १. ३९.
[8] पा. सू. १. १. ६४.
[9] षष्ठ्यान्त्यस्याच्परत्वात् — अ.
[10] तदादिरर्थवत्तया — म.
[11] यद्यपि टेरेत्वे — म.
[12] टेर्ग्रहणात् — ऋ.
[13] पा. सू. ३. ४. ७९.

इति हेतोर्मानाभावेन 'अन्तरङ्गत्वात्' इति हेतोश्च स्वरूपासिद्धत्वात्। विशेषणत्वेनाश्रीयमाणस्यार्थस्याप्यहेयत्वेनाहेयत्वहेतोरेकस्यैव शब्दस्य तदर्थबोधाय प्रयुज्यमानत्वेन तदर्थस्य तत्रासाधारणत्वेन 'असाधारणत्वात्' इति हेतोश्च व्यभिचारित्वात्। अर्थस्य स्वप्रतिपत्तौ संबन्धग्रहणापेक्षाहेतोरर्थग्रहणस्यैव साधकत्वात्। अनुकरणशब्दानामनुकार्यातिरिक्तार्थाभावस्याननुकरणशब्दैरर्थग्रहणं नेति बोधयितुमशक्तेः। वस्तुगत्या साधारणस्याप्यर्थस्य तत्तत्प्रयोगापेक्षया असाधारणत्वेनासाधारणत्व-[1]हेतोरप्रयोजकत्वाच्च। **अर्थ इति**। तथा चार्थविशिष्टमेव [2]स्वरूपं संज्ञि स्यादित्यनर्थकस्यापि स्वरूपस्य संज्ञित्वसंपादनेन रूपग्रहणं सार्थकं भवतीति भावः। **न कर्तव्या भवतीति**। अर्थविशिष्टस्य संज्ञित्वबोधनायेति शेषः। नियमार्थं त्ववश्यं कर्तव्यमेव। अन्यथा 'प्रोढवान्' इत्यादावनर्थकेऽप्यूढादौ परतो वृद्ध्यादिप्रसङ्गात्। येषां शब्दानामर्थवदेव वा अनर्थकमेव वा स्वरूपं संज्ञि भवति, तत्रास्याः परिभाषाया न कोऽपि व्यापारः। 'अनिनस्मन्वर्णग्रहणेषु न' इत्यस्या निषेधो ज्ञेयः। तत्रानिनस्मन्नंशे तु मूलं येन विधिसूत्रंगतम् [3]'अनिनस्मन्ग्रहणान्यर्थवता चानर्थकेन च तदन्तविधिं प्रयोजयन्ति' इति वार्तिकम्। वर्णांशे तु [4]'तस्मादित्युत्तरस्य' [5]'ल्वादिभ्यः' इत्यादिसौत्रनिर्देशाः॥

[१, ५१८–५२०]

(नारायणीयम्) संज्ञा परिभाषा वेति संदेहे सति निर्णयमाह — **परीति**। परिभाषात्वे हेतुः — **नियमार्थेति**। अन्यत्रापि सूत्रस्य परिभाषात्वे नियामकत्वमेव तन्त्रमिति भावः। नन्वप्रसिद्धार्थविनियोगात् संज्ञात्वमुचितमित्यत्राह — **स्वरूपस्येति**। यद्यपि स्वरूपं न पदार्थत्वेन प्रसिद्धम्, तथापि शास्त्रीयकार्यस्यार्थेऽसंभवात् तद्वाचिनां संप्रत्यये सति स्वरूपग्रहणं प्राप्तमिति नियमोपपत्तिरिति भावः। **अन्ये त्विति**। इक्परिभाषादिषु द्वयं दृष्टम् — नियामकत्वं [6]लिङ्गवत्त्वं च। तत्रोभयोः प्रयोजकत्वे गौरवादन्यतरस्य परिभाषात्वप्रयोजकत्वम्। तत्र [7]नियामकत्वमतिप्रसक्तम्, अपरिभाषास्वपि सत्त्वादिति लिङ्गवत्त्वमेव प्रयोजकमिति भावः। **विध्यन्तरेति**। यद्यपि परिभाषात्वे [8]'विध्यन्तरशेषत्वं न तन्त्रम्, तथात्वस्याधिकारादिष्वपि सत्त्वात्। तथापि परिभाषात्वव्यापकमिदमिति व्यापकनिवृत्त्या व्याप्यनिवृत्तिरिति भावः। विध्यपेक्षितार्थप्रतिपादकत्व[9]रूपविधिशेषत्वमस्य यद्यपि विद्यते, तथापि विधिवाक्यैकवाक्यतानुकूलपदयोगित्वं विध्यनुवादेन तदपेक्षितविशेषप्रतिपादकत्वं वा परिभाषात्वव्यापकमित्यभिमानः। वस्तुतस्तु [10]'षष्ठी स्थानेयोगा' इत्यादौ [11]'नेदृग्विधिशेषत्वमिति परिभाषात्वव्यापकत्वमस्य नास्तीति [12]प्रागुक्तस्यैव तद्व्यापकत्वम्। न च लिङ्गाभावः, शब्दत्वस्यैव लिङ्गत्वात्। कार्यमात्रस्य लिङ्गत्ववत् साधारणस्यापि शब्दत्वस्य तदुपपत्तेः। न च विधेयधर्मस्यव लिङ्गत्वंनानुवाद्यधर्मस्येति वाच्यम्, [13]'षष्ठी स्थाने' इत्यादावनुवाद्यधर्मस्यापि तथात्वात्। तस्माद्यदि परिभाषात्वं निरसनीयं तदेदं

---

[1] हेतौ प्रयोजकत्वाच्च — ब.
[2] स्वं रूपं — ब.
[3] महाभाष्यवार्तिकम् १. १. ७२.
[4] पा. सू. १. १. ६७.
[5] पा. सू. ८. २. ४४.
[6] लिङ्गत्वं च — ग.
[7] नियामकत्वमिति प्रसक्तं — ग.
[8] विध्यन्तरविशेषत्वं — ग.
[9] रूपविशेषत्वं — ग.
[10] पा. सू. १. १. ४९.
[11] नेदृग्विधिविशेषत्वमिति — ग.
[12] प्रागुक्तस्यैतद्व्यापकत्वम् — ग.
[13] पा. सू. १. १. ४९.

वाच्यं। प्रसिद्धार्थविनियोगात् संज्ञात्वम्। तथाहि — षष्ठ्या नानासंबन्धे बोध्यत्वेन प्राप्ते स्थानसंबन्धनियमः, न तथा स्वरूपपर्यायादिकं शब्दबोध्यत्वेन प्राप्तम्, येन नियमरूपतया परिभाषात्वं स्यादिति। मा भूद् बोध्यतया प्राप्तिः, कार्यं तु स्वरूपादिषु प्राप्तमिति स्वरूपबोधनविधिना पर्यायादेः कार्यव्यवच्छेदान्नियामकत्वम्। यथोक्तं वार्तिके 'शब्देनार्थगतेः'[1] इत्यादीति परिभाषावादिन आहुः। संज्ञावाक्ये कथं नियमस्फूर्तिरित्यत्राह — **देवेति**। भेदापेक्षः संज्ञासंज्ञिभाव इत्याशङ्क्य भेदमुपपादयति — **रूपेति**। अस्तु संज्ञासंज्ञिभेदः। का संज्ञा, किं च संज्ञीत्यत्राह — **तत्रेति**। भेदे सतीत्यर्थः। ग्राह्यमिति वा ग्राहकमिति वाध्याहारे शब्दस्येति कर्मणि कर्तरि वा षष्ठी संपद्यत इति पक्षद्वयोपपत्तिः। ननु संज्ञिनः कार्ययोगः। यदि च संज्ञित्वनियतं कार्यानियमोऽप्यापतेदित्यत्राह — **व्यक्तिरिति**। **प्रतीताविति**। इदमन्तरङ्गत्वसाधनम्। उक्तहेतूनां विपर्ययमर्थं आह — **अर्थो हीति**। अतोऽस्य बहिरङ्गत्वम्। द्वितीयहेतोर्विपर्ययमाह — **अन्विति**। तृतीयस्य तमाह — **साधारण इति**। किं च स्वत्वतयार्थस्यापि ग्रहणमाशङ्कमानः प्रष्टव्यः — किं ग्राहकपदाध्याहारः, उत ग्राह्यपदस्येति विकल्प्य पक्षद्वयेऽप्यर्थग्रहणशङ्का नोन्मिषतीत्याह — **न चेति**। 'सिद्धे सति' इत्यस्यार्थमाह — **यत इति**। 'रूपग्रहणमन्तरेणैव रूपपरिग्रहे सिद्धे' इत्यक्षरार्थः। तत्रार्थद्वयावर्त्यभाव उक्त इति तदनुवादष्टीकायाम्। [2]सिद्ध्यनुवादो वा किमर्थः, तत्राह — **सतीति**। अर्थस्यापि स्वत्वज्ञापनेनार्थवत्परिभाषाया अकरणं कथमित्यत्राह — **अर्थेति**। रूपसमकक्ष्यत्वमर्थस्य ज्ञाप्यते, न तु स्वत्वम्। तस्मिंस्तु ज्ञापिते रूपवत्स्वत्वमर्थस्यापीति भाष्ये 'अस्त्यन्यद्रूपात् स्वं शब्दस्य' इत्युक्तम्। रूपसमकक्ष्यत्वे च प्रदेशेषु रूपवदर्थस्यापि [3]तन्त्रत्वादर्थयुक्तरूपग्रहणमिति परिभाषार्थो ज्ञापनेन लभ्यत इत्यर्थः। अतिप्रसङ्गं परिहरति — **यत्र चेति**। **वर्णेति**। [4]'अत इञ्' [5]'इतो मनुष्यजातेः' [6]'ऊङुतः' इत्यादौ। अत्र हि नार्थवता रूपेणाश्रयणम्। यद्रूपेण ह्यर्थवत्त्वं शब्दस्य, तद्रूपविशिष्टाश्रयणस्यैव तथात्वात्। वर्णत्वात्वेत्वोत्वटित्वादिना चार्थवत्त्वं न [7]शब्दानामिति सत्यपि क्वचिदर्थवत्त्वे [8]तेषां रूपान्तरप्रयोज्यत्वात् 'तत्त्वस्य नास्ति तत्र परिभाषाप्रवृत्तिः। **पचेते इति**। अन्यथा 'पचे' इत्यत्रैव स्यात्॥

[१, ५२०–५२४]

(**लघुविवरणम्**) [9]असंबद्धस्यार्थप्रत्यायकत्वेऽतिप्रसङ्गः। संबन्धान्तरस्य चासंभवो यद्यपि, तथापि शक्तिलक्षणः[10] संबन्धः संभवतीत्याह — **इहेति**। संज्ञाविधायकमेवैतत् संज्ञाप्रतिषेधार्थं न संभवति, लक्षणान्तरेण चाप्राप्तत्वात् संज्ञाया इत्यत आह — **संज्ञेति**। **शब्दपूर्वकत्वं** शब्दप्रतीतिपूर्वकत्वमित्यभिप्रेत्याह — **शब्द इति**। विशेषणकृत्यं दर्शयति — **चक्षुरिति**। प्रथमप्रतीतोऽप्ययोग्यत्वान्न ग्रहीतव्य इत्याशङ्क्यायोग्यत्वमर्थस्यैवेत्याह — **अर्थस्येति**। घुसंज्ञाकार्यमर्थेऽपि संभवतीत्यभिप्रेत्य 'क्वचित्' इत्युक्तम्। तर्हि तथा चेदं सूत्रं कर्तव्यमित्यत आह — **प्रत्यासत्त्येति**। प्रतिपत्तुः प्रथमप्रतिपत्तेरुपात्तः शब्दः प्रत्यासन्नः, तदर्थस्तु तत्प्रतीतिव्यवधानेन, तत्पर्यायस्त्वर्थप्रती-

---

[1] इत्यादीनि परिभाषा — ग.
[2] विद्ध्यनुवादो वा — ग.
[3] मन्त्रत्वात् — ग ?
[4] पा. सू. ४. १. ९५.
[5] पा. सू. ४. १. ६५.
[6] पा. सू. ४. १. ६६.
[7] शब्दानामित्यर्थः।
[8] अर्थवत्त्वस्येत्यर्थः।
[9] असंबन्धस्यार्थ — ड, ढ, ण.
[10] लक्षणसंबन्धः — ड, ण.

त्यापि व्यवधानेन प्रतीयमानो विप्रकृष्ट इति न ग्रहीष्यत इत्यर्थः। ननु शब्द[1]पूर्वकोऽर्थे संप्रत्यय इत्यनुपपन्नम्, [2]अर्थप्रत्ययपूर्वको हि प्रयोक्तुः शब्दप्रत्यय इत्यत [3]आह — **उपलब्धुरिति**। श्रोतुरित्यर्थः। **शब्दसंज्ञायां स्वरूपग्रहणं** प्राप्तं तन्मा भूदिति शेषः। ननु घुसंज्ञावचनप्रामाण्यात् प्रदेशेषु स्वरूपग्रहणं न भविष्यतीत्यत आह — **ई हलीति**। [4]'कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययः' इति न्यायानुगृहीतसंज्ञावचनसामर्थ्यात् प्रत्यासत्तिन्यायः संज्ञाप्रदेशेषु बाध्यत इत्यभिप्रेत्याह — **प्रदेशेष्विति**। **षकारान्तादिति**। जश्शसोर्लुक्प्रवृत्तेः प्राग् जश्त्वाभावादिति भावः। षष उत्तरयोर्जश्शसोः स्वरूपग्रहणेन लुकि कर्तव्ये जश्त्वमसिद्धमित्यभिप्रेत्याह — **डकारान्त इति**। चार्थाभावमुपपादयति — **सामान्यशब्देनेति** ॥

[१, ५२०–५२४]

(**विवरणम्**) ननु शब्देनार्थगतिरयुक्ता। तथाहि — स संबद्धोऽर्थं गमयेत्, असंबद्धो वा। नाद्यः, संबन्धस्य गम्येन सह शब्दस्यानिरूपणात्। शब्दो हि द्रव्यं स्यात्, गुणो वा। द्रव्यत्वे च नित्यत्वाभ्युपगमान्न तावन्मध्यपरिमाणं तस्य भवतीति सोऽणुरनन्तो वा वाच्यः। तत्र न तावत् प्रथमः कल्पः, तथा सतीन्द्रियग्राह्यत्वानुपपत्तेः, मनोवत्। बाह्येन्द्रियग्राह्यत्वान्नानन्तोऽपि। अनन्तत्वे चानन्तेन संयोगाभावात् नाकाशादिभिराकाशादिशब्दस्य संयोगलक्षणसंबन्धसंभवः। सर्वैश्च घटपटादिभिर्विभुत्वेन सर्वस्यापि शब्दस्य संयोगादाकाशादिशब्देन घटपटादेरप्यभिधेयत्वं स्यात्। समवायश्च विभोर्न [5]'विभ्वन्तरेणेत्याकाशादिशब्दस्य वियदादिवाचकत्वं न स्यात्। गुणत्वे चाकाशविशेषगुणत्वात् शब्दस्य नभसैव संबन्धाद् घटादिगमकत्वं न स्यात्। संयुक्तसमवायेन तु गमकत्वेऽतिप्रसङ्गः। संबन्धान्तरं [6]'चाकाशकुसुमकल्पम्। [7]असंबद्धत्वे च स एव दोष इत्यत आह — **इहेति**। द्विष्ठत्वाभावेऽपि शक्तेरर्थप्रतीति[8]कल्पिताया आश्रयविषयनिरूप्यत्वेनोभयाधीनत्वलक्षणगुणयोगाद् गौण्या वृत्त्या 'संबन्धेन' इत्युक्तम्। संज्ञाविधानार्थस्य संज्ञाप्रतिषेधार्थत्वमयुक्तमित्यत आह — **संप्रत्यय इति**। नन्वर्थसंप्रत्ययस्य शब्दपूर्वकत्वेन [9]'कथं स्वरूपस्यैव ग्रहणमित्यत आह — **शब्द इति**। [10]'तथा च प्रथमप्रतीतरूपपरित्यागकारणाभावान्नार्थव्यवधानेन[11] शब्दग्रहणं युक्तमिति भावः। **ह्रस्व इति**। स्वरूपग्रहणादेव 'समानाधिकरणे स्त्रीलिङ्गे' इत्यपि नापेक्ष्येतेति भावः। घुसंज्ञाविधानस्य तर्हि कोऽवकाश इत्यत आह — **ई हलीति**। [12]'कृत्रिमाकृत्रिमयोः' इति न्यायानुगृहीतसंज्ञावचनसामर्थ्यात् प्रत्यासत्तिन्यायो बाध्यत इत्यभिप्रेत्याह — **प्रदेशेष्विति। षकारान्तादिति**। जश्शसोर्लुकः प्राग् जश्त्वाभावादिति भावः। षष उत्तरयोर्जश्शसोः स्वरूपग्रहणेन लुकि कर्तव्ये जश्त्वमसिद्धमित्याह — **डेति**। चार्थाभावमुपपादयति — [13]**सामान्येति**। आद्यन्तौ विहाय मध्योपादानादेवमभिप्रेतमित्याह — **मृगेति** ॥

---

[1] पूर्वकोऽर्थसंप्रत्ययः — ण.
[2] अर्थपूर्वको हि — ड, ढ.
[3] आह — यस्येति। श्रोतुरित्यर्थः — ण.
[4] महाभाष्यम् १. १. २३.
[5] विभ्वन्तरमन्तरेणेति — ञ.
[6] चकारो नास्ति — ञ.
[7] असंबन्धत्वे च — च, छ, ञ.
[8] कल्पनया — च; कल्पनायाः — ञ.
[9] कथं रूपस्यैव — च, छ, ट.
[10] तथापि — च, छ.
[11] नार्थशब्दव्यवधानेन — ञ.
[12] महाभाष्यम्. १. १. २३.
[13] सामान्येनेति — च, छ, ञ, ट.

[१, ५२०–५२४]

(उद्द्योतनम्) वक्ष्यमाण इति । न वेत्यादिना । 'अर्थगतेः' इति पञ्चमी न युक्ता, [1]"अस्त्रियाम्' इति निषेधात्, अत आह — **कात्यायनेति** । पर्यायग्रहणेऽर्थगतेर्हेतुत्वात् 'विभाषा' इत्युक्तम् । नन्वसंबद्धस्य शब्दस्यार्थगमकत्वे सर्वः शब्दः सर्वं गमयेत् । संबद्धस्य तत्त्वे संयोग-समवायातिरिक्तसंबन्धाभावात् शब्दार्थयोश्च तदसंभवात् 'शब्दादर्थगतेः' इत्ययुक्तम्, अत आह — **इहेति** । व्यवहारविषये, तत्काल इति यावत् । **योग्यतालक्षणेन** अर्थप्रत्यायनयोग्यतारूपेण, शक्त्या-त्मकेनेति यावत् । **शक्तेर्मुख्यसंबन्धत्वाभावेऽप्याश्रयविषयोभयनिरूपणीयत्वेनोभयाधीनत्वगुणयोगाद् गौणसंबन्धत्वमभिप्रेत्य 'संबन्धेन' इत्युक्तम्** । शब्दानुशासनेऽस्मिन् शास्त्रे शब्द एव [2]ग्राह्यः, नार्थः, अत आह — **व्याकरणेऽपीति** । अर्थग्रहणेऽपि तदनुशासनसंभवादिति भावः । [3]"प्राच्यभरतेषु' इत्यत्र भरतग्रहणम् । पश्वादिशब्दवदग्निशब्दस्याप्यर्थे[4]परत्वेनातिप्रसङ्गे सति तन्निरासाय सूत्र-मिति 'शब्देन' इत्यादिवार्तिकार्थ इत्याह — **अग्नेरिति** । संज्ञाविधानार्थस्य तत्प्रतिषेधार्थत्वमयुक्तम्, अत आह — **संप्रत्यय इति** । ननु शब्दादर्थ एव प्रतीयते, न शब्दः । तथा चाप्रतीतशब्दग्रहणं कथम्, अत आह — **शब्द इति** । पश्वादिवत् [5]"अग्नेः' इत्यत्राप्यर्थप्रतीतेरावश्यकत्वात् सर्व-शब्दग्रहणं कथं निरसनीयम्, अत आह — **प्रत्यासत्त्येति** । शब्दान्तरापेक्षया पूर्वप्रतीतिः **प्रत्या-सत्तिः** । तथा च प्रतीतशब्दत्यागे कारणाभावादर्थव्यवधानेन कल्प्यप्रतीतिकशब्दान्तरं न गृह्यत इत्यर्थः । 'अर्थे' इति विषयसप्तमीत्याह — **अर्थस्येति** । **संज्ञाग्रहणं** संज्ञास्वरूपग्रहणम् । [6]**मा ग्रहीत्** न जानीयात् । **अन्यथा** शब्दसंज्ञायां स्वरूपस्यापि ग्रहणे । **शब्दार्थात्** धातुशब्दार्थात्, दाधादिरूपो यो धातुः स एव [7]शब्दः **अर्थः** प्रतिपाद्यः संज्ञित्वेन यस्य घोः संज्ञाभूतस्य [8]'तस्मा-दित्यर्थः । अनेन धात्वधिकारविहितप्रत्ययस्य संभव उक्तः । कुमार्यां घः कुमारीघः । अत्र स्व-रूपग्रहणादेव [9]'समानाधिकरणे स्त्रीलिङ्गे' इत्यनपेक्ष्य ह्रस्वत्वं स्यादिति भावः । तर्हि घुसंज्ञायाः कोऽवकाशः, अत आह — **ई हलीति** । एवं [10]"घादाम्वद्रव्यप्रकर्षे' इत्यत्र घशब्दस्य प्रकर्षार्थक-त्वाभावात् किमादिपरत्वासंभवाच्च तरप्तमपोरेव ग्रहणमिति भावः । ननु वचनस्यावकाश उक्तः,

---

[1] पा. सू. २. ३. २५.
[2] गृह्यते — म.
[3] पा. सू. २. ४. ६६.
[4] परत्वेनान्यत्रापि प्रसङ्गे — म.
[5] पा. सू. ४. २. ३३.
[6] प्रदीपे 'शब्दसंज्ञायां स्वरूपग्रहणं मा भूत्' इत्यत्र 'शब्दसंज्ञायां संज्ञाग्रहणं मा ग्रहीत्' इत्यन्नंभट्टपाठ इति प्रतीयते ।
[7] शब्दार्थः प्रतिपाद्यः — अ.
[8] अत्र शब्दशास्त्रीयसंज्ञाशब्देऽपि यदि स्वरूप-ग्रहणं स्यात् तदा 'घु [ङि] शब्दे' इति शब्दार्थ-कस्य घुधातोरेव ग्रहणं स्यादिति तस्मादेव धातोः किप्रत्ययः स्यादित्यर्थः कैयटस्य । एवमेव पदमञ्जर्यां शब्दकौस्तुभे तत्त्वबोधिन्यां चार्थ-प्रयोजनादिकमुपवर्णितम् । एवं सत्यत्रान्नं-भट्टेन 'दाधाधातुरूपशब्दार्थकात्' इत्यर्थः क्रियमाणः क्लिष्टः प्रतिभाति । किं चैता-दृशेऽर्थे प्रदीपस्थं 'धातोः' इति विशेषणं च विरुध्यते, दाधार्थकस्य संज्ञाशब्दस्य धातुत्वा-भावात् । अतोऽन्नंभट्टपाठे प्रदीपे धातुपदं न स्यादित्यूहनीयं भवति । अत्रान्नंभट्टेन न्यासग्रन्थमनुरुध्यैवं व्याख्यातं स्यादिति प्रती-यते । तत्र चैवमुक्तम् — 'उपसर्गे घोः किः' इत्यत्र यद्यपि धात्वधिकारः, तथापि घुग्रहणाद् घुशब्दात् किप्रत्ययः स्यात् । उप-सर्गग्रहणं प्राद्युपलक्षणार्थं स्यात्, यथा 'अञ् नासिकायाः संज्ञायाम्, उपसर्गाच्च' इत्यत्रेति ।
[9] समानाधिकरणात् स्त्रीलिङ्गे — म.
[10] पा. सू. ५. ४. ११.

अत आह — **प्रदेशेष्विति**। [1]'कृत्रिमाकृत्रिमयोः' इति न्यायानुगृहीतवचनसामर्थ्यात् प्रत्यासत्तिन्यायो बाध्यत इति भावः। वस्तुतस्तु क्वचिदपि संज्ञयग्रहणे संज्ञावैयर्थ्यम्। क्वचित् तद्ग्रहणेऽवैरूप्याय सर्वत्रैव[2] तद्ग्रहणं युक्तमित्यभिप्रायः। शङ्कातात्पर्यमाह — **उभयेति**। **संख्येति**। बहुगणसूत्रे प्रपञ्चितमेतत्। भाष्ये [2]'ष्णान्ता षट्' इति सूत्रस्थसंज्ञा डकारान्तेति प्रतीयते, तदयुक्तम्, तत्र स्वरूप[3]संबद्धकार्याभावात्, अत आह — **षड्भ्य इति**। आदिना [4]'षट्चतुर्भ्यश्च' [5]इति गृहीतम्। डकारान्तस्य स्वरूप[6]ग्रहणे इष्टसिद्धिर्नेत्याह — **डकारान्त इति**। **षकारान्तादिति**। जश्शसोर्लुकः प्राग् जश्त्वाभावादिति भावः। [7]'षट्चतुर्भ्यः' इति नुडपि षकारान्तादेव विधेयः, नुटः प्राग् जश्त्वाभावादित्याह — **षण्णामिति**। **नुट्** षकारान्तात् कर्तव्य इत्यनुषङ्गः। **डत्वस्येति**। षष उत्तरयोर्जश्शसोः स्वरूपग्रहणेन लुकि कर्तव्ये जश्त्वमसिद्धमिति भावः। [8]'तत्र [9]'ष्णान्ता षट्' इत्यत्र डकारान्तैव संज्ञा, न षान्ता, तेन स्वरूपग्रहणेनेष्टासिद्धेः षकारान्तसंख्याग्रहणमपि कर्तव्यमिति [10]न ज्ञापकत्वमिति केचित्। तन्न, षान्तस्य प्रसिद्धस्यैव जश्त्वेन डान्तत्वे संभवत्यप्रसिद्धडान्तशब्दस्य संज्ञात्वकल्पने मानाभावात्। ननु टिघुभादिवन्मन्त्रादीनां संज्ञात्वेनाविधानात् कथं शब्दसंज्ञात्वम्, अत आह — **मन्त्रादय इति**। याज्ञिक[11]व्यवहारादेव शब्दविशेषसंज्ञात्वं सिद्धमिति भावः। **देवेति**। अनयोः [12]क्यच्याकारोऽन्तादेशः देवायन्तः, सुम्नायन्तः। आदिना [13]'कव्यध्वर' इत्युत्तरसूत्रे 'ऋचि' इति, [14]'मन्त्रे घस' इति सूत्रे 'मन्त्रे' इति च गृहीतम्। 'क्यजादीनाम्' इत्यादिना [15]'मन्त्रे घस' इत्यादौ 'लेः' [16]इति च्लेर्लुक् गृहीतम्। **स्वरूपमिति**। ततः क्यजादेरसंभवादित्यर्थः। ननु यजुरादेरपि क्यच् संभवति, अत आह — **न चेति**। **तथाविधेति**। यजुरादेरपि कार्यित्वे 'देवसुम्नयजुषाम्' इति निर्देशः स्यात्, न तु 'यजुषि' इति पृथक् सप्तम्यन्तनिर्देश इत्यर्थः। शब्दार्थयोर्नैकाधिकरण्यलक्षणसाहचर्यम्, अत आह — **शब्देति**। 'गामानय' इत्युक्ते गोशब्दवाच्यमानयेत्यर्थप्रतीतेरित्यर्थः। [17]'यद्वा, अर्थप्रतीतेः प्राग् नियतप्रतीतिकशब्दकत्वमेव शब्दानुविद्धत्वमित्यर्थः। 'सन्निर्देशः कर्तव्यः' इति भाष्यतात्पर्यमाह — **वृक्षस् इति**। एतन्न्यायसिद्धार्थकथनम्, नापूर्ववचनमित्याह — **एतदिति**। 'वृक्षमृगौ' इति [18]'द्वन्द्वव्यावृत्तये [19]'वा, वृक्षपर्यायद्वन्द्वव्यावृत्तये वा, सामान्यविशेषद्वन्द्वव्यावृत्तये वा वचनमिति विकल्पं मनसि निधाय [20]साभिप्रायं नाद्य इत्याह — **तुल्यजातीयानामिति**। **वक्ष्यते** [21]'द्वन्द्वश्च' इति सूत्रे। न द्वितीय इत्याह — **पर्यायाणामिति**। न तृतीय इत्याह — **सामान्येति**। [22]चार्थाभावमेवाह — **सामान्येति**।

---

[1] महाभाष्यम् १. १. २३.
[2] पा. सू. १. १. २४.
[3] संबन्धकार्याभावात् — अ; संबन्धकार्यभावात् — म.
[4] पा. सू. ७. १. ५५.
[5] इति संगृहीतम् — म.
[6] ग्रहणेन नेष्टसिद्धिरित्याह — अ; ग्रहणेनेष्टसिद्धिरित्याह — ऋ.
[7] पा. सू. ७. १. ५५.
[8] अत्र — अ.
[9] पा. सू. १. १. २४.
[10] 'न ज्ञापकत्वमिति' इति नास्ति — अ.
[11] व्यवहारार्थकशब्दविशेष — म.
[12] क्यच्याकारान्तादेशः — अ.
[13] पा. सू. ७. ४. ३९.
[14] पा. सू. २. ४. ८०.
[15] पा. सू. २. ४. ८०.
[16] इत्यादि गृहीतम् — ऋ.
[17] 'यद्वा' इत्यादि 'शब्दानुविद्धत्वमित्यर्थः' इत्यन्तं नास्ति — अ.
[18] 'द्वन्द्व' इति नास्ति — म.
[19] 'वा' इति नास्ति — म.
[20] 'साभिप्रायम्' इति नास्ति — अ.
[21] पा. सू. २. ४. २.
[22] 'चार्थाभावमेवाह — सामान्येति' इति नास्ति — म.

न्यायमेवाह — **अराजेति** । [1]"सभाराजा' इत्यत्र 'अराजा' इति पदच्छेदेनेष्टसिद्धिरिति भावः । [2]आद्यन्तौ विहाय [3]मध्योपादानस्याभिप्रायमाह — **मृगेति** । **ततफलेति** । स्वरूपस्य पर्यायाणां विशेषाणां च ग्रहणार्थमित्यर्थः ॥

[१, ५२०–५२४]

(**रत्नप्रकाशः**) सूत्रप्रयोजनकथनपरं वार्तिकमवतारयति — **किमर्थमिति** । **अर्थगतेरिति**। [4]"विभाषा गुणेऽस्त्रियाम्' [5]इत्यंशोऽप्यनित्य इत्यनेन निर्देशेन ज्ञायते। तेन 'धूमाद्वह्निः' 'नास्ति घटोऽनुपलब्धेः' इत्यादि सिध्यति। **तद्वाचिन इति** । तस्यार्थस्य यो यो वाचकस्तस्येत्यर्थः । **संज्ञाप्रतिषेधार्थमिति**। कार्यित्वेन संप्रत्ययो मा भूदित्येवमर्थमित्यर्थः। उक्तं सूत्रप्रयोजनं निराकरोति — **न वेति**। **शब्दपूर्वक इति**। शब्दज्ञानपूर्वक इत्यर्थः। तथा चार्थे कार्यासंभवात् तद्वाचके ग्राह्ये उपस्थितपरित्यागे मानाभावात् तस्यैव शब्दस्य कार्यित्वं भविष्यति, न तु तद्वाचिनोऽन्यस्येति भावः। **अर्थनिवृत्तिरिति**। तदर्थवाचिनोऽन्यस्य निवृत्तिरित्यर्थः। **अशब्दसंज्ञेति**। सर्वत्र स्वरूपसंप्रत्यये प्राप्ते शब्दसंज्ञातिरिक्तस्यैव शब्दस्य स्वरूपपरत्वं न तु शब्दसंज्ञाया इति नियमार्थमिति भावः। **इह मा भूदिति**। अन्यथा [6]"उपसर्गे घोः किः' इति किप्रत्ययो घुधातोरेव स्यात्। [7]"घरूपकल्प' इति च घे परतो ह्रस्वः 'कुमारीघः' इत्यादावेव स्यादिति भावः। [8]"ई हल्यघोः' इत्यत्र तु घुधातोराकारान्तत्वाभावाद् दाधामेव प्रतिषेधः। **वचनप्रामाण्यादिति**। संज्ञाकरणस्य तत्संज्ञाप्रत्यायितानां कार्यं स्यादित्येवमर्थत्वात् तत्र कार्याकरणे संज्ञाविधानानर्थक्यापत्तेरिति भावः। **ननु चेति**। वचनप्रामाण्याद् भवतु संज्ञिनां कार्यित्वम्, उत्सर्गप्राप्तम् [9]"अग्नेर्ढक्' इत्यादाविव स्वरूपकार्यित्वं च स्यात्, तद्व्यावृत्तये इदं सूत्रं भविष्यतीति मन्यते । एतेन 'उभयगतिरिह शास्त्रे दृष्टा संख्याकर्मकरणादिष्वितीहापि स्वरूपस्य संज्ञिनश्च [10]संज्ञाप्रदेशेषु ग्रहणं स्यादिति[11] भावः' इति कैयटो निरस्तः। कृत्रिमाकृत्रिम[12]न्यायाविषये उभयगतिसंभवेऽपि प्रकृते तन्न्यायविषये उभयगत्यसंभवात्। स्वरूपग्रहणे हि बीजमर्थे कार्यासंभवः। स तु नास्त्येव संज्ञास्थल इति न्यायसिद्धेऽर्थे ज्ञापकमप्याह — **आचार्येति**। **न हि षकारान्तेति**। संज्ञायाः षकारान्ततामापाद्य ज्ञापकत्ववर्णनमयुक्तमिति भावः। **डकारान्तेति**। [13]'ष्णान्ता षड्डति च' इति संहितापाठे [14]"षड्भ्यो लुक्' इत्यत्र च डकारान्तताया एव दृष्टत्वादिति भावः। **असिद्धं जश्त्वमिति**। संभावनामात्रेणैतद् ज्ञेयम्। न हि षकारान्तैव संज्ञेति निश्चये किंचिन्मानमस्ति। [15]'ष्णान्ता षट्' [16]"डति च' इति पृथक् पाठे टकारान्तता श्रुतेति कथंचित् टकारान्तताङ्गीकर्तुं शक्यत इत्यन्यदेतत्। **मन्त्राद्यर्थमिति**। मन्त्रादयो हि शब्दस्य संज्ञाः। **मन्त्रे ऋचि यजुषीति**।

---

[1] पा. सू. २. ४. २३.
[2] आद्यं विहाय — म.
[3] मत्स्योपपादनस्याभिप्रायमाह — अ; मत्स्योपादानस्य फलमाह — म; मध्योपपादनस्याभिप्रायमाह — ऋ.
[4] पा. सू. २. ३. २५.
[5] 'इत्यंशो ह्यनित्य इति' इति युक्तं भाति।
[6] पा. सू. ३. ३. ९२.
[7] पा. सू. ६. ३. ४३.
[8] पा. सू. ६. ४. ११३.
[9] पा. सू. ४. २. ३३.
[10] 'संज्ञा' इति न दृश्यते प्रदीपे।
[11] 'इति भावः' इति प्रदीपे न दृश्यते।
[12] न्यायविषये — ब.
[13] पा. सू. १. १. २४, २५.
[14] पा. सू. ७. १. २२.
[15] पा. सू. १. १. २४.
[16] पा. सू. १. १. २५.

[1]'मन्त्रे घसह्वर' [2]'ऋचि तुनुघ' [3]'यजुष्येकेषाम्' इत्यादौ। **शास्त्रसामर्थ्यादिति**। मन्त्रादिशब्दघटितशास्त्रविहितकार्यस्य मन्त्रादिशब्देऽसंभवात् तत्र मन्त्रादिशब्दस्य लोकप्रसिद्धो योऽर्थः स एव गृह्यत इति[5] भावः। **मन्त्रादिसहचरित इति**। शब्दार्थयोः परस्परसंबद्धतया लोकप्रसिद्धेः साहचर्यम्। ननु शाब्दबोधे शक्तिग्रहस्य कारणत्वात् 'इदोऽय्, नुम्, टुक्, कुक्, चजोः' इत्यादिशब्दानां लोकेऽप्रसिद्धार्थत्वेन तैरिह शास्त्रे व्यवहारोपपत्तये स्थानिवत्सूत्रेण शास्त्रमूलकसंज्ञातिदेशकेनातिदेशसिद्धये चेदं सूत्रमवश्याश्रयणीयमिति चेत्, तिष्ठतु सूत्रम्, वचनान्तराणि तु कर्तव्यानीत्याह — **सिदिति**। **सिन्निर्देशः कर्तव्य इति**। 'वृक्षस् मृगस्' इत्येवं निर्देशः कर्तव्य इत्यर्थः। वस्तुतस्तु वचनमन्तरेणैव तत्र विशेषाणां ग्रहणं सिध्यति। तत्र निर्दिष्टानां वृक्षादीनां शकुन्यन्तानां शब्दानां परस्परद्वन्द्वस्याविवक्षितत्वेन तन्निर्देशस्यार्थपरत्वात् तदर्थवाचकानां पर्यायाणां सहप्रयोगाभावेन [4]विशेषाणामेव द्वन्द्वसंभवाच्च। **पित्पर्यायवचनस्य चेति**। चशब्दात् स्वरूपस्य विशेषाणां च ग्रहणम्। इदं वाचनिकमेव। एतदर्थस्य प्रकारान्तरेणासिद्धेः। 'पिन्निर्देशः कर्तव्यः' इत्यादावुपायोऽयमुचित इत्येतावन्मात्रम्। स तु पाणिनिनानाश्रित एवेति 'स्वादयः पर्यायविशेषाणां च ग्राहकाः' इत्येव वचनमत्र ज्ञेयम्। **जित्पर्यायवचनस्यैवेति**। इदमपि वाचनिकमेव। वचनं तु 'राजामनुष्यौ पर्यायस्यैव' इति। यत्तु कैयटेनोक्तम् "इदं न्यायसिद्धमित्याहुः। 'अराजा' इति पर्युदास आश्रीयते। तेन राजशब्दसदृशानां तत्पर्यायाणामेव ग्रहणात् सिध्यति" इति। तन्न, राजविशेषवाचकत्वेन वा राजपर्यायत्वेन वा राजशब्दवद् द्व्यक्षरत्वेन वा सादृश्यं ग्राह्यमिति विनिगमकाभावात्। अमनुष्यशब्दांशे तत्कल्पनाया अप्यसंभवाच्च। **ञित्तस्येति**। इदमपि वाचनिकमेव। वचनं तु 'पक्षिमत्स्यमृगाः स्वस्य स्वविशेषस्य च' इति। **अस्यैकस्येति**। इयमिष्टिः। **पर्यायवचनस्येति**। मत्स्यपर्यायवचनस्येत्यर्थः ॥

[१, ५२०–५२४]

(**नारायणीयम्**) स्वरूपपरत्वं परिभाषामन्तरेण शब्दानां न स्यात्, अर्थपरत्वस्यैव लोके दर्शनादित्युक्तम्। तत्र हेतुसाम्येन लोकवदर्थपरत्वमापाद्यमित्यर्थपरत्वे हेतुमाह — **इहेति**। न च लोकदृष्टमपि परित्याज्यमर्थपरत्वं शास्त्रेऽदर्शनादिति वाच्यमित्याह — **व्याकरण इति**। अर्थासंभवोक्तिस्तर्हि कथमित्याशङ्क्य क्वाचित्कतयेत्याह — **अग्नेरिति**। **साहचर्यादिति**। इहानुभवाद् बौद्धमेतद्बोध्यम्। संज्ञाशब्देन बोधकलक्षणायामपि 'संज्ञात्व' इति वक्तव्यमित्याशङ्क्य भावसाधन इत्याह — **संज्ञेति**। अर्थनिवृत्तेः पूर्ववादिसंमतत्वात् तत्साधने कथं न सिद्धसाधनतेत्यत्राह — **न त्विति**। अर्थनिवृत्तिशब्देनोच्चरितातिरिक्तेन [5]तद्बोधननिवृत्तिर्विवक्षितेत्यर्थः। विवक्षितसाध्ये हेतुः — **प्रत्यासत्त्येति**। यदि प्रत्यासत्त्योपात्तशब्दग्रहणम्, अर्थसंप्रत्ययस्य शब्दपूर्वकत्वकीर्तनं किमर्थमित्याशङ्क्य प्रत्यासत्तिमुपपादयितुमित्यभिसंधायाह — **शब्द इति**। नन्वस्तु शब्दोऽर्थप्रत्यायकः। अर्थे तु प्रतीते सर्वेषां तद्वाचिनां स्मृत्युपारोहोऽविशिष्ट इति कास्य प्रत्यासत्तिः, अत आह — **उपलब्ध इति**। अर्थोपलब्धिहेतुधीविषयत्वमस्य प्रत्यासन्नत्वमिति भावः। किं प्रमाणमात्रस्य ज्ञाततया बोधकत्वम्, न, प्रत्यक्षातिरिक्तस्येत्याह — **चक्षुरिति**। 'इह च' इति भाष्ये

---

[1] पा. सू. २. ४. ८०.
[2] पा. सू. ६. ३. १३३.
[3] पा. सू. ८. ३. १०४.
[4] विशेषणानामेव — ब.
[5] तद्बोधकनिवृत्तिः — ग.

शब्दे कार्यसंभव उक्तः, सोऽर्थेऽसंभवाभिप्रायेणेत्याह — [1]**अर्थस्य चेति**। व्याकरणपदं संकोचयति — **क्वचिदिति**। तदयमर्थः — शब्दस्यार्थपरतन्त्रतया तस्य प्राधान्येऽपि कार्ययोग्यत्वात् तद्बोधके भवं कार्यं संनिधानादुच्चरिते भवतीति। 'इह मा भूत्' इत्यनेन शब्दसंज्ञायां विधीयमानायां तद्विषये स्वरूपग्रहणं मा भूदित्युक्तमिति भाति। तदयुक्तम्, दाप्रभृतिषु स्वरूपग्रहणस्येष्टत्वादित्याह — **शब्देति**। भाष्ये संज्ञासूत्रोच्चारणं तत्संज्ञायां प्रदेशेषु स्वरूपविधिनिरासार्थम्, न तु संज्ञाविषये तदभावप्रदर्शनार्थमित्यर्थः। कथं पुनः प्रदेशे स्वरूपविधिप्राप्तिः, [2]एतत्परिभाषाया इदानीमाक्षिप्तत्वात्, अत आह — **न्यायादिति**। संज्ञाकरणवैफल्यं परिहरति — **ई हलीति**। [3]'ई हलि' इत्यादौ वचनस्य सावकाशत्वमित्यत्राह — **प्रदेशेष्विति**। अनेकप्रयोजनोद्देशेन संज्ञासूत्रप्रणयनम्। अन्यथा तत्रैव दाधाग्रहणं कर्तव्यं स्यादिति भावः। कृत्रिमन्यायाशङ्कायां प्रतिन्यायमाह — **उभयेति**। अर्थग्रहणप्रणाड्या स्वरूपग्रहणप्राप्तिरिति कथमुभयगतिन्याय इहेति न चोदनीयम्। ननु संज्ञावाक्ये षान्ता न श्रूयत इत्येतावता किं षान्तत्वाभावोक्तिस्तर्हि डान्तापि न श्रूयते, विच्छिद्य पाठे टान्तश्रवणात्। अथ व्याख्यानात् डान्तत्वावसायस्तर्हि षान्तत्वमेवेष्टसिद्धये व्याख्यायतामित्याशङ्क्याह — **षड्भ्य इति**। अयमर्थः — संज्ञायाः षान्तत्वं न निषिध्यते। किं तु षान्तत्वेऽपि तस्याः प्रदेशेषु सांहितिककार्येणान्यथोच्चारणात् स्वरूपग्रहणेन षषो ग्रहणं न सिध्यतीत्युच्यत इति। 'संज्ञा' इत्यत्रोच्चारितेत्यध्याहारवत् 'डकारान्ता' इत्यत्राप्यध्याहार इत्याह — [4]**अत्रेति**। ननु भवतु डान्तोच्चारणम्, उच्चरितस्वरूपस्य तु कार्यान्वयेऽपि षषस्तत्सिद्धिः, जश्त्वेन तस्यापि प्रयोगे डान्तत्वादित्याशङ्क्याह — **जसिति**। लुग्नुटोः कृतयोर्जश्त्वप्राप्तिर्न तु प्रागिति न स्वरूपग्रहणाल्लुगादिसिद्धिः षष इत्यर्थः। संज्ञायाः षान्तत्वाभावस्याशङ्कित्वनभिमतत्वात् षान्तत्वसाधनमनुचितमित्याशङ्क्य न तत् साध्यते, किं तु यदाशङ्कितमुच्चरितस्वरूपान्न षान्तप्रतिपत्तिरिति तस्यैवेदमुत्तरमित्याह — **डकारान्त इति**। असिद्धिमात्रेण वास्तवषान्तत्वासंपत्तेः [5]'षान्ता' इत्यनेन तद्ग्राहकत्वं विवक्षितमित्याह — **षकारान्तस्येति**। ननु शास्त्रीयकार्येऽसिद्धवद्भावः। न च स्वरूपप्रत्यायनं शास्त्रीयकार्यम्, एतत्परिभाषया स्वरूपप्रत्यायने हि शास्त्रीयत्वं कथंचित् स्यात्, इदानीं तूभयगतिरिति न्यायात् तद्ग्रहणमुच्यत इति नास्ति शास्त्रीयत्वम्। न च लुगादिकं शास्त्रीयमिति वाच्यम्, तच्छास्त्रीयत्वेनासिद्धत्वाप्राप्तेः। न ह्यन्यकार्यप्राप्तावन्यत्रासिद्धत्वम्। अत्राहुः — नास्त्यन्यत्वम्, उभयोरपि षड्रूपत्वात्। न च व्यक्तिभेदः, व्यक्तिस्फोटपक्षे तदभावात्। न च प्रत्याय्यप्रत्यायकभावानुपपत्तिः, औपाधिकभेदसत्त्वात्। अर्थावगतिमुखत्वात्[6] स्वरूपग्रहणस्य प्रत्याय्यप्रत्यायकभावाभावाच्च। तस्माल्लुगादिकार्येऽसिद्धत्वमिति॥

अन्ये तु संज्ञया संज्ञिबोधनं शास्त्रीयं स्वरूपप्रत्यायनस्याशास्त्रीयत्वेऽप्याहुः॥

अन्ये तु [7]शास्त्रीयमसिद्धत्वं न विवक्षितम्। किं तु **असिद्धम्** [8]'असाधकं स्वरूपप्रत्यायनं'प्रतिबन्धस्येति व्याचक्षते। तथाहि — सत्यपि जश्त्वे [10]'उभयगति'न्यायेन लौकिकसंख्यालक्षणार्थप्रतिपत्तौ तद्बोधके कार्यप्रतिपत्तिरिति नेह यत्नसाध्यं किंचिदस्तीति॥

वैयाकरणसंज्ञायाः शब्दसंज्ञात्वेन संमतत्वात् कथं मन्त्रादिषु निषेधावतारः, अत आह

---

[1] प्रदीपे 'अर्थस्य शास्त्रीये' इत्यत्र 'अर्थस्य च शास्त्रीये' इति पाठोऽभिमतः।
[2] एतत्परिभाषयेदानीम् — ग.
[3] पा. सू. ६. ४.११३.
[4] किं तर्हीति — ग.
[5] भाष्ये 'षकारान्ता' इत्यस्यार्थानुवादो बोध्यः।
[6] मुख्यत्वात् — ग.
[7] शास्त्रीयमसिद्धत्वान्न विवक्षितम् — ग.
[8] आसाधकं — ग.
[9] प्रतिबद्धस्येति — ग.
[10] परिभाषा ९.

— **मन्त्रेति** । वैयाकरणसंज्ञायामन्यथासिद्धेः शब्दस्य संज्ञा शब्दसंज्ञेति विवक्षिष्यत इत्यर्थः। यजुरादिशब्दे परत आत्वादीनां [1]बुद्ध्युपपत्तेः कथं शास्त्रसामर्थ्यम्, अत आह — **देवेति** । ननु यजुश्शब्दपरे [2]क्यचि विधिरस्त्वित्यत्राह — **न चेति** । बौद्धं साहचर्यमित्याह — **साहचर्यं चेति** । **एतदपीति** । सूत्रं यथा न्यायसिद्धार्थानुवादकं तथा वार्तिकमपीत्यर्थः। स्वरूपादिनिरासार्थं कस्मादिदं वचनं नेत्यत्राह — **तुल्येति** । 'वृक्षमृग' इत्याद्युदाहरणं स्वरूपग्रहणेऽपीति शङ्का निरस्ता । स्वरूपस्यैकशेषवचनाद् 'वृक्षवृक्षौ' इत्याद्यनुदाहरणं तर्हि तरुवृक्षादौ प्रसङ्गनिवारणाय वचनम्, तत्राह — **पर्यायाणामिति** । [3]धववृक्षादिनिरासार्थत्वं निरस्यति — **सामान्येति** । चार्थाभावे हेतुः — **सामान्येति** । विशेषसंनिधौ सामान्यमपि विशेषान्तरवृत्तीति द्वन्द्वप्रसङ्गं निवारयति — **धवेति** । अनभिधानादिति भावः । **चशब्देन** पूर्वगतस्यैव न समुच्चयः, किं तु सूत्रगतस्यापि । अतो भाष्ये 'स्वस्य च' इत्यादि संगच्छत इत्याह — **चशब्दादिति** । **इदमिति** । स्वरूपस्यैव ग्रहणे प्राप्ते । [4]कथं न्यायसिद्धिः, स्वरूपग्रहणप्राप्तेरित्याशङ्क्य 'अराजा' इति पदच्छेदः कार्य इत्याह — **अराजेति** । **इदमिति** । पूर्ववदादिपदेन तत्रोपात्तं न गृह्यते, किं तु यत्रेदृशत्वं तदित्यभिप्रेत्य तर्हि किं तत्र स्वरूपविधिरिति [5]वीक्षायां [6]"स्वादि' इत्यादिशब्देन तत्संग्रहं दर्शयति — **मृगेति** ॥

अणुदित्सवर्णस्य चाप्रत्ययः. १. १. ६९.

[१, ५२५-५२७]

(**लघुविवरणम्**) 'इतः' इत्युदाहरणमनुपपन्नम्, सवर्णग्रहणेऽप्यन्तरतमेनादेशेन भवितव्यम् । न चेदमः परत्वात् त्यदाद्यत्वे कृते पररूपत्वे चाध्यर्धद्विमात्रस्यान्तरतम आदेशः संभवतीत्यत आह — **विशेषेति** । अम्विधौ सवर्णग्रहणे तद्विधानमनर्थकमित्यत आह — **आमपि पक्ष इति** । नन्विटो दीर्घवचनं नियमार्थं स्यादिति चेत्, किं दीर्घनियमार्थम्, उत ग्रहेर्नियमार्थम्, नाद्य इत्याह — **ग्रहेरेवेति** । वृतोऽप्यलिटि दीर्घसंबन्धदर्शनादिति भावः । द्वितीयमुत्थापयति — [7]**नियमार्थमितीति** । सूत्रं समस्तमेव ज्ञापकमित्यभिप्रेत्य शङ्कते — [8]**ननु चेति** । **ववरिथेति** । यद्यपि [9]"कृसृभृवृस्तु' इतीट्प्रतिषेधेन भवितव्यम्, तथापि 'ववर्थ' इति निगमे इडभावनिपातनाद् भाषायां थलीड् भवत्येव । वाग्रहणमात्रं ज्ञापकमित्यभिप्रेत्य परिहरति — **एवं तर्हीति** । **अज्विधानादिति** । [10]"एरच्' इत्यनेन । **ह्रस्वोच्चारण इति** । [11]"अष्टन आ विभक्तौ' इत्यत्र । अनिरूपणे हेतुः — **न्याय्य इति** ॥

---

[1] वृद्ध्युपपत्तेः — ग.
[2] क्यपि — ग.
[3] यववृक्षादि — ग.
[4] वीप्सायां — ग.
[5] पित्पर्यायवचनस्य स्वाद्यर्थमिति वार्तिकस्थेत्यादिः ।
[6] नियमार्थमिति — ड.
[7] प्रदीपे 'ननु ववरिथेति' इत्यत्र 'ननु च ववरिथेति' इति पाठः स्वीकृतः ।
[8] पा. सू. ७. २. १३.
[9] पा. सू. ३. ३. ५६.
[10] पा. सू. ७. २. ८४.

[१, ५२५-५२७]

(**विवरणम्**) 'किमर्थम्' इति नाक्षेपोऽयम्, किं तु विशेषजिज्ञासापरमित्याह — **किमिति**। उत यौगिक इत्यन्वयः। योगं दर्शयति — **प्रतीयत इति**। नन्विदमः परत्वात् त्यदाद्यत्वेऽन्तरङ्गत्वाच्च पररूपत्वेऽर्धतृतीयमात्रस्य[1] सवर्णग्रहणेऽपि सति नान्तरतम आदेशः संभवतीति श्रुत एवादेशो भवतीत्यत आह — **विशेषेति**। **अनुनासिक इति**। पक्ष इति शेषः। **आमपीति**। अत एवान्यत्र सर्वनामस्थाने नित्यमामो भावाय पृथगनङुह आमो विधानं [2]'संबुद्धावित्यनुक्तावनेन सिद्धेऽपीति भावः। नियमार्थं [3]'ग्रहोऽलिटि' इति स्यादित्याशङ्क्याह — **ग्रहेरेवेति**। [4]'वृतो वा' इत्यनेन विरोधप्रसङ्गादित्यर्थः। 'ववर्थ' इति छन्दसीडभावनिपातनाद् भाषायां [5]'कृसृभृवृस्तु' इतीट्प्रतिषेधाभावमभिप्रेत्य 'ववरिथ' इतीडुदाहृतः। भाष्ये सूत्रमेव ज्ञापकत्वेनाभिहितमिति[6] मत्वा चोदिते वाग्रहणं ज्ञापकत्वेनाभिप्रेतं न सकलमेव[7] सूत्रमिति परिहरति — **एवं तर्हीति**। 'भूयान्' इति प्रतिज्ञायैकस्यैवाभिधानं [8]कथमविरुद्धमित्याशङ्क्य नापूर्वानेकपरिहाराभिप्रायेण सा प्रतिज्ञा, किं तु [9]पूर्वमेकमपि परिहारमपेक्ष्येत्याह — **साधारण इति**। ननु सवर्णग्रहणं नार्थाभिधानसमर्थमपेक्षते। तेन "अस्य च्वौ' इत्यादाविव प्रत्ययविधावर्थाभिधानासमर्थस्यापि सवर्णस्य ग्रहणं किं न स्यादित्यत आह — **प्रत्यय इतीति**। सवर्णग्रहणं हि प्रत्ययविधौ दीर्घप्लुतयोर्विधानाय। तौ च प्रत्ययाधिकारात् प्रत्ययावेव विधातव्यौ। प्रत्ययसंज्ञा चार्थाभिधानसमर्थयोः सति संभवे। दीर्घप्लुतयोश्चार्थप्रतीतिहेतुत्वाभावान्न प्रत्ययत्वमिति न तयोर्विधानं संभवतीति सवर्णग्रहणेन [10]ग्रहणेऽपि प्रयोजनाभावान्न सवर्णग्रहणमिति भावः। उच्चारणं नाम साक्षाच्छब्देन बोधनं विवक्षितम्। तथा चागादिचोदनासु साक्षात् [11]प्रतीयमानैरकारादिभिरेव सवर्णानां ग्रहणं भवतीति। अनेन प्रत्याहारसूत्रेषु ये निर्दिष्टा अणस्तैरेव सवर्णानां ग्रहणमित्युक्तं भवति। यो हि मन्यते प्रत्याहारसूत्रोपदिष्ट एवाण्, तथा च [12]'अष्टन आ विभक्तौ' इत्यत्राकारो ग्राहको न भविष्यतीति, तं दृष्टान्तेन [13]प्रतिबोधयति — **यथैवेति**। परिहरति — **अन्तर्भावितेति**। एतच्चाप्रत्यय इति निषेधसामर्थ्याल्लभ्यते। न चेह प्रत्याहारसूत्रनिर्दिष्टविषयः प्रतिषेधः, प्रत्याय्यमानविषयं तु सवर्णग्रहणमिति वैपरीत्यं किं न स्यादिति वाच्यम्, तथा सत्यकोऽचि विधीयमानस्य पूर्वसवर्णदीर्घस्य 'कुमार्यौ, कुमार्यः' इत्यादावप्राप्तेः [14]'दीर्घाज्जसि च' इति प्रतिषेधोऽनर्थकः स्यात्। [15]'तस्माच्छसो नः पुंसि' इत्यत्र पुंसीति चानर्थकं स्यादिति भावः। **मात्रिक एवेति**। स्थानेऽन्तरतमपरिभाषयेति भावः। अनिरूपणं न निरूपणसामर्थ्याभावात्, किं तु न्याय्यपरिहारसंभवेनोपेक्षणादित्याह — **न्याय्य इति**। यदुक्तं 'यथैवेति' तत्राह — **अत्र हीति**। **स्वात्मनि क्रिया** स्वस्मिन् प्रवृत्तिः, तस्या विरोधादित्यर्थः। तत्र हेतुः — **अनिष्पादादिति**। अणित्युच्चारणसमये

---

[1] पा. सू. ७. ४. ३२.

[1] संबुद्धावित्यनुक्तौ वचनेन — ञ.
[2] पा. सू. ७. २. ३७.
[3] पा. सू. ७. २. ३८.
[4] पा. सू. ७. २. १३.
[5] अभिमतमिति — ट.
[6] कथं न विरुद्धम् — च, छ, ट.
[7] पूर्वमपि परिहारम् — च, छ, ट.
[8] 'ग्रहणेऽपि' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — च, छ, ञ, ट.
[9] प्रतीयमानैरिकारादिभिरपि — च, छ, ट.
[10] पा. सू. ७. २. ८४.
[11] प्रतिबोधयिष्यति — ञ.
[12] पा. सू. ६. १. १०५.
[13] पा. सू. ६. १. १०३.

समग्रस्य सूत्रस्यानिष्पत्तेरित्यर्थः। [1]'तपरस्तत्कालस्य' इत्यस्य नायं विषयः, [2]न च तेन भिन्नकालानां ग्रहणमित्यभिप्रेत्याह — **ग्रहणकेति**। नन्वल्पविषयेण 'अप्रत्ययः' इत्यनेन कथं बहुविषयपरिभाषार्थः[3] शक्यते प्रतिपादयितुमित्यत आह — **प्रतीयत इति**॥

[१, ५२५–५२७]

(**उद्द्योतनम्**) 'किमर्थम्' इति विशेषजिज्ञासापरम्, नाक्षेप इत्याह — **किं यस्येति**। उत यौगिक इत्यन्वयः। योगमेवाह — **प्रतीयत इति**। ननु परत्वात् त्यदाद्यत्वे पररूपत्वे चार्धतृतीयमात्रस्य सवर्णग्रहणे सत्यन्तरतमस्यादेशस्यासंभवाद् यथाश्रुत एवादेशः स्यात्, अत आह — **विशेषेति**। वकारस्य सवर्णमाह — **अनुनासिक इति**। पक्ष इत्यादिः। **आमपीति**। अन्यत्र सर्वनामस्थाने आम्विधानसामर्थ्यादम् [3]न भवति, अन्यथा सर्वनामस्थानेऽममेव विदध्यादिति भावः। ननु नियमार्थमेतत् [4]स्यात्, अत आह — **ग्रहेरेवेति**। **अभावात्** असंभवात्, [5]'वृतो वा' इत्यनेन विरोधप्रसङ्गादित्यर्थः। **ववरिथेति**। छन्दसि [6]'ववर्थ' इति निपातनाद् भाषायां क्रादिसूत्रोक्तेण्निषेधो नास्तीति भावः। संपूर्णसूत्रमेव ज्ञापकमिति [7]भाष्यकृतोक्तमिति मत्वा चोदयति — **लिटीति**। 'अलिटि' इत्यनुवर्तनाल्लिटि दीर्घनिषेधः सूत्रस्य प्रयोजनमित्यर्थः। 'विभाषां शास्ति' इति भाष्येण वाग्रहणं ज्ञापकमुक्तम्, न [8]तु संपूर्णसूत्रमिति परिहरति — **एवं तर्हीति**। 'अत्रापि' इति शङ्काशयविवरणम्, 'अन्यत्र' इति तु समाधानम्। 'भूयान्' इति प्रतिज्ञा न वक्ष्यमाण[9]परिहारबहुत्वापेक्षया, अनभिधानस्यैकस्यैवोक्तेः। किं तु पूर्वसमाधानापेक्षयेत्याह — **साधारण इति**। ननु [10]'अस्य च्वौ' इत्यादाविवार्थाभिधानासमर्थस्यापि वर्णस्य प्रत्ययेन ग्रहणं किं न स्यात्, अत आह — **प्रत्यय इति**। प्रत्ययविधौ सवर्णग्रहणं दीर्घप्लुतयोर्विधानाय। तौ च प्रत्ययाधिकारात् प्रत्ययावेव विधातव्यौ। प्रत्ययत्वं चार्थाभिधानसमर्थत्वे सत्येवेति दीर्घप्लुतयोस्तदभावेन[11] प्रत्ययत्वासंभवेन विधानासंभवान्निष्प्रयोजनतया सवर्णग्रहणं नास्तीति भावः। **उच्चार्यन्ते** अगादिशब्दैः साक्षाद् बोध्यन्ते। तेनेकारादीनामपि सवर्णग्राहकत्वं भवति। अनेन प्रत्याहारसूत्रे ये निर्दिष्टास्तैः सवर्णानां ग्रहणमित्युक्तं भवति। **अगादिचोदनासु** प्रत्याहारेषु। यद्यगादिचोदना अगादिप्रत्याहारार्थसूत्राणीति व्याख्यायते तदा 'श्रूयन्ते' इति यथाश्रुतमेव [12]साधु। शब्देन प्रत्यायनं ह्रस्वादीनामपीति तद्वैधर्म्यमाह — **ह्रस्वैरिति**। दीर्घाणां सवर्णग्राहकत्वनिषेधस्य प्रयोजनमाह — **तत्रेति**। अनण्त्वादेवाकारो न ग्राहकः, अत आह — **यथेति**। **कथमिति**। तदा 'अप्रत्याय्यः' इति स्यादित्यर्थः। **अन्तर्भावितेति**। 'अप्रत्ययः' इति निषेधसामर्थ्यादेतल्लभ्यते। न च प्रत्याहारस्थानामेव प्रतिषेधः, दीर्घाणामेव सवर्णग्राहकत्वमिति वैपरीत्यं किं न स्यादिति वाच्यम्, तथा सति [13]'दीर्घाज्जसि च' इति निषेधानर्थक्यप्रसङ्गात्। अकोऽचि विधीयमानपूर्वसवर्णदीर्घस्य

---

[1] पा. सू. १. १. ७०.
[2] न चैतेन — ञ.
[3] न संभवति — ऋ.
[4] स्यादित्याह — ऋ.
[5] पा. सू. ७. २. ३८.
[6] पा. सू. ७. २. ६४.
[7] भाष्योक्तमिति — म.
[8] तुशब्दो नास्ति — अ.
[9] परिहारापेक्षया — ऋ.
[10] पा. सू. ७. ४. ३२.
[11] तथाभावेन — म.
[12] 'साधु' इति नास्ति — ऋ.
[13] पा. सू. ६. १. १०५.

कुमार्यावित्यादौ प्रसङ्गाभावादिति भावः। **अर्धमात्रिकस्येति**। [1]'अष्टन आ विभक्तौ' [2]इत्यादिः। **मात्रिक एवेति**। स्थानेऽन्तरतमपरिभाषयेति भावः। **एतत्** उक्तप्रयोजनम्। **न निरूपितम्** [3]उपेक्षितम्। एतदुपेक्ष्य 'यत्नाधिक्यात्' इत्युपक्रममात्रतयोक्तम्। मुख्यपरिहारस्त्वनण्त्वमेवेति भावः। 'यथैव' इति यदुक्तं तत्राह — **अत्र हीति**। अस्मिन् सूत्रेऽण्ग्रहणेन ये गृहीतास्तेषां सवर्णग्राहकत्वमनेन विधीयते। अत्र च दीर्घा न गृहीताः, 'अण्' इत्युच्चारणसमये सूत्रस्यानिष्पादात्। निष्पन्नं सूत्रम् [4]'अस्य च्वौ' इत्यादौ सवर्णग्रहणं बोधयतीति [5]समुदायार्थः। [6]**स्वात्मनि क्रिया** स्वस्मिन् [7]प्रवृत्तिः सूत्रस्य, [8]तस्या असंभवात्। तत्र हेतुः — **अनिष्पादादिति**। ननु [9]'तपरस्तत्कालस्य' इत्यनेनात्र सवर्णग्रहणमस्तु, अत आह — **ग्रहणकेति**। भिन्नकालानां ग्रहणं तेन न प्राप्यत [10]इत्यर्थः। **अन्येषु** [11]'उरण् रपरः' इत्यादिषु। कथमल्पविषयेण [12]'अप्रत्ययः' इत्यनेन बहुविषयपरिभाषार्थप्रतिपादनम्, अत आह — **प्रतीयत इति**॥

[१, ५२५–५२७]

(**रत्नप्रकाशः**) **आदेशटित्किन्मित इति**। तत्रानुबन्धानामवयवत्वमारोपितमित्यणामेव वाचकत्वादिति भावः। **इत इति**। विशेषविहितत्वात् त्यदाद्यत्वं बाधित्वा त्रिमात्र आदेशः प्रसज्यते। पक्षान्तरे त्वर्धतृतीयमात्रस्येषन्न्यूनो दीर्घः, ईषदधिको वा प्लुतः, पर्यायेणोभौ वा प्रसज्येते इति भावः। **लवितेति**। दीर्घोऽपि कदाचित् प्रसज्येत। **बभूवेति**। वकारोऽनुनासिकोऽपि कदाचित् स्यादिति भावः। **हे अनड्वन्निति**। आकारोऽपि कदाचित् स्यात्। **यदयमिति**। इडागमविधिनैव दीर्घस्यापि सिद्धत्वादिति भावः। एतेन 'ग्रहेरेव दीर्घो नान्येभ्य इति नियमाभावादिति भावः' इति निरस्तम्। तन्नियमाभावस्यापि दीर्घविध्यानर्थक्यावहत्वाभावेन तत्कथनानर्थक्यात्। **विभाषां शास्तीति**। वृतो लिटचलिटि च विकल्पस्य सिद्धत्वेन विभाषाग्रहणमनुपपद्यमानं तज्ज्ञापयतीति भावः। **भाव्यमानेनेति**। **प्रतीयते** विधीयत इति कर्मसाधनस्य प्रत्ययशब्दस्य ग्रहणादप्रत्ययशब्दलब्ध एवार्थोऽनया परिभाषयानूद्यते। अनुकार्यानुकरणयोरभेदोपचारेण भाव्यमानानुकरणो भाव्यमानशब्देन परामृश्यते। भाव्यमानस्य ह्यनुकार्यस्य शब्दप्रत्याय्यस्य सवर्णग्राहकताया अप्रसक्तत्वेन तत्र निषेधो व्यर्थ एव भवति। **भूयानिति**। साधारणपरिहारापेक्षया असाधारणस्य श्रेष्ठत्वात्, असाधारणोऽपि परिहारोऽस्तीति भावः। भाव्यमानपरिभाषा अप्रत्ययग्रहणसिद्धेत्येतदेव साधयितुमुपक्रमते — **इदं तर्हीति**। **इहेति**। अस्मिन् प्रकृतसूत्रे। **ह्रस्वा इति**। अकः। ते ह्यक्षरसमाम्नाये पठ्यन्त इत्यण्शब्दस्य वाच्या एव भवन्ति। **प्रतीयन्त इति**। अण्पदेनैव स्मर्यन्त इति भावः। **दीर्घा इति**। आकारादयः पञ्च। यद्यपि प्लुता अपि प्रत्याय्यन्ते, तथापि तेषां सवर्णग्राहकत्वे कुत्रापि न दोष इति ते नोट्टङ्किताः। **प्रत्याय्यन्त इति**। अण्पदप्रतीतैरग्निभिः प्रतीयन्त इत्यण्पदेन प्रत्याय्यन्त इत्युच्यते। **तावदप्रत्यय इतीति**। अन्तर्भावि-

---

[1] पा. सू. ७. २. ८४.
[2] 'इत्यादावित्यादिः' इत्युचितं भाति।
[3] 'उपेक्षितम्' इति नास्ति — म.
[4] पा. सू. ७. ४. ३२.
[5] 'समुदायार्थः' इत्यस्यानन्तरं 'तेषु प्रत्याहारनिर्दिष्टवर्णेषु' इत्यधिकम् — अ.
[6] आत्मनि — अ, ऋ.
[7] प्रवृत्तेः — म.
[8] तस्यासंभवात् — म, ऋ.
[9] पा. सू. १. १. ७०.
[10] इति भावः — ऋ.
[11] पा. सू. १. १. ५१.
[12] प्रत्यय इत्यनेन — म.

तण्यर्थादेतेः कर्मण्यजिति भावः। तथा च [1]'अष्टन आ विभक्तौ' इत्यादावाकारादयः सवर्णग्राहका न भवन्तीति सप्रयोजनो निषेधः। **यत्नाधिक्यादिति**। ह्रस्व उच्चारणीये दीर्घोच्चारणसामर्थ्यात् ह्रस्वस्य ग्रहणं न भविष्यतीति भावः। ननु ह्रस्व उच्चारितेऽर्धमात्रस्य मात्रिक एवादेशः स्यात्, दीर्घोच्चारणसामर्थ्यात् पक्षे दीर्घोऽपि स्यादिति कल्पनासंभवात् कथं यत्नाधिक्यमिति चेत्, सत्यम्, एतस्य 'प्लुतं तर्हि गृह्णीयात्' इत्यनेन सहैव 'अनणत्वान्न ग्रहीष्यति' इत्युत्तरम्। ह्रस्वव्यक्तीनामेवाकारादीनां सवर्णग्राहकत्वमनेन सूत्रेण बोध्यते न त्वाकारादीनाम्, अणपदेन तेषामनुपस्थितत्वादिति भावः। **भाव्यमानेनेति**। धातूनामनेकार्थत्वाद् विधानार्थकादेतेः कर्मण्यजिति भावः। कृत्रिमाकृत्रिमपरिभाषा तु न स्वतन्त्रेत्युक्तं प्रागेव॥

[१, ५२५–५२७]

(नारायणीयम्) अणां प्रत्ययानां बहूनां सत्त्वात् तत्र सवर्णग्रहणनिरासार्थं निषेधस्य कर्तव्यत्वात् प्रश्नानुपपत्तिमाशङ्क्याह — **किमिति**। रूढग्रहणं न्याय्यमित्युक्तम् — **सन्निति**। तत्राव्याप्तिश्चोदिता — **अत्यल्पमिति**। तत्रादेशे सवर्णग्रहणे दोषमाह — **त्रिमात्र इति**। आन्तर्यतः। कथं पुनस्त्रिमात्रप्राप्तिः, अर्धतृतीयमात्रत्वात् स्थानिन इत्यत्राह — **विशेषेति**। व्यञ्जनागमे कः सवर्णः, तत्राह — **अन्विति**। [2]'प्लुतश्च विषये स्मृतः' इति न्यायात् तदप्राप्तेर्दीर्घप्राप्तिमाह — **आमिति**। नियमविधिसंभवादानर्थक्याभावात् कथं ज्ञापकत्वम्, अत आह — **ग्रहेरिति**। ज्ञापने सति यत् फलं तदत्र सिध्यतीति ज्ञापनोक्तिरिति भावः। नियमशब्देन विपरीतनियमो विवक्ष्यते, नियममात्रस्य पूर्ववादिसंमतत्वादित्याह — **ग्रहेरिति**। किं सूत्रस्थं ज्ञापकत्वम्, उत वाग्रहणस्य। नाद्यः, सूत्रानारम्भे लिट्यपि दीर्घप्राप्तेस्तन्निवृत्त्यर्थत्वात् तस्येत्याह — **एवं तर्हीति**। भाष्ये **भाव्यमानेनेति**। इदं हि 'अप्रत्ययादेश' इति वचनापेक्षया लघ्विति भावः। सर्वसाधारणपरिहारे बहुत्वाभावादस्मिंश्च बहुत्वप्रकर्षाभावात् 'भूयान्' इति कथम्, अत आह — **साधारण इति**। निरवद्यतयैकस्मिन्नपि बहुत्वं संख्यारूपं वैपुल्यरूपं वारोप्यत इति तदपेक्षः प्रकर्ष इति भावः। अभिधायकेनोत्पत्तव्यमित्यत्र को हेतुः, अत आह — **प्रत्यय इति**। प्रतीयमानत्वं ग्रहणकशास्त्रेणेति भ्रमं वारयति — **श्रूयन्त इति**। किं प्रत्याहारे, [ने]त्याह — **अगादीति**। यद्यपि प्रत्याहारेऽपि ह्रस्वानामुच्चारणम्, तथापि दीर्घाणां प्रत्याय्यमानत्वार्थमिदमुच्यत इति 'अगादिचोदनासु' इत्युक्तम्। कथमन्येनाप्रतीतिरित्यत्राह — **ह्रस्वैरिति**। प्रत्याय्यमानत्वावस्थायां ग्राहकत्वं न निषिध्यते, फलाभावात्। किं तु प्रत्याय्यमानत्वयोग्यानां दीर्घाणां तन्निषिध्यत इत्याह — **तत्रेति**। अनणत्वाद् ग्राहकत्वाप्रसक्तेर्निषेधोऽनर्थक इत्याशङ्क्यास्मिन् सूत्रे ग्रहणकशास्त्रप्रवृत्त्याण्सवर्णस्यापि ग्राहकत्वेन भाव्यमित्याह — **यथैवेति**। **कथमिति**। 'एरजण्यन्तानाम्' इति वचनाण्ण्यन्तादचोऽभावात् तस्यानार्षत्वेनाचि सत्यपि ण्याश्रयवृद्धिप्रसङ्गाद्रूपमेतण्ण्यन्ते न संभवतीति भावः। **न्याय्य एवेति**। न्याय्यं परिहारं वक्तुमयं परिहारो नोक्त इत्येवं न व्याख्येयम्, अस्याः परिहारत्वात्। किं तु 'यत्नाधिक्यात्' इति परिहारस्य दुष्टत्वेऽपि न्याय्यः परिहारोऽस्तीत्येवं व्याख्येयम्। अनणत्वेऽप्यणकार्यलाभ उक्त इत्यत्राह — **अत्र हीति**। 'असंभवः' इत्यनन्तरं यत इति द्रष्टव्यम्। स हेतुः 'गृह्यन्ते' इति साध्येनान्वेति। असंभवहेतूपपादनम् — **स्वेति**। को विरोधः, तमाह — **अनिष्पादादिति**। निष्पन्नो हि स्वकार्याय प्रभवति। **ग्रहणकेति**। अत्र निष्पन्नत्व-

---

[1] पा. सू. ७. २. ८४.

[2] श्लो. वा. ६. १. ८७–२.

विशेषणं द्रष्टव्यम्। व्यक्तिपक्षे हि शास्त्रान्तरमस्ति। तस्मिन्नेव च पक्षेऽस्यारम्भः। तस्माच्छास्त्रान्तरमप्यनिष्पन्नत्वान्नात्र व्याप्रियत इति। अण्कार्यं ग्राहकत्वमाकारादीनां नास्ति चेद् रपरत्वादिकार्यं कथमित्यत्राह — **अन्येष्विति**। तुशब्देन तत्रास्य निष्पन्नत्वमाह। ज्ञापनं नामात्रानुपपत्त्योपपादककल्पनं प्रसिद्धं न भवति। किं तु शब्देनैव तद्बोधनमित्याह — **प्रतीयत इति**॥

[१, ५२७–५३०]

(**लघुविवरणम्**) 'अणुदित् सवर्णस्य' इति वक्तव्ये 'अण् सवर्णस्य' इति कस्मादुक्तमित्यत्राह — **उदिदिति**। तस्यावश्यकर्तव्यत्वादिति भावः। स्वरादीनां व्यक्तिगुणत्वात् तद्भेदेऽप्याकृतिरेकैवेत्यत आह — **व्यक्तीति**। प्रत्याहारो गृह्यते येन तत् प्रत्याहारग्रहणं चेत् तर्हि [1]'सवर्णाग्रहणम् [2]'आदिरन्त्येन' इत्यत्रेष्टमेवेत्यत [3]आह — **अकोऽचीति**। तत्किमिदानीं सवर्णग्राहकशास्त्रं दत्तजलाञ्जलि भवतु, नेत्याह — **यत्रेति। प्रत्याहार इति**। [3]'अइउण्' इत्यादौ। ननु प्रत्याहारो दीर्घाग्राहकः प्रत्याहारसूत्रेऽनुच्चारणादित्युक्ते [4]हेतोर्व्यधिकरणत्वमित्यत [4]आह — **यत इति**। अगादिसंज्ञानां दीर्घाप्रत्यायकत्वे तदसंज्ञात्वं हेतुः, हेतुसिद्धये 'अनुपदेशात्' इत्युक्तमिति भावः। **उपदेश** उच्चारणं चेत् तर्हि सूत्रमेतद्व्यर्थं स्यात्, अत आह — **प्रत्यायनमिति**॥

[१, ५२८–५३०]

(**विवरणम्**) **आकृतीति**। प्रत्याहारसूत्रेषु [5]'अस्य च्वौ' इत्यादिषु चेति शेषः। नात्राक्षेपप्रतिवचने उदिद्विषये, एकैकवर्गमात्रनिष्ठावान्तरजात्यभावेनोदिद्ग्रहणस्यावश्यकर्तव्यत्वादित्यभिप्रेत्याह — **उदिदिति**। न चैवमस्य सूत्रस्य [6]वैयर्थ्यं शङ्कनीयमित्याह — **यत्रेति**। अत्र ह्येकस्यैव प्रत्याय्यत्वप्रत्यायकत्वलक्षण[7]विरोधाभावादित्यर्थः। वार्तिककृतागादिप्रत्याहारग्रहणे सवर्णानामीकारादीनामप्रतिपत्तिरिति प्रतिज्ञाय कुत इत्याकाङ्क्षायाम्, किं तेषामगादिसंज्ञयाप्रतीतेः,[8] उतेकारादिभिः संज्ञिभिरिति विकल्प्योभयनिराकरणाय 'अनुपदेशात्' इत्युक्तम्। तस्याप्रतिपादनादित्यर्थश्चेदर्थतः [9]साध्याविशिष्टत्वमित्यतोऽन्यथा व्याचष्टे — [10]**अनुदिति**। ननु [11]'ई हल्यघोः' इत्यादावीकारोच्चारणमस्त्येवेत्याशङ्क्याद्यपक्षनिराकरणे तावत् 'अनुपदेशात्' इति योजयति — **प्रत्याहार इति**। [12]'अइउण्' इत्यादावित्यर्थः। अगादिचोदनाभिः साक्षात् प्रतीयेरन्नित्यर्थः। भाष्ये संज्ञेति संज्ञिनोऽप्युपलक्षणमभिप्रेत्य द्वितीयपक्षनिराकरणायाप्येतदेव योजयति — **अथवेति**। **संनिहिताः** बुद्धिसंनिहिता इत्यर्थः। संनिधानं प्रतीतिः, **यथायोगम्** उच्चारणेन संज्ञया वेत्यर्थः। शब्दस्योच्चार्यमाणस्यैव संप्रत्यायकत्वे युक्तिमाह — **प्रतीयमानो हीति**। यद्यप्युच्चारणे प्रधानमपि प्रती-

---

[1] सवर्णग्रहणम् — ड, ढ, ण.
[2] पा. सू. १. १. ७१.
[3] माहेश्वरसूत्रम् १.
[4] हेतोर्व्यधिकरणत्वमुक्तमित्यत आह — ड, ढ, ण.
[5] पा. सू. ७. ४. ३२.
[6] 'वैयर्थ्यम्' इत्यस्यानन्तरम् इतिशब्दोऽधिकः — ञ.
[7] विरोधाभाव इत्यर्थः — ञ.
[8] अप्रतीतेरिति छेदः।
[9] साध्याविशिष्टदोषत्वम् — च, छ.
[10] अनुच्चारणादित्यस्यैकदेशस्य प्रतीकग्रहणम्।
[11] पा. सू. ६. ४. ११३.
[12] माहेश्वरसूत्रम् १

तावङ्गभावं प्रतिपद्यते, तथापि धात्वर्थभेदस्तत्र, नेह तथेति भावः। भाष्ये 'उच्चार्यमाणः शब्दः' इति व्याख्यादर्शनाद् वार्तिकस्थोच्चार्यमाणशब्दः शब्दस्येत्यस्य विशेषणं प्रतीयते, तथा च शब्दस्येत्येतदपेक्षमाणस्योच्चार्यमाणशब्दस्योपसर्जनाभिधायिनः संप्रत्ययकत्वशब्देनासमर्थसमासः स्यादित्यत आह — **शब्दस्येति**। कर्तरि षष्ठीमङ्गीकृत्य 'अवचनम्' इत्यनेनैव संबन्धं दर्शयति — **प्रतीयमानेति**। भाष्ये तु 'शब्दः' इत्यर्थसिद्धमुक्तमिति भावः। [1]"शेषे विभाषा' इति षष्ठी विकल्पितेति प्रदीपे तृतीयोक्ता। ऋगित्युक्ते तद्विशेषाप्रतीतेरर्थाप्रतीतिरिति न वाच्यमित्याह — **यद्यपीति**। उपदेशो नोच्चारणम्, किं तु [2]ग्रहणकशास्त्रेण प्रतिपादनमित्याह — **अइउणितीति**। **तेषामपि** अगादिसंज्ञायामिति शेषः। **अगादिसंज्ञाभिः** [3]'अकः सवर्णे' इत्यादाविति शेषः। उपदेशो नोच्चारणमित्याह — **प्रत्यायनमिति**। नाभिनवमित्याह — **व्याख्येति**। [4]'आदिरन्त्येन' इत्यकारादिभिराकारादीनां प्रत्यायनं प्रत्याहारसूत्र एव भवतीति व्याख्यास्यत इत्यर्थः। [5]**आर्थक्रमः** सामर्थ्यतः प्राप्तक्रम इत्यर्थः। [6]**शाब्देति**। सूत्रपाठक्रमेणैवेत्यर्थः। अभ्युपगम्य सूत्रपाठक्रम उक्तः। न त्वसौ सवर्णानां ग्रहणे प्रयोजकः, [7]'इग्यणः' इत्यादौ सवर्णग्रहणाभावप्रसङ्गात्। इयम् [8]"अस्य च्वौ' इत्यादौ **वर्णानामुत्पत्तौ** आकारादीनां बोधने निमित्तमेवेति 'सैषा' इति कथं भाष्यमित्यतोऽध्याहारेण व्याचष्टे — **अइउणिति**। **प्रत्याहारे** [9]'अइउण्' इत्यादौ॥

[१, ५२८–५३०]

(**उद्द्योतनम्**) [10]**आकृतीति**। प्रत्याहारसूत्रेषु [11]'अस्य च्वौ' [12]इत्यादिषु चेत्यादिः। ननु जातिपक्षे संपूर्णसूत्रस्य प्रत्याख्यानाद् व्यक्तिपक्षे च स्थापनात् 'अणुदित् सवर्णस्य' इति वक्तव्ये 'अण् सवर्णस्य' इति वार्तिकमयुक्तम्, अत आह — **उदिदिति**। ककारादिपञ्चकनिष्ठावान्तरजात्यभावेनोदिद्ग्रहणस्यावश्यकर्तव्यत्वादण्मात्र[13] एवायं विचार इत्यर्थः। **संज्ञयेति**। प्रत्याय्यानां प्रत्यायकत्वासंभवादिति भावः। ननु 'अण् [14]सवर्णस्य' इति वचनसामर्थ्यादगादिष्वपि सवर्णग्रहणं स्यात्, अत आह — **यत्रेति**। अत्र प्रत्याय्यप्रत्यायकत्वलक्षणविरोधाभावादित्यर्थः। वार्तिकेऽगादि[15]प्रत्याहारे सवर्णानामीकारादीनामप्रतिपत्तिरिति प्रतिज्ञाय कुत इत्यपेक्षायाम्, [16]अगादिसंज्ञया [17]तेषामप्रतिपत्तिः किं वेकारादिभिः [18]संज्ञिभिरिति विकल्प्योभयनिरासाय 'अनुपदेशात्' इत्युक्तम्। तत्रानुपदेशोऽप्रतिपादनं [19]चेदर्थतः साध्याविशिष्टत्वमित्यन्यथा व्याचष्टे — **अनुच्चारणा-**

---

[1] महाभाष्ये २. ३. ६६. अपर आहेत्युक्तं वार्तिकम्।
[2] 'ग्रहणक' इति नास्ति — च.
[3] पा. सू. ६. १. १०१.
[4] पा. सू. १. १. ७१.
[5] अर्थक्रमः — च, छ, ञ, ट.
[6] न शब्देति — छ, ञ; शब्देति — च, ट.
[7] पा. सू. १. १. ४५.
[8] पा. सू. ७. ४. ३२.
[9] माहेश्वरसूत्रम् १.
[10] अयं प्रतीको नास्ति — म.
[11] पा. सू. ७. ४. ३२.
[12] इत्यादौ च जातिपक्षे — म.
[13] अण्मात्रविषयोऽयं — म.
[14] 'सवर्णस्य' इत्यादि 'अगादिष्वपि' इत्यन्तं नास्ति — अ.
[15] प्रत्याहारसवर्णानामकारादीनां — म; प्रत्याहारे सवर्णानामाकारादीनाम् — ऋ.
[16] अणादि — अ, म, ऋ.
[17] तेषां प्रतिपत्तिः — अ, ऋ.
[18] 'संज्ञिभिः' इति नास्ति — म.
[19] चेदत्र साध्याविशिष्टत्वम् — म.

दिति। आद्यपक्षनिराकरणे हेतुं [1]योजयति — **न हीति**। **प्रत्याहारे** [2]'अइउण्' इत्यादौ। **गृह्येरन्** साक्षात् प्रतीयेरन्। भाष्ये संज्ञाग्रहणं संज्ञिनोऽप्युपलक्षणमङ्गीकृत्य द्वितीयपक्षनिरासेऽप्येतदेव योजयति — **अथवेति**। **संनिहिताः** बुद्धि[3]संनिहिताः। **तच्च** बुद्धिसंनिधानम्। **यथायोगम्** उच्चारणेन [4]संज्ञया वेत्यर्थः। [5]उच्चार्यमाणस्यैव प्रत्यायकत्वे युक्तिमाह — **प्रतीयमान इति**। यद्यप्युच्चारणे प्रधानस्य शब्दस्यार्थ[6]प्रतीतावङ्गभावोऽस्ति, तथापि धात्वर्थभेदस्तत्र, नेह स इति भावः। **तदैवेति**। यद्यप्यगादिसंज्ञया [7]संज्ञिप्रतीत्यनन्तरं [8]संज्ञिभिरिकारादिभिर्दीर्घाणां प्रतीतिरिति न यौगपद्यम्, तथापि कार्यान्वयात् प्रागेवोभय[9]प्रतीत्यपेक्षणात् प्राक्कालैक्यात् 'तदैव' इत्युक्तम्। एवं सति पूर्वप्रतीतह्रस्वानामेव कार्यान्वयः, न पश्चात् प्रतीतदीर्घाणामिति दूषणपर्यवसानं ज्ञेयम्। भाष्ये [10]'उच्चार्यमाणः शब्दः' इति व्याख्यानदर्शनाद् वार्तिकस्थोच्चार्यमाणशब्दः 'शब्दस्य' इत्यस्य विशेषणमिति प्रतीयते। तथा च 'उच्चार्यमाण'शब्दस्य संप्रत्यायकशब्देनासमर्थसमासः स्यादित्याशङ्क्य कर्तरि षष्ठीमङ्गीकृत्य [11]'अवचनम्' इत्यनेन शब्दस्येत्यस्य संबन्धं दर्शयति — **प्रतीयमानेनेति**। भाष्ये 'शब्दः' इत्यर्थसिद्धकथनमिति भावः। 'ऋक्' इत्युक्ते तद्विशेषाप्रतीतेर्नार्थप्रत्यय [12]इत्यत आह — **यद्यपीति**। **उपदेशो** नोच्चारणम्, किं तु 'अण् सवर्णस्य' इत्यनेन प्रत्यायनमित्याह — **अइउणिति**। **तेषामपि** अगादिसंज्ञायां सत्यामिति शेषः। **अगादिसंज्ञाभिः** [13]'अकः सवर्णे' इत्यादाविति शेषः। प्रत्यायनस्य स्वयंकरणासंभवादाह — [14]**व्याख्यास्यत इति**। 'अणुदित्' [15]इत्यनेनाकारादिभिराकारादीनां प्रत्यायनं प्रत्याहारसूत्र एव भवतीति व्याख्यास्यत इत्यर्थः। वार्तिके **परिभाषायाः** अणुदित्सूत्रस्य। 'वर्णानामुपदेशः' इत्यादिभाष्यतात्पर्यं संक्षेपेणाह — **निष्पन्नेष्विति**। भाष्ये **परा सूत्रात्** प्रत्याहारसूत्रात् परेयं परिभाषा। **क्रियते** पठ्यत इत्यर्थः। [16]**आर्थक्रमः** सामर्थ्यलभ्यक्रमः। [17]**न शाब्देति**। यद्यपि सूत्रपाठक्रमो न सवर्णग्रहणप्रयोजकः, [18]'इग्यणः' इत्यादौ सवर्णग्रहणाभावप्रसङ्गात्; तथाप्यभ्युपगमवादेनैतदुक्तम्। [19]'अस्य च्वौ' इत्यादौ सवर्णानामाकारादीनामुत्पत्तौ ज्ञापने निमित्तमेवेयमिति 'सैषा' इति भाष्ययोगमाशङ्क्याह — **अइउणिति**। **उत्पादयति** ज्ञापयति। **प्रत्याहारे** [20]अणित्यादौ॥

[१, ५२८–५३०]

(**रत्नप्रकाशः**) [21]सूत्रेऽण्प्रयोजनवार्तिकमवतारयति — **किमर्थमिति**। **अण् सवर्णस्येति**।

---

[1] प्रयोजयति — म.
[2] माहेश्वरसूत्रम् १.
[3] संनिपाताः — म.
[4] संज्ञयापीत्यर्थः — म.
[5] उच्चार्यमाणेनैव — म.
[6] प्रतीतावप्रधानभावोऽस्ति — म.
[7] 'संज्ञिप्रतीत्यनन्तरम्' इति नास्ति — म.
[8] संज्ञिभिरीकारादिभिः — म.
[9] प्रतीत्यनवेक्षणात् — ऋ.
[10] उच्चार्यमाणशब्दः — अ.
[11] वचनमित्यनेन — म, ऋ.
[12] इत्याह — म.
[13] पा. सू. ६. १. १०१.
[14] व्याख्यायत इति — अ, म, ऋ.
[15] इत्यनेनाकारादीनां — म.
[16] अर्थक्रमः — अ.
[17] न शब्देति — अ.
[18] पा. सू. १. १. ४५.
[19] पा. सू. ७. ४. ३२.
[20] 'अणित्यादौ' इत्येव दृश्यते — अ, म, ऋ. 'अइउणित्यादौ' इत्युचितम्, विवरणे तथैव दर्शनात्।
[21] सूत्रे प्रयोजन — ब.

उदिद्ग्रहणमावश्यकम्, अण्ग्रहणमेव प्रत्याख्यातुं शक्यत इति मन्यमानेन तदंश एव विचार आरब्धः। **प्रत्याहारग्रहण इति**। प्रत्याहारोच्चारण इत्यर्थः। **सवर्णाग्रहणमिति**। प्रत्याहार-प्रत्यायिताकाराद्भिरिति शेषः। **अनुपदेशादिति**। अनुच्चारणादित्यर्थः। **संज्ञेति**। अणादि-रूपा। **ननु चेति**। श्रूयमाणैरेव शब्दैरर्थस्मरणमिति न नियमः, पुस्तकगतरेखानुमितशब्दाना-मर्थप्रत्यायकत्वाभावापत्ते.। किं तु ज्ञातानां तेषामर्थस्मारकत्वम्, प्रत्याहारप्रत्यायिता अप्यकारादयो ज्ञाता भवन्त्येवेति भावः। **उच्चार्यमाणेति**। य एवोच्चारणीयास्त एवोच्चारण-स्थानापन्नरेखाभिर्ज्ञाप्या इति तेऽप्यनेन संगृहीता ज्ञेयाः। **शब्दस्यावचनमिति**। रेखोच्चारणज्ञा-पितशब्दस्य **अवचनम्** अप्रत्यायकत्वमिति भावः। [1]तत्प्रत्यायितार्थघटितार्थबोधे तत्प्रत्यायकघटित-वाक्यस्य तात्पर्यं नेति यावत्। ननु [2]वाक्यस्यातात्पर्यं नाम किमिति चेत्, लौकिकव्यवहारे तादृ-शार्थबोधपरतया वाक्यस्य प्रयोगादर्शनमेवेति गृहाण। एतेन 'प्रतीयमानो हि प्रधानं सत् कथमन्यप्रत्यायनेऽङ्गभावं तदैव गच्छेदित्यर्थः' इति निरस्तम्। [3]'संबन्धिस्मरणात् संबन्ध्यन्तर-स्मरणम्' इति न्यायेन शब्दानामर्थस्मारकत्वस्याकामेनाप्यङ्गी[4]करणीयत्वेन देवदत्तदर्शने सति तत्पितुः स्मरणद्वारा तत्पितृव्यपितामहादिस्मरणवत् शब्दस्मृतशब्देनापि तदर्थस्मरणे बाधकाभावेना-प्रयोजकगुणप्रधानभावाश्रयणानौचित्यात्। **संपाठमात्रमिति**। पठ्यमानः [5]'अग्निमीळे' इत्याद्या-नुपूर्वीविशेषविशिष्टपदसमूह एवेत्यर्थः। [6]**नार्थो गम्यत इति**। क्वचिद्गम्यते चेदपि तत्र तद्-वाक्यस्य तात्पर्यं नेति भावः। **वर्णपाठ एवेति**। अक्षरसमाम्नाय एवेत्यर्थः। **उपदेशः करिष्यत इति**। तत्रत्यानां वर्णानामकारादीनां लकारान्तानां सवर्णग्राहकतानेन सूत्रेणादौ बोध्यत इति भावः। तथा सति खलु दीर्घादयोऽपि तत्र निर्दिष्टा एवेत्यगादिप्रत्याहारवाच्यतैव तेषां भवति। अनेन सूत्रेण तद्बोधनमशक्यमित्याह — **अवरकालत्वादिति**। **परा सूत्रादिति**। [7]'वृद्धिरादैच्' इत्यादिसूत्रसंदर्भेणास्य व्यवहितत्वादबोधकता किमिति भावः। **सर्वथेति**। अक्षरसमाम्नाय-संनिधाविदं पठितं चेदपीति भावः। **अवरकालैवेति**। वाक्यार्थज्ञाने पदार्थज्ञानस्य कारणत्वा-दण्पदार्थज्ञानमन्तरेण प्रकृतसूत्रार्थाबोधादण्पदार्थज्ञानस्य [8]'आदिरन्त्येन' इति सूत्रार्थज्ञानोत्तरत्वात् तज्ज्ञानस्य च [9]'हलन्त्यम्' इति सूत्रार्थज्ञानोत्तरत्वात् तज्ज्ञानस्य च वर्णोपदेशोत्तरत्वादिति भावः। तदेवाह — **वर्णानामित्यादिना**। **तस्मादुपदेशः कर्तव्य इति**। यस्मात् प्रकृतसूत्रेणाक्षरसमाम्ना-यिकव्यक्तीनां सवर्णग्राहकता बोधयितुं न शक्यते तस्माद्दीर्घप्लुतयोरप्यक्षरसमाम्नाये यथादेश-मुच्चारणमेव कर्तुमुचितमिति भावः॥

[१, ५२८–५३०]

(**नारायणीयम्**) सूत्रप्रयोजने पृष्टे तदेकदेशस्य तत्कीर्तनमुदिद्ग्रहणे फलाभावाभिप्रायं न भवति, किं तु यस्याकृतिनिर्देशात् फलाभावाशङ्का तस्य पक्षान्तरे फलास्तित्वं प्रतिपादयितुमित्थ-

---

[1] तत्प्रापितार्थं — ब.
[2] वाक्यस्य तात्पर्यं नाम — ब.
[3] 'एकसंबन्धिदर्शनमपरसंबन्धिस्मारकम्' इति न्यायोऽर्थतोऽनूदितोऽत्र। लौ. न्या. साहस्री. पृष्ठम् १३.
[4] करणीयत्वे देवदत्त — ब.
[5] ऋ. सं. १. १. १.
[6] भाष्ये 'नास्या अर्थो गम्यते' इत्यत्र 'नार्थो गम्यते' इति रत्नप्रकाशकृत्पाठ इति भाति।
[7] पा. सू. १. १. १.
[8] पा. सू. १. १. ७१.
[9] पा. सू. १. ३. ३.

मुक्तमित्याह — **उदिदिति**। इह शास्त्रे प्रत्याहारशब्दोऽक्षरसमाम्नायेऽणादिसंज्ञासु च प्रयुज्यते। तदिह प्रत्याहारशब्देन विवक्षितार्थः क [1]इत्याह — **अक इति**। आदिवर्णेन सवर्णग्रहणोपपत्तेरविशेषोक्तिरयुक्तेत्याशङ्क्य ग्रहणपदेन विशेषलाभमाह — **संज्ञयेति**। यद्यप्यादिवर्णस्यापि प्रत्यायनमस्ति, तथापि तस्योच्चारितत्वमप्यस्तीति ग्रहणपदेनानुच्चारितविवक्षेति भावः। वचनस्य निर्विषयत्वं निरस्यति — **यत्रेति**। प्रतिपाद्यनार्थं व्यावर्तयति — **अनुच्चारणादिति**। 'ग्रहणे' इत्यनेनैवानुच्चारितत्वावगतेः 'अनुपदेशात्' इति पुनरुक्तमित्याशङ्क्याक्षरसमाम्नायेऽनुपदेशो विवक्षित इत्याह — **न हीति**। सवर्णपदस्वारस्यं भक्त्वा आकारादिग्रहणाभावस्य साध्यत्वविवक्षाव्याख्यानाद् वरं पक्षपरिग्रहे परिस्फुरद्धेतोः प्रकटनपरतया व्याख्यानमित्यभिसंधायाह — **अथवेति**। यद्वा अगादिचोदनास्वनुच्चारणात् सवर्णग्रहणाभावस्य वार्तिकार्थत्वे 'ननु च' इति शङ्कापूर्वकमनेनैव हेतुना सवर्णग्रहणाभावप्रतिपादनमयुक्तमित्याशङ्क्य 'अनुपदेशात्' इत्यन्यथा विवृतम्। अनुपदेशेऽपि ग्राहकत्वमस्तु, उपदेशस्य तत्राप्रयोजकत्वादिति शङ्कायां प्रयोजकत्वसमर्थनार्थमुत्तरग्रन्थ इत्यभिप्रायेण 'अथवा' इति व्याख्यान्तरं कृतम्। तदाह — **उच्चारितैरेवेति**। साधारण्येन संनिधानमात्रस्य प्रयोजकत्व आशङ्कते 'उच्चार्यमाणसंप्रत्यायकत्वात्' इति विशेषस्य प्रयोजकत्वाङ्गीकारो विना हेतुना न युक्त [2]इत्याह — **प्रतीयमान इति**। वचिः प्रतिपादनक्रियः, शब्दस्येति कर्तरि षष्ठीत्यभिप्रेत्याह — **प्रतीयमानेनेति**। ऋक्शब्दः पादबन्धवन्मन्त्रमात्रस्योपस्थापकः, न त्वानुपूर्वीविशेषस्य। आनुपूर्व्याश्च वैदिकवाक्यार्थनिर्णयहेतुत्वमिति कथमर्थप्रतीतिप्रसङ्गस्तत्र। येनानुच्चारणात् तदभावे दृष्टान्त इत्यत्राह — **यद्यपीति**। उपदेशे दीर्घादीनामाशङ्क्ते परिभाषाव्यापाराभावकीर्तनमयुक्तमित्यत्राह — **प्रत्याहार इति**। परिभाषाव्यापार एवाक्षरसमाम्नाय आशङ्क्यत इत्यर्थः। अवरकालस्याप्यस्य पूर्वत्र व्यापारो न विरुध्यत इत्याशङ्क्य 'सर्वथा' इति भाष्येण विवक्षितमवरकालत्वमङ्गित्वलक्षणं मनसि निधायाङ्गिनोऽङ्गेष्वप्रवृतौ हेतुमाह — **अनिष्पन्नत्वादिति**। **नापीति**। दृष्टान्तार्थमिदमुक्तम्। यथा — अनिष्पन्नत्वादेव स्वात्मन्यव्यापारः प्रागुक्तस्तथाङ्गनिष्पत्तिकालेऽङ्गिनोऽनिष्पन्नत्वात् तत्र तस्याव्यापार इति। स्वात्माङ्गव्यतिरिक्तं प्रवृत्तिविषयं दर्शयति — **निष्पन्नेष्विति**। वर्णोत्पत्तिनिमित्तत्वस्य परिभाषाया अप्रसक्तत्वान्निषेधोऽनर्थक इत्याशङ्क्योत्पत्तिशब्देन प्रतीतिर्विवक्षिता, वर्णशब्देन च तद्विशेषो विवक्षित इत्याह — **अइउणिति**। प्रागुपदेशपदं प्रत्यायनपरं व्याख्यातमिति तद्भ्रमनिवारणायाह — **प्रत्याहार इति**॥

[१, ५३०–५३४]

(**लघुविवरणम्**) वर्णोपदेशस्य जातिपरत्वेऽनण्त्वादिति हेतुरसिद्ध इत्यत्राह — **अण्सदृश इति**। **व्यक्तीति**। वचनादनणपि सवर्णग्राहकश्चेदण्ग्रहणं किमर्थमित्यत्राह — **अण्सदृश इति**। तच्छब्देनानण्त्वमात्रं परामृश्य निषिध्यते चेत् प्रत्याहारेषु सवर्णग्राहकत्वमुक्तं स्यात्, तच्चायुक्तमित्यत्राह — **अनन्तरेति**। कथं प्रत्याहारेष्वादितो वर्णेषूभयाभाव इत्यत्राह — **अत्रेति**। ननु तत्रापि स्वं रूपं संज्ञि, ग्राहकं चेत् तदनुच्चारितमेवेत्यत आह — **तत्रेति**। व्यक्तिपक्षे सूत्रमेतत् कर्तव्यमित्युक्तमित्यत्राह — **एवमिति**। उद्देशस्थले जातिनिर्देशो न विधिस्थल इति 'अप्रत्ययः' इति [3]प्रतिषेधार्थमपि सूत्रं न कर्तव्यमित्याह — [4]**उद्दिश्यत इति**। ननु तथाप्यत्वजातियुक्ता

---

[1] इत्यत आहेत्यर्थः।
[2] इत्यत आहेत्यर्थः।
[3] निषेधार्थमपि — ण.
[4] प्रदीपे 'सर्वत्र जातिरुपदिश्यते' इत्यत्र 'सर्वत्र जातिरुद्दिश्यते' इति पाठोऽत्राभिमतः।

अकारव्यक्तय एव गृहीताः, न दीर्घप्लुतावित्यत्राह — **अत्वं चेति**। विधावपि क्वचिज्जातिनिर्देशे न दोष इत्याह — **अष्टन इति**। पूर्वव्याख्यानादस्य [1]व्याख्यानस्य विशेषमाह — **व्यक्तिरिति**। **अवात्तामिति**। वसेर्लुङि तसस्तामि च्लेः सिचि [2]'सः स्यार्धधातुके' इति तत्त्वे हलन्तलक्षणायां वृद्धौ [3]'झलो झलि' इति सिज्लोपे च रूपम्। ननु द्रुतविलम्बितयोरनुपदेशे एतत्सूत्रेणैव तयोर्ग्रहणाद्दीर्घादिवत् स्यात्, अत आह — **हलिति**। तत् सकलमपि सूत्रं [4]न कर्तव्यम्, नेत्याह — **उदिदिति**। **उत्पत्तिवाक्यत्वादिति**। द्रव्यविधानवाक्यत्वादित्यर्थः॥

[१, ५३०–५३४]

(**विवरणम्**) **वृत्ति** स्वरूपेण स्थितिम्, अनुगतोऽनुवृत्तिरकारादिः, तस्य निर्देशः, स्वरूपेणोच्चारणमिति यावत्। तत्र [5]'सवर्णग्रहणे हेतुमाह — **व्यक्तीति**। **अवान्तरेति**। गुणादिकृतेति भावः। अशब्दार्थस्य वचनादपि कथं ग्राहकत्वमित्यत आह — **अणिति**। **उभयम्** अनण्त्वमनुच्चारणं च। भाष्ये 'अनण्त्वात्' इति प्रत्याहार इत्यनेन न संबध्यते। **मध्यपातिनामिति**। दृष्टान्तत्वेनोक्तम्। **प्रत्याहारे** [6]'अइउण्' इत्यादिसूत्रे। **नान्तरीयकमिति**। व्यक्त्या विना जातिनिर्देशासंभवादित्यर्थः। **अत्वम्** अवर्णत्वम्। प्रमाणकृतभेदे दृष्टान्तमभिधाय गुणकृतभेदेऽप्याह — **शुक्ल इति**। **श्रुतिभेदात्** श्रवणेन्द्रियजन्योपलब्धिभेदात्, **भेदं** जातेरिति शेषः। श्रुतिभेदो हि व्यक्तिभेदसाधकोऽक्षु तुल्यास्यप्रयत्नत्वे, नाकृतिभेदसाधकः, [7]अन्यथासिद्धत्वादित्याह — **सत्यपीति**। **प्रत्यभिज्ञानात्** अत्वे सति तुल्यास्यप्रयत्नत्वेन। **प्राणित्वेनेति**। यद्यपि प्राणित्वं न जातिः, तथापि साधारणधर्माभिप्रायेणोक्तम्। यथैवं तर्हि ह्रस्वनिर्देशे न व्यक्तिर्विवक्षिता तथा दीर्घनिर्देशेऽपीति न शङ्कनीयमित्याह — **अष्टन इति**। **दीर्घेति**। व्यक्तिर्विशेषणं तत्र, नोपलक्षणमिति भावः। **अशब्दार्थः** न [8]'शब्दस्वरूपनिमित्तेनाभिधेयः, किं तु व्यक्त्यभिधाने प्रवृत्तिनिमित्तत्वेन बोधित इति शेषः। [9]**सर्वव्यक्तीनां** ग्रहणमित्यन्वयः। **अभेदाश्रयणात्** अभिन्नजातेरुपलक्षणत्वेनाश्रयणादित्यर्थः। यद्यपि व्यक्तिपक्षे प्रत्याहारनिर्दिष्टैव व्यक्तिर्लक्ष्येऽपीति नास्ति प्रमाणान्तरम्, तथापि लक्ष्यार्थात् [10]'झलो झलि' इति निर्देशात् प्रत्याहारनिर्दिष्टैव व्यक्तिर्लक्ष्येऽपीति ज्ञानात् 'पूर्वा परा वा' इत्युक्तम्। **अवात्तामिति**। वसेर्लुङि तसस्तामि च्लेः सिचि [11]'वदव्रज' इति वृद्धौ [12]'सः स्यार्धधातुके' इति तत्वेऽटि च [13]'झलो झलि' इति सलोपे च रूपम्। न च [14]'झलो झलि' इति निमित्तत्वेनोभयोर्निर्देशान्यथानुपपत्त्या प्रत्याहारगतैव व्यक्तिरुच्चारणभेदभिन्ना पूर्वा पराप्येकैव भविष्यतीति वाच्यमित्याह — [15]**अबुद्धा इति**। बुधेर्लुङ्यटचात्मनेपदे

---

[1] 'व्याख्यानस्य' इति नास्ति — ड, ढ.
[2] पा. सू. ७. ४. ४९.
[3] पा. सू. ८. २. २६.
[4] न कर्तव्यमित्यत आह — ड, ढ.
[5] सवर्णग्रहणे — च, छ, ट.
[6] माहेश्वरसूत्रम् १. १. १.
[7] अनन्यथासिद्धत्वात् — ञ.
[8] शब्दस्वरूपात्मकनिमित्तेनेत्यर्थो भाति।
[9] प्रदीपे 'एकव्यक्तिनिर्देशेऽपि' इत्यस्यानन्तरं 'सर्वव्यक्तीनाम्' इति शब्दान्तरं हरयाणामुद्रितेऽस्ति। निर्णयसागरीये तु नास्ति। निर्णयसागरीयपाठोऽत्राभिमतः।
[10] पा. सू. ८. २. २६.
[11] पा. सू. ७. २. ३.
[12] पा. सू. ७. ४. ४९.
[13] पा. सू. ८. २. २६.
[14] पा. सू. ८. २. २६.
[15] प्रदीपे 'अबुद्ध' इत्यस्य स्थाने 'अबुद्धाः' इति पाठोऽभिमतः।

थासि च्लेः सिचि [1]'लिङसिचौ' इति कित्त्वाद् गुणाभावे [2]'झलो झलि' इति सिज्लोपे [3]'झषस्तथोः' इति धत्वे [4]'झलां जश् झशि' इति जश्त्वे च रूपम्। **भेद एवेति**। एकावान्तरजातिक्रोडीकारो नेति न तद्द्वारानेकव्यक्तिग्रहणमिति भावः। प्रत्यभिज्ञाविरोधान्नावान्तरजात्यपलापः [5]शक्य इत्युत्तरयति — **आहेति**। वृत्त्या पृथक्त्वमिति तृतीयासमासमभिप्रेत्य व्याचष्टे — **ह्रस्वेति**। प्रत्याख्यातेऽप्यणग्रहणे 'तपर' इति कर्तव्यमेवेत्याह — **अवश्येति**। अवश्यकर्तव्यतामेवाह — **व्यक्तीति**। उदिद्ग्रहणाभावे [6]'कुहोश्चुः' इत्यादौ 'कहोश्चः' इति वक्तव्यम्। कचौ च कत्वचत्वे आहतुः। न च ते खच्छादिषु स्त इति जातिनिर्देशेऽपि न तेषां ग्रहणं स्यादित्याह — **न हीति**। **एकेति**। तन्मात्रनिष्ठेति शेषः। 'अप्रत्ययः' इत्यण एव शेषो नोदित इत्याह — **स्थित इति**। नन्वणग्रहणप्रत्याख्यानेऽनुवादेष्विव विधावपि जातिनिर्देशात् सवर्णग्रहणप्रसङ्ग इत्यत आह — **प्रत्याख्यानेति**। श्रुतजातिविशेषावच्छिन्ना व्यक्तिरित्यर्थः। [7]विधौ हि न परशब्दार्थ इति न जातिद्वारा तदवच्छिन्नसर्वव्यक्तिलक्षणेति भावः। **उत्पत्तिवाक्यत्वात्** विधिवाक्यत्वादित्यर्थः। विधौ हि प्रमित्सितत्वात् विशिष्टोपादाने न वाक्यभेदः, अनुवादे त्वप्रमित्सितत्वात् तद्विशेषणोपादानं न वाक्यभेदमन्तरेण संभवति, स चान्याय्य इति भावः। यत् क्वचिद्विधावपि व्यक्त्यन्तरस्याप्युपादानं तत् "दिव उत्' इत्यादितपरकरणाल्लिङ्गादिति द्रष्टव्यम्॥

[१, ५३०–५३४]

(**उद्द्योतनम्**) प्रत्याहारे पाठेन दीर्घादेरण्त्वादिसंपादनं पाठाभावादयुक्तमित्युक्त्वा [9]'अस्य च्वौ' इत्यादावकारादेः [10]स्वरूपेणोच्चारणे सवर्णग्रहणं न प्राप्नोतीति दोषान्तराभिधानाय 'तत्रानुवृत्ति' इति वार्तिकम्। **अनुवृत्तिशब्दः** प्रत्याहारसूत्रपरः, अनुवृत्तौ स्वरूपेण निर्देश उच्चारणं यस्याकारादेस्तत्रेत्यर्थः। [11]'वृत्ति स्वरूपेण स्थितिमनुगतोऽकारादिस्तस्य निर्देशः स्वरूपेणोच्चारणम्' इति केचित्। तत्र 'येऽनुवृत्तौ' इति भाष्य[12]विरोधाच्चिन्त्यम्। तत्र [13]सवर्णीग्रहणे हेतुमाह — **व्यक्तीति**। प्रत्याहारसूत्रस्थाकाराद्यपेक्षया [14]'अस्य च्वौ' इत्यादिस्थस्य भिन्नत्वेनानण्त्वात् सवर्णग्रहणं न प्राप्नोतीत्यर्थः। **अवान्तरेति**। उदात्तादिकृतेत्यर्थः। [15]अशब्दार्थस्य वचनादपि कथं ग्राहकत्वम्, अत आह — **अण्सदृश इति**। 'यत्र तन्नास्ति' इत्यत्र तच्छब्दार्थमाह — **अनन्तरेति**। **उभयम्** अनण्त्वमनुच्चारणं [16]च। **मध्यपातिनामिति**। दृष्टान्ततयोक्तम्। व्यक्तिपक्षोक्तदोषनिरासाय जातिपक्षाङ्गीकारे सूत्रमेव व्यर्थमिति वक्तुं 'सवर्णे' इति वार्तिकमित्याह — **एवमिति**। भाष्ये **एवं तर्हि** जातिपक्षाङ्गीकारे। **प्रत्याहारे** [17]'अइउण्'

---

[1] पा. सू. १. २. ११.
[2] पा. सू. ८. २. २६.
[3] पा. सू. ८. २. ४०.
[4] पा. सू. ८. ४. ५३.
[5] शङ्क्य इति — च.
[6] पा. सू. ७. ४. ६२.
[7] विधौ ह्येक एव शब्दार्थ इति — ञ.
[8] पा. सू. ६. १. १३१.
[9] पा. सू. ७. ४. ३२.
[10] स्वरूपेणोच्चारणे सर्वग्रहणं — अ; स्वरूपेणोच्चारणेन दीर्घग्रहणं — म.
[11] विवरणोक्तिरियम्।
[12] विरोधश्चिन्त्यः — अ, म.
[13] सवर्णग्रहणे — अ.
[14] पा. सू. ७. ४. ३२.
[15] अनणश्च वचनादपि — म.
[16] चकारो नास्ति — म.
[17] माहेश्वरसूत्रम् १.

इत्यादिसूत्रे । **नान्तरीयकमिति** । व्यक्त्या विना जातिनिर्देशासंभवादित्यर्थः । यद्यपि 'अत्वम्' इत्यादिनिर्देशः संभवति, तथापि 'अस्य भावः' इति व्यक्तिनिर्देशोऽस्ति, गौरवं चेति भावः। **अत्वम्** अवर्णत्वम्[१]। प्रमाणकृतभेदे दृष्टान्तः — **कृश इति**। **शुक्ल इति** । गुणकृतभेदे। **श्रुतिभेदात्** श्रोत्रेन्द्रियजन्योपलब्धिभेदात् । **भेदं** जात्यादेरित्यादिः । व्यक्तिभेदेनान्यथासिद्धः श्रुतिभेदो न जातिभेदसाधक इत्याह — **सत्यपीति**। **प्रत्यभिज्ञानादिति**। यथा कृशे स्थूले च 'गौः' इत्येकाकारा बुद्धिः, तथा ह्रस्वे दीर्घे च 'अवर्णः' इति बुद्धेर्नाकृतिभेद इत्यर्थः। **प्राणित्वेनेति** । यद्यपि प्राणित्वं न जातिः, तथापि [१]परम्परासंबन्धप्राणत्वमेव प्राणित्वम्, अनुगतधर्ममात्रं चाकृतिशब्दार्थ इति भावः। [२]यथा ह्रस्वनिर्देशे [३]व्यक्तेर्नान्तरीयकतया दीर्घस्यापि ग्रहणम्, एवं [४]दीर्घोच्चारणे ह्रस्वस्यापि ग्रहणं स्यात्, आकृतिनिर्देशाविशेषात्, अत आह — **अष्टन इति**। यद्यपि ह्रस्वोच्चारणेऽर्धमात्रिकस्य[५] मात्रिक एव स्यादिति दीर्घोच्चारणमुभयार्थमिति वक्तुं शक्यम्, तथापि [६]'ई हल्यघोः' इत्यत्र ह्रस्वोच्चारणेऽपि 'अम्' इत्यत्रैव दीर्घस्य दीर्घसिद्धेर्दीर्घोच्चारणं न सर्वत्र [७]भाव्यमानेऽन्तरतमपरिभाषोपतिष्ठत इति ज्ञापनार्थम्। तेनात्र ह्रस्वोच्चारणे दीर्घस्यानन्तरमस्यापि प्राप्तेर्दीर्घोच्चारणं व्यक्तिविशेषविवक्षार्थमेवेति भावः। **अशब्दार्थोऽपीति**। व्यक्तीनामानन्त्येन [८]शक्तिग्रहानुपपत्तिपरिहाराय जातिरुपलक्षणतयाङ्गीक्रियते, न तु वाच्यतयेत्यर्थः। यद्वा, पूर्वं जातिमात्रस्य प्राधान्येन वाच्यत्वमुक्तम्, इदानीं जात्यवच्छिन्नव्यक्तीनाम्। जातिर्विशेषणतया, [९]न प्रधानतया। **अशब्दार्थः** प्रधानतयेत्यादिः। [१०]**ग्रहणं** सर्वव्यक्तीनामित्यादिः। पूर्वम् 'आकृतिग्रहणात्' इत्यस्याभिधेयत्वेन ग्रहणं विवक्षितम्। इदानीं सर्वव्यक्तिप्रतीत्युपयुक्तप्रतीतिर्विवक्षितेत्याह — **अत्र पक्ष इति** । यद्यपि व्यक्तिपक्षे प्रत्याहारनिर्दिष्टैव व्यक्तिर्लक्ष्येऽपीति नास्ति प्रमाणम्, तथापि लक्ष्यार्थात् [११]'झलो झलि' इति निर्देशात् प्रत्याहारस्थैव व्यक्तिर्लक्ष्येऽपीति ज्ञानात् 'पूर्वा परा' इत्युक्तम्। **अवात्तामिति**। वसेर्लुङ्, तसस्ताम्, च्लेः सिच्, [१२]'वदव्रज' इति वृद्धिः, [१३]'सः स्यार्धधातुके' इति सस्य तत्वम्, [१४]'झलो झलि' इति सलोपः। भाष्ये **अवात्तमिति**। वसेरेव लुङि थसस्तमि रूपम्। ननु [१५]'झलो झलि' इति निमित्तत्वेनोभयोर्निर्देशसामर्थ्यात् प्रत्याहारगतैव व्यक्तिरुच्चारणभेदभिन्ना पूर्वा पराप्येकैव भविष्यति, अत आह — [१६]**अबुद्धा इति**। बुधेर्लुङ्चटचात्मनेपदे थासि [१७]'लिङःसिचौ' इति

---

[१] परम्परासंबन्धेति बहुव्रीहिर्बोध्यः।
[२] यद्यपि ह्रस्व — अ.
[३] 'व्यक्तेः' इति नास्ति — म.
[४] 'दीर्घोच्चारणे' इत्यस्यानन्तरम् अपिशब्दोऽधिकः — अ.
[५] 'अर्धमात्रिकस्य' इत्यादि 'तेनात्र ह्रस्वोच्चारणे इत्यन्तं नास्ति — म.
[६] पा. सू. ६. ४. ११३.
[७] भाव्यमानपरिभाषा — अ.
[८] शक्तिग्रहणानुपपत्ति — म.
[९] न प्रधानम् — अ.
[१०] 'ग्रहणम्' इत्यतः प्राक् 'सर्वव्यक्तीनाम इत्यस्ति हरयाणामुद्रिते। निर्णयसागरमुद्रिते तु प्रदीपेऽत्र 'सर्वव्यक्तीनाम्' इति नास्ति। स पाठोऽन्नंभट्टस्वीकृतः॥ 'ग्रहणं सर्वव्यक्तीनामित्यादिः' इति नास्ति — अ.
[११] पा. सू. ८. २. २६.
[१२] पा. सू. ७. २. ३.
[१३] पा. सू. ७. ४. ४९.
[१४] पा. सू. ८. २. २६.
[१५] पा. सू. ८. २. २६.
[१६] प्रदीपे 'अबुद्ध' इत्यस्य स्थाने 'अबुद्धाः' इत्यन्नंभट्टपाठः।
[१७] पा. सू. १. २. ११.

कित्त्वेन गुणाभावे [1]'झलो झलि' इति सिज्लोपे [2]'झषस्तथोः' इति धत्वे [3]'झलां जश्' इति जश्त्वे च रूपम्। अत्र [4]धकारथकारव्यक्तिद्वयमादाय लक्षणप्रवृत्तेः 'अवात्ताम्' इत्यादावप्रवृत्तिरिति भावः। **धात्विति**। कत्वतत्वादिजातौ मानाभावान्न तद्द्वारा [5]सर्वव्यक्तिग्रहणसिद्धिरिति शङ्काशयः। प्रत्यभिज्ञैव तत्र मानमित्याशयेनोत्तरमाह — **आहेति**। [6]द्रुतेत्यादिकं हल्मात्रविषयमित्याह — **हल्ग्रहणेष्वेवेति**। वृत्त्या पृथक्त्वमिति तृतीयासमासमभिप्रेत्य व्याचष्टे — **ह्रस्वेति**। अवश्यकर्तव्यतामेवाह — **व्यक्तीति**। उदिद्ग्रहणाभावे 'कहोश्चः' इति सूत्रं कर्तव्यम्, तत्र कत्वचत्वयोः खछादिष्वभावात् तेषां ग्रहणं जातिपक्षेऽपि न स्यादित्याह — **न हीति**। **एकेति**। तन्मात्रनिष्ठेत्यादिः। 'अप्रत्ययः' इत्यण एव शेषः, नोदित इत्याह — [7]**कृत इति**। नन्वण्ग्रहणप्रत्याख्यानेऽनुवाद इव विधावपि सवर्णग्रहणप्रसङ्गः, अत आह — **प्रत्याख्यानेति**। **यथाश्रुतम्** उच्चारितव्यक्तिविशेषावच्छिन्नं जातिस्वरूपम्। [8]**उत्पाद्यते** विधीयते। तथा च विधेयविशेषणत्वात् पश्वेकत्ववद् व्यक्तिविशेषविवक्षेति भावः। **उत्पत्तिवाक्यत्वात्** विधिवाक्यत्वात्। नन्वेवं गुणभिन्नस्याप्यग्रहणं स्यात्, अत आह — **उदात्तेति**। अनुवादे ग्रहैकत्ववदुच्चारितव्यक्तिविशेषविवक्षा नास्तीत्याह — **अनुवाद इति**। [9]**निर्ज्ञातानां** ग्रहाणामित्यन्वयः। [10]'दिव उत्' इति तपरकरणाल्लिङ्गात् 'अम्' इत्यादिसिद्धये क्वचिद्विधावपि व्यक्त्यन्तरोपादानम्। [11]तत्राण्ग्रहणप्रत्याख्यानपक्षे तच्छेषस्य 'अप्रत्ययः' इत्यस्याप्यभावात् 'उदित् सवर्णस्य' इत्येतावत् सूत्रं कर्तव्यम्। 'भाव्यमानेन सवर्णानां ग्रहणं न' इति परिभाषा च [12]पश्वेकत्वन्यायसिद्धेति मन्तव्यम्॥

---

[1] पा. सू. ८. २. २६.
[2] पा. सू. ८. २. ४०.
[3] पा. सू. ८. ४. ५३.
[4] धकारतकार — अ, म.
[5] सवर्णग्रहणसिद्धिरिति — म.
[6] द्रुतत्वादिकं — म.
[7] स्थित इति — अ, ऋ.
[8] प्रदीपे 'यथाश्रुतं रूपमुत्पद्यते' इत्यत्र 'यथाश्रुतं रूपमुत्पाद्यते' इत्यन्नंभट्टपाठ इति भाति।
[9] प्रदीपे 'वाक्येभ्यो ज्ञातानाम्' इत्यत्र 'वाक्येभ्यो निर्ज्ञातानाम्' इति पाठोऽन्नंभट्टस्येति प्रतीयते।
[10] पा. सू. ६. १. १३१.
[11] अत्राण्ग्रहण — ऋ.
[12] अयं न्यायो मीमांसाचतुर्थाध्यायप्रथमपादपञ्चमाधिकरणे निरूपितः। तथाहि — 'अग्नीषोमीयं पशुमालभेत' इत्यत्र पशुमिति प्रतीयमानस्यैकत्वस्य प्राधान्येन विधेययज्ञाङ्गत्वे विवक्षा स्यात्। गुणभूतपश्वङ्गत्वे विवक्षा न स्यात्। अत्रैकपदश्रुत्यैकत्वस्य पशङ्गत्वं प्रतीयते पदान्तरनिरपेक्षम्। यागाङ्गत्वं तु 'आलभेत' इति पदान्तरोपात्तत्वाद्यागस्य तस्य वाक्यप्रमाणायत्तम्। वाक्याच्छ्रुतेर्बलीयस्त्वात् पशवङ्गत्वमेवेत्यतोऽविवक्षैकत्वस्येति द्वाभ्यां बहुभिर्वा यागः कर्तुं शक्यते, इति पूर्वपक्ष उच्यते — पशुमिति पदस्यैकत्वेऽपि तत्र प्रकृत्या पशोः प्रत्ययेन कारकत्वैकत्वयोश्च प्रतीयमानत्वात् समानप्रत्ययश्रुत्यैकपदश्रुत्यपेक्षया प्रबलया एकत्वस्यासन्नतरे कारके प्रथमं संबन्धो भवति। कारकत्वस्य क्रियाहेतुत्वरूपतया कारकद्वारा तज्जन्यक्रियायामपि संबन्धः प्रत्ययेनैवावगतः। एवं क्रियासामान्यावगतौ क्रियाविशेषप्रतीतिः 'आलभेत' इति पदान्तरेणेति यागाङ्गत्वमेकत्वस्य सिध्यति। एकत्वस्य स्वतोऽमूर्तस्य यागनिष्पादकत्वाभावेन पश्चादरुणाधिकरणन्यायेन पशुना सह पार्ष्ठिकान्वयः। तस्मादेकत्वस्य विधेययागाङ्गत्वेन विवक्षितत्वान्न द्वाभ्यां बहुभिर्वा याग इति।

[१, ५३०–५३४]

(**रत्नप्रकाशः**) तदेवं प्रत्याहारोपस्थापितानामकारादीनां सवर्णग्राहकतामुपपाद्य स्वरूपेण निर्दिष्टानामपि तेषां तामाह — **तत्रानुवृत्तिनिर्देश इति**। **वृत्तिः** शास्त्रप्रवृतिः, तामनुगतोऽनुवृत्तिः, स निर्देशोऽनुवृत्तिनिर्देशः। **अनण्त्वादिति**। प्रत्युच्चारणं वर्णव्यक्तिभेदादक्षरसमाम्नायनिर्दिष्टानामेवाकारादिव्यक्तीनामणत्वादिकं न त्वन्यत्र निर्दिष्टानामिति मन्यते। **वचनाद् भविष्यतीति**। अयं भावः — अक्षरसमाम्नायस्य प्रत्याहारद्वारा शास्त्रोपयोगितया प्रत्युच्चारणं व्यक्तिभेदेन प्रत्याहारैश्चानाक्षरसमाम्नायिकानामकारादीनां ग्रहणं विना शास्त्रोपयोगासंपादनेनाक्षरसमाम्नायिकेत्संज्ञकवर्णैस्तत्रत्याकारादीनां साहित्यासंभवेन च [१]'आदिरन्त्येन सहेता' इति सूत्रम् अन्त्येत्सदृशेन सहोच्चार्यमाण आदिसदृशोऽनुबन्धान्यमध्यगसदृशानां स्वसदृशस्य च संज्ञा स्यादित्येतदर्थकतया व्याख्येयम्। [२]'ल्वादिभ्यः' इत्यादिनिर्देशैः [३]'दीर्घाज्जसि च' इति निषेधेन च प्रत्याहारप्रत्यायितानामपि सवर्णबोधकताभ्युपेयेति व्यक्तिपक्षे न काप्यनुपपत्तिरिति। एतेन 'प्रत्याहाराणां तद्वाच्यवाच्ये निरूढलक्षणा' इति [४]मनोरमा प्रत्युक्ता, प्रकृतसूत्रगतस्याप्यण्प्रत्याहारस्य स्ववाच्यसवर्णलक्षकत्वापत्त्या 'दीर्घाणामनण्त्वात् सवर्णग्राहकता न' इति भाष्येण विरोधात्। यत्तूक्तम् 'अण्सदृशोऽणिति ग्रहीष्यत इत्यर्थः' इति। तन्न, तावता व्यक्तिपक्षावलम्बिपाणिनिमतानिर्वाहात्। **यत्र तन्नास्तीति**। अनुच्चार्यमाणत्वमनण्त्वं चोभयं यत्र नास्ति तत्र वचनात् सवर्णग्राहकता सिद्धेति वचनस्यान्यत्र सामर्थ्यं नास्तीति भावः। **तैः सवर्णानामिति**। ननु प्रत्याहाराणामादितो ये वर्णा अकारादयस्तेषामाक्षरसमाम्नायिकत्वाभावेनानण्त्वात् सत्यप्युच्चारणे सवर्णग्राहकता न भविष्यत्येवेति चेत्, सत्यम्, तथापि [५]'आदिरन्त्येन सहेता' इति सूत्रे आदीत्पदयोस्तत्सदृशलक्षकत्वं नान्येषामिति मन्यमानस्योक्तिरियमिति ज्ञेयम्। एतेन "अत्र ह्यनुबन्धेन चिह्नेन प्रत्याहारस्थ एव निर्दिष्ट इत्यणत्वमुच्चारणं चास्ति। तत्राकार उच्चारितः [६]'आदिरन्त्येन सहेता' इति मध्यपतितानां स्वरूपस्य च ग्राहकः, अस्माच्च वचनात् सवर्णानामपीत्यर्थः" इति निरस्तम्। [७]"अकः सवर्णे दीर्घः' इत्यादौ निर्दिष्टाकारककारादिव्यक्तेः प्रत्यक्षेणाक्षरसमाम्नायिकाद् भेदे गृह्यमाणे आक्षरसमाम्नायिकत्वानुमानायोगेन छिन्नमूलत्वात्। **एवं तर्हीति**। एवं सतीत्यर्थः। **सवर्ण इति**। सवर्णग्राहकताबोधके प्रकृतसूत्र इत्यर्थः। **अपरिभाष्यमिति**। न कर्तव्यमित्यर्थः। **आकृतिग्रहणादिति**। सर्वत्रेष्टसिद्धेरिति शेषः। **अवर्णाकृतिरुपदिष्टेति**। अक्षरसमाम्नायेऽन्यत्र चेति भावः। **अन्याकृतिरिति**। आकारे उच्चारिते अकार उच्चारित इति वा, अकारे उच्चारिते आकार उच्चारित इति वा कस्याप्यनुभवाभावात्। अनुगताकारानुभवस्यैवाकृत्यैक्ये मुख्यकारणत्वादिति भावः। एतेन 'श्रुतिभेदाद् भेदं मन्यमानस्य प्रश्नः' इति निरस्तम्। श्रुतिभेदेनैव शब्दगतवैजात्यस्य साधनीयत्वात्। **अनन्यत्वाच्चेति**। सत्यपि श्रुतिकृतवैजात्ये एकाकृतियोगोऽस्त्येव, यथा कृशे स्थूले शुक्ले कृष्णे च गोत्वयोग इति मन्यते। वस्तुतस्त्विदमयुक्तम्, कृशस्थूलशुक्लकृष्णेषु 'अयं गौः, अयं गौः' इत्यनुगताकारानुभवबलेन सर्वत्र तत्रैकगोत्वसंबन्धाङ्गीकारेऽपि श्रुतिकृतवैजात्ये विद्यमानेऽनुगताकारानुभवमन्तरेणैकाकृतिकल्पनस्य "ऋकारलृकारयोः

---

[१] पा. सू. १. १. ७१.
[२] पा. सू. ८. २. ४४.
[३] पा. सू. ६. १. १०५.
[४] प्रौढमनोरमा. चौखाम्बामुद्रिता. पुटम् १६.
[५] पा. सू. १. १. ७१.
[६] पा. सू. १. १. ७१.
[७] पा. सू. ६. १. १०१.
[८] का. वा. १. १. ९–६.

सवर्णविधिः' इतिवद् वाचनिकतापत्तेः। **अनेकान्तेनेति**। अनियमेनेत्यर्थः। कदाचिदभेदः कदाचिद् भेदो यत्र प्रतीयते स भेदोऽनियत इति ज्ञेयम्। **तद्यथेति**। 'गौर्गौः' इत्यनुगतप्रतीत्या अभेदः, एतस्या गोव्यक्तेरियं गोव्यक्तिर्भिन्नेति भेदश्च प्रतीयत इत्यनुगताकारानुभवात् स भेद आकृत्यन्यत्वकरो नेति भावः। एवमपि दृष्टान्तो विषम इति स्पष्टमेव। अकाराकारयोरकार इति वा, आकार इति वा अनुगताकारानुभवाभावेन गवाश्वयोरिवैकान्तिकस्यैव भेदस्य सत्त्वात्। ननु वैयाकरणानां तयोरेकाकारानुभवो जायत इति चेन्न, शास्त्रजनितज्ञानवासनावासितान्तःकरणानां तेषां तथा ज्ञाने जायमानेऽपि तस्यानुभवत्वेनाश्रयणानौचित्यात्। अन्यथा [1]'ऋकारलृकारयोः' इति वचनजनितज्ञानवासनावासितान्तःकरणतया ऋकारलृकारयोरप्येकाकारानुभवो जायत इति तदुभयसाधारणाप्येका जातिरभ्युपगन्तुं शक्यत इति तत्सावर्ण्यबोधकवचनस्यापि प्रत्याख्येयत्वापत्तेः। किं च, अकाराकारसाधारणजात्यङ्गीकारेऽपि सर्वत्र न निर्वाहः, [2]'अष्टन आ विभक्तौ' इत्यत्रानुनासिकस्य नकारस्यानुनासिक एवाकारः स्यात्। तथा [3]'त्यदादीनामः' इत्यत्रेदमो मकारस्यानुनासिकः स्यात्। व्यक्तिपक्षे तु गुणानां भेदकत्वादननुनासिकावेव तत्राकाराकारौ भवत इति न दोषः। एतेन [4]"'अष्टन आ विभक्तौ' इत्यत्र तु यत्नाधिक्याद् दीर्घव्यक्तिसमवेतं सामान्यं गृह्यते। यथा 'पूर्ववया ब्राह्मणः प्रत्येयः' इति विशिष्टव्यक्तिस्थं ब्राह्मण्यमाश्रीयते" इति निरस्तम्। पर्यायशब्दानां लाघवगौरवाभावस्य सूत्रकृतैव ज्ञापितत्वेन प्रयत्नाधिक्यकथनस्यानर्थक्यात्। 'ननु च ह्रस्वोच्चारणेऽर्धमात्रिकस्य मात्रिक एव स्यादिति दीर्घोच्चारणमुभयार्थं स्यात्' इति पूर्वस्वग्रन्थविरोधाच्च। अपि चात्राण्ग्रहणे प्रत्याख्याते [5]'ऋत्यकः' [6]'उपसर्गादृति धातौ' इत्यादौ ऋकारेण लृकारग्रहणं न स्यात्। तस्माद् वर्णनिर्देशा व्यक्त्यभिप्रायेणैवाङ्गीकार्याः। प्रकृतसूत्रेऽण्ग्रहणं कर्तव्यमेव। वार्तिककारापादितदोषस्तु प्रागेव परिहृतः। वार्तिककारकृतमण्ग्रहणप्रत्याख्यानमाग्रह[7]मात्रकृतमिति सुधीभिराकलनीयम्। **अपर आहेति**। पूर्ववार्तिके साध्यं न निर्दिष्टम्, 'आकृतिग्रहणात्' इति हेतुमात्रं निर्दिष्टम्। हेतुघटकाकृत्यैक्यसमर्थनाय तु 'अनन्यत्वात् इति हेत्वन्तरं निर्दिष्टम्। अत्र तु 'आकृतिग्रहणात्' इति हेतोरनन्यत्वमेव साध्यमाश्रितम्। आकृतेरैक्यं तु वार्तिकाद्बहिरेव साधितमिति मतयोरीषद्भेदः। एतेन 'व्यक्तिरेव शब्दार्थः। जातिस्त्वशब्दार्थोऽप्यभेदप्रत्ययहेतुरस्तीति सर्वव्यक्तीनामभेदाश्रयणादेकव्यक्तिनिर्देशेऽपि सर्वव्यक्तीनां ग्रहणं सिध्यतीत्यर्थः। अत्र पक्षे आकृतिग्रहणमाकृतेरेकाकारप्रत्ययनिमित्तत्वेन प्रतिपत्तिरुच्यते' इति निरस्तम्। पूर्ववार्तिकं वा व्यक्तिपक्षाश्रयेण प्रवृत्तमिदं वेति विनिगन्तुमशक्यत्वात्। वाच्यकोटावनिविशमानाया जातेरनेकव्यक्तिसंग्राहकत्वेऽकारेकारादिसाधारण्याच्चत्वाश्त्वाल्त्वादिजातिमादायाकार उच्चारिते इकारादीनामपि बोधापत्तेश्च। **अनन्यत्वमिति**। अन्यत्वप्रयुक्तमग्रहणमाकारादीनामन्यत्वशब्देन लक्ष्यते, तदभावोऽनन्यत्वशब्देन बोध्यते। आकृतिग्रहणाद् दीर्घाणामग्रहणं यतो न, ततः सवर्णेऽण्ग्रहणमपरिभाष्यमिति वचनार्थः फलितः। नन्ववर्णाकृतिरन्या आकाराकृतेरिति कथमाकृतिग्रहणादनन्यत्वमित्यत आह — **अनन्याकृतिरिति**। **तद्वच्च हल्ग्रहणेष्विति**। यथा-आकृतिग्रहणादक्षु कार्यं सिध्यति, तथा हल्ष्वपीति भावः। यत्तूक्तम् "व्यक्तिनिर्देशपक्षे त्वेकैव तकारव्यक्तिर्झल्व्यपदेशमासादयेत् पूर्वा परा वेति 'अवात्ताम्' इति लोपो न स्यात्, 'अबुद्ध' इत्यादावेव स्यात्" इति। तन्न, आक्षरसमाम्नायिकझकारादिव्यक्तेर्धातुप्राति-

---

[1] का. वा. १. १. ९–६
[2] पा. सू. ७. २. ८४.
[3] पा. सू. ७. २. १०२.
[4] पा. सू. ७. २. ८४.
[5] पा. सू. ६. १. १२८.
[6] पा. सू. ६. १. ९१.
[7] मात्रमिति — ब .

पदिकादिगतञकारादेर्भेदस्य सत्त्वेन तत्रैकस्य ञल्व्यपदेशस्याङ्गीकारेऽपरस्यानङ्गीकारे च मानाभावात्। व्यक्तिपक्षे निर्वाहस्य प्रागेवास्माभिः कृतत्वाच्च। **यत्रैतन्नास्तीति**। तथा च व्यापकत्वादाकृतिपक्ष एव समीचीन इति मन्यते। व्यक्तिपक्ष एव समीचीन इति तूक्तमेवास्माभिः प्राक्। **अनेकान्तो ह्यनन्यत्वकर इति**। हल्ग्रहणेष्वयं हेतुर्निर्दिष्टः, श्रुतिकृताभेदसत्त्वात्। **उक्तार्थमिति**। व्याख्यातं प्रागिति भावः। आकृतिपक्षस्य समीचीनत्वे हेत्वन्तरमाह — **द्रुतविलम्बितयोरिति**। प्रायेण मध्यमवृत्तिरेव [1]व्यवहारविषये दृष्टेति तत्रैव वर्णा उपदिष्टाः, न तु द्रुतविलम्बितयोरिति भावः। **यदयमिति**। **यत्** यस्मात् **अयम्** आकृतिवादीत्यर्थः। **कृती भवतीति**। कृतकृत्यो भवतीत्यर्थः। तस्मादाकृतिपक्षः समीचीन इति शेषः। **अस्ति प्रयोजनमेतदिति**। यस्यां कस्यांचिद्वृतौ वर्णानामुपदेशे आकृतिग्रहणात् सर्ववृत्तिस्थानां ग्रहणमिति शक्यते वक्तुमिति भावः। काकुस्वरेण सूचितं दूषणं पृच्छति — **किं तर्हीति**। उत्तरमाह — **वृत्तीति**। वृत्तिहेतुकं पृथक्त्वं वर्णानां नोपपद्यत इति भावः। तथा च 'द्रुतविलम्बितयोश्चानुपदेशात्' इति हेतुराकृतिपक्षोत्कर्षश्चाप्रयोजक इति भावः। **तस्मादिति**। यस्माद्वृत्तिपृथक्त्वं नोपपद्यते तस्मादित्यर्थः। **तत्र** एकस्यां वृत्तौ। **सिद्धमिति**। वृत्त्यन्तरेऽपीति शेषः। सूत्रकृता अकृत एव तपरनिर्देशः कर्तव्यत्वेनाभिमतो भगवत इति मन्यमानः कश्चित् पृच्छति — **तस्मादिति**। **कर्तव्य इति**। अपूर्वः किमिति शेषः। **क्रियते न्यास एवेति**। आकृतिपक्षेऽपि तपरकरणमावश्यकमेवेति तत्प्रयुक्तमपि गौरवं व्यक्तिपक्षे नास्ति। यत्तूक्तम् "प्रत्याख्यानपक्षे भाव्यमानेषु यथाश्रुतं रूपमुत्पद्यत इत्याकृतिपक्षेऽपि भिन्नकालानां ग्रहणं न भवति। यथा 'पशुना यजेत' [2]"पशुमालभेत' इत्युत्पत्तिवाक्यत्वात् संख्या विवक्ष्यते। उदात्तादयस्त्वभेदका इत्युक्तम्। अनुवादे तु नान्तरीयकत्वादेकव्यक्त्युच्चारणेऽपि सकलव्यक्तिग्रहणम्। यथा [3]"ग्रहं संमार्ष्टि' इति सर्वेषां ग्रहाणां 'प्राजापत्या नव ग्रहाः' इत्यादिभ्यो वाक्येभ्यो विज्ञातानां संमार्जनम्" इति। तन्न, मीमांसकाभिमतलोकविरुद्धन्यायाभासैर्भगवता भाष्यकृता अस्पृष्टैः शास्त्रव्यवस्थापनायोगात्। ग्रहैकत्वादेरविवक्षायां पश्वेकत्वविवक्षायां हेत्वन्तरस्यैवोक्तत्वाच्च। तस्माद् व्यक्तिपक्ष एव युक्तः॥

"कात्यायनमहाग्राहग्रस्तः पाणिनिदिग्गजः।
भाष्यकारप्रसादेन चक्रेण प्रविमोचितः॥

[१, ५३०–५३४]

(नारायणीयम्) एवं व्यक्तिपक्षे सूत्रारम्भे 'तत्र प्रत्याहारे' इति दूषणमभिधाय दूषणान्तरमप्याकृतिवादी वक्तीत्याह — **व्यक्तीति**। ऐक्यादनणत्वहेतोरसिद्धिमाशङ्क्य 'आन्यभाव्यम्' इत्यत्र भेदः साधित [4]इत्याह — **अवान्तरेति**। वचनादनणो ग्राहकत्वेऽतिप्रसङ्गो विशेषणवैयर्थ्यं चेत्याशङ्क्याह — **अणिति**। यत्रानणत्वं नास्ति स वचनविषय इति न शक्यते वक्तुम्। उच्चारितत्वस्याप्यपेक्षितत्वाद्वचन[5]प्रवृत्ताविति आशङ्क्य सामान्याभिप्रायमेकवचनमित्याह — **अनन्तरेति**। नन्वादिवर्णस्य संज्ञचन्तरबोधकत्वात् सवर्णसंज्ञिबोधनं कथमित्याशङ्क्य साधारणस्य प्रकरणाद्यभावे उचितमनेकप्रत्यायनमित्याह — **तत्रेति**। एवमाकृतिवादिना व्यक्तिवादिनं प्रति दूषणेऽभिहिते 'एवं तर्हि' इति व्यक्तिवादिनः समाधानमिति भाति। तदयुक्तम्, वार्तिकोक्तहेतुसाध्ययोस्तन्मतेऽनुपपत्तेरित्या-

---

[1] व्यवहारविषया दृष्टेति — ब.
[2] शाबरभाष्ये ४. १. ५. विचारितमिदम्।
[3] शाबरभाष्ये ३. १. ७. विचारितमिदम्।
[4] इत्यत्राह — ग.
[5] वचनप्रवृत्तावपेक्षितत्वादित्यन्वयः।

शङ्क्याह — **एवमिति**। व्यक्तिवादिनि मूकीभूते एकग्रन्थतयाकृतिवाद्येवाहेत्यर्थः। 'एवं तर्हि' इत्यस्य च मदुक्तदूषणानुद्धारश्चेदित्यर्थः। यद्वा 'सिद्धिः' इत्यन्तग्रन्थ उक्तानुवादः। 'आकृतिपक्षे' इति पराभिप्रायस्य ग्रन्थबाह्यस्य कीर्तनम्। अत्र 'क्वचित्' इत्यध्याहारः। 'एवं तर्हि' इति भाष्यस्यापि क्वचिदाकृत्याश्रयणं चेदित्यर्थः। शङ्कितेऽप्यर्थे इदमुत्तरमित्याह — **सूत्रमिति**। हेतौ सर्वत्रेति विशेषणं द्रष्टव्यम्। ग्रहिरुच्चारणक्रिय इत्याह — **उपेति**। उच्चारणं च तस्यास्तत्र व्यङ्ग्यत्वात्। जातिरित्यत्र एवकारो द्रष्टव्यः। अनुभवविरोधं परिहरति — **नान्तरीयकमिति**। क्वाकृतिग्रहणम्, अत आह — **प्रत्याहार इति**। अक्षरसमाम्नाय इत्यर्थः। प्रदेशवाक्येष्वेवाकृतिग्रहणेऽकोऽचीत्यादावनुच्चारिताज्जात्यनभिव्यक्तेरक्षरसमाम्नायेऽपि तद्ग्रहणम्। तेन 'अकः' इत्यादिप्रदेशेषु साक्षादेव दीर्घादयोऽपि प्रतीयन्ते। अक्षरसमाम्नायमात्रे चाकृतिग्रहणे [1]'अस्य च्वौ' इत्यादावभिमतासिद्धिः सूत्रानारम्भे। अतस्तत्रापि तद्ग्रहणमित्यर्थः। 'गुणप्रमाणभेदेन जातिभेदो न विद्यते। एकाकारमतिर्मानमेकजात्यन्वये यतः' इत्याह — **अत्वं चेति**। चोद्यमूलं दर्शयति — **श्रुतीति**। युक्तः प्रमाणादिभेदेऽपि सास्नादिमत्त्वस्यानुगतस्य सत्त्वादेकाकृत्यन्वयः। न चेहानुगतव्यञ्जकयोगः। आकारादिध्वनीनां तु जातिव्यञ्जकत्वम्। ते च भिन्ना इति कथमेकाकृतियोग इत्यर्थः। अनुगतव्यञ्जकासत्त्वेनैकजात्यभावे शङ्कितेऽनुगतव्यञ्जक[2]निरूपणमन्तरेण कथमन्यत्वसाधनम्, अत आह — **सत्यपीति**। अनुगतानुभवायत्तत्वादेकाकृत्यन्वयस्य तत्सत्त्वात् तत्सत्त्वमिति भावः। तदाहानेकान्तत्वोपपादनमुखेन — **अभेदस्यापीति**। एकाकृतियोगे च प्रामाणिके व्यञ्जकमेकं किमपि कल्प्यम्, अनादरो वा तत्रेति बोद्धव्यम्। अत्यन्तवैजात्ये एकधर्माश्रयत्वेन गवाश्वादीनामैक्येन चोदनोद्देश्यत्वं नेति शङ्कामपनयति — [3]**तत्रापीति**। 'गामालभेत' इत्यादिचोदनामभिप्रेत्य भाष्यमिति भावः। एवम् 'अस्य' इति चोदनायामिकारादीनां युगपदनुद्देश्यत्वेऽपि 'अचः' इत्यादिचोदनायामुद्देश्यत्वम्। यदि तर्हि ह्रस्वदीर्घादीनामेकाकृतियोगेनैकव्यक्तिनिर्देशे व्यक्त्यन्तरेऽपि कार्यम्, दीर्घनिर्देशेऽपि ह्रस्वप्रसङ्गः, अत आह — **अष्टन इति**। न च यत्नाधिक्यं दीर्घलाभार्थम्, अन्यथान्तरतम्याद्ध्रस्वस्यैव प्रसङ्ग इत्युक्तमिति वाच्यम्, यत्नाधिक्यस्य प्रयोजनान्तररहितस्यैव विशिष्टव्यक्तिप्रतिपत्तौ कारणत्वमिति नियमाभावात्, तद्व्यक्तिप्रापणार्थस्य यत्नस्यापि लोके व्यक्त्यन्तरनिवर्तकत्वदर्शनात्। यथा सजातीयानयनप्रसक्तौ [4]विजातीयानयनचोदनं तत्प्रापणार्थमपि सजातीयानयनं निवर्तयति। 'यथा' इत्ययं तु दृष्टान्तः सति यत्ने विशिष्टप्रतिपत्तिरित्येतावति। न त्वयमप्राप्तिप्रापणयत्नः, 'ब्राह्मणः प्रत्युत्थेयः' इति चोदनायामपि पूर्ववयसोऽपि तत्प्राप्तेः। 'अनन्यत्वम्' इति पाठभेदमात्रेण न मतान्तरम्, अर्थैक्यादित्याशङ्क्यार्थभेदकीर्तनेन मतभेदमुपपादयति — **व्यक्तिरेवेति**। यदि व्यक्तिरेव शब्दार्थः कथं तर्हि 'आकृतिग्रहणात्' इत्युक्तमित्याशङ्क्य तदर्थमाह — **जातिस्त्विति**। 'अनन्यत्वम्' इत्यस्यार्थमाह — **सवति**। अस्त्वेकाकृतियोगाद् व्यक्तीनामनन्यत्वं तद्द्वारकम्, आकृतेस्त्वनिर्देशात् कथमेकव्यक्तिनिर्देशे व्यक्त्यन्तरप्रतिपत्तिः, अत आह — **एकेति**। तज्जातीयोपलक्षणाय व्यक्तिविशेषनिर्देश इति भावः। [5]'अस्यायमर्थ इति प्रागकीर्तनादाह — **अत्रेति**। 'तद्वत्' इत्यस्य 'एवं च' इति व्याख्यानं न पदार्थतया, अपि तु फलिततयेति पदार्थमाह — **यथेति**। आकृतिग्रहणमन्तरेणाण्सु सिद्धावपि हल्षु तद्ग्रहणा-

---

[1] पा. सू. ७. ४. ३२.
[2] निरूपकमन्तरेण — ग.
[3] प्रदीपे 'अत्रापि यदा' इत्यत्र 'तत्रापि यदा' इति पाठः संमत इति भाति।
[4] विजातीयनयन — ग.
[5] अत्र 'तद्वत्' इत्यादि 'फलिततयेति' इत्यन्तो ग्रन्थो वर्तते 'ग' कोशे। अर्थौचित्यमनुसृत्य 'अत्रेति' इत्यस्यानन्तरं स निवेशितः।

देव सिद्धिरित्यावश्यकत्वात् [1]तद्ग्रहणस्य नार्थ एतेनेत्यर्थः। तदेवोपपादयति — **व्यक्तीति**। एकतकारव्यक्तेरनुकरणमाक्षरसमाम्नायिक इति तकारद्वयस्य झल्त्वाभावः। न च वचनाज्झल्सदृशग्रहणमित्याह — [2]**अबुद्धा इति**। आकृतिग्रहणेऽपि कथं सिद्धिः, आकृतिभेदादनयोरित्याशङ्कापरिहारार्थमुक्तानुकीर्तनमित्याह — **धात्विति**। द्रुतादिवृत्त्यभेदकत्वादप्याकृतिग्रहणमावश्यकमित्युक्तम्। तत्कथम्, अनेनापि शास्त्रेण तदभेदोपपत्तेः, अत आह — **हलिति**। आकृतिपक्षे वृत्ति-[3]पृथक्त्वानुपपत्तिरुक्ता। सा नानिष्टा, द्रुतादीनां पृथक्त्वस्येष्टत्वात्, अत आह — **ह्रस्वेति**। आकृतिपक्षे तपरत्वं कर्तव्यमिति गौरव आपादिते तदङ्गीकरणमुत्तरवादिनोऽसंगतमित्यत्राह — **अवश्येति**। अण्ग्रहणस्यापरिभाष्यत्वोक्तिर्नोपलक्षणमित्याह — **उदिति**। **सूत्र इति**। अण्ग्रहणे स्थित इत्यर्थः। व्यक्तिपक्षे तत्स्थितिः। न च प्रत्याहारानादिवर्णानामग्राहकत्वापत्तिः, संनिहितानामनुच्चारितानां ग्राहकत्वात्। न च गुणाप्राधान्यविरोधः, अपेक्षाभेदादविरोधात्। अनुवृत्तिनिर्देशस्थस्याण्त्वमकारादिस्फोटस्यैकत्वात्। कालादिव्यवायस्य ध्वनिधर्मत्वाच्छब्दान्यत्वासाधकत्वात्। [4]अनवतारेऽपि निषेधोऽण्सु चरितार्थ इत्याह — **अण्स्विति**। प्रत्याख्यानेऽण्ग्रहणस्य[5] निषेधस्य निर्विषयत्वं [स्यादिति] उदित्सु स स्यात्। उदित्त्वसामर्थ्याच्च विकल्पः कल्प्यते। न जातिग्रहणात् प्राप्तिरप्रत्यय इति निषिध्यत इति तस्य विषयलाभः, [6]असंनिहितनिषेधानुपपत्तेः, अत आह — **प्रतीति**। तदा निषेधोऽपि न वक्तव्य इति भावः। अण्सु भाव्यमानेषु जातिग्रहणातिप्रसङ्गः कुतो नेत्याह[7] — **भाव्येति**। कालविवक्षायां संख्याविवक्षां दृष्टान्तयति — [**यथेति**]। कालवद् गुणस्यापि विवक्षा स्यात्, अत आह — **उदात्तेति**। लिङ्गादिति भावः। जातिपरनिर्देशेऽपि [8]व्यक्तिधर्मस्य विवक्षा चेत् [9]'अस्य च्वौ' इत्यदावपि विवक्षाप्रसङ्गः, अत आह — **अनुवाद इति**। कालावच्छिन्नव्यक्त्या विना जातेर्निर्देष्टुमशक्यत्वात् तन्निर्देशः, न तु तद्विवक्षा, नान्तरीयकाविवक्षास्तत्र तत्र भाष्ये प्रपञ्चयिष्यमाणत्वात्। विधौ तु विधिज्ञाप्यं सर्वं विवक्ष्यते। न तत्र कस्यापि नान्तरीयकत्वे प्रमाणमस्ति। अनुवादस्य तु निर्ज्ञातविषयत्वान्निर्ज्ञातानतिक्रमेण नान्तरीयकत्वकल्पनम्। कालनान्तरीयकतायां संख्यानान्तरीयकतां दृष्टान्तयति — **यथेति**॥

तपरस्तत्कालस्य. १. १. ७०.

[१, ५३५–५३८]

(**लघुविवरणम्**) केनायुक्त इत्याकाङ्क्षायामाह — **न्यायेनेति**। तर्हि तथा किमिति नोक्तमित्यत्राह — **न्यायेति**। न तर्हि न्यायेनायुक्त इति प्रयोगो भवतीत्यत्राह — **कदाचिदिति**। ननु युज्यर्थे न्यायशब्दार्थस्यान्तर्भूतत्वात् तस्य [10]प्रयोगाभाव इति किं न स्यादित्यत्राह — **धात्वर्थ इति**। भाष्ये 'निर्दिश्यते' इति संबन्धितया विधानाय [11]कालोऽभिधीयत इत्युक्तम्। तत्र हेतु-

---

[1] तद्ग्रहणस्यावश्यकत्वादित्यन्वयः।
[2] प्रदीपे 'अबुद्धेत्यादावेव' इत्यत्र 'अबुद्धा इत्यादावेव' इति पाठोऽभिमतः।
[3] पृथक्त्वादनुप — ग.
[4] उदित्स्वित्यादिः।
[5] अण्ग्रहणस्य प्रत्याख्यान इत्यन्वयः।
[6] संनिहितनिषेधानुप — ग.
[7] इत्यत आहेत्यर्थः।
[8] भक्तिधर्मस्य — ग.
[9] पा. सू. ७. ४. ३२.
[10] प्रयोगाभावादिति — ङ, ढ, ण.
[11] कालो विधीयत इति — ण.

माह — **स काल इति**। इतिकरणेन स्वरूपे व्यवस्थापितं 'तदित्ययम्' इत्यत्र तत्पदं वर्णसमानाधिकरणं चेत् तर्हि तस्य वर्णसमुदायात्मकस्य वर्णत्वमयुक्तम्, अप्रस्तुताभिधानं चेत्याशङ्क्य [1]'वैयधिकरण्यमभिप्रेत्य व्याचष्टे — **तपरेति**। भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थाभिधायित्वं सामानाधिकरण्यं वाचकधर्मः कथमभिधेये व्यपदिश्यत इत्यत्राह — **वर्णवाचिन इति**। सामानाधिकरण्यानुपपत्तिं दर्शयितुं कालस्वरूपमाह — **कालो हीति**। दार्ष्टान्तिकमाह — **एवमिति**। अस्मिंश्च पक्षे वर्णपरामर्शी तच्छब्दः स्वार्थवृत्तिरेव। कालशब्दस्तु परिच्छेदकक्रियावाची, उपचारात् तदाश्रये वर्णे वर्तते। ततश्चायमर्थः — [2]वर्णः परिच्छेदकाश्रयत्वात् परिच्छेदकोऽस्येति। पूर्वस्मात् कल्पाद्विशेषं दर्शयति — **वर्णसहेति**। **ऐजर्थमिति**। त्रिमात्रचतुर्मात्राणां वृद्धिसंज्ञानिवृत्तय इति भावः। 'दीर्घप्लुतप्रतिषेधः' इत्यनुपपन्नम्, अतपरे ह्रस्वे दीर्घादिग्रहणमिष्टमेव। तपरे तु 'तत्कालस्य' इति वचनाद् भिन्नकालग्रहणाप्रसङ्गादित्यत आह — **अत इति**। ननु यत्रानेन सवर्णग्रहणं तत्रापि पूर्वसूत्रेण भिन्नकालानां ग्रहणं चेत् किमर्थमेतत् सूत्रं स्यादित्यत आह — **इदं हीति**। **स्वरूपस्य चेति**। [3]'सकृद्गतौ' इति चाश्रयणात् पूर्वेण ग्रहणाभाव इति भावः॥

[१, ५३५–५३८]

(**विवरणम्**) युजिर्हि संबन्धवाची, संबन्धश्च द्विष्ठ इति तदभावोऽप्युभयनिरूप्य इति [4]संबन्ध्यन्तरापेक्षायामाह — **न्यायेनेति**। **प्रसिद्धत्वादिति**। निष्ठान्तो हि युजिः प्रायेण न्यायसंबन्धिन्येव प्रयुज्यत इत्यर्थः। ननु धात्वर्थान्तर्भूतत्वादप्रयोग इति कस्मान्नोच्यत इत्यत आह — **धात्विति**। भाष्ये **प्रतिनिर्दिश्यत इति**। विशेष्यत इत्यर्थः। विशेष्यत्वं चेह तादात्म्येन, न तटस्थत्वेनेति सूचयन्नाह — **स काल इति**। तदिति भाष्ये न 'अयम्' इत्यनेन [5]समानाधिकरणम्, किं तु तच्छब्देनेत्यर्थे वर्तते, तथा च साकाङ्क्षत्वेऽध्याहरति — **परेति**। वर्णस्यैव [6]परामर्शे हेतुः — **तपरेति**। सवर्णस्येतीह वर्तते। सवर्णसंज्ञा च वर्णस्य वर्णेनेति तपरशब्दो वर्णपर इति भावः। सामानाधिकरण्यस्य भिन्नप्रवृत्तिनिमित्तत्वे सत्येकार्थवृत्तित्वरूपस्योच्चार्यमाणशब्दधर्मत्वात् 'कथं वर्णस्य कालेन' इति भाष्यमित्यत आह — **वर्णेति**। सामानाधिकरण्यानुपपत्तये कालस्वरूपमाह — **कालो हीति**। अपरिच्छिन्नस्य विभोर्व्यवहारानुपयोगित्वात् तत्परिच्छेदाय प्रसिद्धपरिमाणा क्रियोपादेया चेत् सैवास्तु कालः। किमन्तर्गडुना विभुना कालेनेत्यर्थः। **वर्णं इति**। गुणात्मकत्वाद् द्रव्यात्मकत्वाद्वेत्यर्थः। [7]**वर्णान्तरस्य** क्रियायुक्तस्येति शेषः। **वर्ण एवेति**। [8]'आश्रितपरिच्छेदकत्वस्याश्रय उपचाराद् वर्णपरामर्शिनस्तच्छब्दस्य मुख्यवृत्तेरेव कालशब्देन सामानाधिकरण्यमित्यर्थः। पूर्वस्माद्व्याख्यानाद्विशेषमाह — **वर्णेति**। लक्षणाबीजं संबन्धं वक्तुं 'वर्णसहचरित' इत्युक्तम्। उक्तमभिनयेन दर्शयति — **स इति**। क्रियायाः परिच्छेदकत्वं सापेक्षम्, न स्वत इति सदृष्टान्तमाह — **यथेति**। भाष्ये **ततः प्रापकमिति**। यद्यप्यण्[9]ग्रहणनिवृत्तावण-

---

[1] 'वैयधिकरण्यम्' इत्यस्यानन्तरम् 'इति' इत्यधिकम् — ड, ढ.

[2] 'वर्णः' इति नास्ति — ड, ढ.

[3] परिभाषा ४०.

[4] संबन्ध्यन्तरविवक्षायामाह — ञ.

[5] समानाधिकरणः — छ, ञ, ट.

[6] परामर्शने — ञ.

[7] प्रदीपे 'क्रियान्तरस्य परिच्छेदिकेति' इत्यत्र 'वर्णान्तरस्य परिच्छेदकेति' इति विवरणकृत्पाठ इति भाति।

[8] वर्णाश्रितक्रियानिष्ठपरिच्छेदकत्वस्येत्यर्थः॥ स्वाश्रित — ञ.

[9] ग्रहणानिवृत्तौ — ञ.

नण्सु प्रवर्तमानमिदमण्सु नियामकं संभवति, [1]तथापि त्रिदोषभिया विधिसंभवे न नियामकमित्यभिप्रेत्य [2]विधायकत्वमुक्तम्। स्वरग्रहणं गुणोपलक्षणमित्यनुनासिकोऽपि निर्दिष्टः। दीर्घग्रहणे [3]सवर्णग्रहणे को दोष इत्यत आह — **तत्रेति**। **ऐजर्थमिति**। तस्याणत्वात् पूर्वेण प्राप्तौ नियमसंभवादिति भावः। ननु 'तपरस्तत्कालस्य' इत्यस्तौ ह्रस्वग्रहणे का दीर्घप्लुतयोः प्राप्तिरित्यत आह — **पूर्वेति**। अन्यतरप्रवृत्तिप्रतिबन्धलक्षणविरोधाभावेऽपि फलतो विरोधमाह — **यदीति**। प्रतिलक्ष्यं लक्षणमावर्तत इति "अतो भिस ऐस्' इत्येतद्विषयं लक्षणमनवकाशम्। सावकाशानवकाशयोश्च विप्रतिषेधानुपपत्तिरिति चोदयति — **अत इतीति**। सर्वेषु लक्ष्येष्वेकस्यैव लक्षणस्य प्रवृत्त्यास्यापि सावकाशत्वात् तकारोच्चारणस्य चैतत्सहायत्वं संदिग्धमित्यनयोस्तुल्यबलत्वेन विप्रतिषेधोपपत्तिरिति परिहरति — **नैतदिति**। **ऋत इति**। अन्तरङ्गत्वात् [5]"धातोः' इति ऋकारस्योदात्तत्वे स्वरान्तराच्च परत्वात् कुतश्चित्, कुतश्चिच्चान्तरङ्गत्वादुदात्तस्यैवेत्वेन भवितव्यमिति गुणान्तरयुक्तग्रहणार्थं तपरत्वं नोपपद्यत इति मुखमुखार्थंस्तकारस्तत्रेति भावः॥

[१. १३५–१३८]

(**उद्द्योतनम्**) युजेः संबन्धार्थत्वात् तस्योभयनिरूप्यत्वात् तदभावोऽपि तथेति संबन्ध्यन्तरापेक्षायामाह — **न्यायेनेति**। तर्हि 'न्यायेनायुक्तः' इति वक्तव्यम्, अत आह — **न्यायशब्दस्येति**। **प्रसिद्धत्वादिति**। निष्ठान्तो युजिर्न्यायेन [6]संबद्ध एव प्रयुज्यत इत्यर्थः। कदाचित् 'न्यायेनायुक्तम्' [7]इतीष्टप्रयोगोऽपि भवत्येवेत्याह — **कदाचिदिति**। कैश्चिद् धात्वर्थान्तर्भूतत्वात् 'न्यायेन' इति न प्रयुक्तमित्युक्तम्, तदयुक्तम्, 'न्यायेनायुक्तम्' इति प्रयोगाभावप्रसङ्गादित्याशयेनाह — **धात्वर्थ इति**। **प्रयोगेति**। पृथगित्यादिः। **न होति**। प्राणनिरूपितधारणस्यैव धात्वर्थत्वात् 'प्राणान्' इति पृथक् प्रयोगाभाव इत्यर्थः। भाष्ये **कालः प्रतिनिर्दिश्यते** कालो विशेष्यत इत्यर्थः। विशेषणत्वं चाभेदेन, न तु वैयधिकरण्येनेत्याह — **कालेति**। **परामृष्ट इति**। 'तत्कालस्य' इत्यत्रत्यतच्छब्देनायं वर्णः परामृष्ट इति भाष्यार्थः। तच्छब्देन परामृष्टो [8]'यः स वर्ण इति वार्थः। वर्णपरामर्शे हेतुः — **तपरेति**। भिन्नप्रवृत्तिनिमित्तानामेकार्थप्रतिपादकत्वलक्षणसामानाधिकरण्यं शब्दधर्म इति 'वर्णस्य कालेन' इति भाष्यायोगं परिहरति — **वर्णवाचिन इति**। सामानाधिकरण्यासंभवं कालस्वरूपनिर्वचनेनाह — **कालो होति**। **क्रियेति**। महाकालेन व्यवहाराभावात् क्रियातिरिक्तविभुकाले मानाभाव इत्याशयः। **वर्णस्त्विति**। द्रव्यत्वाद् गुणत्वाद्वेत्यर्थः। एवं च 'जन्यमात्रस्य कालोपाधित्वेन कालत्वम्' इति [9]'कल्पनमपि कल्पनमेव, क्रियारूपकालस्योपाध्यनपेक्षत्वादिति भावः। नन्वेकवर्णोत्पत्तिकाले सर्ववर्णोत्पत्तिनियमाभावात् कथं वर्णान्तरस्य [10]'तत्काल-कालत्वम्, अत आह — **यैवेति**। स्थितस्योत्तरपदस्य लोपकल्पने शब्दस्यानित्यत्वम्, अविद्यमानपदस्यार्थ[11]'बोधकल्पने गौरवं चाभिप्रेत्याह — **गम्यमानेति**। लक्षणस्य तन्मुख्यप्रतिपादकत्वेन गम्यमानत्वमाह — **उष्ट्रो मुखमित्यादिना**। दार्ष्टान्तिकेऽप्याह — **एवमिति**। इहापि स कालो

---

[1] तथापि दोषभिया — ञ.
[2] विधायकमुक्तम् — च, छ.
[3] सवर्णग्रहणे — च, छ, ञ.
[4] पा. सू. ७. १. ९.
[5] पा. सू. ६. १. १६२.
[6] संबन्ध एव — अ, म.
[7] इति प्रयोगोऽपि — ऋ.
[8] यो वर्ण इति — म.
[9] कल्पनमतिकल्पनमेव — म.
[10] तत्कालत्वम् — म.
[11] बोधकत्वकल्पने — अ.

यस्येत्येव विग्रह [1]इत्यर्थः। [2]**तदीया क्रिया** उच्चारणक्रिया। **क्रियान्तर** निमेषादिक्रियान्तर। [3]**वर्णान्तर** क्रियायुक्तवर्णान्तर। **वर्ण एवेति**। [4]आश्रित[5]परिच्छेदकत्वस्याश्रय [6]उपचाराद् वर्णवाचकतच्छब्दस्य परिच्छेदककालशब्देन सामानाधिकरण्यं युक्तमित्यर्थः। पूर्वव्याख्यानाद्विशेषमाह — **वर्णेति**। 'वर्णसहचरितायाम्' इति लक्षणाबीजसंबन्धोक्तिः। पूर्वं वर्णस्यैव परिच्छेदकत्वमुक्तम्, इदानीं तत्क्रियाया इति भेदः। तदेव व्यनक्ति — **स इति**। उच्चारणक्रियायाः परिच्छेदकत्वं सापेक्षम्, न तु स्वत इति सदृष्टान्तमाह — **यथेति**। नियतपरिमाणेन ताम्रादिना तुलितमश्मादि यथा परिच्छेदकं तथा निमेषादिक्रियया परिच्छिन्नोच्चारणक्रियापीत्यर्थः। भाष्ये **कालसहचरित इति**। कालशब्देन परिच्छेदिका क्रियोच्यते, वर्णवाची तच्छब्दस्तत्क्रियापर इत्यर्थः। भाष्ये [7]**ततः प्रापकमिति**। यद्यप्यण्ग्रहणनिवृत्तावप्यण्सु प्रवर्तमानमिदं नियामकं संभवति, तथापि विधिनियमसंभवे विधेरेव ज्यायस्त्वाद्विधायकत्वमुक्तम्। वार्तिके स्वरग्रहणमुपलक्षणार्थमिति भाष्ये 'अनुनासिकानाम्' इत्युक्तम्। दीर्घस्य [8]सवर्णग्राहकत्वे [9]को दोषः, अत आह — **तत्रेति**। ननु 'आत्' इति तपरकरण[10]सामर्थ्यादत्र विधायकत्वं स्यात्, अत आह — **तपरेति**। तस्यानेन पूर्वप्राप्तस्य नियमसंभवादिति भावः। ननु 'तपरस्तत्कालस्य' इति विधित्वे ह्रस्वग्रहणे दीर्घप्लुतयोः कथं प्राप्तिः, अत आह — [11]**पूर्वेति**। एतस्य को विषयः, अत आह — **इदमिति**। अन्यतरप्रवृत्ति[12]प्रतिबन्धलक्षणविरोधाभावेऽपि फलतः सोऽस्तीत्याह — **विरोध इति**। ननु प्रतिलक्ष्यं लक्षणभेदात् [13]'अतो भिसः' इत्येतद्विषयलक्षणस्यानवकाशत्वात् सावकाशानवकाशयोर्विप्रतिषेधानुपपत्तिरिति शङ्कते — **अत इति**। सर्वलक्ष्येष्वेकस्यैव लक्षणस्य प्रवृत्त्यास्यापि सावकाशत्वात् तकारोच्चारणस्यैतत्सहायत्वस्य संदिग्धत्वात् [14]तुल्यबलत्वेन विप्रतिषेधोपपत्तिरिति परिहरति — **नैतदिति**। **ऋत इति**। न चात्रापि स्वरभिन्नानां ग्रहणाय तकार इति वाच्यम्, अन्तरङ्गतया [15]'धातोः' इत्युदात्तत्वेनैव भाव्यत्वात्। न च धात्वन्तरे सावकाशस्य धातुस्वरस्य तपरत्वलभ्यस्वरत्रयेण ऋदन्तधातौ बाधोऽस्त्विति वाच्यम्, मुखसुखार्थत्वेनाप्युपयोगसंभवे साक्षाद्विहितधातुस्वरबाधकत्वकल्पनायोगात्॥

[१, ५३५–५३८]

(**रत्नप्रकाशः**) **अयुक्त इति**। युक्तिर्न्यायः, तदाश्रयो नेति भावः। **कालः प्रतिनिर्दिश्यत इति**। स कालो यस्येति समानाधिकरणयोर्बहुव्रीह्याश्रयणादिति भावः। **तदित्ययं च वर्ण इति**। बुद्धिस्थपरामर्शकेन तच्छब्देन परामृष्टुं योग्यस्तु वर्ण इति भावः। **वर्णस्य कालेनेति**। वर्णपरस्य

---

[1] 'इत्यर्थः' इति नास्ति — म.
[2] तदीयक्रिया — अ.
[3] प्रदीपे 'क्रियान्तरस्य परिच्छेदिका' इति पाठः प्रायशो दृश्यते। मद्रपुरीमुद्रिते तु 'वर्णान्तरस्य परिच्छेदिका' इत्युपलभ्यते। निर्विभक्तिकप्रतीकग्रहणात् 'वर्णान्तरपरिच्छेदिका' इत्यन्नंभट्टपाठ इति भाति।
[4] वर्णाश्रितक्रियागतपरिच्छेदकत्वस्येत्यर्थः।
[5] परिच्छेदकत्वाश्रये — अ.
[6] उच्चारणात् — म.
[7] 'ततः' इति नास्ति — म.
[8] सवर्णग्राहकत्वे — अ, ऋ.
[9] 'कः' इति नास्ति — अ.
[10] सामर्थ्यात्तत्र — अ, ऋ.
[11] 'पूर्वेति' इत्यादि 'को विषयोऽत आह' इत्यन्तं नास्ति — अ.
[12] प्रतिबन्धकलक्षण — म.
[13] पा. सू. ७. १. ९.
[14] तुल्यबलत्वे सति प्रतिषेधोपपत्तिरिति — म.
[15] पा. सू. ६. १. १६२.

कालपरेणेत्यर्थः। **तस्य काल इति**। **तस्य** तपरस्य वर्णस्य यः कालस्ततुल्यस्तत्काल इत्यर्थः। एतेन 'यैवैकस्य परिच्छेदिका क्रिया निमेषादिः सैव यस्य परस्य स [1]'तत्कालकालः' इति कैयटो निरस्तः। अष्टाध्यायीस्थतपरकालेऽन्येषामुच्चारणाभावेन तत्कालैक्यासंभवात्। **उष्ट्रमुखमिवेति**। उष्ट्रमुखसदृशे उष्ट्रशब्दस्य लक्षणेति भावः। इदमेव सम्यगिति वक्ष्यति। **अथवेति**। एवं च तच्छब्देन तत्कालसदृशो लक्ष्यत इति युक्त एव तत्कालस्येति निर्देशः। तत्र तत्तुल्यकालता सांप्रदायिकोच्चारणे ज्ञेया। **प्रापकमिति**। विधायकमित्यर्थः। **स्वरभिन्नानामिति**। उदात्तत्वादिस्वरधर्मैर्भिन्नानामित्यर्थः। **ग्रहणं न प्राप्नोति** भेदकत्वादुदात्तादीनामिति भावः। तथा [2]'वृद्धिरादैच्' इत्यत्र आकारेण तत्कालानां सवर्णानामग्रहणे तेषां वृद्धिसंज्ञा न स्यादिति दोष इति मन्यते। [3]**ह्रस्वग्रहणेष्विति**। [4]'अतो भिस ऐस्' इत्यादावकारेण दीर्घप्लुतयोरपि ग्रहणं स्यात्। तपरकरणमुच्चारणार्थं स्यात् [5]'ऋदोरप्' इत्यादाविवेति भावः। **विप्रतिषेधादिति**। विरोधो ह्यत्र वर्तते। पूर्वसूत्रप्रवृत्तावष्टादशानां संज्ञा स्यात्, अस्य प्रवृत्तौ षण्णामिति॥

[१, ५३५–५३८]

(**नारायणीयम्**) केनेत्यपेक्षायामाह — **न्यायेनेति**। करणवाचिपदप्रयोगमन्तरेण तद्विशेषावगतिः कथम्, अत आह — **न्यायेति**। यथा वर्षणे जलकर्म प्रसिद्धमिति तदप्रयोगेऽपि तत्प्रतिपत्तिस्तथा [6]प्रसिद्धन्यायकरणत्वाद्युजेस्तदप्रयोगेऽपि प्रतिपत्तिरिति भावः। न तर्हि तस्य प्रयोगः कदापीत्यत आह — **कदाचित्त्विति**। यथा रुधिराश्मादिव्यवच्छेदाय प्रसिद्धमपि जलकर्म कदाचिदुपादीयते तद्वदिदमपीति भावः। ननु [7]न्यायकरणस्य धात्वर्थान्तर्भावादप्रयोगः किमिति नोपपाद्यते, अत आह — **धात्विति**। कालस्य तच्छब्देन प्रतिनिर्देशो नाम तदर्थविशेष्यत्वमित्याह — **स काल इति**। ननु विशेष्यतां तच्छब्दार्थेन कालः। को विरोधः, अत उक्तम् — **तदित्ययमिति**। तत्र वर्णात्मकत्वमस्ति सर्वस्य शब्दस्येति न तत् कालाविशेषणत्वे कारणमित्यत्राह — **परामृष्ट इति**। तदित्यनेन **अयं** संनिहितः परामृष्टः, स च वर्ण इति भाष्यार्थः। संनिहितस्य वर्णत्वमाह — **तपरेति**। वर्णस्य कालविशेषणत्वमपि न व्यधिकरणतया, किं तु सामानाधिकरण्येन। तच्चायुक्तमित्युक्तम् — **तत्रेति**। तत्र सामानाधिकरण्यस्य शब्दधर्मत्वमाश्रित्याह — **वर्णेति**। अर्थधर्मत्वेऽपि वर्णत्वस्य कालत्वेनेति व्याख्यातव्यत्वादित्यर्थः। व्याख्यातं कालस्वरूपं सामानाधिकरण्यानुपपत्तिमुपपादयितुं निरूपयति — **कालो हीति**। तस्य काल इति वर्णसंबन्धितया कालस्य व्यपदेशः कथम्, क्रियापेक्षत्वात् कालस्येत्याङ्क्य वर्णोच्चारणसंबन्धिनो वर्णसंबन्धितया व्यपदेश इत्याह — **यैवेति**। "सप्तम्युपमानपूर्वपदस्य' इति तत्रोत्तरपदलोपलक्षणं [8]'नेहेत्याशङ्क्य न तत्रापि **वाचनिकलोपः**, अपि तु न्यायतो निवृत्तिः। न्यायश्च सम इत्याह — **गम्येति**। दार्ष्टान्तिके गम्यमानार्थमुपपादयति — **एवमिति**। उच्चारणधर्मः कालत्वं वर्ण उपचर्यत इत्यर्थः। कथमुच्चारणस्य कालत्वम्, निमेषादेरेव तथात्वादित्यत आह — **क्रियान्तरेति**। वर्णान्तरस्य परि-

---

[1] तत्काल इति — ब.
[2] पा. सू. १. १. १.
[3] 'ह्रस्वग्रहणे' इत्येव वार्तिके भाष्ये चोपलभ्यते। बहुवचनान्ततया पाठो रत्नप्रकाशकृत इति भाति।
[4] पा. सू. ७. १. ९.
[5] पा. सू. ३. ३. ५७.
[6] बहुव्रीहिसमासात् त्वप्रत्ययो बोध्यः।
[7] न्यायरूपकरणस्येत्यर्थः। कर्मधारयोऽत्र।
[8] का. वा. २. २. २४–१२.
[9] नेत्याशङ्क्य — ग.

च्छेद्यत्वमपि क्रियाद्वारकं द्रष्टव्यम्। उत्तरपदलोपकीर्तनेनापि लक्षणाया एव संमतत्वात् 'अथवा' इति न पक्षभेद इत्याशङ्क्याह — **वर्णेति**। पूर्वं कालपदं लक्षणया वर्णे वर्तत इत्युक्तम्। इदानीं तु तच्छब्दो वर्णपरामर्शनयोग्योऽपि तदीयक्रियायां वर्तत इत्युच्यते। भाष्याक्षरार्थस्तु — **कालसहचरितो वर्ण इति**। वर्णकालयोः साहचर्यमस्तीत्यर्थः। **वर्णोऽपि काल एवेति**। यः कालः स वर्णपरामर्शयोग्येन साहचर्यात् परामृश्यत इत्युद्देश्यविधेयभावव्यत्यासेन व्याख्येयम्। पक्षद्वयेऽपि तपरवर्णोच्चारणस्य परिच्छेदकमपेक्षितम्। तत्कथम्, तस्य परिच्छेद्यवर्णान्तरक्रिया-कल्पत्वादित्याशङ्क्याह — **यथेति**। निर्ज्ञातपरिमाणत्वं [1]परिच्छेदकत्वे तन्त्रम्। तच्च कस्यचित् स्वतः, कस्यचित् तत्परिच्छिन्नत्वात्। तदिह प्रसिद्धपरिमाणनिमेषादिपरिच्छिन्नत्वात् तपरवर्णोच्चारणस्य वर्णान्तरोच्चारणपरिच्छेदकत्वम्। ज्ञापकमजानतश्चोद्यमित्याह — **भेदका इति**। [2]'विड्वनोः' इत्यादौ सानुनासिकोच्चारणादपीष्टसिद्धेराह — **तत्रेति**। **अनण्सु** तपरत्वमस्मिन् पक्षे किमर्थं स्यादित्याशङ्क्यात्र तावत् [3]तदुपयोगमाह — **तपरेति**। अन्यत्र तूच्चारणार्थमेव। किमतपरह्रस्वग्रहणे दीर्घादिप्रतिषेधश्चोद्यते, उत तपरतद्ग्रहणे। नाद्यः, तत्र तद्ग्रहणस्येष्टत्वात्। नान्त्यः, दीर्घादिग्रहे तपरत्ववैयर्थ्यात् [3]तदग्रहस्य सिद्धत्वादित्याशङ्क्य मुखसुखार्थं तकारं मन्वान आह — **अत इति**। परत्वादनेन ग्रहणं भविष्यतीत्याशङ्क्याह — [4]**इदं त्विति**। फलैक्याद्विरोधाभाव इति भावः। पुनः प्रसङ्गविज्ञानं वा मन्यते। यद्वा, अण्स्वप्यस्य व्यापारे विधिनियमलक्षणव्यापारभेदः स्यादित्यनण्स्वेव व्याप्रियत इति भावः। **परत्वादिति**। न चैतादृशे विषये पुनःप्रसङ्गविज्ञानम्, परबाधापत्तेः। न च व्यापारद्वयम्, नियमानङ्गीकारात्। अर्थादेव केवलं तत्फललाभात्॥

[१, ५३८–५४०]

(**लघुविवरणम्**) 'यद्येवम्' इत्यस्यार्थमाह — **यद्ययमिति**। त्रिभागाधिकत्वं कथमवसीयत इत्यत्राह — **द्रुतमिति**। **वृत्तिष्विति**। व्यञ्जकध्वनिष्वित्यर्थः, **उपलब्धिष्विति** [यावत्]। **वचनं तु** ताल्वोष्ठपुटव्यापारः। अधिकरणत्वानधिकरणत्वाभ्यां वैषम्येऽपि [5]प्रयत्नाजन्यत्वेनोपचयापचयाभावस्य विवक्षितांशस्य भावाद् दृष्टान्तदार्ष्टान्तिकभावोपपत्तिरित्यत आह — **वर्णा इति**। [**तद्भेदे**] प्रयत्नभेदे, **वृत्तिभेदात् उच्चारणभेदात्**। जातिस्फोटे विवक्षिते सूत्रस्य गुणभिन्नग्रहणार्थत्वं न स्यादित्यत आह — **व्यक्तीति**। तथाप्यनित्यत्वे **उच्चारणभेदात्** कालभेदः स्यादित्यत्राह **स चेति**। वायुविशेषो वा ध्वनिराकाशगुणो वा, सर्वथा शब्दगुणत्वं [6]न संभवतीत्यत्राह — **उपकारक इति**। **वृत्ताविति**। ध्वनावित्यर्थः। **भेर्याघातो** नाम भेरीसंयोगविशेषः, तस्य गमनं न संभवतीत्यत्राह — **भेरीमाहन्तीति**। केन धर्मेण स्फोटभेर्याघातयोः साम्यमित्यत्राह — **उपलब्धीति**। भेर्याघातो नादमुपलभते, तथा स्फोटश्रोतापीत्यर्थः। कैयटस्तु तात्पर्यमाह — **यथेति**। भाष्ये 'विंशतिपदानि गच्छति' इत्यत्र 'आघातजनितं शब्दमुपलभमानः' इति शेषः। **वृत्तिषूपलब्धीनामिति**। वर्णोपलब्धीनामित्यर्थः। **विषयस्य** स्फोटस्येत्यर्थः। ननु भेर्याघाते स्फोटो

---

[1] परिच्छेदत्वेन तन्त्रम् — ग.
[2] पा. सू. ६. ४. ४१.
[3] तद्ग्रहस्य — ग.
[4] प्रदीपे 'इदं हि सूत्रम्' इत्यत्र 'इदं तु सूत्रम्' इति पाठोऽभिमतः।
[5] प्रयत्नाजन्यत्वेनोपचयाभावस्य — ण.
[6] न स्यादित्यत्राह — ड, ढ.

नास्तीत्यत्राह — **दार्ष्टान्तिकेति**। तदुभयं केषांचित् स्वभावत [1]इति संबन्धः। उभयमित्येतद्व्याचष्टे — **व्यञ्जन इति**। **व्यक्तानामिति**। व्यक्तवर्णानामित्यर्थः[2]॥

[१, ५३८–५४०]

(विवरणम्) भिन्नकालानिति। पूर्वसूत्रेण प्राप्तान् [3]'सकृद्गतौ विप्रतिषेधे' इति पूर्वसूत्राप्राप्तौ निवर्तयति। अप्राप्तिरेव निवृत्तिरिति भावः। भाष्ये 'यद्येवम्' इत्यनेन 'तपरस्तत्कालस्य' इत्यस्य विषये [4]'पूर्वसूत्रस्याप्रवृत्तावुप'[5]संख्यानमित्युक्तम्। नियमपक्षेऽप्येतत् तुल्यम्। तत्र नियमपक्षे यस्यां वृत्तौ प्रत्याहारे वर्णोपदेशस्तस्यामेव प्रदेशेषु तपरनिर्देशे वृत्त्यन्तरे उपसंख्यानम्। विधिपक्षे प्रत्याहारप्रदेशयोर्वृत्तिभेदेऽपि[6] तदिति विवेकः। वृत्तिषु ध्वनय एव भिन्नकालाः, वर्णास्तत्काला एवेत्यभिसंधेः 'किं पुनः' इति प्रश्नः। वर्णोच्चारणे वर्णातिरिक्त[7]ध्वनिमपश्यतो वर्णा एव भिन्नकाला इत्यभिमानेन 'कालभेदात्' [8]इत्युत्तरम्। **त्रिभागाधिकाः** तृतीयभागाधिका इत्यर्थः। **अवस्थिताः** एकरूपेणेति शेषः। **उपचयापचयौ** वृद्धिह्रासावित्यर्थः। दृष्टान्ते रथादिगन्तृभेदाद् [9]गतिभेदः, दार्ष्टान्तिके [10]त्वेकस्मिन्नपि वक्तरि द्रुतादिवृत्तिषु कालभेदो दृश्यत इति वैषम्यमित्याशङ्क्य गन्तृभेदाभावेऽपि कारणान्तराद् [11]गतिभेदवदिहापि तत एव कालभेदोऽपीति साम्यमित्याह — **यथेति**। **वृत्तिभेदात्** विलक्षणोच्चारणात्। **भिन्नकाला एव** चिराचिरोपलब्ध्युपयोगिवृद्धिह्रासयुक्ता इत्यर्थः। **अत्र** तपरसूत्रे, [12]'अतो भिस ऐस्' इत्यादिप्रदेशे चेत्यर्थः। [13]जातिस्फोटे हि विवक्षिते तस्य ह्रस्वादिष्वप्येकरूपत्वात् [14]तपरसूत्रं प्रदेशे तपरनिर्देशश्चानर्थकः स्यादिति भावः। नन्वर्थप्रतीतिहेतु[15]स्फोटसद्भावे तदभिव्यक्तिहेतौ वर्णे स्फोटव्यवहारः, स एव [16]च स्फोटोऽसिद्ध इत्यत आह — **एतच्चेति**। ननु ध्वनिर्नाम वर्णानुपलब्धावपि दूरस्थस्योपलभ्यमानो वायुविशेषः, आकाशगुणो वा। स कथं वर्णगुण इत्यत आह — **शब्दस्येति**। **व्यञ्जकत्वेन** वर्णोपलब्धिप्रतिबन्धकस्तिमित[17]वाय्वपसारणद्वारा वर्णोपलब्धिहेतुत्वेनेत्यर्थः। न च पुनःपुनरुपलब्धेस्तद्विषयाया नैरन्तर्यादुपलब्धिभेदो भवतीति दृष्टान्तेनोपपादयति — [18]**तत्रेति**। **वृत्तिभेदेऽपि** व्यञ्जकध्वनिभेदेऽपि। **ह्रस्वेति**। तमेवायं विलम्बितमुच्चारितवान्, अन्यो द्रुतमितिवदिह व्यक्तिप्रत्यभिज्ञानाभावादिति भावः। ननु **भेर्याघातो** भेरी[19]दण्डसंयोगविशेषः, स कथं गच्छेदित्यत आह — **भेरीमिति**। कर्मण्यणिति शेषः। भाष्ये **आहत्य** तज्जनितं शब्दमुपलभमान इति शेषः। ननु दृष्टान्ते ध्वनेरुपलभ्यमानस्य भेदः, न तथेह वर्णस्य द्रुतादिष्विति वैषम्यमित्यत

---

[1] इत्यर्थः — ण.
[2] 'इत्यर्थः' इति नास्ति — ण.
[3] परिभाषा ४०.
[4] पूर्वसूत्राप्रवृत्तौ — च, छ.
[5] संख्यानाभिधानमित्युक्तम् — ञ, ट.
[6] व्यक्तिभेदेऽपि — च, छ.
[7] ध्वनिमपश्यता वर्णा एव — च.
[8] इत्युक्तम् — च, छ.
[9] 'गति' इति नास्ति — ञ.
[10] तुशब्दो नास्ति — च.
[11] आकृतिभेदवत् — ञ.
[12] पा. सू. ७. १. ९.
[13] जातिस्फोट इह विवक्षिते — ञ.
[14] तपरसूत्रस्य प्रदेशे तपरनिर्देशस्य चानर्थक्यं स्यादिति — ञ.
[15] स्फोटसंज्ञके तदभिव्यक्ति — ञ.
[16] चकारो नास्ति — ञ.
[17] वाय्वपसरणद्वारा — ट.
[18] 'तद्यथेति' इति प्रतीको युक्तो भाति।
[19] 'दण्ड' इति नास्ति — च, छ, ट.

आह — **उपेति**। ननु भेर्याघातजन्यध्वन्यभिव्यङ्ग्यवर्णरूपस्फोटाभावात् 'स्फोटस्तावानेव' इत्यनुपपन्नमित्यत आह — **दार्ष्टान्तिकेति**। भाष्ये **ध्वनिः स्फोटश्च** स्त इति शेषः। किं तत इत्यत आह — **शब्दानामिति**। स्वरूपेण तदुभयं प्रामाणिकमिति दर्शयन् परस्पराव्यभिचारित्वशङ्कां [1]निवर्तयति — **केषांचिदिति**। व्यक्तवाचामुभयम्, अव्यक्तवाचां ध्वनिरेवेत्यर्थः॥

[१, ५३८–५४०]

(**उद्द्योतनम्**) ननु प्रापकस्य निवर्तकत्वाभावात् पूर्वसूत्रेण प्लुतादिग्रहण[2]संभवात् 'यदि' इत्ययुक्तम्, अत आह — **यदीति**। [3]'सकृद्गतौ' इति न्यायेन पूर्वसूत्रप्राप्तान् निवर्तयति, अप्राप्तिरेव निवृत्तिरिति भावः। [4]"नियमपक्षेऽप्येतत् [5]तुल्यम्। तस्मिन् पक्षे यस्यां वृत्तौ प्रत्याहारे वर्णोपदेशस्तस्यामेव प्रदेशे तपरकरणे वृत्त्यन्तर उपसंख्यानम्, विधिपक्षे प्रत्याहारप्रदेशयोर्वृत्तिभेदेऽपीति[6] विशेषः' इत्याहुः। भाष्ये वृत्तिषु ध्वनय एव भिद्यन्ते, वर्णास्तत्काला एवेति 'किं पुनः' इति प्रश्नः। वर्णव्यतिरिक्तध्वन्यभावाद्वर्णा एव भिन्नकाला इत्यभिमानिनः 'कालभेदात्' इत्युत्तरम्। **त्रिभागाधिकाः** तृतीयभागाधिकाः, तदुपपादयति — **द्रुतमिति**। [7]**नाडिकायां** वर्णोत्पत्तिहेतुवायु[8]पूरितायाम्। [9]**पलानि** सूक्ष्मबिन्दवः। आगमगम्योऽयमर्थः। वार्तिके **अवस्थिताः** एकरूपेणेत्यादिः। **उपचयापचयौ** वृद्धिह्रासौ, उच्चारणकृतौ न वास्तवाविति यावत्। दृष्टान्ते रथादिगन्तृभेदाद् [10]गतेर्भेदः, दार्ष्टान्तिके पदैक्येऽपि वृत्तिषु कालभेद इति वैषम्यमाशङ्क्य गन्त्रैक्येऽपि कारणान्तराद् गतिभेदवदिहापि [11]तत एव कालभेद इति साम्यमित्याह — **यथेति**। **तद्भेदे** प्रयत्नभेदे। **वृत्तिभेदात्** उच्चारणभेदात्। **भिन्नकालाः** चिराचिरबुद्ध्युपयोगिवृद्धिह्रासयुक्ताः। **व्यक्तिस्फोट इति**। अकारादिव्यक्तीनामर्थप्रतीतिजनक[12]स्फोटाभिव्यञ्जकत्वात् स्फोटत्वमिति भावः। **अत्र** तपरसूत्रे [13]'अतो भिस ऐस्' इत्यादौ चेत्यर्थः। जातिस्फोटविवक्षायां तस्य ह्रस्वादिष्वेकत्वेन तपरसूत्रं प्रदेशेषु तपरकरणं च व्यर्थं स्यादिति भावः। वर्णस्य स्फोटशब्देनाभिधानं ध्वनिव्यावृत्तये। **नित्य इति**। तथा च [14]"ध्वनिरूपोपाधिकृत एव तत्रोपचयापचयप्रत्यय इति भावः। नन्वर्थप्रत्ययहेतुस्फोटसद्भावे तदभिव्यञ्जकवर्णे स्फोटव्यवहारः, स एव कुतः, अत आह — [15]"**एतच्चेति**। अर्थप्रतीतिहेतुस्फोटसत्त्वमित्यर्थः। ननु ध्वनिर्नाम वर्णानुपलब्धावप्युपलभ्यमानो वायुधर्मः, आकाशगुणो वा, स कथं वर्णगुणः, अत आह — **शब्दस्येति**। [16]'वर्णोपलब्धिप्रतिबन्धकस्तमित[17]वाय्वपसरणद्वारा वर्णोपलब्धिहेतुत्वं व्यञ्जकत्वम्' इति केचित्। अन्वयव्यतिरेकाभ्यां वर्णो-

---

[1] निवर्तयितुम् — **केषांचिदिति** — ञ.
[2] संभवाद्यदित्ययुक्तम् — अ; संभवादित्ययुक्तम् — म; संभवादिदमयुक्तम् — ऋ.
[3] परिभाषा ४०.
[4] विवरणोक्तमिदम्।
[5] तुल्यम्। यस्मिन् पक्षेऽप्येतत्तुल्यम्, यस्मिन् पक्षे यस्यां — म.
[6] इतिशब्दो नास्ति — ऋ.
[7] 'नाडिकायाम्' इत्येव 'अ, म, ऋ.' कोशेषु दृश्यते। 'नाडिकायाः' इति युक्तम्।
[8] 'पूरितायाः' इति युक्तम्।
[9] फलानि — अ, ऋ.
[10] गतिभेदः — म.
[11] 'तत एव' इति नास्ति — ऋ.
[12] स्फोटव्यञ्जकत्वात् — म.
[13] पा. सू. ७. १. ९.
[14] ध्वनिरौपाधिक एव — अ; ध्वन्युपाधिक एव — ऋ.
[15] तच्चेति — अ.
[16] विवरणमतमाह — वर्णोपलब्धीत्यादिना।
[17] वाय्वपसंचरणद्वारा — अ.

पलब्धौ साक्षादेव हेतुत्वं व्यञ्जकत्वम्, मध्ये प्रतिबन्धकतदपगमयोः कल्पने मानाभावादित्यन्ये। [1]अकारप्रतीतिभेदेऽपि न तद्विषयभेद इति सदृष्टान्तमाह — [2]**तत्रेति**। **वृत्तिभेदेऽपि** व्यञ्जकध्वनिभेदेऽपि। **ह्रस्वेति**। तमेवायं विलम्बितमुच्चारितवान्, अन्यो द्रुतमुच्चारितवानितिवदत्र व्यक्तिप्रत्यभिज्ञानाभावादिति भावः। ननु **भेर्याघातो** भेरीसंयोगविशेषः, स कथं गच्छेत्, अत आह — **भेरीमिति**। कर्मण्यण्। दण्डादिना भेरीताडनेन ध्वनिमुत्पादयन् पुरुषो **भेर्याघातोऽत्र** विवक्षित इति यावत्। भाष्ये **भेरीमाहत्य** ताडयित्वा। भाष्ये [3]कश्चित्तुष्टयस्यापि तं शब्दमुपलभमानः पुरुष इत्याशयः। ननु दृष्टान्त उपलभ्यमानस्य ध्वनेरेव भेदः, वर्णे तूपलब्धिभेद एव नोपलभ्यमानभेद इति दृष्टान्तवैषम्यम्, अत आह — **उपलब्धीति**। **सामान्ये** साम्ये। तदेवाह — **यथेति**। ननु भेर्याघातजन्यध्वनिव्यङ्ग्यवर्णरूप[4]स्फोटाभावेन 'स्फोटस्तावानेव' इत्ययुक्तम्, अत आह — **दार्ष्टान्तिकेति**। भाष्ये **वृत्तिः** द्रुतादिः। भाष्ये **ध्वनिः स्फोटश्च** स्त इति शेषः। 'शब्दानाम्' इत्यस्य पूर्वान्वयभ्रमव्युदासायोत्तरान्वयं वदन् व्याचष्टे — **शब्दानामिति**। 'केषांचित्' इति वक्तृपरमभिप्रेत्याह — **व्यक्तानामिति**। व्यक्तवाचामित्यर्थः। **अव्यक्तानाम्** अव्यक्तवाचाम्। भाष्ये 'महांश्च' इत्यन्तेन [5]'ध्वनिकृता वृत्तिः' इत्युक्तम्। लक्ष्यत इत्यनुषङ्गेण 'केषांचिदुभयं लक्ष्यते' इत्युक्तम्। तस्योभयं प्रामाणिकमिति 'तत्स्वभावतः' इत्यनेनोक्तम्। प्रदीपे त्वेतदेव विवृतमिति मन्तव्यम्॥

[१, ५३८–५४०]

(**रत्नप्रकाशः**) **यद्येवमिति**। उभयथा तपरकरणस्यातत्कालव्यावर्तकत्वादिति भावः। **कालभेदादिति**। यद्यपि पूर्वसूत्र एवोक्तम् 'वृत्तिपृथक्त्वं नोपपद्यते' इति, तथापि तत्रैव किंचिदधिकं वक्तव्यमिति पुनरुत्थापितो विचारः। **त्रिभागाधिका इति**। [6]तृतीयभागेन कालेनाधिका इत्यर्थः। **अवस्थिता वर्णा इति**। सर्वासु वृत्तिषु तुल्यकाला एव वर्णव्यक्तय इति भावः। **विषम इति**। प्रयत्नेन निर्वर्त्यत्वानिर्वर्त्यत्वकृतं वैषम्यमभिमतम्। **स्फोटः शब्द इति**। शरीरवायुदण्डाद्यभिहतकण्ठभेर्यादिभिः स्फुट्यतेऽभिव्यज्यत इति स्फोटो ध्वनिविशेषः स शब्दस्तात्पर्यविषयतया यत्नजन्यः। **ध्वनिरिति**। स्फोटाभिव्यक्त्यनन्तरं जायमानोऽनुरणनात्मको ध्वनिविशेषः, स स्फोटो न भवति, तात्पर्याविषयत्वादिति सामान्यतो ध्वनिरित्येवाभिहितः। **शब्दगुण इति**। शब्दस्य स्फोटस्यानुनिष्पादित्वेन गुण इत्युपचर्यते। **भेर्याघातवदिति**। भेर्याघातः, बाहुलकात् कर्तरि घञ्। स हि कश्चिद् भेरीमाहत्य संताडय भेरीशब्दं शृण्वन् विंशतिपदानि गच्छति, कश्चित् ततो बलवान् तां संताडय तच्छब्दं शृण्वन् त्रिंशत्पदानि, ततोऽपि बलवान् कश्चित् चत्वारिंशत्। तथा च कश्चिद् भेरीशब्दोऽल्पकालः कश्चित् ततोऽधिककालः, कश्चित् ततोऽप्यधिककालः। तत्र यथा भेरीशब्दस्तात्पर्यविषयो दण्डाघातसमनन्तरं निष्पन्नस्तावानेव, तदनुनिष्पादिध्वनिकृतावेव वृद्धि-

---

[1] एकाकारप्रतीति — अ, ऋ.

[2] 'तत्रेति' इत्येव प्रतीकः 'अ, म, ऋ' कोशेषूपलभ्यते। 'तद्यथेति' इति युक्तं भाति।

[3] यद्यपि भाष्येऽत्र कश्चिच्छब्दत्रयमेवोपलभ्यते, तथाप्यन्नंभट्टेनैवं कथनात् पूर्वभाष्यवदत्रापि कश्चिच्छब्दचतुष्टयेन स्थितेन भाव्यमिति भाति। ततश्च भाष्यपाठ एवं स्यात् — कश्चिद्दश पदानि गच्छति, कश्चिद् विंशतिपदानि, इत्यादि।

[4] स्फोटाभावे स्फोटः — अ, ऋ.

[5] भाष्ये 'ध्वनिकृता वृद्धिः' इत्यस्य स्थाने 'ध्वनिकृता वृत्तिः' इति मद्रपुरीमुद्रिते दृश्यते।

[6] तृतीयभागोनकालेन — ब.

ह्रासौ, तथा वर्णस्थलेऽप्यनुनिष्पादिध्वनिकृतावेव वृद्धिह्रासौ न तात्पर्यविषययत्ननिष्पन्नवर्णकृताविति भावः। **ध्वनिः स्फोटश्चेति**। केषांचिच्छब्दानां ध्वनिस्फोटभेदेन द्वैविध्यं स्वभावसिद्धम्। तत्र प्रथमो भागः 'स्फोटः' इत्युच्यते। अनन्तरस्तु ध्वनिरिति। स एव ध्वनिरल्पत्वेन महत्त्वेन च **लक्ष्यते** लोकैर्गृह्यत इत्यर्थः। एतेन 'ध्वनिर्व्यञ्जकः, शब्दो व्यङ्ग्यः' इति वदन्तः कैयटप्रभृतयो निरस्ताः। दण्डवाद्याद्यभिघातस्यैव स्फोटाभिव्यञ्जकत्वेन सर्वलोकप्रसिद्धमपहाय स्फोटानुनिष्पादि-ध्वनेर्व्यञ्जकत्वस्य स्फोटस्य व्यङ्ग्यत्वस्य चान्धपरम्परायातस्यानुसरणायोगात्॥

[१, ५३८–५४०]

(**नारायणीयम्**) विधिपक्षानन्तरं 'यद्येवम्' इत्युत्थानान्नियमे नायं दोष इति न मन्तव्यम्, सुतरां तत्रास्य दोषस्य प्रसङ्गात्। किं तु विधिपक्षेऽपि प्रतिषेधाद् यदि नियमफललाभस्तदायं दोष इत्युच्यत इत्याह — **यदीति**। [त्रि]भागाधिक्यं विशदयति — **द्रुतमिति**। अवस्थितत्व-मेकरूपत्वमित्याह — **सर्वास्विति**। रथादिकरणभेदवदिह तदभेदाद्वर्णभेद [1]एव नेत्याशङ्क्य दृष्टान्तदार्ष्टान्तिकयोरनुगतं भेदहेतुमाह — **आलस्येति**। [2]अप्रयोजकमिदं वैषम्यमधिकरणत्वं कर्मत्वं चेत्याशङ्क्य प्रयोजकतामाह — **वर्णा इति**। क्रियोत्पाद्यत्वानुत्पाद्यत्वाभ्यां वर्णध्वनोर्वैलक्षण्ये शङ्कते स्फोटशब्दत्वोपन्यासः क्वोपयुज्यत [3]इत्याह — **व्यक्तीति**। जातिस्फोटपक्षे व्यक्ती-नामनित्यत्वात् क्रियोत्पाद्यत्वमिति वैषम्यं प्रागुक्तं न निवार्येत। उक्तं हि सवर्णसंज्ञायाम्[4] 'असन-मत्र जातिस्फोटपक्षे उत्पत्तिः' इति, [5]'अइउण्' इत्यत्र च [6]'तस्माद् भिन्ना एवानित्या अकाराः' इति च। ह्यर्थे चशब्दः, स यतो नित्य इत्यर्थः। स्फोटसत्त्वे मानं किमित्याशङ्क्याह — **एतच्चेति**। गुणशब्दस्य बह्वर्थत्वादिहोपपन्नमर्थमाह — **उपकारक इति**। नित्यस्य तदायत्त उपकारः क इत्य-त्राह — **व्यञ्जकत्वेनेति**। ननु मास्तु क्रियोत्पाद्यत्वमकारादेः, वृत्तिभेदात्तु स्फोट एव भिन्नः कुतो न स्यादित्याशङ्क्योपलब्धिकालभेदेनोपलभ्य[7] इत्याह — **'तद्यथेति**। अनेनैव न्यायेन ह्रस्व-दीर्घप्लुतेष्वपि न कालभेदः स्यादिति 'खट्वाभिः' [8]इत्यैस्प्रसङ्ग इत्याह — **ह्रस्वेति**। यथा भिन्न-प्रमाणघटव्यक्त्योर्नोपलब्धिकृतो भेदः, अपि तु स्वतः, एवमत्रापीत्यर्थः। **भिन्नैरिति**। यथा द्रुता-दिवृत्तावेक एव ध्वनिः प्रयत्नभेदात् कालभेदे परिस्फुरति, न तथात्रेत्यर्थः। विंशतिपदगमनादेः पुरुषधर्मत्वात् तत्परत्वमस्याह — **भेरीमिति**। अर्थाविगत्यनुपपत्तिकल्प्यस्फोटस्य भेरीशब्देऽभावात् कथं दृष्टान्तः, अत आह — **उपलब्धीति**। **अभेद एवेति**। दृष्टान्ते तु ध्वनिरेव विषय इति तद्भेदोऽप्यस्ति। उपलब्धेः कालभेद इत्येतावत्येव दृष्टान्तः। उक्तं हि 'उपलब्धिसामान्यात्'[10] इति। यद्येतावति दृष्टान्तः, कथं 'स्फोटस्तावानेव' इति, तत्राह — **दार्ष्टान्तिकेति**। भेरीशब्दा-दिरव्यक्तवर्णो ध्वनिः, व्यक्तवर्णस्तु स्फोट इत्यनयोर्विविक्तविषयत्वमाशङ्क्याह — **व्यञ्जक इति**। अत्र चास्त्यध्याहारः[11]। अस्तूभयम्, अतः किमित्यत उक्तम् — **शब्दानामिति**। तत्र षष्ठीनिमित्तं संबन्धमाह — **व्यङ्ग्यानामिति**। द्वैविध्ये किं प्रमाणमित्यत उक्तम् — **तदुभयं**

---

[1] एव वर्ण इत्याशङ्क्य — ग.
[2] प्रयोजकमिदं — ग.
[3] इत्यत आहेत्यर्थः।
[4] तुल्यास्यप्रयत्नमिति सूत्रे प्रदीपे इदमुक्तम्।
[5] माहेश्वरसूत्रम् १.
[6] अयं च 'अइउण्' सूत्रस्थप्रदीपग्रन्थः।
[7] भिन्न इत्यादावनुषज्यते।
[8] तत्रेति — ग.
[9] इत्यत्रैस्प्रसङ्ग इत्याशङ्क्याहेत्यर्थः।
[10] अत्रार्थानुवाद इति भाति।
[11] अस्धातोरध्याहार इत्यर्थः।

स्वभावत इति। तत्र स्वभावाख्यप्रमाणाभावान्न तेन प्रमाणेनेत्यर्थोऽवगन्तव्यः। कस्तर्हि तदर्थ [1]इत्याह — **स्वरूपेणेति**। अपेक्षितं पूरयति — **सिद्धाविति**। सिद्धेः प्रमाणायत्तत्वात् तदध्याहारः। **प्रमाणेनेति**। प्रत्यक्षार्थापत्ती तत्र मानमिति भावः। 'केषांचित्' इति न विकल्पप्रदर्शनम्, अपि तु विषयप्रदर्शनमित्याह — [2]**व्यक्तानामिति**॥

आदिरन्त्येन सहेता. १.१.७१.

[१, ५४१–५४२]

(**लघुविवरणम्**) 'असंप्रत्ययः' इत्यस्याविश्वासार्थत्वं निरस्यति — **अप्रतिपत्तिरिति**। **संज्ञयैवति**। [3]संज्ञाप्रत्यायकेनाद्यन्तशब्देनेत्यर्थः। **आक्षिप्त इति**। स्वार्थद्वारेणेत्यर्थः। **संज्ञीत्यादि**। [4]मध्यमलक्षण इत्यर्थः। तदेव विवृणोति — **आद्यन्ताविति**। अथवा, 'असंप्रत्ययः' इति वदन् प्रष्टव्यः — किं संज्ञिमात्रस्यासंप्रत्ययः, उत विशिष्टस्य। नाद्य इत्याह — **संज्ञयैवेति**। न द्वितीय इत्याह — **आद्यन्ताविति**। ननु संज्ञायाः संज्ञिप्रत्यायकत्वेनार्थवत्त्वादगादिप्वकारादिप्रत्ययो न स्यादित्यत आह — **स्वं रूपमिति**। सूत्रस्थसहग्रहणस्य प्रयोजनमाह — **सहेति**। समुदितस्य संज्ञात्वे प्रयोजनमाह — **इतीति**। ननु 'स्वं रूपम्' इत्यस्यानुवृत्तावन्त्यस्यापि संज्ञित्वं स्यादित्यत आह — **स्वं रूपं त्विति**। तत्र हेतुः — **तस्येति**। अप्रथमानिर्दिष्टत्वेन संज्ञित्व[5]प्राप्त्ययोग्यत्वादिति भावः॥

[१, ५४१–५४२]

(**विवरणम्**) 'असंप्रत्ययः' अनाश्वासोऽसंप्रतिपत्तिर्वेत्यत आह — **अप्रतिपत्तिरिति**। व्यक्तं **वा** संज्ञी निर्देष्टव्यः, [6]तदवगमे न्यायो वाश्रयणीय इति प्रतिपादनाय वार्तिके वाशब्दः। किं संज्ञिमात्रस्याप्रतिपत्तिः, तद्विशेषस्य वेति विकल्प्याद्यं प्रत्याह — **संज्ञयेति**। इच्छब्दसहितादिशब्दबोधिताणादिसंज्ञयेत्यर्थः। द्वितीयं प्रत्याह — **आद्यन्तौ चेति**। यद्यप्यादिशब्दः परमात्रमपेक्षते, अन्त्यशब्दश्च पूर्वमात्रम्, तथापि सह प्रयुज्यमानौ मध्यापेक्षाविति भावः। **मध्यमानामेवेति**। 'स्वं रूपम्' इत्यनपेक्षायामिति भावः। तदपेक्षायामादिरपि संज्ञीत्याह — **स्वमिति**। **समुदायादेवेति**। तस्यैव संज्ञिनार्थेनार्थवत्तया प्रातिपदिकत्वादिति भावः। **तस्येति**। प्रधानविभक्त्या प्रथमया निर्देशाभावादिति शेषः। इक [7]इति निर्देशात् ककारस्येक्संज्ञित्वेऽपि [8]न यणिति [9]यण् इति [10]केवल एव यकार इत्युक्तम्॥

---

[1] इत्यत आहेत्यर्थः।
[2] व्यक्तीनामिति — ग.
[3] संज्ञिप्रत्यायकेनाद्यन्त — ड, ढ.
[4] मध्यलक्षण इत्यर्थः — ण.
[5] प्राप्त्ययोग्यत्वादित्यर्थः — ण.
[6] तदवगमन्यायो वा — च.
[7] इति निर्दिष्टानामिक्संज्ञित्वेऽपि — ञ.
[8] 'न यणिति' इति नास्ति — ञ.
[9] यण इति — ञ.
[10] केवलयकारः —च.

[१, ५४१–५४२]

(**उद्द्योतनम्**) **असंप्रत्ययः** अविश्वासः, असंप्रतिपत्तिर्वा। द्वयमपि प्रकृतानुपयुक्तम्, अत आह — **अप्रतिपत्तिरिति**। न्यायसिद्धेऽर्थे वचनं व्यर्थमिति पूर्वसमाधानेऽस्वरससूचनाय वार्तिके वाशब्दः। [१]संज्ञिसामान्यस्य वा अप्रतिपत्तिः; तद्विशेषस्य वा, नाद्य इत्याह — **संज्ञयेति**। संज्ञाधिकारे इता सहित आदिरणादिः संज्ञेति प्रतीतौ संज्ञिमात्रमाक्षेपादेव लभ्यमित्यर्थः। द्वितीयं निराह — **आद्यन्ताविति**। यद्यपि केवल आदिशब्दः परमात्रापेक्षः, अन्त्यशब्दश्च पूर्वमात्रापेक्षः, तथापि मिलितौ मध्यमापेक्षाविति सूचयितुं द्वन्द्वनिर्देशः। एवकारेण संज्ञयन्तरनिरासः। तर्हि स्वस्य संज्ञित्वं कथम्, अत आह — **स्वमिति**। नन्वादेः [२]संज्ञात्वेन तत एव विभक्त्युत्पत्तिप्रसङ्गः, अत आह — **सहेति**। ननु 'स्वम्' इत्यनुवृत्त्येतोऽपि संज्ञित्वं स्यात्, अत आह — **स्वं रूपं त्विति**। **तस्येति**। 'इता सह' [३]इत्यप्राधान्यद्योतकतृतीयानिर्देशादित्यर्थः। अन्त्यस्य [४]संज्ञित्वाभावे प्रयोजनमाह — **दधीति**। 'इकः' इति स्थानिनिर्देशात् ककारस्य संज्ञित्वेऽपि 'दधि' इत्यत्र तदभावेन तस्य यणोऽप्रसङ्गात् 'केवलयकारः' इत्युक्तम्। अन्त्यस्य संज्ञित्वेऽपीत्संज्ञालोपयोरावश्यकत्वात् [५]तत्संज्ञित्वं निष्प्रयोजनमित्यत्र तात्पर्यम्॥

[१, ५४१–५४२]

(**रत्नप्रकाशः**) **असंप्रत्यय इति**। संज्ञासंज्ञिभावस्याभिमतस्येति शेषः। **यं प्रतीति**। मध्यगं प्रतीति भावः। 'अन्त्येन सहित आदिः संज्ञा' इत्युक्ते हि मध्यगानामिति गम्यते। लोकेऽपि हि 'आद्यन्तौ विहायानय' इत्युक्ते क्रमनिविष्टानां यो मध्यगः स एवानीयते। अत्रादिरेव संज्ञा, अन्त्यानुबन्धस्तु संज्ञिविशेषसमर्पकत्वेन तस्योपकरोतीति आदेरवयव इव भवति। यथा नुम्नुडाद्यागमानामनुबन्धा अवयवसदृशत्वेन विलक्षणं प्रातिपदिकस्वरूपं संपादयति। एवं चानुबन्धानां [६]वाचकघटकत्वाभावेऽप्यारोपितावयवत्वमात्रेण तद्घटितसमुदायादेव स्वाद्युत्पत्तिर्भवति। एतेन "आद्यन्तौ समुदितौ संज्ञेति [७]'इको यणचि' इति समुदायादेव विभक्त्युत्पत्तिर्नादिमात्रात्। 'स्वं रूपं त्वादेरेव गृह्यते नान्त्यस्य, तस्याप्राधान्यादिति 'दध्यत्र' इति केवल एव यकार आदेशः प्रवर्तते न णकारसहितः" इति निरस्तम्। 'अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात्' इत्युक्ते स्वशब्देन परामृष्टस्यैव संज्ञात्वावगमेनान्त्यस्य संज्ञाकोटौ निवेशस्य स्वशब्देनाग्रहणस्य चाश्रयणे मानाभावात्। 'दण्डेन सह गच्छति भिक्षार्थम्' इत्यादौ भिक्षानन्वयिनो दण्डस्येव संज्ञात्वानन्वयिनोऽप्यनुबन्धस्य संज्ञात्वभाक्साहित्यसंभवाच्च। अन्यथा पूर्वसूत्रविषयस्यापि 'अत्, इत्' इत्यादेरेव संज्ञात्वं [८]स्यादित्ययुक्तमेव तत् स्यात्, तस्या एव सवर्णानामप्रसिद्धेः॥

---

[१] संज्ञासामान्यस्य — अ.
[२] संज्ञासत्त्वेन — म.
[३] इत्यप्रधानद्योतक — अ.
[४] संज्ञित्वाभावप्रयोजनमाह — अ.
[५] 'तत्' इति नास्ति — म.
[६] वाचकताघटकत्वाभावेऽपि — ब.
[७] पा. सू. ६. १. ७७.
[८] स्वरूपं — ब.
[९] स्यादित्युक्तमेव — ब.

[१, ५४१–५४२]

(**नारायणीयम्**) समुपसर्गो न धात्वर्थातिरिक्तार्थवानित्याह — **अप्रतिपत्तिरिति**। समोऽस्यातिरिक्तार्थत्वे समीचीनप्रत्ययनिषेधात् प्रतीतिमात्रमङ्गीकृतं स्यात्। ननु सामान्यतः प्रतिपत्तौ विशेषजिज्ञासायां संबन्धिशब्दत्वमुपयुज्यते, अत आह — **संज्ञयेति**। आक्षिप्तसंज्ञिसामान्यस्य विशेषेऽवस्थितिराक्षेपकसंबन्धिशब्दत्वायत्तेति भावः। [1]आद्यन्तयोः परस्परसंबन्धित्वमिति भ्रमं वारयति — **आदीति**। 'स्वस्य च' इति कथं लब्धं भाष्ये, अत आह — **स्वमिति**। नन्वाद्यन्तसमुदायस्य संज्ञात्वे मध्याक्षेपः। आदिमात्रं त्वन्त्यसंनिधिमत्संज्ञेति तया न मध्यमाक्षेपः। तथाहि — आदिशब्दो यद्यवयववाची, यस्मिन् [2]समुदायेऽयमवयवस्तस्यान्त्यसहितस्याक्षेपकः स्यात्। [3]समीपवाचित्वे यदपेक्षमस्यादित्वं तस्यैव [4]परसमीपस्याक्षेपकः स्यादिति, तत्राह — **सहेति**। [5]तृतीयया सहार्थाक्षेपे सहग्रहणं समुदितस्य संज्ञात्वसिद्ध्यर्थं। यथा [6]'सह सुपा' इति समुदितसंज्ञित्वाय तत्। इदं चात्र प्रमाणमित्याह — **इक इति**। ननु यदि समुदायः संज्ञा तदा तत्परामर्शिसर्वनाम्ना समुदितपरामर्शः स्यात्, अत आह — **स्वं रूपं त्विति**। **नान्त्यस्येति**। नान्त्यविशिष्टस्येत्यर्थः। सर्वनाम्नः प्रकृतप्रधानपरामर्शित्वम्। समुदितसंज्ञात्वेऽपि तृतीयाद्योत्यमप्राधान्यं तस्यानपेतमेव। विशिष्टापरामर्शे गुणमाह — **दधीति**। यदि विशिष्टपरामर्शस्तदा यणिति संज्ञास्वरूपावबोधनकाले इण्समुदायं बोधयेत्, मध्यबोधनकाले तु तन्मात्रमेवेति न तत्र दोषोऽस्ति॥

येन विधिस्तदन्तस्य . १. १. ७२.

[१, ५४२–५४६]

(**लघुविवरणम्**) ननु यच्छब्दार्थः संज्ञा तदन्तस्य, यच्छब्दनिर्दिष्टावयवकस्य समुदायस्य तत् कथमिति चेत्, उच्यते। तच्छब्दस्यान्तशब्देन बहुव्रीहिः, न तु तत्पुरुषः। तत्पुरुषे किमियं संज्ञा समासप्रत्ययविध्यर्था, आहोस्विदादेशागमविधिशेषः। नाद्यः, तत्र तदन्तविधिप्रतिषेधात्। यत्रापि क्वचिदुगिद्वर्णविधौ तदन्तविधिरिष्टस्तत्रापि वर्णविधावसंभवः। उगिद्विधौ तु नैष्फल्यम्। नापि द्वितीयः, आदेशविधौ क्वचिदनुवाददोषप्रसङ्गात्। अलोऽन्त्यपरिभाषयैवान्त्यस्य सिद्धत्वात्। आगमविधावपि क्वचित् तुगादिविधावसंभवः। इड्विधौ तु [7]'णेरनिटि' इति प्रतिषेधाल्लिङ्गात् तदन्तविधिर्नोपतिष्ठते। संभवति चार्थवत्त्वं बहुव्रीहिपक्षेऽस्य सूत्रस्य। तस्माद्बहुव्रीहिरेव। तथा च विशेषणं स्वान्तस्य विशेष्यस्य संज्ञा। न च [8]"इको यणचि' इत्यादौ विशेष्यमस्ति, येन तदन्तविधिः स्यादित्यत आह — **शब्देति**। **अजादिरिति**। 'यस्मिन् विधिः' इत्यनेनेति भावः। **तत्रापवादेति**। क्वावपि वेरपृक्तलोपात् प्राग् वलि लोपप्रसङ्गोऽस्तीति भावः। **लघ्वीमिति**।

---

[1] आद्ययोः — ग.
[2] समवाये — ग.
[3] आदिशब्दस्येत्यादिः।
[4] परसमीपस्याक्षेपः स्यादिति — ग.
[5] वृद्धो यूनेतिवदिति भावः।
[6] पा. सू. २. १. ४.
[7] पा. सू. ६. ४. ५१.
[8] पा. सू. ६. १. ७७.

[1]इग्लक्षणामित्यपि द्रष्टव्यम्। **गुणश्चेति**। [2]'पुगन्तलघूपधस्य च' इत्यनेन। अन्तरङ्गलक्षणत्वे यणादेशस्य न बाध्यत्वमित्यत आह — **असतीति**। **अलोऽन्त्यस्येत्यत्रेति**। न च तदन्तविध्युस्थितौ तस्य वैयर्थ्यं शङ्कनीयम्, तस्य षष्ठीनिर्दिष्टादेशनियमनिवृत्त्यर्थत्वात्। [3]**विशेष्यासंनिधानादिति**। [4]विधिविशेषणं तदन्तस्येति वक्तव्ये 'येन विधिस्तदन्तस्य' इत्युपादानसामर्थ्यात् महाप्रकरणमनपेक्ष्यावान्तरप्रकरणाद्यपेक्षया यत्र विशेष्यमवगम्यते तत्र विशेषणान्तस्य तस्य तस्य सा संज्ञेति शब्दरूपं महाप्रकरणेन विशेष्यतयोपस्थितमपि नाश्रीयत इति भावः। ननु सेनाङ्गत्वात् 'हस्त्यश्वरथपदातिना' इति भवितव्यमित्यत्राह — **बह्विति**। बहुत्वयुक्तवर्तिपदार्थकारणकत्वाभावादिति भावः। तदन्तस्य संज्ञिनः प्राप्तौ हेतुमाह — **संज्ञा हीति**॥

[१, ५४२–५४६]

(**विवरणम्**) ननु येनेति करणे तृतीया न कर्तरि, [5]'कर्तृकर्मणोः' इति षष्ठीप्राप्तेः। विधिशब्देन च कर्मसाधनेन कार्यमभिधीयते। भावसाधने हि विधिशब्दे कर्मणोऽनुपादानेन साकाङ्क्षत्वापत्तेः। करणजन्यं च कार्यं करणादन्यस्येति मानान्तरतः [6]सिद्धेस्तदबाधाय[7] तदन्तस्येति बहुव्रीहिः। तथा च विशेषणविशेष्यकार्यत्रितयसंनिधौ विशेषणं स्वान्तावयवकस्य विशेष्यस्य [8]संज्ञेति स्थिते [9]'इको यणचि' इत्यादौ [10]विशेष्यस्याभावात् कथमस्याति[11]व्याप्तिचोद्यमित्यत आह — **शब्देति**। शब्दस्यानुशास्यत्वेनार्थतः प्राधान्यात् शब्दानुशासनशब्दः शब्दलक्षणविशेष्यस्य समर्पकः संभवतीति 'शब्दरूपम्' इत्युक्तम्। ननु [12]'अनेकाल्' इत्यत्रापि षष्ठीत्यनुवृत्तेः षष्ठीनिर्दिष्टस्यैव [13]तस्य सर्वस्यादेश इति कथं तदनिर्दिष्टस्यैजन्तस्य सर्वस्यादेश[14] इत्यत आह — **निर्दिश्येति**। [15]एचा तदन्तविधावयादेः कार्यत्वम्, तेन तदन्तविधौ साधुत्वस्य बोध्यमानतया कार्यत्वम्। तत्र स्थानेऽन्तरतमपरिभाषया श्रुत्यर्थाभ्यां सदृश आदेश इति 'यथा' इति [16]भाष्यविवेकः। **अकारान्तः** अवर्णान्त इत्यर्थः। **अजादिः** 'यस्मिन् विधिस्तदादौ' इत्यनेन 'येन विधिः' इत्येतत्समानविषयेणेत्यर्थः। **षष्ठीति**। [17]'पूर्वपरयोः' इति षष्ठी विद्यमानापि तदन्ततदादिसाधारणेति भावः। **गुणः** [18]'पुगन्त' इत्यनेन। **तत्रेति**। क्वावप्यपृक्तलोपात् पूर्वं वलि लोपप्राप्तेरिति भावः। गुणः पञ्चकाश्रयः, ऊठ् तु चतुष्काश्रय इत्यन्तरङ्गबहिरङ्गविवेकं करोति — **गुणो हीति**। **गुणश्च** इकारस्येति शेषः। **नानाश्रयत्वम्** अचि यणादेशः

---

[1] एतेन प्रदीपे लघुविवरणकृत्पाठे 'इग्लक्षणाम्' इति नास्तीति ज्ञायते। उपलभ्यमानेषु कोशेषु तु 'इग्लक्षणाम्' इति दृश्यते।

[2] पा. सू. ७. ३. ८६.

[3] प्रदीपे 'विशेष्यस्यासंनिधानात्' इत्यत्र 'विशेष्यासंनिधानात्' इति समस्ततया पाठोऽत्राभिमतः।

[4] विधिविशेषणं — ड, ढ.

[5] पा. सू. २. ३. ६५.

[6] सिद्धे — ट.

[7] तदभावाय — ञ.

[8] संज्ञेति सिद्धे — च, छ.

[9] पा. सू. ६. १. ७७.

[10] विशेष्याभावात् — च, छ, ञ.

[11] व्याप्तिश्चोद्यम् — छ, ट.

[12] पा. सू. १. १. ५५.

[13] 'तस्य सर्वस्य' इति नास्ति — च, छ, ट.

[14] 'आदेशः' इति नास्ति — ट.

[15] एवं तदन्त — ञ.

[16] भाष्ये विवेकः — च.

[17] पा. सू. ६. १. ८४.

[18] पा. सू. ७. ३. ८६.

प्रत्यये गुण इति। **अन्तरङ्गत्वाभावात्** ऊनशब्दाश्रयत्वेनेति [1]भावः। व्याहतिं निराकरोति — **असतीति**। सति तस्मिन्नन्तरङ्गत्वाभावादिति भावः। **एवमिति**। सति [2]तदादितदन्तविधित्वे यणा [3]तुल्यनिमित्तो गुण इति न बहिरङ्ग इति भावः। **अलोऽन्त्यस्येति**। वार्तिककारस्य मते 'स्वस्य च रूपस्य' इति नानुवर्तत इति तन्मतेनेदमुक्तम्। यद्वा नियमेनेति शेषः। न च समुदायस्यादेशे वैयर्थ्यम् [4]"अलोऽन्त्यस्य' इत्यस्येत्याह — **तत्रेति**। **कदाचित् थिन्नित्यस्य** कदाचिदिन्नित्यस्येत्यपि द्रष्टव्यम्। नन्वेवमेकालादेशवदनेकालादेशोऽपि सर्वस्य सिद्ध इति किम् [5]"अनेकाल्' इत्यनेनेत्यत आह — **अनेकालिति**। **सर्वस्यैवेति**। षष्ठीनिर्दिष्टस्य सर्वस्यैव यथा स्यात्, तदेकदेशस्य सर्वस्य कदाचिदपि मा भूदिति नियमार्थं स्यादित्यर्थः। प्रकृतं नाम पूर्वनिर्दिष्टमनुवर्तमानं चेत् [6]"ईदूदेद् द्विवचनम्' इत्यादौ तदन्तविधिर्न स्यादित्यत आह — **प्रस्तुत इति**। प्रस्तुतिश्च[7] बुद्धौ संनिधिः। **तदन्तविधिभाजः** तदन्तसंज्ञाभाज इत्यर्थः। किं विशेष्य[8]संनिधिमनपेक्ष्य तदन्तविधावति[9]व्याप्तिचोद्यम्, उत महाप्रकरणात् प्राप्तं तमपेक्ष्य। नाद्य इत्युक्तम् — भाष्ये **येनेत्यादिना**। इह शास्त्रे प्रायशः शब्दस्य करणत्वं कार्यं [10]इत्यतः [11]प्रसिद्धकरणवाचिना 'येन'शब्देन शब्दो विवक्षित इत्यभिप्रेत्य 'स शब्दः' इत्युक्तम्। विशेषणेन करणेन विशेष्यस्य कार्यविधौ तदन्तविधिरिति योजना। अथवा विशेषणेन सह विशेष्यस्याभिधानाय तदन्तविधिः, अन्यपदार्थपरान्तशब्दोच्चारणमित्यर्थः। यद्वा, विशेषणेन सह विशेष्यस्य प्रतिपादनाय विशेषणस्य तदन्तसंज्ञात्वेन विधिरित्यर्थः। **इको यणिति**। तदन्तस्येति बहुव्रीहिः। बहुव्रीहिश्च मत्वर्थे। मत्वर्थश्च 'अस्य, अस्मिन्' इति संबन्धिरूपसर्वनामार्थः। सर्वनाम च प्रसिद्धवाचि। प्रसिद्धिश्च संनिधानात्। संनिधानं पूर्वोक्तत्रिप्रकारसूत्रव्यापाराद् गृह्यते। [12]"इको यणचि' इत्यादौ न सूत्रकारव्यापारात् प्रसिद्धिर्विशेष्यस्येति नात्र तदन्तविधिरिति भावः। सेनाङ्गत्वादेकवद्भावः प्राप्नोतीत्यत आह — **बह्विति**। बह्वर्थवाचिपूर्वोत्तरपद[13]कारणकत्वाभावाद् द्वन्द्वस्येत्यर्थः। **उपाधयः** विशेषणानीत्यर्थः। वार्तिके **तदन्तोपाधिप्रसङ्गः** इति भावप्रधानो निर्देशः। [14]**आत्मा** स्वयमित्यर्थः। यदनारब्धत्वे सति तस्य पञ्चम्यन्तवाच्यं सन्निरूपकं यत् तत् निरूप्यं प्रत्यवधिरित्युच्यते। अवयवी तु तद्विपरीत इति नैकस्य यं प्रत्यवधित्वं तं प्रत्यवयवित्वमिति भावः। न चौष्ठ्यः पूर्वो यस्येति षष्ठ्यर्थे बहुव्रीहिः, तथा च पूर्वशब्दस्य प्रथमावयववाचित्वाद् धात्ववयवत्वमोष्ठ्यस्य लभ्यत इति वाच्यम्, तथा सति 'सुस्मूर्षति' इत्यत्रोत्वाभावप्रसङ्गादिति भावः। भाष्ये 'निपूर्ताः' इत्यत्र [15]"न ध्याख्या' इति निष्ठानत्वप्रतिषेधः। **गुणप्रधानभावानपेक्षाः** अत एव स्वदेश एव विहिता इति शेषः। यत्तूक्तम् — संज्ञा हीति, तत्राह — **तत्रेति**॥

---

[1] शेषः — ट.
[2] तदादिविधितदन्त — ञ.
[3] तुल्यनिमित्त ऊठिति — ञ.
[4] पा. सू. १. १. ५२.
[5] पा. सू. १. १. ५५.
[6] पा. सू. १. १. ११.
[7] चकारो नास्ति — च, छ.
[8] संनिधिमपेक्ष्य — ञ.
[9] व्याप्तिश्चोद्यम् — च, छ.
[10] इत्यर्थतः — च, छ.
[11] प्रसिद्धिवाचिना — ञ.
[12] पा. सू. ६. १. ७७.
[13] कारणत्वाभावात् — छ.
[14] प्रदीपे 'आत्मनो विशेषणसंबन्धम्' इत्यत्र 'आत्मा विशेषणसंबन्धम्' इति पाठ आश्रितोऽत्रेति भाति। उद्द्योते तु 'आत्मनेति पाठे स्वयमित्यर्थः' इत्युक्तम्।
[15] पा. सू. ८. २. ५७.

[१; ५४२–५४६]

(**उद्द्योतनम्**) अत्र 'येन' इति तृतीया करणे, न कर्तरि, [1]'कर्तृकर्मणोः' इति षष्ठीप्रसङ्गात्। विधिशब्दः कर्मसाधनः कार्यपरः, भावसाधनत्वे कर्मानुपादानेन तत्साकाङ्क्षत्वापत्तेः। करणजन्यं च कार्यं [2]करणादन्यस्यैवेति लोकसिद्धेस्तन्निरासाय[3] तदन्तस्येति बहुव्रीहिः। तथा च विशेषणविशेष्य-कार्यत्रयसंनिधौ विशेषणं स्वान्त्यावयवकविशेष्यस्य संज्ञेति [4]सूत्रार्थे स्थिते [5]"इको यणचि' इत्यादौ विशेष्याभावात् कथमस्य प्रवृत्तिः, अत आह — **शब्देति**। **शब्दरूपमिति**। शब्दस्यानुशास्यत्वे-नार्थतः प्राधान्यात् शब्दानुशासनशब्द एव शब्दरूपविशेष्यसंनिधापक इति भावः। [6]**चयनेति**। [7]अनेकाल्त्वेन धातोः सर्वस्यायादेशप्रसङ्गादित्यर्थः। नन्वर्थ[8]प्रतीत्युपयुक्तशब्दानामनुशासनमिदम्, 'अयनम्' इत्युक्ते नयन[9]जयनान्यतरसंदेहात् सर्वादेशो न भविष्यति, अत आह — **प्रकरणेति**। [10]'निर्दिश्यमानस्य' इत्येच एवादेशो भविष्यति, न तदन्तस्येति [11]कुतो नोक्तम्, अत आह — **निर्दिश्यमानस्येति**। भाष्ये [12]**अयाद्यन्त इति**। [13]अर्थतोऽन्तरतम आदेशो भविष्यतीति नातिप्रसङ्ग इति भावः। 'क्वचित्'शब्दार्थमाह — **आदिति**। दोषं विविनक्ति — **अत्रेति**। **अकारान्तः** अवर्णान्तः। **अजादिरिति**। 'येन विधिः' इत्येतत्तुल्येन 'यस्मिन् विधिः' इत्यनेनेत्यर्थः।' [14]**षष्ठीति**। यद्यपि [15]'पूर्वपरयोः' इति षष्ठ्यस्ति, तथापि सा तदादितदन्त[16]साधारणेति भावः। 'स्योनः' इत्यादौ दोषं विवृणोति — **सिवेरिति**। **गुणः** [17]'पुगन्त' इत्यनेन। **वलोपः** [18]'लोपो व्योर्वलि' इत्य-नेन। **ऊठ्** [19]'च्छ्वोः शूठ्' इत्यनेन। ऊठः पूर्वं परत्वाद् गुणे सति रूपसिद्धिमाशङ्क्यान्तरङ्ग-त्वाद् गुणात् पूर्वमूठा भाव्यमित्याह — **गुणस्त्विति**। **बाध्यते** ऊठेत्यनुषङ्गः, [20]ऊठः पूर्वं न प्रवर्तत इति यावत्। पञ्चकाश्रयाद् गुणाच्चतुष्टयाश्रयस्योठोऽन्तरङ्गत्वमित्याह — **गुणो हीति**। एवं गुणात् पूर्वमूठि सति यणा लघूपधगुणो बाध्यत इत्याह — **तत्रेति**। इकार इत्यर्थः। **नानेति**। अचि यणादेशः, प्रत्यये गुणः। एवं रूपसिद्धिमुक्त्वा तदादितदन्तविधौ तदसिद्धिमाह — **यदि चेति**। **अन्तरङ्गत्वाभावादिति**। ऊठादिशब्दसापेक्षत्वादिति भावः। 'यणोऽन्तरङ्गत्वाभावात्'

---

[1] पा. सू. २. ३. ६५.
[2] करणादन्यत्रैवेति — म.
[3] 'तन्निरासाय' इत्येवास्ति — 'अ, म, ऋ' कोशेषु। 'तदबाधाय' इति विवरणे दृश्यते। 'तदभावाय' इत्येकस्मिन् विवरणकोशे। अत्र बहुषु कोशेषूपलभ्यमानत्वादौचित्याच्च 'तदबाधाय' इत्येव पाठो युक्त इति भाति। तदनुरोधेनात्रापि 'तदनिरासाय' इति पाठः समुचित इति प्रतीयते।
[4] 'सूत्रार्थे' इति नास्ति — म.
[5] पा. सू. ६. १. ७७.
[6] नयनेति — ऋ.
[7] अनेकाच्त्वेन — अ.
[8] प्रतीत्युपयुक्ते शब्दानाम् — अ. "चयन' इत्युचितं भाति।
[10] परिभाषा. १२
[11] 'कुतो नोक्तम् इत्यादि 'आदेशो भविष्य-तीति' इत्यन्तं नास्ति — म.
[12] भाष्ये 'अयाद्यन्ता आदेशा भविष्यन्ति' इति पाठो दृश्यते। 'अयाद्यन्त आदेशो भवि-ष्यति' इत्येकवचनान्तपाठोऽन्नंभट्टस्येति ज्ञायते।
[13] अर्थादन्तरतमः — ऋ.
[14] षष्ठ्येति — अ, म.
[15] पा. सू. ६. १. ८४.
[16] 'आग्नीध्रसाधारणादञ्' इत्यतो विभाषा-प्रकरणस्थत्वात् तदभावे टापि 'साधारणा' इति भवति। स्पष्टमिदं तत्त्वबोधिन्याम्।
[17] पा. सू. ७. ३. ८६.
[18] पा. सू. ६. १. ६६.
[19] पा. सू. ६. ४. १९.
[20] ऊठ् प्रवर्तत इति — म.

इत्युक्तत्वात् 'अन्तरङ्गलक्षणस्य' इति भाष्यमयुक्तम्, अत आह — **असतीति**। **अल्विधिः** [1]अन्त्यस्यालः [2]स्थानित्वाभावः, तमुपपादयति — **अलोऽन्त्यस्येति**। समुदायस्य स्थानित्वे [3]'अलोऽन्त्यस्य' इति सूत्रवैयर्थ्यम्, अत आह — **तत्रेति**। नन्वेवमेकालादेशवदनेकालादेशोऽपि सर्वस्य सिद्ध इति किम् [4]'अनेकाल्' इत्यनेन, अत आह — **अनेकालिति**। **सर्वस्य** षष्ठीनिर्दिष्टस्य सर्वस्य। ननु पूर्वनिर्दिष्टमनुवर्तमानं प्रकृतं चेत् [5]'ईदूदेत्' इत्यत्र तदन्तविधिर्न स्यात्, अत आह — **प्रस्तुत इति**। विशेषेण बुद्धौ संनिहित इत्यर्थः। स च त्रिधेत्याह — **प्रस्तावश्चेति**। बुद्धौ संनिधिश्चेत्यर्थः। **तदन्तविधिभाजः** [6]विशेष्यस्य। इह शास्त्रे प्रायेण शब्दस्यैव करणत्वात् संज्ञाधिकाराद्वा [7]'स शब्दः' इत्युक्तम्। अन्यपदार्थोपस्थितिं विना संज्ञासंप्रत्ययाभावाद् विशेष्यस्य संनिधिरपेक्षणीय इत्याह — **तेनेति**। तदन्तसंज्ञात्वेनेत्यर्थः। **विशेषणेन** करणेन [8]'विशेष्यस्य कार्यविधौ, **तदन्तविधिः** विशेषणेन सह विशेष्यस्याभिधानाय तदन्तविधिः, तदन्तशब्दोच्चारणम्, विशेषणसहितविशेष्यस्याभिधानाय विशेषणस्य तदन्तसंज्ञात्वेन विधिरिति वार्थः। **नान्यथा** विशेष्यस्य संनिधिं विना न संज्ञासंप्रत्यय इत्यर्थः। उक्तातिप्रसङ्गं निराह — **इक इति**। **असंनिधानात्** उक्तत्रिप्रकार-[9]सांनिध्याभावात्, [10]'शब्दानुशासनम्' इति भाष्योपस्थितौ तेन न सौत्रतदन्तशब्दार्थ इति भावः। सेनाङ्गत्वेनैकवद्भावशङ्कां निराह — **बह्विति**। [11]बह्वर्थवाचिपूर्वोत्तरपदावयवकत्वाभावादित्यर्थः। ग्रहणशब्दस्य कर्म[12]व्युत्पत्त्या 'उतः' इत्यादिप्रतिपादकत्वमाह — **उच्चार्यत इति**। **उपाधयः** विशेषणानि। वार्तिके उपाधिपदं भावप्रधानम्। **तदन्तस्य** [13]गृह्यमाणान्तस्य। **संज्ञिन इति**। षष्ठी, प्राप्नुवन्ति त इत्यन्वयः। ननु 'उतः' इत्यादेरसंयोगपूर्वस्येत्येतद्विशिष्टस्यैव तदन्तसंज्ञात्वं किं न स्यात्, अत आह — **संज्ञा हीति**। **आत्मनः** [14]स्वस्याः, विशेषणानां प्रधानान्वयस्यौत्सर्गिकत्वादिति भावः। ननु मकारस्य धात्ववयवत्वाभावात् कथं तत्पूर्वस्य ऋदन्तस्योत्वप्रसङ्गः, अत आह — [15]**अत्र चेति**। **अवधित्वेति**। 'यस्मात्' इति ऋदन्तधातुरवधिः, ओष्ठ्योऽवधिमान्, अवध्यवधिमद्भावस्यैकत्रासंभवः। **अवयवित्वम्** ओष्ठ्यावयवनिरूपितावयवित्वम्। **एकस्य** धातोः। न चौष्ठ्यः पूर्वः प्रथमावयवो यस्येति बहुव्रीहिणा ओष्ठ्यस्यावयवत्वलाभ इति वाच्यम्, तथा सति 'सुस्मूर्षति' इत्यादावुत्वं न स्यात्। सकारस्य प्रथमत्वेन मकारस्यातथात्वादिति भावः। भाष्ये 'पूर्तीः' इत्यत्र [16]'न ध्याख्या' इति निष्ठानत्वाभावः। [17]**अनपेक्ष्यैवेति**। अतः स्वदेश एव तत्र

---

[1] इदं 'न प्रकल्पेत' इत्यन्तार्थकथनं बोध्यम्।
[2] स्थानिवत्त्वाभावः — म.
[3] पा. सू. १. १. ५२.
[4] पा. सू. १. १. ५५.
[5] पा. सू. १. १. ११.
[6] 'विशेष्यस्य' इति नास्ति — अ.
[7] 'सः' इति नास्ति — म.
[8] विशेष्यकार्यविधौ — अ.
[9] संनिध्यभावात् — अ.
[10] 'शब्दानुशासनम्' इत्यादि 'शब्दार्थ इति भावः' इत्यन्तं नास्ति — म.
[11] बह्वर्थवाचिनौ पूर्वोत्तरपदरूपावयवौ यस्य तत्त्वाभावादित्यर्थः।
[12] व्युत्पत्त्या गृह्यमाणप्रातिपदिकत्वमाह — ऋ.
[13] गृह्यमाणस्य — अ.
[14] 'स्वो ज्ञातावात्मनि' इत्यमरकोशात् 'द्यौः स्वर्गनभसोः स्वो ज्ञात्यात्मनोः स्वं निजे धने', इति हेमचन्द्रकोशात् 'स्वः स्यात् पुंस्यात्मनि ज्ञातौ त्रिष्वात्मीयेऽस्त्रियां धने' इति मेदिनीकोशाच्च स्वशब्दस्यात्मवाचकत्वे पुंस्त्वमेव, न स्त्रीत्वम्। 'अर्थान्तरे तु न स्त्री' इति भस्त्रैषेति सूत्रकौमुद्यां चात्मवाचकत्वे स्त्रीत्वं नास्तीत्युक्तम्। अतः 'स्वस्य' इत्युचितं भाति।
[15] तत्र चेति — म.
[16] पा. सू. ८. २. ५७.
[17] अनपेक्षैवेति — अ.

संज्ञाविधिरिति भावः। 'संज्ञा हि' इति यदुक्तं तत्राह — **इयमिति**। [1]कार्यकालत्वे विशिष्टस्यैव संज्ञात्वम्, न संज्ञाया विशेषणयोग इत्याह — **तत्रेति**॥

[१, ५४२–५४६]

(**रत्नप्रकाशः**) **इह कस्मादिति**। शब्दरूपस्यौत्सर्गिकस्य विशेष्यस्य संभवादिति भावः। **येऽनेकाल इति**। अयादयः। **दोषः स्यादिति**। 'चयनं, लवनम्' इत्यादौ 'अयनम्, अवनम्, इत्यापत्तेरिति भावः। **आदेशतोऽपीति**। चेलोप्रभृतेरेजन्तस्यायाद्यन्त आदेश इति चयनलवनादिसिद्धिरिति भावः। **क्वचिद्वैरूप्यमिति**। एकादेशस्थल इति भावः। तत्र हि 'आत्' इत्यादिना अकाराद्यन्तो गृह्यते। 'अचि' इत्यादिना [2]अजाद्यादिः। तयोर्गुणान्तादिरादेश इत्युक्ते 'दर्शेष्टिः' इत्यादौ दर्शादिशब्दो दर्शेष्टादिशब्दो वा [3]स्यादिति सर्वथानिष्टं स्यात्। **अन्तरङ्गबहिरङ्गे इति**। वर्णमात्राश्रयत्वेन वर्णकार्यस्यान्तरङ्गत्वं भवति। यदि तदपि समुदायकार्यं स्यात् तर्हि न कोऽपि विशेषः स्यादिति भावः। **स्योन इति**। बाहुलकात् सिवेरौणादिके नप्रत्यये गुणो वलोप ऊठ् इति कार्यत्रयप्रसङ्गे नित्यत्वाद्वलोपे तत ऊठि यणादेशलघूपधगुणौ प्रसक्तौ। तत्रान्तरङ्गत्वाद्यणादेश इति सिद्धान्तः। तत्र यदीगन्तस्याजादौ परतो यणादिरादेशः स्यात् तर्हि यण्लघूपधगुणयोरन्तरङ्गबहिरङ्गभावासंभवेन समानाश्रयत्वाभावेन वर्णकार्यत्वाभावेन च [4]'वार्णादाङ्गम्' इति परिभाषाया अप्यप्रवृत्त्या परत्वाल्लघूपधगुणेऽनिष्टं स्यादिति भावः। **अन्तरङ्गलक्षणस्येति**। असति तदन्ततदादिविधौ अन्तरङ्गं लक्षणं विधायकं यस्य तस्येत्यर्थः। **अल्विधिरिति**। अल्शब्देन तत्रालन्तस्य ग्रहणात् सर्वादेशतैव स्यादिति भावः। **प्रकृत इति**। विशेष्ये प्रकृत इति भावः। **करण एषेति**। अत्र व्यावृत्तिं प्रति करणम्, विशेषणमिति यावत्। विशेषणविशेष्यभावश्च लक्ष्याधीन इति भावः। **समाशः** भोजनम्। **हस्त्यश्वरथपदातिभिरिति**। बहुप्रकृतिकत्वाभावादेकवद्भावाभावः, हस्त्यश्वरथेन सहिताः पदातय इत्युत्तरपदलोपो वा। **ग्रहणोपाधीनामिति**। गृह्यतेऽनेनेति **ग्रहणम्** विशेषणम्, तस्योपाधिर्विशेषणं **ग्रहणोपाधिः**। **तदन्तोपाधितेति**। स्वविशेष्यविशेष्योपाधितैव स्यात्, [5]"पदार्थः पदार्थेनान्वेति न तु पदार्थैकदेशेन' इति न्यायादिति भावः। **इह [6]च न स्यादिति**। ओष्ठ्यः पूर्वो यस्मादिति पञ्चम्यर्थगर्भितबहुव्रीह्याश्रयणादिति भावः। यद्योष्ठ्यः पूर्व आदिर्यस्येति षष्ठ्यर्थगर्भितबहुव्रीहिराश्रीयते तदा नोक्तातिव्याप्त्यव्याप्ती। **उकार एव विशेष्यत इति**। सहविवक्षाभावे द्वन्द्वाश्रयणवत् पदार्थैकदेशेऽपि पदार्थान्वयः स्वीक्रियते, आर्षत्वस्यैव सर्वदोषपरिहारकत्वात्। [7]"पदार्थः पदार्थेन' इति न्याये वा 'पदार्थेन' इति शब्दो वृत्त्यर्थेनेतिपरः, तथा 'न तु पदार्थैकदेशेन' इत्यत्र। स हि न्यायो [8]"वृत्तस्य विशेषणयोगो न' इति वचनमूलक इति भावः। एतेन [9]"वृद्ध्यादिसंज्ञा गुणप्रधानभावानपेक्षैव प्रदेशेषु संज्ञिनं प्रत्याययति। इयं संज्ञा गुणप्रधानभावापेक्षत्वात् कार्यकाला। तत्र [10]"उतश्च प्रत्ययात्' इत्यादौ विशेषणसंबन्धमनुभूय

---

[1] 'कार्यकालत्वे' इति नास्ति — म; कार्यकालत्वविशिष्टस्यैव — अ, ऋ.

[2] अजाद्यादि — ब.

[3] परिभाषा ५५.

[4] लौ. न्या. साहस्री. पृष्ठम् १०८.

[5] चकाररहित एव पाठोऽत्रोपलभ्यते भाष्ये।

[6] लौ. न्या. साहस्री. पृष्ठम् १०८.

[7] महाभाष्यम् २. १. १.

[8] प्रदीपे 'वृद्ध्यादिसंज्ञा गुणप्रधानभावानपेक्षा एव . . . प्रत्याययन्ति' इति दृश्यते। एकवचनान्ततया पाठो रत्नप्रकाशकृत इति भाति।

[9] पा. सू. ६. ४. १०६.

विशेष्येण संबन्धमुकारादिरनुभवतीति यथोक्तदोषाभावः' इति कैयटो निरस्तः। कार्यकालेयं संज्ञेति वचनमात्रेणाभिमतविशेषण[1]विशेष्यभावासिद्धेः। न हि 'येन विधिस्तदन्तस्य' इति सूत्रेण सह [2]'उतश्च' इति सूत्रस्य तादृशैकवाक्यताघटनेन [3]'पदार्थः पदार्थेन' इति न्यायानवतारो भवति। **ऋकार एव विशेष्यत इति**। ओष्ठ्यः पूर्वो यस्मादिति दिग्योगलक्षणपञ्चम्यर्थघटित एव बहुव्रीहिराश्रीयते, न तु [4]'तस्य परमाम्रेडितम्' इति ज्ञापकलभ्यषष्ठ्यर्थगर्भित इति भावः॥

[१, ५४२–५४६]

(**नारायणीयम्**) ननु ग्राह्यसत्त्वे ग्राहकत्वम्, इह तु तदभाव इत्यत्राह — **शब्देति**। इणादिष्विष्टसिद्धेराह — **ततश्चेति**। ननु स्थान्यर्थाभिधानसमर्थेनादेशेन भाव्यमिति शङ्कायां तदुपपादयति — **प्रकरणेति**। अनिराकार्यपरिहारसत्त्वे निराकार्यपरिहारोपन्यासो न्याय्यपरिहारं वक्तुमित्याह — **निर्दिश्यमानस्येति**। **परिहारान्तरं** 'करणे तृतीया' इति। स हि परिहारो न्याय्यः। 'निर्दिश्यमानस्य' इति तु तदन्तविध्यभ्युपगमेन वाच्यः। ननु कथं पुनरादेशतस्तदन्तविधिप्राप्तिः, येन कार्यं स तदन्तसंज्ञेत्युच्यते। आदेशस्तु कार्यमेव। प्रकृतितोऽपि तर्ह्यप्राप्तिः, करणे तृतीयाश्रवणात्। सूत्रार्थस्य सुष्ठ्वविचारणादुभयत्रापि स उक्तः। तदाह — **यथैवेति**। 'यदि चैवम्' इति चेनाप्ययमेवार्थो द्योत्यते। आदेशेन तदन्तविधेरभ्युपगममात्रत्वाच्च 'निर्दिश्यमानस्य' इति परिहारष्टीकायाम्'। उभयत्र तदन्तविधौ सर्वत्रैवेष्टसिद्धेस्तदसिद्धिः क्वेत्यत्राह — **अदिति**। **अजादिरिति**। [5]विशेष्यासंनिधावपि तदन्तविधिवत् तदादिविधेरपि प्रसङ्गः। **गुणेति**। नन्वेतदवस्थायां विधेयेनापि तदन्तविधिरङ्गीकृतः। अत्राहुः — [6]'अदेङ्संज्ञात्वेन गुणशब्दस्य न तदन्तसंज्ञात्वमिति। तदयुक्तम्, [7]'अणुदित्' इत्यत्र [8]'तत्राकारः' इति ग्रन्थे एकस्याः संज्ञायाष्टीकाकारेणानेकप्रत्यायनाङ्गीकारात्। वस्तुतस्तु न गुणशब्दस्य तदन्तसंज्ञात्वम्, अपि त्वदेङामिति नायं समाधिप्रकारः। तस्माददेङामनुच्चारितत्वान्न तदन्तसंज्ञात्वमिति समाधानम्। न चात्र गुणान्त आदेशेऽपीष्टसिद्धिरिति तदन्तविध्यकीर्तनमित्यप्याहुः। **षष्ठीति**। 'आत्, अचि' इत्यषष्ठीनिर्देशः। 'पूर्वपरयोः' इत्यस्यामवस्थायां समुदायनिर्देशः। गुणनिमित्तं प्रत्ययमाह — **सिवेरिति**। यणः प्रागेव गुणो न कस्मात्, अत आह — **गुण इत्यादि**। वलोपबाधनकीर्तनं प्रासङ्गिकम्। उभयोरप्याङ्गत्वादाह — **गुणो हीति**। तदन्तविधिप्रयुक्ता न यणोऽन्तरङ्गत्वहानिः, अपि तु तदादिविधिप्रयुक्तेति 'ऊनशब्दमाश्रित्य' इति भाष्यसूचितमाह — **यदि चेति**। मास्त्वन्तरङ्गत्वं यणः, अथापि कथं गुणेन बाधा, अत आह — **परत्वादिति**। ननु भाष्येऽन्तरङ्गस्यैव सतो गुणेन बाध उक्तः, त्वया तु कथमन्तरङ्गत्वाभावो वर्ण्यते यण इत्याशङ्क्य न्यायविरोधाद् भाष्यमेवं व्याख्येयमित्याह — **असतीति**। सुलोपस्याल्विधित्वं [9]'हल्ङ्याब्भ्यः' इत्यत्र तदन्तविधावप्यक्षतमेवालाश्रयत्वात्, अत आह — **अल इति**। ननु [10]यद्यत्रापि तदन्तविधिर्भवति अलोऽन्त्यवचनं किमर्थं स्यात्, अत आह — **तत्रेति**। असति तदन्तविधौ पथ्यादिसमुदायस्यैवादेशः

---

[1] विशेष्यभावसिद्धेः — ब.
[2] पा. सू. ६. ४. १०६.
[3] लौ. न्या. साहस्री. पृष्ठम् १०८.
[4] पा. सू. ८. १. २.
[5] विशेष्यसंनिधावपि — ग.
[6] अदेङ्संज्ञया गुणशब्दस्य — ग.
[7] पा. सू. १. १. ६९.
[8] अयं प्रदीपग्रन्थः 'वचनाद्यत्र तन्नास्ति' इत्येतद्वार्तिकव्याख्याने।
[9] पा. सू. ६. १. ६८.
[10] यद्यप्यत्रापि — ग.

प्राप्तः, सति त्वस्मिन् पथ्यादीनां योऽन्त्यस्तदन्तस्य पथ्यादेस्थिन्नादेर्वा भवतीत्यलोऽन्त्यवचनप्रयोजनम्। अत्र च थिन्ग्रहणमुपलक्षणम्, 'अथिन्नादेरपि प्राप्तेः। अलोऽन्त्यविधौ तदन्तविधिप्रवृत्तौ सर्वादेशस्य सिद्धत्वात् अनेकाल्शिद्वचनं किमर्थम्, अत आह — **अनेकालिति**। न हीदानीमनियमप्राप्तिः। अनुवृत्तिप्रापिते विशेष्ये तदन्तविधिरिति भाति, तत्राह — **प्रस्तुत इति**। संनिहिते। इहाप्यस्तु कथंचित् संनिधानम्, अत आह — **प्रस्तावश्चेति**। नियमः कुतः, प्रकारान्तरेणापि शब्दानुशासन[1]प्रस्तावादिना संनिधिसंभवादिति चेन्न, शब्दानुशासनप्रस्तावो न तावत् प्रतियोगं शब्दशब्दस्याधिकारः, तदभावात्। नापि तदाक्षेपः, आक्षेपकाभावात्। न च कार्यानुशासनं कार्यिण आक्षेपकम्, इगादेरेव [2]कार्यित्वात्। न च वर्णस्यासंस्कार्यत्वात् पदाक्षेपः, अपदान्तस्य यणाद्यभावापत्तेः। तस्मादस्ति न तत्र पदम्, न तु तस्य कार्यित्वावेदकं प्रमाणमिति युक्तो नियमः। भाष्ये **करणे तृतीयेति**। तस्या एवेह संभवात्। न हि कर्तरि तृतीयासंभवः, कृद्योगे षष्ठीविधानात्, विधिकर्तुराचार्यस्य शास्त्रस्य वा तदन्तसंज्ञात्वायोग्यत्वाच्च। नापि सहयोगे तत्संभवः, तत्सहितस्य कार्यमिति निश्चये तदन्तविधिवैफल्यादिति केचित्। अन्ये तु हेतुतृतीयाव्यवच्छेदायेदमुक्तम्। तस्यां हि संज्ञाया विशेषणत्वालाभ इत्याहुः। अस्तु करणत्वं तृतीयार्थः। ततः किम्, अत आह — **अन्येनेति**। कार्यसंनिधाने करणत्वमित्यर्थः। करणायत्तफलभाक्संनिधिं करणनिर्देशे दर्शयति — **तद्यथेति**। तत्र क्रियाकरणत्वनिर्देशेन क्रियाफलभाजो नियतसंनिधिः, फलकरणत्वनिर्देशे तु फलभाक्संनिधिनियम इति फलपरत्वमाह — **विधीति**। ननु क्रियापेक्षं करणत्वं, कारकविशेषत्वात् करणत्वस्य, न कार्यापेक्षम्। तत्कथं कार्यसंनिधाननियम इत्याशङ्क्य क्रियाद्वारकं कार्यकरणत्वमाह — **येनेति**। ननु शरावौदनादेर्देवदत्तस्वामिक[3]समाशोपकारकत्वं तृतीयाश्रुत्यधिगतम्, न चाचो [4]धातुनिष्ठोपकृतिहेतुत्वावेदकं[5] किंचित्। तदन्तसंज्ञात्वेन त्वस्य तदुपकारकत्वावगतावन्योन्याश्रयः — तदुपकारकस्य संज्ञात्वावगतिः, संज्ञात्वे च तदुपकारकत्वावगतिरित्यत आह — **तेनेति**। तदन्तसंज्ञात्वमन्तरेणापि विशेषणत्वादेवाचो धातूपकारकत्वावगतिः, तदन्तसंज्ञया तु केवलं यद्विधेर्विषयव्याप्तिरुपजायते। ततो युक्तमेव विशेषणत्वज्ञानाधीनं तदन्तसंज्ञात्वम्। **इक इति**। व्याख्यातमेतत्। सेनाङ्गत्वादेकवद्भावमाशङ्क्याह — **बह्विति**। [6]'बहुप्रकृतिः फलसेना' इति वचनात्। ग्रहिरुच्चारणक्रिय इहेत्याह — **गृह्यत इति**। कथमुच्चारितोपाधित्वनिश्चये तदन्तोपाधित्वप्राप्तिः, अत आह — **इष्यन्त इति**। उच्चरितपरित्यागेन कथं प्रतीयमानविशेषणत्वप्राप्तिः, अत आह — **संज्ञिन इति**। तदेतत् प्रपञ्चयति — **संज्ञा हीति। स्यादिति**। पूर्वशब्दो व्यवस्थावाची स्यान्नावयववाची। संभावनामात्रं चैतत्। न त्वेवमेव भाव्यमिति नियमोऽस्ति, अवयववाच्याश्रयणेनाभिमतसिद्ध्युपपत्तेः। सिद्धान्ते त्वसंभवादवयववाचिनोऽपरिग्रहः। नन्वित्थं [7]वाक्यार्थमापाद्येदं दूषणमिति किमुच्यते। न पुनः सर्वथेदं दूषणं स्यात्, अत आह — **अत्र चेति**। चो ह्यर्थे। नन्वत्र वाक्यार्थेऽवयवत्वस्य शब्देनासमर्पणेऽपि प्रत्यासत्त्या धात्ववयव एवौष्ठ्यो ग्रहीष्यत इत्याशङ्क्य विरोधान्नैवमित्याह — **अवधित्वेति**। ननूभयोर्विशेषणसंबन्धयोग्यत्वे कामचारः, अत्र तु न संज्ञायास्तद्योग्यत्वम्, अत आह — **वृद्धीत्यादि**। सत्यं न संज्ञाया विशेषणान्वयः, संज्ञात्वाधिगतेस्तु प्राग् युज्यते तदन्वयः। ननु "सिचि वृद्धिः' इत्यादौ

---

[1] प्रस्तावववादिना — ग.
[2] कार्यत्वात् — ग.
[3] सर्वोपकारकत्वं — ग.
[4] अचो यदित्यत्रेत्यादिः।
[5] हेतुत्वावेदकः — ग.
[6] का. वा. २. ४. १२—१.
[7] वाक्यार्थमापद्येदं — ग.
[8] पा. सू. ७. २. १.

विद्यमानस्य वृद्ध्यादिशब्दस्य यथा न संज्ञात्वावगतौ विलम्बः, तथास्यापीति कथं ततः प्राग्विशेषणान्वय इत्यतस्तद्वैलक्षण्यमुक्तम् — **कार्यकालेति**। अत्राधिगम्यत इति विशेषः। वृद्ध्यादिः शब्दस्वरूपज्ञानात्। नेह स्वरूपेण संज्ञावगमः। किं तु कार्यानुगुणविशेषणत्वज्ञानादित्यर्थः। अस्तु कार्यकाले संज्ञात्वज्ञानम्, अत्रापि को विलम्बः, येन विशेषणसंबन्धो भवेत्, अत आह — **तत्रेति**। सत्यां हि विशेष्याकाङ्क्षायां विशेषणत्वं स्फुरति। ततः प्रागेव स्वविशेषणसंबन्ध इत्यर्थः। तदुक्तं हरदत्तमिश्रैः —

[1]"विशेषणत्वस्फुरणात् प्रागेवोतो विशेषणम्।
स्यादसंयोगपूर्वत्वं पश्चात् तत्तु विशेषणम्॥
प्रत्ययस्येति नैवेह किंचिदस्ति तिरोहितम्॥' इति॥

[१, ५४६–५५६]

(**लघुविवरणम्**) विशेष्याभावाच्छ्रतादिभिस्तदन्तविधेः प्रसङ्ग [2]एव नास्तीत्यत आह — **श्रितादिभिरिति**। **श्रितान्तमिति**। विभक्त्यन्तत्वात्। सर्वाद्यवयवेषु सर्वादिशब्दसमुदायरूपारोपाद्वा सर्वाद्यन्तत्वं [3]भविष्यतीत्याह — **अथवेति**। **गौणेनापीति**। स्वरितलिङ्गासङ्गेन [4]"स्वरितेनाधिकारः' इति वचनादिति भावः। तत्रोदाहरणान्याह — **छत्रेति**। [5]"छत्रादिभ्यो णः' इत्यनेन प्रथमासमर्थाच्छत्रशब्दात् शीलविशिष्टवाचिनोऽस्येति षष्ठ्यर्थे णप्रत्ययो विधीयते। छत्रशब्दश्चातपत्रे मुख्योऽपीह गुरुच्छिद्रावरणवृत्तिर्गृह्यते। तेन गुरुच्छिद्रावरणशीलः शिष्यश्छात्रशब्दवाच्यो भवति। तथा पार्श्वशब्दो [6]देहांशविशेषे मुख्यो यद्यपि गौण्या वृत्त्यानृजूपाये वर्तमानात् तृतीयान्तादन्विच्छतीत्यस्मिन्नर्थे [7]"पार्श्वेनान्विच्छति' इत्यनेन कन्प्रत्ययो विधीयते। अनृजूपायेनान्विच्छति — पार्श्वक इति। तथा अयोमये शूले दण्डाजिनयोश्च मुख्यावयश्शूलदण्डाजिनशब्दौ, तथाप्यममुख्यया वृत्त्या तीक्ष्णोपायडम्भवृत्ती [8]'परिगृह्य ताभ्यां तृतीयासमर्थाभ्यामन्विच्छतीत्यस्मिन्नर्थे [9]"अयश्शूलदण्डाजिनाभ्यां ठक्ठञौ' इत्यनेन ठक्ठञौ प्रत्ययौ विधीयेते। तथा स्पर्शविशेषे मुख्यावपि शीतोष्णशब्दौ गौण्या वृत्त्या आलस्यशैघ्यवृत्ती अङ्गीकृत्य क्रियाविशेषणतया द्वितीयासमर्थाभ्यां ताभ्यां करोतीत्यर्थे कन्प्रत्ययो विधीयते। तथार्धह्रस्वशब्दो मुख्यया वृत्त्या ह्रस्वावयवविशेषे वर्तमानोऽप्यमुख्यया वृत्त्या मात्रार्धे वर्तत इत्यङ्गीकृत्य दीर्घप्लुतयोरपि स्वरितयोरुदात्तविभागः कृतः। तदेकदेशभूतत्वे हेतुमाह — **मध्यपातिन इति**। तन्मध्यपातित्वेन तदेकदेशत्वविज्ञानं विघटयति — **नित्या हीति**॥

[१, ५४६–५५०]

(**विवरणम्**) **सुबन्तस्य** [10]"सुपा' इत्युपस्थितस्येति शेषः। **तदिति**। तथा च सुप्सहितैः

---

[1] 'उतश्च प्रत्ययात्' इति सूत्रे पदमञ्जर्याम्।
[2] एवकारो नास्ति — ड.
[3] भविष्यतीत्यत आह — ड, ढ, ण.
[4] पा. सू. १. ३. ११.
[5] पा. सू. ४. ४. ६२.
[6] देहाङ्गविशेषे — ण.
[7] पा. सू. ५. २. ७५.
[8] परिगृह्येते। ताभ्यां — ड, ढ.
[9] पा. सू ५. २. ७६.
[10] पा. सू. २. १. ४.

श्रितादिभिर्द्वितीयान्तं समस्यत इत्यर्थः संपद्यत इति भावः। विसर्गान्तं श्रितान्तं न भवतीत्याह — **श्रितान्तमिति**। **तदन्तविध्यभाव इति**। नडादीनां विशेष्यत्वात् प्रातिपदिकस्य विशेषणत्वेऽपि तदन्तस्य नडादेरसंभवादिति भावः। ननु मा भूत् [1]'उगितश्च' इत्यत्र तदन्तविधिः, तथापि गौरादिषु पाठादनुपसर्जनाधिकारेण[2] तदधिकारसूत्रेषु तदन्तविधेर्ज्ञापनात् 'अतिमहती' इति भविष्यतीति [3]नेदमुदाहरणं युक्तमित्यत आह — **तत्रेति**। [4]**ङीषि हीति**। नद्या इति शेषः। पूर्वस्य ञित्कार्यार्थात् ञित्करणात् तदन्तविधिर्भविष्यतीति न वाच्यमित्याह — [5]**तदिति**। बाहविरित्यादौ स्वरादिसिद्धय इति भावः। **अकचीति**। यद्यप्यज्ञातादिष्वकच्, तदर्थवृत्तिश्च सुबन्तस्य। तथा च जसि कृतेऽर्थ[6]निरपेक्षः शीभावोऽन्तरङ्गोऽकचः प्रागेव प्रवर्तते, तथाप्यकचि कृते न तद्वतो जस् विहित इति यस्मात् प्रत्ययविधिस्तदादितदन्तस्य[7] "अप्रत्ययः' इति प्रातिपदिकसंज्ञानिषेधो नेत्यर्थवत्त्वात् प्रातिपदिकसंज्ञायां प्रातिपदिकावयवत्वात् [8]'सुपो धातुप्रातिपदिकयोः' इति सुपो लुकि पुनर्जसुत्पत्तौ तस्य शीभावो न स्यादिति भावः। **लुगिति**। यद्यपि सोर्हल्ङ्यादिलोपेनापि निवृत्तिः सिध्यति, तथापि [10]'एकवचनमुत्सर्गः' इति यदा सर्वविभक्तीनामेकवचनोत्पत्तिस्तदा लुगेषितव्यः, स न स्यादित्यर्थः। **पराङ्गवदिति**। तथा च [11]'आमन्त्रितस्य' इत्याद्युदात्तः स्यात्, [12]'चितः सप्रकृतेः' इत्यन्तोदात्तश्चेष्यत इति भावः। ननु 'येन विधिस्तदन्तस्य' इत्यपि त्रितयसंनिधौ, तदभावात् [13]'सर्वादीनि' इत्यादावपि [14]कथमेतस्य प्रवृत्तिरित्यत आह — **तत्रेति**। अन्वर्थाव्ययसंज्ञाक्षिप्त इत्यर्थः। भूश्च वाश्च भूवौ, तावादी येषामिति बहुव्रीहिः। आदिशब्दश्च प्रत्येकमभिसंबध्यते। वादय इत्यत्रादिशब्दः प्रकारवाची। भ्वादय [15]इत्यत्र च व्यवस्थावाचीत्यभिप्रेत्याह — **धात्विति**। **न त्विति**। सोऽन्तोऽस्येत्युक्तावनुपपत्त्यभावादित्यर्थः। अवयवी प्रत्यवयवमवयवान्तरसंनिधौ समवेत इति [16]मतान्तरमाह — **अन्य इति**। सर्वावयवेष्ववयवी व्याप्यवृत्तिरित्यत्राप्याह — **अथवेति**। मुख्यविशेषणमादाय चरितार्थमिदं सूत्रं कथमारोपिते स्यादित्यत आह — **गौणेनापीति**। स्वरितलिङ्गासङ्गेन [17]'स्वरितेनाधिकारः' इत्यस्य प्रवृत्तौ तस्य स्वरितेनाधिकं कार्यं भवतीत्यप्यर्थाश्रयणादिति भावः। [18]तत्रोदाहरणान्याह — **छत्रेति**। [19]'छत्रादिभ्यो णः' इत्यनेन प्रथमासमर्थात् छत्रशब्दात् शील[20]विशिष्टार्थवाचिनोऽस्येति षष्ठ्यर्थे णप्रत्ययो विधीयते। छत्रशब्दश्चातपत्रे मुख्योऽपीह गुरुच्छिद्रावरणवृत्तिर्गृह्यते। तेन गुरुच्छिद्रावरणशीलः शिष्यश्छात्त्रशब्दवाच्यो भवति। तथा पार्श्वशब्दो देहाङ्गविशेषे मुख्यो यद्यपि, तथापि गौण्यानृजूपाये वर्तमानात् तृतीयान्तादन्विच्छतीत्यस्मिन्नर्थे [21]'पार्श्वेनान्विच्छति' इत्यनेन पार्श्वशब्दात् कन्

---

[1] पा. सू. ४. १. ३.
[2] 'अधिकारेण' इत्यस्यानन्तरं चकारोऽधिकः — छ, ट.
[3] कथमुदाहरणं — ञ.
[4] प्रदीपे 'ङीषि सति' इत्यत्र 'ङीषि हि सति' इति निर्णयसागरमुद्रिते पाठः।
[5] ञ्नित्यादिति — ट.
[6] निरपेक्षशीभावः — ट.
[7] इत्युक्तत्वादिति शेषः।
[8] पा. सू. १. २. ४५.
[9] पा. सू. २. ४. ७१.
[10] महाभाष्यम् १. १. ३८.
[11] पा. सू. ६. १. १९८.
[12] का. वा. ६. १. १६३–१.
[13] पा. सू. १. १. २७.
[14] कथमस्य — ञ, ट.
[15] इत्यादिशब्दश्च — ञ.
[16] मत्वोत्तरमाह — ञ.
[17] पा. सू. १. ३. ११.
[18] अत्रोदाहरणान्याह — च, छ, ट.
[19] पा. सू. ४. ४. ६२.
[20] विशिष्टवाचिनः — च, छ.
[21] पा. सू. ५. २. ७५.

प्रत्ययः। अनूजूपायेनान्विच्छतीति पार्श्वक इति। तथा, अयोमये शूले दण्डाजिनयोश्च मुख्यावयश्शूलदण्डाजिनशब्दौ यद्यपि, तथाप्यमुख्यया वृत्त्या तीक्ष्णोपायडम्भवृत्ती परिगृह्य ताभ्यां तृतीयासमर्थाभ्यामन्विच्छतीत्यस्मिन्नर्थे [1]'अयश्शूलदण्डाजिनाभ्यां ठक्ठञौ' इत्यनेन ठक्ठञौ, आयश्शूलिको दाण्डाजिनिक इति। तथा स्पर्शविशेषेषु मुख्यावपि शीतोष्णशब्दौ गौण्या आलस्यशैघ्यवृत्ती अङ्गीकृत्य क्रियाविशेषणतया द्वितीयासमर्थाभ्यां ताभ्यां करोतीत्यस्मिन्नर्थे कन्प्रत्ययः, शीतक उष्णक इति। तथार्धह्रस्वशब्दो मुख्यया वृत्त्या ह्रस्वार्धावयवविशेषे वर्तमानः, अथाप्यमुख्यया वृत्त्या मात्रार्धे वर्तमानमङ्गीकृत्य दीर्घप्लुतयोरपि स्वरितयोरुदात्तविभागः कृतः। आदिशब्दः [2]'आधारोऽधिकरणम्' इत्याद्यभिप्रायः। यस्याकजादिस्तदेकदेशत्वेनाकजादेर्विज्ञानादिति वार्तिकार्थः। **तत्त्वबुद्धिं** सर्वादित्वबुद्धिम्। **अल्पमिति**। गङ्गादिशब्दा अपि घृतादिशब्दतुल्या इत्यर्थः। नित्ये हि शब्देऽकज्वतः शब्दान्तरत्वादकजादेः सर्वाद्येकदेशत्वमसिद्धमित्यत आह — **यद्यपीति**। **अव्यतिरेककृतः** भेदबुद्धिं न कुर्वन्तीत्यर्थः॥

[१, ५४६–५५०]

(**उद्द्योतनम्**) विशेष्यसंनिधिमाह — **सुबन्तस्येति**। 'सुपा' इत्यनेनोपस्थितस्येत्यर्थः। प्रतिषेधशब्देन व्याख्यानमभिप्रेतमित्याह — **प्रतिषेधद्वारेणेति**। तथा च सुबन्तैः श्रितादिभिर्द्वितीयान्तं समस्यत इत्यर्थलाभ इत्यर्थः। भाष्योदाहरणे विसर्गान्तस्य श्रितान्तत्वाभावात् संबुद्ध्यन्तमुदाहर्तव्यमित्याह — **श्रितान्तमिति**। **तदन्तविध्यभाव इति**। प्रातिपदिकान्तस्य नडादेरसंभवादिति भावः। ननु [3]'उगितश्च' इत्यत्र तदन्तविध्यभावेऽपि गौरादिपाठेन ङीष् भविष्यति, [4]'अनुपसर्जनात्' इत्यनेनात्र प्रकरणे तदन्तविधिज्ञापनात् 'अतिमहती' इति नोदाहरणम्, अत आह — **तत्रेति**। [5]'प्रामादिकत्वे हेतुः — **तथा चेति**। [6]'शतुरनुमो नद्यजादी', अनुम् यः शता तदन्तादन्तोदात्तात् परा नद्यजाद्यसर्वनामस्थानविभक्तिश्चोदात्ता। तुदती, तुदता। **उदात्तस्य** नद्या इत्यादिः। ननु प्रकृत्याद्युदात्तार्थात् [7]ञ्नित्करणात् तदन्तविधिः स्यात्, नेत्याह — **ञित्करणमिति**। बाहविरित्यादौ [8]'स्वरवृद्धिसिद्धय इत्यर्थः। भाष्ये **अकजिति**। सर्वनामाश्रित[9]कार्यमव्ययसंज्ञाश्रितकार्यं धातुसंज्ञाश्रितकार्यं च भवतीति वक्तव्यमित्यर्थः। अवचनेऽनुपपद्यमानकार्यमाह — **अकचीति**। यद्यप्यज्ञाताद्यर्थेऽकच्, तदर्थत्वं च सुबन्तस्येति पूर्वं जस्यर्थनिरपेक्षतयान्तरङ्गः शीभावः [10]'पूर्वं प्रवर्तते, पश्चादकजिति रूपं सिध्यति, तथाप्यकज्वतः 'अप्रत्ययः' इति निषेधाभावेन प्रातिपदिकसंज्ञायां [11]'सुपो धातु' इति [12]पूर्वजसो [13]लुकि पुनर्जसि शीभावो न सिध्यतीति भावः। **लुगिति**। [14]'एकवचनमुत्सर्गः' इति यदा सर्वविभक्तीनामेकवचनोत्पत्तिस्तदा विभक्त्यन्तरस्य लुङ् न स्यात्, सोस्तु हल्ङ्यादिलोपेनापि निवृत्तिः स्यात्। **पराङ्गेति**। तथा च [15]'आमन्त्रितस्य' इत्याद्युदात्तत्वं स्यात्,

---

[1] पा. सू. ५. २. ७६.
[2] पा. सू. १. ४. ४५.
[3] पा. सू. ४. १. ६.
[4] पा. सू. ४. १. १४.
[5] प्रामादिकत्वहेतुः — अ.
[6] पा. सू. ६. १. १७३.
[7] 'ञित्करणात्' इत्यतः प्राक् 'इञः' इत्यधिकम् — ऋ.
[8] स्वरादिसिद्धये — म.
[9] कार्यमव्ययाश्रितकार्यं — अ.
[10] 'पूर्वम्' इति नास्ति — म, ऋ.
[11] पा. सू. २. ४. ७१.
[12] पूर्वं जसः — म, ऋ.
[13] लुकि जस एकदोत्पत्तौ शीभावः — अ, ऋ.
[14] महाभाष्यम् १. १. ३८.
[15] पा. सू. ६. १. १९८.

[1]'चितः सप्रकृतेः' इत्यन्तोदात्त एवेष्यत इति भावः। [2]'नाव्ययदिक्शब्दगोमहत्स्थूलमुष्टिपृथुवत्सेभ्यः' एभ्यः स्वाङ्गवाचि मुखं बहुव्रीहावन्तोदात्तं न स्यादिति [3]'मुखं स्वाङ्गम्' इति प्राप्तान्तोदात्तत्वस्य निषेधः। श्नम्सहितस्य धातुत्वे प्रत्ययधातुस्वरयोरविशेषान्नेदमुदाहरणमिति वदन्नुदाहरणान्तरमाह — **प्रत्ययेति**। भाष्योदाहरणमपि समाधत्ते — **अन्ये त्विति**। [4]**सतीति**। श्नम्वतो धातुसंज्ञायां धातुस्वरः सतिशिष्ट इत्यागमानुदात्तत्वबाधक इत्यर्थः। **एवमिति**। उच्चैःशब्दस्यान्तो विसर्जनीयः सोऽन्त उच्चकैरित्यस्य। [5]'भिदोऽन्तो दकारः, सोऽन्तो [6]'भिनद्' इत्यस्येत्यर्थः। विशेष्यसंनिधौ 'येन विधिः' इत्यस्य प्रवृत्तिः, [7]'सर्वादीनि' इत्यादौ तदभावात् कथमस्य प्रवृत्तिः, अत आह — **तत्रेति**। सर्वनामाव्ययधातुसंज्ञास्वित्यर्थः। [8]'सर्वाद्यन्तान्तानि सर्वेषां नामानि सर्वनामसंज्ञानीति सूत्रार्थ इति भावः। **अव्ययेति**। अन्वर्थाव्ययसंज्ञाक्षिप्त इत्यर्थः। **धात्विति**। भूश्च वाश्च भूवावादी येषाम्। [9]'आदिशब्दः प्रत्येकं संबध्यते, भ्वादय इत्यत्र व्यवस्थावाची, वादय इत्यत्र प्रकारवाची। तथा च [10]'भ्वाद्यन्तान्ता वाप्रकारा धातुसंज्ञका इति सूत्रार्थः। **न त्विति**। सोऽन्तो यस्येत्युक्तावनुपपत्त्यभावादित्यर्थः। अवयवान्तरसंनिधौ प्रत्येकावयवपर्याप्तवृत्तिरवयवीति मते सामर्थ्यलभ्य एवायमर्थ इत्याह — **अन्ये त्विति**। सर्वेष्ववयवेषु व्यासज्यवृत्तिरवयवीति मते त्वाह — **अथवेति**। **अवयवे** अकारादौ। **तदन्तता** समुदायान्तता। [11]'अतो भिसः' इत्यादौ मुख्यविशेषणे चरितार्थमिदं सूत्रं गौणे कथं प्रवर्तते, अत आह — **गौणेनापीति**। [12]'स्वरितलिङ्गासङ्गेन [13]'स्वरितेनाधिकारः' इत्यस्य प्रवृत्तौ तस्य स्वरितेनाधिकं कार्यं भवतीत्यर्थस्याप्याश्रयणादेतल्लाभः" इत्याहुः। तत्रोदाहरणान्याह — **छत्रेति**। छत्रं शीलमस्येत्यर्थे छत्रादिभ्यो णो विधीयते। तत्रातपत्रे मुख्योऽपि गुरुच्छिद्रत्राणवृत्तेर्गौणश्छत्रशब्दो गृह्यते। गुरुच्छिद्रावरणशीलश्छात्र उच्यते। शरीराङ्गविशेषे मुख्यादनृजूपाये गौणात् पार्श्वशब्दात् [14]'पार्श्वेनान्विच्छति' इति कन् विधीयते। ऋजुनोपायेनान्वेष्टव्यमनृजूपायेन[15] योऽन्विच्छति स पार्श्वकः। अयश्शूलशब्दोऽयोमयशूले मुख्यः। [16]दण्डाजिनशब्दो दण्डयुक्ताजिने। अयश्शूलशब्दो गौण्या तीक्ष्णोपायवृत्तिः, दण्डाजिनशब्दश्च गौण्या [17]दम्भवृत्तिः। ताभ्यां तृतीयान्ताभ्यामन्विच्छतीत्यर्थे [18]'अयश्शूलदण्डाजिनाभ्यां ठक्ठञौ' इत्यनेन यथासंख्यमेतौ [19]विधीयेते। अयःशूलेन तीक्ष्णोपायेनान्विच्छतीत्यायश्शूलिकः। दण्डाजिनेन दम्भेनान्विच्छतीति दाण्डाजिनिको दाम्भिकः। शीतोष्णशब्दौ स्पर्शविशेषे मुख्यौ, गौण्या शीतशब्दो मन्दक्रियायाम्, उष्णशब्द आशुक्रियायां च वर्तते। ताभ्यां क्रियाविशेषणाभ्यां द्वितीयान्ताभ्यां कारिण्यर्थे [20]'शीतोष्णाभ्यां कारिणि'

---

[1] का. वा. ६. १. १६३–१.
[2] पा. सू. ६. २. १६८.
[3] पा. सू. ६. २. १६७.
[4] न चेति — ऋ.
[5] भिदन्तः — अ; छिदोऽन्तः — म.
[6] छिनद् — म.
[7] पा. सू. १. १. २७.
[8] सर्वाद्यन्तानि सर्वाद्यन्तान्तानि सर्वेषां — अ; सर्वाद्यन्तानि सर्वेषां — म.
[9] 'आदिशब्दः' इत्यस्यानन्तरं चकारोऽधिकः — अ.
[10] भ्वाद्यन्ताः — अ.
[11] पा. सू. ७. १. ९.
[12] स्वरितेत्यादिर्विवरणोक्तिः।
[13] पा. सू. १. ३. ११.
[14] पा. सू. ५. २. ७५.
[15] अनृजुनोपायेन — अ.
[16] 'दण्डाजिनशब्दः' इत्यादि 'तीक्ष्णोपायवृत्तिः' इत्यन्तं नास्ति — म.
[17] दम्भे वृत्तिः — म.
[18] पा. सू. ५. २. ७६.
[19] विहितौ — ऋ.
[20] पा. सू. ५. २. ७२.

इत्यनेन कन् विधीयते। शीतकोऽलसः, उष्णको दक्षः। [1]अर्धह्रस्वशब्दो ह्रस्वार्धावयवे मुख्यः, मात्रार्धे गौणः। [2]'तस्यादित उदात्तमर्धह्रस्वम्' इत्यत्र मात्रार्धवाचित्वमङ्गीकृत्य स्वरितस्यादितोऽर्धमात्रोदात्ता[3], उपरितनभागः सर्वोऽप्यनुदात्तः। तेन दीर्घस्वरितस्योपरितन[4]सार्धमात्रो भागोऽनुदात्तः। प्लुतस्वरितस्य तु सार्धद्विमात्र इति सिध्यति। आदिना [5]'आधारोऽधिकरणम्' इत्यादिसंग्रहः। यस्याकजादिस्तदेकदेशत्वेनाकजादेर्विज्ञानादिति वार्तिकार्थः। [6]**तद्बुद्धि** सर्वादिबुद्धिम्। 'परिच्छिन्न' इत्यनेनाक्तशब्दार्थ उक्तः। **अल्पमिति**। गङ्गादिशब्दा अपि घृतादिशब्दतुल्या इति भावः। अत्राप्यक्तपरिमाणत्वमाह — [7]**सर्वादीति**। मध्ये प्रविष्टास्तदवयवाः कथमवयविभेदकाः, अत आह — **नित्या इति**। नित्येषु तदेकदेशभूतं न संभवतीत्युक्तम्, अत आह — **यद्यपीति**। **अव्यतिरेकेति**। भेदबुद्धिं न कुर्वन्तीत्यर्थः॥

[१, ५४६–५५०]

(**रत्नप्रकाशः**) **समासप्रत्ययविधाविति**। "समर्थः पदविधिः' इति परिभाषालभ्यसमर्थरूपस्यार्थस्य श्रितादिभिर्विशेषणात् "गतिकारकोपपदानां कृद्भिः' इति सुबुत्पत्तेः पूर्वमेव समासाद् द्वितीयान्तं श्रिताद्यन्तेन समर्थेन समस्यत इति प्रसक्तिः। एवम् [10]'अत इञ्' इत्यादावदन्तप्रातिपदिकप्रकृतिकात् षष्ठ्यन्तादिञ् इतिवत् नडाद्यन्तप्रातिपदिकप्रकृतिकात् षष्ठ्यन्तात् फगित्यर्थः स्यादिति प्रसक्तिः। विशेषणविशेष्यभाववैपरीत्यसिद्धिलभ्य एवायमर्थ इति सुवचम्। एतेन 'श्रितादिभिः सुबन्तस्य विशेषणे सति प्राप्तस्तदन्तविधिः प्रतिषिध्यते। प्रतिषेधद्वारेण चैतत् प्रदर्श्यते — श्रितादयः प्राधान्येनाश्रयितव्यास्तद्विशेषणत्वेन सुपेति' इति कैयटो निरस्तः। 'श्रिताभिः सुबन्तं विशेष्यते' इत्यस्य 'सुबन्तेन श्रितादयो विशेष्यन्ते' इत्यस्य चासंभवेनासंबद्धप्रलापत्वात्। यदप्युक्तम् 'कष्टं परमश्रित इति। सुबन्तमेतन्न भवतीति संबुद्धयन्तमुदाहर्तव्यम्' इति तदतितुच्छम्, संबुद्धयन्तानां क्रियाविशेषणत्वनियतानामसमर्थत्वेन तैः समासासंभवात्। लुग्विषयेऽन्तरङ्गस्यापि संबुद्धिलोपस्याप्रवृत्त्या संबुद्धयन्तस्य श्रितान्तत्वासंभवाच्च। **सौत्रनाडिरिति**। अनुशतिकादित्वादुभयपदवृद्धिः। **अतिमहतीति**। महान्तमतिक्रान्तेति प्रादिसमासः। [11]**अस्यापत्यमिरिति**। इञो ञित्करणमुत्तरार्थमिति तत्सामर्थ्यादपि न तदन्तविधिरिति भावः। **सर्वनामाव्ययधातुविधाविति**। सर्वनामादिशब्दानां संज्ञात्वेन विधिर्यत्र तत्राद्ययोरकज्वत उपसंख्यानम्, अन्त्ये श्नम्वत इति भावः। **सर्वक इति**। अकज्विशिष्टस्य सर्वनामत्वाभावात् शीभावो न स्यादिति भावः। **उच्चकैरिति**। सुपो लुग्न स्यात्। **भिनत्तीति**। [12]'धातोः' इत्यन्तोदात्तो न स्यात्। न च प्रत्ययस्वरेण तत्सिद्धिः, आगमानुदात्तेन

---

[1] ह्रस्वार्धशब्दः — अ, म, ऋ.
[2] पा. सू. १. २. ३२.
[3] उदात्तः — अ.
[4] सार्धमात्राभागः — अ.
[5] पा. सू. १. ४. ४५.
[6] प्रदीपे 'तत्त्वबुद्धिम्' इत्यत्र 'तद्बुद्धिम्' इति मद्रपुरीमुद्रिते पाठः।
[7] सर्वादीनीति — ऋ.
[8] पा. सू. २. १. १.
[9] परिभाषा ७६.
[10] पा. सू. ४. १. ९५.
[11] 'तस्यापत्यम् अत इञ् इः' इति भाष्ये 'तस्यापत्यम् इः' इति चौखाम्बामुद्रिते पाठो दृश्यते। 'अस्यापत्यम् इः' इति रत्नप्रकाशकृत्पाठ इति भाति।
[12] पा. सू. ६. १. १६२.

यासुट्प्रदेशेन परेण बाधात्। श्नम्विशिष्टस्य तु धातुत्वे तत्र परत्वाद्धातुस्वर एव भवति। **न चेदं तदिति**। अकच [1]उपजीव्ये अपि सर्वनामाव्ययसंज्ञे अकचि सति निवर्तते, अकज्विशिष्टस्य रूपान्तरत्वात्। एवं धातुसंज्ञा। **तदन्तान्तवचनादिति**। येन विधिस्तदन्तान्तस्येति वचनाश्रयणादिति भावः। **तस्येति**। विशेषणस्येत्यर्थः। ननु 'उष्ट्रमुखः' इत्यादावुष्ट्रशब्दस्य मुखशब्दसामानाधिकरण्यासंभवेन तदवयवमुखसदृशलक्षणाश्रयणेनापि सोऽर्थो गम्यत इति युक्तं तत्रोपायान्तरस्योत्तरपदलोपस्याश्रयणम्, प्रकृते तु तच्छब्देन येनेति यच्छब्दनिर्दिष्टस्य परामर्शात् तस्यान्तशब्देन सामानाधिकरण्यसंभवाल्लक्षणाश्रयणं न युज्यते। अत एवोत्तरपदलोपकल्पनापि[2]। किं च सर्वकादेः सर्वादिरूपत्वाभावेन सर्वान्तान्तत्वमपि बाधितमित्यस्वरसादाह — **तदेकदेशविज्ञानाद्वेति**। **तदेकदेशभूत इति**। श्नमः कथंचित् मिदचोऽन्त्यात्सूत्रपर्यालोचनया धात्ववयवत्वसिद्धावप्यकचो न सिद्धमिति सादृश्यवाचकस्य भूतशब्दस्योपादानम्। अत एवेदं वचनं ज्ञापकेनैवोपपादयिष्यते। एतेन 'मध्यपातिनोऽकजादयस्तदेकदेशा इति तत्त्वबुद्धिं न विघ्नन्ति' इति कैयटो निरस्तः। अनुभवविरोधात्। न हि सर्वकशब्दं कश्चित् सर्वशब्दोऽयमिति प्रत्येति। **अक्तपरिमाणानामिति**। **अक्तं** व्यक्तम् अत्यन्तपृथग्भूतं, **परिमाणं** परिच्छेदकं शब्दप्रवृत्तिनिमित्तं येषां तेषामित्यर्थः। **यावदेव तदिति**। तत्प्रवृत्तिनिमित्तधर्मविशिष्टं यावदित्यर्थः। ते के? इत्यत आह — **य एत इति**। ननु संख्यापरिमाणशब्दानामक्तपरिमाणवाचकत्वान्न्यूनाधिकवाचकत्वाभावोऽस्तु नाम, सर्वनामाव्ययधातुशब्देषु किमायातमित्यत आह — **इमाश्चापीति**। संख्यातानुपूर्वीविशेषयुक्तवर्णसमुदायस्येमाः क्रियन्त इत्यक्तपरिमाणवाचकतासिद्धिः। एतेन 'नित्या हि शब्दा विकारोपजनरहिता इति सर्वशब्दः सर्वकशब्द इति न वक्तुं शक्यत इत्यर्थः' इति कैयटो निरस्तः। अनित्यत्वेऽपि सर्वशब्दस्य सर्वकशब्दत्वाभावे सिद्धे नित्यत्वेन तदुपपादनायोगात्। नित्यत्वे मानाभावात्। प्रत्यक्षेण घटादीनामिवानित्यत्वे गृह्यमाणे प्रमाणान्तरेण तन्नित्यत्वसाधनस्य ब्रह्मणापि कर्तुमशक्यत्वात्। अन्यथा [3]'यजमानः प्रस्तरः' [4]'आदित्यो यूपः' इत्यादिवेदेन प्रस्तरयूपादेर्यजमानादित्वस्याप्यङ्गीकर्तव्यत्वापत्तेश्च। अत एव 'यद्यपि नित्याः शब्दाः, तथापि प्रक्रियायामकजादयो विधीयमाना ज्ञापकादव्यतिरेककृत इत्यर्थः' इति तदुक्तं प्रत्युक्तम्। अनित्यत्वेऽप्येतदुपपत्त्यभावात्। न हि नित्यत्वेऽप्यनित्यत्वे वा न्यूनाधिकवर्णत्वे तत्त्वावगतिः संभवति। किं तु ज्ञापकबलेन तत्संज्ञकत्वमन्यस्यापीति तत्तत्कार्यसिद्धिः। अत एव हि भगवतोक्तम् — तदेकदेशभूतं तद्ग्रहणेन गृह्यत इति ज्ञापयति, इति॥

[१, ५४६–५५०]

(नारायणीयम्) ननु सुपा श्रितादिविशेषणे श्रितादिभिस्तदन्तविध्यप्राप्तिः, श्रितादिभिस्तु सुबयोग्यत्वान्न विशेषयिष्यते। न हि सुप्प्रत्ययः श्रिताद्यन्तो भवतीत्याह[5] — **श्रितादिभिरिति**। समर्थाधिकारात् सुपा तद्विशेषणे तदन्तविधिः। सुबन्तं च श्रितादिभिर्विशेष्यत इति तदन्तविधिप्राप्तिरित्यर्थः। विशेषणत्वे कामचाराद् वचनानावश्यकत्वमित्याह — **प्रतिषेधेति**। यथैव सुपः श्रिताद्यन्तत्वासंभवः, एवं सुबन्तस्यापीति श्रितादीनां विशेषणत्वशङ्कैव नास्तीति शङ्कते — **श्रितान्तमिति**। परिहरति — **संबुद्धीति**। अत्रापि तद्वद्वचनानावश्यकत्वमाह — **नडादीनीति**। तदन्त-

---

[1] उपजीव्येष्वपि — ब.

[2] न युज्यत इत्यनुषङ्गः।

[3] तै. सं. १. ७. ४.

[4] शाबरभाष्ये १. ४. १४. उद्धृतमिदम्।

[5] इत्यत आहेत्यर्थः।

विधिप्रार्थनोपपत्तयेऽस्त्रीप्रत्ययान्तेन समासमाह — **महान्तमिति**। एवमप्युगिल्लक्षणङीपोऽप्रार्थना, अन्यथासिद्धत्वादित्याह — **तत्रेति**। [1]अन्यथासिद्धिशङ्कापि नास्तीत्यन्येषां मतमाह — **अन्ये त्विति**। **तथा चेति**। [2]'शतुरनुमः' इत्यत्र। बृहन्महतोरशत्रन्तत्वाद्वचनम्। अस्यापत्यमित्यत्र [3]'यस्य' इति लोपे वृद्धिभाजोऽभावादस्यामवस्थायां [4]ञ्नित्करणं किमर्थं स्यात्, अत आह — **तदन्तेति**। नन्वकजर्थतया प्रवृत्ता संज्ञा कृतेऽप्यकचि न निवर्तत इति शीभावसिद्धिरित्यत्राह — **अकचीति**। प्रतिकार्यं संज्ञाप्रवृत्तिरिति पक्षे शीभावार्थसंज्ञाप्रवृत्तिकाले रूपान्तरत्वात् [5]'संज्ञाप्राप्तिरित्युपसंख्यायते। समुदायान्तरे प्रवृत्तावप्यस्मिन् समुदायेऽप्रवृत्तेति पुनः प्रवर्तेतेत्यप्याहुः। **तथैवेति**। [6]'हेतोरनुपन्यासेऽपीहातिदेशादुन्नीयते नित्यत्वादिति। आनुपूर्व्या धातुनिबन्धनप्रत्ययस्य सिद्धत्वादाह — **धातोरिति**। प्रत्ययस्वरवदागमानुदात्तत्वं धातुस्वरं किमिति न बाधते, तत्राह — **सतीति**। प्रत्यय[7]संज्ञासंनियोगेन भवदाद्युदात्तापवाद आगमानुदात्तत्वं श्नमुपदेशकाल एव प्राप्तमिति तदपेक्षः सतिशिष्टो धातुस्वरो न तेन बाधितुं शक्य इत्यर्थः। नन्वन्यावयवस्यान्यावयवत्वानुपपत्तेस्तदन्तान्तः स एव भवतीत्यत आह — **सर्वशब्दस्येति**। अगर्भिण्यवयवहस्तादेः कालान्तरे गर्भिण्यवयवत्ववदिदमत्रोपपद्यत इति भावः। यद्येवं तद्वत् तत्त्वाप्रच्युतेः 'न चेदं तत्' इति न युज्यते, तत्त्वादेव सिद्धेस्तदन्तान्तवचनवैयर्थ्यं चेति। अत्र ब्रूमः — नित्यदर्शने शब्दान्तरत्वात् तत्त्वप्रच्युतिः। तदन्तान्तव्यपदेशस्तु वचनप्रामाण्यात् सादृश्यनिमित्ततत्त्वावेदनेनापि भवति। प्रक्रियादर्शनेऽपि गर्भादिवदकचस्तिरोहितत्वाभावादस्त्येव तत्त्वप्रच्युतिः। अत्र तु तदन्तान्तव्यपदेशस्तु मुख्योऽपि स्यात्, अपूर्वोपजनात् समुदायस्य सर्वशब्दान्यत्वेऽप्यकारे सर्वशब्दावयवत्वबुद्धेरप्रच्युतेः। **वाप्रकारा इति**। क्रियावचनत्वोपाधिलाभायादिशब्दस्य प्रत्येकं संबन्धाश्रयणाद् 'वादयः' इत्यत्रादिशब्दः प्रकारार्थः। वादयश्च भ्वादिभिर्विशेष्यन्ते। **वाचनिक इति**। न चात्र पक्षे तदन्ते 'परमसर्वस्मै' इत्यादौ कथमिति वाच्यम्, हस्तावयवाङ्गुल्यादेः शरीरावयवत्ववत् सर्वावयवाकारस्य परमसर्वावयवत्वात्। **यथेति**। अवयवदर्शनादवयव्यनुमानमिति न व्याख्येयम्, तथा सति प्रस्तुतेऽदृष्टान्तत्वात्। किं तु परिदृश्यमानावयव एवावयविबुद्धिरिति। सास्नादिवदकारस्यासाधारणत्वाभावात् तद्दर्शनमात्रान्न [8]'सर्वशब्दबुद्धिरित्यभिमन्यमानं प्रत्याह — **अथवेति**। सर्वशब्दावयवे सर्वशब्दत्वस्यारोपात् सर्वकशब्दे सर्वशब्दान्त इति व्यपदेशस्यामुख्यत्वात् कथं सर्वनामत्वम्, अत आह — **गौणेनापीति**। रन्ध्रनिगूहनं छत्त्रपदेन लक्ष्यते, पार्श्वेन वक्रता, अयश्शूलेन क्रौर्यम्, दण्डाजिनेन दम्भः, शीतोष्णाभ्यां मान्द्यशैघ्र्ये, अर्धह्रस्वेनार्धमात्राकालः। अनुभवानादरेणानुमानेनाभिमतं साधयति — **मध्येति**। विमतस्तदेकदेशः, तन्मध्यपतितत्वात्, गङ्गानुप्रविष्टजलान्तरवत्। विमतस्तद्ग्रहणग्राह्यः, तदेकदेशत्वात्, गङ्गान्तर्गतजलवदेव। अञ्जरनेकार्थत्वाद्धातूनां परिच्छेदार्थ इत्याह — **परीति**। परिमाणानपेक्षत्वमुपक्रम्य 'यावदेव' इत्यादिना तदपेक्षाप्रतिपादनमसंगतमित्यत्राह — **अल्पमिति**। **यावदिति**। विशिष्टपरिमाणयोगिप्रतिपादनं नोच्यते, किं त्वनियतपरिमाणप्रतिपादनमित्यर्थः। अत्र संख्यादिशब्दानामभावात् कथमुक्तपरिमाणप्रतीतिः, अत आह — **सर्वादीति**। स्वरूपवचनेन विशिष्टरूपग्रहणादुक्तपरिमाणस्य संज्ञाकरणमित्यर्थः। ननु [9]'स्वरूपाभेदोऽनुमानेन साधितः, तत्राह — **नित्या हीति**। तन्मध्यपतितत्व-

---

[1] अनन्यथासिद्धि — ग.
[2] पा. सू. ६. १. १७३.
[3] पा. सू. ६. ४. १४८.
[4] ङित्करणं — ग.
[5] संज्ञाया अप्राप्तिरित्यर्थः।
[6] प्राप्तेऽप्यनुपन्यासेऽपि —ग.
[7] संज्ञानियोगेन — ग.
[8] सर्वशब्दे बुद्धिः — ग.
[9] स्वरूपभेदः — ग.

हेतुरसिद्ध इति भावः। अकचो मध्यपाते ह्यपूर्वोपजननादनित्यत्वं स्यात्[1]। ननु नित्यशब्दत्वात् सर्वशब्देऽकजित्येतदेव नास्ति। [यदा तु कार्यशब्दत्वं] तदा तन्मध्यपतितत्वात् तदेकदेशत्वानुमानात् तद्ग्रहणेन ग्रहणं ज्ञापकमन्तरेण सिध्यतीत्याशङ्क्य 'अकज्वान् सर्वशब्दः' इत्येतत् तावदुपपादयति — **यद्यपीति**। न हि नित्यः शब्द इत्येतावताकजाद्यनन्वाख्यानम्, खदिरे कण्टकवत्त्वोपदेशवदागमाद्यनुशासनाङ्गीकारेण यथास्थिताकजाद्यनुशासनोपपत्तेः। कल्पितरूपादकल्पितप्रतिपत्तिरिति पक्षे वा कल्पितरूपस्याकजादिमतः सर्वनामादिसंज्ञाविधानोपपत्तिः। नन्वेवं ज्ञापनवैयर्थ्यमुक्तम्, अत आह — **ज्ञापकादिति**। उक्तमेतदधस्तादस्माभिः। तन्मध्यपतितानामप्येषां न जलगर्भादिवत् तिरोधानम्, येन स्वरूपाभेदकत्वं स्यात्। ततश्चानुमानेऽप्यन्तर्हितरूपत्वमुपाधिरवसेयः। भाष्येऽपि **तदेकदेशभूतमिति**। तन्मध्यपतितमित्यर्थः। तदेकदेशभूतं सत् तद्ग्रहणेन गृह्यत इति ज्ञाप्यकोटौ वा निवेशः। [2]उद्देश्यस्तु प्रक्रान्तस्तन्मध्यपतितः॥

[१, ५५०–५५४]

(लघुविवरणम्) कर्मेति। [3]'कर्मण्यण्' इत्यतोऽनुवर्तमानम्। ननु 'येन विधिस्तदन्तस्य' इति विधौ विधीयमानस्तदन्तविधिः प्रतिषेधे कथं स्यादित्यत आह — **विधीयत इतीति**। दित्यन्तात् प्रत्ययविधिर्नञ्पूर्वत्व एवेत्यभिप्रेत्याह — **परमेति**। उक्तेऽर्थे गमकमाह — **तथा चेति**। यदि ह्यत्र सूत्रे 'स्वं रूपम्' इत्यस्यानु[4]वृत्तिरभिप्रेताभविष्यत् तदान्तरेणापि व्यपदेशिवद्भावं [5]'सुपि च' इति दीर्घस्तदन्तविधिना अकारान्तस्य भविष्यति स्वस्य च रूपस्येति वचनात् 'आभ्याम्' इत्यादावपीति व्यपदेशिवद्भावस्य प्रयोजनं नावक्ष्यदिति भावः। ननु लिङ्गविशिष्टपरिभाषा प्रातिपदिकविशेषविषया, न तु प्रातिपदिकशब्दोच्चारणविहितकार्यविषयेत्यत्राह — **न च लिङ्गेति**। ननु यदि तदन्तविधिना केवलस्य 'तस्य च' इत्यनेन, तर्हि 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति व्यर्थमेव स्यादित्यत्राह — **अप्रातिपदिकेनेति त्विति**। भाष्ये 'सुपाञ्चालकः' इत्यादौ [6]'अवृद्धादपि बहुवचनविषयात्' इति वुञ्। [7]'सुसर्वार्धाज्जनपदस्य' [8]'दिशोऽमद्राणाम्' इति च यथायोगं वृद्धिः। 'पूर्वशारदम्' इत्यादौ [9]'अवयवादृतोः' इत्युत्तरपदवृद्धिः॥

[१, ५५०–५५४]

(विवरणम्) यद्यपि सौत्रतदन्तविधेः प्रयोजनं पृष्टम्, तथापि सच्छिष्यस्यापृष्टमपि वक्तव्यमित्यपूर्वतदन्तविधिप्रयोजनमुपपन्नमेवेत्याह — **अपूर्वो वेति**। [10]'नायमपूर्वस्तदन्तविधिरित्याह — **भयेति**। भयं चाढ्यादि चेति द्वन्द्वमभिप्रेत्याह — **क्षेमेति**। प्रतिषेधविरोधी न सूत्रे विधिर्विवक्षित इति प्रतिषेधस्यापि प्रयोजनत्वमुपपन्नमित्याह — **विधीयत इति**। ननु 'स्वं रूपम्' इत्यनुवृत्तेर्विशेषणं तदन्तस्येव स्वस्यापि संज्ञेति किं 'तस्य च' इत्यनेनेत्यत आह — **स्वमिति**। **प्रत्य-**

---

[1] अनित्यं स्यात् — ग.
[2] उद्देशस्तु — ग.
[3] पा. सू. ३. २. १.
[4] वृत्तिरभिमता — ण.
[5] पा. सू. ७. ३. १०२.
[6] पा. सू. ४. २. १२५.
[7] पा. सू. ७. ३. १२.
[8] पा. सू. ७. ३. १३.
[9] पा. सू. ७. ३. ११.
[10] नायमपूर्वतदन्त — ञा.

यान्तत्वात् ङीष्प्रत्ययान्तत्वादित्यर्थः। स च ङीष् [1]'अन्यतो ङीष्' इत्यनेनेति केचित्। अपरे [2]'जातेः' इत्यनेनेत्याहुः। **स्वरूपविधिविषयैव** प्रातिपदिकविशेषोपादानविहितकार्यविषयैवेत्यर्थः। भाष्ये **केवलादिति**। सूत्रमधीते वेद वा, दशाधिका अस्मिन् [3]शत इत्यादावित्यर्थः। **सिद्धमत्रेति**। प्रातिपदिकादित्यधिकृतस्य सूत्रादिभिर्विशेषणादिति भावः। **सोऽयमिति**। न्यायाद्वचनस्य बलीयस्त्वादित्यर्थः। विरोधे वचनं बलीयः, स एव नास्तीति 'नात्र' इत्युक्तम्। **सर्वस्मात्** पूर्वशब्दव्यतिरिक्तादपीत्यर्थः। ननु यत्र तदन्तविधिः 'तस्य च' इति केवलादपि भवति चेत्, मुधा व्यपदेशिवद्भावोऽप्रातिपदिकेनेति, अत आह — **अप्रातिपदिकेनेति त्विति**। [4]'तद्वहति रथ' इति [5]'नौवयः' इति [6]'मतजनहलात्' इति च वार्तिके रथादिभ्यो यद्विधिर्द्रष्टव्यः। **ठग्विधौ** [7]'हलसीरात्' इत्यनेन। भाष्ये 'सुपाञ्चालकः' इत्यादौ [8]'अवृद्धादपि बहुवचनविषयात्' इति वुञ्। [9]'सुसर्वार्धाज्जनपदस्य' [10]'दिशोऽमद्राणाम्' इति यथायोगमुत्तरपदवृद्धिः। **वृद्धिमान्** वृद्धिनिमित्तमित्यर्थः। **अवयवानां** पूर्वपदत्व इति शेषः। **शरद इति**। [11]'पूर्वापराधरोत्तरम्' इत्येकदेशिसमासः। **ऋतुलक्षणः** [12]'संधिवेलाद्यृतु' इत्यनेन। [13]'अवयवात्' इति चोत्तरपदवृद्धिः। ननु शरच्छब्द एव कालवाची, न पूर्वशरच्छब्द इति कथं ठञित्याह[14] — **तत्रेति**। न रूढयैवेत्यर्थः। **समासे** [15]'तद्धितार्थ' इत्यनेनेति शेषः। **ठक्प्रतिषेधात्** [16]'आर्हादिगोपुच्छसंख्या' इत्यनेन। अस्येति [17]प्रत्ययार्थनिर्देशात् 'तत्' इति समर्थविभक्तिनिर्देशादिति योजना। तेन प्रकृतं लुक्संबद्धमिति सूचनादनेन विहितस्य लुगभाव इत्यर्थः। **कृते वेति**। अनुवर्तमानेन 'सोऽस्य' इत्यनेन [18]'परिमाणम्' [19]'संख्यायाः' इति विहितस्य लुकि कृते पुनः [20]'तदस्य परिमाणम्' इति वचनसामर्थ्यात् स्वार्थे तज्जातीयः प्रत्ययः। तस्य च विधानसामर्थ्याद् द्विगुनिमित्तत्वाभावाद्वा लुगभाव इत्यर्थः॥

[१, ५५०–५५४]

(उद्द्योतनम्) अपूर्वो वेति। यद्यपि सूत्रप्रयोजनप्रश्नस्यापूर्वोपसंख्यानं नोत्तरम्, तथाप्यपृष्टमपि सच्छिष्याय [21]सौहार्देन वक्तव्यमित्यपूर्वतदन्तविधिप्रयोजनोक्तिर्युक्तेति भावः। भयादौ नापूर्वतदन्तविधिरित्याह — **भयेति**। आढ्यादिवत् [22]क्षेमादिनापि तदन्तग्रहणशङ्कां वारयति — **क्षेमेति**। ननु सूत्रे विधिग्रहणात् प्रतिषेधस्य च तद्विरोधित्वात् कथं प्रतिषेधः प्रयोजनम्, अत आह —

---

[1] पा. सू. ४. १. ४०.
[2] पा. सू. ४. १. ६३.
[3] शते सहस्रे वेत्यादौ — ञ.
[4] पा. सू. ४. ४. ७६.
[5] पा. सू. ४. ४. ९१.
[6] पा. सू. ४. ४. ९७.
[7] पा. सू. ४. ४. ८१.
[8] पा. सू. ४. २. १२५.
[9] पा. सू. ७. ३. १२.
[10] पा. सू. ७. ३. १३.
[11] पा. सू. २. २. १.
[12] पा. सू. ४. ३. १६.
[13] पा. सू. ७. ३. ११.
[14] इत्याशङ्कायामाहेत्यर्थः।
[15] पा. सू. २. १. ५१.
[16] पा. सू. ५. १. १९.
[17] प्रदीपे 'पुनः प्रत्ययार्थं समर्थविभक्तिनिर्देशात्' इत्यत्र 'पुनः प्रत्ययार्थसमर्थविभक्तिनिर्देशात्' इति पाठो निर्णयसागरमुद्रिते दृश्यते। सोऽत्र स्वीकृतः।
[18] पा. सू. ५. १. ७७.
[19] पा. सू. ५. १. ५८.
[20] पा. सू. ५. १. ५७.
[21] 'सौहार्देन' इति नास्ति — अ.
[22] क्षेमादीनामपि — म.

विधीयत इति। अज्ञातज्ञापकत्व[1]लक्षणं विधित्वं प्रतिषेधस्यापीति भावः। [2]भयादिवदत्रापि तदन्तविधिरित्याह — **स्वस्त्रादिभिरिति**। विशेष्यसंनिधिमाह — [3]**द्विग्विति**। दितिशब्दे तदन्तविधावतिप्रसङ्गं निराह — **परमेति**। ननु [4]'स्वं रूपम्' इत्यनुवृत्त्या विशेषणं तदन्तस्येव स्वस्यापि [5]संज्ञेति किं 'तस्य च' इत्यनेन, अत आह — **स्वमिति**। अनिष्टत्वे ज्ञापकमाह — **तथा चेति**। ननु रोणीशब्दस्याप्रातिपदिकत्वेन व्यपदेशिवद्भावो भविष्यतीति 'तस्य च' इत्यस्य न प्रयोजनमिति शङ्कते — **नन्विति**। **प्रत्ययान्तत्वात्** ङीषन्तत्वात्। 'रोणी' इत्यत्र [6]'अन्यतो ङीष्' इति [7]वा [8]'जातेः' इत्यनेन वा ङीषित्याहुः। **स्वरूपेति**। [9]प्रातिपदिकविशेषोपादानेन विहितकार्यविषयैवेत्यर्थः। भाष्ये **केवलादिति**। सूत्रमधीते वेद वा, दशाधिका अस्मिन् शते, इत्यादावित्यर्थः। 'सूत्रान्तात्' इत्यन्तग्रहणसामर्थ्यात् केवलान्न भविष्यतीत्याह — भाष्ये **नैतदिति**। भाष्ये **सिद्धमिति**। प्रातिपदिकस्य सूत्रादिभिर्विशेषणादिति भावः। अत्रान्तग्रहणं न नियमार्थम्, किं तु विध्यर्थमेव। व्यपदेशिवद्भावेन[10] केवलादुत्पत्तिनिरासाय 'अप्रातिपदिकेन' इति वक्तव्यमेवेत्याह — भाष्ये **नात्रेति**। भाष्ये **यदयमिति**। 'सपूर्वादिनिः' इत्येव सूत्रे कृते व्यपदेशिवद्भावेन [10]केवलपूर्वशब्दादपि सिद्धौ 'पूर्वात्' इति व्यर्थं सत् प्रातिपदिकेन व्यपदेशिवद्भावो नास्तीति ज्ञापयतीत्यर्थः। 'पूर्वात्' इत्यस्य 'सपूर्वात्' इत्यत्रोपयोगान्न ज्ञापकत्वमित्याह — भाष्ये **अस्ति हीति**। उपयोगमेवाह — **पूर्वग्रहण इति**। **सर्वस्मात्** पूर्वशब्दव्यतिरिक्तादपीत्यर्थः। योगविभागो ज्ञापक इत्याह — भाष्ये **यत्तर्हीति**। भाष्ये [11]**किं पुनरयमस्यैवेति**। 'रोण्या अण्ग्रहणम्' इत्यस्यैवेत्यर्थः। ननु यत्र तदन्तविधिस्तत्र 'तस्य च' इति केवलादपि भवतीति 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति व्यर्थम्, अत आह — **अप्रातिपदिकेनेति त्विति**। **यत्रेति**। तत्रान्तग्रहणसद्भावेन 'येन विधिः' इत्यस्याप्रवृत्त्या तच्छेषस्य [12]'तस्य च' इत्यस्याप्रवृत्तावपि व्यपदेशिवद्भावेन केवलान्मा भूदिति 'अप्रातिपदिकेन' इति वक्तव्यमित्यर्थः। भाष्ये **रथेति**। [13]'तद्वहति' इति रथात् [14]'नौवयोधर्म' इति सूत्रेण सीताशब्दात् [15]'मतजनहल'[16] इति सूत्रेण हलशब्दाच्च रथं वहति, सीतया संमितं, हलस्य कर्षः, इति यथाक्रममेष्वर्थेषु यद्विधीयते। तत्र यद्ग्रहणस्य प्रयोजनमाह — **ठग्विधाविति**। [17]'हलसीराट्ठक्' इत्यनेन। भाष्ये **सुसर्वेति**। जनपदवाचिनः शब्दात् प्रत्ययविधौ तदन्तविधिः। सोऽपि न सर्वत्र, किं तु स्वादिभ्यः परस्यैवेत्यर्थः। भाष्ये 'सुपाञ्चालकः' इत्यादिषु [18]'अवृद्धादपि बहुवचनविषयात्' इति वुञ् शैषिकः। [19]'सुसर्वार्धाज्जनपदस्य' [20]'दिशोऽमद्राणाम्' इत्युत्तरपदवृद्धिः। अत्रोत्तरपदवृद्धिविधिसामर्थ्यात् तदन्तविधिसिद्धेरिदं मन्दप्रयोजनमित्याहुः।

---

[1] लक्षणविधित्वं — अ.
[2] भयादिवत् तत्रापि — ऋ.
[3] प्रदीपे 'द्विगुना संनिधापितम्' इत्यत्र 'द्विगु-संनिधापितम्' इत्यन्नंभट्टपाठ इति भाति।
[4] पा. सू. १. १. ६८.
[5] 'संज्ञा' इति नास्ति — अ.
[6] पा. सू. ४. १. ४०.
[7] वाशब्दो नास्ति — म.
[8] पा. सू. ४. १. ६३.
[9] विषय एवेत्यर्थः — अ, म.
[10] 'केवल' इति नास्ति — म.
[11] किं पुनरस्यैवेति — अ.
[12] तस्याप्रवृत्तावपि — म.
[13] पा. सू. ४. ४. ७६.
[14] पा. सू. ४. ४. ९१.
[15] पा. सू. ४. ४. ९७.
[16] 'हलात्' इति युक्तम्।
[17] पा. सू. ४. ३. १२४.
[18] पा. सू. ४. २. १२५.
[19] पा. सू. ७. ३. १२.
[20] पा. सू. ७. ३. १३.

वृद्धिमान् वृद्धिनिमित्तम्। **अवयवानां** पूर्वपदत्व इति शेषः। **शरदः पूर्व इति**। [1]'पूर्वापराधरोत्तरम्' इत्येकदेशिसमासः। **ऋतुलक्षणः** [2]'संधिवेला'दिसूत्रेण। पूर्वशारदमित्यादौ [3]'अवयवादृतोः' इत्युत्तरपदवृद्धिः। ननु प्रावृट्छब्दस्य ऋतुवाचित्वाभावात् कथम् ऋत्वण्, अत आह — **प्रावृट्शब्द इति**। ननु शरच्छब्द एव कालवाची, न पूर्वशरच्छब्द इति कथं ठञ्, अत आह — **तत्रेति**। [4]'कादम्बपुष्पिकः' इत्यादिसिद्धय इति भावः। **समास इति**। [5]'तद्धितार्थ' इत्यनुवृत्तौ [6]'संख्यापूर्वः' इत्यनेन। ननु परत्वाट्ठका भाव्यम्, कथं ठञ्, अत आह — **आर्हादिति**। **तदन्तेति**। 'संख्यायाः प्रयोजनम्' इत्यनेनैव। **ठक्प्रतिषेधात्** [7]'आर्हादगोपुच्छसंख्या' इत्यनेन ठक्प्रतिषेधादित्यर्थः। **पुनरिति**। 'अस्य' इति प्रत्ययार्थस्य 'तत्' इति प्रथमायाश्च निर्देशादित्यर्थः। तेन प्राक् कृतं [8]'लुक्संबद्धमिति [9]'सूचनादनेन विहितस्य लुगभाव इति भावः। [10]**कृतेऽपीति**। अनुवर्तमानेन 'सोऽस्य' इत्यनेन सहितेन 'परिमाणम्' इत्यनेन विहितस्य लुकि कृते पुनः [11]'तदस्य परिमाणम्' इति विहितस्य न लुगित्यर्थः॥

[१, ५५०–५५४]

(**रत्नप्रकाशः**) इदानीं सूत्रप्रयोजनकथनव्याजेन 'तस्य च' इति विशेषणसंबन्धप्रतिपादनपराणि वार्तिकान्यवतारयति — **कानि पुनरिति**। **सर्वनामाव्ययसंज्ञायामिति**। सर्वनामसंज्ञा [12]निषेधोऽपि सर्वनामसंज्ञाविषयो भवतीति तत्रापि तदन्तविधिः। तेन [13]'तृतीयासमासे' [14]'द्वन्द्वे च' इत्यत्र सर्वादेस्तदन्तस्य च सर्वनामतानिषेधात् 'मासपूर्वाय, मासेन परमपूर्वाय, वर्णाश्रमेतराणाम्' इत्यादौ सर्वाद्यन्तसंज्ञामादायापि दोषापादनं न शक्यं कर्तुम्। एतेन 'अत्र सर्वनामता न स्यात्' इत्येवं ते सूत्रे व्याचक्षाणाः प्रत्युक्ताः, सर्वनामताशब्दस्य तत्रानधिकृतत्वात्। समासस्य सर्वनामतानिषेधेऽप्यवयवस्य तामादायातिप्रसङ्गसंभवात्। विहितविशेषणाद्याश्रयणेन तत्परिहारस्य [15]पायसभिक्षाटनीयत्वाच्च। ननु सर्वनामाव्ययसंज्ञाविधौ [16]विशेष्यस्यानिर्देशात् कथं तदन्तविधिरिति चेन्न, विशेषाकारेण कस्यचिद्विशेष्यस्यानिर्देशेऽपि योग्यतया शब्दसामान्यस्यैव विशेष्यस्य संभवात्। न चैवम् [17]'इको यणचि' इत्यादावपि तदन्तविधिप्रसङ्गः, विशेषणविशेष्यभावे कामचार इति भगवतोक्तत्वेऽपि लौकिकत्वेऽपि सर्वथा लक्ष्यस्यानुसरणीयत्वेन यादृशविशेषणविशेष्यभाव आश्रिते लक्ष्यसिद्धिर्भवति तस्यैवाश्रयणीयत्वेन तत्रेगादीनां विशेषणतानाश्रयणात्। एतेन [18]"विधिविधानविधि-

---

[1] पा. सू. २. २. १.
[2] पा. सू. ४. ३. १६.
[3] पा. सू. ७. ३. ११.
[4] इदं काशिकायां स्पष्टम्।
[5] पा. सू. २. १. ५१.
[6] पा. सू. २. १. ५२.
[7] पा. सू. ५. १. १९.
[8] लुक्संबन्धमिति — ऋ.
[9] 'सूचनात्' इत्यतः प्राक् 'तेन' इत्यधिकम् —अ.
[10] प्रदीपे 'कृते वा लुकि' इत्यत्र 'कृतेऽपि वा लुकि' इत्यन्नंभट्टपाठ इति भाति॥ कृतेऽपि चेति — अ.
[11] पा. सू. ५. १. ५७.
[12] निषेधेऽपि — ब.
[13] पा. सू. १. १. ३०.
[14] पा. सू. १. १. ३१.
[15] 'स्वगृहे पायसं त्यक्त्वा भिक्षामटति दुर्मतिः' इति न्यायाकारः।
[16] विशेषस्यानिर्देशात् — ब.
[17] पा. सू. ६. १. ७७.
[18] विधिः कार्यम्, विधानं विधिकरणं विशेषणम् विधिभाक् विशेष्यमित्यर्थः।

भाजां त्रयाणां संनिधाने तदन्तविधिः' इति वदन्तः प्रत्युक्ताः। तत्त्रितयशून्यस्थलस्याप्रसिद्धेः। **भयाढ्यादिग्रहणमिति**। [1]'मेघर्तिभयेषु कृञः' इति सूत्रे भयशब्देन तदन्तविधिः, [2]'आढ्यसुभग-स्थूल' इति सूत्रे आढ्यादिभिः प्रियान्तैरिति भावः। **ङीप्प्रतिषेध इति**। 'येन विधिः' इति सूत्रे विधिशब्दः प्रतिषेधस्याप्युपलक्षणमिति भावः। **द्विपरमबिस्तेति**। द्विगुना संनिधापित-मुत्तरपदं बिस्तादिभिर्विशेषितं ज्ञेयम्। **दितिग्रहणमिति**। परमदित्यादिभ्यस्त्वनभिधानात् ण्यो न भविष्यतीति भावः। **तस्य चेति**। [3]'स्वं रूपम्' इति नानुवर्तत इति भावः। ननु तदनु-वृत्त्यैव सिद्धेऽपूर्वं 'तस्य च' इति किमर्थं क्रियत इति चेत् शृणु, अत्र प्रयोजनवार्तिकेषु यद्विशेषण-मुपात्तं तस्यैव स्वरूपस्य ग्रहणं भवतु नान्यत्रेत्येतदर्थं 'तस्य च' इति वचनम्। तेन 'कुमारी-मिच्छन् कुमारीवाचरन् वा ब्राह्मणः कुमारी' इत्यत्र [4]'गोस्त्रियोरुपसर्जनस्य' इति ह्रस्वो न भवति, इति। न च तत्र व्यपदेशिवद्भावेन स्त्रीप्रत्ययान्ततेति ह्रस्वः कुतो नेति वाच्यम्, प्रातिपदिक-ग्रहणेन लिङ्गविशिष्टस्यापि ग्रहणमिति 'व्यपदेशिवद्भावोऽप्रातिपदिकेन' इति निषेधात्। अन्यथा रोणीशब्दाद् व्यपदेशिवद्भावेन सिद्धेऽणि 'तस्य च' इत्यस्य 'रौणः' इत्युदाहरणमसंगतं स्यात्। **किं पुनः कारणमिति**। कस्मात् पुनः कारणादित्यर्थः। [5]'निमित्तकारणहेतुषु' इति प्रथमा। तत्र कारणशब्दः प्रयोजनपरः, प्रयोजनस्याप्यत्र शास्त्रे हेतुत्वेन ग्रहणात्। अत एव 'नैतदस्ति प्रयोजनम्' इत्युत्तरभाष्यस्योपपन्नत्वाच्च। **नैतदस्तीति**। 'सपूर्वादिनिः' इत्युक्ते विद्यमानपूर्वात् सर्वस्मात् स्यादिति तद्व्यावृत्तये कृतं पूर्वाद्ग्रहणं न ज्ञापकमिति भावः। **यच्चानुक्रान्तमिति**। 'प्रयोजनं सर्वनामाव्ययसंज्ञायाम्' इत्यारभ्येति शेषः। **यच्चानुक्रंस्यत इति**। 'पदाङ्गाधिकारे च' इत्यभिव्याप्येत्यर्थः। यत्तु कैयटेनोक्तम् "अप्रातिपदिकेनेति निषेधो यत्रान्तग्रहणं सूत्र एवोपात्तं तत्र। यथा [6]'दशान्ताड्डः' इति, दशाधिका अस्मिन् शत इत्यत्र न भवति" इति। तन्न, ङ्यन्तादाबन्ताच्च क्यच्याचारक्विपि च कर्तरि क्विपि कोटिशस्तदुदाहरणानां सत्त्वेनान्तग्रहणं सूत्र एवोपात्तमित्यवधारणासंभवात्। **यद्विधाविति**। तेन परमहलशब्दाट्ठग् न। **रथ्य इति**। रथा-द्यत्[7]। [8]'तद्वहति रथयुगप्रासङ्गम्' इति यत्। **सीत्यमिति**। [9]'नौवयोधर्म' इत्यादिना यत्। **हल्येति**। हलस्य कृष्टिरित्यर्थः। [10]'मतजनहलात् करणजल्पकर्षेषु' इति यत्। **सुसर्वार्धदिगिति**। जनपदवाचकान्तस्य सुसर्वादिपूर्वकस्य संज्ञेति भावः। **सुपाञ्चालक इति**। [11]'जनपदतदवध्योश्च' इति वुञ्। **ऋतोरिति**। ऋतुवाचकाद् वृद्धिनिमित्तप्रत्ययविधौ तद्वाचकान्तस्यावयववाचिपूर्वकस्य संज्ञेति भावः। **पूर्वशारदमिति**। पूर्वस्यां शरदि भवमित्यर्थः। [12]'सन्धिवेलाद्यृतुनक्षत्रेभ्योऽण्' इत्यण्। **ठञ्विधाविति**। ठञ्धिकार इत्यर्थः। तद्विषय इति यावत्। न हि [13]'प्राग्वतेष्ठञ्' इति ठञ्विधौ संख्याग्रहणमस्ति। तत्र 'संख्यायाः' इति पञ्चम्यन्तस्यापि तन्त्रेण निर्देशः। तेन संख्यायाः परेणापि तदन्तविधिः सिध्यति। इममेवार्थं मनसि निधायोक्तं वार्तिककृता [14]'असमासे निष्कादिभ्यः' इति सूत्रे — [15]'प्राग्वतेः संख्यापूर्वपदानां तदन्तग्रहणमलुकीति वाच्यम्, इति। तेन

---

[1] पा. सू. ३. २. ४३.
[2] पा. सू. ३. २. ५६.
[3] पा. सू. १. १. ६८.
[4] पा. सू. १. २. ४८.
[5] का. वा. २. ३. २३–१.
[6] पा. सू. ५. २. ४५.
[7] अत्र 'यत्' इत्यधिकं भाति।
[8] पा. सू. ४. ४. ७६.
[9] पा. सू. ४. ४. ९१.
[10] पा. सू. ४. ४. ९७.
[11] पा. सू. ४. २. १२४.
[12] पा. सू. ४. ३. १६.
[13] पा. सू. ५. १. १८.
[14] पा. सू. ५. १. २०.
[15] का. वा. ५. १. २०–२.

तस्यापि वार्तिकस्य 'तस्य च' इति शेषसंबन्धो भवति। अत एव 'षाष्टिकः' इत्याद्यपि सिध्यति। अन्यथा प्रातिपदिकेन व्यपदेशिवद्भावाभावान्न सिध्येत्। **द्विषाष्टिकमिति**। द्व्यधिकया षष्ट्या [1]क्रीतमित्यर्थः। [2]'आर्हादगोपुच्छसंख्यापरिमाणात्' इति संख्यान्तस्यापि पर्युदासात् ठञेवेति भावः। यद्यपि द्विषष्ट्यादयः शब्दाः संख्यावाचका एव, तथापि तेषां संख्यान्तताप्यस्तीत्युदाहृतम्। गोशतेन क्रीतं 'गौशतिकम्' इति त्वसाधारणोदाहरणम्। तेन 'पारायणिकः' इत्याद्यपि सिध्यति। अन्यथा प्रातिपदिकेन व्यपदेशिवद्भावाभावान्न सिध्येत्। एतेन "द्वे षष्टी परिमाणमस्येति द्विषाष्टिकम्, [3]'अध्यर्धपूर्व' इति लुङ् न भवति। [4]"सोऽस्यांशवस्नभृतयः' इत्यतः सोऽस्येत्यनुवर्तमाने [5]"तदस्य परिमाणम्' इत्यत्र पुनः प्रत्ययार्थसमर्थविभक्तिनिर्देशात्। कृते वा लुकि पुनस्तन्निर्देशसामर्थ्यात् पुनः प्रत्ययः। तद्विधानसामर्थ्यात् पुनर्लुगभावः" इति कैयटो निरस्तः। [6]"संख्यायाः संज्ञासंघसूत्राध्ययनेषु' इति सूत्रगतेन [7]"अवश्यं चैतदेवं विज्ञेयम्, इह वचने हि लुक्प्रसङ्गात् — द्विषाष्टिकः, त्रिषाष्टिकः' इति भाष्येण विरोधात्। 'द्विप्रस्थो राशिः' इत्यादौ लुगभावप्रसङ्गाच्च। ननु "तदस्य परिमाणम्' इति सूत्रे 'तदस्य' इत्यनर्थकं स्यादिति चेत्, भवतु नाम, न हि तत्सार्थक्यायास्मदादिभिः किंचित् कल्पयितुं शक्यते। **धर्मान्नञ इति**। परमधर्मादिरनभिधानान्नेति भावः॥

[१, ५५०–५५४]

(**नारायणीयम्**) किमिदं सूत्रप्राप्तेर्विषयप्रदर्शनपरं वार्तिकम्, उताप्राप्ततदन्तविधेः प्रयोजनत्वेनोपसंख्यानपरम्। नाद्यः, विशेष्यासंनिधानात्, [9]"ग्रहणवता' इति निषेधाच्च। नान्त्यः, 'अस्य योगस्य' इत्युपक्रमादित्याशङ्क्याह — **अन्वर्थेति**। [10]"ग्रहणवता' इति निषेधः प्रत्ययविधिविषयः। 'सर्वादि' इति समासप्रत्याय्यत्वादुच्चारणं नास्तीत्यप्याहुः। श्रुतस्य संज्ञित्वोपपत्तेराक्षेपायोगमाशङ्क्याह — **अपूर्वो वेति**। अस्मिन् सूत्रे उपसंख्यानसाध्यमेतत्सूत्रसंबन्धि [11]भवति। [12]**उत्तरत्रापीति**। उत्तरवार्तिकेष्वपि यथायोग्यमुभयमित्यर्थः। नेदमुपसंख्यानमित्याह — **भयेति**। न च प्रत्ययविधित्वान्निषेधप्राप्तिः, प्रत्ययप्रकृतेरेव[13] निषेधात्। यथा [14]"नडादिभ्यः फक्' इतीति केचित्। अन्ये तु 'प्रतिप्रसवोऽयम्, नापूर्वविधिरित्याह — **भयेति**।' इत्यवतारयन्ति। एवं तु 'क्षेम' इति समनन्तरग्रन्थेऽतिप्रसङ्गपरिहारोऽनुपपन्नः। तस्मात् प्राचीनव्याख्या युक्ता। [15]"विधौ प्रतिषेधः, प्रतिषेधश्चायम्' इति प्रदेशान्तरे विधौ चोदितस्य प्रतिषेधेऽनङ्गीकारादाह — **विधीयत इति**। रूढ्याश्रयेण तत्, अत्र तु योगाश्रयणम्। योगश्च विधिनिषेधोभयसाधारण इत्यर्थः।

---

[1] कृतमित्यर्थः —ब.
[2] पा. सू. ५. १. १९.
[3] पा. सू. ५. १. २८.
[4] पा. सू. ५. १. ५६.
[5] पा. सू. ५. १. ५७.
[6] पा. सू. ५. १. ५८.
[7] महाभाष्यम् ५. १. ५८.
[8] पा. सू. ५. १. ५७.
[9] परिभाषा ३१.
[10] परिभाषा ३१.
[11] अतः 'अस्य योगस्य' इत्युपक्रमोपपत्तिरिति भावः।
[12] प्रदीपे 'एवमुत्तरत्र ज्ञेयम्' इत्यत्र 'एवमुत्तरत्रापि ज्ञेयम्' इति पाठः स्वीकृतः।
[13] प्रकृतेरेवं निषेधात् — ग.
[14] पा. सू. ४. १. ९९.
[15] महाभाष्यम् ५. १. २०.

कथं भवति, विशेष्यासंनिधेः, अत आह — **स्वस्त्रादिभिरिति**। [1]प्रत्ययविधिप्रतिषेधे विधिशब्दो रूढः। [2]'ग्रहणवता' इत्यपि निषेधः प्रत्ययविधौ। समासनिर्देशादनुच्चारणं वा। **द्विगुनेति**। न च श्रुतद्विगोर्विशेष्यत्वोपपत्तौ कथमुत्तरपदाक्षेप इति वाच्यम्, न हि विशेषणेन तदाक्षेप उच्यते, येनात्र शङ्का स्यात्। द्विगुना त्वाक्षेपः। एतावत्तु परमिष्टसिद्धये श्रुतपरित्यागेनाक्षिप्तस्य बिस्तादिविशेषणाश्रयणमिति। ननु दितिना प्रातिपदिकस्य विशेषणेन तदन्तविध्यङ्गीकारेऽतिप्रसङ्गात् प्रातिपदिकेन दितिर्विशेषणीय इत्यत्राह — **परमेति**। इदं तूपसंख्यानमेव, निषेधप्राप्तेः। एवमन्यत्रापि प्रतिषेधप्राप्तौ प्रतिप्रसवः, [3]अप्राप्तौ त्वपूर्वविधिः, अन्यत्र सौत्रप्राप्त्युदाहरणप्रदर्शनमित्यवगन्तव्यम्। प्रकृतानुवृत्त्याभिमतसिद्धेरिदं वचनं किमर्थम्, अत आह — **स्वमिति**। अनिच्छायां प्रमाणमाह — **तथा चेति**। नेच्छतीति च कथम्, तस्यापि कथनमन्यत्र क्वचित्। अस्य वार्तिकोक्ततदन्तविधिविषयत्वादित्यपि शङ्कात्र परास्ता। **लिङ्गविशिष्टस्य** लिङ्गवाचिप्रत्ययाधिकस्य। ननु प्रातिपदिकस्वरूपं यत्र गृह्यते तत्र सा परिभाषा, इह तु प्रातिपदिकशब्देन तत्प्रतीतिः, अत आह — **न चेति**। यथाकथंचित् प्रातिपदिकग्रहणे सेत्यर्थः। केवलपूर्वादिनिवचने प्रयोजनमुपक्रम्य पूर्वान्तात् तद्वचनं कथं प्रयोजनमुच्यत इत्याशङ्क्य 'एतस्य वचने' इत्यत्रैतदुच्चारण इति विवक्षितमिति परिहरति — **पूर्वग्रहण इति**। यदि तर्हि तदन्तविधिविषये सर्वत्र तस्यापि ग्रहणं प्रातिपदिकेन व्यपदेशिवद्भावप्रतिषेधस्य को विषय इत्यत्राह — **अप्रातिपदिकेनेति**। एतच्चोपलक्षणं वार्तिकशेषत्वात् 'तस्य च' इति वचनस्य। सौत्रतदन्तविधि[4]स्थलेऽप्यस्य निषेधस्य प्रवृत्त्युपपत्तेः। तथा च [5]'गोस्त्रियोः' इत्यत्र भाष्यकारेण गोन्तप्रातिपदिकस्य विधीयमानं ह्रस्वत्वं व्यपदेशिवद्भावाद् 'गोक्षीरम्' इत्यत्र न भवतीति वक्ष्यते। अत एव च वार्तिककारस्य प्रकृतानुवृत्यनपेक्षया [6]'तस्य'वचनारम्भप्रयासोऽपि न व्यर्थः। विशेषणव्यावर्त्यमाह — **ठगिति**। [7]'रथाद्यत्' [8]'नौवयोधर्म' [9]'मतजनहलात्' इति च यत्। 'ऋतोः' इति स्वरूपग्रहणशङ्कां निरस्यन् 'ऋतोरवयवानां वृद्धिमद्विधौ' इति वा, 'ऋतोरवयवानां च वृद्धिमद्विधौ' इति वा योजनाभ्रमं निरस्यति — **ऋत्विति**। विशेषणव्यावर्त्यं कीर्तयति — **वृद्धिमदिति**। ठञ्नपि कथं भवति, समुदायस्याकालवाचित्वात् तदन्तविध्यभावाच्च, अत आह — **तत्र हीति**। रूढ्या योगेन गौण्या वा कालबोधकास्तत्र गृह्यन्त इत्यर्थः। पूर्वशरच्छब्दस्तु यद्यतीतशरद्वाची तदा योगेन काले वर्तते। सविशेषणस्य कालस्य कालाभिन्नत्वात्। यदा च शरदवयवे शरच्छब्दवृत्त्या समानाधिकरणस्तदा शरच्छब्दस्य गौणत्वेऽपि समुदायो योगेनैव कालवृत्तिः। [10]कालान्तस्यापि ग्रहणमिति तु व्याख्यानं नैतट्टीकारूढम्। षष्टिशब्दस्य काल[11]संख्यावृत्तेस्तदन्तविधिः। कालाट्ठञ्विधावुदाहृत इति भ्रमं निरस्यति — **द्वे इति**। प्राग्दीव्यतीयत्वात् [12]'द्विगोर्लुगनपत्ये' इति कालाट्ठञो लुगापत्तिरिति भावः। किं च तदन्तविधिमन्तरेण समनन्तरोक्तहेतोष्ठञस्तस्य तदन्तादपि सिद्धिः। ननु परिमाणार्थठञ्विधावपि [13]'प्राग्वतेः' इति प्रकृतिविशेषानुपादानात् तदन्तविधिवचनमन्तरेण ठञ् सिद्धः, आर्हीं-

---

[1] समासप्रत्ययविधौ प्रतिषेध इत्यत्रापि विधिशब्दस्य यौगिकत्वेऽत्रापि तदन्तविधिप्रतिषेधः स्यादित्याशङ्क्याह — प्रत्ययेति।

[2] परिभाषा ३१.

[3] तदन्तविध्यप्राप्ताविति्यर्थः।

[4] 'स्थले त्वस्य' इत्युचितं भाति।

[5] पा. सू. १. २. ४८.

[6] तस्येतिवचनेत्यर्थः।

[7] पा. सू. ४. ३. १२१.

[8] पा. सू. ४. ४. ९१.

[9] पा. सू. ४. ४. ९७.

[10] कालान्तरस्यापि — ग.

[11] संख्येयवृत्तेः — ग.

[12] पा. सू. ४. १. ८८.

[13] पा. सू. ५. १. १८.

यस्य [1]'अध्यर्ध' इति लुक्प्रसङ्गश्च, अत आह — **आर्हादिति**। ठञ्विधिशब्देन तत्प्रतिप्रसव-निमित्तष्ठग्निषेध उच्यते। तत्र [2]'अगोपुच्छसंख्या' इति विशिष्टशब्दपरिग्रहादस्ति तदन्तविध्या-काङ्क्षेति भावः। **तेनेति**। ठञ्विधिशब्दस्य [3]प्रतिषेधप्रवर्तने निमित्तमुच्यते। द्वितीयचोद्यस्य परिहारः — **अध्यर्धेति**। पुनर्निर्देशात् पूर्वार्थवैलक्षण्यज्ञापनान्नास्य लुगित्यर्थः। [4]लुगभाववैलक्षण्य-मेव पुनर्निर्देशसाध्यमिति लक्ष्यमुखेन ज्ञेयं, न लक्षणशरणेन, तत्राह — **कृत इति**। पुनर्विधानं फलमस्य[5] कल्प्यते। [6]तस्यापि [7]लुग्बाधफलं प्रकल्प्यते। यथा अनोर्लक्षणे संज्ञायाः पुनर्विधिः पुनर्द्वितीयाविधानाय। पुनर्द्वितीयाविधानस्य च हेतुतृतीयाबाधः फलम्॥

[१, ५५५–५५९]

(लघुविवरणम्) पदाधिकारे तदन्तविधेरुत्तरपदाधिकारविहितं प्रयोजनत्वेनोक्तमिति 'पद-शब्देनोत्तरपदमभिधीयत इत्याह — **पदशब्देनेति**। प्रपञ्चार्थत्वमुपपादयति — **अनडुहो नुमित्यत इति**। ननु प्रत्ययग्रहणं चेत्युच्यमानेऽपि यस्मात् प्रत्ययविधिस्तदादितदन्तस्यैव ग्रहणाय प्रत्यय-ग्रहणपरिभाषा कर्तव्या। तस्यां क्रियमाणायामिदं किमर्थमित्यत आह — **प्रत्ययग्रहण इति**। तत्रैव 'अपञ्चम्याः' इति नोक्तम्, प्रत्ययाक्षिप्तधातुप्रातिपदिकावयवकयोर्विशेष्यमाणयोरनेनैव लब्धे तदन्त-विधौ नियमार्थं तदिति ज्ञापनाय। इहैव सा परिभाषा नोक्ता, [8]'यस्मात् प्रत्ययविधिः' इति सूत्रोपारूढां तां परिभाषां कर्तुम्। यद्यनुवादे निषेधो नावतरति तर्हि प्रत्ययसंज्ञाप्रदेशेषु तदन्त-विधौ संज्ञाविधौ [9]प्रतिषेधस्य वैफल्यमिति शङ्कते — **संज्ञेति**। **तत्प्रत्ययादेवेति**। विकारा-वयवविहितप्रत्ययादित्यर्थः। ततश्चोष्ट्रस्य विकार इत्यञि कृते तत्प्रत्ययञित एवाञ्निमित्तः स्वरः स्यात्। ननु प्रत्ययग्रहणे तदन्तविधौ [10]'घरूपकल्प' इति ह्रस्वस्तरबाद्यन्ते स्यादित्यत्राह — **उत्तरेति**। लेखशब्दस्तत्र कर्मण्यणन्तो गृह्यते, न घञाद्यन्तः, तत्र ह्रल्लेखशब्दप्रयोगाभावात्। तथा-चोत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधावनर्थकं लेखग्रहणं तदन्तविध्यभावं ज्ञापयतीत्यर्थः॥

[१, ५५५–५५९]

(विवरणम्) पदाङ्गाधिकार इति। तदन्तविधेरपवादः। अत एव 'तस्य च' इति पुन-रभिहितम्। तथा चोत्तरपदाधिकारगतप्रयोजनाभिधानात् पदशब्द उत्तरपदाभिप्राय इत्याह — **पदशब्देनेति**। तदन्तविध्यपवादस्यापि त्रितयसंनिधावेव प्रवृत्तिरित्यभिप्रेत्य विशेष्यं दर्शयति — **उत्तरपदेनेति**। **समासान्तनिषेधः** [11]'ऋक्पूरप्' इति प्राप्ते इति शेषः। अप् इति स्वरूपमात्रं [12]विवक्षितम्, न सूत्रविशेषगतमित्याह — **अपो भीति**। भाष्ये 'नास्तीत्याह' इति येनोक्तं स एवाचार्यदेशीय आह — **एवं तर्हीति**। संनिधेश्च लिङ्गं बलीय इति भावः। शब्दाधिकार-

---

[1] पा. सू. ५. १. २८.
[2] पा. सू. ५. १. १९.
[3] ठगित्यादिः।
[4] लुगभावाभाववैलक्षण्यमेव — ग.
[5] पुनर्निर्देशस्येत्यर्थः।
[6] पुनर्विधानस्यापीत्यर्थः।
[7] लुगबाधफलं — ग.
[8] पदशब्देनोत्तरं पदम् — ङ, ढ.
[9] पा. सू. १. ४. १३.
[10] प्रतिषेधवैयर्थ्यमिति — ण.
[11] पा. सू. ६. ३. ४३.
[12] पा. सू. ५. ४. ७४.
[13] विवक्ष्यते — ञ.

माश्रित्य शङ्कते — **नन्विति** । **तदन्तविधिः** [1]तदपवादस्तदुत्तरपदविधिरित्यर्थः। अर्थाधिकारमाश्रित्य परिहरति — **नेति**। **तदन्तविधिः** तदुत्तरपदविधिरित्यर्थः। एवं सर्वत्र व्याख्येयम्। भाष्ये **अप्रत्ययः** अश्रूयमाणः प्रत्यय इत्यर्थः। ननु [2]'ऋक्पूरब्धूःपथाम्' इति समासान्तस्य [3]'न पूजनात्' इति निषेधो भविष्यतीत्यत आह — **नेति**। [4]**टचा भवितव्यम्** [5]'राजाहःसखिभ्यः' इत्यनेन। प्रपञ्चार्थत्वमुपपादयति — **अनडुह इति**। अत एव [6]वचनादामोरपि तदन्तविधेराक्षेपादिति योजना। कथमित्यत आह — **आदित्याधिकारादिति**। [7]'आच्छीनद्योर्नुम्' इत्यतः। **अमामोरिति**। अन्यथा नुम् आमो बाधकः स्यात्, अमागमश्च नुम इति भावः। **तदन्तस्य स्याताम्** अपूर्वामाम्लक्षणानुमानादिति भावः। **उपसर्जने त्विति**। तस्य सर्वादिगणनिवेशाभावादिति भावः। ननु [8]'भस्त्रैषा' इत्यत्र यदि तदुत्तरपदस्यापि ग्रहणं तर्हि 'नञ्पूर्वाणाम्' इति किमर्थमुक्तमित्यत आह — **नञ्इति**। 'अन्यत्र' इति भाष्यात् [9]पदाङ्गाधिकाराभ्यामन्यत्र प्रत्ययविधावेव वर्णग्रहणे तदन्तविधिरिति मत्वा चोदयति — **यद्येवमिति**। 'अन्यत्र' इति भाष्यमुपलक्षणम्, [10]त्रितयसंनिधौ [11]'इको झल्' इत्यादावपि तदन्तविधिदर्शनादित्यभिप्रेत्य परिहरति — **उच्यत इति**। ननु 'प्रत्ययग्रहणं च' इत्युच्यमानेऽपि यस्मात् प्रत्ययविधिस्तदादितदन्तस्यैव[12] ग्रहणाय प्रत्ययग्रहणपरिभाषावश्याश्रयणीया। [13]तस्यां सत्यां किमनेनेत्यत आह — **प्रत्ययग्रहण इति**। न च [14]प्रतिषेधार्थं वचनं चेत् तत्रैव 'अपञ्चम्याः' इति वाच्यमिति वाच्यम्, [15]प्रत्ययाक्षिप्तप्रकृतिप्रत्ययावयवकसमुदाये प्रत्ययेन विशेष्यमाणेऽनेनैव सिद्धे तदन्तविधौ नियमार्थं तदिति सूचनीयत्वात्। न च प्रत्ययग्रहणपरिभाषेहैव क्रियतामिति वाच्यम्, [16]'यस्मात् प्रत्ययविधिः' इति सूत्रारूढां [17]तां कर्तुं तत्रैव वक्तव्यत्वात्। **यत्र** सूत्रे, **परिगृह्यते** अनूद्यते, **तत्र तदन्तविधिः**[18] प्रत्ययग्रहणपरिभाषयेति शेषः। ननु संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्नेति नात्र तदन्तविधिर्भविष्यतीत्यत आह — **न चेति**। संज्ञाया विधाने स [19]निषेधः, न तु संज्ञया विधाविति हेतुमाह — **यत्र हीति**। [20]यदि हि संज्ञया विधौ प्रत्ययग्रहणे तदन्तविधिः स्यात् प्रत्ययग्रहणे संज्ञाया विधौ तदन्तविधिनिषेधोऽनर्थक इति शङ्कते — **संज्ञेति**। **पुनरिति**। घादिभिरुत्तरपदस्य विशेषणादिति भावः। पञ्चमीनिर्दिष्टात् प्रत्ययात् यत्र प्रत्ययो विधीयते तत्र प्रत्यासत्तेः 'अपञ्चम्याः' इति निषेध इति केचित्। तान् प्रत्याह — **अपञ्चम्या इत्यस्येति**। **पञ्चम्यन्तात्** पञ्चमीनिर्दिष्टात्[21] प्रत्ययादित्यर्थः। **तत्प्रत्ययादेव** विकारावयवप्रत्ययादेवेत्यर्थः। ततश्चोष्ट्रस्य विकारोऽवयवो वौष्ट्रकः, उष्ट्राद्वुञ्। ततो [22]'ञितश्च'

---

[1] तदपवादतदुत्तर — च, ट.
[2] पा. सू. ५. ४. ७४.
[3] पा. सू. ५. ४. ६९.
[4] प्रदीपे 'टचा भाव्यम्' इत्यत्र 'टचा भवितव्यम्' इति पाठोऽभिमतः।
[5] पा. सू. ५. ४. ९१.
[6] वचनादामोऽपि — ञ.
[7] पा. सू. ७. १. ८०.
[8] पा. सू. ७. ३. ४७.
[9] पदाङ्गाधिकारादन्यत्र — च, छ.
[10] ततश्च सनि धातौ — ञ.
[11] पा. सू. १. २. ९.
[12] एवकारो नास्ति — च, छ.
[13] 'तस्याम्' इत्यस्यानन्तरं चकारोऽधिकः — च.
[14] प्रतिषेधार्थवचनं — च, छ.
[15] 'प्रत्ययाक्षिप्त' इत्यतः प्राक् 'यस्मात्' इति वर्तते — च, छ, ञ, ट.
[16] पा. सू. १. ४. १३.
[17] 'ताम्' इति नास्ति — च, छ.
[18] विधौ — च, छ; विधेः — ट.
[19] अयं निषेधः — ञ.
[20] यत्र हि — ट.
[21] निर्दिष्टप्रत्ययादित्यर्थः — च, छ, ट.
[22] पा. सू. ४. ३. १५५.

इत्यञि वुञ एव वृद्धिस्वरौ स्यातामित्यर्थः। यद्यपि [1]'यञिञोश्च' इत्यत्र [2]'ङ्याप्प्रातिपदिकात्' इत्यधिकारात् अस्ति पञ्चमी, तथापि न सा विशेषणं यञिञोः, फग्विधापसर्जवुनत्वात् तयोः। किं तु ङ्याप्प्रातिपदिकात् षष्ठीसमर्थात् फग् भवति, स च यञिञोरनन्तर इति सूत्रार्थं मत्वा भाष्ये यञिञोः फगित्युक्तम्। तत्र परमगार्ग्यायण इति दर्शनात् तदप्युदाहरणमिति भ्रमः कस्यचित् स्यात्। तन्निवृत्त्यर्थमाह — **अत्रेति**। **तस्मादिति**। [3]'प्रत्ययग्रहणे यस्मात्' इति नियमे सत्येव 'अपञ्चम्याः' इति निषेधार्थं 'प्रत्ययग्रहणं च' इति न्यायगर्भितम्। अन्यथा नियमभङ्गे परमगार्ग्यशब्दादपि फक् स्यात्, इत्येतन्न्यायव्युत्पादनार्थमित्यर्थः। ननु पञ्चम्या किंचिन्निर्दिश्य कार्यविधानाय यत्र प्रत्ययोऽनूद्यते ततोऽन्यत्र प्रत्ययग्रहणे तदन्तविधौ [4]'घरूप' इत्यादावपि तदन्तविधिप्रसङ्ग इत्यत आह — **उत्तरेति**। [5]'हृदयस्य हृल्लेखयदण्लासेषु' इत्यत्राण्ग्रहणादेव [6]सिद्धे लेखग्रहणं ज्ञापकं तदन्तविध्यभावस्य। लेखग्रहणं च कर्मण्यणन्तं गृह्यते, न घञन्तम्, तस्य हृल्लेख इति प्रयोगाभावादिति भावः। 'अपञ्चम्याः' इति चान्यथा विशेषणविशेष्यभाव आश्रयणीय इति सूच्यते, नापूर्वं वक्तव्यत्वेनोच्यत इत्याह — **तत्रेति**। **धातोरितीति**। लृलुटोर्धातुग्रहणं विशेषणमिति भावः। स्यतासी विशेष्यते [7]'तेनेत्यत्राप्याह — **लृलुटोर्वेति**॥

[१, ५५५–५५९]

(**उद्द्योतनम्**) "पदाङ्गाधिकारे' इति तदन्तविधेरपवादः। अत एव 'तस्य च' इति पुनरभिहितमित्याहुः। तदन्तविधेरेव प्रयोजनान्तरमिदम्। 'तस्य च' इत्युक्तस्यैवानुवृत्तिकथनमात्रम्। अत एव प्रदीपे तदन्तविधिरेव स्पष्ट इत्यन्ये। तत्रोत्तरपदाधिकारगतप्रयोजनाभिधानात् पदशब्द उत्तरपदपर इत्याह — **पदशब्देनेति**। अत्रापि तदन्तविधिलाभप्रकारमाह — **उत्तरपदेनेति**। [9]'अलुगुत्तरपदे' इत्यतोऽनुवर्तमानोत्तरपदसामर्थ्याक्षिप्तमित्यर्थः। **समासान्तेति**। [10]'ऋक्पूरप्' इति प्राप्तेत्यादिः। तत्वमपि तदन्तस्य भवतीत्याह — **अप इति**। यद्यपि वार्तिके 'दीर्घविधौ' इत्यस्ति, तथापि 'महदप्' इत्यत्र 'अप्' इति स्वरूपमात्रं गृहीतम्, न [11]'अप्तृन्' इति सूत्रस्थम्। तथा च कार्यान्तरेऽपि तदन्तविधिसिद्धिरिति भावः। अत्रापि तदन्तविधिप्रकारमाह — **पाद इति**। भाष्ये 'नास्तीत्याह' इति येनोक्तं [12]स एवैकदेश्याह — **एवं तर्हीति**। संनिधेर्लिङ्गं बलीय इति भावः। **नन्विति**। 'पद्युष्मत्' इति पद्भाव एव तदन्तविधेरुक्तत्वादिति भावः। **नैष इति**। नात्र वाचनिकस्तदन्तविधिः, किं तु पादशब्देन पूर्वपदस्य विशेषणत्वकृतः। पद्भावसूत्रे च पादस्येत्यनुवर्तते। अनुवर्तमानेन तदन्तविधिश्चेत् स्वस्थानेऽपि तदन्तविधिः, पूर्वत्र यादृशं निर्दिष्टं तादृशस्यैवोत्तरत्रानुमानरूपानुवृत्त्यङ्गीकारादित्यर्थः। भाष्ये **एवं तर्हीति**। पदाधिकारे पद्भावे तदन्तविधावतिप्रसङ्गे सतीत्यर्थः। तदन्तविध्यभावेऽपि[13] परमपत्काषीति रूपं साधयति — [14]**यदि**

---

[1] पा. सू. ४. १. १०१.
[2] पा. सू. ४. १. १.
[3] परिभाषा २३.
[4] पा. सू. ६. ३. ४३.
[5] पा. सू. ६. ३. ५०.
[6] सिद्धेः —च.
[7] अनेनेत्यत्राप्याह — ञ.
[8] विवरणोक्तिमाह — पदाङ्गाधिकार इत्यादिना।
[9] पा. सू. ६. ३. १.
[10] पा. सू. ५. ४. ७४.
[11] पा. सू. ६. ४. ११.
[12] स एवाह — म.
[13] अपिशब्दो नास्ति — अ.
[14] प्रदीपे 'यदा तु' इत्यस्य स्थाने 'यदि तु' इति पाठ आश्रितः।

त्विति। भाष्ये **अप्रत्ययः** अश्रूयमाणः प्रत्ययः क्विबादिः। **समासान्तेति**। [1]'ऋक्पूः' इत्यनेनेत्यर्थः। [2]'न पूजनात्' इति निषेधोऽत्र नास्तीत्याह — **नेति**। [3]**टचा भवितव्यं** [4]'राजाहःसखिभ्यः' इत्यनेन। प्रपञ्चार्थत्वमेवाह — **अनडुह इति**। इत्येव वचनादमामोरपि तदन्तविधेराक्षेपादित्यन्वयः। आक्षेपप्रकारमाह — **आदिति**। [5]'आच्छीनद्योर्नुम्' इत्यत इत्यादिः। **यत्रैवेति**। [6]नुमा आक्षेपो यत्रामि तत्रैव नान्यत्रेत्यर्थः। **न त्विति**। तथा च 'परमानड्वान्' इति नुम् न स्यात्। **उपसर्जने त्विति**। तस्य सर्वादि[7]गणानन्तर्भावादित्यर्थः। यदि भस्त्रादौ तदन्तविधिस्तदा 'नञ्पूर्वाणाम्' इति व्यर्थम्, अत आह — **नञ्जाति**। बहुभस्त्रिकाद्यर्थं तदन्तविधेरावश्यकत्वादिति भावः। 'अन्यत्र' इति भाष्यात् पदाङ्गाधिकारादन्यत्र प्रत्ययविधावेव वर्णग्रहणे तदन्तग्रहणमिति मत्वा शङ्कते — **यदीति**। 'अन्यत्र' इति भाष्यमुपलक्षणार्थम्, '[8]त्रितयसंनिधानात् [9]'इको झल्' इत्यादावपि तदन्तविधिदर्शनादित्याशयेन परिहरति — **उच्यत इति**। प्रत्ययग्रहणपरिभाषयैव तदन्त[10]विधिसिद्धावेतद्वैयर्थ्यं निराह — **प्रत्ययेति**। न च प्रतिषेधार्थत्वे तत्रैव 'अपञ्चम्याः' इति वक्तव्यमिति वाच्यम्, प्रत्ययाक्षिप्तप्रकृतेः प्रत्ययेन विशेषणेनैव तदन्तविधिसिद्धौ प्रत्ययान्तस्यैवेति नियमार्थं तदिति सूचनाय सूत्रकारस्य गतिवैचित्र्याद्वात्राभिधानात्। अत एव प्रत्ययग्रहणपरिभाषाप्यत्रैव क्रियतामिति निरस्तम्। [11]'यस्मात् प्रत्ययविधिः' इति सूत्रारूढतां कर्तुं तत्रैव कर्तव्यत्वाच्च। 'अपञ्चम्याः' इत्यस्य विवक्षितमर्थमाह — **यत्रेति**। **यत्र** सूत्रे, **परिगृह्यते** अनूद्यते। **तदन्तविधिः** प्रत्ययग्रहणपरिभाषयेत्यादिः। तदुदाहरति — **यथेति**। [12]**निष्ठान्तस्तस्येति**। [13]'गीस्ततम्' इत्यादेः। 'गीर्णम्' इत्यादौ नत्वं न स्यादित्यपि ज्ञेयम्। [14]'संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिर्न' इत्येवात्रापि तदन्तविधिर्नेति [15]न वाच्यमित्याह — **न चेति**। **संज्ञाविधानं** [16]संज्ञाया विधानम्। यदि [17]संज्ञाया विधाने [18]तदन्तनिषेधस्तर्हि संज्ञाविधौ तदन्तनिषेधस्य किं प्रयोजनमिति पृच्छति — **संज्ञाविधाविति**। **प्रत्ययान्तान्तमिति**। प्रत्ययान्तस्य घसंज्ञायां घेनोत्तरपदस्य विशेषणादिति भावः। 'अपञ्चम्याः' इति निषेधस्यापि प्रयोजनमुक्तमुपसंहरति — **रदाभ्यामित्यत्र चेति**। "यत्र पञ्चम्यन्तात् [19]प्रत्ययात् प्रत्ययो विधीयते तत्र 'अपञ्चम्याः' इति निषेधः" इति केचित्। [20]तान् निरस्यति — **अपञ्चम्या इति**। **पञ्चम्यन्तात्** प्रत्ययादिति शेषः। **ञ्नित्श्चेति**। ञ्नित्यो विकारावयवप्रत्ययस्तदन्तादञ् स्याद्विकारावयवयोः। मयटोऽपवादः। [21]'ओरञ्' दैवदारवम्, तस्य विकारोऽवयवो वा दैवदारवम्। **तत्प्रत्ययादेव** विका-

---

[1] पा. सू. ५. ४. ७४.
[2] पा. सू. ५. ४. ६९.
[3] प्रदीपे 'टचा भाव्यम्' इत्यत्र 'टचा भवितव्यम्' इत्यन्नंभट्टपाठ इति भाति।
[4] पा. सू. ५. ४. ९१.
[5] पा. सू. ७. १. ८०.
[6] यत्रनुम् तत्रैव — म.
[7] गणान्तर्भावादित्यर्थः — ऋ.
[8] विशेषणं विशेष्यं कार्यमिति त्रितयेत्यर्थः।
[9] पा. सू. १. २. ९.
[10] विधिसद्भावे तद्वैयर्थ्यं — अ.
[11] पा. सू. १. ४. १३.
[12] निष्ठान्तस्येति — अ, म.
[13] गीस्तिमितमित्यादिः — म.
[14] परिभाषा २७.
[15] 'न' इति नास्ति — अ, ऋ.
[16] संज्ञया विधानम् — म.
[17] संज्ञया विधाने — अ, म.
[18] 'तदन्तनिषेधः' इत्यादि 'संज्ञाविधौ' इत्यन्तं नास्ति — म.
[19] 'प्रत्ययात्' इति नास्ति — म.
[20] 'तान् निरस्यति' इति नास्ति — म; तन्निरस्यति — अ, ऋ.
[21] पा. सू. ४. ३. १३९.

रावयवप्रत्ययादेव। **तस्यैव** [1]'ओरञ्' [2]इत्यादेरेव। ततश्चाञ्ञ एव वृद्धिस्वरौ स्यातामित्यर्थः। यत्र पञ्चम्यन्तात् परः प्रत्ययः कार्यान्तरविधानायानूद्यते तत्र 'अपञ्चम्याः' इति निषेधः। अत्र तु प्रत्ययविधानार्थमेवानुवाद इति तदन्तविधिर्भवत्येवेति भाष्ये यञिञोः फग् भवतीत्युदाहृतम्॥

[3]केचित्तु यद्यपि [4]'यञिञोश्च' इत्यत्र [5]'ङ्याप्प्रातपदिकात्' इत्यधिकारादस्ति पञ्चमी, तथापि न सा यञिञोर्विशेषणम्, फग्विधौ तयोरुपसर्जनत्वात्। किं तु ङ्याप्प्रातिपदिकात् षष्ठी-समर्थात् फग् भवति, स च [6]यञिञोरनन्तर इति सूत्रार्थं मत्वा भाष्ये 'यञिञोः फग् भवति' इत्युक्तमित्याहुः। भाष्ये 'परमगार्ग्यायणः' इति दर्शनात् परमशब्दसहितस्योदाहरणत्वशङ्कां निराह **तत्रेति**। इष्टापत्तिं निराह — [7]**अनिष्टेति**। भाष्ये [8]"परमगार्ग्यायणः' इति किमर्थमुक्तम्, अत आह — **तस्मादिति**। 'अपञ्चम्याः' इति [9]प्रतिषेधस्य स्वोक्तार्थाभिसंधिरूपन्यायप्रदर्शनाय परम-सहितोक्तिः। अन्यथा 'पारमगार्ग्यायणः' इति निर्दिशेदित्यर्थः। ननु प्रत्ययग्रहणे तदन्तग्रहणं चेदुत्तरपदाधिकारे [10]'घरूप' इत्यादौ तदन्तग्रहणं स्यात्, अत आह — **उत्तरेति**। [11]'हृदयस्य हृल्लेखयदण्लासेषु' [12]इत्यत्राण्ग्रहणेन तदन्तस्य लेखस्यापि ग्रहणे सिद्धे पुनस्तद्ग्रहणात् तदन्तविध्य-भावो ज्ञापितः। लेखशब्दश्च तत्राणन्त एव गृह्यते न घञन्तः। घञन्तस्य तु 'हृदयलेखः' इत्येव भवतीति भावः। 'अपञ्चम्याः' इत्यस्य यत् प्रयोजनमुक्तं तदपि व्याख्यानलभ्यमित्याह — **तत्रेति**। [13]'लृलुटोः' इत्यत्र तदन्तविध्यभावमाह — **स्यतासी इति**। धातोरित्यस्य लृलुटोर्विशेष-णत्वात्[14]। न्यायादपि तदन्तविधिर्नास्तीत्याह — **लृलुटोर्वेति**। यद्वा, प्रत्ययग्रहणपरिभाषया तदन्तविध्यभावः 'अपञ्चम्याः' इत्यनेनोक्तः, येन विधिरित्यनेन तदन्तविध्यभावो लृलुटोर्वेत्यनेनोक्त इति विवेकः। भाष्ये **दृषत्तीर्णेति**। [15]'रदाभ्याम्' इत्यत्र निष्ठान्तं न गृह्यत इति [16]प्रकृति-तकारस्य नत्वाभावः, निष्ठातस्य [17]नत्वं सिद्धमिति 'तीर्णा' इत्युदाहरणमित्यर्थः॥

[१, ५५५–५५९]

(रत्नप्रकाशः) **पदाङ्गाधिकार इति**। उत्तरपदशब्दावयवोऽत्र पदशब्देन परामृश्यते। तेनो-त्तरपदाधिकार इति फलितम्। ननु [18]"ससजुषो रुः' [19]'वसुस्रंसुध्वंस्वनडुहां दः' इत्यादावष्टमाध्या-यस्थे तदन्तविध्यभावात् 'परमसजूः, परमानडुद्भ्याम्' इत्यादौ रुत्वदत्वादिकं सजूरनडुदाद्यन्तस्य कथं स्यादिति चेन्न, तेषां पदान्ते वर्तमानत्वमाश्रित्य प्रवर्तमानस्य रुत्वदत्वादेः [20]'अलोऽन्त्यस्य' इत्य-

---

[1] पा. सू. ४. ३. १३९.
[2] इत्यञ्चादेरेव — अ, ऋ.
[3] विवरणोक्तिमाह — केचित्त्विति।
[4] पा. सू. ४. १. १०१.
[5] पा. सू. ४. १. १.
[6] यञिञ्चानन्तरमिति — अ; यञिञ्चानन्तर इति — म.
[7] अनिर्दिष्टेति — अ, ऋ.
[8] 'परमगार्ग्याणः' इत्यस्यानन्तरम् 'इत्येव निर्दिष्टम्, न त्वादिवृद्धिसहितमित्यर्थः। तर्हि गार्ग्यायण इत्यनुक्त्वा परमगार्ग्यायणः' इत्यधिकम् — ऋ.
[9] प्रतिषेधस्योक्तार्थाभिसंधि — अ.
[10] पा. सू. ६. ३. ४३.
[11] पा. सू. ६. ३. ५०.
[12] इत्यण्ग्रहणेन — अ, म.
[13] पा. सू. ३. १. ३३.
[14] विशेषणत्वादपि तदन्त — म.
[15] पा. सू. ८. २. ४२.
[16] प्रकृतेस्तकारस्य — ऋ.
[17] 'नत्वम्' इत्यस्यानन्तरं चकारोऽधिकः — ऋ.
[18] पा. सू. ८. २. ६६.
[19] पा. सू. ८. २. ७२.
[20] पा. सू. १. १. ५२.

न्त्ये [1]विश्रामात्। **प्रयोजनमिष्टकेषीकामालानामिति**। पदाधिकारे परिगणनपरमेवेदम्, अङ्गाधिकारप्रयोजनस्येवादित आरभ्यानेकसूत्रविषयस्यानुदाहरणात्। संभवन्ति हि [2]'ओजस्सहोऽम्भस्तमसस्तृतीयायाः' [3]'विभाषा वर्षक्षरशरवरात्' [4]'वाग्दिक्पश्यद्भ्यो युक्तिदण्डहरेष्विति वाच्यम्' [5]'ऋतो विद्यायोनिसंबन्धेभ्यः' [6]'विभाषा स्वसृपत्योः' [7]'आन्महतः समानाधिकरणजातीययोः' [8]'हृदयस्य हृल्लेखयदण्लासेषु' [9]'वा शोकष्यञ्रोगेषु' [10]'पादस्य पदाज्यातिगोपहतेषु' [11]'पद्यत्यतदर्थे' [12]'हिमकाषिहतिषु च' [13]'वा घोषमिश्रशब्देषु' इति सूत्राणि [14]'पेषंवासवाहनधिषु च' इत्यादित्रिसूत्रं[15] चोदाहरणत्वेन। किं च यदि तत् परिगणनं न भवेत् तदा 'यदि तर्हि पदाधिकारे पादस्य तदन्तविधिर्भवति' इत्यादि 'दिग्धपादोपहतम्' इत्यन्तमनुपदं वक्ष्यमाणं भाष्यं विरुद्धं स्यात्। तद्धि भाष्यं न्यायसिद्धतदन्तविध्यभावानुवादकम्। तच्च तदैवोपपद्यते, यदि तद्वचनं परिगणनपरं स्यात्। न च तद्भाष्यं पादशब्दांश एव तदन्तविध्यनभ्युपगमपरमिति कल्पयितुं युक्तम्, भाष्यस्वरसेन वार्तिकस्यैव नियमपरत्वकल्पनाया उचितत्वात्। एतेन [16]'सततनैशतमोवृतमन्यतः' इति भारविः, " [17]'उत्तरपदाधिकारे तदुत्तरपदग्रहणं नास्ति' इति तत्र तृतीयाया अलुग् न" इति दुर्घटवृत्तिश्च व्याख्याता। 'उत्तरपदाधिकारे' इत्यस्य इष्टकेषीकामालातिरिक्त इत्यत्र तात्पर्यसंभवात्। अत एव [18]'ओजःप्रभृतीनामुत्तरपदाक्षिप्तं पूर्वपदं प्रति विशेष्यत्वात् तदन्तविधिर्न' इति तत्सूत्रगतहरदत्तग्रन्थोऽपि व्याख्यातः। एतेन सर्वत्रोत्तरपदाधिकारे तदन्तविधिमभ्युपेत्य तदुपष्टम्भकतया "अत एव 'परममहत्परिमाणम्' इत्यत्र परममहतो द्रव्यस्य परिमाणमिति षष्ठीतत्पुरुषः। सामानाधिकरण्ये हि [19]'आन्महतः' इत्यात्वं स्यात्, इत्युदयनाचार्या[20] व्याचख्युः" इत्युदयनग्रन्थमुपन्यस्यन्तः [21]कौस्तुभकृतो निरस्ताः। परममहच्छब्दस्य द्रव्यवाचकस्य परिमाणशब्देन सामानाधिकरण्यासंभवेन षष्ठीतत्पुरुषस्यैव तत्र युक्तत्वात्। 'सामानाधिकरण्ये हि' इत्याद्युदयनग्रन्थस्य "'पदाङ्गाधिकारे' इत्यत्र पदाधिकारो गृह्यते न तूत्तरपदाधिकारः। अन्यथा 'इष्टकेषीकामालानाम्' इत्यत्र पुनस्तदन्तविध्युपसंख्यानं व्यर्थं स्यात्। तथा च 'परममहत्परिमाणम्' इत्यत्र परममहच्छब्दस्य संबन्धिलक्षकत्वमभ्युपेत्य कर्मधारयाश्रयणेऽपि नात्वप्रसक्तिः" इति वदता [22]वर्धमानमिश्रेणैव दूषितत्वाच्च। यदपि [23]कौस्तुभकृता उक्तवर्धमानग्रन्थे दूषणमुक्तम् "तदेतदनवहिताभिधानम्, 'इष्ट-

---

[1] 'विश्रमात्' इत्युचितम्, नोदात्तोपदेशस्येति वृद्धिनिषेधात्। ण्यन्तादेरचि वा समर्थ्यमिदं रूपम्। स्फुरतिस्फुलत्योरिति सूत्रे तत्त्वबोधिन्यां स्पष्टमिदम्।
[2] पा. सू. ६. ३. ३.
[3] पा. सू. ६. ३. १६.
[4] का. वा. ६. ३. २१ — १.
[5] पा. सू. ६. ३. २३.
[6] पा. सू. ६. ३. २४.
[7] पा. सू. ६. ३. ४६.
[8] पा. सू. ६. ३. ५०.
[9] पा. सू. ६. ३. ५१.
[10] पा. सू. ६. ३. ५२.
[11] पा. सू. ६. ३. ५३.
[12] पा. सू. ६. ३. ५४.
[13] पा. सू. ६. ३. ५६.
[14] पा. सू. ६. ३. ५८.
[15] पात्रादित्वान्नपुंसकत्वं बोध्यम्।
[16] किरातार्जुनीये. ५. २.
[17] अर्थानुवादोऽयमिति भाति॥ दुर्घटवृत्तिः ६. ३. ३.
[18] पदमञ्जरी ६. ३. ३.
[19] पा. सू. ६. ३. ४६.
[20] किरणावलावाकाशप्रकरणे।
[21] श. कौ. पृष्ठम् २९३.
[22] किरणावल्या व्याख्याने प्रकाशाख्ये आकाशनिरूपणे।
[23] श. कौ. पृष्ठम् २९३.

केषीकामालानाम्' इत्यस्य प्रयोजनत्वेनोदाहरणात्। उपसंख्यानान्तरस्य गगनकुसुमायमानत्वात्। तस्मादाचार्योक्तमेव सम्यक्" इति तदपि न, 'प्रयोजनमिष्टकेषीकामालानां चिततूलभारिषु' इत्यस्य वार्तिकत्वे संदेहाभावेन तस्य च परिगणनात्मकताया व्यवस्थापितत्वेन च तस्योपसंख्यानत्वोक्तेर्वर्धमानकृताया निरातङ्कत्वात्। तेनैव वचनेन सिद्धे 'पदाङ्गाधिकारे' इत्यत्र पदग्रहणं केवलपदाधिकारपरतयैव व्याख्यातुं शक्यत इति स्वातन्त्र्यपरतया तद्ग्रन्थस्योपपन्नत्वात्। तथैवाश्रित्य 'मान्तस्य पदस्यानुस्वारः स्यात्' इत्यादिरूपेण [1]"मोऽनुस्वारः' इत्यादिसूत्राणां [2]कौमुद्यां तेनैव व्याख्यातत्वाच्च। **महदप्स्वसृनप्तृणां दीर्घविधाविति**। सान्तसंयोगरूपस्याङ्गस्याप्रसिद्धेस्तेनाङ्गविशेषणं सामर्थ्यलभ्यमिति तदपहाय [3]"सान्तमहतः' इति सूत्रे महच्छब्द एव परिगृहीतः। [4]"न तिसृचतसृ' इत्यत्र निषेधसूत्रे यद्यपि तदन्तविधिरपेक्षितः, तथाप्यङ्गाधिकारे उदाहरणदिक्प्रदर्शनार्थत्वात् 'प्रयोजनं महत्' इत्यादिवचनानां तदनुपादानं न दोषाय। अत एव [5]"अप्तृन्' इत्यादिसूत्रस्थेषु त्रय एव संगृहीताः। ननु 'इष्टकेषीकामाला' इत्यादिवचनं यथा पदाधिकारविषयपरिगणनपरमित्युक्तम्, तथैतान्यपि वचनान्यङ्गाधिकारविषयपरिगणनपराण्येव कुतो न भवन्तीति चेन्न, [6]"इन्हन्पूषार्यम्णाम्' इति सूत्रगतवार्तिकतद्भाष्यस्वरसभङ्गात्। तद्धि ब्रह्मादिपूर्वस्य हन्नन्तस्याङ्गस्य तेन दीर्घमभ्युपगम्य प्रवृत्तम्। किं च [7]"वाह ऊठ्' सूत्रगतेन 'प्रष्ठौहः पश्य' इति भाष्येण [8]"प्रत्ययोत्तरपदयोश्च' इति सूत्रगतेन [9]"त्रिचतुर्युष्मदस्मत्' इत्यादिवार्तिकेन त्रिचतुरशब्दघटितेन तद्भाष्येण च, [10]"जराया जरस्' सूत्रगतेन [11]"नुमोऽनङ्जरसौ भवतो विप्रतिषेधेन' इति वार्तिकेन तद्भाष्येण च विरोधः। तद्धि प्रकृतवार्तिकानामुदाहरणदिक्प्रदर्शनपरत्व एवोपपद्यते। मध्यस्थः कश्चित् पृच्छति — **अस्ति चेति**। चो वार्थे। पाच्छब्दरूपस्याङ्गस्याप्रसिद्धयैव तदन्तविधिसिद्धेर्नेदमङ्गाधिकारोदाहरणेषु पठनीयम्, किं तु पदाधिकारोदाहरणेष्विति मन्यते। तस्याशयं प्रकटीकर्तुमन्य आह — **नास्तीत्याहेति**। इतरः स्वाशयं प्रकटयति — **एवं तर्हीति**। [12]**प्रयोजनं पठितमिति**। व्याख्येयमिति शेषः। तद् दूषयत्यन्यः — **यदि तर्हीति**। [13]**एवमिहापि स्यादिति**। तथा च 'परमपादकाषिणौ' इत्येव युक्तम्, न तु 'परमपत्काषिणौ' इतीति भावः। इदानीं भगवानुत्तरमाह — **एवं तर्हीति**। **पादयतेरिति**। पदिप्रकृतिकात् ण्यन्तादित्यर्थः। "'परमपन्थाः, परमगौः' इत्युदाहरणद्वये परमशब्दप्रयोगो लेखकदोषसमायातः, [14]"न पूजनात्' इति समासान्तनिषेधस्य [15]"स्वतिभ्यामेव' इति नियतत्वात्" इति कैयटः। समासान्तविधेरनित्यत्वात्तु 'परमपन्थाः, परमगौः' इति यथाश्रुतमेव भाष्योदाहरणं सम्यगिति सुधिय एव विदांकुर्वन्तु। एवं च 'परमसखा' इत्यपि कर्मधारय इत्येव स्वीकर्तुं युक्तम्, पूर्वोत्तरोदाहरणेषु परमशब्दपूर्वकाणां कर्मधारयाणामेव निर्देशेन तन्मध्यपतितस्यास्यापि तथात्वौचित्यात्। **परमानड्वाह इति**। पूर्वत्र 'अनडुहो नुम्' इति कार्यविशेषेण सह पाठात् तत्रैव तदन्तविधिरिति भ्रमव्युदासाय पुनःपाठः। पूर्वत्र 'अनडुहो नुम्' इति

---

[1] पा. सू. ८. ३. २३.
[2] सिद्धान्तकौमुद्यां हल्संधिप्रकरणे।
[3] पा. सू. ६. ४. १०.
[4] पा. सू. ६. ४. ४.
[5] पा. सू. ६. ४. ११.
[6] पा. सू. ६. ४. १२.
[7] पा. सू. ६. ४. १३२.
[8] पा. सू. ७. २. ९८.
[9] का. वा. ७. २. ९८ — १.
[10] पा. सू. ७. २. १०१.
[11] का. वा. ७. २. १०१ सूत्रे.
[12] भाष्ये 'प्रयोजनमुक्तम्' इत्यत्र 'प्रयोजनं पठितम्' इति पाठ आश्रितः।
[13] भाष्ये 'एवमत्रापि स्यात्' इत्यत्र 'एवमिहापि स्यात्' इति पाठः स्वीकृतः।
[14] पा. सू. ५. ४. ६९.
[15] का. वा. ५. ४. ६१ — १.

तु यद्यपि व्यर्थम्, तथापि "न ह्याचार्याः सूत्राणि कृत्वा निवर्तयन्ति' इति पस्पशाह्निके भाष्यकृतैवोक्तमिति न दोषः। **अतिस इति**। अतिशयितः स इत्यर्थः। तमतिक्रान्त इत्यर्थे तु 'अतितत्' इति भवितव्यम्। **निर्भस्त्रिकेति**। तथा च तत्सूत्रे 'नञ्पूर्वाणाम्' इति न वक्तव्यमिति भावः। **वर्णग्रहणं च सर्वत्रेति**। एवं चार्षत्वादेव 'उगिद्वर्णग्रहणवर्जम्' इत्यत्र वर्णग्रहणं न दुष्यति। सर्वत्रग्रहणेन हीष्टविषयसाकल्यपरेण प्रत्ययविधावपि वर्णग्रहणे तदन्तविधिः सिध्यति। अत एव भगवतोक्तम् 'अन्यत्रोदाहृतम्' इति। **प्रत्ययग्रहणं चापञ्चम्या इति**। पञ्चम्यन्तनिर्दिष्टात् परत्वेनागृह्यमाणो यः प्रत्ययस्तदन्तस्य तद्वाचकः संज्ञा भवतीति भावः। **परमगार्ग्यायण इति**। [२]"प्रत्ययग्रहणे यस्मात् स विहितस्तदादेस्तदन्तस्य ग्रहणम्' इति नियमस्येदमुदाहरणम्। परमगार्ग्यशब्दस्य यञ्प्रत्ययान्तत्वाभावेन गार्ग्यशब्दादेव फकि फगन्तप्रकृतिकेन सुबन्तेन परमशब्दस्य समासः। एतेन 'प्रत्ययग्रहणे यस्मात् स विहित इति सिद्धे तदन्तविधावपञ्चम्या इति प्रतिषेधार्थं वचनम्' इति कैयटस्तदनुसारिणश्च निरस्ताः। [३]"प्रत्ययग्रहणे यस्मात्' इति परिभाषायाः प्रकृतसूत्रेण प्रकृतवार्तिकोक्तरीत्या तदन्तविधिसिद्धौ तदादिनियमपरतायाः एवाश्रयितुमुचितत्वात्। अन्यथा [४]"स्त्रीप्रत्यये नानुपसर्जने' इति निषेधस्य तदादिनियमविषयकत्वाभावेनानुपसर्जनस्त्रीप्रत्यये तदन्तविधेरेव प्रतिषेधापत्तेः। न चेष्टापत्तिः, ङ्याप्प्रयुक्तस्याङ्गकार्यस्य कस्याप्यप्रवृत्तौ समस्तोपप्लवापत्तेः। **दृषत्तीर्णेति**। [५]"रदाभ्यां निष्ठातो नः' इत्यत्र हि तकारद्वारा निष्ठा पञ्चमीनिर्दिष्टरेफपरत्वेनाश्रीयते। अतस्तदन्तविध्यभावे तीर्णशब्दतकारस्य नत्वं भवति। ननु संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिनिषेधेनैवेदमुदाहरणं सिद्धमिति चेन्न, [६]"क्तक्तवतू निष्ठा' इत्यत्र संज्ञित्वेन निर्दिष्टयोः प्रत्ययत्वस्याप्रसिद्धत्वेन तदन्तविधेरेवाप्रसक्ततया तन्निषेधस्य दूरापास्तत्वात्। ननु क्तवतोः [७]"निष्ठा' इति सूत्रेणैव प्रत्ययाधिकारे विधीयमानत्वेन प्रत्ययत्वाप्रसिद्धावपि "जीतः क्तः' [९]"नपुंसके भावे क्तः' इति सूत्रान्तरेणैव क्तस्य विधानात् तस्य प्रत्ययत्वं सिद्धमिति तदंशे तदन्तविधिप्रसक्तौ निषेधः कृत इति युक्तैवोक्तशङ्केति चेन्न, [१०]"निष्ठा' इति सूत्रेण क्तक्तवत्वोरुभयोर्विधानस्यावश्याश्रयणीयत्वेन सूत्रान्तरेण विहितस्य पुनर्विधानासंभवेन चालब्धप्रत्ययसंज्ञकस्यापि क्तस्य तत्रानुवाद इति क्तग्रहणमपि प्रत्ययस्यैव ग्रहणं नेति तदन्तविधिप्रसक्त्यभावात्। न च भाविप्रत्ययसंज्ञामाश्रित्य तत्रापि तदन्तविधिप्रसक्तिरिति वाच्यम्, क्लृप्तप्रत्ययसंज्ञामादाय चरितार्थस्य वचनस्य भाविप्रत्ययसंज्ञकपरतया नयने मानप्रयोजनयोरभावात्। एतेन "संज्ञाविधौ तर्हि तदन्तविधिनिषेधस्य किं फलम्, उच्यते, यदि संज्ञाविधौ प्रत्ययग्रहणे तदन्तस्य संज्ञा स्यात् प्रदेशेषु पुनस्तदन्तविधिः स्यादिति प्रत्ययान्तान्तं गृह्येत। तस्मात् संज्ञाविधावपि तदन्तविधेर्निषेधः, [११]"रदाभ्याम्' इत्यत्र च" इति कैयटो निरस्तः। प्रत्ययान्तान्तोदाहरणस्यासंभवात्। निष्ठासंज्ञाविधौ तदन्तविध्यप्रसक्तेरुक्तत्वाच्च। संज्ञाविधावुत्तरपदाधिकारे च प्रत्ययग्रहणे तदन्तविधिर्नास्ति, [१२]"सुप्तिङन्तम्' इत्यन्तग्रहणात्, [१३]"हृदयस्य हृल्लेखयदण्लासेषु' इति सूत्रेऽण्ग्रहणेन सिद्धेऽणन्तस्य लेखशब्दस्य ग्रहणा-

---

[१] महाभाष्यम् पस्पशाह्निके।
[२] परिभाषा २३.
[३] परिभाषा २३.
[४] परिभाषा २६.
[५] पा. सू. ८. २. ४२.
[६] पा. सू. १. १. २६.
[७] पा. सू. ३. २. १०२.
[८] पा. सू. ३. २. १८७.
[९] पा. सू. ३. ३. ११४.
[१०] पा. सू. ३. २. १०२.
[११] पा. सू. ८. २. ४२.
[१२] पा. सू. १. ४. १४.
[१३] पा. सू. ६. ३. ५०.

च्च। तेन तरप्तमबन्तस्य घसंज्ञाभावात् [1]'घरूप' इत्यत्र तदन्तविध्यभावाच्च 'कुमारी गौरितरा' इत्यादौ गौरीशब्दप्रभृतेरेव ह्रस्वः, न तु कुमारीशब्दप्रभृतेः। ननु संज्ञाविधौ तदन्तविधिनिषेधसामर्थ्यादेव तत्संज्ञयापि तदन्तविधिर्न भविष्यतीति चेन्न, 'कुमारी ब्राह्मणिरूपा, कुमारी ब्राह्मणिकल्पा' इत्यादिसिद्धये 'उत्तरपदाधिकारे प्रत्ययग्रहणे तदन्तविधिर्न' इत्यस्यावश्यं ज्ञापनीयत्वेनानेनैव घग्रहणेनापि तत्र तदन्तविध्यभावस्य सिद्धत्वेन संज्ञाविधौ तदन्तविधिनिषेधस्य चारितार्थ्येन तत्संज्ञयापि तदन्तविधिर्नेत्येतत्कल्पकत्वाभावात्। अन्यथा [2]'किमेत्तिङव्ययघादामु' इत्यत्रापि घग्रहणेन तदन्तविधिर्न स्यात्। न चेष्टापत्तिः, किमेत्तिङव्ययादेरामन्तस्यैकपद्याभावेन आम उदात्तत्वे सति जायमानस्य शेषनिघातस्य घप्रत्ययविषयकत्वापत्तेः॥

[१, ५५५–५५९]

(**नारायणीयम्**) 'इष्टकेषीका' इत्यादिप्रयोजनकथनानुपपत्त्याह — **पदेति**। विशेष्यसंनिधिमाह — **उत्तरेति**। अङ्गेन महदादि न विशेष्यत इत्याह — [**महदादिभिरिति**]। 'दीर्घविधौ' इत्युपलक्षणम्, न तु [3]'यद्विधौ' इत्यादिवद्व्यावर्तकमित्याह — **अप इति**। **पाद इति**। पुनः पुनः कीर्तनं प्रयोजनप्रपञ्चस्य विशेषणविशेष्यभावव्यवस्थाप्रदर्शनार्थत्वान्नानर्थक्यमिति प्रदर्शनार्थम्। प्रकरणात् सामर्थ्यस्य बलीयस्त्वाश्रयणेनाङ्गाधिकारप्रयोजनमध्यपतितस्याप्यस्य प्रयोजनस्य पदाधिकारविषयत्वमुक्त्वा तत्रातिव्याप्तिश्चोदिता। सैषा न युक्तेत्याह — **नन्विति**। वचनत्वे सत्यचोदितविषयेऽप्राप्तेरतिव्याप्त्युद्भावनमयुक्तम्। विशेषणत्वप्रदर्शनपरं तु वार्तिकं नापूर्ववचनमिति पद्भावस्थानिनो विशेषणत्वप्रदर्शनादनिष्टमिदमापाद्यत इत्याह — [4]**पादेनेति**। ननु वाक्यान्तरे विशेषणस्य [5]'पादस्यान्यस्मिन् विशेष्यत्वं भविष्यतीत्यत आह — **यथेति**। अर्थाधिकारे विशेषणत्वेन प्रस्तुतस्य न विशेष्यत्वमुपपद्यत इत्यर्थः। प्रकरणोत्कर्षे दोषमुक्त्वानुत्कर्षेणैव गतिरुक्ता। तत्र प्रागुक्तोत्कर्षफलस्य कथं सिद्धिः, अत आह — **एवं चेति**। तदसिद्धिरिष्टैवेत्यर्थः। पादस्य विशेष्यत्वे न तर्हीदानीमिदं भवतीत्याशङ्क्य भवत्यर्थान्तरे, न तु तदन्तविधिनेत्याह — **यदा त्विति**। अत एवातिव्याप्त्यपरिहारः शब्दाधिकाराश्रयणेन भाष्यकारस्य। परिहारे पद्भावे तदन्तविधिरङ्गीकृतः स्यात्। पादयतेर्भ्वादिष्वनुपदेशादाह — **पदेरिति**। **प्रपञ्चार्थ इति**। विस्पष्टनमिह प्रपञ्चः। अनुपपत्तिगम्यार्थस्य साक्षात् प्रतिपादने विस्पष्टा प्रतिपत्तिरिति भावः। 'वचनात्' इत्यस्य नुम्विधावित्यनेन संबन्धः। एवकारश्च विधानादित्यत्र संबध्यते। सिद्धत्वादिति वा वाक्यशेषः। आदित्ययं चाधिकारो नुमा आमो बाधनिवृत्तये समाश्रितस्तत्र। **अन्य त्विति**। अनुपपत्तिरिहोपपत्तिर्यावतैव भवति तावदेव कल्पयतीति भावः। अत्रायमपरितोषः — इमानि वचनानि विशेषणत्वव्यवस्थापराणि, नापूर्वाणि। तत्र नुम्विधौ विशेषणत्वमनडुहः प्रदर्श्यमानं त्वमामोस्तत्त्वमन्तरेणानुपपन्नमिति तयोरपि विशेषणत्वानुमानं भविष्यतीति। **अन्यथेति**। चतुरशब्दसाहचर्यादित्याहुः। नन्वपिशब्दात् केवलस्यान्यपूर्वस्य च तत्र ग्रहणम्, अत आह — **नञिति**। **यदीति**। 'सर्वत्र'ग्रहणान्निषेध[6]भाक्त्वानुपपत्तिरिति भावः। **उच्यत इति**। 'सर्वत्र'-

---

[1] पा. सू. ६. ३. ४३.
[2] पा. सू. ५. ४. ११.
[3] 'रथसीताहलेभ्यो यद्विधौ' इति वार्तिक इत्यादिः।
[4] प्रदीपे 'पादशब्देन पूर्वपदस्य विशेषणात्' इत्यत्र 'पादेन पूर्वपदस्य विशेषणात्' इति पाठोऽभिमत इति भाति।
[5] पदस्यान्यस्मिन् — ग.
[6] भाक्त्वोपपत्तिरिति — ग.

ग्रहणस्य प्रत्ययविधिव्यतिरिक्तानङ्गाधिकारकार्यसंग्रणेनाप्युपपत्तिरिति भावः। आशङ्काग्रहणेनैतद् दर्शयति।

तादृक्संग्राह्यदौर्लभ्यं लाभे वा तस्य संग्रहः।
नान्यस्येति विशेषेऽपि प्रमाणं नास्ति किंचन॥
सर्वश्रुतेरसंकोचाद्वैपरीत्यं प्रतीयते।
अकृतार्थनिषेधस्य परत्वाद्विधिबाधनम्।
उपपन्नं निषेधत्वं प्राबल्ये न हि कारणम्॥ इति।

किमिह प्रत्ययग्रहणेऽपूर्वस्तदन्तविधिरुच्यते, प्रत्ययग्रहणपरिभाषालब्धो विशेषनिषेधायानूद्यते। नाद्यः, प्रत्ययग्रहणपरिभाषावैयर्थ्यापातात्। न चैतन्निषेधविषये [1]तत्प्रवृत्तिः कल्पयितुमिष्टा, [2]'रदाभ्याम्' इत्यादौ केनापि तदन्तविध्यनिष्टेः। तथा च 'दृषत्तीर्णा' इति भाष्यम्। नान्त्यः, परमगार्ग्यायणोदाहरणानुपपत्तेः, अत आह — **प्रत्ययेति**। अत्र चानुपपत्तिः, सा ग्रन्थे परिहरिष्यते। 'अपञ्चम्याः'इत्यस्यार्थमाह — **यत्रेति**। व्यवच्छेद्यं ग्रन्थे वक्ष्यते। सत्यपि तदन्तविधौ न दोषः, निष्ठासंबन्धिनस्तकारस्य निष्ठान्तसंबन्धित्वादित्यत्राह — **तत्र हीति**। सत्यं सिध्यत्यभिमतम्, स्यादनभिमतस्यापि तु प्रकृतितकारस्य प्रसङ्ग इत्यर्थः। न च दकारादुत्तरत्वाभावात् कथमभिमतस्य भाष्योक्तोदाहरणे सिद्धिरिति वाच्यम्, रेफादुत्तरत्वान्निष्ठान्तसंबन्धित्वात्। न च 'रदाभ्याम्' इति निष्ठान्तविशेषणमिति टीकायामुक्तम्, अपि तु तकारविशेषणमिति। अत एव 'तीर्णम्' इत्यादौ दोषाभावाद् दृषत्तीर्णेत्युदाहरणम्। सिद्धान्ते च तकारविशेषणत्वमेव 'रदाभ्याम्' इत्यस्य, न तु निष्ठाविशेषणत्वम्। अत एव भिन्नवद्भ्यामित्यादौ नत्वाभावः। **न चेति**। संज्ञापूर्वकविधिरपि संज्ञाविधिशब्देन ग्राहिष्यत इति भावः। [**तत्रेति**] [3]किं च संज्ञापूर्वकविधौ प्रत्ययग्रहणेऽपि [4]"आमन्त्रितस्य च' [5]"सुप्' [6]"सुपा' इत्यादौ तदन्तविधिरस्ति। [7]"नस्तद्धिते' इत्यत्र तु तद्धितान्ते नान्तस्य भत्वाभावात् तदन्तविध्यभावः। एवमन्यत्रापि तद्भावहेतुरस्ति। [8]"गतिकारकोपपदात् कृत्' इत्यत्र 'अपञ्चम्याः' इति निषेधः कृन्मात्रस्योत्तरपदत्वाभावान्न प्रवर्तते। एवमन्यत्रापि प्रतिषेधाभावः सहेतुकः। **किमिति**। क्तान्तस्य निष्ठासंज्ञायां 'दृषत्तीर्णा' इति नत्वप्रसङ्ग इति तन्निवारणाय संज्ञाविधौ निषेधः। यदि च प्रदेशे तदन्तविधिनात्र नत्वं स्यात् संज्ञाविधौ तन्निषेधोऽनर्थकः स्यादित्यतः प्रदेशेऽपि तदन्तविध्यभावः कल्पयिष्यत इत्यर्थः। 'दृषत्तरुतीर्णा' इत्यादावपि नत्वं स्यान्निषेधद्वयाभावे। संज्ञाविधौ निषेधात्त्वत्र निवार्यते, न तु 'दृषत्तीर्णा' इत्यत्रापि। तन्निवारणायायमपि[9] निषेध आवश्यक इत्याह — [10]**यदीति**। पूर्वपञ्चम्याः प्रत्ययग्रहणं तदन्तविधिं न प्रयोजयतीत्यस्य **ग्रहणम्** अनुवाद इत्यभिप्रेत्य पञ्चम्युत्तरप्रत्ययानुवादे तदन्तविधिनिषेधोऽर्थ इत्युक्तम्। ग्रहणशब्दस्य विधानार्थतया व्याख्यानं त्वयुक्तमित्याह — **अपञ्चम्या इति**। अत्र पक्षे [11]"यञ्ञिञोश्च' इत्यादौ षष्ठ्यन्तात् प्रत्ययविधाने तदन्तविधिः। अत्र च निषेधशेषत्वेन प्रत्ययग्रहणपरिभाषानूद्यमानतयापि संनिधीयते। एष ह्यत्र वाक्यार्थः — प्रत्ययग्रहणं तदन्तविधिं प्रयोजयति। पञ्चम्याः

---

[1] प्रत्ययग्रहणपरिभाषाप्रवृत्तिरित्यर्थः।
[2] पा. सू. ८. २. ४२.
[3] न च — ग.
[4] पा. सू. ६. १. १९८, ८. १. १९.
[5] पा. सू. २. १. २.
[6] पा. सू. २. १. ४.
[7] पा. सू. ६. ४. १४४.
[8] पा. सू. ६. २. १३९.
[9] अपञ्चम्या इति निषेध इत्यर्थः।
[10] यदिति — ग.
[11] पा. सू. ४. १. १०१. यञ्ञोश्च — ग.

प्रत्ययविधानं तु न प्रयोजयतीति। ततश्च तत्परिभाषालब्धतदन्तविधेरेवास्यामप्यवस्थायां निषेधोऽनुगन्तव्यः। [1]'रदाभ्याम्' इत्यादौ तु संज्ञापूर्व[क]विधानेऽपि [2]'संज्ञाविधौ' इति निषेध एव व्याख्येयः। संज्ञापूर्वकविधौ तत्र तत्र तदन्तविधिदर्शनं च सामर्थ्यादिनोपपाद्यम्। अन्यैस्तु पञ्चम्याः प्रत्ययग्रहणं पञ्चमीसंबन्धिप्रत्ययग्रहणं पञ्चम्यन्तप्रत्ययग्रहणं तदन्तविधिं न प्रयोजयतीति मत्वा टीकैषा व्याख्याता। तत्र प्रत्ययग्रहणपरिभाषालब्धतदन्तविधिनिषेधः सुलभः। 'प्रत्ययो विधीयते' इति तु पदद्वयं टीकायामयोजितं स्यात्। **एवं हीति**। नास्य किंचित् साध्यमिष्टम्, प्रत्युतानिष्टमेवेत्यर्थः। विकारावयवप्रत्ययो यो ञित् तदन्ताद्विकारावयवयोरञ् भवति। कपोतस्य विकारः कापोतः, [3]'अनुदात्तादेश्च' इत्यञि कापोतस्य विकार इति वृद्धान्मयटि प्राप्ते अनेनाञि कापोत एव भवति। तत्राञ एव स्वरः स्यात्। शेषनिघाते सत्युदात्तनिवृत्तिस्वरेणान्तोदात्तत्वप्रसङ्गः। अत्र तु वृद्धौ न दोषः। वुञाद्यन्तादञि तत्रापि दोषः। **तस्येति**। प्रत्ययग्रहणपरिभाषया परमगार्ग्यशब्दस्य यञन्तत्वाभावः। नन्वेतदुदाहरणानुपपत्त्यापूर्वस्तदन्तविधिः कल्प्यताम्, अत आह — **तस्माच्चेति**। नात्रापूर्वतदन्त[4]विधिनोपपन्नं किंचित्। प्रत्युत तदनङ्गीकारसूचकमेवास्तीत्यर्थः। तर्हि गार्ग्यायण इत्युदाहृतत्वात् सविशेषणस्यापि तस्यैव पुनरुपन्यासः किमर्थः, अत आह — **तस्मादिति**। गार्ग्यायण एवोदाहृते साधारण्यादपूर्वत्वशङ्का न निरस्ता, एतदुदाहरणात्तु निरस्तेत्यर्थः। ननु [5]'घरूपकल्प' इत्यादौ 'अपञ्चम्याः' इति निषेधाप्रसङ्गाद् घाद्यन्त उत्तरपदे कार्यं स्यात्। तस्मात् संज्ञापूर्व[क]विधानेऽपि निषेध एष्टव्य इत्यत्राह — **उत्तरेति**। तदन्तविधौ सत्यण्ग्रहणेन सिद्धेर्लेखग्रहणमनर्थकम्। नेदमप्युपसंख्यानमित्याह — **तत्रेति**। पदस्य विशेषणत्वं निष्ठायाः प्राधान्यम्। **स्येति**। नन्विह लृलुङ्विशेष्यं नास्तीति कथं तदन्तविधिशङ्का। न च धातोर्विशेष्यत्वम्, लृलुटोस्तदनवयवत्वात् लृलुङन्तो धातुरिति व्यपदेशायोगात्। अत्राहुः — प्राधान्यग्रहणं [6]टीकायामविशेषणत्वलक्षकम्। ततश्च विशेष्यासंनिधिरेव तदर्थ इति। एवं तु 'आश्रयणात्' इत्यव्याख्यातम्। तस्माद् धातुप्रत्ययाभ्यां समुदायाविनाभूताभ्याभाक्षिप्तं पदं लृलुङ्भ्यां विशेष्यम्। धातोः स्यतासी इत्यन्वयात् पञ्चम्या लृलुङ्विशेषणत्वाभावान्नास्ति निषेध इत्यत्राह — **लृलुटोरिति**॥

[१, ५५९–५६१]

(लघुविवरणम्) इति स्थितमिति। [7]'स्वं रूपम्' इत्यत्र॥

[१, ५५९–५६१]

(विवरणम्) 'वर्णग्रहणं सर्वत्र' इत्यत्र यद्यपि जातिग्रहणम्, तथाप्यर्थवत्परिभाषयार्थवता सह तदन्तविधिरिति 'अलैव' इत्यनुपपन्नमित्यत आह — **अर्थवदिति**। **स्थितं** 'स्वं रूपम्' इत्यत्र। केन हेतुनेत्यत आह — **वर्णेति**। **गुणत्वात्** तदन्तविधिनियमशेषत्वादित्यर्थः। **दीर्घो भवतीति**।

---

[1] पा. सू. ८. २. ४२.
[2] परिभाषा २७. संज्ञाविधावपि निषेध एव — ग.
[3] पा. सू. ४. ३. १४०.
[4] विधिनानुपपन्नं — ग.
[5] पा. सू. ६. ३. ४३.
[6] टीकायामपि विशेषणत्व — ग.
[7] पा. सू. १. १. ६८.
[8] पा. सू. १. १. ६८.

[1]'इन्हन्' इति नियमेनानिवर्तितत्वादिति भावः। **तदन्तविधिरिति**। अत एव ब्रह्महणावित्यादौ नियमाद्दीर्घाभावः। **तवर्गान्तस्येति**। [2]'वा पदान्तस्य' इत्यतः पदग्रहणमनुवृत्तं तोरित्यनेन विशेष्यत इत्यभिप्रेत्यत वर्गान्तस्येत्युक्तम्। ननु व्यभिचाराभावात् तवर्गेणोदो विशेषणं व्यर्थमित्यत आह — **तोरिति**। **पदप्रकरणात्** [3]'एङः पदान्तादति' इति शेषः। पायसविषयत्वे करोतेर्भूषणाद्यर्थतेत्याह — **पायसमिति**। 'सिद्धे विधिरारभ्यमाण एवकारमन्तरेणापि नियमार्थः' इति न तदभिप्राय आक्षेप इत्याह — **अलैवेति**। असंदेहाय 'उत्तरपदे' इत्येव वक्तव्ये पदग्रहणमुभयाभिप्रायं स्वरितलिङ्गेनेत्यभिप्रेत्याह — **पदाङ्गेति**। **नापीति**। समासावयवविशेषो ह्युत्तरपदम्। न च प्लीहन्नित्यादिः समास इति भावः। यद्यपि भाष्ये 'पदाङ्गाधिकारे' इति समनन्तरं निर्दिष्टम्, तथापि वार्तिके 'अलैव' इत्यादिना व्यवहितं तदिति व्यवहितविषयेण तच्छब्देन 'पदाङ्गाधिकारे' इत्यस्य परामर्श इत्याह — **पदेति**। वचनेनार्थवतो व्यावर्तनाभावात् सूत्रेणार्थवता तदन्तविधिसद्भावादित्याह — **अलैवेति**। तदन्तविधिरेवेति नियमाभिप्रायं भाष्यमित्याह — **प्राथमेति**। भाष्ये 'नापि' इत्यत [4]'उन्नीतं यदुक्तमस्माभिः पदाङ्गाधिकार इति तदन्तविध्यपवाद इति। **अनेनैवेति**। न परमातिमहानित्युगिदङ्गम्, नाप्युगिदुत्तरपदमिति भावः। **अर्थवानेवेति**। असुनस्तुड्विधानादित्यर्थः। भाष्ये 'अलैव' इत्यस्यापवादः — **अनिनस्मन्निति**। [5]'अल्लोपोऽनः' [6]'इन्हन्पूषार्यम्णां शौ' [7]'अत्वसन्तस्य चाधातोः' [8]'मनः' इत्यादिषु वर्तमानानीत्यर्थः। 'यस्मिन् विधिः' इत्यस्यात्राभिधाने प्रसङ्गमाह — **तदन्तेति**। **नान्येनेति**। अविशेषणेन [9]'इको यणचि' इत्यादावप्यचीत्यादिनेत्यर्थः॥

[१, ५५९–५६१]

(**उद्द्योतनम्**) यद्यपि वर्णग्रहणे जातिग्रहणम्, तथाप्यर्थवत्परिभाषयार्थवतैवाला तदन्तविधिर्नानर्थकेनेति 'अलैव' इति नियमोऽनर्थकः, अत आह — **अर्थवदिति**। **स्थितं** [10]'स्वं रूपम्' इत्यत्र। अनाश्रयणे हेतुः — **वर्णेति**। समुदायस्याप्राप्तस्य नियमेन व्यावृत्त्यसंभवात् तत्प्राप्तिमाह — **वर्णग्रहणं चेति**। [11]समुदायस्याप्यल्त्वात् [12]कथं निवारणम्, अत आह — **एकत्वेति**। **गुणत्वात्** तदन्तविधि[13]नियमशेषत्वात्। 'अलैव' इति नियमोऽत्र विधीयते, नाल्। [14]तथा चाविधेयगतमेकत्वं कथं विवक्ष्यते, अत आह — **नियमेति**। **दीर्घो भवतीति**। [15]'इन्हन्' इति नियमेनाव्यावर्तितत्वादिति भावः। यद्यपि हनादिष्वर्थवत्परिभाषयानर्थकव्यावृत्तिः संभवति, तथापि वर्णरूपतयात्र शब्दस्य विवक्षितत्वादर्थवत्त्वाविवक्षणात् परिभाषानुपस्थानात् प्रयोजनोपपत्तिरिति मन्तव्यम्। अत्र सर्वत्र तदन्तविधिप्रसक्तिमाह — **तत्रेति**। हनादिचतुष्टयमध्य इत्यर्थः। **तदन्तविधिरिति**। अत

---

[1] पा. सू. ६. ४. १२.
[2] पा. सू. ८. ४. ५९.
[3] पा. सू. ६. १. १०९.
[4] उत्थितं — च, छ, ञ, ट.
[5] पा. सू. ६. ४. १३४.
[6] पा. सू. ६. ४. १२.
[7] पा. सू. ६. ४. १४.
[8] पा. सू. ४. १. ११.
[9] पा. सू. ६. १. ७७.
[10] पा. सू. १. १. ६८.
[11] समुदायस्याल्त्वात् — ऋ.
[12] कथं नियमः — म; कथं निराकरणम् — ऋ.
[13] नियमविशेषणत्वात् — म.
[14] तथा च विधेय — अ.
[15] पा. सू. ६. ४. १२.

एव वृत्रहणावित्यादौ दीर्घाभावः। प्लीहानावित्यत्र हनोऽनर्थक[1]वर्णसमुदायत्वात् [2]तदन्ताग्रहणात्। [3]'वा पदान्तस्य' इत्यतोऽनुवृत्तं पदं तोरित्यनेन विशेष्यत इत्यभिप्रेत्य तवर्गान्तस्येत्युक्तम्। **प्रतिषेधेति**। 'अलैवानर्थकेन' इत्यनेनेत्यर्थः। उक्ततदन्तविधिनिरासप्रकारान्तरमाह — **उद एवेति**। व्यभिचाराभावात् तवर्गेणोदो विशेषणं व्यर्थम्, अत आह — **तोरिति**। [4]**संग्रहण इति**। [5]'एङः पदान्तात्' इत्यतोऽनुवर्तमानं पदं समा विशेष्यत इति तदन्तविधिप्राप्तिरित्यर्थः। **पदग्रहणात्** पदानुवृत्तेः। 'पदप्रकरणात्' इति पाठः स्पष्टार्थः। **निवार्यते** अलैवेत्यनेन। निवारणे प्रकारान्तरमाह — **पदेनेति**। 'समादयः' इत्यादिना पर्यादिग्रहः। ननु भूषणार्थवृत्तेः करोतेः [6]'सुट्, पायसं करोतीत्यत्र'[7] न भूषणार्थतेति कथं सुट्, अत आह — **भूषणेति**। 'संस्करोति' [8]'इत्यत्रेव तत्रापि भूषणार्थता संभवति, ब्राह्मणेभ्यो दातुं पायसकरणं भूषणमेवेति भावः। 'सिद्धे विधिरारभ्यमाण एवकारं विनापि नियमार्थः' इत्येवकाराक्षेपभ्रान्तिं निराह — **अनर्थकेनेति**। 'अलैवानर्थकेन' इत्यस्य सर्वस्याक्षेप इत्यर्थः। तदेवाह — [9]**अस्येति**। अन्यथासिद्धिमेवाह — **अङ्गाधिकार इति**। ननु 'पदाङ्गाधिकारे' इत्यत्र उत्तरपदाधिकार इति व्याख्यातम्, पदाधिकारमात्रस्य कथं लाभः, अत आह — **पदाङ्गेति**। **केवलेति**। असंदेहाय 'उत्तरपद' इत्येव वक्तव्ये [10]पदग्रहणमुभयाधिकाराभिप्रायकमित्यर्थः। [11]**ततश्चेति**। हनादीनां पदाङ्गाधिकारसंबन्धादित्यर्थः। 'न चेदं तत्' इति [12]भाष्यार्थमाह — **न [हि] प्लीहानाविति**। तदुत्तरपदं तस्याङ्गस्योत्तरपदम्। एवं 'शस्त्री' इत्यत्र स्त्रीत्येतन्नाङ्गम्, नापि तदुत्तरपदम्। [13]'पायसम्' इत्यत्र 'सम्' इत्येतन्न पदम्, नापि तदुत्तरपदं। 'गर्मुत्' इत्यत्र 'उत्' इत्येतन्न पदम्, नापि तदुत्तरपदमिति ज्ञेयम्। नन्वव्यवहितनिर्दिष्टस्य 'पदाङ्गाधिकारे' इत्यस्य परामर्शार्थम् 'एतन्न वक्तव्यम्' इति वाच्ये व्यवहितपरामर्शितच्छब्दोपादानमयुक्तमित्याशङ्क्य 'अलैव' इत्यनेन व्यवहितवार्तिकपरामर्शाभिप्रायेण तदुक्तिरित्याह — **पदेति**। यद्वात्र तच्छब्दोऽव्यवहितपरामर्शीत्याह — **पदेति**। अवचनेऽपीष्टसिद्धिमाह — **अलैवेति**। अनर्थकाल्समुदायेन [15]'तदन्तविध्यभावात् 'शस्त्री' इत्यादौ नातिप्रसङ्गः, अर्थवता हनादिना तदन्तविधिसद्भावाद् वृत्रहणावित्यादौ दीर्घाभावः, प्लीहानाविन्यत्र दीर्घश्च सिद्ध इत्यर्थः। भाष्ये [16]**किं पुनरत्रेति**। 'पदाङ्गाधिकारे' इत्यस्य **वचनावचनयोः** किं ज्याय इत्यर्थः। [17]अवचनमेव ज्याय इत्याह — भाष्ये **तदन्तविधिरेवेति**। एवकारेण [18]'वक्तव्यत्वनिरासः। तदुपपादयति — **प्राथमकल्पिक इति**। [19]'नापि तदुत्तरपदम्' इति [20]'भाष्ये दर्शनात् 'पदाङ्गाधिकारे' इति वार्तिकं 'येन विधिः' इति सूत्रस्यापवाद इति भाष्यकृदभिप्रेतमित्युन्नीयत इति केचित्।

---

[1] 'वर्ण' इति नास्ति — म.
[2] तदन्तग्रहणात् — अ, म.
[3] पा. सू. ८. ४. ५९.
[4] 'संग्रहण इति' इति नास्ति — म.
[5] पा. सू. ६. १. १०९.
[6] सुटि — म.
[7] 'अत्र न भूषणार्थतेति' इति नास्ति — अ.
[8] इत्यत्रवदत्रापि — म; इत्यत्रेवात्रापि — ऋ.
[9] अन्यथेति — ऋ.
[10] पदग्रहणमुभयाभिप्रायकमित्यर्थः — अ, म.
[11] 'ततश्चेति' इत्यादि 'संबन्धादित्यर्थः' इत्यन्तं नास्ति — म.
[12] प्रश्नार्थमाह — म.
[13] 'पायसम्' इत्यादि 'उदित्येतन्न पदम्, नापि तदुत्तरपदम्' इत्यन्तं नास्ति — म.
[14] सिद्धिरित्याह — म.
[15] तदन्तविध्यभावे — म.
[16] किमत्रेति — अ, म, ऋ.
[17] वचनमेव — म.
[18] अवक्तव्यनिरासः — म; वक्तव्यनिरासः — अ.
[19] विवरणोक्तिमाह — नापीत्यादिना।
[20] भाष्यदर्शनात् — ऋ.

वार्तिकेन न सूत्रमन्यथासिद्धम्। किं तु सूत्रेण वार्तिकमेवेति सूचनाय वार्तिकस्याव्याप्तिकथन-परमेतद् भाष्यमिति नापवादत्व[1]निश्चायकमित्यन्ये। महच्छब्दस्योत्तरपदत्वाभावाय समासमाह — **परम इति**। तत्र वार्तिकाप्रवृत्तिमाह — **तत्रेति**। **अनेनैवेति**। 'परमातिमहान्' इति नोगिदङ्गम्, नाप्युगिदुत्तरपदम्, महच्छब्दस्यैवोगित्त्वादिति भावः। 'अलैवानर्थकेन' इत्यनेनानर्थकवर्णसमुदायेन तदन्तविधिर्नेत्युक्तम्, तस्य क्वचिदपवादमाह — भाष्ये **अनिनस्मन्निति**। [2]'अल्लोपोऽनः' [3]'इन्-हन्पूषार्यम्णां शौ' [4]'अत्वसन्तस्य चाधातोः' [5]'मनः' इत्यादिष्वित्यर्थः। असुन्यनुवर्तमाने [6]'स्तुरीभ्यां तुट् च' इत्यसुनस्तुड्विधानात् कथं 'सुस्रोताः' इत्यत्रासुनोऽनर्थकत्वम्, अत आह — **अनागमकानामिति**। पक्षान्तरे तु नानर्थक्यमित्याह — **अर्थवत इति**। **अर्थवान्** 'असुन्' इत्यादिः। भाष्ये 'सुशर्मा, सुप्रथिमा' इति स्त्रियामन्यपदार्थे बहुव्रीहिः, [7]'मनः' इति ङीब्निषेधः। [8]'शृणातेः [9]'अन्येभ्योऽपि' इति मनिन्प्रत्ययः। 'यस्मिन् विधिः' [10]'इत्यस्यात्राभिधाने संगतिमाह — **तदन्तेति**। **अत एव** तदन्तविध्यपवादत्वादेव। **नान्यनेति**। [11]'इको यणचि' इत्यदावित्यर्थः॥

[१, ५५९–५६१]

(**रत्नप्रकाशः**) **अलैवानर्थकेनेति**। [12]'अर्थवद्ग्रहणे नानर्थकस्य' इत्येव सिद्धे इदं वचनं सा परिभाषा वर्णग्रहणविषये न प्रवर्तत इति सूचयितुम्। न च [13]'न वर्णग्रहणेषु' इति तत्परिभाषानन्तरं निषेधवचनं पठ्यत एवेति वाच्यम्, तस्य निषेधस्य स्वरूपसूत्रे भाष्यकारैरनुट्टङ्कितत्वेनैतन्मूलकताया एव कल्पयितुमुचितत्वात्। एतेन "अर्थवद्ग्रहणे नानर्थकस्येति वर्णनिर्देशेषु नाश्रीयत इति स्थितेऽपि 'वर्णग्रहणं च सर्वत्र' इति प्रागुक्तवर्णग्रहणे जातिग्रहणाद् वर्णसमुदायेनानर्थकेन तदन्तविधिप्रसक्तावनेन वार्यते" इत्येवंपरः कैयटो निरस्तः। सर्वत्र तदन्तविधिविषयस्य वर्णसमुदायात्मकत्वानपायेन 'वर्णग्रहणं च सर्वत्र' इत्यत्र जातिपरत्वाश्रयणानौचित्यात्। [14]'वर्णग्रहणे जातिग्रहणम्' इत्यस्य ज्ञापकसिद्धस्य क्वाचित्कत्वेनानिष्टस्थलेऽप्रवृत्तेश्च। **हन्ग्रहण इति**। [15]'इन्हन्' इत्यादिसूत्र इति शेषः। **प्लीहन्ग्रहणं मा भूदिति**। [तेन प्लीहानाविति दीर्घो भवति। **उद्ग्रहण इति**। [16]'उदः स्थास्तम्भोः' इत्यत्रेति शेषः।] तेन गर्मुत् स्थास्यतीत्यत्र [17]'उदः स्थास्तम्भोः' इति पूर्वसवर्णो नेति भावः। [18]'उदः स्थास्तम्भोः' इत्यत्र तदन्तविध्यभावात् कृत्वाचिन्तामात्रपरमेतत्। [19]**शस्त्रीग्रहणं मा भूदिति**। तेन 'शस्त्र्यौ, शस्त्र्यः' इत्यादौ [20]'स्त्रियाः' इतीयङ् नेति

---

[1] प्रत्यायकमित्यन्ये — म; निश्चायकत्वमित्यन्ये — ऋ.
[2] पा. सू. ६. ४. १३४.
[3] पा. सू. ६. ४. १२.
[4] पा. सू. ६. ४. १४.
[5] पा. सू. ४. १. ११.
[6] उणादिसूत्रम् ६५१.
[7] पा. सू. ४. १. ११.
[8] शृणोतेः — म.
[9] पा. सू. ३. २. ७५.
[10] इत्यस्याभिधाने — अ.
[11] पा. सू. ६. १. ७७.
[12] परिभाषा १४.
[13] का. वा. ३. ४. ७७ – ३.
[14] महाभाष्यम् १. १. १४.
[15] पा. सू. ६. ४. १२.
[16] पा. सू. ८. ४. ६१.
[17] पा. सू. ८. ४. ६१.
[18] पा. सू. ८. ४. ६१.
[19] भाष्ये 'स्त्रीग्रहणे शस्त्रीग्रहणम्' इत्यन्तमेव दृश्यते — नि, चौ, ह, म, पू. 'शस्त्रीग्रहणं मा भूत्' इति रत्नप्रकाशकृत्पाठ इति भाति।
[20] पा. सू. ६. ४. ७९.

भावः। **पायसं करोतीति मा भूदिति**। वस्तुतस्तु मदुक्तप्रकारेणैव 'अलैव' इति वचनं नियमार्थं न भवतीति। किं तु 'अर्थवत्परिभाषा न वर्णग्रहणेषु' इति सूचनायैवेत्यनादरेणेदमुक्तम्। एतेन 'करोतेर्भूषणार्थवृत्तिता संभवतीति सुट् स्यात्' इति कैयटो निरस्तः। तत्र करोतेर्भूषणार्थकत्वाभावस्य लोकसिद्धत्वात्, [1]'संपरिभ्याम्' इत्यत्र तदन्तविधौ मानाभावाच्च। 'अलैव' इत्यादिवचनमाक्षिपति — **किमर्थमिदमिति**। अयमाक्षेपोऽप्यभ्युपगमवादेनैव [2]यक्षानुरूपबलिन्यायेन, वचनतात्पर्यस्यान्यविषयतायाः प्रागेवोक्तत्वात्। एतेन "अङ्गाधिकारे हन्ग्रहणं स्त्रीग्रहणं चास्ति। [3]'एङः पदान्तादति' इति पदाधिकारे संग्रहणम्। [4]'वा पदान्तस्य' इत्यतः पदग्रहणानुवर्तनात् [5]'उदः स्थास्तम्भोः' इति पूर्वसवर्णोऽपि। 'पदाधिकारे' इत्यत्र च केवलपदाधिकारोऽपि गृह्यते, उत्तरपदाधिकारोऽपि गृह्यते। ततश्च प्लीहानावित्यादिषु न दोषो भविष्यति" इति कैयटो निरस्तः। एतादृशक्लिष्टकल्पनायां मानप्रयोजनयोरभावात्। [6]फक्किकालापनस्य मदुक्तप्रकारेणैवोपपत्तेश्च। **तन्न वक्तव्यमिति**। 'तस्य तदुत्तरपदस्य च' इत्येतन्न वक्तव्यम्। 'पदाङ्गाधिकारे' इति तु वचनमपेक्षितं 'तस्य च' इति शेषसंबन्धाय। एतेन 'पदाङ्गाधिकार इत्येतदित्यर्थः' इति कैयटो निरस्तः। **किं पुनरत्र ज्याय इति**। 'तस्य तदुत्तरपदस्य च' इत्यंशं चाश्रित्यालैवेत्यादिनियमनिराकरणं वा प्रशस्तं 'पदाङ्गाधिकारे' इत्येतावन्मात्रमेवाश्रित्य 'अलैव' इत्यादिनियमाश्रयणं वा प्रशस्तमिति भावः। **तदन्तविधिरेव ज्यायानिति**। 'पदाङ्गाधिकारे च' इत्येतावदेव वचनमिति पक्ष एव ज्यायान्। 'अलैवानर्थकेन' इत्यस्य 'न वर्णग्रहणेषु' इत्येतदर्थकस्योभयथाप्यपेक्षितत्वेन तत्प्रयुक्तगौरवाभावादिति भावः। अस्मिन् पक्षेऽसाधारणमपि किंचित् प्रयोजनं सिध्यतीत्याह — **इदमपीति**। एतेन "प्राथमकल्पिकः सूत्रेणैव तदन्तविधिः, स एव तु 'अलैव' इति नियम्यते" इति कैयटो निरस्तः। 'इष्टकचितम्' इत्यादौ ह्रस्वस्य 'महान्, आपः' इत्यादौ दीर्घादेश्चासिद्धिप्रसङ्गात्। नियमवचनानर्थक्यस्य बहुकृत्वः कथितत्वाच्च। **परमातिमहानिति**। अतिशयितो महान् अतिमहान्, परमः स परमातिमहानित्यर्थः। **एतदिति**। परमातिमहानिति। **नैव तदिति**। नैव महदित्यर्थः। **नापि तदुत्तरपदं** नापि महदुत्तरपदम्। **अनिनस्मन्ग्रहणानीति**। इदमपि वचनं पूर्ववचनेन सहार्थवत्परिभाषानिषेधपरमेव ज्ञेयम्। तत्प्रयुक्तदोषवारकस्य तेनैव सह गमनौचित्यात्। तथा चार्थवत्परिभाषानन्तरम् 'अनिनस्मन्वर्णग्रहणेषु न' इति वचनं ज्ञेयमिति फलितम्। **अनिति**। [7]'अल्लोपोऽनः' इत्यत्र 'अनः' इति पदच्छेदाश्रयेणेदम्। 'नः' इति पदच्छेदे तु वर्णग्रहणत्वादेव सिद्धमित्यन्ग्रहणं व्यर्थमेव। **राज्ञेति**। [8]"कनिन्युवृषितक्षिराजिधन्विद्युप्रतिदिवः' इति कनिन्। **साम्नेति**। [9]'सातिभ्यां मनिन्मनिणौ' इति मनिन्। **दण्डीति**। [10]'अत इनिठनौ' इतीनिः। **वाग्मीति**। [11]'वाचो ग्मिनिः'। **सुपया इति**। [12]'सर्वधातुभ्योऽसुन्' इति पयेरसुन्। **सुस्रोता इति**। [13]'स्रुरीभ्यां तुट् च' इत्यसुन्, तस्य तुट् च। **सुशर्मेति**। [14]'सर्वधातुभ्यो मनिन्' इति मनिन्। **सुप्रथिमेति**। [15]'पृथ्वादिभ्य इमनिज्वा' इतीमनिच्। **यस्मिन्**

---

[1] पा. सू. ६. १. १३७.
[2] लौ. न्या. द्वितीयभागे पृष्ठम् ६५.
[3] पा. सू. ६. १. १०९.
[4] पा. सू. ८. ४. ५९.
[5] पा. सू. ८. ४. ६१.
[6] भाष्यफक्किाव्यवहारस्येत्यर्थः स्यादिति भाति।
[7] पा. सू. ६. ४. १३४.
[8] उणादिसूत्रम् १६२.
[9] उणादिसूत्रम् ६०२.
[10] पा. सू. ५. २. ११५.
[11] पा. सू. ५. २. १२४.
[12] उणादिसूत्रम् ६३८.
[13] उणादिसूत्रम् ६५१.
[14] उणादिसूत्रम् ५९४.
[15] पा. सू. ५. १. १२२.

विधिरिति। यस्मिन्नलि विशेषणे सति विधेयप्रसक्तिस्तस्य विशेषणस्य वाचकस्तदादेः संज्ञा स्यादिति वाच्यमित्यर्थः। तदन्तविध्यपवादः। **इहैव स्यादिति**। अजन्तत्वात्। उपलक्षणमिदं 'श्रीषु' इत्यत्रातिप्रसङ्गस्य। **न स्यादिति**। अजन्तत्वाभावात्॥

[१, ५५९–५६१]

(**नारायणीयम्**) नियमव्यवच्छेद्यस्यार्थवत्परिभाषयापि निरासादनर्थको नियम इत्यत्राह — **अर्थवदिति**। ननु वर्णग्रहणे मा भूदर्थवत्परिभाषा, हन्नादिग्रहणं तु न वर्णग्रहणम्। नैष दोषः, वर्णसमुदायग्रहणस्यापि वर्णग्रहणत्वात्। यथा पदसमुदायप्रयोगोऽपि 'दश दाडिमानि' इत्यादिः पदप्रयोगः, [1]न वाक्यप्रयोगः। किं तर्हि, न च [तद्] वर्णग्रहणम्, यत्रार्थवत्परिभाषा प्रवर्तते। अर्थवतो वर्णसमुदायस्य ग्रहणमवर्णग्रहणम्' यथा 'गामानय' इत्यादिप्रयोगो न पदप्रयोगः, अपि तु वाक्यप्रयोगः। तेन धातुप्रत्ययादिग्रहणे सा परिभाषा। तदाह — **वर्णरूपतयेति**। वर्णस्य रूपं हत्वात्वनत्वादि [2]यस्य संघातस्य तद्वर्णरूपम्, तद्भावस्तत्ता। रूप्यतेऽनेनेति रूपम्, अर्थवत्ता-या रूपं निरूपकं यस्मिंस्तदर्थवत्तारूपं विशिष्टवर्णसमुदायस्तद्भावस्तत्ता। क्वचितु येन हि रूपेणाश्रीयत इत्येव पाठः, अर्थवत्त्वं तद्रूपेण ग्रहणं परिभाषानिमित्तम्। ननु येनेति किं यदवच्छेदेनेत्यर्थः, उत यत्सामानाधिकरण्येनेति। नाद्यः, परिभाषाप्रवृत्तिस्थले क्वाप्युपात्तरूपस्यार्थवत्तानवच्छेदकत्वात्। न ह्यतिप्रसक्ते रूपमवच्छेदकम्। नान्त्यः, हन्त्वादिसामानाधिकरण्यादर्थवत्त्वस्य प्रस्तुतेऽपि परिभाषाव्यापारोपपत्तेः। न हीह हत्वादिवर्णरूपातिरिक्तं हन्त्वमर्थवत्त्वसमानाधिकरणं न भासते, अन्यत्र तु परिभाषाप्रवृत्तिस्थले तद् भासत इति किंचिदस्ति विनिगमकम्। अत्राहुः — अर्थवत्त्वसमानाधिकरणरूपमिह विद्यमानमपि कार्यनिमित्ततया नाश्रितम्, हकारादिरूपस्यैवानुपूर्वीविशेषावच्छिन्नस्य कार्यनिमित्तत्वोपपत्तेः। अत एवाह टीकाकारः 'आश्रयणम्, नाश्रीयते' इति च। अन्यत्र तु परिभाषाप्रवृत्तिसिद्ध्यर्थमेव समुदायरूपमपि कार्यनिमित्तमाश्रीयते। न चेहापि कार्यनिमित्तत्वं समुदायरूपस्याश्रीयताम्, प्रवर्ततां चार्थवत्परिभाषा, मा कारि नियम इति वाच्यम्, स्थितस्य गतेष्टीकायामुक्तत्वात्। अवयवरूपातिरिक्तसमुदायरूपस्य निमित्तताकल्पने गौरवाच्च। अन्यत्र तु गत्यन्तराभावाद् गौरवाङ्गीकारेण परिभाषाव्यापारः, इह तु नियमवचनेनैवानिष्टनिरासान्न गौरवाश्रयणमपीति। एवमपि प्राप्तौ सत्यां नियमः कार्य इति तामाह — **तत्रेति**। वर्णग्रहणे जातिग्रहणमिति परिभाषा न वर्णस्वरूपग्रहणविषयैव, हलादिप्रत्याहारग्रहणे परिभाषाफलकीर्तनात्॥

ननु जातिग्रहणेऽपि प्रातिपदिकादिसमुदायस्य सुबादिविधावग्रहणवद्वर्णसमुदायस्य ग्रहणेन न भाव्यम्। नैष दोषः, जातेः प्रतिव्यक्तिसमापनाज्जात्याश्रयव्यक्तिसंख्याविवक्षणाच्च तत्र समुदायाग्रहणम्, इह तु व्यक्तिसंख्याबोधकैकवचनादेरभावाद्वर्णसमुदायग्रहणेऽपि तदन्तविधिः। न चैवं सर्वमेव वर्णग्रहणमिति वाच्यम्, वर्णावर्णग्रहणव्यवस्थाया उक्तत्वात्। **अनर्थकस्येति**। तदन्तस्येत्यर्थः। ननु सौत्रप्राप्तेरेव नियम इति वक्तुं शक्यत्वाद्वार्तिकीयप्राप्तिः किमिति वर्ण्यते। नेदमपूर्वं चोद्यते, 'तदन्तविधिरेव ज्यायान्' इति भाष्यव्याख्यानकाले सौत्रप्राप्तेर्नियम इति टीकायामभि-

---

[1] विशिष्टार्थप्रतिपादकत्वाभावेन वाक्यत्वाभावादित्याशयः। तथा चोक्तं विवरणे 'दश दाडिमानि' इत्यादिभाष्यव्याख्यानावसरे 'यद्यपि संसृष्टार्थप्रतिपादकपदसमूहो वाक्यम्, तथापि पदसमूहमात्रे वाक्यशब्दः' इति॥ [पृष्ठम् १–२१८]

[2] तस्य — ग.

धास्यमानत्वात्। इह तु वार्तिकीयप्राप्तिरपि संभवतीति साप्युक्ता। किं च 'वर्णग्रहणं च' इति वार्तिकं नापूर्ववचनम्, किं तु सौत्रप्राप्तेरन्यतो निरासादप्राप्तिप्रदर्शनपरमिति वार्तिकीयप्राप्त्युपन्यासोऽपि सौत्रप्राप्तिप्रदर्शनार्थ एव। अत एव न पूर्वापरविरोधोऽपि। यदि तर्हि वर्णग्रहणे तज्जातिग्रहणम्, तर्हि 'अलैव' इत्यत्रापि जातिग्रहणादल्समुदायग्रहणे नियमान्निवारणं न स्यात्, अत आह — **अलैवेति**। तदन्तसंज्ञात्वस्यालुद्देशेन विधानादलो गुणत्वम्। यदि कश्चिद् ब्रूयात् — जात्याश्रयमेकवचनं व्यक्तिसंख्याविवक्षायामकारणमिति, तमपि प्रत्याह — **नियमेति**। जात्याश्रयमित्यत्र यद्वक्तव्यं तत् "हलन्ताच्च' इत्यत्र वक्ष्यामः। प्लीहन्ग्रहणाभावफलमाह — **तेनेति**। 'शावेव' इति नियमाभावादितरस्मिन्नपि सर्वनामस्थाने दीर्घः। **तवर्गान्तस्येति**। पदं तवर्गेण विशेष्यत इति तदन्तविधिः। एतच्च नियमवचनं विशेषणत्वाभावप्रदर्शनपरमत्रेत्याह — **प्रतिषेधेति**। इतरव्यावृत्तिपरत्वान्नियमः प्रतिषेधशब्देनोक्तः। अत्र च प्रतिषेधविज्ञानाद्विशेषणवैपरीत्यमुपजायत इति न योजनीयम्, किं तु वैपरीत्यज्ञापनपरं प्रतिषेधवचनमिति। हन्स्त्रीग्रहणयोस्तु न विशेषणत्वाभावज्ञापनपरं, साहचर्येण तत्र तदन्तविधेरिष्टत्वाद्विशेषणत्वाभावे च तदभावप्रसङ्गात्। अतस्तत्र वचनत्वेनैवोपयोगोऽस्य। उदस्तवर्गान्तत्वाव्यभिचाराद्विशेषणं विफलमित्याह — **तोरिति**। निवृत्ते च तस्मिन् पदेनोद्विशेष्यत इति तदन्तविध्यभावः। सार्थकोच्छब्दान्तं पदं न संभवति, येन तत्र कार्यार्थमुदो विशेषणत्वमावश्यकं स्यात्। अत्रापि विशेषणत्वाभावप्रदर्शनपरतया वचनोपयोग इत्याह — **पदेनेति**। सार्थकं च समन्तं न संभवतीति भावः। ननु करोतेरुत्पादनार्थत्वात् पायसस्य साध्यत्वमिह गम्यते, न त्वलंक्रियमाणत्वमित्याशङ्क्य करोतिः सिद्धवस्तुनो वेषान्तरसंपादनेऽपि प्रयुज्यत इति युज्यते प्रकरणादिनालंकारावगतिरित्याह — **करोतेरिति**। 'तदन्तविधिरेव ज्यायान्' इति वक्ष्यमाणत्वादिदमा सूत्रपरामर्शशङ्का स्यात्, तन्निवृत्त्यर्थमाह — **अलैवेति**। ननु पदैकदेशलोपादुत्तरपदग्रहणमित्युक्तम्, अत्राह — **पदेति**। पदैकदेशलोपोऽत्राश्रयिष्यते। उत्तरपदशब्देऽपि पदशब्दस्य विद्यमानत्वात् तदधिकारोऽपि पदाधिकारत्वेन व्याख्यास्यत इत्यर्थः। [२]तदा परामर्शनीयमाह — **ततश्चेति**। 'पदाङ्गाधिकारे' इत्यनेन 'अलैव' इत्यस्मिन्नाक्षिप्ते 'तन्न वक्तव्यम्' इत्युत्तरम्। तत्र किं [३]तदा 'अलैव' इत्येतत् परामृश्यते, उत 'पदाङ्गाधिकारे' इत्येतत्। नाद्यः, चोद्याङ्गीकारस्यानुत्तरत्वात्। नान्त्यः, समनन्तरग्रन्थसंनिहितस्येदमा परामर्शनीयस्य [४]तदा परामर्शायोगात्, अत आह — **पदेति**। अनूद्यमानतया संनिहितमपि पाठतो व्यवहितत्वात् [५]तदा परामृश्यत इत्यर्थः। ननु पदाङ्गाधिकारे श्रुतस्याधिकृतविशेषणत्वप्रदर्शनाय तत् कर्तव्यम्, अत आह — **अलैवेति**। अनर्थके तदन्तविधिनिषेधो हन्ग्रहणादौ, तस्य च पदाङ्गाधिकारे पाठात् प्राप्तिपूर्वकत्वाच्च प्रतिषेधस्य [६]विशेष्यत्वे च प्राप्त्यनुपपत्तेः पदाङ्गाधिकारे श्रुतस्य प्रकृतविशेषणत्वमनुमास्यत इत्यर्थः। एवमन्यतरारम्भादभिमतसिद्धेः कस्यारम्भो ज्यायानिति पृष्टम्। तत्रोत्तरम् — **तदन्तविधिरेवेति**। तदालैवेत्यस्याल्[७]व्यतिरिक्तमनर्थके तदन्तविधिनिषेधे पर्यवसानात्। विधिग्रहणात् 'पदाङ्गाधिकारे' इत्यत्र ज्यायस्त्वमुच्यत इति भाति, तत्तु 'इदमपि' इत्याद्युपसंहाराननुगुणम्, अत आह — **प्राथमेति**। नन्वनयोरन्यतरस्य ज्यायस्त्वमिह वाच्यम्, न तु सौत्रतदन्तविधेः, अत आह — **स एवेति**। नियमसहायः सौत्रस्तदन्तविधिर्ज्यायानिति प्रतिपाद्यत इति नियमज्यायस्त्वमुक्तमित्यर्थः। सति हि नियमारम्भे 'पदाङ्गाधिकारे'

---

[१] पा. सू. १. २. १०.
[२] तच्छब्देनेत्यर्थः।। एतदा — ग.
[३] तच्छब्देनेत्यर्थः।
[४] तच्छब्देनेत्यर्थः।
[५] तच्छब्देनेत्यर्थः।
[६] विशेषणत्वेन प्राप्त्यनुपपत्तेः — ग.
[७] क्रियाविशेषणं बोध्यम्।

इत्येतस्मिन्नसति 'परमातिमहान्' इत्यादौ सौत्रस्तदन्तविधिः सिध्यतीत्यभिप्रेत्य नियमज्यायस्त्वफलतया तदन्तविधिज्यायस्त्वं भाष्य उक्तम्। तेनेदं न चोदनीयम् — 'नियमो ज्यायान्' इत्येव कस्मान्नोक्तमिति। त्रयाणां युगपत् समासानुपपत्तेराह — **परमश्चेति**। महन्मात्रस्य [1]'तत्त्वेऽतिमहतस्तदुत्तरपदत्वेऽप्यङ्गस्य तत्त्वं तदुत्तरपदत्वं वा नास्तीत्याह — **तत्रेति**। एवं 'बहुवृत्रहाणि' इत्यादावपि द्रष्टव्यम्। यदा तु 'अलैव' इति नियमं कृत्वा नियमान्यथानुपपत्त्या प्रस्तुतविशेषणत्वमुपात्तस्य स्वीक्रियते तदा न दोष इत्याह — **तदन्तेति**। [2]"दाधा घु' इत्यत्र पक्षद्वयमुक्तम्। तत्रैकस्मिन् पक्षेऽस आनर्थक्यमत्रेत्याह — **अनागमकानामिति**। अलो विशेषणत्वेन ग्रहणमल्ग्रहणमित्याह — **तदन्तेति**॥

वृद्धिर्यस्याचामादिस्तद् वृद्धम् १. १. ७३.

[१, ५६२–५६४]

(**लघुविवरणम्**) अचामिति बहुत्व[3]संख्यायामविवक्षितायां 'यस्याचस्तद् वृद्धम्' इति वक्तव्ये आदिग्रहणसामर्थ्याद् भिन्नजातीयो [4]हल् गृह्यत इत्यभिप्रेत्याह — **भिन्नजातीयो हलिति**। ननु यदि हलादिमात्रस्य वृद्धसंज्ञा भवति तदा वृद्धत्वात् [5]"अवृद्धम्' इत्येव प्रतिषेधे सिद्धे 'अकर्क्यादीनाम्' इति प्रतिषेधोऽनर्थकः स्यादित्यत्राह — **प्रस्थेऽवृद्धमित्यत्रेति**। नन्वचामित्युपादानसामर्थ्यादादिरित्यध्याहरिष्यत इत्यत्राह — **अचामित्यनेन चेति**। अचामित्यनेनादिरित्यस्मिन् विशेष्यमाणेऽच्संनिवेशस्यासंभवादचां मध्येऽजपेक्षया यस्य वृद्धिरादिरिति विज्ञास्यत इत्याह — **अच्संनिवेशस्येति**। अच्संनिवेशस्यासंभवादेवाचामित्येतद् वृद्धिविशेषणं स्यादित्याह — **अचामिति**। विशेषणे प्रयोजनमाह — **इतीति**। आकारोऽप्यजेवेति कथं तन्निवृत्तिरित्यत आह — **आकारो हीति**। एवं तावद्वृद्ध्युपजनितव्यतिरेके आद्युपजनितव्यतिरेके वा यस्येति षष्ठीत्यङ्गीकृत्य दोषोऽभिहितः। इदानीमजुपजनितव्यतिरेके षष्ठीति पक्षान्तरमनूदितम् — **एकान्तादित्वे चेति**। तद्व्याचष्टे — **एकान्ता इति**॥

[१, ५६२–५६४]

(**विवरणम्**) विशेषणान्तराण्यङ्गीकृत्य वृद्धिग्रहणाक्षेपोऽनुपपन्न इति चोदयति — **असतीति**। विशेषणान्तराङ्गीकारो हि सर्वस्य वृद्धसंज्ञा मा भूदिति। असति वृद्धिग्रहणे सा सर्वस्य स्यादेवेति मुधा विशेषणान्तरस्वीकार इति भावः। संकोचे प्रमाणाभावादच्छब्देनाक्षु सर्वेषु गृहीतेषु तदादिहलेव भवतीत्यभिप्रेत्य परिहरति — **यस्येति**। नन्वचामिति निर्धारणे षष्ठी, निर्धारणं च तुल्यजातीयस्येति यस्याचामादिरजिति विज्ञायमाने दत्तादौ नातिप्रसक्तिरित्यत आह — **असतीति**। भाष्ये **अत्रापीति**। अण्प्रकृताविति्यर्थः। **पक्ष इति**। [6]"वा नामधेयस्य' इत्यनेन। ननु हलादेः सर्वस्य वृद्धसंज्ञायां कर्क्यादीनामपि वृद्धत्वादवृद्धमित्युक्तौ कर्क्यादीनां [7]नास्ति प्रसङ्ग इति मुधा कर्क्यादीनां निषेध इत्यत आह — **प्रस्थ इति**। **वृद्धेरेवेति**। तथा च वृद्धप्रदेशेषु त्यदादिविषये

---

[1] सूत्रनिर्दिष्टमहच्छब्दरूपत्व इत्यर्थः। एवमुत्तरत्रापि।
[2] पा. सू. १. १. २०.
[3] संख्यायां विवक्षितायां — ण.
[4] हल् न गृह्यत इति — ण.
[5] पा. सू. ६. २. ८७.
[6] अस्मिन्नेव सूत्रे उपरि वक्ष्यमाणं वार्तिकम्।
[7] नातिप्रसङ्ग इति — ञ.

मुख्यो वृद्धशब्दः, अन्यत्र लाक्षणिक इति वैरूप्यप्रसङ्ग इति भावः। ननु [1]'मालादीनाम्' इति लिङ्गादादिसहचरिता यस्य वृद्धिस्तस्यापि वृद्धसंज्ञेति गार्ग्यादेरपि सा भविष्यतीत्यत आह — **मालेति**। अचामिति षष्ठ्या आदिशब्दोऽध्याहरिष्यत इत्यादिग्रहणं किमर्थमिति चोदिते, अचामवयविनो यस्य वृद्धिरवयव इति विनाध्याहारमन्वयसंभवेनाध्याहारोऽयुक्तः, अन्यथान्तशब्दस्याप्यध्याहारप्रसङ्गादिति भाष्ये 'यस्याचाम्' इत्याद्युक्तम्। तत्र प्रसङ्गादिहादिग्रहणेऽसति [2]'आद्यन्तवत्' इत्यत्र 'एकस्मिन्' इत्यस्य सभासंनयन इत्येतत् प्रत्युदाहरणं न भवतीति किं तस्य प्रत्युदाहरणमित्यपेक्षायामुक्तम् — **सति चेति**। [3]'एरच्' इत्यत्र धातोरित्यधिकारात् तस्मिंश्च एरित्यनेन विशेष्यमाणे तदन्तविधाविवर्णान्तलक्षण एरच्, तस्याभावः प्रयोजनमित्याह — **असति त्विति**। ननु यस्य वृद्धिः [4]'सोऽवयव्येवेति 'अचाम्' इति वृथा स्यात्, अतस्तत्सामर्थ्याद् आदिरित्यध्याहरिष्यत इत्यत आह — **अचामितीति**। नन्वस्त्येव [5]मातृकापाठे 'संनिवेशविशेषोऽचामित्यत आह — **सर्वस्येति**। वृद्धसंज्ञानिबन्धनं कार्यं प्रायशः प्रातिपदिकाधिकारे। तस्य चाज्झल्समुदायरूपत्वादित्यर्थः। अचामित्युद्भूतसमुदायिभेदः समुदायो निर्दिष्टः आदिशब्दश्चावयवविशेषवाची, समुदायश्चाचामवयवी, स तु समुदायोऽचां नैरन्तर्येणावस्थितिः। तथा चाच्समुदायस्य प्रथमावयवो वृद्धिर्यस्य स वृद्धसंज्ञक इत्यर्थः संपद्यते। न चैवंभूतता कस्यचित् प्रातिपदिकस्य संभवतीत्याह — **अचामित्यनेनेत्यादिना**। ननु प्रथमान्ताज्ग्रहणाभावात् [6]'सूत्रे कथं भाष्ये 'अजेवादिः' इत्युक्तमित्याशङ्क्य [7]'निर्धारणषष्ठी'[8]लब्धमजिति, समानजातीयविषयत्वान्निर्धारणस्येत्याह — **अजिति**। [9]'हल्व्यवहितस्येति शेषः। यथा मनुष्याणां क्षत्रियः शूरतम इति क्षत्रियत्वजात्या शूरतमत्वरूपेण मनुष्यापेक्षयैव निर्धार्यते न सिंहशार्दूलाद्यपेक्षयापि[10], तद्वदचां [11]'वृद्धिरादिरिति वृद्धित्वेन हेतुनादित्वरूपेणाजपेक्षयैव निर्धार्यते न हलपेक्षयापीत्याह — **अजपेक्षयेति**। मनुष्याणामित्यत्र निर्धारणषष्ठ्या [12]'मनुष्यः क्षत्रिय इति प्रतीतावपि क्षत्रियस्य मनुष्यत्वाव्यभिचारान्न मनुष्यत्वेन क्षत्रियो विशेषणीय इत्यनुवादमात्रं तत्, इह तु मुख्याज्ज्लक्षणवृद्धिसंभवात् [13]'निर्धारणषष्ठ्याज् वृद्धिरिति प्रतीतौ मुख्याज्ज्लक्षणपरिग्रहायाचां वृद्धिरिति किं न विशेष्येत। यस्यादिर्वृद्धिरिति चान्वयेन निरङ्कुशादित्वे संभवति किमित्यापेक्षिकमादित्वं गृह्येतेत्यभिप्रेत्याह — **अचामिति**। **वृद्धिरिति**। यस्यादिर्वृद्धिरिति विशेषणादेव गार्गीया [14]'इत्यादावव्याप्तिसिद्धिरित्यतोऽचा वृद्धिविशेषणेऽव्याप्तेरसाधारणमुदाहरणमाह — **ततश्चेति**। एवं तावत् 'यस्य' इति वृद्ध्युपजनितव्यतिरेके आद्युपजनित-[15]'व्यतिरेके वा षष्ठीत्यङ्गीकृत्य 'अचाम्' इति निर्धारणषष्ठ्यां दोषोऽभिहितः। अजुपजनितव्यतिरेके यस्येति षष्ठ्यामपि तं वक्तुम् 'एकान्तादित्वम्' इत्याद्युक्तं भाष्ये। तद्व्याचष्टे — **एकान्ता इति**। यस्य प्रातिपदिकस्येति संबन्धः। अत्र [16]'चाचामिति [17]'शेषे षष्ठी', न निर्धारण इति द्रष्टव्यम्। नन्वादिशब्दोपादानादेव सर्वेषामचामिति लप्स्यत इत्यत आह — आदिग्रहणमिति॥

---

[1] पा. सू. ६. २. ८८.
[2] पा. सू. १. १. २१.
[3] पा. सू. ३. ३. ५६.
[4] सोऽचोऽवयवो यस्येति — ञ; सोऽचोऽवयव्येवेति — ट.
[5] संनिवेशोऽचाम् — ञ.
[6] सूत्रे प्रथमान्ताज्ग्रहणाभावादित्यन्वयः।
[7] निर्धारणे षष्ठी — ञ.
[8] लभ्यमजिति — ञ, ट.
[9] हल्व्यवहितस्येति — च, छ, ट.
[10] अपिशब्दो नास्ति — ट.
[11] वृद्धिरिति वृद्धित्वेन — ञ.
[12] मनुष्यक्षत्रिय इति — ञ.
[13] निर्धारणषष्ठ्यां वृद्धिरिति — च, छ.
[14] इत्यादावसिद्धिरिति — च, छ.
[15] व्यतिरेके च षष्ठीति — ञ.
[16] चकारो नास्ति — ञ.
[17] शेषषष्ठी — च.

[१, ५६२–५६४]

(**उद्द्योतनम्**) वृद्धिग्रहणाक्षेपानुपपत्तिं शङ्कते — **असतीति** । **सर्वस्येति**। सर्वशब्दानां वृद्धसंज्ञाप्रसङ्गेन व्यावर्त्याभावात् सूत्रस्यैव वैयर्थ्यं स्यादिति भावः। 'अचाम्' इत्यनेन संकोचकाभावेन विद्यमानसर्वाज्ग्रहणात् तदादिर्हलेव भवतीति व्यावर्त्यसंभवान्न सूत्रवैयर्थ्यमित्यभिप्रेत्य परिहरति — **यस्येति**। ननु 'अचाम्' इति निर्धारणे षष्ठी, निर्धारणं च तुल्यजातीयस्येति 'यस्यादिरच्' इति विज्ञायमाने दत्तादौ नातिप्रसङ्गः, अत आह — **असतीति**। **समीपेति**। अच्समीपत्वं हलोऽपि संभवतीति [1]दत्तादावतिप्रसङ्ग इत्यर्थः। [2]भाष्ये **अत्रापीति**। अण्प्रकृतौ दत्तादावपीत्यर्थः। **पक्षे** 'वा नामधेयस्य' इत्यनेन। ननु हलादेः सर्वस्य वृद्धसंज्ञायां कर्क्यादीनामपि वृद्धत्वात् [3]'अवृद्धम्' इत्येव व्यावृत्तिसिद्धेः 'अकर्क्यादीनाम्' इति प्रतिषेधोऽनर्थकः, अत आह — **प्रस्थ इति**। यद्वा, नामधेयस्य वृद्धत्वे कर्क्यादिप्रतिषेधोऽनर्थकः, अत आह — **प्रस्थ इति**। **वृद्धेरेवेति**। तथा च प्रदेशेषु वृद्धशब्दस्त्यदादिषु मुख्यः, शालादौ **वृद्धिमति** लाक्षणिक इति वैरूप्यप्रसङ्ग इत्यर्थः। भाष्ये **ऐतिकायनीया इति**। इतिकशब्दान्नडादिफगन्ताच्छः। ननु [4]'मालादीनाम्' इति लिङ्गादादिसहचरिता यस्य वृद्धिस्तस्यापि वृद्धसंज्ञेति गार्ग्यादेरपि [5]सा स्यात्, अत आह — **मालादीनामिति**। 'यस्याचां मध्ये वृद्धिस्तद् वृद्धम्' इत्यर्थनिरासायादिग्रहणमिति 'अथ' इत्यादिभाष्यार्थः। प्रसङ्गादाह — **सति चेति**। यद्यप्यत्र 'आदिः' [6]इति वाच्यमेव, तथाप्यसत्यस्मिन् [7]आद्यन्तसूत्रे एकग्रहणस्य व्यावर्त्यमस्तीत्याह — **असतीति**। **इवर्णान्तेति**। [8]'एरच्' इत्यत्र [9]धातोरित्यनुवृत्तत्वात् तस्येवर्णेन विशेषणे इवर्णान्तस्याच्प्रत्ययो विधीयते। तत्राद्यन्तवद्भावेन दरिद्रातेरप्यच् प्राप्त एकग्रहणेन निवार्यते। एकवर्ण एव यत्र [10]कार्यं तत्राद्यन्तवद्भाव इत्यनेकवर्णे न तत्प्रवृत्तिरित्यर्थः। **अचः** अच्प्रत्ययस्य, **अभावः** प्रयोजनमित्यन्वयः। ननु यस्य [11]वृद्धिः संबन्धिनीत्येव सिद्धे 'अचाम्' इति व्यर्थं स्यात्, तत्सामर्थ्यादादिरित्यध्याहारसंभवात् 'आदिः' इति व्यर्थम्, अत आह — **अचामिति**। वर्णसमाम्नायेऽचां संनिवेशोऽस्त्येव, अत आह — **सर्वस्येति**। वृद्धसंज्ञाकार्यं प्रातिपदिकाधिकारे, तस्य चाज्झल्समुदायरूपत्वादित्यर्थः। **अचामित्यनेनेति**। 'अचाम्' इत्युद्भूत[12]समुदायिभेदः समुदायो निर्दिष्टः। आदिशब्दश्चावयवविशेषवाची, अवयवी चाच्समुदायः, [13]नैरन्तर्येणावस्थिता अचः समुदायः। ततश्चाच्समुदायस्य प्रथमावयवो वृद्धिर्यस्य स [14]वृद्धसंज्ञक इति सूत्रार्थः। न च तादृशसमुदायः कस्यचित् प्रातिपदिकस्य संभवतीत्यर्थः। ननु सूत्रे प्रथमान्ताज्ग्रहणाभावाद् भाष्ये 'अजेवादिः' इति कथमुक्तम्, अत आह — [15]**अच्संनिवेशस्येति**। हलव्यवहितस्येत्यादिः। 'अच्' इति निर्धारणषष्ठ्या लभ्यते, सजातीयापेक्षत्वान्निर्धारणस्येति भावः।

---

[1] दत्तादावपि प्रसङ्ग इत्यर्थः — अ; तदादावतिप्रसङ्ग इत्यर्थः — म.

[2] 'भाष्ये अत्रापीति' इत्यादि 'दत्तादावपीत्यर्थः' इत्यन्तं नास्ति — म.

[3] पा. सू. ६. २. ८७.

[4] पा. सू. ६. २. ८८.

[5] न स्यात् — म.

[6] इत्यवश्यमेव — म.

[7] आद्यन्तवत्सूत्र इत्यर्थः।

[8] पा. सू. ३. ३. ५६.

[9] धातोरित्यनुवर्तनात् — अ.

[10] कार्यं — अ, म.

[11] वृद्धेः — अ, म, ऋ.

[12] समुदायभेदः — अ, म.

[13] नैरन्तर्येणावस्थिताच्समुदायः — अ.

[14] वृद्धसंज्ञ इति — अ, म.

[15] 'अच्संनिवेशस्येति' इत्यादि 'न हलपेक्षयेत्याह' इत्यन्तं नास्ति — अ.

मनुष्याणां मध्ये क्षत्रियः शूर इत्युक्ते मनुष्यापेक्षयैव शूरत्वं न सिंहाद्यपेक्षया, [1]'एवमिहाप्यजपेक्षयैवादित्वं न हलपेक्षयेत्याह — **अजपेक्षयेति**। 'मनुष्याणाम्' इति निर्धारणषष्ठ्या क्षत्रिये प्रतीतमपि मनुष्यत्वमव्यावर्तकत्वान्न विशेषणम्, किं त्वनुवादमात्रम्। प्रकृते मुख्याञ्जूपवृद्धिलाभायाच्त्वं विशेषणमेवेत्याह — **वृद्धिविशेषणेति**। विशेषणत्वमेवाह — **अञ्जूपेति**। व्यावर्त्यमाह — **आकारस्येति**। तस्यानच्त्वमाह — **आकारो हीति**। [2]**ग्रहणकशास्त्रेण** अणुदित्यनेन। 'अञ्जूपा वृद्धिर्यस्यादिः' इत्यत्रासाधारणमव्याप्तिस्थलमाह — **ततश्चेति**। भाष्यकारीयमुदाहरणं संगमयति — [3]**गार्ग्य इति**। **अच्समुदायेति**। यद्यप्यच्समुदायस्याप्रसिद्धया तदादित्वमप्यप्रसिद्धम्, तथापि 'अचाम्' इत्यस्य वृद्धेरञ्जूपत्वलाभार्थतया 'यस्याञ्जूपा वृद्धिरादिः' इत्यर्थपर्यवसानादादित्वस्य [4]संकोचकाभावेन प्रकृत्यादित्वलाभात् 'गार्गीयाः' इत्यत्र न स्यादित्यर्थः। एवं 'यस्याञ्जूपा आदिर्वृद्धिः' इत्यत्र दोषमभिधाय 'यस्याचामादिर्वृद्धिः' इत्युक्तेऽपि तमाह — **एकान्तेति**। तद्व्याचष्टे — **एकान्ता इति**। यस्य प्रातिपदिकस्यावयवानामचामादिर्वृद्धिस्तद् वृद्धमित्यर्थः। 'अचाम्' इति शेषषष्ठी, न तु निर्धारणे षष्ठीत्याशयः। नन्वादिग्रहणसामर्थ्यात् सर्वादित्वलाभः, अत आह — **आदिग्रहणमिति**। तदुदाहरति — **खट्वेति**। अत्राकारस्यान्त्यत्वेनाजादित्वाभावान्न वृद्धसंज्ञेत्यर्थः॥

[१, ५६२–५६४]

(**रत्नप्रकाशः**) पदकृत्यं विचारयति — **वृद्धिग्रहणमिति**। **यस्याचामादिरिति**। हलिति शेषो गम्यते। तत्र 'अचाम्' इति षष्ठ्यवध्यवधिमद्भावे। तथा च यस्याज्भ्य **आदिः** पूर्वो हल् तद् वृद्धसंज्ञं स्यादिति सूत्रार्थः स्यादिति भावः। **दात्ता इति**। क्रियाशब्दोऽयम्। नामधेयत्वे तु 'वा नामधेयस्य' इति वक्ष्यमाणवार्तिकेन भवितव्यमेव वैकल्पिकवृद्धसंज्ञया। [5]"प्रस्थेऽवृद्धमकर्क्यादीनाम्' इत्यत्राकर्क्यादिग्रहणं नामत्वप्रयुक्तवृद्धत्वाभावे सार्थकं ज्ञेयम्। **व्यपदेशायेति**। संज्ञिन इति शेषः। **न स्यादिति**। [6]"मालादीनां च' इत्येतत्तु नामधेयार्थं स्यादिति भावः। **सभासंनयने भव इति**। [7]"आद्यन्तवदेकस्मिन्' इति सूत्रे एकग्रहणादिह व्यपदेशिवद्भावेन भाशब्दाकारस्यादित्वं नेति भावः। ननु तत्रैकग्रहणसामर्थ्यादेवास्य वृद्धसंज्ञा न भविष्यतीति चेन्न, दरिद्रातेरिवर्णान्तत्वाभावसंपादनद्वारा "एरनेकाचः' इति यण्व्यावृत्त्या तस्य चरितार्थत्वात्। ननु 'भासंनयन' इति पञ्चानामचामादिर्वृद्धिर्भवत्येवेति कृतेऽप्यादिग्रहणे स दोषस्तदवस्थ एवेति चेन्न, आदिग्रहणसामर्थ्येन यस्यादित्वमेवाजपेक्षया न त्वनादित्वम्, तस्यैव तेन ग्रहणात्। अत्र 'अचाम्' इति बहुत्वमविवक्षितम्, तेन 'शालीयः' इत्यादि सिध्यति। यत्र[8] हलघटिता अच एव संनिविष्टास्तत्रास्य सूत्रस्य प्रवृत्तिरुचिता, न तु हलन्तरितेष्वक्ष्विति मन्यमानः सूत्रमनुपपन्नार्थकमिति शङ्कते — **वृद्धसंज्ञायामिति**। **न ह्यचामिति**। अचामेवेत्यवधारणं ज्ञेयम्। [10]"तुष्यतु दुर्जनः' इति न्यायेनोत्तरमाह — **ननु चेति**। **अजेवेति**। 'वृद्धिर्यस्याजादिस्तद् वृद्धम्' इति सूत्रं करिष्यामीति भावः। एतेन 'अव्संनिवेशस्यासंभवादचां मध्येऽजपेक्षया यस्य वृद्धिरादिरिति विज्ञास्यत

---

[1] एवमिहाप्यजपेक्षयैवाजिति न — म.
[2] ग्राहकशास्त्रेण — अ.
[3] गार्गीया इति — अ:
[4] संकोचाभावेन — अ.
[5] पा. सू. ६. २. ८७.
[6] पा. सू. ६. २. ८८.
[7] पा. सू. १. १. २१.
[8] पा. सू. ६. ४. ८२.
[9] तत्र — ब.
[10] लौ. न्या. द्वितीयभागे पृष्ठम् ३५.

इत्यर्थः' इति कैयटो निरस्तः। 'नैवम्' इत्यादिदूषणस्वरसभङ्गापत्तेः। **नैवमिति**। 'अचाम्' इति निर्धारणषष्ठी चेत् स्यात् तदाजपेक्षयादित्वं वृद्धेर्विवक्षितमिति हलादेरपि भवति, न त्वजिति प्रथमान्तनिर्देश इति भावः। एतेन "वृद्धिविशेषणार्था निर्धारणे षष्ठी स्यात्। अचां मध्ये या वृद्धिरञ्रूपेत्याकारस्य निवृत्तिप्रसङ्गः। आकारो ह्यनजेव सन् केवलमच्कार्याणि ग्रहणकशास्त्रबलाल्लभते। ततश्च [२]"आश्वलायनीयाः' इत्यत्र न स्यात्। [३]"गार्गीयाः' इत्यत्र चाकारस्यानच्त्वात् समुदायानादित्वाच्च न स्यात्" इति कैयटो निरस्तः। सर्वत्र व्याकरणे निस्संकोचेनाच्-शब्देन तद्वाच्यद्वारा आकारादीनामनाक्षरसमाम्नायिकानां ग्रहणस्येष्टत्वेन ज्ञापकसिद्धत्वेन चात्राच्-शब्देनानाक्षरसमाम्नायिकानामग्रहणकल्पनायां मानप्रयोजनयोरभावात्। 'अचाम्' इत्यस्य आकारव्यावृत्तितात्पर्ये तत्स्पष्टीकरणायोदाहरणप्रत्युदाहरणयोरजादित्वस्यैव हलादित्वस्यैव वा दर्शयितुमुचितत्वेनोदाहरणेऽजादित्वस्य प्रत्युदाहरणे हलादित्वस्य च दर्शनानौचित्यात्। तदभिप्रायेणैव तेनाप्याश्वलायनशब्दस्य प्रत्युदाहरणत्वेनोपादानाच्च। यथान्यास एवेदानीं सूत्रं समर्थयितुमाह — **एकान्तादित्वमिति**। यस्येत्यवयवषष्ठीति कृत्वा यस्यावयवानामचामादिर्वृद्धिस्तद् वृद्धसंज्ञमित्यर्थो लभ्यत इति न गार्गीया इत्यादावव्याप्तिरिति भावः। **सर्वप्रसङ्ग इति**। सूत्रे सर्वग्रहणाभावात् केषांचिदचामादित्वमादायातिप्रसङ्ग इति मन्यते॥

[१, ५६२–५६४]

(**नारायणीयम्**) असति [४]वृद्धिग्रहणे निर्धार्यमाणस्यादेर्निर्धारण[५]हेतुधर्मानिर्देशात् किंत्वेनायमितरेभ्यो निर्धार्यत [६]इत्यविज्ञानात् कृतमप्यचामादिग्रहणमकृतसममिति सर्वप्रसङ्गान्निर्धारणहेतुधर्मज्ञानायावश्यकार्यं वृद्धिग्रहणमिति कथं तदाक्षेप इति शङ्कते — **असतीति**। 'अचामादिः' इति विशेषणस्याकृतसमत्वापत्तिरसत्यपि वृद्धिग्रहणे नास्तीत्याह — **यस्येति**। मा भून्निर्धारणहेत्वनिर्देशान्निर्धारणषष्ठी, सामीप्यसंबन्धे तु भविष्यति। न च तदाप्यव्यावर्तकतयाकृतसमत्वम्, विशेषणसामर्थ्याद् बहुवचननिर्देशाद्वा सकलाजपेक्षया पूर्वसमीपो वर्णोऽज्विजातीयो यस्यास्तीति विज्ञानादजादेर्व्यावर्त्यत्वात्। आदिशब्दो हि पूर्वसमीपस्य वाचकः, न समीपमात्रस्य। यथान्त्यशब्दः परसमीपवाचकः। अज्विजातीयत्वं चाचां सामीप्यप्रतियोगित्वाल्लभ्यम्। यथा [७]"नगरस्यायं समीपः' इति सामान्योक्तावपि 'नगरविजातीयः प्रतीयत इत्यर्थः। शालागार्ग्यादिषु संज्ञासिद्धिरित्थमप्यस्त्येवेति। अन्ये तु निर्धारणषष्ठ्यामेव टीकोक्तवस्तुलाभमाहुः। तथाहि — 'एषां ब्राह्मणगृहाणामाद्यम्' इत्युक्तौ निर्धारणहेत्वनिर्देशाद्विजातीयत्वमाद्यस्य गम्यते, न त्वत्र सजातीयस्यैव निर्धारकधर्मः कल्प्यत इति। तदयुक्तम्, ईदृशानुभवे विवादात्, 'असति' इत्यादिसमनन्तरग्रन्थविरोधाच्च। न चार्थान्तरकीर्तनं तत्, वाशब्दादर्शनात्। तस्मादेतदभिप्रायकथनं तत्। न चैवमेकग्रन्थतया [९]तदुपर्युक्त्ययुक्त्यापत्तिः, अर्थान्तरकीर्तनेऽपि सुशकत्वादस्यापादनस्य। तस्मात्

---

[१] मैवमिति — ब.
[२] प्रदीपे 'आश्वलायन इत्यत्र' इत्यस्य स्थाने 'आश्वलायनीया इत्यत्र' इति रत्नप्रकाशकृत्पाठ इति भाति।
[३] प्रदीपे 'गार्ग्य इत्यत्र' इत्यस्य स्थाने 'गर्गीया इत्यत्र' इति रत्नप्रकाशकृत्पाठ इति भाति।
[४] वृद्धग्रहणे — ग.
[५] हेतुमन्निर्देशात् — ग.
[६] इत्यपि ज्ञानात् —ग.
[७] नारस्यायं — ग.
[८] नारविजातीयः —ग.
[९] तदुपपत्त्यापत्तिः — ति.

'दात्ताः' इति भाष्यप्रत्युदाहरणादप्यचामादिविशेषणमजादिव्यावर्तनार्थमिति ज्ञायत इति दर्शनाय मध्ये प्रतीकग्रहणमिति ज्ञेयम्। 'दात्ताः' इत्यतिव्याप्तिकीर्तनं चोपलक्षणं भाष्येण। ऐतिकाय-नादावव्याप्तिरपि ज्ञेया। **नामधेयस्य त्विति**। न च तत्राप्यनेन नित्यप्रसङ्गश्चोदयितव्यः, परत्वात् तेनास्य बाधोपपत्तेः। ननु यदि सर्वस्य हलादेः स्यादियं संज्ञा तदा कर्क्यादीनां वृद्ध-त्वात् [1]'अवृद्धम्' इत्येव पर्युदासे सिद्धे 'अकर्क्यादीनाम्' इत्यवाच्यं स्यात्, अत आह — **प्रस्थ इति**। नामधेये विकल्पवचनमस्य बाधकमित्यस्मदुक्तं [2]तदुचितम्। दिशेरुच्चारणवचनत्वे उच्चारणार्थ-त्वमुक्तं स्यात्। न हि तद्युज्यते, अतः प्रतिपादनवचन इत्यभिप्रेत्य कर्माकाङ्क्षायामाह — **संज्ञिन इति**। ननु तत्पदं संज्ञिसमर्पकम्, न यत्पदम्, अत आह — **अन्यथेति**। ननु तत्पदं मास्तु, संज्ञि च लभ्यत एवेति कथं तादर्थ्यमस्य, अत आह — **तदित्यस्येति**। तदनेन संज्ञिविशेषप्रतिपादनार्थं 'यस्य'ग्रहणमित्युक्तं भवति। तावतोऽवधेर्वृद्धिरादिरत्रापीत्याशङ्क्य छादिविधिवाक्यमपेक्ष्यास्य संज्ञा-वाक्यस्यार्थनिर्णयः कार्यः, तत्र च प्रातिपदिकाधिकारादिहापि 'यस्य' इति तस्यैव परामर्शो न यस्य कस्यचित्। प्रातिपदिकस्य **च** न वृद्धिरादिरित्याह — **न हीति**। [3]'अवृद्धम्' इति पर्युदासे प्राप्ते [4]'मालादीनां च' इत्यारम्भस्तत्सदृशस्यापि वृद्धसंज्ञाज्ञापक इत्यत्राह — **मालेति**। ननु [5]'आद्यन्तवत्' इत्यत्रैकग्रहणेनात्र वृद्धसंज्ञाभावः। सत्यम्, असतीहादिग्रहणे न हि साभासन्नयनस्तत्र-त्यैकग्रहणात् इहत्यादिग्रहणाद्वा सिध्यति। उभाभ्यामेव तस्य सिद्धेरित्याह — **सति चेति**। नन्विहादिग्रहणेऽसति तत्रत्यैकग्रहणमेतद्व्यावर्त्यहीनं किमनर्थकमिति जिज्ञासुशिष्यानुग्रहायाह — **असतीति**। नन्वस्यामवस्थायां वृद्धिमन्मात्रस्य वृद्धसंज्ञाप्राप्तेरज्ग्रहणमप्युक्तफलहीनं किमनर्थक-मित्याशङ्क्य प्रागुक्ताव्याप्तिपरिहारफलाभावेऽपि साध्यं किंचिदस्ति तस्येत्याह — **अचामिति**। प्रयोजनान्तराभावात् संख्याज्ञगता विवक्ष्येतेति शालागार्ग्यादाविष्टसंज्ञां व्यावर्तयेत्। न चाचामिति वृद्धिविशेषणसामर्थ्यादाक्षरसमाम्नायिकवृद्धिपरिग्रहादाकारनिवृत्तिरस्त्विति वाच्यम्, अस्यापि कल्प-स्यानिष्टत्वाविशेषात् संख्याविवक्षायाष्टीकायां कल्पितत्वात्। अचामसंनिवेशादादित्वमजपेक्षमनुप-पन्नं वृद्धेरित्युक्तम्। तत्र तत्र समुदायेऽचामवस्थानादसंनिवेशस्यासिद्धिमाशङ्क्य संनिवेशशब्दार्थ-माह — **पौर्वापर्येणेति**। नैरन्तर्येणेत्यर्थः। अयमर्थः — आदिशब्दोऽवयववाचकः, अजादित्वं च वृद्धेरचां निरन्तरावस्थाने घटते। यथा पङ्क्तिरूपेण स्थितेषु ब्राह्मणेषु 'एषामयमादिः' इति। निरन्तरावस्थानं चाचां नास्तीति। कथं नास्ति, अत आह — **स चेति**। विजातीयव्यवधान-हीनतया तेषामवस्थाने हि निरन्तरावस्थानं स्यात्। विजातीयव्यवधानं चावश्यंभावीत्यर्थः। न च विद्यमानानामपि व्यञ्जनानामनपेक्षया संनिवेशोपपत्तिरचामिति वाच्यमित्याह — **सर्वस्येति**। 'यस्य' इति प्रातिपदिकमज्विशेषणमुपात्तम्, तच्चाज्झलात्मकं प्रतीतमिति [6]कथं प्रतीतानां व्यञ्जना-नामनपेक्षेति भावः। प्रातिपदिकावयवानामचां निरन्तरावस्थानाभावाद्व्यवधानेनावस्थिताच्समु-दायापेक्षयापि वृद्धिरादिरिति व्यपदेक्ष्यत इत्यत्राह — **अचामित्यनेन चेति**। न ह्यनुपपत्तिमुपजीव्य शब्दस्यार्थबोधकत्वमिति भावः। [7]अस्मिन् न्यासे कथमेवं विज्ञानप्राप्तिः, अत आह — **अच्संनि-वेशस्येति**। तत्संभवे ह्यचामित्यवयवसंबन्धे षष्ठी स्यात्। तदसंभवात्तु निर्धारणषष्ठी संपद्यते। निर्धारणं च न वृद्धेः, अपि त्वादेरित्युक्तम्। **अजपेक्षयेति**। एतच्चादेरित्यनेन संबध्यते। अत एव निर्धारणस्य सजातीयविषयत्वान्निर्धार्यमाणस्याच्त्वं लभ्यमिति भाष्ये 'अजेवादिः' इत्युक्तम्।

---

[1] पा. सू. ६. २. ८७.
[2] अस्मादुक्तं तदुत्थितम् — ग.
[3] पा. सू. ६. २. ८७.
[4] पा. सू. ६. २. ८८.
[5] पा. सू. १. १. २१.
[6] कथमप्रतीतानां — ग.
[7] कस्मिन् न्यासे — ग.

यस्येत्येतच्च टीकायामचामित्यनेन संबन्धनीयम्, [न] वृद्धिग्रहणेन। [1]तथा चायमर्थः — यदवयवाचां मध्ये आद्योऽज् वृद्धिस्तद् वृद्धमिति वा, अचामाद्योऽज् वृद्धिर्यस्यास्तीति वा निर्धारणे उक्तभाष्य उक्तः। एतद् गार्ग्यादावव्याप्तिचोदनं कथम्, अजपेक्षादित्वसद्भावाद्वृद्धित्वाच्चाकारस्य। अतो न्यासभेदः 'एवं विज्ञायते' इत्यत्र संमत इति वाच्यमित्यत्राह — **अचामिति**। निर्धारणषष्ठ्याभिमतसिद्धावाशङ्कितायां विपरीतं निर्धारणं स्यादित्युच्यत इत्यर्थः। 'स्यात्' इत्यर्हार्थे लिङ्। एवं हि समुदायापेक्षमादित्वमित्यवयवार्थः प्रसिद्धो न परित्यक्तो भवति। निर्धारणे तु प्रथमवचनमादेरचो वा। ननु व्यावर्त्याभावान्न वृद्धेर्निर्धारणमित्यत्राह — **आकारस्येति**। कथमाकारव्यावृत्तिः, तस्याप्यच्कार्यदर्शनेनाच्त्वस्यावश्याङ्गीकार्यत्वादित्यत्राह — **आकारो हीति**। इह तु विशेषणसामर्थ्याद् ग्रहणकशास्त्रबाध इति भावः। आकारव्यावर्तनस्यासाधारणं साध्यमाह — **ततश्चेति**। तर्ह्येतदेव वाच्यं भाष्य इत्याशङ्क्याह — **गार्ग्य इति**। यदा हि 'अचाम्' इति [2]वृद्धिनिर्धारणाय, [3]तदादेर्यस्येत्युपात्तसमुदायसंबन्धात् समुदायादित्वाभावादप्यत्राप्राप्तिर्न केवलमनच्त्वादिति द्योतयितुमिदमुक्तमित्यर्थः। एवं चैकारौकारयोरपि समुदायानादित्वे वैक्षमाणिसौश्रुतादावव्याप्तिरवगन्तव्या। समुदायादित्वमजादित्वं वेत्यत्र पक्षद्वयं संभवति, न पक्षान्तरम्। अतः कथमेकान्तादित्वमुपन्यस्तमित्याशङ्क्याजादित्वपक्ष एवानेनोच्यत इत्याह — **एकान्ता इति**। नन्वजादित्वपक्षोऽप्यजसंनिवेशेन दूषित इत्यत्राह — **तेषामिति**। अचामित्यवयवषष्ठीपक्षो दूषितः, न तु निर्धारणपक्ष इति भावः। न च निर्धारणपक्षोऽप्यजेवादिरित्युत्थाप्य 'नैवम्' इति दूषित इति वाच्यम्, विपरीतनिर्धारणसंभावनया दूषितत्वात्, आदिनिर्धारणस्यादूषितत्वात्। व्याख्यानादादिनिर्धारणमिति प्रत्यवस्थानात्। अन्ये त्वादिशब्दः समीपवचनः, संबन्धसामान्येऽचामिति षष्ठीत्यभिमतमिति प्रागनुक्त एव पक्ष इदानीमुत्थाप्यत इत्याहुः। आदिग्रहणे [4]सति न सर्वप्रसङ्गः, तत्राह — **न होति**। [5]**अन्त्येति**। अन्त्यग्रहणमुपरितनानामचामुपलक्षणम्। 'अन्याजपेक्षया' इति पाठो युक्ततरः सः। एतदच्सहितोपरितनाच्समुदायमध्ये आकारस्य प्रायम्येन निर्धारणम्, सामीप्यं वेतरापेक्षया। नन्वादिग्रहणस्य इदमेव प्रत्युदाहरणं प्रागुक्तम्, अतः कथमत्र प्राप्तिश्चोद्यते, आदिग्रहणवैयर्थ्यापत्तेः, अत आह — **आदीति**॥

[१, ५६४–५६६]

(**लघुविवरणम्**) 'यस्य' इत्यनेनाचामित्येतन्न विशेष्यते, उपसर्जनत्वात्। किं तु वृद्धिः। 'अचाम्' इत्यनेनापि वृद्धिर्न विशेष्यते, व्यवहितत्वात्। किं त्वादिः। तथा च 'यस्य वृद्धिरचामादिः' इत्युक्तेऽच्संनिवेशसिद्धये हलाकृतिर्न विवक्ष्यत इत्यभिप्रेत्याह — **उभयेति**। संकोचे कारणाभावात् सर्वापेक्षमादित्वं गृह्यत इत्याह — **सकलेति**। **नुड्ग्रहणादिति**। अक्षण्वानित्यादौ स्वरसिद्धये हि तत्र नुड्ग्रहणं कृतम्। यदि च मतुप्स्वरविधौ व्यञ्जनं व्यवधायकं न स्यात् ततो [6]ह्रस्वान्तत्वादेव स्वरे सिद्धे नुड्ग्रहणमनर्थकं स्यादिति भावः। चरशब्दान्नडादित्वात् फक्। येन

---

[1] तावदयमर्थः — ग.
[2] वृद्धिर्निर्धारणाय — ग.
[3] तदा, आदेरिति छेदः।
[4] सति सर्वप्रसङ्गः — ग.
[5] प्रदीपे 'अन्याजपेक्षयादिरिति' इत्यत्र 'अन्त्याजपेक्षयादिरिति' इति पाठोऽभिमतः।
[6] पूर्वस्याक्षशब्दस्य ह्रस्वान्तत्वात् 'ह्रस्वात्' इत्येव ततः परस्य मतुप उदात्तस्वरे सिद्ध इत्यर्थः।

यूनि विहितो न गोत्रे, तेनेत्यर्थः। **छः स्यादिति**। समुदायस्य गोत्रविहितप्रत्ययान्तत्वाभावात् [1]'कण्वादिभ्यः' इत्यणः प्राप्त्यभावादिति भावः॥

[१, ५६४–५६६]

(**विवरणम्**) 'यस्य' इति नाचो विशेष्यन्ते, तेषां षष्ठीनिर्दिष्टत्वेनोपसर्जनत्वात्। नाप्यादिः, व्यवहितत्वात्। किं तु वृद्धिः। अचामित्यनेन चादिर्विशेष्यते, संनिधानात्। तथा च 'यस्य वृद्धिरचामादिस्तद् वृद्धम्' इत्युक्तावजपेक्षादित्वसिद्धये मध्ये वर्तमानापि हलाकृतिर्न विवक्ष्यत इत्यभिप्रेत्याह — **उभयेति**। संकोचे प्रमाणाभावमभिप्रेत्याह — **सकलेति**। **सतोऽपीति**। आदौ मध्ये चेति शेषः। **अचामिति वचनादिति**। केवलाच्संनिवेशासंभवादिति भावः। पूर्वं यद्-गुणयुक्तो यः स एव गुणान्तरयुक्तो विधीयते। अत एव स्वरविधौ आदिरन्त इति च प्रथमा-निर्देश इत्यभिप्रेत्याह — **यथेति**। ननु यथा अयोग्यत्वाद् व्यञ्जनं न स्वयमुदात्तत्वादिभाक् एवम् [2]'अनावः' इति निषेधाल्लिङ्गादच आदित्वादिकमपि न विहन्तीत्युदश्वित्वानिति तकारो मतुप्ह्रस्वयोर्न व्यवधायक इति [3]'ह्रस्वनुड्भ्याम्' इति मतुप उदात्तत्वं स्यादित्यत आह — **ह्रस्वेति**। [4]'अक्षण्वान्' इति मतुप उदात्तत्वाय नुड्ग्रहणम्। यदि च [5]'मतुपः स्वरे व्यञ्जनं व्यवधायकं न स्यात् ततः [6]'अनो नुट्' इति मतुपो नुटि वत्वे च यद्यप्यनो नकारस्य लोपः [7]'नलोपः सुप्स्वर' इत्यसिद्धः, तथापि नकारस्याव्यवधायकत्वात् 'ह्रस्वात्' इत्येव मतुप उदात्तत्वं सिद्धमिति किं नुड्ग्रहणेन। [8]'कृतं तद् ज्ञापकमस्मिन् स्वरे व्यञ्जनं व्यवधायकमेवेत्यस्येत्यर्थः। **उदश्वित्वानिति**। [9]'झयः' इति वत्वम्। **पौरुषेयम्** आधुनिकमित्यर्थः। भाष्ये 'देवदत्तीयाः' इत्यादौ वृद्धत्वपक्षे छः। अन्यथा अणेव स्यात्। चरशब्दान्नडादित्वात् फक्। 'गोत्रोत्तरपदस्य' इति लौकिकं गोत्रमपत्यमात्रं गृह्यत इति पाणिनिशब्दो यूनीञ्न्तोऽप्युदाहृतः। ननु 'ओदनपाणिनीयाः' इत्यत्र वृद्धसंज्ञायां छः, असमस्तवत् प्रत्यये इञ्न्तत्वात् पाणिनिशब्दस्य [10]'इञश्च' इत्यणिति भेदः स्यादित्यत आह — **तेनेति**। येन यूनीञ् तेनेत्यर्थः। [11]'इञश्च' इत्यत्र गोत्र इत्यनुवर्तते, पारिभाषिकं च तत्र गोत्रं गृह्यत इति भावः। जिह्वाकात्यादिवर्जनं भाष्ये वृद्धसंज्ञापक्षेऽपि[12] द्रष्टव्यम्। **अणिति**। स च केवलेभ्यः कण्वादिभ्यश्छस्यापवादः। **वृद्धेति**। समुदायस्य कण्वादिषु पाठाभावात् प्रत्ययविधौ तदन्तविधिप्रतिषेधाच्चेति भावः॥

[१, ५६४–५६६]

(**उद्द्योतनम्**) **उभयेति**। अज्झल्समुदायरूपत्वेऽपीत्यर्थः। 'यस्य' इति वृद्धिविशेषणम्, नाचाम्,

---

[1] पा. सू. ४. २. १११.
[2] पा. सू. ६. १. २१३.
[3] पा. सू. ६. १. १७६.
[4] तक्षण्वान् — च, छ, ञ, ट.
[5] मतुप्स्वरे — छ, ट.
[6] पा. सू. ८. २. १६.
[7] पा. सू. ८. २. २.
[8] कृतं तु ज्ञापकं — च, छ, ट.
[9] पा. सू. ८. २. १०.
[10] पा. सू. ४. २. ११२.
[11] पा. सू. ४. २. ११२.
[12] अपिशब्दो नास्ति — च, छ.

नाप्यादेः, [1]"विवक्षितार्थलाभात् । 'अचाम्' इत्यादिविशेषणमित्यभिप्रेत्याह — **यस्येति**। [2]यस्यादिर्वृद्धिरित्यन्वयः। संकोचाभावादाह — **सकलेति**। एकजात्युपादाने जात्यन्तरत्यागः सर्वादिग्रहणं चेत्यत्र दृष्टान्तमाह — **षड्क्तावि**ति। **सतोऽपी**ति। आदौ मध्ये चेत्यादिः। 'जातीय' इत्यनेन सर्वादित्वमुक्तम्। एवं च 'आकृतिनिर्देशात्' इति सर्वादित्व[3]लाभार्थमेवोक्तमिति ज्ञेयम्। नेदं वाचनिकमित्याह — **अचामिति**। केवलाच्संनिवेशासंभवादिति भावः। ननूदात्तदीनामज्धर्मत्वाद् [4]व्यञ्जनस्याविवक्षा, आदित्वं व्यञ्जनस्यापि संभवतीति कथं दृष्टान्तसाम्यम्, अत आह — **यथेति**। व्यञ्जनव्यावृत्तिमात्रे दृष्टान्त इति भावः। 'अयोग्यत्वात्' इत्यनेन स्वरविधावपि व्यञ्जनव्यावृत्तिर्न्यायसिद्धा, न वाचनिकीत्युक्तम्। यद्ययोग्यत्वात् स्वरविधौ व्यञ्जनमविद्यमानवत् तदा 'उदश्वित्वान्' इत्यत्र [5]"तकारस्याव्यवधायकत्वात् ह्रस्वान्मतुप उदात्तत्वं स्यात्, अत आह — **ह्रस्वेति**। ह्रस्वान्नुटश्च परो मतुबुदात्तः। [6]अग्निमान्, अक्षण्वान्। [7]"अनो नुट्' इति नुडत्र गृह्यते 'अक्षण्वान्' इत्यत्र नुटोऽव्यवधायकत्वेन 'ह्रस्वात्' इत्येव मतुप [8]'उदात्तत्वे सिद्धे नुड्ग्रहणमस्मिन् मतुप्स्वरे व्यञ्जनं व्यवधायकमिति ज्ञापनार्थम्। तेनान्यत्र [9]व्यञ्जनव्यवधाने मतुप [10]'उदात्तत्वं न भवतीत्यर्थः। 'उदश्वित्वान्' इत्यत्र [11]"झयः इति मतुपो, मस्य वत्वम्, [12]'तसौ मत्वर्थे' इति भत्वान्न जश्त्वम्। नन्वर्थवतः शब्दस्य सर्वस्यार्थनामत्वाद् व्यावर्त्याभावः, अत आह — **पौरुषेयमिति**। आधुनिकमित्यर्थः। **चारायणस्येति**। चरशब्दस्य नडादित्वात् फक्। 'गोत्रोत्तरपदस्य' इत्यत्र लौकिकं गोत्रमपत्यमात्रं गृह्यते, न तु पारिभाषिकम्। तेन यूनीञन्तः पाणिनिशब्दोऽप्युदाहृतः, तद्वचाचष्टे — **पणिन इति**। **यूनीति**। प्राग्दीव्यतीयेऽजादौ प्रत्ययेऽनुत्पन्न एव विवक्षिते युवप्रत्ययस्य लुगिति सूत्रार्थः। ननु पाणिनिशब्दात् [13]'इञश्च' इत्यणा भाव्यम्, न छेन, अत आह — **तेनेति**। येनेञो लुक् तेनेत्यर्थः। [14]'इञश्च' इत्यत्र [15]'कण्वादिभ्यो गोत्रे' इत्यतो गोत्र इत्यनुवर्तते। पारिभाषिकं गोत्रं तत्र गृह्यते। तेन प्रत्ययलक्षणेनापि [16]'इञश्च' इत्यण् न भवतीति भावः। घृतप्रियो रौढिः घृतरौढिः। तस्यापत्ये रूढशब्दात् [17]'अत इञ्' तस्य छात्रा इति विवक्षिते [18]'इञश्च' इत्यणः [19]'न द्व्यचः प्राच्यभरतेषु' इति निषेधात् [20]'वृद्धाच्छः'। भाष्ये **असमस्तवदिति**। यथा चारायणादेः [21]पृथक्पदत्वे 'वृद्धिर्यस्य' इत्येव वृद्धसंज्ञायां छो भवति तथा समासेऽपि भविष्यतीत्यर्थः। भाष्ये जिह्वाकात्यादिवर्जनं पूर्वकल्पेऽपि ज्ञेयम्। कात्यशब्दो गर्गादियञन्तः। जिह्वाकात्यशब्दात् छस्याभावे [22]प्राग्दीव्यतीयेऽणि [23]'आपत्यस्य' इति यलोपे 'जैह्वाकाताः' इति

---

[1] विवक्षितार्थलाभादचामित्यादि — म.
[2] यस्यादिवृद्धिरित्यन्वयः — अ, म; यस्याजपेक्षयादिवृद्धिरित्यन्वयः — ऋ. 'यस्य वृद्धिः सकलाजपेक्षयादिरित्यन्वयः' इत्युचितं भाति।
[3] लाभार्थमेवोत्तरमिति — अ.
[4] 'व्यञ्जनस्याविवक्षा, आदित्वम्' इति नास्ति — म.
[5] तकारस्य व्यवधायकत्वात् — म.
[6] 'अग्निमान्' इति नास्ति — म.
[7] पा. सू. ८. २. १६.
[8] उदात्ते सिद्धे — अ.
[9] 'व्यञ्जन' इति नास्ति — म.
[10] उदात्तत्वं च भवतीत्यर्थः — म.
[11] पा. सू. ८. २. १०.
[12] पा. सू. १. ४. १९.
[13] पा. सू. ४. २. ११२.
[14] पा. सू. ४. २. ११२.
[15] पा. सू. ४. २. १११.
[16] पा. सू. ४. २. ११२.
[17] पा. सू. ४. १. ९५.
[18] पा. सू. ४. २. ११२.
[19] पा. सू. ४. २. ११३.
[20] पा. सू. ४. २. ११४.
[21] पृथक्त्वे — म.
[22] प्राग्दीव्यतोऽणि — अ.
[23] पा. सू. ६. ४. १५१.

भवति। एवं हारितकाताः। जिह्वाचपलः, [1]हरितभक्षकश्च कात्यः। **अणिति**। स च केवलेभ्यः [2]कण्वादिभ्यश्छापवादो विधीयते। **वृद्धेति**। समुदायस्य कण्वादिपाठाभावात् प्रत्ययविधौ तदन्तविधिप्रतिषेधाच्चाणोऽप्रसङ्गादिति भावः॥

[१, ५६४–५६६]

(**रत्नप्रकाशः**) **अजाकृतिनिर्देशादिति**। 'अचामादिः' इत्युक्तेऽच्त्वावच्छिन्नाचामेवादिर्लक्षणघटकः, न त्वनाद्यचामादिरिति भावः। एतेन 'उभयरूपत्वेऽपि प्रातिपदिकस्याजाकृतिः 'अचाम्' इति वचनादाश्रीयते। विद्यमानापि हलाकृतिर्न विवक्ष्यते। तेनायमर्थः — यस्य शब्दस्य सकलाजपेक्षया वृद्धिरादिस्तद् वृद्धम्' इति कैयटो निरस्तः। प्रातिपदिकावयवाचां साकल्यसिद्धये 'अजाकृतिनिर्देशात्' इति हेतोर्भगवतोक्तत्वेन 'अचाम्' इति निर्धारणषष्ठ्याः प्रातिपदिकस्योभयात्मकत्वेऽप्युपपन्नत्वेन च 'अचाम्' इत्यस्य प्रातिपदिकाजाकृतित्वमात्राश्रयणकल्पकत्वासंभवात्। हलाकृतिमपेक्ष्य दूषणस्यादत्तत्वेन हलाकृतिविवक्षानिराकरणस्यानुक्तोपालम्भत्वाच्च। अत एव 'पङ्क्तावस्यां ब्राह्मणानामादिरानीयताम्, इत्युक्ते सतोऽपि शूद्रादीननादृत्य ब्राह्मणजातीयापेक्षया यो ब्राह्मणजातिरादिः स आनीयते' इति तदीयदृष्टान्तोऽपि निरस्तः। अचामादित्वं हलो वा हलामादित्वमचो वा पूर्वपक्षिणानापादितत्वेन तस्यानर्थक्यात्। 'एवमपि व्यञ्जनैर्व्यवहितत्वान्न प्राप्नोति' इत्याशङ्क्यान्तराननुगुणत्वाच्च। इदानीं दोषान्तरमलभमानः 'वृद्धसंज्ञायामजसंनिवेशात्' इति प्रथमापादितमेव दोषं स्मारयति — **एवमपीति**। [3]**व्यञ्जनस्याविद्यमानवत्त्वमिति**। विद्यमानानामपि व्यञ्जनानामचामादित्वग्रहणाप्रतिबन्धकत्वमिति भावः। **यथान्यत्रेति**। लोकेऽपि हि 'अस्यां पङ्क्तौ ब्राह्मणानामादिमानय' इत्युक्ते सत्स्वपि ब्राह्मणेतरेषु ताननादृत्य ब्राह्मणादिमानयति। **स्वर इति**। यद्यपि तत्र ज्ञापकबलेन व्यञ्जनानामविद्यमानत्वमाश्रितम्, तथापि तत्र निर्धारणषष्ठ्यभावाद् ज्ञापकमनुसृतम्। अत्र तु निर्धारणषष्ठ्याः सत्त्वेन ज्ञापकमन्तरेणैव व्यञ्जनानामविद्यमानत्वस्वभावात् सिद्धमिति तदंश एव दृष्टान्त इति न दोषः। एतेन "स्वरविधावयोग्यत्वाद् व्यञ्जनमविद्यमानवत्, एवमिहापि 'अचाम्' इति वचनादित्यर्थः" इति कैयटो निरस्तः। संप्रसारणवत्, त्यदाद्यत्ववत्, अष्टन आत्ववत्, व्यञ्जनस्योदात्ताद्यादेशं प्रत्यपि योग्यत्वस्यादण्डवारितत्वात्। अविद्यमानताया लोके स्वभावसिद्धत्वेन तत्र 'अचाम्' इति वचनस्य हेतुत्वकथनानौचित्याच्च। **वा नामधेयस्येति**। पौरुषेयमत्र नाम गृह्यते। अन्यथा प्रातिपदिकमात्रस्य नामत्वेन पूर्वसूत्रस्य निर्विषयकत्वापत्तेः। यद्युच्यते 'तत्सूत्रारम्भसामर्थ्याद् यस्याचामादिर्वृद्धिस्तस्य नित्यमेव वृद्धसंज्ञा भविष्यति' इति, तर्हि 'वान्यस्य' इति वक्तव्ये नामधेयग्रहणसामर्थ्यात् तथा ज्ञेयम्। **कम्बलचारायणीया इति**। कम्बलप्रियस्य चारायणस्य शिष्या इत्यर्थः। **ओदनपाणिनीया इति**। ओदनप्रधानस्य पाणिनेश्छात्रा इत्यर्थः। एतेन "पाणिनस्यापत्यं युवेतीञ्। तस्य छात्रा इति विवक्षिते [4]"यूनि लुक्' इतीञो लुक्। तेन [5]"इञश्च' इत्यण् न भवतीति छो भवति" इति कैयटो निरस्तः। यद्युवप्रत्ययान्तादजादिप्राग्दीव्यतीयो विवक्षितस्तस्यैव [6]"यूनि लुक्' इति लुको विधेयत्वेन प्रकृते ओदनपाणिनिशब्दस्येञन्तत्वाभावेन तस्मादजादिप्राग्दीव्यतीये विवक्षिते इञो

---

[1] हरीत — म.

[2] कण्वादिभ्यश्चापवादः — अ, म, ऋ.

[3] वार्तिके' व्यञ्जनस्याविद्यमानत्वम्' इत्यत्र 'व्यञ्जनस्याविद्यमानवत्त्वम्' इति पाठ आश्रितः।

[4] पा. सू. ४. १. ९०.

[5] पा. सू. ४. २. ११२.

[6] पा. सू. ४. १. ९०.

लुगसंभवात्। इञो लुगभावेऽपि तस्य गोत्रेऽविहितत्वेन तदन्तात् [1]'इञश्च' इत्यणोऽप्रसक्तेश्च। "'गोत्रान्तादसमस्तवत्' इत्येव ज्यायः" इति वदता भगवता प्रकृतोदाहरणस्वीकारेण शास्त्रीयगोत्रे विहितेञः खलु [2]'इञश्च' इत्यनेन ग्रहणम्। **गोत्रान्ताद्वासमस्तवदिति**। केवलाद् गोत्रप्रत्ययान्ताद्यः प्रत्ययो भवति स तद्गोत्रप्रत्ययान्तान्तात् समासादपि भवतीति वाच्यमित्यर्थः। **पैङ्गलकाण्वा इति**। केवलात् काण्व्यशब्दात् [3]'कण्वादिभ्यो गोत्रे' इत्यण् भवतीति तदन्तसमासादपि स सिध्यति, वृद्धसंज्ञायां तु छः स्यादिति भावः॥

[१, ५६४ — ५६६]

(**नारायणीयम्**) इह 'अचाम्' इत्यवयवषष्ठ्यां 'वृद्धसंज्ञायामजसंनिवेशादनादित्वम्' इत्युक्तं वार्तिके। निर्धारणषष्ठ्यामपि वृद्धिनिर्धारणे समुदायादित्वविज्ञाने भाष्ये दूषणमुक्तम्। आदेर्निर्धारणे तु सर्वप्रसङ्ग उक्तः। तत्र पक्षद्वयोक्तदूषणस्यापि व्यक्त्याकृतिपक्षसाधारण्यात् 'सिद्धम्' इति परिहारोऽनुपपन्न इत्यत्राह — **उभयेति**। विद्यमानानामपि व्यञ्जनानामनपेक्षायां कारणम् 'अचाम्' इति निर्देश इत्येतदनेनोच्यते, न तु व्यक्त्याश्रयणात् प्राप्तदोषस्याकृत्याश्रयणात् परिहार उच्यत इत्यर्थः। आकृतिग्रहणं तु [4]तत्त्वाभिप्रायम्, वर्णग्रहणे जातिग्रहणात्, न तु शङ्कापरिहाराय। तदेव नैरन्तर्यं व्यञ्जनानपेक्षयाचामुपपाद्य 'अजसंनिवेशात्' इत्यस्यासिद्धिरुक्ता। यत् पुनरापेक्षिकं मध्यस्याप्यादित्वमिति सभासंनयनेऽतिप्रसङ्ग उक्तः, तस्याप्यत्र परिहारोऽभिप्रेत इत्याह — **तेनेति**। 'यस्य' इत्येतदादिरित्यत्र न संबन्धनीयम्, [5]गार्ग्यादावव्याप्त्यापत्तेः। परं तु यत्समुदाये यावतामचां संभवस्तावदच्समुदायापेक्षया य आदिर्वृद्धिश्च स समुदायो वृद्ध इत्येषोऽत्रार्थः। तदनेन 'यस्य' इत्युपादानमेव विशेषोपादानमित्युक्तं भवति। यत् पुनः प्रतीतानपेक्षा न युज्यत इति, तत्राह — [6]**तद्यथेति**। पङ्क्तपदेनानेकजातीयसंघप्रतिपत्तावपि ब्राह्मणानां विभजनाज्जात्यन्तरानपेक्षणवत् 'यस्य' इत्यनेनाज्झलात्मकसमुदायादप्यचां विभजनाद्व्यञ्जनानपेक्षेत्यर्थः। सतः प्रतीतावभिसंधिमजानता चोदितं भाष्ये — **एवमपीति**। अभिसंध्युद्घाटनम् — **व्यञ्जनस्येति**। तत्र दृष्टान्तबलाद् वाचनिकमविद्यमानत्वमिति भ्रमः स्यात्, तन्निवर्तनेनाभिसंध्युद्घाटनमेवेदमित्याह — **अचामिति**। भ्रान्तिमूलं दृष्टान्ते वाचनिकाविद्यमानत्वं निरस्यति — **यथेति**। **नुड्ग्रहणादिति**। तत्र व्यञ्जनस्याव्यवधायकत्वे 'ह्रस्वात्' इत्येव सिद्धेर्नुड्ग्रहणमनर्थकं स्यादित्यर्थः। [7]'रूढत्वं नामत्वमिति शङ्कां वारयति — **पौरुषेयमिति**। पुरुषेण कृतं पौरुषेयम्। छान्तेन समासे वार्तिकानपेक्षेत्यत्राह — **कम्बलेति**। पाणिनिशब्दो भगवदाचार्यस्य संज्ञेति न गोत्रोत्तरपदत्वमिति मन्यमानं प्रत्याह — **पणिन इति**। ननु छापवादेन "इञश्च' इत्यणा भाव्यम्, अत आह — **यूनीति**। [8]'इकारप्रश्लेषं वर्जयित्वा वर्णाश्रयत्वमण आश्रयणीयमिति प्रत्ययलक्षणाभावः। ज्यायस्त्वं विशदयति — **कण्वादिभ्य इति**॥

---

[1] पा. सू. ४. २. ११२.
[2] पा. सू. ४. २. ११२.
[3] पा. सू. ४. २. १११.
[4] वस्तुतत्त्वाभिप्रायमित्यर्थः।
[5] गार्ग्यादावप्यव्याप्त्यापत्तेः — ग.
[6] प्रदीपे 'यथा पङ्क्तौ' इत्यत्र 'तद्यथा पङ्क्तौ' इति पाठोऽभिमतः।
[7] रूढित्वान्नामत्वमिति — ग.
[8] पा. सू. ४. २. ११२.
[9] ञकारप्रश्लेषमिति युक्तं भाति। ञकारं वर्जयित्वा 'इतश्च' इति विवक्षितं स्यादिति भाति।

त्यदादीनि च. १. १. ७४.

[१, ५६६ — ५६७]

(**लघुविवरणम्**) [1]त्वात्पुत्रा इत्यनुपपन्नम्, उपसर्जनानां सर्वादिगणपाठपर्युदासेन तदन्तर्गणत्यदादिगणपाठस्यापि पर्युदासात् त्यदादित्वाभावाद् वृद्धसंज्ञाप्राप्त्यभावादित्यत आह — **आदीति**। वाक्येऽनुपसर्जनत्यदादीनां तदादिसमुदायस्य [च] वृद्धसंज्ञायां प्रयोजनाभावादिति भावः। नपुंसके कर्मणि कथं घञिति, तत्राह — **नपुंसकेऽपीति**। भावे हि नपुंसके क्तल्युटौ बाधकौ। **वृद्धिग्रहणेति**। यद्यप्यज्ग्रहणमनुवर्तत इति न तस्य त्यदादिभिः संबन्ध इति वक्तुं शक्यते, तथाप्यचामित्यस्यानुवृत्तेरुत्तरार्थतयेहादिग्रहणासंबन्धप्रतिपादनेऽसामर्थ्यादृ वृद्धिग्रहणानुवृत्तेश्चानन्यप्रयोजनतया असंबन्धप्रतिपादने सामर्थ्यात् तथा नोक्तम्॥

[१, ५६६–५६७]

(**विवरणम्**) भाष्ये **अनुवर्तत इति**। पूर्वस्मात् सूत्रात् परतो गच्छति न वेति विचारः। ननूपसर्जनानां सर्वादिगणनिवेशाभावात् सर्वाद्यन्तर्गणत्यदादिष्वपि न निवेश इति यस्य त्यदादीन्यादयस्तद् वृद्धमिति विज्ञानेऽपि [2]त्वत्पुत्रादौ न दोष इत्यत आह — **आदीति**। **स्यादिति**। भूतपूर्वगत्येति भावः। इह यस्यादिग्रहणसंबन्धे भाष्यस्य तात्पर्यम्, नाचामित्यस्यापि संबन्ध इत्याह — **अचामित्यस्येति**। 'निर्धारणस्य' इत्युपलक्षणम्, शेषषष्ठ्यामपि पूर्वत्राचामिति बहुत्वस्याविवक्षितत्वादचामिति त्यदादिविशेषणे व्यावर्त्यमपि नेति द्रष्टव्यम्। व्यपदेशिवद्भावेन केवलेभ्योऽपि त्यदादिभ्यो भविष्यतीति 'इह च' इति कथं भाष्यमित्यत आह — **व्यपदेशिवदिति**। भावे नपुंसके क्तल्युटौ घञोऽपवादौ। स्त्र्यधिकारात् परतो वासरूपविधिर्नेति 'संबन्धम्' इति नपुंसकप्रथमैकवचनमनुपपन्नम्, संबन्धस्य च न स्वातन्त्र्येणानुवृत्तिरित्यत आह — **द्वितीयान्तमिति**। **वृद्धेति**। त्यदादीनां वृद्ध्यात्मकत्वाभावात् सामानाधिकरण्येन संबन्धासंभवादिति भावः। चेतनावतस्त्यागोपादाने संभवतः, 'यस्यादिः' इत्यस्य तु कथं ते स्यातामित्यत आह — **एतदिति**। **योग्यत्वादिति**। यस्याचामादिरित्यस्य एङित्येकवचनान्तेन संबन्ध इति शेषः। तुल्यजातीयस्येत्युपलक्षणम्, अविपरिणतस्यैवादिरित्यस्यानुवर्तमानस्यैङित्यत्रैवान्वयसंभवे विपरिणामस्यायोगादिहानुवृत्तेरुत्तरार्थत्वेनाप्युपपत्तेरित्यपि द्रष्टव्यम्। अज्ग्रहण[3]संबन्धमिति तु नोक्तम्, अचामित्यस्योत्तरार्थमनुवर्तमानस्येह यस्यादिग्रहणसंबन्धाभावबोधने सामर्थ्याभावात्॥

[१, ५६६–५६७]

(**उद्द्योतनम्**) भाष्ये **अनुवर्तत इति**। पूर्वस्मात् सूत्रात् परस्मिन्ननुवर्तते न वेति विचार्यते। ननूपसर्जनानां सर्वादिगणनिवेशाभावात् त्यदादीनामप्यनुपसर्जनानामेव निवेशात् 'यस्य त्यदादीन्यादयस्तद् वृद्धम्' इति विज्ञानेऽपि त्वत्पुत्रादौ न दोषः, अत आह — **आदिग्रहणेति**। **स्यात्** भूत-

---

[1] एतत्सूत्रव्याख्यानमेव न दृश्यते — ड, ढ़.

[2] त्वात्पुत्रादौ — ञ.

[3] संबद्धमिति — ट.

पूर्वगत्येत्यादिः। भाष्ये 'यस्याचाम्' इत्युक्तावप्यादिग्रहणस्यैवात्र संबन्धो विवक्षितः, नाचामित्यस्येत्याह [1]— **अचामित्यस्येति**। एवकारव्यवच्छेद्यमाह — **तत्संबन्धस्येति**। अयोग्यत्वे हेतुः — **निर्धारणस्येति**। उपलक्षणमिदम्। जातौ बहुवचनेन 'अचाम्' इति शेषषष्ठ्या आदिविशेषणत्वपक्षेऽपि [2]प्रकृतेऽजादित्वविशेषणस्य प्रयोजनाभावादित्यपि द्रष्टव्यम्। व्यपदेशिवद्भावेन केवलादपि छः स्यादिति 'इह च' इति भाष्यमयुक्तम्, अत आह — **व्यपदेशिवदिति**। ननु भावे घञन्तस्य पुँल्लिङ्गत्वात् 'संबन्धम्' इति नपुंसकप्रथमैकवचनमयुक्तम्, अनुवर्तमानस्य संबन्धितया संबन्धप्राधान्यमप्ययुक्तम्, अत आह — **द्वितीयान्तमिति**। अनुवर्तिष्यत इत्यस्य द्वितीयान्तेनान्वयार्थमाह — **अनुरोत्स्यत इति**। अनुवर्तमानमादिपदं वृद्धिग्रहणसंबन्धं न हास्यतीत्यर्थः। अनुवर्तमानमित्यस्याध्याहारमसहमान आह — **अथवेति**। भावे घञन्तस्यैव पुँल्लिङ्गत्व[3]नियमः, न कर्माद्यर्थघञन्तस्यापीति नपुंसकप्रथमैकवचनोपपत्तिरित्याह — **नपुंसक इति**। **वृद्धीति**। त्यदादीनां वृद्धचात्मकत्वतद्युक्तत्वयोरभावेन[4] सामानाधिकरण्येन वैयधिकरण्येन वास्मिन् सूत्रे संबन्धो न संभवतीति भावः। चेतनस्य [5]बुद्धिपूर्वकारिणस्त्यागोपादाने युक्ते न शब्दस्येति दृष्टान्तवैषम्यमाशङ्क्याह — **एतदिति**। योग्यत्वमेवाह — **एङिति**। अयोग्यत्वमेव स्फोरयति — **तुल्यजातीयस्येति**। आदिरित्येकवचनान्तस्यैङित्यनेनैकवचनान्तेन संबन्धसंभवे बहुवचनान्ततया विपरिणामोऽप्यमानक इत्याशयेनाह — [6]**आदय इति**। न च त्यदादिशब्देन तत्स्थाज्लक्षणायां सामानाधिकरण्येनान्वयः संभवतीति वाच्यम्, उत्तरार्थमनुवृत्त्युपपत्त्या लक्षणाया अमानकत्वादिति भावः॥

[१, ५६६–५६७]

(**रत्नप्रकाशः**) **यद्यनुवर्तत इति**। तथा च 'यस्याचामादिस्त्यदाद्यवयवः स वृद्धसंज्ञः' इत्यर्थापत्त्या त्वत्पुत्रादावतिप्रसङ्ग इति भावः। **इह च न स्यादिति**। निर्धारणावध्यभावादिति मन्यते। वस्तुतस्तु व्यपदेशिवद्भावेन टिसंज्ञावदत्रापि वृद्धसंज्ञा भवतीति नाव्याप्तिदोषः। किं त्वतिव्याप्तिरेव दोषः। एतेन 'व्यपदेशिवद्भावोऽत्र नास्ति, अप्रातिपदिकेनेति निषेधात्' इति कैयटो निरस्तः। यत्र प्रातिपदिकेन तदन्तविधिर्व्यपदेशिवद्भावेनाश्रीयते तत्रैव तन्निषेधप्रवृत्तेरुचितत्वात्। प्रकृते तु व्यपदेशिवद्भावेन त्यदाद्यवयवस्य व्यपदेशिवद्भावेनाचामादित्वं गृह्यत इति न तन्निषेधप्रसक्तिः। **संबन्धमनुवर्तिष्यत इति**। कर्मणि घञ्, संबद्धं यथा भवति तथानुवर्तिष्यत इति भावः। मण्डूकप्लुत्यापि सिद्धमेतत्। एतेन 'स्वरितत्वप्रतिज्ञानादुत्तरसूत्र एव योग्यत्वाद् यस्याचामादिरिति संबध्यते 'एङ यस्याचामादिस्तद् वृद्धम्' इति वाक्यार्थसंपादनाय। इह त्वयोग्यत्वात् संबन्धानुपपत्तिः, तुल्यजातीयस्य निर्धारणात्। त्यदादीनां चाच्रूपत्वाभावाद् यस्याचामादयस्त्यदादय इति संबन्धाभावात्' इति कैयटो निरस्तः। स्वरितत्वप्रतिज्ञानस्यानुवृत्तिमात्रहेतुत्वेन मध्येऽसंबन्धाहेतुत्वात्। मध्ये तत्संबन्धयोग्यतामाश्रित्यैव भगवतातिव्याप्तेः स्वीकृतत्वेन तदयोग्यत्वकथनस्यानौचित्यात्। 'संबन्धमनुवर्तिष्यते' इति यथाश्रुतभाष्यस्योपपन्नत्वेनान्यथानयनानौचित्याच्च॥

---

[1] 'इत्याह — अचामित्यस्येति' इति नास्ति—म.
[2] प्रकृतेऽप्यजादित्व — अ.
[3] नियमेन कर्माद्यर्थघञन्तस्य तथाभावेन नपुंसक — म.
[4] बुद्धिपूर्वकलिङ्गत्यागोपादाने — अ; बुद्धिपूर्वकसार्थत्यागोपादाने — म
[5] आदिरिति — म.

[१, ५६६–५६७]

(**नारायणीयम्**) पूर्वनिपातान्यथानुपपत्त्या युष्मद उपसर्जनत्वावगतेरुपसर्जनस्य च त्यदादिकार्या-प्रसङ्गात् कथमत्रातिप्रसङ्गः, तत्राह — **आदीति** । नन्विहायोग्यत्वादसंबन्धो 'यस्याचामादिः' इत्यस्य। यथा वक्ष्यति सिद्धान्ते। ततश्चोत्तरत्रैव संबन्ध इति नानिष्टमनुवृत्तिपक्ष इत्यत्राह — **अचामिति**। "यः संबन्धविरोध्यंशस्तस्य स्यात् परिवर्जनम्। शिष्यस्य [1]दुष्टत्वाख्याने शिष्ट-संबन्धदर्शनात्।"

ननु व्यपदेशिवद्भावात् केवलस्यापि तदादित्वं भविष्यति। ततश्च वचनस्यात्र चरितार्थ-त्वादुपसर्जनस्य त्यदादिकार्यं न कल्प्यमित्यतिप्रसङ्गोऽपि नास्ति। अनुवृत्तिश्चोत्तरार्थैव भविष्य-तीत्यत्राह — **व्यपदेशिवदिति**। अयं तु निषेधः कल्पनागौरवान्न बाध्यते। तथाहि — निषेधोऽयं बाध्यः, अनुवृत्तेरुत्तरार्थत्वं कल्प्यम्, वचनस्य [2]त्वात्पुत्रादिविषयसत्त्वात् कथं निषेधबाध इति शङ्कायां तस्याविषयत्वं वर्ण्यम्। पक्षान्तरे तूपसर्जनस्य त्यदादित्वकल्पनमात्रमिति लाघवम्। नपुंसकानुपपत्तेर्घञन्तस्य [3]संबन्धस्यानुवृत्तिकर्तृत्वाभावाच्चाह — **द्वितीयेति**। कर्मत्वोपपत्तयेऽनु-वृत्तेरर्थमाह[4] — **अन्विति**। प्रथमान्तत्वेऽप्युपपत्तिमाह — **अथवेति**।

"क्तल्युण्नपुंसके भावे स्त्रियां क्तिन्नादयो यतः।
अतो घञाद्याः पुंस्येव यथा पाकश्चयो लवः॥"

इति भावे लिङ्गान्तरे घञः क्तादिबाधनम्, न कर्मादिष्वित्यर्थः। एकत्वं नपुंसकत्वं च विशेष्य-निदर्शनेनोपपादयति — **वृद्धीति**। ननु वृद्धिग्रहणस्य[5] त्यदादीनामवृद्ध्यात्मकत्वादज्ग्रहणवद-योग्यत्वादसंबन्धोऽस्तु। 'यस्यादिः' इत्येतत्त्विह कथं न संबध्यते, अत आह — [6]**न तस्येति**। अज्-ग्रहणस्योत्तरार्थत्वात् तस्येहासंबन्धेऽपि परिशिष्टसंबन्धो न्याय्यः। वृद्धिग्रहणस्य तूत्तरार्थत्वाभा-वादिहानुवृत्तिरितरस्येह संबन्धं निवारयितुमित्यर्थः। ननु लक्ष्यशरणा इत्थं प्रतिपद्यन्ताम् — इह वृद्धिग्रहणानुवृत्तिरुत्तरत्र तन्निवृत्तिश्चेति। युक्तिशरणस्तु कथं प्रतिपद्येत, तत्राह — **एतदिति**। एतदिहाभिप्रेतमित्यर्थः।

"आकाङ्क्षासत्तियोग्यत्वान्याहुः [7]कारणमन्वये।
अयोग्यः समुदायोऽतो न संबन्धमिहार्हति॥
आसत्तिरहितस्यास्य परत्राप्यन्वयः कथम्।
इति पर्यनुयोगोऽपि स्वरितत्वान्निराकृतः॥
परत्र च कृतार्थत्वादच्परित्याग[8]पूर्वकः।
इह संबन्ध इत्युक्तं यत् प्राक् तन्न हि युज्यते॥
सत्यां गतौ हि लोकानामदृष्टं परिवर्जनम्।
[कल्प्यं गौ][9]रवतस्तस्मादवश्यं नेह किंचन॥

---

[1] दुष्टत्वाख्यानशिष्ट — ग.
[2] अत्राण्प्रकृतिभूतत्वत्पुत्रशब्दे तात्पर्यं बोध्यम्।
[3] संबन्धपदस्येत्यर्थः।
[4] अनुवृत्तिशब्दस्यार्थमाहेत्यर्थः।
[5] अयोग्यत्वादित्यनेनान्वयः।
[6] प्रदीपे 'नास्ति तस्य' इत्यत्र 'न तस्य' इति पाठोऽभिमत इति भाति।
[7] करणमन्वये — ग.
[8] पूर्वतः — ग.
[9] रावतस्तस्मात् — ग.

एङः प्राचां देशे १. १. ७५.

[१, ५६७–५६८]

(**लघुविवरणम्**) [1]**ठञ्ञिठौ नेति** । [2]'वाहीकग्रामेभ्यश्च' इत्यनेन। कथं कुणिदर्शनाश्रयणं भाष्यकारस्येत्यत्राह — **सेपुरमिति** ॥

इति परमहंसपरिव्राजकाचार्यश्रीमदमरेश्वरभारतीशिष्यरामचन्द्रसरस्वतीश्वरानन्दापर-
नामधेयविरचिते महाभाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य
प्रथमे पादे नवममाह्निकम् ॥

॥ पादश्च समाप्तः ॥

[१, ५६७–५६८]

(**विवरणम्**) विधेयसंज्ञासंबन्धलाभात् प्राग्ग्रहणमाचार्यनिर्देशार्थमिति कुणिर्मेने। तन्मतेऽपि लक्ष्ये वैषम्याभावाय व्यवस्थितविभाषेत्याह — **व्यवस्थितेति** । व्यवस्थितविभाषाफलमाह — **तेनेति**। श्रुतेनान्वयसंभवे नाधिकृतेनान्वय उचित इत्यन्यथान्ये व्याचख्युरित्याह — [3]**अन्यैरिति**। **बाहीकेषु** द्वेशद्वयाद्बहिर्भूतेष्वित्यर्थः। **ठञ्ञिठाविति**। वृद्धादित्यनुवर्तमाने [4]"वाहीकग्रामेभ्यश्च' इत्यनेनेत्यर्थः। कथं कुणिदर्शनमाश्रितवानित्यत आह — **सेपुरमिति**। **अपत्येति** । [5]"उदीचां वृद्धात्' इति [6]"नित्यं वृद्ध' इत्यनेन चेत्यर्थः ॥

[7]इति श्रीमत्परमहंसपरिव्राजकाचार्यवर्यसत्यानन्दशिष्येश्वरानन्दविरचिते
भाष्यप्रदीपविवरणे प्रथमस्याध्यायस्य प्रथमे पादे नवममाह्निकम् ॥

॥ पादश्च समाप्तः ॥

[१, ५६७–५६८]

(**उद्द्योतनम्**) अत्र 'प्राचाम्' इत्याचार्यपरमिति कुणिमतम्। देशविशेषणमिति मतान्तरम्। तत्राद्यं मतमाह — **कुणिनेति**। तन्मते लक्ष्यवैषम्यं परिहरति — **व्यवस्थितेति**। व्यवस्थित-विभाषायाः प्रयोजनमाह — **तेनेति**। द्वितीयं मतमाह — **अन्येनेति**। श्रुतदेशविशेषणत्वे संभव-

---

[1] एतत्सूत्रव्याख्यानमेव न दृश्यते — ड, ढ.
[2] पा. सू. ४. २. ११७.
[3] प्रदीपे 'अन्येन तु' इत्यस्य स्थाने 'अन्यैस्तु' इति पाठ इति भाति।
[4] पा. सू. ४. २. ११७.
[5] पा. सू. ४. १. १५७.
[6] पा. सू. ४. ३. १४४.
[7] 'इति' इत्यस्यानन्तरं 'भाष्यप्रदीपविवरणे' इत्येवास्ति — च, छ; इति रामचन्द्रसर-स्वतीविरचिते — ट.

त्यश्रुताचार्यपरत्वमयुक्तमिति तदाशयः। प्राग्देशवासिनो जनाः प्राञ्चः, तेषां देश इति देशविशेषणत्वम्। देशविशेषणत्वस्य प्रयोजनमाह — **तेनेति**। **वाहीकेषु** प्रागुदग्देशबहिर्भूतेषु। **ठञ्ञिठाविति**। [1]'वृद्धाच्छः' इत्यतो वृद्धादित्यनुवृत्तौ [2]'वाहीकग्रामेभ्यश्च' इत्यनेनेत्यर्थः। कथं [3]कुणिदर्शनमाश्रितवान्, अत आह —**सेपुरमिति**। [4]'सैपुरिकी' इत्याद्युदाहरणात् तन्मताश्रयणनिश्चय इत्यर्थः। **अपत्येति**। [5]'उदीचां वृद्धात्' इत्यनेन [6]'नित्यं वृद्ध' इत्यनेन चेत्यर्थः। व्यवस्थित[7]विभाषाया उक्तप्रयोजनानुवादेन प्रयोजनान्तरमाह — **क्रोडेति**। देवदत्तशब्दो देशद्वयस्थग्रामद्वयवाची। तत्रोदग्देशे दैवदत्तः, प्राग्देशे 'दैवदत्तिकः' इति व्यवस्थितविभाषयैव प्रयोगद्वयसिद्धिरित्यर्थः॥

इति श्रीमहामहोपाध्यायाद्वैतविद्याचार्यश्रीमद्राघवसोमयाजिकुलावंतसश्रीमत्तिरुमलाचार्यवर्यस्य सूनोरन्नंभट्टस्य कृतौ महाभाष्यप्रदीपोद्द्योतने प्रथमस्याध्यायस्य प्रथमे पादे नवममाह्निकम्॥

॥ इति प्रथमः पादः ॥

[१, ५६७–५६८]

(**रत्नप्रकाशः**) **शैषिकेष्विति**। कर्तव्येष्वेवेति शेषः। तेन विकारे "नित्यं वृद्धशरादिभ्यः' इति मयड् न भवति। सेपुरस्कोनगरशब्दौ वाहीकग्रामवाचकौ। [8]'वाहीकग्रामेभ्यश्च' इति ठञ्ञिठौ। एतेन प्राचांग्रहणं देशविशेषणमाश्रयतां मतं भाष्यविरुद्धमिति स्फुटमेव। 'प्राचामाचार्याणाम्' इत्यस्यैवार्थस्य भाष्यस्वरससिद्धेः॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यहरिहरेन्द्रभगवत्पूज्यपादशिष्यश्रीशिवरामेन्द्रसरस्वतीयोगीन्द्रविरचिते महाभाष्यसिद्धान्तरत्नप्रकाशे प्रथमस्याध्यायस्य प्रथमे पादे नवममाह्निकम्॥

॥ पादश्चायं समाप्तः ॥

[१, ५६७–५६८]

(**नारायणीयम्**) [ठञ्ञिठोः] वृद्धाधिकारात् तयोस्तत्कार्यत्वम्। तत्र प्राग्ग्रहणस्याचार्यवाचितया विकल्पार्थत्वे पक्षे वृद्धप्रत्ययाभावेन सेपुरादेरणपि स्यात्। क्रोडदेवदत्तयोश्च पक्षे वृद्धप्रत्ययप्रसङ्गः। देशार्थत्वे तु क्रोडदेवदत्तयोरप्राग्देशत्वाद् वृद्धप्रत्ययाभावः सिध्यति। सेपुरस्कोनगरयोरपि त्वप्राग्देशत्वाद् वृद्धप्रत्ययाभावः स्यादिति न तत्त्वमिह निर्णेतुं शक्यमित्यत्राह — **कुणिनेति**।

---

[1] पा. सू. ४. २. ११४.
[2] पा. सू. ४. २. ११७.
[3] कुणिदर्शनमाश्रितम् — म; कुणिमतमाश्रितवान् — ऋ.
[4] 'सैपुरिकी' इत्यादि 'अपत्येति' इत्यन्तं नास्ति — अ.
[5] पा. सू. ४. १. १५७.
[6] पा. सू. ४. ३. १४४.
[7] विभाषयोक्त — अ, म.
[8] पा. सू. ४. ३. १४४.
[9] पा. सू. ४. २. ११७.

[तेनेति]। व्यवस्थितविभाषात्वेनेत्यर्थः। क्रोडग्रहणमप्राग्देशवाचिदेवदत्तस्याप्युपलक्षणम्। **दैवदत्त इति**। क्रोडस्याप्युपलक्षणम्। **भाष्यकार इति**। सेपुराद्यप्राग्देशवाच्युदाहरणात्। **वृद्धलक्षणेति**। [1]फिञ्मयटौ तल्लक्षणौ। **व्यवस्थितेति**। अत एव सेपुरादौ नित्यं वृद्धत्वम्॥

स्तूयतां पण्डितैः स्वात्मा पाण्डित्यं यत्प्रसादतः।
स गुरुः स्तूयतेऽस्माभिर्माधवार्पितमानसैः॥
जयति विबुधराजो भूसुरैः पूज्यमानो जगति विदितवृत्तो यज्वनामग्रगण्यः।
गुरुनयवशवर्ती गोध्वजे भक्तियुक्तो विदितसकल[शास्त्रो धर्मराजाख्ययज्वा]॥

[इति महामहोपाध्यायधर्मराज]यज्वशिष्यशास्त्रिनारायणकृतौ कैयटीय-
टीकायां प्रथमस्याध्यायस्य प्रथमे पादे नवममाह्निकम्॥
॥ पादश्च समाप्तः ॥

---

[1] उदीचां वृद्धादिति फिञ्, नित्यं वृद्धेति मयट्।

महाभाष्यप्रदीपव्याख्यानोपयुक्तानां मातृकाणामनुक्रमणिका

अ. अडैयार्कोशागाराल्लिखिता आस्माकीनकोशालये T. No. 155 अङ्किता। इयमुद्द्योतन-मातृका प्रथमाध्यायप्रथमपादतृतीयाह्निकारम्भे किंचिद्भागहीना पञ्चमाध्याये 'रजःकृषि' (५. २. ११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तभागहीना च।

आ. Government Oriental Mss. Library, Madras R. No. 271 अङ्किता आन्ध्रलिपिमयी। इयमुद्द्योतनमातृका। अस्यां प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति नवमाह्निके 'प्रत्ययस्य लुक्श्लुलुपः' (१. १. ६१) इति सूत्रे किंचिद्भागपर्यन्तं वर्तते। चतुर्दशोत्तरशतं पत्राणि सन्त्यस्याम्।

इ. G. O. M. L. R. No. 1500 अङ्किता आन्ध्रलिपिमयी मातृकोद्द्योतनस्येयम्। अत्र प्रथमाध्यायप्रथमपादचतुर्थाह्निके 'तुल्यास्यप्रयत्नं सवर्णम्' (१. १. ९.) इति सूत्रान्तिम-भागादारभ्य त्रिनवतितमपत्रान्तेऽष्टमाह्निके 'द्विर्वचनेऽचि' (१. १. ५९.) इति सूत्रे किंचिद्भागपर्यन्तमुपलभ्यते। एकोनविंशतितमत्र्यशीतितमपत्रे न स्तः। चतुर्नवतितमपत्रात् अष्टसप्ततिशततमपत्रान्तं न दृश्यते। एकोनाशीतितमपत्रात् सप्तनवतिशततमपत्रान्त उपलभ्यमाने 'समर्थः पदविधिः' (२. १. १) इति सूत्रे 'संख्याविशेषो व्यक्ताभिधानम्' इति वार्तिकव्याख्यानात् प्रभृति 'चतुर्थी तदर्थार्थ' (२. १. ३६) इति सूत्रे किंचिद्-भागपर्यन्तं चोपलभ्यते। त्रिनवतितमपत्रादुपरि एकोनाशीतितमपत्रात् प्राक् धर्मराजयज्व-शिष्यशास्त्रिनारायणकृतकैयटीयटीकायुक्तो भागः 202—229 पत्रान्तो योजितो दृश्यते।

ई. G. O. M. L. R. No. 4273 अङ्किता मातृकोद्द्योतनस्यान्ध्रलिपिमयी। अस्यां चत्वारिंशत्पत्रात्मिकायां केवलपत्राणि पञ्चान्तिमानि विहायावशिष्टेषु पञ्चत्रिंशति पत्रेषु प्रथमाध्यायप्रथमपादप्रथमद्वितीयाह्निके उपलभ्येते। प्रतिपृष्ठं नव पङ्क्तयो वर्तन्ते।

उ. G. O. M. L. R. No. 2038 अङ्कितोद्द्योतनमातृका काकिदपत्रलिखिता आन्ध्रलिपि-मयी। अस्यां षट्पञ्चाशत् पत्राणि सन्ति। प्रतिपुटं मार्कि पञ्चाशत् पङ्क्तयो वर्तन्ते। अत्र प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति सप्तमाह्निके 'मिदचोऽन्त्यात्परः' (१. १. ४७.) इति सूत्रे किंचिद्भागपर्यन्तं समुपलभ्यते।

ऊ. G. O. M. L. R. No. 1515 अङ्किता मातृकोद्द्योतनस्यान्ध्रलिपिमयी। अत्रादौ सप्तत्रिंशति पत्रेषु धर्मराजयज्वशिष्यशास्त्रिनारायणकृतकैयटीयटीकायुक्तो भागः, यत्र तृतीया-ह्निकात् प्रभृति पञ्चमाह्निके 'अदसो मात्' इति सूत्रे किंचिद्भागपर्यन्तं वर्तते। अष्टत्रिंशात् पत्रात् प्रभृत्यन्नंभट्टीयोद्द्योतनग्रन्थः। अत्र पञ्चमाह्निकारम्भात् प्रभृति 'इग्यणः संप्रसारणम्' (१. १. ४५) इति सूत्रे किंचिद्भागपर्यन्तं दृश्यते। आहत्य सप्तनवतिपत्राणि सन्त्यत्र।

ऋ. G. O. M. L. R. No. 2248. Vol. I देवनागरीलिपिमयी काकिदपत्रलिखितोद्द्योतनमातृका। अत्र प्रथमाध्यायद्वितीयपादारम्भात् प्रभृति द्वितीयाध्यायसमाप्त्यन्तं वर्तते। षष्टयुत्तरचतुश्शती पत्राण्यस्यां सन्ति। प्रतिपुटं विंशतिः पङ्क्तयो वर्तन्ते।
R. No. 2248 Vol. II अत्र तृतीयाध्यायात् प्रभृति 'केशाद्वोऽन्यतरस्याम्' (५. २. १०९) इति सूत्रपर्यन्तं वर्तते त्रिनवतिचतुश्शतीपुटान्ते। 'रजःकृषि' (५. २. ११२) इति सूत्रात् षष्ठाध्यायप्रथमपादप्रथमाह्निकान्तो भागो नास्ति। द्वितीयाह्निकात् षष्ठाध्यायसमाप्त्यन्तं वर्तते। पञ्चनवत्युत्तरषट्शती पुटानि सन्त्यत्र कोशे।
R. No. 2248 Vol. III. षण्णवत्युत्तरषट्शतीतः पुटात् प्रभृति नवोत्तरशतसहस्रपुटपर्यन्तेऽस्मिन् कोशे सप्तमाष्टमाध्यायौ विद्येते।

ऋ. बडोदा Oriental Institute No. 10310 अङ्किता आन्ध्रलिपिमयी तालपत्रकोशात्मिकोद्द्योतनमातृका। अस्यां प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति प्रथमाध्यायद्वितीयपादसमाप्त्यन्तं विद्यते। त्र्युत्तरद्विशती पत्राणि सन्ति। प्रतिपुटं सप्त पङ्क्तय उपलभ्यन्ते। षट्सहस्री ग्रन्था आहत्यात्र सन्ति।

ऌ. (a) बडोदा O. I. No. 7778 अङ्किता तालपत्रकोशात्मिकोद्द्योतनमातृका आन्ध्रलिपिमयी। अस्यां तृतीयाध्यायारम्भात् षष्ठाध्यायतृतीयपादान्तमुपलभ्यते। द्व्युत्तरत्रिशती पुटानि सन्ति। प्रतिपुटं सप्त पङ्क्तयश्च। त्रयोदशसहस्री ग्रन्थाः सन्त्यत्र।
(b) No. 6257 अङ्कितस्तालपत्रकोश आन्ध्रलिपिमयः। अत्र विंशत्युत्तरद्विशती पत्राणि सन्ति। प्रतिपुटं सप्त पङ्क्तयः। सप्तशत्युत्तरसप्तसहस्री ग्रन्था अत्र सन्ति। षष्ठाध्यायचतुर्थपादात् प्रभृत्यष्टमाध्यायान्तमत्र विद्यते।

क. शास्त्रिनारायणकृतायाः कैयटीयव्याख्याया मातृका। इयं G. O. M. L. R. No. 39 अङ्किता तस्याः प्रतिकृतिरास्माकीनकोशालये T. No. 226 अङ्किता। अस्यां प्रथमाध्यायप्रथमपादप्रथमाह्निकात् प्रभृत्यष्टमाह्निके 'न पदान्त' (१. १. ५८) इति सूत्रपर्यन्तमुपलभ्यते।

ख. G. O. M. L. R. No. 1515. तस्याः प्रतिकृतिरास्माकीनकोशालये T. No. 236 अङ्किता। अस्यां प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति पञ्चमाह्निके 'अदसो मात्' (१. १. १२) इति सूत्रपर्यन्तमेव विद्यते।

ग. होषियार्पूर् No. 4438 अङ्किताद्विलिखितास्मत्कोशालये T. No. 600. अङ्किता नवाह्निकभागपर्यन्तयुता नारायणीयस्य मातृका।

च. G. O. M. L. R. No. 3866 मातृकायाः प्रतिकृतिरास्माककोशालये T. No. 200 अङ्किता। इयं बृहद्विवरणस्य मातृका। अत्रारम्भात् प्रभृति प्रथमाध्यायद्वितीयपादतृतीयाह्निके 'सरूपाणामेकशेषः' (१. २. ६४) इति सूत्रे किंचिद्भागपर्यन्तं दृश्यते।

छ. G. O. M. L. R. No. 3894. अस्याः प्रतिकृतिरास्माककोशालये T. No. 207

अङ्किता बृहद्विवरणस्य मातृका। अत्रापि सरूपसूत्रपर्यन्त एव भागो दृश्यते।

ज. पुण्यपत्तने (पूना) Bhandarkar Oriental Research Institute No. 184 1882-83. D. No. 58 अङ्किता काकिदपत्रलिखिता बृहद्विवरणमातृका। अस्यां पत्राण्यष्टाविंशतिः, प्रायशः प्रतिपुटं चतुर्दश पङ्क्तयः प्रतिपङ्क्ति द्वात्रिंशद्वर्णाश्च सन्ति। अस्यां प्रथमाध्यायप्रथमपादारम्भात् प्रभृति तृतीयाह्निके वृद्धिरादैच्सूत्रे किंचिद्भागपर्यन्तमेव वर्तते।

झ. पुण्यपत्तने (पूना) B. O. R. I. No. 37. 1872-73 No. 57. काकिदपत्रलिखिता बृहद्विवरणमातृकाशीतिपत्रयुता। अस्यां प्रथमाध्यायप्रथमपादारम्भात् प्रभृति पञ्चमाह्निके 'ओत्' (१. १. १५) इति सूत्रपर्यन्तं विद्यते।

ञ. बडोदा O. I. No. 591. अङ्किता काकिदपत्रलिखिता देवनागरीलिपिमयी बृहद्विवरणमातृका। अस्यां त्रिनवतिपत्राणि, प्रतिपुटं प्रायशो विंशतिः पङ्क्तयः, प्रतिपङ्क्ति चत्वारिंशदक्षराणि च सन्ति। आदितो नवाह्निकभागोऽत्र वर्तते।

ट. बडोदा O. I. Acc. No. 10035. ग्रन्थलिपिमयी तालपत्रकोशात्मिका बृहद्विवरणस्य मातृका। अस्यां प्रथमाध्यायप्रथमद्वितीयपादौ तृतीयपादे 'स्वरितेनाधिकारः' (१. ३. ११) इति सूत्रपर्यन्तं च वर्तन्ते। अत्र चतुष्षष्टयुत्तरशतं पत्राणि, प्रतिपुटं सप्ताष्टाः पङ्क्तयश्च सन्ति। आहत्याष्टशतीषट्सहस्री ग्रन्था वर्तन्ते।

ड. G. O. M. L. R. No. 3866 मातृकायाः प्रतिकृतिरस्मदीयकोशालये T. No. 207 अङ्किता लघुविवरणस्येयं मातृका। अत्र प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति प्रथमाध्यायतृतीयपादे 'यथासंख्यमनुदेशः समानाम्' (१. ३. १०) इति सूत्रपर्यन्तमेवोपलभ्यते।

ढ. G. O M. L. R. No. 3894 मातृकायाः प्रतिकृतिरस्मदीयकोशालये T. No. 224 अङ्किता लघुविवरणस्य मातृका। अस्यां च प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रथमाध्यायतृतीयपादे 'यथासंख्यमनुदेशः समानाम्' (१. ३. १०) इति सूत्रपर्यन्तमेव वर्तते।

ण. बडोदा O. I. Acc. No. 13002 अङ्किता काकिदपत्रलिखिता देवनागरीलिपिमयी लघुविवरणस्य मातृका। अत्र प्रथमाध्यायप्रथमपादतृतीयाह्निकात् प्रभृति नवमाह्निकान्त एव भागो वर्तते। पञ्चत्रिंशत् पत्राण्यत्र सन्ति।

त. G. O. M. L. D. No. 130. अस्याः प्रतिकृतिरास्माकीनकोशालये T. No. 225 अङ्किता लघुविवरणमातृका। अत्र प्रथमाध्यायप्रथमपादतृतीयाह्निकात् 'न पदान्त' (१. १. ५८) इति सूत्रपर्यन्तो भागोऽस्ति।

ति. नारायणीयस्य मातृका तिरुवनन्तपुरं O. M. L. No. 13038 देवनागरलिपिः T. No. 461. नवाह्निकपर्यन्तः प्रथमाध्यायप्रथमपादोऽत्र वर्तते। मलयाललिप्यां वर्तमानापि

Palace Library 779 अङ्कितापरापि मातृका [कठिनप्रकाशिका] पूर्वमातृका-समानरूपैव दृश्यते।

ब. बडोदा O. I. Acc. No. 11203. अङ्किता देवनागरीलिपिमयी काकिदपत्रलिखिता, अस्याः प्रतिकृतिरस्मदीयकोशालये T. No. 498 अङ्किता रत्नप्रकाशस्य मातृका। अस्यां प्रथमाध्यायात् प्रभृति चतुर्थाध्यायान्तो भाग एव वर्तते।

म. मद्रपुरीराजकीयप्राच्यकोशागारमुद्रितं प्रदीपोद्द्योतनसहितं नवह्निकभागयुतं महाभाष्यम्।

आकरग्रन्थानां सूची

ऋ. सं. — ऋक्संहिता.
का. वा. — कात्यायनवार्तिकम्.
चौ. — चौखाम्बामुद्रितं महाभाष्यं नवाह्निकपर्यन्तं प्रदीपोद्द्योतसहितम्, उपरि प्रदीपमात्रसहितम्.
तै. आ. — तैत्तिरीयारण्यकम्.
तै. ब्रा. — तैत्तिरीयब्राह्मणम्.
तै. सं. — तैत्तिरीयसंहिता.
नि. — निर्णयसागरमुद्रितं महाभाष्यम्. प्रदीपोद्द्योतसहितम्.
परिभाषा. — परिभाषेन्दुशेखरः चौखाम्बा. १९४३. विद्याविलासमुद्रितः।
पा. शि. — पाणिनीयशिक्षा.
पा. सू. — पाणिनिसूत्रम्.
पू. — पुण्यपत्तन (पूना) नगरप्रकाशितं महाभाष्यम्.
F. Kielhorn महाशयशोधितम्.
प्रवर्तकीयम् — प्रवर्तकोपाध्यायकृतमहाभाष्यप्रदीपप्रकाशः आस्माकीनकोशालये T. No. 99 अङ्कितः।
लौ. न्या. — लौकिकन्यायाञ्जलिः.
लौ. न्या. साहस्री. — (भुवनेश) लौकिकन्यायसाहस्री.
श. कौ. — शब्दकौस्तुभः.
श्लो. वा. — श्लोकवार्तिकम्. महाभाष्यस्थम्.
ह. — हरयाणासाहित्यसंस्थानप्रकाशितं प्रदीपोद्द्योतसहितं महाभाष्यम्.

प्रथमाध्यायप्रथमपादविषयसूचिका

प्रथमसंपुटम्

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
१.	अइउण्	...	११३
२.	ऋलृक्	...	१३७
३, ४.	एओङ्, ऐऔच्	...	१५१
५.	हयवरट्	...	१७२
६.	लण्	...	१९३
७.	ञमङणनम्	...	१९९
८.	झभञ्	...	१९९
९.	वृद्धिरादैच्. १. १. १.	...	२०४
१०.	इको गुणवृद्धी. १. १. ३.	...	२५०
११.	न धातुलोप आर्धधातुके १. १. ४.	...	२९३
१२.	क्ङिति च. १. १. ५.	...	३१२
१३.	दीधीवेवीटाम्. १. १. ६.	...	३३२
१४.	हलोऽनन्तराः संयोगः १. १. ७.	...	३३८
१५.	मुखनासिकावचनोऽनुनासिकः १. १. ८.	...	३५७
१६.	तुल्यास्यप्रयत्नं सवर्णम्. १. १. ९.	...	३६३
१७.	नाज्झलौ. १. १. १०.	...	३८६

द्वितीयसंपुटम्

१८.	ईदूदेद् द्विवचनं प्रगृह्यम् १. १. ११.	...	१
१९.	अदसो मात् १. १. १२.	...	२१
२०.	शे. १. १. १३.	...	३५
२१.	निपात एकाजनाङ्. १. १. १४.	...	३८
२२.	ओत्. १. १. १५.	...	४७
२३.	उञ्नः. १. १. १७	...	५८
२४.	ऊँ. १. १. १८	...	५८
२५.	ईदूतौ च सप्तम्यर्थे. १. १. १९.	...	६१
२६.	दाधा घ्वदाप्. १. १. २०.	...	६६
२७.	आद्यन्तवदेकस्मिन्. १. १. २१.	...	८५
२८	तरप्तमपौ घः. १. १. २२.	...	९८

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
२९.	बहुगणवतुडति संख्या. १. १. २३.	...	१०२
३०.	ष्णान्ता षट्. १. १. २४.	...	११९
३१.	डति च. १. १. २५.	...	१२६
३२.	क्तक्तवतू निष्ठा. १. १. २६.	...	१२८
३३.	सर्वादीनि सर्वनामानि. १. १. २७.	...	१३२
३४.	विभाषा दिक्समासे बहुव्रीहौ. १. १. २८.	...	१६६
३५.	न बहुव्रीहौ. १. १. २९.	...	१७१
३६.	तृतीयासमासे. १. १. ३०.	...	१७६
३७.	विभाषा जसि. १. १. ३२.	...	१७८
३८.	पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्. १. १. ३४.	...	१७९
३९.	स्वमज्ञातिधनाख्यायाम्. १. १. ३५.	...	१८४
४०.	अन्तरं बहिर्योगोपसंव्यानयोः. १. १. ३६.	...	१८५
४१.	स्वरादिनिपातमव्ययम्. १. १. ३७.	...	१८७
४२.	तद्धितश्चासर्वविभक्तिः. १. १. ३८.	...	१९०
४३.	कृन्मेजन्तः. १. १. ३९.	...	२०८
४४.	अव्ययीभावश्च. १. १. ४१.	...	२२६
४५.	शि सर्वनामस्थानम्. १. १. ४२	...	२२९
४६.	सुडनपुंसकस्य. १. १. ४३.	...	२२९
४७.	न वेति विभाषा. १. १. ४४.	...	२३२
४८.	इग्यणः संप्रसारणम्. १. १. ४५.	...	२६५
४९.	आद्यन्तौ टकितौ. १. १. ४६.	...	२७३
५०.	मिदचोऽन्त्यात् परः. १. १. ४७.	...	२८३
५१.	एच इग्घ्रस्वादेशे. १. १. ४८.	...	२९४
५२.	षष्ठी स्थानेयोगा. १. १. ४९.	...	२९९
५३.	स्थानेऽन्तरतमः. १. १. ५०.	...	३०६
५४.	उरण् रपरः १. १. ५१.	...	३२७
५५.	अलोऽन्त्यस्य. १. १. ५२.	...	३५१
५६.	डिच्च. १. १. ५३.	...	३५७
५७.	आदेः परस्य. १. १. ५४.	...	३५८
५८.	अनेकाल्शित् सर्वस्य. १. १. ५५.	...	३५८

तृतीयसंपुटम्

५९.	स्थानिवदादेशोऽनल्विधौ. १. १. ५६.	...	१
६०.	अचः परस्मिन् पूर्वविधौ. १. १. ५७.	...	३९
६१.	न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु. १. १. ५८.		८२

क्रमाङ्काः	सूत्राणि		पृष्ठाङ्काः
६२.	द्विर्वचनेऽचि. १. १. ५९.	...	१०६
६३.	अदर्शनं लोपः. १. १. ६०.	...	१२३
६४.	प्रत्ययस्य लुक्श्लुलुपः. १. १. ६१.	...	१२७
६५.	प्रत्ययलोपे प्रत्ययलक्षणम्. १. १. ६२.	...	१३८
६६.	न लुमताङ्गस्य. १. १. ६३.	...	१६१
६७.	अलोऽन्त्यात् पूर्व उपधा. १. १. ६५.	...	१८०
६८.	तस्मिन्निति निर्दिष्टे पूर्वस्य. १. १. ६६.	...	१८९
६९.	तस्मादित्युत्तरस्य. १. १. ६७.	...	१८९
६९.	स्वं रूपं शब्दस्याशब्दसंज्ञा. १. १. ६८.	...	२०५
७०.	अणुदित् सवर्णस्य चाप्रत्ययः. १. १. ६९.	...	२१८
७१.	तपरस्तत्कालस्य. १. १. ७०.	...	२३६
७२.	आदिरन्त्येन सहेता. १. १. ७१.	...	२४६
७३.	येन विधिस्तदन्तस्य. १. १. ७२.	...	२४८
७४.	वृद्धिर्यस्याचामादिस्तद्वृद्धम् १. १. ७३.	...	२८७
७५.	त्यदादीनि च. १. १. ७४.	...	२९८
७६.	एङ् प्राचां देशे. १. १. ७५.	...	३०१

प्रथमाध्यायप्रथमपादव्याख्याननिर्दिष्टसूत्राणामकाराद्यनुक्रमणिका

सूत्राणि	संपुटम्	पृष्ठाङ्काः
अइउण् माहेश्वर. १	I	११३
अचः परस्मिन् पूर्वविधौ १. १. ५७	II	३९
अणुदित्सवर्णस्य चाप्रत्ययः १.१. ६९	III	२१८
अदर्शनं लोपः १. १. ६०	III	१२३
अदसो मात् १. १. १२	II	२१
अन्तरं बहिर्योगोपसंव्यानयोः १. १. ३६	II	१८५
अलोऽन्त्यस्य १. १. ५२	II	३५१
अलोऽन्त्यात् पूर्व उपधा १. १. ६५	III	१८०
अव्ययीभावश्च १. १. ४१	II	२२६
आदिरन्त्येन सहेता १. १. ७१	III	२४६
आदेः परस्य १. १. ५४	II	३५८
आद्यन्तवदेकस्मिन् १. १. २१.	II	८५
आद्यन्तौ टकितौ १. १ . ४६	II	२७३
इको गुणवृद्धी १. १. ३.	I	२५०
इग्यणः संप्रसारणम् १. १. ४५	II	२६५
ईदूतौ च सप्तम्यर्थे १. १. १९	II	६१
ईदूदेद् द्विवचनं प्रगृह्यम् १. १. ११	II	१
उञ्ः १. १. १७.	II	५८
उरण् रपरः १. १. ५१.	II	३२७
ऊँ १. १. १८.	II	५८
ऋलृक् माहेश्वर २.	I	१३७
एओङ माहेश्वर ३	I	१५१
एच इग्घ्रस्वादेशे १. १. ४८.	II	२९४
एङ प्राचां देशे १. १. ७५.	III	३०१
ऐऔच् माहेश्वर. ४	I	१५१
ओत् १. १. १५.	II	४७
कृन्मेजन्तः १. १. ३९	II	२०८
ङिति च १. १. ५.	I	३१२
क्तक्तवतू निष्ठा १. १. २६.	II	१२८
ङिच्च १. १. ५३	II	३५७
ञमङणनम् माहेश्वर. ७.	I	१९९
झभञ् माहेश्वर. ८	I	१९९
डति च १. १. २५.	II	१२६

सूत्राणि	संपुटम्	पृष्ठाङ्काः
तद्धितश्चासर्वविभक्तिः १. १. ३८	II	१९०
तपरस्तत्कालस्य १. १. ७०	III	२३६
तरप्तमपौ घः १. १. २२	II	९८
तस्मादित्युत्तरस्य १. १. ६७	III	१८९
तस्मिन्निति निर्दिष्टे पूर्वस्य १. १. ६६	III	१८९
तुल्यास्यप्रयत्नं सवर्णम् १. १. ९	I	३६३
तृतीयासमासे १. १. ३०	II	१७६
त्यदादीनि च १. १. ७४	III	२९८
दाधा घ्वदाप् १. १. २०	II	६६
दीधीवेवीटाम् १. १. ६	I	३३२
द्विर्वचनेऽचि १. १. ५९	III	१०६
न धातुलोप आर्धधातुके १. १. ४	I	२९३
न पदान्तद्विर्वचनवरेयलोपस्वरसवर्णानुस्वारदीर्घजश्चर्विधिषु १. १. ५८	III	८२
न बहुव्रीहौ १. १. २९	II	१७१
न लुमताङ्गस्य १. १. ६३	III	१६१
न वेति विभाषा १. १. ४४	II	२३२
नाज्झलौ १. १. १०	I	३८६
निपात एकाजनाङ् १. १. १४	II	३८
पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् १. १. ३४	II	१७९
प्रत्ययलोपे प्रत्ययलक्षणम् १. १. ६२	III	१३८
प्रत्ययस्य लुक्श्लुलुपः १. १. ६१	III	१२७
बहुगणवतुडति संख्या १. १. २३	II	१०२
मिदचोऽन्त्यात् परः १. १. ४७	II	२८३
मुखनासिकावचनोऽनुनासिकः १. १. ८	I	३५७
येन विधिस्तदन्तस्य १. १. ७२	III	२४८
लण् माहेश्वर ६	I	१९३
विभाषा जसि १. १. ३२	II	१७८
विभाषा दिक्समासे बहुव्रीहौ १. १. २८	II	१६६
वृद्धिरादैच् १. १. १.	I	२०४
वृद्धिर्यस्याचामादिस्तद् वृद्धम् १. १. ७३	III	२८७
शि सर्वनामस्थानम् १. १. ४२	II	२२९
शे १. १. १३	II	३५
षष्ठी स्थानेयोगा १. १. ४९	II	२९९
ष्णान्ता षट् १. १. २४	II	११९
सर्वादीनि सर्वनामानि १. १. २७	II	१३२
सुडनपुंसकस्य १. १. ४३	II	२२९
स्थानिवदादेशोऽनल्विधौ १. १. ५६	III	१

सूत्राणि	संपुटम्	पृष्ठाङ्काः
स्थानेऽन्तरतमः १. १. ५०	II	३०६
स्वं रूपं शब्दस्याशब्दसंज्ञा १. १. ६८	III	२०५
स्वमज्ञातिधनाख्यायाम् १. १. ३५	II	१८४
स्वरादिनिपातमव्ययम् १. १. ३७	II	१८७
हयवरट् माहेश्वर. ५	I	१७२
हलोऽनन्तराः संयोगः १. १. ७	I	३३८

TABLE DES MATIÈRES

		PAGE
प्रथमाध्यायप्रथमपादे — अष्टममाह्निकम्	...	१
नवममाह्निकम्	...	१२३
महाभाष्यप्रदीपव्याख्यानोपयुक्तानां मातृकाणामनुक्रमणिका	...	३०५
आकरग्रन्थानां सूची	...	३०८
प्रथमाध्यायप्रथमपादविषयसूचिका	...	३०९
प्रथमाध्यायप्रथमपादव्याख्याननिर्दिष्टसूत्राणामकाराद्यनुक्रमणिका	...	३१२

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE

Nos.

1. Kārāvelane —*Kāreikkālammeiyār*, œuvres éditées et traduites. Introduction par Jean Filliozat. 1956.
2. Jean Filliozat — *Les relations extérieures de l'Inde* (1)
   1. *Les échanges de l'Inde et de l'Empire Romain aux premiers siècles de l'ère chrétienne.*
   2. *La doctrine brahmanique à Rome au IIIème siècle.* 1956.
3. Madeleine Biardeau — *Le Tattvabindu de Vācaspatimiśra.* Edition critique, traduction et introduction. 1956.
4. J. Monchanin, J. Filliozat, A. Bareau — *Entretiens* 1955. 1956.
5. Louis Renou — *Etudes sur le vocabulaire du Ṛgveda.* Première série. 1958.
6. Suzanne Siauve — *La voie vers la connaissance de Dieu* (*Brahma-Jijñāsā*) *selon l'Anuvyākhyāna de Madhva.* 1957.
7. Dev Raj — *L'esclavage dans l'Inde ancienne d'après les textes palis et sanskrits.* Avec une préface du Dr. Jean Filliozat. 1957.
8. Alain Daniélou — *Tableau comparatif des intervalles musicaux.* 1958.
9. Alain Daniélou — *La musique du Cambodge et du Laos.* 1957.
10. André Bareau — *La vie et l'organisation des communautés bouddhiques modernes de Ceylan.* 1957.
11. Alain Daniélou et N.R. Bhatt — *Textes des Purāṇa sur la théorie musicale.* Vol. I, Edition critique, traduction française et introduction. 1959.
12. Charlotte Vaudeville —*Kabīr Granthāvalī* (*Dohā*). Avec introduction, traduction et notes. 1957.
13. Madeleine Biardeau — *Sphoṭa Siddhi* (*La Démonstration du Sphoṭa*) *par Maṇḍana Miśra.* Introduction, traduction et commentaire. Texte sanskrit établi par N.R. Bhatt avec la collaboration de T. Ramanujam. 1958.
14. Suzanne Siauve — *Les noms védiques de Viṣṇu dans l'Anuvyākhyāna de Madhva* (*Brahma-Sūtra* I, 1, *adhikaraṇa* 2 *à* 12). Texte avec traduction et notes. 1959.
15. Charlotte Vaudeville — *Etude sur les sources et la composition du Rāmāyaṇa de Tulsī-Dās.* Traduction en hindi par J.K. Balbir. तुलसीदास रचित रामचरितमानस का मूलाधार व रचनाविषयक समालोचनात्मक एक अध्ययन, fasc. I. 1959, fasc. II. 1965.
16. Alain Daniélou et N.R. Bhatt — *Le Gītālaṃkāra.* L'ouvrage original de Bharata sur la musique. Edition critique, traduction française et introduction. 1959.
17. Rasik Vihari Joshi — *Le rituel de la dévotion kṛṣṇaïte.* Préface par Jean Filliozat. 1959.
18. N. R. Bhatt — *Rauravāgama,* édition critique, Vol. I. Introduction : Les Āgama çivaïtes, par Jean Filliozat. 1961. Vol. II, 1972.
19. R. Dessigane, P.Z. Pattabiramin et J. Filliozat — *La légende des jeux de*

Nos.

Civa à Madurai d'après les textes et les peintures. Vol. I Texte — Vol. II Planches. 1960.

20. Claude Jacques — *Gayāmāhātmya.* Introduction, édition critique et traduction française. 1962.
21. Charlotte Vaudeville — *Les duhā de Dhola Mārū.* Avec introduction, traduction et notes. 1962.
22. Sayida Surriya Hussain — *Garcin de Tassy, Biographie et étude critique de ses œuvres.* 1962.
23. N.R. Bhatt — *Mṛgendrāgama (Kriyāpāḍa et Caryāpāda) avec le commentaire de Bhaṭṭa Nārāyaṇakaṇṭha,* édition critique. 1962.
24. N.R. Bhatt — *Ajitāgama,* édition critique. Vol. I. 1963. Vol. II. 1967.
25. Hélène Brunner-Lachaux — *Le rituel quotidien dans la tradition śivaïte de l'Inde du Sud selon Somaśambhu — Somaśambhupaddhati,* Introduction, traduction et notes. 1ère partie. Le Rituel quotidien. 1963. 2ème partie. Rituels occasionnels. 1968.
26. Pierre-Sylvain Filliozat — *Le Pratāparudrīya de Vidyānātha* — avec le commentaire *Ratnāpaṇa* de Kumārasvāmin. Traduction, introduction et notes. 1963.
27. Dessigane, P.Z. Pattabiramin et J. Filliozat — *Les légendes çivaïtes de Kāñcipuram.* 1964.
28. Ch. Vaudeville — *Bārahmāsā.* Les chansons des douze mois dans les littératures indo-aryennes. 1965.
29. J. Filliozat et P.Z. Pattabiramin — *Parures divines du sud de l'Inde.* 1966.
30. Michèle Lupsa — *Chants à Kālī de Rāmprasād.* Introduction, texte bengali, traduction et notes. 1967.
31. R. Dessigane et P.Z. Pattabiramin — *La légende de Skanda.* 1967.
32. M.E. Adicéam — *Contribution à l'étude d'AiyaNār-Śāstā.* 1967.
33. J.Filliozat — *Un catéchisme tamoul du XVI^e siècle en lettres latines.* 1967.
34. P. Joshi — *Industrialisation et Société dans l'Inde du Nord.* Introduction par J. Filliozat : Observations sur l'étude des sociétés et de l'économie de l'Inde. 1967.
35. F.Gros — *Le Paripāṭal,* Texte tamoul, introduction, traduction et notes. 1967.
36. P.S. Filliozat — *Œuvres poétiques de Nīlakaṇṭha Dīkṣita.* I. Texte, traduction et notes. 1967.
37. *Index des mots de la littérature tamoule ancienne,* Vol. I. 1967; Vol. II. 1968; Vol. III. 1970.
38. Suzanne Siauve — *La Doctrine de Madhava.* 1968.
39. François Gros et R. Nagaswamy — *Uttaramērūr.* Légendes, Histoire,

PUBLICATIONS DE L'INSTITUT FRANÇAIS D'INDOLOGIE
(*suite*)

Nos

Monuments, avec le *Pañcavaradakṣetramātmya* édité par K. Srinivasacharya. 1970.

40. B. Dagens — *Mayamata*. Traité sanskrit d'architecture. Edition critique, traduction et notes. 1ère partie 1970. 2ème partie 1976.
41. N.S. Shukla — *Le Karṇānanda de Kṛṣṇadāsa*. Edition et traduction annotée. 1971.
42. P.Z. Pattabiramin — *Sanctuaires rupestres du Sud de l'Inde*. Vol. I. Andhra. 1971. Vol. II. Tamilnad et Kerala. 1975.
43. Suzanne Siauve — *Les hiérarchies spirituelles selon l'Anuvyākhyāna de Madhva*. 1971.
44. Capitaine de Vaisseau Cordier — *Historique et Statistique de Karikal*. Texte rédigé en 1825. Présentation par François Gros. Vol. I. 1971.
45. Jean Filliozat — Un texte tamoul de dévotion vishnouïte. *Le Tiruppāvai d'Āṇṭāḷ*. 1971.
46. Marie-Claude Porcher — *Rāghavayādavīya* par Veṅkaṭādhvarin. Texte sanskrit édité par M.S. Narasimhacharya. Etude et Traduction. 1972.
47. Neelakanta Sarma — *Textes sanskrits et tamouls de Thailande*. Introduction par Jean Filliozat. 1972.
48. Marie-Claude Porcher — Un poème satirique sanskrit, la *Viśvaguṇādarśacampū*. Introduction, traduction et notes. 1972.
49. Jean Filliozat — Un texte de la religion kaumāra, le *TirumurukāRRuppaṭai*. 1973.
50. Association Internationale des études Tamoules. Compte rendu de la IIIème Conférence Internationale (Proceedings of the Third International Conference Seminar, Paris 1970) édité par François Gros et X.S. Thani Nayagam. 1973.
51. *Mahābhāṣyapradīpavyākhyānāni*, Commentaires sur le Mahābhāṣya de Patañjali et le Pradīpa de Kaiyaṭa, édition critique par M.S. Narasimhacharya. Présentation par P.S. Filliozat. Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. 1973. Vol. II. : Adhyāya I, Pāda I, Āhnika 5-7. 1975.
52. Alix Raison — *La Hārītasaṃhitā* : Texte médical sanskrit avec un Index de nomenclature âyurvédique. 1974.
53. Tara Michaël — Le joyau du Śiva-yoga, *Śivayogaratna* de Jñānaprakāśa. Edition, traduction et notes. 1975.
54. *Le Mahābhāṣya de Patañjali* avec le Pradīpa de Kaiyaṭa et l'Uddyota de Nāgeśa Vol. I. : Adhyāya I, Pāda I, Āhnika 1-4. Traduction par Pierre Filliozat. 1975.
55. Vasundhara Filliozat — *Le Temple de Tirumaṅkaiyālvār à Hampi*. 1976.